Kendrīya Sanskṛit Vidyapītha Series No. 24

NYĀYAKALPALATIKĀ

A commentary on the Bṛhadāraṇyakopaniṣad-bhāṣya-vārttika

BY

Vidyāsāgara Ānandapūrṇa Munīndra

Critically Edited with Ṭippaṇa

BY

Paṇḍitarāja Śāstraratnākara

V. SUBRAHMANYA SASTRI

(Recipient of President and Sahitya Akademi's Awards)
Reader in Sanskrit (Retd.) Annamalai University.
Hony. Director, Saṁskṛit Education Society, Madras.
Head Pandit, Advaita Sabha, Kumbakonam.

VOLUME II

KENDRĪYA SANSKRIT VIDYĀPĪṬHA,

TIRUPATI.

1975

First Edition 1975

Published by the Principal, Kendriya Sanskrit Vidyapeetha, Tirupati (A.P.) for the Rashtriya Sanskrit Sansthar, Ministry of Education & S. W., Government of India, and Printed by Rathnam Press, Madras-600001.

न्द्रीय संस्कृतविद्यापीठ ग्रन्थमाला संख्या - २४

॥ न्यायकल्पलतिका ॥

बृहदारण्यकोपनिषद्भाष्यवार्त्तिकव्याख्या

विद्यासागर - आनन्दपूर्णमुनीन्द्रविरचिता

पण्डितराजैः शास्त्ररत्नाकरैः राष्ट्रपति-साहित्यअकादमीसंमानभाजनैः

वि. सुब्रह्मण्यशास्त्रिभिः

कुम्भघोणाद्वैतसभाप्रधानपण्डितैः

परिशोध्य टिप्पणादिभिः परिष्कृत्य संपादिता

तिरुपतिस्थ-

केन्द्रीयसंस्कृतविद्यापीठेन प्रकाशिता ।

द्वितीयः संपुटः

केन्द्रीयसंस्कृतविद्यापीठम्

तिरुपति

१९७५

प्रथमप्रकाशनम् १९७५

रत्नं प्रेस्, ११, बद्रैयन् स्ट्रीट् मद्रास-१ इत्येतैः मुद्रितम् ।

KENDRIYA SANSKRIT VIDYAPEETHA, TIRUPATI

PREFACE

On behalf of the Kendriya Sanskrit Vidyapeetha it is my proud privilege to present this learned Volume, critical edition of Nyayakalpalatika, edited by Shri Veppathur Subrahmanya Sastrigal, who is one of the eminent authorities in Advaita and Nyaya.

This work of Ānandapūrṇa reveals the deep and latent thoughts in Suresvara's Vārtika in a lucid and scholarly manner. The editor has also added a few explanatory notes so that the interpretation of the various topics discussed in the text becomes clear.

The value of Sureśvara's Vārtika lies in that it presents the views of Bhartṛprapañca, Draviḍācārya and some earlier preceptors of Advaita with greater details and sometimes refutes them on independent lines.

The Nyāyakalpalatikā by Ānandapūrṇa, published for the first time in these volumes, is as indispensable as the Śāstraprakāśikā of Ānandagiri in disentangling the numerous knots with which Sureśvara's Vārtika on the Bṛhadaraṇyakopaniṣadbhāṣya is replete. Besides satisfying the conditions laid down in the traditional definition of a commentary [1] it possesses certain noteworthy features that enhance its value in the study of the Bṛhadāraṇyaka literature.

Sureśvara's preference to the medium of verse in composing his Vārtika had made him employ many words in obscure or out, of, the—way senses, since the oft-used words may not conform to the rules of prosody. The Nyāyakalpalatikā does not miss to make note of all such words. Cf.

विरोध (I. 9) अभिद्रस्य (I. 41) अपरस्पर (I. 48)[2]

1. Cf. व्याख्याने पञ्चलक्षणम्

2. The Roman numerals stand for the volume and the Indo-Arabic numerals for the pages of the Nayāyakalpalatikā.

प्राणात् (I. 63) आत्मावबोध (I. 74) अन्वर्थ (II. 654)[3]

At times Ānandapūrṇa also uses words in meanings not well known: भाविक (I.50,62) आक्षिपति (II.693).[4] Not infrequently does he use क्तान्त words in the abstract sense (bhāvārtha). Cf. प्रदर्शित (1.33) फलाम्रात (1.44) मूर्तभावात् (1.49), and अध्यस्तविशिष्ट (1.56) and rarely an abstract noun in a concrete sense फलरागवत् (1.39). As and when occasion arises he offers handy definitions of such familiar things as विहितत्व, इष्टा पूर्त, दत्त [5] and so on. In his anxiety to be very brief in expression he leaves many passages elliptical by omitting even necessary words and thus runs the risk of becoming rather hard for the readers' understanding.

स्वर्गादिकमिति नरकपदोपादानात् (I.31)

कर्मैवेति ज्ञानसाधनमिति शेष: (I.75)

To justify the meanings given by the Bhāṣyakāra he profusely cites Vedic passages wherein the words in question have been used in the sense intended. His observations on the use of mṛtyu (II. 37) and अभिपूर्वो मन्यति: (II. 49) deserve notice in this regard.

Ānandapūrṇa carefully and consistently supplements the Vārtikas wherever they show signs of incompleteness. On नत्वभूतार्थवादित्वं (I. 44) he observes: अपि तु मानान्तर विरोधादि इति तुशब्दार्थ:. He points out all those instances where Sureśvara has taken recourse to the Mādhyandina recension of the Br. Up. On ईप्सन्तींति श्रुतेर्बलात् (I. 10) he remarks: एतमेव प्रव्राजिनो लोकमीप्सन्त: प्रव्रजन्ति इति माध्यन्दिनश्रुतौ. Though he relies upon earlier authorities he is not very fond of quoting passages from their works in support of what he has said. In explaining the Vārtikas (I. 59-62) that establish that Āvidyā is cognised by the Sākṣin and not by the Pramāṇas, Ānandagiri actually quotes the Pañcapādikāvivaraṇa whereas Ānandapūrṇa is content with merely presenting the spirit of the Vivaraṇa.

---

3. These words are used in the senses वैधर्म्यम्, अद्वितीयस्य, अन्योन्य, बलात्, वैराग्यम् and अनुरूप respectively.

4. भाविक meaning स्वाभाविक and अक्षिपति meaning दूषयति

5. See. I. pp. 33 and 34.

In addition to identifying passages from the Upaniṣadic texts he spares no pain to locate and record, in full, all the passages from the Karmakāṇḍa referred to by Sureśvara by mere pratikas.[6] The ease and readiness with which he quotes from the extensive smṛti literature on all occasions, when they are required to elucidate Sureśvara, speak for his deep erudition in smṛti literature.[7] His making use of Bhavabhūti's oft-quoted line कालोऽप्ययं निरवधिर्विपुला च पृथ्वी to build the pūrvapakṣa. viz., that it is possible, for some talented person, to strictly carry out all the injunctions and prohibitions enjoined in the Vedas, is indeed ingenious. His explanation of the word Samsiddi in कर्मणैव हि संसिद्धिमास्थिता जनकादय: (Gitā. 3.20) is really enlightening and admirable. Śankarācarya explains the word Samsiddhi as mokṣa and interprets the word Karmaṇā in two different ways according as Janaka and others are personalities who had attained self-realisation or aspirants endeavouring for self-realisation. But Ānandapūrṇa takes Samsiddhi as meaning "purification of the mind." The authority on which he depends in assigning this meaning is the Gītā itself. By drawing a comparision between the passage in the Gītā referred to above and the following passages of the Gītā,

> नैष्कर्म्यसिद्धिं परमां सन्यासेनाधिगच्छति (18.49)
> सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोधमे (18.50)

he makes out a distinction in the meaning of Samsiddhi. The Samsiddhi spoken of in 3. 20 is lower in contrast with that in 18-49, 50 which is higher (paramā). The lower samsiddhi is the attainment of purity of the mind and the higher samsiddhi is mokṣa. This distinction in the meaning rests on the significant use of the attribute 'parama' in the later passage.[8]

At times Ānandapūrṇa splits up a compound in a way different from the one resorted to by Ānandagiri and consequently his interpretation differs from that offered by Ānandagiri.[9]

6. See II. 42.
7. See I. 65 ; I. 74 ; II. 659.
8. Cf. संशुद्धिशब्देन बुद्धिशुद्धिरुच्यते । परमसिद्धे: "सिद्धिं प्राप्तो यथा ब्रह्म" इत्यादिना उपरिष्टादभिधानात्, II.56-57.
9. आत्मप्रत्ययमागम्यम् (I.46) and कर्त्राद्यात्मस्वभावस्य (I-51)

Sureśvara occasionally overlooks the rules of prosody that deal with the end of a hemistich. There are several instances in the Vārtika where the first hemistich does not stop with an inflected word; the last word of the first hemistich happens to be the member of a compound which overflows into the second hemistich and as such is an uninflected word.[10] In certain cases the first hemistich in Ānandagiri's text stops with an inflected word whereas in Ānandapūrṇa's text it overflows into the second hemistich.[11] In such cases Ānandapūrṇa's text seems to be decidedly better.

Ānandapūrṇa, being a versatile author in Nyāya, possessess the knack of putting things in the Nyāya garb. Sureśvara's arguments are dexterously cast in the syllogistic mould of Nyāya. Mention may be made, in this context, of his elucidation of the vārtikas on the Viṣayabhāṣya (I. 11-15) and on the refutation of the objection against the doctrine that upholds the realisation of the oneness of the self, as directly proceeding from the Vedānta (I. 60-62). Sometimes Ānandapūrṇa interprets the particles such as 'tu' and 'ca' as implying syllogistic reasoning.

विषयसम्बन्ध: सकारण: कार्यत्वात् घटवत् इति तुशब्दार्थ: (I.24)

कर्तृत्वादि: नात्मधर्म: दृश्यत्वात् रूपवत् इति तु शब्दार्थ: (I.40)

Incidentally he offers simple definitions of certain Nyāya concepts.

पूर्वसम्बन्धनियम: कारणत्वम् (I.26)

कारणसमवेतत्वं कार्यत्वम् (I.28)

अपरसंबन्धनियम: कार्यत्वम् (I.26)

Ānandapūraṇa comes forward to supply whatever is missing in Sureśvara's reasoning. His comment जडत्वमुपाधि: on Vārtika 143

10. It may be a matter of great curiosity to know that in one instance the first hemistich, the second hemistich and portion of the first hemistich of the succeeding verse form a single compound (II. 672—73).

11. Cf. I. 13 and I, 48.

(I. 49) illustrates this point well. He regards śruti as pramāṇa par excellence and any anumāna running counter to the śruti is to be deemed as ābhāsa (fallacious).

The Nyāyakalpalatikā of Ānandapūrna has preserved certain passages from Bhartṛprapañca's bhāsya on the Br. Up. in addition to those cited by Ānandagiri in the Śāstraprakāśikā.

The learned editor of Nyāyakalpalatikā and the learned author of the Foreword to Vol. I have spoken about the special features of the Nyāyakalpalatikā, and the importance it holds in the field of Advaita, besides referring to the author, his literary activity, in their introduction and Forward to Vol I.

The present volume comprising the madhukāṇḍa portion (Chs. 1 and 2), is now issued as Vol. II, and the remaining sections (Muni and Khilakāṇḍas) [redacted] will be published as Vol. III of Kendriya Sanskrit Vidyapeetha Series.

PROF. R. KARUNAKARAN,
Principal.

श्रीः

प्रस्तावना

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशर्षिभ्यो नमो महद्भ्यो नमो गुरुभ्यः ॥

विद्यासागर—आनन्दपूर्णमुनीन्द्रविरचितायाः न्यायकल्पलतिकायाः बृहदारण्यकवार्तिकमधुकाण्डव्याख्याभागोऽस्मिन् द्वितीयसंपुटे प्रकाश्यते। अष्टाध्यायात्मकं बृहदारण्यकं, मधुकाण्डं, मुनिकाण्डं, खिलकाण्डं चेति काण्डत्रयात्मना विभक्तं वर्तते। तत्र प्रथमस्यागमप्रधानस्य मधुकाण्डस्य चत्वारोऽध्यायाः। अथर्वणो महर्षिः अश्विभ्यां त्वाष्ट्रं, कक्ष्यमिति च मधुद्वयमुपदिदेश। तत्राद्यं मधु प्रवर्ग्यकर्माङ्गं यज्ञस्य शिरश्छेदप्रतिसन्धानादिविषयं दर्शनम्। तच्चोपदिष्टं प्रथमद्वितीयाध्याययोः। द्वितीयं मधु कक्ष्यं—गोप्यं-रहस्यं परमात्मसंबन्धि विज्ञानं तृतीयचतुर्थयोरध्याययोरुपदिश्यते। आदिममध्यायद्वयं कर्माङ्गदर्शनप्रतिपादकं न व्याख्यातं भाष्यकारैः भगवत्पादैः। 'उषा वा अश्वस्य' इत्येवमुपक्रममाणं तृतीयाध्यायमारभ्यैव भाष्यं रचयामासुः भाष्यकाराः। मुनिकाण्डस्यान्ते स्थितस्य मैत्रेयीब्राह्मणस्यावतरणिकायां जनकयाज्ञवल्क्यसंवादात्मकस्याध्यायस्य षष्ठत्वं, मधुकाण्डावसाने स्थितस्य मैत्रेयीब्राह्मणस्य चतुर्थांशत्वं च स्पष्टमेव वर्णयन्ति भगवत्पादाः।

'शिष्याचार्यसंवादेन च षष्ठे प्रश्नप्रतिवचनन्यायेन सविस्तरं विचार्योपसंहृतम्।' इति, 'अक्षराणां तु चतुर्थे यथा व्याख्यातोऽर्थः, तथा प्रतिपत्तव्योऽत्रापि।' इति च भगवत्पादभाष्यम्।

न्यायकल्पलतिकायामपि, जनकयाज्ञवल्क्यसंवादनिरूपकस्याध्यायस्य षष्ठत्वेन, अजातशत्रुब्राह्मणस्य चतुर्थान्तर्गतत्वेन, 'उषा वा अश्वस्य' इत्यादिकस्याध्यायस्यावसाने तृतीयत्वेन चोल्लेखो दृश्यते। इममध्यायं तृतीयमभिसन्धायैव सर्वत्र

ग्रन्थे बहुलं व्यवहारो लक्ष्यते । * अतः वस्तुवृत्तमनुरुध्यास्माभिः आदिमः तृतीयाध्यायः इति मुद्रापितमित्यवधेयम् ।

तृतीयचतुर्थाभ्यामध्यायाभ्यां निरूपितं, कार्यकारणादिविलक्षणमेकरसं प्रत्यगभिन्नं ब्रह्म इति तत्त्वमेव सर्वोपनिषदां सारार्थः इति मधुब्राह्मणावसाने वर्णयति श्रुतिः 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ।' (बृ. 4-5-19) इति । एवमागमप्रधानेन मधुकाण्डेन शास्त्रार्थस्य परिसमापितत्वादनन्तरब्राह्मणे आचार्यवंशोऽनुक्रम्यते ।

भगवत्पादैः भाष्यारम्भे अवतरणिकायां संक्षेपेण निरूपितं कर्मकाण्डेन ज्ञानकाण्डस्य संबन्धं व्याचक्षाणैः वार्त्तिककारैः विरचितः सर्ववेदान्तशास्त्रार्थसारसंग्रहरूपः स्वयं बृहद्विचारः इत्यभिधीयमानः संबन्धग्रन्थः न्यायकल्पलतिकया व्याख्यया सह प्रकाशितः प्रथमे संपुटे । अत्र तु मधुकाण्डार्थप्रकाशको भागः प्रकाश्यते ।

शङ्करभगवत्पादानां साक्षादन्तेवासिनः वेदान्तदर्शनमर्यादास्थापकाः वार्त्तिककाराः सुरेश्वराचार्याः, सरलया सरण्या हृदयङ्गमदृष्टान्तनिरूपणमुखेन तत्त्वार्थप्रतिपादने, श्रुतिवाक्यानां भाष्योक्तार्थवर्णनानन्तरं तदविरोधिनामर्थविशेषाणां निरूपणे, माध्यन्दिनपाठभेदस्थले सर्वत्र तत्पाठव्याख्याने च नैर्भर्यमावहन्ति ।

ब्रह्मपरिणामः प्रपञ्चः, जीवाद्भिन्नाभिन्नं ब्रह्म, ज्ञानकर्मसमुच्चयान्मुक्तिः, इति भर्तृप्रपञ्चानां मतस्य निराकरणे, तैः कृतस्य श्रुतिव्याख्यानस्य निरासे च भाष्यकारानतिशेरते, यतः तत्र तत्र उद्भाव्यापि प्रसङ्गं तन्मतं सावेगं निराकुर्वन्ति । तथापि तदीयव्याख्याने आदेयमंशं स्वीकुर्वन्ति, हेयं च परित्यजन्ति । अतः तेषां विचारे निष्पक्षपातता सर्वैः श्लाघनीया वर्तते । किंच, परिणामवादाभ्युपगन्तॄणां भर्तृप्रपञ्चानां वाक्यानि विवर्ताभिप्रायकतया योजयन्ति वार्त्तिककाराः । तत्र च

---

* आनन्दाश्रमप्रकाशिते बृहदारण्यकभाष्य पुस्तके, वार्त्तिकपुस्तके च षडध्यायात्मकतया बृहदारण्यकं, 'उषा वा' इत्यादिरध्यायः प्रथमाध्यायतया च मुद्रितम् । तथा मुद्रापणं भाष्यादिव्याख्यानोपक्रमदृष्ट्या । परं तु षष्ठे, पञ्चमे इत्यादिः भाष्यकारीयो व्यवहारः पाठकानां दुर्बोधो भवति ।

निदानं तेषु बहुमानातिशय एव । प्रपञ्चमिथ्यात्वे, ऐकात्म्ये च निर्वाहकानि अबाधितानि युक्तिजालानि वर्णयन्ति । श्रुतिवाक्यानां भाष्यानुल्लिखितविविधस्वारसिकव्याख्याने, सहृदयसरण्या विवरणे, परपक्षप्रभेदियुक्तिनिकरप्रतिपादने च तेषां दक्षता सोदाहरणं विस्तरेण प्रथमसंपुटस्य प्रस्तावनायामस्माभिः वर्णितेति नेह प्रतन्यते ।

परन्तु, मधुकाण्डे भाष्योक्तार्थे क्वचित् दुरुक्तचिन्तनमकारि वार्त्तिके । तद्यथा—

(1) 'तस्यार्चत आपोऽजायन्त' इत्यत्र 'आकाशप्रभृतीनां त्रयाणामुत्पत्त्यनन्तरम्' इति भाष्यमनुसृत्य, 'आपोऽजायन्त' इत्यत्र अप्शब्दः सर्वभूतोपलक्षकः इति प्रथमतो व्याख्याय, ततः परं सृष्टेरविवक्षितत्वात् उपलक्षकत्वमयुक्तमिति भाष्योक्तं दूषितम् ।

'विद्योत्पत्तिप्रधानत्वात् सृष्टिर्वा न विवक्षिता' इति वार्त्तिकम् । (न्या. क. पु. 40)

(2) 'पुत्रेणैवायं लोको जय्यः, कर्मणा पितृलोकः, विद्यया देवलोकः ।' इत्यत्र "कर्मणा—अग्निहोत्रादिना केवलेन पितृलोको न पुत्रेण नापि कर्मणा ।" इति भाष्यमस्ति । अत्र कर्मणैव, विद्ययैव इति एवकारानुकर्षेण व्याख्यानमसंगतम् । कर्मातिरिक्तस्यापि, 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इति श्रुतेः, पितृलोकसाधनत्वावगमात् । नापि विद्याया एव देवलोकसाधनत्वम्, 'संन्यासात् ब्रह्मणः स्थानम्' इति स्मृतेः, संन्यासस्यापि तत्साधनत्वादिति निरूप्य, यत्र एवकारः श्रूयते श्रुतौ, ततोऽन्यत्र न गच्छतीति स्वीयव्याख्यानमेव युक्तमित्यभिहितम् ।

'पुत्रस्यैवावधृतये एवकारो भवेदयम् ।
पितृदेवलोकसंप्राप्तिः श्रुतेहान्यसाधनैः ॥

व्याख्यानमिदमेवात्र निर्दोषं दोषवत्परम् ।
इदमेव ततो ग्राह्यं न तु यद्दोषवन्मतम् ॥ (न्या. क. पृ. 591)

इति वार्त्तिकम् ।

(3) ब्राह्मणस्यैव संन्यासः इति, भाष्यकारोक्तमयुक्तम्, ब्राह्मणादीनां त्रयाणामपि वर्णानां श्रुतौ संन्यासश्रवणात्, 'ब्राह्मणाः प्रव्रजन्ति' इत्यत्र ब्राह्मणग्रहणमुपलक्षणमिति निरूपयन्ति वार्त्तिककाराः ।

'त्रयाणामपि वर्णानां श्रुतौ संन्यासदर्शनात् ।
ब्राह्मणस्यैव संन्यासः इति श्रुत्या विरुद्ध्यते ॥
लिङ्गं च न्यायरहितं प्रामाण्याय न कल्पते ।
ब्राह्मणोक्तिबलात्तस्मात् कामितार्थो न सिद्ध्यति ॥' (न्या. क. पृ. 495)

इति वार्त्तिकम् ।

(4) 'आत्मेत्येवोपासीत' इति नियमविधिः इति भाष्यकारमतमाक्षिप्य, अपूर्वविधिः इति पक्षनिराकरणाय प्रवृत्तत्वात् नियमविधिरित्युक्तिरभ्युपगमवादः इति निरूपयन्ति वार्त्तिककाराः । (न्या. क. पृ. 346)

(5) 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः...........इतिहासः पुराणम्' इत्यत्र वेदशब्देन मन्त्रजातं गृह्यते, इतिहासादिशब्देन विविधं ब्राह्मणं गृह्यते, न प्रसिद्धेतिहासादिकं, तस्य व्यासादिकर्तृकत्वेन अयत्नपूर्वकमीश्वरनिर्मितत्वाभावादिति भाष्यकारा वदन्ति । तदेतद् दूषयन्ति वार्त्तिककाराः, वेदशब्दस्य मन्त्रब्राह्मणोभयवाचकत्वात् वेदशब्देनैव ब्राह्मणस्य ग्रहणं, लोकवेदाधिकरणन्यायेन लोकप्रसिद्धेरनुलङ्घनीयत्वात् इतिहासादिपदेन प्रसिद्धेतिहासादेर्ग्रहणमिति । तथा च वार्त्तिकम्—

'मन्त्रब्राह्मणयोर्वेदनामधेयत्वकारणात् ।
ऋग्वेदादिगिरा तस्मान्मन्त्रब्राह्मणयोर्ग्रहः ॥
यथासिद्धमितिहासपुराणाद्यपि गृह्यते ।
लोकप्रसिद्धिमुल्लङ्घ्य यतोऽन्यायोऽन्यथाग्रहः ॥' इति ।

(न्या. क. पृ. 878)

सर्वदर्शनेषु अकुण्ठितमतयः विविधग्रन्थप्रणेतारः विद्यासागर—आनन्दपूर्णमुनीन्द्राः, दीधितिकारादृतया संक्षिप्तया प्रौढया वाचो भङ्ग्या वार्त्तिकं व्याचख्युः । मधुकाण्डे, तृतीयाध्यायस्य चतुर्थब्राह्मणे 1425 तमवार्त्तिकव्याख्यानन्तरं 1490 तमवार्त्तिका-

वतरणिकायाः पूर्वं (पृ. 462) न्यायकल्पलतिकायाः ग्रन्थपातो दृश्यते। तथापि आनन्दाश्रममुद्रितपुस्तकानुसारेण 'गुणप्रधानभावश्च' इत्यादयः चत्वारः वार्त्तिक-श्लोका मुद्रिता वार्त्तिकमध्ये।

मुद्रितपुस्तकापेक्षया अधिकः वार्त्तिकश्लोकः न्यायकल्पलतिकासंमतो दृश्यते,

'जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यात् मैत्रो ब्राह्मण उच्यते॥' इति।

(न्या. क. पृ. 494)

पूर्वोक्तार्थे माननिरूपकतया श्लोकमिममवतारयन्ति न्यायकल्पलतिकाकाराः। शास्त्र-प्रकाशिकायां नायं श्लोकः वार्त्तिकत्वेन परिगणय्य व्याख्यातः।

परन्तु, मन्वादिस्मृतिवाक्यानामपि वार्त्तिकत्वेन पाठस्य बहुलमुपलम्भात्, इदं मनुवाक्यं वार्त्तिकत्वेन पठितमिति न्यायकल्पलतिकाशयः, अवतारिकाकरणादव-गम्यते। अतः वार्त्तिकमध्ये मुद्रापितोऽयं श्लोकोऽस्माभिः। वार्त्तिकपाठे मुद्रित-पुस्तकपाठात् वैलक्षण्यं कल्पलतिकाकाराणां क्वचित् क्वचिदभिमतमिति, (1) प्रतीकधारणात् (2) पदविशेषस्य व्याख्यानात् (3) अत्रैव प्रकरणान्तरे अनुवादकरणाच्च जानीमः। अतः तदनुसारेण मूलपाठः मुद्रितः। आनन्दाश्रम-मुद्रितपुस्तकपाठस्तु टिप्पणे निर्दिष्टोऽस्ति।

शास्त्रप्रकाशिकाशैलीतः एतदीयशैलीवैलक्षण्यं सोदाहरणं प्रपञ्चितं प्रथम-संपुटप्रस्तावनायाम्।

वार्त्तिककारैः भाष्योक्तौ दुरुक्तचिन्तनस्थले वार्त्तिकाभिहितं दूषणं बल्वजं मन्यमानाः न्यायकल्पलतिकाकाराः वार्त्तिकत्वसिद्ध्यर्थमाक्षिपति इति व्याचक्षते। उक्तानुक्तदुरुक्तचिन्तनस्य वार्त्तिकलक्षणतया यत्र कुत्रापि दुरुक्तचिन्तनेन भवितव्य-मित्यभिसन्धिना वार्त्तिककाराः आक्षिपन्ति, न तु वस्तुतो दूषणमस्तीति तेषा-माशयः। 'विद्योत्पत्तिप्रधानत्वात् सृष्टिर्वा न विवक्षिता' (न्या. क. पृ. 40) इति वार्त्तिकं तथैवावतारयन्ति। मैत्रेयीब्राह्मणे ऋग्वेदपदेतिहासादिपदार्थदूषणावस-रेऽपि, 'मन्त्रब्राह्मणयोः' इति दूषणपरं वार्त्तिकं "एवं भाष्यकारोक्तमर्थं प्रदर्श्य,

वार्त्तिकलक्षणसिद्ध्यर्थमाक्षिपति–मन्त्रेति ।'' इत्येवमवतारयन्ति । अतश्च तेषां भाष्यकारेषु भक्त्यतिशयं प्रतीमः ।

यथास्थितानुपूर्वीविशेषं विहायार्थानुसारेण किञ्चित्पदविपरिवर्तनेनापि श्रुति-वाक्यानि भाष्यवाक्यानि चोदाहरन्ति । तद्यथा–'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतिवाक्यं बहुषु स्थलेषु ब्रह्मविद्ब्रह्मैव भवति इत्युदाहरन्ति । एवं 495 तमे पुटे 'पारिव्राज्यदर्शनाच्च' इति भाष्यवाक्यं संन्यासस्य विधानाच्च ब्राह्मणस्य इत्यनूदि-तम् । एवं माण्डूक्योपनिषदिति माण्डूक्यकारिकां व्यवहरन्ति । 280 तमे पुटे वार्त्तिकान्तर्गततया पठितं 'स्वप्ननिद्रायुतौ' इति माण्डूक्यकारिकान्तर्गतं श्लोकं, 'स्थानभेदे माण्डूक्योपनिषदमुदाहरति' इत्यवतारयन्ति ।

पाठकानां सुखावबोधाय तत्तत्कण्डिकार्थस्य, प्रतिपाद्यविशेषस्य च सूचकानि शीर्षकाणि न्यायकल्पलतिकायां निर्दिष्टानि । तत्तद्ब्राह्मणानन्तर्गतबृहदारण्यकश्रुति-वाक्यानामपि श्रुत्यन्तराणामिव आकरनिर्देशोऽकारि । वार्त्तिकश्लोकानुवादस्थलेऽपि सुखबोधाय तादृशवार्त्तिकसंख्यापि आयोजिता ।

न्यायकल्पलतिकायाः दुर्बोधपदानामर्थः, अव्याख्यातवार्त्तिकांशार्थः, क्वचित् तात्पर्यार्थश्च निरूपितोऽस्माभिः टिप्पणे । मूलश्रुतिवाक्यापरिज्ञाने न्यायकल्पलति-कायाः दुर्ज्ञेयार्थत्वात् तत्र तत्र श्रुतिवाक्यानि उल्लिखितानि । एवं वार्त्तिकपाठभेदः, शास्त्रप्रकाशिकाकाराणां वार्त्तिकव्याख्यानभेदश्च तत्र तत्र प्रकटीकृतोऽस्ति । मातृकायां निष्कासनीयांशः ( ) इति, योजनीयांशः [ ] इति चिह्नितो वर्तते । विद्यासागरविषये वक्तव्यमितरत्सर्वं प्रथमसंपुटप्रस्तावनायामभिहितमिति नेह प्रतन्यते ।

इदंग्रन्थप्रकाशननिदानभूतेभ्यः तदा तदा ग्रन्थप्रकाशनकार्ये समुचितं बहु साहाय्यमाचरितवद्भ्यः प्राध्यापक–डाक्टर् वे. राघवमहोदयेभ्यः हार्दीं मदीयां कृतज्ञतां निवेदयामि । प्रूफ्-पत्रशोधने अनुबन्धादिसंपादने च साहाय्यं कृतवते मदीयान्तेवासिने टि. आर. माधवाय वैदुष्यं, विविधं श्रेयश्च दद्यात् परमेश्वरः इत्याशासे ।

भारत केन्द्रीयशासनानुसारेण प्रबन्धस्यास्य मुद्रापणं प्रकाशनं चादरेण कृतवद्भ्यः तिरुपतिस्थ केन्द्रीय संस्कृतविद्यापीठाध्यक्षेभ्यः (Principal, Kendriya Sanskrit Vidyapeetha, Tirupati) कृतज्ञतामाविष्करोमि ।

प्रौढमिमं ग्रन्थं हृदयंगमया परिष्कृतया पद्धत्या सोत्साहं मुद्रापितवद्भ्यः (Rathnam Press) मुद्रणालयाधिकृतेभ्यः साभिनन्दनं कार्तज्ञ्यं प्रकटीकरोमि ।

मदीयमतिमान्द्यादापतितानवद्यगणानविगणय्य, सानुग्रहेण मनसा ग्रन्थमिमं विलोक्य, मत्परिश्रमसफलीकरणेन अनुगृह्णन्तु मामिति अन्तर्वाणिकुलानि प्रार्थयमानो विरमामि ।

12-3-75
कुम्भघोणम्.

विदुषामनुग्रहाभिलाषी,
वि. सुब्रह्मण्यशास्त्री

न्यायकल्पलतिकायाः मधुकाण्डस्य

विषयानुक्रमणिका

तृतीयाध्यायः

विषयः पुटसंख्या

प्रथमं ब्राह्मणम् ।

प्रथमकण्डिकार्थनिरूपणम् ।

द्वितीयकण्डिकार्थनिरूपणम्

इति प्रथमं ब्राह्मणम् ।

अथ द्वितीयं ब्राह्मणम् ।

प्रथमकण्डिकार्थनिरूपणम् ।

इति तृतीयं ब्राह्मणं समाप्तम् ।

विषयः पुटसंख्या

विषयः		पुटसंख्या
सप्तमकण्डिकार्थनिरूपणम् ।	....	182
नित्यानुभवसाधनम् ।	....	187
अज्ञातत्वस्य नित्यानुभवसिद्धत्वम् ।	....	188
अज्ञातत्वस्य स्वरूपानुभवसिद्धत्वाभावे मानमेयव्यवहारासिद्धिः ।	....	189
मिथ्याज्ञानस्यानुभवसिद्धत्वम् ।	....	204
प्रमात्रा सहाज्ञानस्यानुभवसिद्धत्वम् ।	....	206
सुप्तोत्थितस्य एतावन्तं कालं नाज्ञासिषमिति ज्ञानं न स्मृतिः ।	....	210
अनुभवस्य कार्यत्वाभावः ।	....	215
कार्यकारणभावस्य कल्पितत्वम् ।	....	216
सोदाहरणं सकारणस्य द्वैतस्य कल्पितत्वोपसंहारः ।	....	218
अनुभवस्य जन्मादि कल्पितमित्युपसंहारः ।	....	219
तत्तत्कार्यरूपेण स्थितः पर एव कारणमिति निरूपणम् ।	....	222
'तन्नामरूपाभ्यामेव व्याक्रियत' इति श्रुत्यर्थवर्णनम् ।	....	230
'स एष इह प्रविष्टः' इति वाक्यावतरणम् ।	....	234
कारणासंभवेन आत्मनि अनात्माध्यासाक्षेपः ।	....	237
निरुक्ताक्षेपपरिहारः ।	....	237
मिथ्याज्ञानमेवाविद्येति एकदेशिनः चोद्यम् ।	....	238
निरुक्तचोद्यपरिहारः ।	....	239
मोहादेर्मिथ्यात्वे अनुमानं प्रमाणम् ।	....	241
मिथ्याज्ञानस्य ज्ञानबाध्यत्वम् ।	....	242
सामान्यज्ञानादित्रयस्य सर्वत्र भ्रमे कारणत्वाभावनिरूपणम् ।	....	244
अनिर्वचनीयख्यातिदृढीकरणाय ख्यात्यन्तरे अनुपपत्तिनिरूपणम् ।	....	246
मिथ्याज्ञानातिरिक्तस्य अज्ञानस्य साधनम् ।	....	250
सापेक्षस्य जगतः कल्पितत्वम् ।	....	252
'यः कारणं सर्वस्य जगतः' इति भाष्यावतारः ।	....	253
'यदात्मके नामरूपे' इत्यादिभाष्यतात्पर्यवर्णनम् ।	....	254
प्रवेशवाक्यार्थनिरूपणम् ।	....	256

विषयः		पुटसंख्या

विषयः | पुटसंख्या

विषयः पुटसंख्या

इति चतुर्थं ब्राह्मणम् ।

अथ पञ्चमं ब्राह्मणम् ।

सप्तान्ननिरूपणम् ।

विषयः पृष्ठसंख्या

इति तृतीयाध्यायः समाप्तः ।

चतुर्थोऽध्यायः ।

प्रथमं ब्राह्मणम् ।

विषय: पुटसंख्या

—: * :—

सांकेतिकविवरणम्

ABBREVIATIONS

—:O:—

(1)	अनुगी.	अनुगीता
(2)	आरु.	आरुण्युपनिषत्
(3)	ईश.	ईशावास्योपनिषत्
(4)	ऐ.	ऐतरेयोपनिषत्
(5)	ऐ. ब्रा.	ऐतरेयब्राह्मणम्
(6)	का.	काठकोपनिषत्
(7)	केन.	केनोपनिषत्
(8)	कौ.	कौषीतकिश्रुतिः
(9)	गाय.	गायत्रीमन्त्रः
(10)	गौ. ध.	गौतमधर्मसूत्रम्
(11)	छा.	छान्दोग्योपनिषत्
(12)	जा.	जाबालोपनिषत्
(13)	तै.	तैत्तिरीयोपनिषत्
(14)	तै. आ.	तैत्तिरीयारण्यकम्
(15)	तै. ब्रा.	तैत्तिरीयब्राह्मणम्
(16)	तै. सं.	तैत्तिरीयसंहिता
(17)	पा., पा. सू.	पाणिनिसूत्रम्
(18)	पु. सू.	पुरुषसूक्तम्
(19)	पुरा., पुरा. वा.	पुराणवाक्यम्
(20)	पू. मी.	पूर्वमीमांसासूत्रम्
(21)	प्र.	प्रश्नोपनिषत्
(22)	बृ.	बृहदारण्यकोपनिषत्
(23)	भ. गी.	भगवद्गीता
(24)	भा. आदि.	भारते आदिपर्व
(25)	मनु.	मनुस्मृतिः

(26)	महाना.	महानारायणीयम्
(27)	मा. का.	माण्डूक्यकारिका
(28)	मी. वा.	मीमांसावार्त्तिकम्
(29)	मु.	मुण्डकोपनिषत्
(30)	मो. ध.	मोक्षधर्मपर्व
(31)	यो.	योगसूत्रम्
(32)	योग. वा.	योगवासिष्ठम्
(33)	वा.	बृहदारण्यकवार्त्तिकम्
(34)	वा. सं.	वाजसनेयसंहिता
(35)	वि. स.	विष्णुसहस्रनामस्तोत्रम्
(36)	व्या.	व्यासवाक्यम्
(37)	शत. ब्रा., शतपथ.	शतपथब्राह्मणम्
(38)	श्वे.	श्वेताश्वतरोपनिषत्
(39)	सुश्रु.	सुश्रुतसंहिता
(40)	सुबा.	सुबालोपनिषत्
(41)	सं. वा.	संबन्धवार्त्तिकम्
(42)	सं. शा.	संक्षेपशारीरकम्
(43)	सां. का.	सांख्यकारिका
(44)	मु. पु. पाठः.	मुद्रितस्य बृहदारण्यकवार्त्तिकपुस्तकस्य पाठः
(45)	षट्प्रश्नी.	षट्प्रश्नीनिर्णयः ।

—: * :—

|| ॐ नमो गणपतये ||

न्यायकल्पलतिका

मधुकाण्डम्

|| तृतीयाध्यायस्य प्रथमं ब्राह्मणम् ||

तत्राश्वविषयं तावदादौ दर्शनमुच्यते ।
* प्राजापत्यत्वहेतोश्चाप्यश्वनामाङ्कितत्वतः || (1)
अश्वस्य यच्छिरः साक्षात् तदुषा इति चिन्तयेत् । *
हरेरवयवेष्वेवं योज्याः कालादिदृष्टयः || (2)

|| तृतीयाध्यायस्य प्रथमं ब्राह्मणम् ||

अश्वमेधाङ्गाश्वविषयोपासननिरूपणम्

प्रथमकण्डिकार्थनिरूपणम्

आदौ ब्राह्मणद्वयेन [1]अश्वमेधोपासनमुच्यते । तत्र अश्वमेधस्याङ्गान्तरातिक्रमेण अश्वविषयोपासनाभिधाने को हेतुः, अत्राह—तत्रेति । अङ्गेषु मध्ये अश्वस्य सर्वदेवताप्रधानः प्रजापतिर्देवता । अश्वमेधक्रतुरपि अश्वनामाङ्कितः इत्यश्वस्य प्राधान्यात् तदुपासनमादावुच्यते इत्यर्थः । (1) '[2]उषाः' इत्यादि

|| तृतीयाध्यायस्य प्रथमं ब्राह्मणम् ||

1. **अश्वमेधोपासनमिति** तत्रापि आद्येन ब्राह्मणेन अश्वविषयं महिमाख्यग्रहविषयं च दर्शनमुच्यते । द्वितीयेन ब्राह्मणेन अग्निविषयं दर्शनमुच्यते इति बोध्यम् ।

* **प्राजापत्यत्वहेतोरिति** अश्वस्येत्यादिः । **अश्वनामाङ्कितत्वत इति** अश्वमेधस्येत्यादिः ।

2. **उषा इति** ब्राह्मो मुहूर्त इत्यर्थः । उषा वा अश्वस्येत्यादिकया वागेवास्य वाक् इत्यन्तया प्रथमकण्डिकया अश्वमेधावयवाश्वावयवेषु शिर आदिषु प्राधान्यादिमाध्योक्ततत्तत्सामान्यात् ब्राह्ममुहूर्तरूपकालात्मतादृष्टिरुच्यते । अश्वस्य काललोकदेवतात्वाध्यारोपणं च प्रजापतित्वकरणम् ।

* **साक्षादिति** अभेदेनेति यावत् ।

संस्कार्यत्वात्पशोरेवं दृष्टीरङ्गेषु योजयेत् ।
कालादावमखाङ्गत्वान्नाश्वदृष्टिर्विधित्स्यते ॥ (3)

सत्स्वश्वादिषु कालादिदृष्टीरङ्गेषु योजयेत् । *
असत्स्वात्मानमेवाश्वं कल्पयित्वा नियोजयेत् ॥ (4)

कर्तारमश्वमग्निं च चित्यं सर्वं प्रजापतिम् ।
अश्वमेधफलं चार्कं वेत्ति मृत्युं यथोदितम् ॥ (5)

अकर्ताप्यश्वमेधस्य ब्राह्मणश्चेह बुद्धिमान् ।
क्रत्वात्मा मृत्युरस्मीति तादात्म्यं सोऽधिगच्छति ॥ (6)

भाष्यं व्याचष्टे—अश्वस्येति । 'सूर्यश्चक्षुः' इत्यादिकं उक्तन्यायातिदेशमुखेन व्याचष्टे—हरेरिति । अश्वस्येत्यर्थः । (2) कालादिदृष्टिः अश्वाङ्गेषु क्षिप्यते इति नियमः कस्मात्, अश्वाङ्गदृष्टिः कालादौ [1]कुतो न निक्षिप्यते ? अत्राह—[2]संस्कार्यत्वादिति । (3) अधिकृतानां तदनुष्ठानादेव फलप्राप्तेः अनधिकृतानामेवोपासनाधिकारः, इत्यत्राह—(य)[स]त्स्विति । (4) अत्रोच्यमानाश्वपात्राद्युपासनानां भिन्नत्वाद्वाक्यभेदः, अत्राह—कर्तारमिति । प्रजापत्यर्कमृत्युशब्दैः हिरण्यगर्भोऽभिधीयते । अश्वमेधयजमानं, उपास्याश्वं, अग्निं च चित्यं, क्रतुफलभूतमर्कं च, (सर्वं) सर्वमात्मानं च क्रत्वात्मकप्रजापतिरूपेण चिन्तयन् प्रजापतिरेव भवतीत्यर्थः । [3]ब्राह्मणग्रहणं वैश्यक्षत्रियो[4]पलक्षणार्थम् । (5-6)

---

1. कुतो न निक्षिप्यते इति उषा वा शिरः, सूर्यश्चक्षुः, वातः प्राणः, इत्यादिवाक्यात् स्वरसतः सूर्यादिष्वेव चक्षुरादिदृष्टेः प्रतिभानादिति भावः ।

2. संस्कार्यत्वादिति 'आदित्यादिमतयश्चाङ्ग उपपत्तेः' इति न्यायादिति भावः ।

* योजयेदिति अश्वमेधाधिकारीति शेषः । आत्मानं—स्वदेहम् । नियोजयेदिति अश्वमेधानधिकारीति शेषः ।

3. ब्राह्मणग्रहणमिति 'ब्राह्मणश्चेह' इत्यत्र ब्राह्मणग्रहणमित्यर्थः ।

4. क्षत्रियेति संपत्तिरहितक्षत्रियेत्यर्थः ।

* अश्वसंज्ञपनात्पूर्वं तयोर्ध्वं चापि हाटक-
राजतात्मकपात्राभ्यां गृह्येते तत्र यौ ग्रहौ ।
महिमाख्यौ तयोरेतदहर्वा इति दर्शनम् ॥ (7)

व्यत्ययेनावबोद्धव्या प्रथमार्थे च सप्तमी ॥ (8)

समुद्र ईश्वरो ज्ञेयो योनिः कारणमुच्यते ।
सर्वस्य जगतो यस्मादीश एवेह कारणम् ॥ (9)

इति तृतीयाध्यायस्य प्रथमं ब्राह्मणम्

द्वितीयकण्डिकार्थनिरूपणम्
महिमाख्यग्रहविषयदर्शनम्

'सौवर्णराजतौ' इत्यादि भाष्यं व्याचष्टे—अश्वेति । पात्राभ्यामिति । [1]इत्थंभावे तृतीया । पात्रात्मकावित्यर्थः । (7) 'पूर्वे समुद्रे' इति सप्तम्या न [2]संगतिः, अत्राह—व्यत्ययेति । [3]योनिः—उत्पत्तिकारणम् । बन्धुः—स्थिति-कारणम् । समुद्रः ईशः इत्यत्र हेतुमाह—सर्वस्येति । (8-9)

इति तृतीयाध्यायस्य प्रथमं ब्राह्मणम्

---

* अश्वसंज्ञपनात्पूर्वमिति 'अहर्वा अश्वं पुरस्तात्' इति श्रुतिवाक्यस्य अश्व-संज्ञपनात्पूर्वमित्यर्थ उक्तो भवति ।

1. ग्रहो नाम हवनीयद्रव्ययुक्तः पात्रविशेषः । तथा च पात्राभ्यां ग्रहौ इत्यनन्वितमि-त्याशङ्क्याह—इत्थंभावे तृतीयेति । गृह्येते—उपादीयेते ।

2. न संगतिरिति 'तस्य पूर्वे समुद्रे योनिः' इति वाक्येन महिमाख्य-ग्रहस्य योनौ—आसादनस्थाने पूर्वसमुद्रदृष्टिः विधित्सिता । तत्र समुद्रे इति सप्तमी न संगच्छते इत्यर्थः ।

3. 'समुद्रो योनिः' इत्यत्र योनिशब्दार्थमाह—योनिः उत्पत्तिकारणमिति ।

इति प्रथमं ब्राह्मणम्

द्वितीयब्राह्मणम्

अथाग्नेरुच्यते जन्म हयमेधोपयोगिनः ।
तद्दर्शनविधित्सायै स्तुत्यर्थोत्पत्तिरिष्यते ॥ (1)

नामवद्रूपवच्चेह कारणं यावदीक्ष्यते ।
नाभूत्तत् प्राक् समुत्पत्तेः, प्राणाद्युत्पत्तिसंश्रवात् ॥ (2)

कार्यमुत्पत्तिमत्त्वाच्चेत् प्रागुत्पत्तेर्निषिध्यते ।
कारणस्य त्वनुत्पत्तेरनिषेधस्तथा सति ॥ (3)

द्वितीयब्राह्मणम्

अग्निदर्शननिरूपणम्

[1]अग्निदर्शनं विधातुमुत्तरब्राह्मणम्, इति तात्पर्यमाह—**अ(श्वे)[थे]ति** । **'नैवेह'** इत्यादौ सोपस्कारमुच्यमानजन्मानर्थकम्, अत्राह—**तद्दर्शनेति** । शुद्धयोनित्वेनोपास्यः(श्रू)[स्तू]यते इत्यर्थः । (1)

कार्यकारणयोरुभयोरपि प्रागसत्त्वमिति पूर्वपक्षः

एवं तात्पर्यमुक्त्वा अक्षराणि पूर्व[2]पक्षानुगुण्येन योजयति—**नामवदिति** । **इह**—संसारमण्डले । कार्यकारणप्रपञ्चस्योत्पत्तेः प्रागसत्त्वे हेतुमाह—**प्राणादीति** । घटादेरुत्पत्तिमत्त्वं प्रत्यक्षं प्राणादेस्तु [3]श्रौतमिति न पूर्वसत्त्वमित्यर्थः । (2) एवं शून्यवादिनोक्ते काणादमतानुसारी कार्यस्यासत्त्वप्रयोजकत्वेनोक्तहेतोरभावात् कारणस्य नासत्त्वम्, इत्याह—**कार्यमिति** । (3) अनुपलम्भात् कार्यवत् कारणस्याप्यसत्त्वम्, अत्राह—**तथा चेति** । [4]उत्पत्तिमत्त्वानु-

---

द्वितीयब्राह्मणम्

1. **अग्निदर्शनं**—अग्नेरुपासनम् । **उत्तरब्राह्मणं**—अश्वमेधब्राह्मणम् ।
2. **पूर्वपक्षानुगुण्येनेति** प्रागुत्पत्तेः कार्यकारणयोरसत्त्वमिति शून्यवादिनः पूर्वपक्षानुगुण्येनेत्यर्थः ।
3. **श्रौतमिति** 'एतस्माज्जायते प्राणः' इति श्रुतिसिद्धमित्यर्थः । **उक्तहेतोः**—उत्पत्तिमत्त्वस्य ।
4. **उत्पत्तिमत्त्वानुपलब्धेरसंभवादिति** प्रागसत्त्वप्रयोजकस्य उत्पत्तिमत्त्वस्य अनुपलब्धेश्च कारणे असंभवादित्यर्थः । इदं च 'उक्तहेत्वोरसंभवात्' इत्यस्य विवरणं बोध्यम् ।

तथाचानुपलब्धेश्च कार्यस्यैवास्तु नास्तिता ।
कारणस्य न नास्तित्वमुक्तहेत्वोरसंभवात् ॥ (4)

सर्वस्यानुपलब्धेस्तु मैवं वोचः यतः श्रुतिः ।
नैवेह किं चनेत्याह कारणेतरनिह्नुतिम् ॥ (5)

नैवं, यतः श्रुतिः साक्षात् सत्त्वमेवावदत् स्वयम् ।
कार्यकारणयोः स्पष्टं मृत्युनैवेति सादरा ॥ (6)

मृत्युना कारणेनेदं कार्यं सर्वं समावृतम् ।
* इति नावक्ष्यत् यद्येतदुभयं नाभवत्पुरा ॥ (7)

प्राणपिण्डादिकार्याणां समुद्रः परमेश्वरः ।
बन्धुः कारणमात्मोक्तो मृत्युरत्र स एव तु ॥ (8) *

पलब्धेरसंभवादित्यर्थः । (4) शून्यवादी परिहरति—**सर्वस्येति** । जगदुत्पत्तेः प्राक् कारणमसत्, तदानुपलभ्यमानत्वात् कार्यवदित्यर्थः । श्रुतितोऽप्येवम्, इत्याह—**यत इति** । (5)

पूर्वपक्षनिरासः

'**नैवेह किं चन**' इति श्रुतेः अनभिव्यक्त(मान)[नाम]रूपाभिप्रायत्वमिति मन्वानः सिद्धान्तयति—**नैवमिति** । **सादरा इति** तात्पर्यं दर्शयति । **स्पष्टमिति** संशयादिकं व्यावर्तयति । (6) सत्त्वात् साध्यविकलो [1]दृष्टान्तः इति मत्वोक्तं प्रपञ्चयति—**मृत्युनेति** । (7) मृत्युशब्देन शून्याभिधानात् न कारणसत्त्वम्, अत्राह—**प्राणेति** । सूत्रात्मा—प्राणः । पिण्डः—विराट् । आदिपदेन तद्व्यष्टीनां संग्रहः । **समुद्र एवास्य बन्धुः** इत्युक्तः परमात्मैव मृत्युरित्यर्थः । (8)

---

1. **दृष्टान्त इति** उत्पत्तिमत्त्वेन जगतः प्रागसत्त्वसाधनाय दृष्टान्तत्वेनाभिमतः घटादिरित्यर्थः ।

* **नावक्ष्यदिति** येन कारणेन यत् कार्यमाव्रियते तदुभयं वक्ति श्रुतिः । तस्मात् प्रागपि सदेवेति भावः ।

* **मृत्युरत्र स एवेति** 'मृत्युनैवेदमावृतमासीत्' इत्यत्र मृत्युपदार्थः परमेश्वर एवेत्यर्थः ।

ज्ञानमात्रसतत्त्वं यद् ब्रह्माज्ञातसतत्त्वकम् ।
मृत्युर्जनिमतः साक्षात् तत्र कार्याप्ययत्वतः ॥ (9) *

सद्बीजं सत्प्रतिष्ठं च सदायतनमेव च ।
प्रत्यक्षमेव सत्सिद्धं सदन्यस्याप्रसिद्धितः ॥ (10)

असत् सदतिरेकेण यदि वाऽव्यतिरेकतः ।
व्यतिरेके सदेवासत्, असद्वा तत्किमुच्यते ॥ (11) *

नेह सद्व्यतिरेकेण स्वमहिम्ना प्रसिद्ध्यति ।
सर्वस्य सदपेक्षत्वात् सत्तु नान्यदपेक्षते ॥ (12) *

निर्विकारस्य कथं जन्मादिकारणत्वम्, अत्राह—**ज्ञानेति** । **सतत्त्वं**—याथात्म्यम् । (9) एवं श्रुत्यवष्टम्भेन कारणत्वमुक्त्वा, प्रत्यक्षेणापि तदाह—**सद्बीजमिति** । सदायतनमिति जगतो लयेऽपि सदनुगतत्वमुच्यते । (10)

असतो निरासः

सदन्याप्र(ति)सिद्धिं साधयितुं सतोऽसत् भिन्नं, अभिन्नं वेति विकल्पयति—**असदिति** । आद्यं दूषयति—**व्यतिरेक इति** । विमतं नासद् भेदाश्रयत्वात् सद्वत् । अतः असच्छब्दस्य तज्ज्ञानस्य वा किमालम्ब[न]मुच्यते इत्यर्थः । (11) सदसतोः भेदपक्ष एव न संभवति, इत्याह—**नेहेति** । सापेक्षत्वादसत् कल्पितं चेत्, सतोऽप्य[1]सदपेक्षत्वात् कल्पितत्वम्, अत्राह—**सत्त्विति** । (12) द्वितीय-

---

* **तत्र कार्याप्ययत्वतः** इत्यनेन अज्ञातयाथात्म्यस्य चिद्धातोः मृत्युपदार्थत्वे सर्वकार्यलयाधारत्वरूपा युक्तिरुक्ता । **साक्षादिति** प्रामाणिकत्वमुच्यते इति बोध्यम् ।

* असत् सदिति वदतो व्याहतिरित्याशङ्क्य, भेदपक्षे असत् नास्तीत्यत्रापादनपर्यवसानमित्याह—**असद्वेति** इति **शास्त्रप्रकाशिकाकाराः** ।

1. **असदपेक्षत्वादिति** सतः असद्भिन्नस्वरूपत्वादिति भावः ।

* **सत्तु नान्यदपेक्षते इति** सद्रूपस्य स्वप्रकाशस्य सत्तास्फूर्त्यर्थमन्यापेक्षाभावात् असतः सद्भिन्नस्वरूपत्वेन असदपोहस्य सद्रूपत्वे अन्योन्याश्रयाच्चेति भावः ।

मतमव्यतिरेकेण सतोऽसत् , सत्तदिष्यताम् ।
कुतोऽदो लभतेऽसत्त्वं यत्सदात्मनि निष्ठितम् ॥ (13)

अन्योन्यव्यतिरेकित्वान्नान्योन्यात्मकता तयोः ।
विरोधित्वाच्च नान्योन्यं संबन्धस्तापशीतवत् ॥ (14)

स्फुरतापि सतो नान्यदभिधातुं घटादिवत् । *
शक्यते, नाभिधानेन ह्यसद्वस्तु निरुच्यते ॥ (15)

वस्तुनोऽतिशयः कश्चिदभाववचसोच्यते ।
तस्य तेनाभिसंव्याप्तः न कथं चिदपह्नुतिः (16)

मनुवदति—**मतमिति** । सत्त्वप्रसक्त्या दूषयति—**सत्तदिति** । अदः—इदमसत्त्वेन विवक्षितम् । असत्त्वं कुतो लभते—न कुतोऽपि । सदात्मनि निष्ठितं—सद्रूपे तादात्म्येन स्थितं, यस्मादित्यर्थः । (13) [1]अव्यतिरेकपक्षश्च न संभवति, इत्याह—**अन्योन्येति** । वैधर्म्यादित्यर्थः । सदसतोर्व्यतिरेकपक्षे, तयोः संबन्धोऽस्ति, न वा । नाद्य इत्याह—**विरोधित्वाच्चेति** । (14) द्वितीयं दूषयति—**स्फुरतापीति** । प्राज्ञेनापीत्यर्थः । हेतुमाह—**नाभिधानेनेति** । [2]प्रवृत्ति(निवृत्ति) [निमित्त]जात्यादीनां तत्रासंभवादित्यर्थः । (15) अभावस्य भावविशेषणत्वेन तद्धर्मस्य निरुपाख्यत्वाभावात् शब्दवाच्यत्वम्, इति शङ्कते—**वस्तुन इति** । दूषयति–**तस्येति** । विशेष्यवस्तुना व्याप्तत्वात्, दण्डादिवत्, न निह्नुतिः—अभावो न सिद्ध्येदित्यर्थः । (16)

---

1. **अव्यतिरेकपक्षश्चेति** सदसतोरित्यादिः । अभेदपक्षश्चेत्यर्थः ।

2. **प्रवृत्तिनिमित्तेति** शब्दप्रवृत्तिनिमित्तेत्यर्थः । **जात्यादीत्यादिपदेन** गुणक्रियासंबन्धादिपरिग्रहः । **तत्र**-असति ।

* घटादि न सतोऽन्यदुच्यते तुच्छत्वप्रसङ्गात् , तद्वत् असदपि न सतोऽन्यद्वक्तुं शक्यं, सत्येव शब्दप्रत्ययप्रवृत्तेः इति ‘ **सतो नान्यदभिधातुं घटादिवत्** ’ इति वार्तिकार्थः । नास्तिशब्दप्रत्ययविषयत्वमसतः इत्याशङ्क्य, नास्तिशब्दस्यापि निःस्वरूपगोचरत्वं नेष्टमिति ‘ **शक्यते नाभिधानेन** ’ इत्युत्तरार्धेन विवक्षितमिति **शास्त्रप्रकाशिकाकाराः** ।

क्रिया वा तत्फलं वा स्यादभावो नात्महेतुहा ।
यो यतो लभते सत्तां निरुणद्धि स तं कथम् ॥ (17)

न नाशो हन्तिर्नष्टारं गन्तारमिव तद्गतिः ।
यो यतो लिप्सते सिद्धिं स तं हन्ति कथं वद ॥ (18)

विज्ञानाव्यतिरेकी चेदभावः, स्यात्सहेतुकः ।
ध्वंसादव्यतिरेकेऽपि धियो नित्यत्वमापतेत् ॥ (19)

ध्वंसनिरासः

ध्वंसो नाशक्रिया, तत्फलं वा । उभयथापि नियतप्राक्सतः घटस्य [1]तत्कारणस्य न [2]तेन निवृत्तिः, इत्याह — **क्रियेति** । (17) अग्नेः स्वकारणकाष्ठ-निवर्तकत्व (सत्तस्यकस्य) [वत् ध्वंसस्य] प्रतियोगिनिवर्तकत्वम्, इत्यत्राह— **न नाश इति** । ध्वंसस्य [3]नियमेन प्रतियोग्युपरक्तबुद्धिगोचरस्य [4]उपादानं प्रतियोगि । अतो न निवर्तकमित्यर्थः । (18)

कणभक्षपक्षे [5]क्षयं प्रतिक्षिप्य, क्षणिकपक्षेऽपि तमाक्षिपति । तथाहि ध्वंसस्य विज्ञानाभेदः, विज्ञानस्य ध्वंसाभेदो वा । आद्यं दूषयति— **विज्ञानेति** । हेतुमत्तया [6]क्षणिकत्वापत्तिरित्यर्थः । द्वितीयं दूषयति — **ध्वंसादिति** । ध्वंसस्य नित्यत्वादित्यर्थः । (19) 'स तं हन्ति कथम्' इत्ययुक्तम्, अभावस्य भावप्रतिक्षेपरूपत्वात्, अत्राह— **अत इति** । यतः अभावस्य कार्यत्वं, अतः,

---

1. **तत्कारणस्य**—ध्वंसकारणस्य ।
2. **न तेन निवृत्तिः**— कार्येण ध्वंसेन न निवृत्तिः । मृदादिकार्येण घटादिना मृदादेरनिवृत्तेरित्यर्थः ।
3. **नियमेन प्रतियोग्युपरक्तबुद्धिगोचरस्येति** प्रतियोगिनमविषयीकृत्य न इति प्रतीतेरनुभवविरुद्धत्वादित्यर्थः ।
4. **उपादानमिति** मृद्घटः इति मृदुपरक्तबुद्धिगोचरघटादौ मृदादेरुपादानत्वदर्शनादिति भावः । काष्ठं तु नाग्नेरुपादानमिति काष्ठस्याग्निना निवृत्तिरुपपन्नेति बोध्यम् ।
5. **क्षयं**—ध्वंसम् । **क्षणिकपक्षेऽपि**—योगाचारमतेऽपि ।
6. **क्षणिकत्वापत्तिरिति** विज्ञानवादिमते अथत एव नित्यत्वस्वीकारान्नेष्टापत्तिः संभवतीति बोध्यम् ।

* अतोऽभावत्वसिद्ध्यर्थमभावेनाप्यपेक्ष्यते ।
स्वहेतुसिद्धिः, कार्योऽर्थो न दृष्टः कारणं विना ॥ (20)

धर्म्यसिद्धिः प्रतिज्ञायां, हेतुश्चानाश्रयो भवेत् ।
न चास्ति कश्चित् दृष्टान्तः सर्वशून्यत्ववादिनः ॥ (21)

विज्ञानमात्रं यस्यापि जगदेतच्चराचरम् ।
प्रतिज्ञाहेतुदृष्टान्तैर्ज्ञानं तेनापि दूष्यते ॥ (22)

तेन हेतुसिद्धिः—स्वकारणसत्ता अपेक्ष्यते, कार्यं कारणपूर्वकमिति घटादौ दृष्टत्वादित्यर्थः । (20) जगदत्यन्ताभावः अनादिरनन्तः इति मतेऽपि न तत्राध्यक्षं मानं, तस्य सन्मात्रग्राहि(त)त्वात् । नाप्यनुमानम्, इत्याह—**धर्म्यसिद्धिरिति** । धर्म्यादेरस्तित्वे सर्वशून्यत्वहानिः । असत्त्वे अप्रसिद्धविशेष्यत्वम्, हेतोराश्र-[1]यासिद्धिस्वरूपासिद्धी । [2]दृष्टान्तोऽप्या[3]श्रयहीनः साध्यविकलश्चेत्यर्थः । (21)

यत् प्रतीयते सा [4]धीः यथा [5]बुद्धिः, प्रतीयन्ते चामी भावाः [6]इत्यनुमानेऽपि धर्म्यादीनां मिथो भेदे विज्ञानमात्रत्वानुपपत्तिः, अभेदे पक्षधर्मत्वाद्यसिद्धिः, इति विज्ञानवादिनोऽपि अतिदिशति—**विज्ञानेति** । (22) तन्मते अनवगतार्थासंभवात् [7]मानमात्रं न सिद्ध्यति, इत्याह—**मानेति** । [8]ग्राह्यांशस्य अज्ञातत्वं शङ्कते

---

* माध्यमिकमतेन सर्वस्य ध्वंससिद्धिमाशङ्क्य अनुभवविरोधेन परिहरति—**अत इति** सर्वाभावस्य कार्यत्वे, हेतुसत्त्वे तदसत्त्वेचासिद्धिरिति '**स्वहेतुसिद्धिः**' इत्याद्युत्तरार्धेनोच्यते इति **शास्त्रप्रकाशिकाकाराः** ।

1. **स्वरूपासिद्धीति** हेतुस्वरूपस्याप्यसत्त्वादिति भावः ।
2. **दृष्टान्तः**—उदाहरणवाक्यम् ।
3. **आश्रयहीन इति** निश्चितसाध्यवतोऽप्यसत्त्वादिति भावः ।
4. **धीः**—विज्ञानम् ।
5. **बुद्धिः**—विज्ञानम् ।
6. **अनुमानेऽपीति** परार्थानुमाने, न्यायप्रयोगे इत्यर्थः । उदाहरणोपनयरूपद्वयवयववादित्वात् सौगतानां, तन्मतेनावयवद्वयमनुमानपदेन व्यवहृतं बोध्यम् ।
7. **मानमात्रं**—प्रमाणसामान्यम् ।
8. **ग्राह्यांशस्येति** ग्राह्यग्राहकाकारा संविदिष्यते । तत्र ग्राह्यांशस्य विज्ञानतादात्म्येऽपि अज्ञातता चेदिति, '**तादात्म्येऽपि न चेज्ज्ञातः**' इत्यस्यार्थो बोध्यः ।

मानाभेदान्न मेयस्य नाज्ञातार्थः प्रसिद्ध्यति ।
* तादात्म्येऽपि न चेत् ज्ञातः, मानात्कोऽतिशयो मतः ॥ (23)

अज्ञाताधिगमं कुर्वन्मानं स्यात्सर्ववादिनाम् ।
न चेत् , शुक्तितमोजस्य ज्ञानस्यापि प्रमाणता ॥ (24)

विज्ञानाव्यतिरेकित्वादसिद्धादेस्तथैव च ।
* प्रामाण्यवत्प्रसङ्गः स्यादप्रमात्वेऽपि ते ध्रुवम् ॥ (25)

—**तादात्म्येऽपीति** । अज्ञाननिवृत्तिर्मानफलं न स्यात्, इति [1]दूषयति—**मानादिति** । (23) प्रकाशकत्वेन मानत्वं, नाज्ञातज्ञापकत्वेन, अत्राह—**अज्ञातेति** । [2]व्यतिरेके दण्डमाह—**न चेदिति** । रूप्यधीः प्रमा स्यादित्यर्थः । (24) किंच, [3]असिद्धविरुद्धादीनां ज्ञानात् व्यतिरेकः, अव्यतिरेको वा । आद्ये(ति)[4]सिद्धान्तविरोधः । द्वितीये(अ)[5]प्रामाण्यप्रसङ्गः, इत्याह—**विज्ञानेति** । (25)

कार्यकारणयोः सत्त्वसमर्थने अद्वैतव्याकोपशङ्का, तत्परिहारश्च

एवमसत्त्वनिरसनपुरस्सरं कार्यकारणयोः सत्त्वं समर्थितम् । तदयुक्तं, अद्वैतव्याकोपात्, इति शङ्कते—**अजमिति** । **स्वतःसिद्धम्** , **अनन्यदृक्** **इति**

---

1. **दूषयतीति** मानाधीनस्य अतिशयशब्दितस्य फलस्य अज्ञाननिवृत्तिव्यतिरेकेणाभावात्, तस्य च मानाभिन्नेऽपि अज्ञातत्वस्वीकारे, वक्तुमशक्यत्वादिति भावः ।

* **कोऽतिशयो मतः** इत्यत्र किंशब्द आक्षेपार्थको बोध्यः ।

2. **व्यतिरेके दण्डमाहेति** अज्ञातज्ञापकत्वेन मानत्वस्याभावे दोषमाहेत्यर्थः ।

* **शुक्तितमोजस्य**—शुक्तितत्त्वाज्ञानजन्यस्य । मानाद्वस्तुनि कोऽतिशयः, अज्ञातत्वध्वस्तिर्वा, ज्ञातत्वोत्पत्तिर्वा इति विकल्पयति—**मानात्कोऽतिशय इति** । मानाभेदेऽपि वस्तुन्यज्ञातत्वोपगमात् आद्यकल्पो न संगत इति मन्वानः, द्वितीयं दूषयति—**अज्ञातेति** वस्तुन्यज्ञाते अज्ञातत्वनिरासद्वारा ज्ञातत्वमुत्पादयत् मानमिति सर्वसंमतमिति तदर्थ इति **शास्त्रप्रकाशिकाकाराः** ।

3. **असिद्धविरुद्धादीनामिति** हेत्वाभासानामिति शेषः ।

4. **सिद्धान्तविरोधः**-विज्ञानव्यतिरिक्तः बाह्योऽर्थो नास्तीति सौगतसिद्धान्तविरोधः ।

5. **प्रामाण्यप्रसङ्ग इति** प्रमाणभूतविज्ञानाभेदादिति भावः ।

* **प्रामाण्यवत्प्रसङ्गः** इत्यत्र वतिः स्वरूपार्थो बोध्यः ।

अजमेकं स्वतःसिद्धं प्रत्यग्रूपमनन्यदृक् ।
* वस्त्वेवं चेदिहाभीष्टं किमर्थं साध्यतेऽपरम् ॥ (26)

एवंभूतात्मसिद्ध्यर्थं कारणादि प्रसाध्यते ।
उपायः सोऽवताराय, तथा तज्ज्ञैश्च सूचितम् ॥ (27)

कारणादिनिषेधेन न चाद्वैतमभीप्सितम् ।
ऐकात्म्यबोधमात्रेण निषेधस्याप्यपह्नवात् ॥ (28)

* सत्तत्त्वकमिदं सर्वमिति संसाध्य यत्नतः ।
तस्यापि संविन्मात्रेण पूर्णतैवोच्यते सतः ॥ (29)

सत्ताप्रतीत्योः स्वातन्त्र्यमुच्यते । (26) कार्यकारणविलक्षणतत्त्वप्रतिपादनार्थं कार्यकारणयोः तुच्छव्यावृत्तिः साध्यते इति परिहरति—**एवंभूतेति** ।

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या [1]चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथंचन ॥ (मा. का. 3-15)

इति **गौडाचार्यै**रुक्तमित्यर्थः । (27) अद्वयस्य द्वयाभावत्वात् कार्यकारणवैलक्षण्येऽपि न तदभाववैलक्षण्यम्, अत्राह—**कारणादीति** । द्वैततदभावोपलक्षितचिन्मात्रबोधनादित्यर्थः । (28) तत्त्वमेव तर्हि प्रतिपाद्यताम्, किं कार्यकारणयोः सत्त्वप्रतिपादक—[2]**घटविचारेण,** इत्यत्राह—**सदिति** । (29)

---

* **किमर्थं साध्यतेऽपरम्** इत्यस्य अपरं - कार्यादि वस्तुविरोधात् न साधनीयमित्यर्थः । किंशब्दः आक्षेपार्थकः ।

1. **चोदितान्यथेति** अन्यथेति पदान्तरमध्याहार्यम् । भिन्नभिन्नप्रकारेणोक्तेत्यर्थः । क्वचिदक्रमेण, क्वचित् क्रमेण, तत्रापि क्वचित् आकाशप्रमुखा, क्वचित् तेजः—प्रमुखा सृष्टिः श्रूयते इति बोध्यम् । **अवताराय**—तत्त्वज्ञानावताराय ।

2. **घटविचारेणेति** घटं दृष्टान्तीकृत्य कार्यकारणसत्त्वविचारं घटविचार **इति,** अत्रत्यं घटशब्दप्रचुरं भाष्यं घटभाष्यमिति च व्यवहरन्ति ।

* '**सतत्त्वकमिदम्**' इति मुद्रितपुस्तकपाठः ।

सदेवागमतः सर्वं प्रत्यक्षाच्च सदीक्ष्यते ।
अनुमानाच्च सत्सर्वं यथा तदधुनोच्यते ॥ (30)

अनुमेयं च सत्पूर्वं कारणं कार्यमेव च ।
जगत्प्रसूतेस्तच्चेह प्रयोगेण प्रदर्श्यते ॥ (31)

विवादगोचरापन्नं सत्कारणमिदं भवेत् ।
कार्यात्मकं मनोऽबादि कार्यत्वात्कटकुम्भवत् ॥ (32)

हेतुमज्जनिमत्सर्वं कार्यत्वात्पटकुम्भवत् ।
वियदादि च नः कार्यं तदप्येवं प्रतीयताम् ॥ (33)

अनुमेयत्वाच्चेत्याद्युत्तरभाष्यतात्पर्यवर्णनम्

'अनुमेयत्वाच्च' इत्याद्युत्तरभाष्यतात्पर्यं वृत्तसंकीर्तनेन कीर्तयति—**सदेवेति**। '**मृत्युनैव**' इत्यागमात्, सत् बीजमित्यादिप्रत्यक्षाच्च सत्त्वं साधितम्। इदानीमनुमानतः साध्यते इत्यर्थः। (30-31)

कारणसत्त्वसाधनम्

कारणसत्त्वं [1]तावत्साधयति—**विवादेति**। [2]दृष्टान्तभागे सिद्धसाधनत्वपरिहाराय [3]विवादगोचरत्वविशेषणम्। व्याकृतजग[4]न्मात्रस्य [5]धर्मित्वेऽपि, '**तन्मनोऽकुरुत**' [6](बृ)इत्यादिवाक्यशेषात् **मनोबादि** इत्युक्तम्। (32) जगत [7]आकस्मिकत्वात् कथं तत्कारणस्य सत्त्वानुमा, अत्राह—**हेतुमदिति**। [8]वियदादिभागे

---

1. **तावत्**—आदौ। कार्यसत्त्वसाधनात्पूर्वमिति यावत्।
2. **दृष्टान्तभागे**—कटकुम्भादौ।
3. **विवादगोचरत्वेति** सत्कारणकत्वरूपसाध्यवत्त्वेन **विमतिविषयत्वेत्यर्थः**।
4. **जगन्मात्रस्य**—जगत्सामान्यस्य।
5. **धर्मित्वेऽपि**—प्रकृतानुमानपक्षत्वेऽपि।
6. **इत्यादिवाक्यशेषादिति** आदिपदेन 'तस्माद्वैत आपोऽजायन्त' इत्यादि—वाक्यपरिग्रहः।
7. **आकस्मिकत्वात्**—नियतकारणानियम्यत्वात्।
8. **वियदादिभागे इति** तथा च कार्यत्वहेतोः भागासिद्धिर्दोष इति भावः।

असत्कारणकं कार्यं तद्विनाशयास्य जन्मतः ।
सर्वं स्वहेतुमुन्मूल्य जायतेऽङ्कुरकुम्भवत् ॥ (34)

* स्वकारणं चेदुत्साद्य कार्यं सर्वं प्रजायते ।
तत्कारणविनाशाय तत्सूतेः प्राक् क इर्यताम् ॥ 35 ॥

स्वहेतूच्छित्तयेऽलं चेदजातमपि सद्यदि ।
द्वयमप्यभ्युपेतं स्यात् न ह्यसद्धन्यतेऽसता ॥ (36)

कार्यत्वमसिद्धम्, अत्राह—**वियदादीति** । [1]विभक्तत्वादिति शेषः । तस्मात् सत्कारणकमनुमीयताम्, इत्याह—**तदपीति** । (33)

प्रत्यनुमानं शङ्कते—**असदिति** । विमतं असत्कारणकं, कार्यत्वात् अङ्कुरवदित्यर्थः । बीजाद्युपमर्देन अङ्कुरादेर्जन्मदर्शनात् न [2]साध्यवैकल्यम्, (अत्रा)[इत्या]ह—**सर्वमिति** । (34) अनुत्पन्न[स्य]स्वकारणनिवर्तनसामर्थ्य नास्ति, किं वा अस्तीति विकल्प्य, आद्यं दूषयति—**स्वकारणं चेदिति** । तत्सूतेः प्राक्—कार्यजन्मनः पूर्वमित्यर्थः । (35) द्वितीयमनुवदति—**स्वहेत्विति** । दूषयति—**द्वयमपीति** । [3]द्वयोरस्तित्वोपगमे हेतुमाह—**न हीति** । (36) बीजाद्युपमर्दः कार्यः, अकार्यो वा । आद्ये, [4]तत्रान्यतरानैकान्तिकता, इत्याह—**विनाशस्येति** । द्वितीयमनुवदति—**न चेदिति** । दूषयति—**नाश(य)[इ]ति** ।

---

1. **विभक्तत्वं**—स्वान्यूनसत्ताकभेदप्रतियोगित्वम् ।
2. **न साध्यवैकल्यमिति** अङ्कुरादेर्दृष्टान्तस्येत्यादिः ।

* प्रत्यनुमाने दृष्टान्तस्य साध्यवैकल्यं वक्तुं परोक्तमर्थमनुवदति-**स्वकारणं चेदिति** अनुत्पन्नत्वेनालब्धात्मकस्य प्रागुत्पत्तेः स्वकारणनिवर्तकत्वं न संभवतीति दूषयति—**तत्कारणेति** । विपक्षे दोषमाह—**स्वहेत्विति** । इति **शास्त्रप्रकाशिकाकाराः** ।

3. **द्वयोः**—कार्यकारणयोः ।
4. **तत्रान्यतरानैकान्तिकतेति** असत्कारणकत्वे साध्ये कार्यत्वहेतोः तत्र—बीजाद्युपमर्दे अन्यतरस्य-वादिनोरन्यतरस्य कार्यकारणसत्त्ववादिनः सिद्धान्तिनः व्यभिचारितेत्यर्थः ।

विनाशस्यापि कार्यत्वात् सोऽपि सत्कारणो मम ।
* न चेत्कार्यो विनाशः स्यात्, नाशोऽकार्येण नेष्यते ॥ (37)

स्वकारणविनाशाय सिद्धं वाऽसिद्धमेव वा ।
* अङ्कुरादि मतं कार्यं, नोभयत्रापि युज्यते ॥ (38)

सिद्धं चेत्कारणात्सिद्धमुपमर्दं विनैव तु ।
उत्पन्नेन च तन्नाश उत्पन्नत्वादनर्थकः ॥ (39)

उपमृद्नाति चेत्कार्यमथासिद्धं स्वकारणम् ।
तत्कारणं कथं तत् स्यात् न चेत्तस्मात्प्रजायते ॥ (40)

उपमर्दोऽपि कार्यत्वात् किं न हन्यात्स्वकारणम् ।
हन्तर्यसति हानोक्तिः लक्ष्यते शिशुवक्तृका ॥ (41)

अकार्येणोपमर्देन बीजादेर्नाशो न संभवति [1]नित्यासत्त्वप्रसङ्गादित्यर्थः । (37) विमतमसत्कारणकं कार्यत्वात् अङ्कुरवत् इत्यत्र दृष्टान्तस्य साध्यवैकल्यं स्पष्टयितुं विकल्पयति—**स्वकारणेति** । किं [2]चातः, अत्राह—**नोभयत्रेति** । (38) [3]सिद्धपक्षदोषं विशदयति—**सिद्धं चेदिति**। कारणनाशमन्तरेण कार्योत्पत्तौ कारण-नाशकल्पनापि [4]व्यर्था, इत्याह—**उत्पन्नेति** । (39) द्वितीयमनुवदति—**उप-मृद्नातीति** । दूषयति—**तदिति** । द्वितीयकल्पे कार्यस्य न स्वकारणोपमर्दकत्वं, अजनकस्याकारणत्वादित्यर्थः । (40) **किंच**, उपमर्दः स्वकारणमनुपमृद्य जायते, तदुपमृद्य वा । नाद्यः, इत्याह—**उपमर्दोऽपीति** । द्वितीये, स विद्यमानो

---

1. **नित्यासत्त्वप्रसङ्गादिति** नाशस्याकार्यत्वे नित्यत्वात्, कारणस्य नित्यमेव सत्त्वाभावात्, सत्त्वपूर्वकः नाशो न संभवति । न हि नित्यासतः शशशृङ्गादेर्नाशोऽस्ति इति भावः ।

* **नाशोऽकार्येण नेष्यते** इत्यस्य कृतकत्वाभ्युपगमात् अकार्यात्मना नाशविष्यते स्वाभ्युपगमविरोधात् इत्यर्थान्तरमपि वर्णयति **शास्त्रप्रकाशिका** ।

2. **किंचात इति** कार्यस्य सिद्धत्वे असिद्धत्वे वा किं दूषणमित्यर्थः ।

* **नोभयत्रापि युज्यते इति** स्वकारणनाशकतेति शेषः ।

3. **सिद्धपक्षदोषं**—सिद्धस्य कार्यस्य कारणनिवर्तकत्वपक्षस्य दोषम् ।

4. **व्यर्थेति** कार्योत्पत्त्यर्थमेव बीजाद्युपमर्दकल्पनादिति भावः ।

नंष्टृतन्त्रो विनाशोऽपि गन्तृतन्त्रा गतिर्यथा ।
नास्तीह कश्चिद्धात्वर्थः यः स्वहेतुं विनाशयेत् ॥ (42)

निर्हेतुनाशसंव्याप्तः न स्यात्कुम्भजनिर्मृदः ।
न बीजादग्निसंव्याप्तादङ्कुरोद्भूतिरीक्ष्यते ॥ (43)

घटादेः कारणं पिण्डः इति नाभ्युपगम्यते ।
मृदेव कारणं यस्मात् पिण्डादेरवगम्यते ॥ (44)

यदेव कारणं मानैरिह साक्षाद्विनिश्चितम् ।
* तदेवोत्तरकार्येषु न कार्यं कारणं मितेः ॥ (45)

नाशयेत्, अविद्यमानो वा । न द्वितीयः, इत्याह—**हन्तरीति** । (41) [1]प्रथमकल्पं दूषयति—[2]**नंष्टृतन्त्र इति** । उपम(र्दा)[र्दो] नाश्रयविघाती, [3]क्रियात्वात् गमिक्रियावत् इत्यर्थः । (42) [4]क्षणिकपक्षे कार्यकारणभाव एव न संभवतीति कुतः कार्यस्य कारणनिवर्तकत्वम्, इत्याह—**निर्हेत्विति** । मृदादेः [5]स्वरसभङ्गुरत्वादिति भावः । (43) पिण्डस्य घटकारणत्वं न मृदः, इत्यत्राह—**घटा(दि)[दे]रिति** । (44) मृदः कारणत्वं [6]मावगमं साधयति—**यदेवेति** । मृदोऽनुसन्धीयमानत्वेन [7]नित्यत्वात् कारणत्वं, पिण्डादेः कार्यत्वेनानन्वयात् अनवस्थानाच्च न कारणत्वमित्यर्थः । (45) कार्यत्वादकारणत्वं मृदोऽपि तुल्यं क्षणिकत्वादिति चेत्, स

---

1. **प्रथमकल्पं**—विद्यमानः उपमर्दः स्वकारणमुपमृद्य जायते इति कल्पम् ।
2. **नंष्टृतन्त्र इति** नंष्टा-नाशप्रतियोगी तन्त्रं यस्येत्यर्थः ।
3. **क्रियात्वात्**—धात्वर्थत्वात् ।
4. **क्षणिकपक्षे**—भावाः क्षणमात्रस्थायिनः इति असत्कारणवादिनः सौगतस्य पक्षे ।
5. **स्वरसभङ्गुरत्वादिति** नाशोपक्षीणस्य जननव्यापारायोगादिति भावः ।
6. **मावगममिति** अन्वयव्यतिरेकानुसन्धानप्रत्ययादिप्रमाणावगम्यमित्यर्थः ।
7. **नित्यत्वादिति** अनुवर्तमानत्वादित्यर्थः ।

* **न कार्यं कारणं मितेरिति** पिण्डादि कार्यं घटादिकारणं न मानतः सिद्ध्यतीत्यर्थः ।

विनाशोऽतिशयः कश्चिद्यदि पिण्डादिवन्मतः ।
प्रत्यक्षात् तद्द्वयं सत्स्यात्, नो चेदस्तु ध्रुवो घटः ॥ (46)

क्रिया वा तत्फलं वा स्यात् वस्त्वन्तरमथापि वा ।
नाशोऽथवा न किं चित् स्यात् सत्त्वं नैवमपोद्यते ॥ (47)

क्रियाप्यस्ति, फलं चास्ति, तद्वत् वस्त्वन्तरं च सत् ।
अथ नाशोऽपि नैवास्ति, तं विना सदिदं जगत् ॥ (48)

सन्नेव नाशोऽपीष्टश्चेत्, सत् सता न विरुध्यते ।
* ऐकात्म्येऽपि विरोधश्चेत्, नाशो नाशेऽपि शङ्क्यते ॥ (49)

* पिण्डादिना विनापीदं मृदादेः केवलादपि ।
घटाद्युत्पद्यमानं तु कार्यं दृष्टमतो ध्रुवम् ॥ (50)

विनाशः मृदोऽतिशयः, ततोऽन्यो वा । आद्यमनुवदति—**विनाश इति ।** अतिशयतदाश्र(यः)[ययोः]सत्त्वं स्यात्, इत्याह—**प्रत्यक्षादिति** । द्वितीयं शङ्कते—**नो चेदिति ।** [1](अ)ना[शा]स्पृष्टत्वात् घटादेः कार्यस्य तत्कारणमृदादेश्च सत्त्वं स्यात्, इत्याह—**अस्त्विति** । (46) प्रकारान्तरेण नाशं विकल्पयति—**क्रिया वेति** । चतुर्धापि मृदादेः सत्त्वं दुर्वारम्, इत्याह—**सत्त्वमिति** । (47) तदेव व्यनक्ति—**क्रियापीति** । सर्व(मेदवान्न)[थैव न][2]नाश्यनाशकभाव इत्यर्थः । (48) [3]नाशो नैवास्तीति कल्पोऽनङ्गीकारपरास्तः, इति शङ्कते—**सन्नेवेति** । प्रत्याह—**सत्सतेति** । अभेदादित्यर्थः । अन्यथा नाशस्य स्वेनैव नाशप्रसङ्गात्, इत्याह—**ऐकात्म्येऽपीति** । (49) ना(श)[शा]सिद्धौ [4]पिण्डादेः कार्यत्वासिद्धेः कारणत्वमविरुद्धम्, इत्याशङ्क्य, 'यदेव कारणम्' इत्येतत्

---

1. **नाशास्पृष्टत्वादिति** भावाभावयोः संबन्धस्य निरस्तत्वादिति भावः ।
2. **न नाश्यनाशकभाव इति** बीजाङ्कुरयोरित्यादिः ।
3. **नाशो नैवास्तीति कल्प इति** 'अथ नाशोऽपि नैवास्ति' इति वार्त्तिकेणोपक्षिप्त इत्यादिः ।

*. **ऐकात्म्येऽपि**—वस्त्वैक्येऽपि ।

4. **पिण्डादेः कार्यत्वासिद्धेरिति** कार्यत्वात् मृदादेः अकारणत्वमिति पक्षः मृदादेर्नाशस्य दुर्निरूपत्वेन कार्यत्वासिद्ध्या दूषितः । तथैव पिण्डादेरपि कार्यस्य नाशो दुर्निरूप इति कार्यत्वं न सिद्ध्यतीति कारणत्वं संभवतीति भावः ।

* **मृदादेः केवलादपीति** केवलादेव मृदादेरित्यर्थः ।

मृदाद्येव ततो ग्राह्यं कारणं ह्यन्वयान्मृदः ।
कार्यमेव तु पिण्डादि तस्य कार्येष्वनन्वयात् ॥ (51)

विरुद्धानेककार्याणां युगपज्जन्म नेष्यते ।
एकस्मात्कारणात् तस्मात्पिण्डाभावे घटोद्भवः ॥ (52)

पिण्डादिव्यतिरेकेण कारणानुपलब्धितः ।
असत्त्वं चेन्मृदादेः स्यान्न मानानुपपत्तितः ॥ * (53)

पिण्डादिव्यतिरेकेण यदि मानं भवेत्ततः ।
मृदादि कारणं लब्धं न मानं स्यान्मृदा विना ॥ (54)

* पिण्डादिव्यतिरेकेण पिण्डादाविव चेत्प्रमा ।
सिद्धं कारणमेवं स्यान्न मा मेयं विना यतः ॥ (55)

प्रपञ्चयति—**पिण्डादिनेति** । अतो मृदादेरिति संबन्धः । (50) फलितमाह—**मृदाद्येवेति** । [1]व्यवहारदशायां पिण्डादेर्नाशदर्शनात् मृदादेः तददर्शनादित्यर्थः । (51)

मृदादेरेव कारणत्वे [2]कथं पिण्डाभाव ए(वं)[व] घटोत्पत्तिनियमः, अत्राह—**विरुद्धेति** । (52) पिण्डादिव्यतिरेकेणानुगतमृदादेरभावादकारणत्व(मपि)[म्, इति] शङ्कते—**पिण्डादीति** । मृद्घटो मृच्छरावः [3]इत्यनुबन्धस्य **अनुगतमेय**-व्यतिरेकेणायोगात् [4]मैवम्, इत्याह—**नेति** । (53) तत् प्रपञ्चयति—**पिण्डादीति** । ततः—[5]पिण्डादेः अन्यत् मृदादि कारणं लब्धमित्यर्थः । (54) मृदादेः

---

1. **व्यवहारदशायामिति** एतेन नाशादेर्दुर्निरूपत्वनिरूपणं अपारमार्थिकत्वपर्यवसन्नमिति बोध्यम् ।
2. **कथं पिण्डाभाव एवेति** पिण्डावस्थायामपि मृत्स्वरूपस्य कारणस्य सत्त्वात् घटोत्पत्तिसंभवादिति भावः ।
3. **अनुबन्धस्येति** अनुगतमृत्तादात्म्यावगाहिप्रत्ययस्येत्यर्थः ।
4. **मैवमिति** मृदादेरनुगतस्याभावादकारणत्वमिति नेति यावत् ।

* **मानानुपपत्तित इति** मानस्य अनुगतमृदादिप्रमेयं विनानुपपत्तेरित्यर्थः ।

5. **पिण्डादेरन्यदिति** अत्र अन्यदिति पूरितं बोध्यम् ।

* अनुवृत्तमृदादेः व्यावृत्तपिण्डादितो भेदाभेदाभ्यां दुर्भणत्वात् मानस्य व्यावृत्तविषयत्वोपपत्तेः नेष्टकारणसिद्धिरित्याशङ्क्याह—**पिण्डादीति** इति **शास्त्रप्रकाशिका** ।

असाधारणरूपेषु व्यावृत्तेष्वितरेतरम् ।
बहुष्वेकं यदाभाति प्रत्यक्षं कारणं तु तत् ॥ (56)

सादृश्यादन्वयभ्रान्तिस्तन्निवृत्तावपीति चेत् ।
नैवं पिण्डस्थदृष्टानां घटादावपि दर्शनात् ॥ (57)

प्रत्यभिज्ञायमानेऽर्थे तदेवेदमिति ध्रुवे ।
लिङ्गमाभासतामेति प्रत्यक्षार्थविरुद्धमित् ॥ * (58)

सावयवस्य कार्यत्वात् पिण्डादिवदनुगमायोगादनुवृत्तज्ञानं व्यावृत्तगोचरम्, अत्राह—**पिण्डेति ।** पिण्डादाविव मृदादावपि प्रमा चेत्, एवं सति पिण्डादिवत् तदतिरेकेण मृदादि कारणं अनुवृत्तं सिद्धम् । अन्यथा पिण्डादेरप्यपलापापाता-दित्यर्थः । (55) व्यावृत्तादनुवृत्तस्य भेदाभेदाभ्यां दुर्निरूपत्वात् नानुवृत्तं कारणम्, अत्राह—**असाधारणेति ।** (56)

अनुवृत्तप्रत्ययस्य सादृश्यनिबन्धनभ्रमत्वान्नानुगतसिद्धिरिति शङ्का, तन्निरासश्च

अनुवृत्तप्रत्ययस्य सादृश्यनिबन्धनभ्रमत्वात् नानुगतसिद्धिः इति शङ्कते—**सादृश्यादिति ।** [1]मैवं, बाधकाभावात्, इत्याह—**नैवमिति ।** मृदाद्यवयवाना-मिति शेषः । (57) विमता भावाः क्षणिकाः [2]अर्थक्रियाकारित्वात् दीपवत् इति क्षणिकत्वसिद्धेः अन्वयदर्शनं भ्रमः, इत्याशङ्क्याह–**प्रत्यभिज्ञायमान इति ।** (58)

---

1. **मैवं, बाधकाभावादिति** अनुवृत्तप्रत्ययस्य न भ्रमत्वं, न मृद्घटः इत्यादि-बाधकप्रमाणाभावादित्यर्थः । बाधकज्ञाननिर्णेयं भ्रमत्वमिति भावः ।

2. **अर्थक्रियाकारित्वादिति** पिण्डावस्थारूपकार्यजनकमेव मृत्स्वरूपं घटादि कार्यमपि जनयति चेत्, समर्थस्य क्षेपायोगात्—कार्यजनने विलम्बानुपपत्तेः यौगपद्येन सर्वाणि कार्याणि जनयेत् । न चैवं दृश्यते । अतः घटजनकमृत्स्वरूपात् समर्थात् विलक्षणमेव पिण्डावस्थाजननसमर्थं मृत्स्वरूपमिति युक्तिरस्य हेतोरनु-ग्राहिका बोध्या ।

* **प्रत्यक्षार्थविरुद्धमिदिति** प्रत्यक्षसिद्धस्याप्यर्थविरुद्धक्षणिकार्थबोधकमित्यर्थः ।

* विरुद्धाव्यभिचारित्वं न च प्रत्यक्षलिङ्गयोः ।
प्रत्यक्षापाश्रयान्नित्यं नानपेक्षं तदक्षवत् ॥ (59)

* विरुद्धाव्यभिचारित्वं समानबलयोर्यतः ।
दृष्टं सर्वत्र लोकेऽस्मिन् न तु सिंहसृगालयोः ॥ (60)

क्षणिकत्वे च भावानां प्रत्यभिज्ञाद्यसंभवः ।
नह्यन्यदृष्टं वस्त्वन्यैः प्रत्यभिज्ञायते क्वचित् ॥ (61)

क्षणिकं चेदिदं सर्वं प्रत्यभिज्ञाप्रमाणकम् ।
अन्यतद्बुद्ध्यपेक्षत्वं तद्बुद्धेर्वः प्रसज्यते ॥ (62)

प्रत्यक्षात् कारणैक्यधीः, अनुमानात् तद्भेदधीः । अत उभयोर्बाधः, अबाधो वा तुल्यः, इत्यत आह—**विरुद्धेति** । विरुद्धविषयेणाविनाभूतत्वं विरुद्धाव्यभिचारित्वम् । तदभावे हेतुमाह—**प्रत्यक्षेति** । व्याप्तिपक्षधर्मताविषय-प्रत्यक्षापेक्षमनुमानं दुर्बलम् । अनुमाना[न]पेक्षं[प्रत्यक्षं]प्रबलमित्यर्थः । (59) एवमपि विरुद्धविषयप्रमापकत्वेन विरुद्धाव्यभिचारित्वं किं न स्यात्, अत्राह —**विरुद्धाव्यभिचारित्वमिति** । (60) कारणस्य स्थिरत्वानङ्गीकरणे बाधकमाह—**क्षणिकत्वे चेति** । [1]प्रत्यभिज्ञा, स्मरण, शेषकर्मानुष्ठानानां क्षणिकत्वेऽ(उ)[नु]पपत्तिरित्यर्थः । (61) विमता प्रत्यभिज्ञा न प्रमाणं [2]बुद्ध्यन्तर-संवादहीनत्वात् दीपप्रत्यभिज्ञावत्, इति शङ्कते—**क्षणिकमिति** । अस्माभिः

---

* **विरुद्धाव्यभिचारित्वमिति** विरुद्धार्थद्वयबोधकहेत्वोः प्रयोगे सत्प्रतिपक्षापर-पर्यायतया ' विरुद्धाव्यभिचारी ' इति व्यवहारः प्राचीननैयायिकनिबन्धेषु दृश्यते ।

* प्रत्यक्षस्य प्राबल्येऽपि प्रकृतप्रत्यभिज्ञाप्रत्यक्षस्य प्रकृतक्षणिकत्वानुमानोपजीव्यत्वा-भावात् न प्राबल्यमिति विरुद्धाव्यभिचारित्वं स्यादित्याशङ्क्याह—**विरुद्धाव्यभि-चारित्वमिति** प्रकृतप्रत्यभिज्ञाप्रत्यक्षस्योपजीव्यजातीयत्वेन निरुक्तानुमानात्प्राबल्य-मिति भावः इति **शास्त्रप्रकाशिकाकाराः** ।

1. **प्रत्यभिज्ञेत्यादि** सर्वेषामपि भावानां क्षणिकत्वस्य परैः स्वीकारेण आलयविज्ञान-रूपात्मनोऽपि क्षणिकत्वात् अभिज्ञाप्रत्यक्षाश्रयकालासंबन्धित्वात् प्रत्यभिज्ञानादीनाम-नुपपत्तिः । सन्तानस्यैक्यात् प्रत्यभिज्ञादेः नोपपत्तिः, सन्तान्यतिरिक्तस्य सन्तान-स्यावस्तुत्वादिति भावः ।

2. **बुद्ध्यन्तरसंवादहीनत्वादिति** बुद्ध्यन्तरसंवादात् परतः धियां प्रामाण्यमिति सौगतसमयो बोध्यः ।

इदं क्षणिकमित्येतत् क्षणिकत्वे न सिद्धयति ।
इदंक्षणिकताबुद्धयोर्भिन्नाधिकरणत्वतः ॥ (63)

अज्ञातं ज्ञायते यस्य तथाऽजातं च जायते ।
प्रत्यभिज्ञामृते तस्य प्रतिज्ञार्थो न सिद्धयति ॥ (64)

***अनवस्था च दुर्वारा ह्यविश्वासश्च जायते ।**
मृषात्वात्सर्वबुद्धीनां न क्वचिन्निश्चितिर्भवेत् ॥ (65)

संबन्धानुपपत्तिश्च तदिदञ्ज्ञानयोर्ध्रुवम् ।
संबन्धकर्तर्यसति, न च सादृश्यसंश्रयात् ॥ (66)

स्वतः प्रामाण्योपगमात् घटादिप्रत्यक्षे व्यभिचारः इत्याशयेन, संवादात्प्रामाण्ये अनवस्था, इति दूषयति—**अन्येति** । क्षणिकत्वबुद्धेरपि स्वतो मानत्वाभावात् तादृग्बुद्धयन्तरापेक्षत्वे, तस्यापि [1]तथात्वे अनवस्थानात् स्वतः प्रामाण्यमेष्टव्यमित्यर्थः । (62) किञ्च, इदं क्षणिक(त्व)मिति द्वे ज्ञाने क्रमभाविनी । ज्ञानयौगपद्यायोगात् । तयोरेकाश्रयत्वे तदाश्रयस्यात्मनः [2]क्षणिकत्वविरोधात् भिन्नाश्रयत्वं वक्तव्यम् । तत्र दूषणमाह—**इदमिति** । (63) प्रत्यभिज्ञाप्रामाण्यं बलादङ्गीकारयति—**अज्ञातमिति** । (64) अविसंवादिज्ञानं प्रमा, अर्थक्रियास्थितिश्चाविसंवादः इत्युक्तत्वात् कथं तद्धीनप्रत्यभिज्ञाप्रामाण्यम्, अत्राह—**अनवस्थेति** । अर्थक्रियाज्ञानस्याप्यर्थक्रियाज्ञानान्तरापेक्षत्वादित्यर्थः । परतः प्रामाण्यं, स्वतोऽप्रामाण्यमिति वदतः क्षणिकमपि न सिद्धयेत्, इत्याह—**अविश्वासश्चेति** । (65) सोऽयमित्यत्र तदेतद्देशकालविशिष्टबुद्धयोः संबन्धोऽस्ति, किं वा, असति संबन्धे बुद्धयोः सादृश्यात् तद्धीः । आद्ये तत्सिद्धयर्थं स्थिरोऽभ्युपेयः, इत्याह—**संबन्धेति । कर्तरीति** । ज्ञातरीत्यर्थः । द्वितीयं दूषयति—**न चेति** । (66)

---

1. **तथात्वे**—तादृग्बुद्धयन्तरापेक्षत्वे ।
2. **क्षणिकत्वविरोधादिति** क्षणद्वयावस्थानप्रसङ्गादिति भावः ।

* अज्ञातस्य ज्ञानमजातस्य जन्मेति नास्मत्प्रतिज्ञेति, 'प्रतिज्ञार्थो न सिद्धयति' इति न दूषणमित्याशङ्कयाह—**अनवस्था चेति** । ज्ञातं ज्ञायते जातं जायते चेदनवस्था स्यादेवेत्यर्थः इति **शास्त्रप्रकाशिकाकाराः** । **मृषात्वात्**—स्वतोऽनिश्चायकत्वात् ।

ध्वंसिनोरिव सादृश्यं स्थायिनोरपि नेष्यते ।
* ग्राहकेऽसति तद्भित्तेः बुद्धीनां चैकरूपतः ॥ (67)

नाशभेदविरुद्धार्थप्रमेये च व्यवस्थिते ।
प्रत्यर्थिनि हि प्रत्यक्षे तद्विरुद्धः कुतो मितेः ॥ * (68)

अनुत्पन्नोत्पित्सुरुत्पन्नोऽनष्टो नाशादिकृत्तथा ।
एवमष्टक्षणावस्थो भावोऽवश्यं त्वयेष्यते ॥ (69)

अन्योन्याविषयत्वे तु कुतः सादृश्यधीरियम् ।
* सादृश्यार्थं विनैवेयं क्लृप्ता सादृश्यधीर्यदि ॥ (70)

कथं सादृश्यात् संबन्धासिद्धिः, अत्राह—**ध्वंसिनोरिति** । ग्रा(हि)[ह]के स्था(य)[यि]न्यसतीत्यर्थः । कुतः, अत्राह—[1]**तद्भित्तेरिति** । प्रतिक्षणं ग्राहकस्य भिन्नत्वात् तत्क्षणद्वयग्राहिणोऽभावादित्यर्थः । संविद्भेदे मानाभावात् न सादृश्यमपि, इत्याह—**बुद्धीनां चेति** । (67) **बौद्धसिद्धान्ते** निर्विकल्पप्रत्यक्षं मानम् । तच्च नाशादिविरुद्धसन्मात्रग्राहकम् । अतोऽपि न क्षणिकत्वम्, इत्याह—**नाशेति** । **कुतो मितेः**—[2]कस्मान्मानादित्यर्थः । (68) हेत्वन्तरमाह—**अनुत्पन्नेति** । घटोऽनुत्पन्नः सन् उत्पित्सुः उत्पाद्यमानः सन् उत्पन्नः अनष्टो निनंक्षुः नंष्टा नष्टो भवतीति अष्टक्षणावस्थायित्वान्न तस्य क्षणिकतेत्यर्थः । (69) ययोः सादृश्यं तयोरन्योन्यविषयत्वमस्ति, न वा । आद्ये [3]स्वसंवेद्यत्वक्षतिः । द्वितीये दोषमाह—**अन्योन्येति** । सति विषये जायमानबुद्धेः ग्राहकापेक्षत्वात् [4]सादृश्यबुद्धेः न तदपेक्षा, इति शङ्कते—**सादृश्येति** । (70) किमिदं—**बाह्यार्थ-**

---

1. **तद्भित्तेरिति** भित्तिः—भेदः । तस्य - ग्राहकस्य भेदादित्यर्थः ।
* ग्राहकेऽसति तद्भिन्ने इति मुद्रितपुस्तकपाठः । ताभ्यां सदृशाभ्यां भिन्ने ग्राहके असतीति तदर्थः । 'तद्भित्तेः' इति वार्त्तिकपाठान्तरमपि व्याख्यातं **शास्त्रप्रकाशिकायाम्** । **एकरूपतः**—स्वरूपस्यैकत्वादित्यर्थः ।
2. **कस्मान्मानादित्यर्थ इति** तथा च मानाभाव इति भावः ।
* '**कुतो मितेः**' इत्यत्र अमितेरिति पदच्छेदः । मानाभावात् प्रत्यक्षविरुद्धार्थः कुतः, - न युक्तः इति भावं वर्णयति **शास्त्रप्रकाशिका** ।
3. **स्वसंवेद्यत्वक्षतिरिति** बुद्धीनां स्वसंवेद्यत्वं सौगतसमयसिद्धमिति भावः ।
4. **सादृश्यबुद्धेर्न तदपेक्षेति** सादृश्यस्यासत्त्वादिति भावः ।
* **सदृशार्थं विनैव** इति मुद्रितपुस्तकपाठः ।

मृगाम्बुधीवन्मिथ्यात्वं स्यादेवं तदिदंधियोः ।
असद्विषयतैवेह सर्वासामपि चेद्धियाम् ॥ (71)

न, एवंबुद्धेरपि तथा ह्यसद्विषयता भवेत् ।
अस्त्वेवं सर्वबुद्धीनां मृषात्वमिति चेन्मतम् ॥ (72)

नैवं स्यात् सर्वबुद्धीनां मृषात्वे मित्यसंभवात् । *
कारणस्यास्तिता तस्मात्सिद्धा कार्योद्भवात्पुरा ॥ (73)

कार्यस्यापि यथाऽस्तित्वं तथेदानीं प्रपञ्चयते ।
* सत्त्वपूर्वमिदं कार्यं तमोऽन्तस्थघटादिवत् ।
तस्याभिव्यक्तिधर्मत्वात्, अन्यथा स्यान्नृशृङ्गवत् ॥ (74)

वादिना उच्यते, विज्ञानवादिना वा, शून्यवादिना वा । आद्यं प्रत्याह — **मृगेति** । तदिदंबुद्धेरपि निर्विषयत्वापात इत्यर्थः । द्वितीयमनुवदति—**असदिति** । (71) क्षणिकं ज्ञानमित्यस्यापि ज्ञानस्य असद्विषयत्वेन विज्ञानवादासिद्धिः, इति दूषयति—**नैवमिति** । तृतीयं शङ्कते—**अस्त्विति** । (72) सर्वा धीर्निर्विषये-त्यस्याः सविषयत्वे, सर्वधियामेत [1]दृष्टान्तेन सविषयत्वानुमानात्, निर्विषयत्वे [2]स्यादप्रामाण्यम्, इति परिहरति—**नैवमिति** । कारणसत्त्वानुमानार्थमुपसंहरति—**कारणस्येति** । (73)

कार्यस्यापि सत्त्वनिरूपणम्

अभिव्यज्यमानत्वेन कार्यस्य सत्त्वानुमाननिरूपणम्

'कार्यस्य चाभिव्यक्तिलिङ्गत्वात्' इति **भाष्यतात्पर्यार्थमाह —कार्यस्यापीति** । वि(न)[म]तं प्रागभिव्यक्तेः सत्, अभिव्यज्यमानत्वात् आलोक-व्यङ्ग्यवत् । विपक्षे [3]अपरोक्षव्यक्त्यनुपपत्तिः, इत्याशयेनाह—**सत्त्वेति** । (74)

---

1. **एतद्दृष्टान्तेन**—सर्वा धीर्निर्विषया इति धियं दृष्टान्तीकृत्येति यावत् ।
2. **स्यादप्रामाण्यमिति** तथा च धियां न निर्विषयत्वं सिद्ध्यतीति भावः ।
* **मृषात्वे**—निर्विषयत्वे ।
3. **अपरोक्षव्यक्त्यनुपपत्तिरिति** व्यक्तिः—अभिव्यक्तिः अपरोक्षज्ञानानुपपत्ति-रित्यर्थः ।

* **सत्त्वपूर्वमिति** सत्त्वं पूर्वं—अभिव्यक्तिपूर्वकालिकं यस्येत्यर्थः ।
अभिव्यक्तिधर्मत्वात् अभिव्यक्तिः धर्मो यस्य, तत्त्वात्, अभिव्यज्यमानत्वादित्यर्थः ।

सत्यामपि च सामग्र्यां वन्ध्यापुत्राद्यसत्त्वतः ।
विज्ञानालम्बनत्वं नो न कदा चित्प्रपद्यते ॥ (75)

सर्वं सदेव चेदिष्टमुपलभ्येत ते सदा ।
सामग्र्यां घटवत्सत्यां सर्वं सद्यादिनो ध्रुवम् ॥ (76)

न विद्यमानमात्रेण ह्यभिव्यक्तिरपीष्यते ।
सदेव वस्त्वभिव्यक्तं तथाऽव्यक्तं च लक्ष्यते ॥ (77)

अङ्गीकर्तव्यमेतच्च भवद्भिरविशङ्कितैः ।
न चेत्, वः सर्वसिद्धान्तो नश्येत् सैकतकूपवत् ॥ (78)

* प्रमाणव्यतिरेकेण प्रमेयोऽर्थो भवन्भवेत् ।
मानादव्यतिरेके हि मानमेयौ न सिद्ध्यतः ॥ (79)

नृश्रृङ्गस्य अपरोक्षधीसामग्र्यभावादपरोक्षज्ञानाभावः, न तु असत्त्वात्, अत्राह— **सत्यामिति ।** चक्षुरालोकादेर्भावेऽपीत्यर्थः । (75) ' सत्त्वानुमानस्य सदो[1]पलब्धिप्रसङ्गबाधं शङ्कते—**सर्वमिति** । (76) उपलब्धिसामग्र्यां सत्यां विद्यमानस्य न प्रतीतिनियमः, इति परिहरति—**नेति** । (77) विरुद्धमिदं, कारणपरिपूर्तावपि नोपलभ्यते इति, तत्राह—**अङ्गीकर्तव्यमिति** । कारणसामग्रीक्षणे न कार्यं भवति, पूर्वापरभावनियमस्य कार्यकारणभावस्य विरोधात् । अतः सदभिव्यज्यते एवेति नियमो नाभ्युपगन्तव्यः । [2]अन्यथा क्षणिकत्वप्रसङ्गादित्यर्थः । (78)

---

1. **सदोपलब्धिप्रसङ्गबाधं**—कार्यस्य घटादेः उत्पत्तेः पूर्वं नाशादूर्ध्वं चोपलब्धिंप्रसङ्गरूपं बाधकम् ।

2. **अन्यथा क्षणिकत्वप्रसङ्गादिति** सदभिव्यज्यते एवेति नियमोपगमे क्षणिकशक्तिरूपाभिव्यक्तिसमकालिकस्य वस्तुनोऽपि क्षणिकत्वापातात् नैयायिकादीनां स्थायित्वसिद्धान्तहानिरिति भावः ।

* ज्ञानस्य ज्ञेयेऽन्तर्भावः, तस्य ज्ञाने वान्तर्भावः इति विकल्प्य, आद्ये दोषमाह—**प्रमाणेति** मानस्य मेयाद्भेदेनावस्थाने मेयसिद्धिः, अन्यथा विषय्यभावात् तदपेक्षविषयस्याप्यभावः स्यादित्यर्थः । द्वितीयं दूषयति—**मानादिति** । मेयोऽर्थः मानाभिन्नश्चेत् मानमेयभेदासिद्धिः मेयस्य मानात्मना समाप्तत्वात् मेयासिद्धौ च तदपेक्षमानासिद्धेः शून्यतेत्यर्थः । इति **शास्त्रप्रकाशिका** ।

कारणस्यापि नास्तित्वं कार्यासत्त्वे प्रसज्यते ।
न हि कार्यमनाश्रित्य कारणं जगतीक्ष्यते ॥ (80)

सत्तामात्रेण किं कार्यं समवाय्यादि कारणम् ।
साधयेद् व्यापृतं वेदं, तथापीष्टं न सिद्धयति ॥ (81)

सत्तामात्रेण चेत्कुर्यात् कारणत्रितयं तदा ।
कार्योत्पत्तिस्थितिलयाः प्राप्नुयुर्युगपत्सदा ॥ (82)

अविशेषाच्च सत्तायाः सर्वतः सर्वसंभवः ।
सर्व एव न संसिद्धयेत् व्यवहारश्च लौकिकः ॥ (83)

क्षणिकमानादभिन्नत्वात् मेयस्यापि क्षणिकत्वमेव, इत्यत आह—**प्रमाणेति**। प्रमाणव्यतिरेकेण—[1]**भेदेन,** प्रमेयो भवन्—सिद्धयन्, भवेत्—सिद्धयेत् । [2]विषयविषयिभावस्य भेदापेक्षत्वात् । विपक्षे दोषमाह—**मानादिति ।** (79) स्थिरत्वेऽपि प्रागुत्पत्तेरसदेव कार्यं, प्रागसतः [3]सत्तासमवा(दा)यत्वात् [4]तदुत्पत्तेः, अत्राह—**कारणस्येति** । [5]अन्योन्यबद्धत्वादित्यर्थः । (80) समवाय्यसमवायिनिमित्तानां कार्याभावेऽप्यवस्थानात् अन्योन्यबद्धत्वमसिद्धम्, अत्राह—**सत्तेति ।** व्यापृतं कुर्यात्, अव्यापृतं वेति [6]विकल्पार्थः । उभयथापि न कार्यसिद्धिः (अत्रा)[इत्या]ह—**तथापीति** । (81) प्रथमपक्षदूषणं विशदयति—**सत्तामात्रेणेति ।** जन्मस्थितिलयकारणानां सदा [7]सत्त्वाविशेषात् सदा [8]त्रितयं सह भवेदित्यर्थः । (82) सर्वं सर्वस्य कारणं स्यात् स्वरूपमात्राविशेषात्, इति दोषान्तरमाह—

---

1. **भेदेन**—प्रमाणभेदेन ।
2. **विषयविषयिभावस्येति** मानं हि विषयि विषयमपेक्षते इति भावः ।
3. **सत्तासमवायत्वात्**—सत्तासमवायरूपत्वात् ।
4. **तदुत्पत्तेः**—कार्योत्पत्तिपदार्थस्य ।
5. **अन्योन्यबद्धत्वात्**—परस्परसंबद्धत्वात् । कार्यकारणयोरित्यादिः ।
6. **विकल्पार्थ इति** तथा च '**सत्तामात्रेण**' इति वार्त्तिके समवाय्यादिकारणं सत्तामात्रेण कार्यं किं साधयेत्, व्यापृतं वा साधयेदिति योजना बोध्या ।
7. **सत्त्वाविशेषादिति** सद्रूपस्यैकत्वादित्यर्थः ।
8. **त्रितयं**—जन्मस्थितिलयरूपं त्रितयम् ।

त्रीण्येव कारणानीति निष्फलावधृतिर्भवेत् ।
यथा त्रयं तथा सर्वं सत्तया किं न कारणम् ॥ (84)

संभूय कार्यं कुर्याच्चेत् कारणत्रितयं तदा ।
* मेलकस्यापि कार्यत्वात् कथं तत्स्यात् त्रयं विना ॥ (85)

कारणत्रितयेनाथ एकैकस्य प्रसिद्ध्यति । *
तस्य तस्य तथैवेति सानवस्था प्रसज्यते ॥ (86)

वस्तुनः सदसत्त्वाय ह्यभिव्यक्त्येकहेतुतः ।
ऐश्वर्यं न प्रमाणस्य सत्त्वं वस्तुबलाद्यतः ॥ (87)

द्वैविध्यादावृतेः कार्यं नेक्षते तेन संवृतम् । *
लब्धात्मकस्य कुड्यादि प्राक् सूतेः कारणावृतिः ॥ (88)

अविशेषाच्चेति । ततो वा किमनिष्टम्, तत्राह—**सर्व इति** । तैलार्थिनो दुग्धादिपरिहारेण तिलेषु नियतप्रवृत्तिर्न स्यादित्यर्थः । (83) कारणानां समवाय्यादिभेदेन त्रित्वमप्ययुक्तम्, इत्याह—**त्रीणीति** । (84) [1]व्यापृतपक्षमनुवदति—**संभूयेति** । **संभूय** **मेलकशब्दवाच्यः** कारणत्रयनिरपेक्षः, तत्सापेक्षो वा । नाद्यः, इत्याह—**तदेति** । (85) द्वितीयं शङ्कते—**कारणेति** । एकैकस्य-कारणस्य, व्यापारः इति शेषः । तस्य तस्य–कारणत्रितयव्यापारस्य कारणत्रितयान्तरेण साध्यत्वापातात् आरम्भवादोऽनुपपन्नः, इत्याह—**तस्येति** । (86) यदुपलभ्यते तदेव सदिति नियमात् उत्पत्तेः प्रागनुपलब्धं कार्यं न सत् भवेत्, अत्राह—**वस्तुन इति** । प्रमेयस्य सत्त्वायासत्त्वाय वा न [2]सामर्थ्यं व्यक्तिमात्रहेतुत्वादित्यर्थः । (87) तर्हि सतोऽनुपलम्भे किं निमित्तमिति, तदाह—**द्वैविध्यादिति** ॥ (88)

---

1. **व्यापृतपक्षं**—समवाय्यादिकारणं व्यापृतं सत् कार्यं साधयेदिति पक्षम् ।
* 'मेलनस्यापि कार्यत्वात्' इति मुद्रितपुस्तकपाठः ।
* 'कारणत्रितयेनाथ एकैकस्य प्रसिद्ध्यति इत्यत्र 'विवक्षितो हि सन्धिर्भवतीति मन्यते । अथो इति पाठश्चेदप्यर्थलाभान्न वक्तव्यमस्ति' इति **शास्त्रप्रकाशिका** ।
2. **न सामर्थ्यमिति** प्रमाणस्येति शेषः । 'ऐश्वर्य' इति पदं सामर्थ्यार्थकं बोध्यम् ।
* **तेन** द्विविधेनावरणेन । **कुड्यादीति** आवृतिरिति शेषः । **प्राक् सूतेः**—उत्पत्तेः पूर्वम् ।

मृदात्मनोपसंश्लिष्टं कार्यं कारणतामितम् ।
*** कारणत्वाद्धि तत्स्थं तत् तद्दते कारणं कथम् ॥ (89)**

यदि कारणसंस्थं सत् तन्निमित्तं च कारणम् । *
व्यवधानान्तराभावात् किमर्थं नोपलभ्यते ॥ (90)

*** कार्यान्तरेण संस्थानात् मृदादेर्नोपलभ्यते ।**
सदात्मनोपलब्धिस्तु न कदा चन हीयते ॥ (91)

नष्टोत्पन्नसदभावशब्दप्रत्ययभेदधीः ।
अभिव्यक्तितिरोभूतिद्वैविध्यापेक्षयैव तु ॥ (92)

कारणस्य कार्या(च)[व]रणत्वे, तयोर्भेदः घटकुड्यवत्, अत्राह—**मृदात्मनेति** । स्वकारणेन व्याप्तं कार्यं स्वनामरूपतिरोधानेन कारणतां [1]गतमिति का(र्यच)[र्याव]रणं कारणं, न तु घटकुड्यवत् । अतो न भेद इत्यर्थः । [2]नियतपूर्वोत्तरक्षणभाविनोरनन्वितयोः कार्यकारणभावात् कथं कारणव्याप्तं कार्यम्, अत्राह—**कारणत्वाद्धीति** । [3]हेतुमाह—[4]**तद्दत इति** । कार्यापेक्षत्वात्कारणस्येत्यर्थः । (89) कार्यस्य प्रागुत्पत्तेः–कारणस्थस्याभिव्यक्तौ कारणस्यैव प्रयोजकत्वे [5]सदोपलब्धिर्दुर्वारा, इति शङ्कते—**यदीति** । (90) कार्यस्य घटाद्याकारविशे(ष)[षे]णोपलब्धिश्चोद्यते, सदात्मना वेति, विकल्प्य, आद्यं दूषयति—**कार्यान्तरेणेति** । द्वितीयमङ्गीकुरुते—**सदात्मनेति** । (91) कार्यस्य सदा सत्त्वे, नष्टो

---

1. **गतमिति** 'इतम्' इत्यंशस्य विवरणम् ।
2. **नियतपूर्वोत्तरेत्यादि** नियतपूर्वक्षणभाविनः कारणत्वं, नियतोत्तरक्षणभाविनः कार्यत्वम् । अत एव कार्यकारणयोरनन्वितत्वमिति भावः ।

* **तत्स्थं तत्**—मृदादिकारणस्थं घटादि कार्यम् ।

3. **हेतुमाहेति** मृदादेः कारणत्वात् घटादेः मृदादिनिष्ठत्वे हेतुमाहेत्यर्थः ।
4. **तद्दते इति** कार्यम् विनेत्यर्थः । मिथः अनन्वितयोः कार्यकारणभाव एव न घटते इति भावः ।
5. **सदोपलब्धिरिति** प्रागुत्पत्तेरपीति भावः ।

* **तन्निमित्तं**—अभिव्यक्तिनिमित्तम् ।

* **कार्यान्तरेणेति** पिण्डादिकार्यान्तरेणेत्यर्थः । तथा चावृतत्वादनुपलब्धिरिति भावः ।

कुड्याद्यावरणं दृष्टं भिन्नदेशं सदाऽऽवृतात् ।
कुम्भाद्यभिन्नदेशस्थं पिण्डाद्यावरणं कथम् ॥ (93)

नैवं, पयोघृतादीनामेकदेशत्वदर्शनात् ॥ (94)

*** अनावरणता चेत्स्यात् कपालादेर्घटात्मनि । ***
अन्तर्भावात्, न साध्वेतत् विभक्तानां भवेद्यतः ॥ (95)

घटः, उत्पन्नः, अस्ति, नास्तीति [1]शब्दप्रत्ययभेदः कथम्, अत्राह—**नष्टेति** । पिण्डाद्यावरणभङ्गेनाभिव्यक्ता(नु) [वु]त्पन्नव्यवहारः, दीपादिनाभिव्यक्तौ अस्तित्वव्यवहारः, कपालादिना तिरोभावे नष्टादिव्यवहारः, कुड्यादिना तिरोभावे [2]नास्तिव्यवहारः इत्यर्थः । (92) [3]भिन्नदेशस्थयोरावार्यावारकत्वदर्शनात् कुम्भादेरभिन्नदेशपिण्डादिना आवरणं न स्यात्, इति चोदयति—**कुड्यादीति** । (93) नैतत्, क्षीरनीरादीनामे[4]कदेशानां तद्दर्शनात्, इत्याह—**नैवमिति** । क्षीरघृतयोः नीरतन्मण्डयोश्चैकप्रकृतिगतयोरावृतत्वावरणत्वदर्शनादित्यर्थः । यद्वा, क्षीरनीरयोः घृततैलयोः एकदेशयोस्त[5]द्दर्शनादित्यर्थः । (94) [6]कार्या[7]त्कार्यान्तरावरणमित्ययुक्तम्, सति कपालादौ घटोपलम्भात् । [8]अतोऽसत्त्वादेव प्रागुत्पत्तेरदर्शनम्, इति शङ्कते—**अनावरणतेति** । [9]भिन्नकपालादीनामेवावरणत्वम्, इति

---

1. **शब्दप्रत्ययभेद इति** शब्दभेदः प्रत्ययशब्दितज्ञानभेदश्चेत्यर्थः ।
2. **नास्तिव्यवहार इति** नास्तित्वव्यवहारः, नास्ति इति व्यवहार इति यावत् ।
3. **भिन्नदेशस्थयोरिति** घटकुड्याद्योरिति शेषः ।
4. **एकदेशानां**—एकदेशस्थितानामिति यावत् ।
5. **तद्दर्शनादिति** आवार्यावारकत्वदर्शनादित्यर्थः ।
6. **कार्यात्**—पिण्डादिकात् ।
7. **कार्यान्तरेति** घटादिकार्यान्तरेत्यर्थः ।
8. **असत्त्वादेवेति** कार्यस्येति शेषः । एवेनावृतत्वव्यवच्छेदः ।

* **घटात्मनि**—घटस्वरूपे ।

9. **भिन्नकपालादीनामिति** घटस्वरूपानन्तर्गतकपालादीनामित्यर्थः । इदञ्च 'विभक्तानाम्' इत्यस्य विवरणम् । तस्य च उत्तरवार्तिकस्थेन **आवृतित्वमि**त्यनेनान्वयः । **आवृतित्वं**—आवरणत्वम् ।

* पिण्डादेः घटावरणत्वाभावे हेतुतया शङ्कितस्य समानदेशत्वस्य एकाश्रयत्वरूपत्वे दोषं **नैवम्** इत्यादिना निरूप्य, एककारणकत्वरूपत्वे दोषं वक्तुं तत्पक्षमुत्था-

* आवृतित्वम्, अथ मतं भङ्ग एव प्रसज्यते ।
यतो न तु घटोत्पत्तौ, नैवमप्युपपद्यते ॥ (96)

* न हि लोकेऽस्ति नियमो घटाभिव्यक्तिहेतुकः ।
अनेकसाधना यस्मादभिव्यक्तिरिहेक्ष्यते ॥ (97)

दीपेनान्यो मथा चान्यः तथा चक्रादिना परः ।
अभिव्यक्तिं प्रयात्यर्थः पुरा सन्नेव सर्वदा ॥ (98)

तमोविनाशनायैव प्रदीपोऽपीति चेन्मतम् ।
नष्टे तमसि कुम्भोऽपि स्वयमेवोपलभ्यते ॥ (99)

परिहरति—**न साध्विति** । (95) आवृतत्वा[द]नुपलम्भे तदावरणभङ्ग **एव** यत्नः कार्य[इत्य][1]नुभवविरोधः, इत्याह—**अथेति** । निराकरोति—**नेति** । (96) आवरणभङ्गेनैवाभिव्यक्तिनियमाभावात्, इति हेतुमाह—**न हीति** । तदेव कुतः, अत्राह—**अनेकेति** । (97) [2]अनेकसाधनत्वं दर्शयति—**दीपेनेति** । घटादिस्तमसावृतः दीपेन व्यज्यते, दध्याद्यावृत्तं नवनीतादि [3]मथा, पिण्डाद्यावृतः शरावादिः चक्रादिनेत्यर्थः । (98) '**दीपेनान्यः**'

पयति—**अनावरणतेति** घटस्यात्मा तत्कारणं मृदुच्यते । तत्रान्तर्भावः तस्यां कपालादेः स्थितिः । अस्मात् तुल्यदेशत्वात् घटवत् तस्य कपालादि नावरणमित्यर्थः । घटावस्थमृण्मात्रवृत्तिकपालादेर्घटानावरणत्वमिष्टमेवेति सिद्धसाध्यता । अव्यक्तघटावस्थमृद्वृत्तिकपालादेरनावरणत्वसाधने हेत्वसिद्धिः घटस्य कपालादेश्च स्वाश्रयमृदवयवभेदादिति समाधत्ते—**न साध्विति** । इति **शास्त्रप्रकाशिकाकाराः** ।

1. **अनुभवविरोध इति** घटाद्युत्पत्तौ यत्नानुभवविरोध इत्यर्थः ।

* 'आवृतत्वम्' इति मुद्रितपुस्तकपाठः ।

* **न हि लोकेऽस्तीति** घटाभिव्यक्तिमुद्देश्यां हेतूकृत्य आवरणभङ्गादेवाभिव्यक्तिरिति न नियमो लोके अस्तीत्यर्थः ।
'**घटाभिव्यक्तिहेतुतः**' इति पाठे घटाभिव्यक्तिहेतोरावरणभङ्गत्वेन नियमो नास्तीत्यर्थः इति **शास्त्रप्रकाशिका** ।

2. **अनेकसाधनत्वमिति** अभिव्यक्तेरित्यादिः ।

3. **मथा**—मथनसाधनद्रव्यविशेषेण ।

किमेवं भवतः सिद्धं यदि नाम तमोह्नुतिः ।
सदेव व्यज्यते सर्वमिति नैवापनुद्यते ॥ (100)

अज्ञातत्वापमाष्टर्यर्थमुपादित्सन्ति मानिनः ।
मानानि, मानसंबन्धादज्ञातत्वं च नश्यति ॥ (101)

यतः सति क्रियाभेदे, किं पूर्वमिति चोदना ।
क्रियाऽभेदे न च न्याय्यं ध्वान्तनाशः क्रियाफलम् ॥ (102)

ज्ञातुर्ज्ञानाभिनिष्पत्तिः निष्पन्नं मेयमेति सत् ।
मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते ॥ (103)

व्यवधानं तमो यस्मात् घटोऽयमिति संविदः ।
प्रकाशवद्धटं चेतं कुतस्तत्तमसो ह्नुतिः ॥ (104)

इत्यत्र चोदयति—**तम इति** । (99) सदेव सर्वं व्यज्यते इत्यत्र न कश्चिद्विरोधः, इति परिहरति—**किमेवमिति** । (100) इदानीं व्यञ्जकव्यापारः अर्थप्रकाशार्थ एव, आवरणभङ्गस्त्वार्थिकः सर्वत्र, इति दर्शयति—**अज्ञातत्वेति** । **मानिनः**—मानेन व्यवहारिण इति यावत् । (101) मानसंबन्धादज्ञातत्वं नश्यतीत्ययुक्तम्, घटमानतदज्ञानहानयोः किं पूर्वं किं पश्चादिति पूर्वापरभावानवधारणात्, अत्राह—**यत इति** । अज्ञानहानस्य क्रियाफलत्वात् [1]ज्ञानक्रियाया एकत्वात्, क्रियाफलयोः पूर्वापरभावस्य(वि)[व्य]वस्थितत्वादित्यर्थः । (102) मानक्रियायाः [2]पूर्वत्वं साधयति—**ज्ञातुरिति** । ज्ञानस्य उत्पत्तिविषयसंबन्धविषयाकारभजना-ज्ञानहानानां क्रमः सुप्रसिद्ध इत्यर्थः । (103) ज्ञानस्य विषयाकारभजनानन्तरमज्ञानहानस्याव(स्तु)[श्य]कत्वे हेतुमाह—**व्यवधानमिति** । [3]तर्हि व्यवधाननिवृत्तिरेव [4]पूर्वं स्यात्, अत्राह—**प्रकाशवदिति** । अर्थस्य मान-व्याप्तिव्यतिरेकेण

---

1. **ज्ञानक्रियाया एकत्वादिति** 'क्रियाभेदे न च' इत्युत्तरार्धे, क्रियाया अभेदे एकत्वे इत्यर्थो बोध्य इति भावः ।
2. **पूर्वत्वमिति** ध्वान्तनाशादित्यादिः ।
3. **तर्हीति** तमसः संविद्व्यवधानत्वेन इत्यर्थः ।
4. **पूर्वं स्यादिति** ज्ञानादित्यादिः ।

* प्रमाणव्यापृतेर्ज्ञातोऽज्ञातोऽज्ञातत्वहानिकृत् ।
घटोऽवगत इत्येतत् ततः संपद्यते फलम् ॥ (105)

यद्यावरणभङ्गाय यत्नः स्याद्घटवित्तये ।
कार्यान्तरं भवेद्भङ्गात् तेनाप्यावृतता घटे ॥ (106)

व्यवधानान्तरं तस्मादन्यदप्यापतेत्तदा ।
अतो नियत एवात्र व्यापारः फलवान्भवेत् ॥ (107)

अतीतैष्यद्घटज्ञानं सद्घटालम्बनं भवेत् ।
घटज्ञानत्वतः साक्षात् इहत्यघटबोधवत् ॥ (108)

अतीतोऽनागतोऽर्थोऽसन् यदि वाभ्युपगम्यते ।
अतीतानागतज्ञानं मिथ्येशस्य प्रसज्यते ॥ (109)

नाज्ञाननिवृत्तिरित्यर्थः । (104) अज्ञानस्थितौ तद्विरोधात् मानप्रवृत्त्यनुपपत्तेः अज्ञाननिवृत्तिरेव पूर्वं भवितुं युक्ता, इत्यत्राह—**प्रमाणेति** । प्रदीपप्रभावकुण्ठितस्य घटस्य तमोनिवर्तकत्वात् ज्ञातस्यैवाज्ञातत्वनिवर्तकत्वम् । अतो व्यञ्जकस्य नावरणभङ्ग एव यत्न इत्यर्थः । (105) व्यञ्जकस्य ताव[1]न्मात्रार्थत्वाभावे हेत्वन्तरमाह—**यदीति** । **कार्यान्तरं**—विदलचूर्णादिकम् । तेनावृतत्वात् घटो न प्रतीयेतेत्यर्थः । (106) विदलादिभङ्गे घटादिव्यक्तिः स्यात्, अत्राह—**व्यवधानान्तरमिति** । तस्मात्—विदलादेः, अन्यत्—कार्यान्तरं व्यवधानान्तरमित्यर्थः । तस्मादर्थव्यक्त्यर्थो व्यञ्जकव्यापारोऽर्थवान्, इत्याह—**अत इति** । (107)

कार्यसत्त्वे अनुमानान्तरनिरूपणम्

प्रसङ्गागतं चोद्यं परिसमाप्य, [2]कार्यसत्त्वे अनुमानान्तरमाह—**अतीतेति** । (108) विपक्षबाधकाभावादप्रयो[3]जको हेतुः, अत्राह—**अतीतोऽनागत इति** ।

---

* **प्रमाणव्यापृतेरिति** पूर्वमज्ञातः घटादिः प्रमाणव्यापारेण ज्ञातः सन् अज्ञातत्वहानिं करोतीत्यर्थः ।

1. **तावन्मात्रार्थत्वाभावे**—आवरणभङ्गमात्रार्थत्वाभावे ।

2. **कार्यसत्त्वे**—कार्यस्य उत्पत्तेः पूर्वं नाशादूर्ध्वं च सत्त्वे ।

3. **अप्रयोजको हेतुः** घटज्ञानत्वरूपः पूर्वोक्तहेतुरप्रयोजक इत्यर्थः ।

प्रत्यक्षं नापि चेशस्य केन चित्प्रतिहन्यते ।
अपविद्धातिशीत्येव तज्ज्ञानं केन हन्यते ॥ (110)

* घटसत्त्वे पुरोत्पत्तेरनुमा च प्रदर्शिता ।
तस्मात्सदेव कार्यं स्यात् प्रागुत्पत्तेरपि ध्रुवम् ॥ (111)

* एष्यद्घटनिषेधे च विरोधोऽपि प्रसज्यते ।
भविष्यति न भाव्यर्थो वर्तमाननिषेधवत् ॥ (112)

ईश्वरज्ञानस्य निरालम्बनत्वेन [1]भ्रान्तत्वप्रसङ्गः, प्रत्यक्षस्य विद्यमानोपलम्भनत्वादित्यर्थः । (109) ओमिति चेत्, अत्राह—**प्रत्यक्षमिति** । [2]अप्रतिहतत्वे हेतुमाह—**अपविद्धेति** । अपविद्धा अतिशीतिः—अधिकबलं बाधकं मान्तरं यस्मात्, [3]तदपविद्धातिशीतीत्यर्थः । (110) विपक्षबाधकोपन्यासेन सिद्धमनुमाप्रामाण्यं तत्फलं चोपसंहरति—**घटेति** । (111)

अभावनिरासः

अनागतः अतीतश्च घटो नास्तीति, किं तस्य अनागतादिकाले सत्त्वनिषेधः, किं वा वर्तमानकाले । नाद्यः, इत्याह—**एष्यदिति** । दृष्टान्तमाह—**वर्तमानेति** । वर्तमानो नास्तीति [4]वचनव्याघातो यथेत्यर्थः । (112) [5]द्वितीयेऽपि,

---

1. **भ्रान्तत्वप्रसङ्गः**—भ्रमत्वप्रसङ्गः । मिथ्येशस्य प्रसज्यते इत्यत्र मिथ्यापदं भ्रमपरमिति बोध्यम् ।
2. **अप्रतिहतत्वे**—अबाध्यत्वे ।
3. **अपविद्धातिशीतीति** तथा च बाधकमानाभावान्नेशज्ञानस्य भ्रमत्वमिति भावः ।
* ईशज्ञानस्य सम्यक्त्वेऽपि प्रागसद्घटविषयत्वं किं न स्यात् इत्याशङ्क्याह—**घटेति** इति **शास्त्रप्रकाशिकाकाराः** ।
4. **वचनव्याघात इति** वर्तमानत्वावर्तमानत्वयोर्विरोधादिति भावः ।
5. **द्वितीयेऽपि**—वर्तमानकाले अतीतानागतादेः सत्त्वनिषेधकल्पेऽपि ।
* अतीतस्य भविष्यतश्च घटस्य कारकव्यापारदशायामसत्त्वमिति कोऽर्थः । किं तस्यातीतत्वादि तदा नास्ति, किं वा नार्थक्रियासामर्थ्यम् सत्त्वम् । आद्ये व्याहतिरित्याह—**एष्यद्घटेति** एष्यतो गतस्य च घटस्य भविष्यत्त्वादिरूपसत्त्वस्य कारकव्यापारकाले निषेधश्चेत् व्याहतिरित्यर्थः । तत्र **वर्तमाननिषेधवत्** इत्युक्तं दृष्टान्तं स्पष्टयति—**गृह्यमाण इति** । इति **शास्त्रप्रकाशिकाकाराः** ।

गृह्यमाणो घटो नो सन्निति यद्वद्विरुध्यते । *
अतीतैष्यन्मितघटप्रतिषेधस्तथाविधः ॥ (113)

प्रागभावादयोऽभावाः सन्तः स्युरतिरेकिणः ।
व्यपदेशाद्घटेनैषामन्योन्याभाववत् ध्रुवम् ॥ (114)

* एवं च सति संबन्धो न भावाभावयोर्मिथः ।
विरोधात्, भावयोर्यद्वदेकत्वात् नाप्यभावयोः ॥ (115)

असतश्च न संबन्धोऽकारकत्वात् कथंचन ।
संबन्धश्च क्रियात्मत्वात् न सिद्ध्येत्कारकं विना ॥ (116)

प्रमितभविष्यदादिरूपप्रतिषेध रूपान्तरेण वा । नाद्यः, व्याघातात्, इत्याह—**गृह्यमाण इति** । वर्तमान इत्यर्थः । [1]रूपान्तरेण प्रतिषेध इष्टः इत्याशयः । (113) प्रागभावादयः सद्रूपाः [2]भिन्नत्वात् घटवत्, इत्याह—**प्रागिति** । प्रागभावादयो घटाद्भिन्नाः घटस्याभावः इत्युच्यमानत्वात् तदन्योन्याभाववत्, इत्याह—**व्यपदेशादिति** । (114) विधिप्रतिषेधविभागसिद्ध्यर्थमभावोऽभ्युपेयः, अत्राह—**एवं चेति** । प्रागभावादेः सत्त्वानभ्युपगमे घटेन संबन्धो न स्यादित्यर्थः । दृष्टान्तमाह—**भावयोरिति** । भावयोरभावयोर्वा यथैकत्वात् न परस्परं संबन्धः, तथा भावाभावयोरपि विरोधादित्यर्थः । (115) [3]हेत्वन्तरमाह—**असतश्चेति** । संबन्धस्याक्रियात्वात् विनापि कारकं सिद्धिः, अत्राह—**संबन्धश्चेति** । [4]समवायो

---

* घटो नासन्निति मुद्रितपुस्तकपाठः । स च, एष न वर्तते किन्तु असन्निति विरुध्यते इति योजनीयः ।

1. **रूपान्तरेण**—प्रमितभिन्नरूपेण ।

2. **भिन्नत्वादिति** अतिरेकिणः इत्यस्य भिन्ना इत्यर्थः इति भावः ।

* पूर्वोक्तानुमानफलमाह—**एवं चेति** अभावानां सत्त्वे अभावस्यैव भावात् न भावाभावयोर्मिथः संगतिरित्यर्थः । **विरोधादिति** । अभावस्यैवासत्त्वादिति यावत् । इति **शास्त्रप्रकाशिकाकाराः** ।

3. **हेत्वन्तरमिति** भावाभावयोः संबन्धविरहे इत्यादिः ।

4. प्रसिद्धसंबन्धस्य समवायस्य संयोगस्य च धात्वर्थत्वं व्युत्पादयति—**समवाय इत्यादिना** ।

प्रागभावो घटस्येति घट एवोच्यते यदि ।
घट एव घटस्येति व्यपदेशो न युज्यते ॥ (117)
*न चासत्त्वं घटस्यैवं प्रागभावो घटो न च ।
अवध्यवधिमद्भेदे प्रागभावोऽपि सिद्ध्यति । (118)
अथ प्रकल्प्य संबन्धं घटस्येत्यभिधीयते ।
क्लृप्तस्यैव ह्यभावस्य व्यपदेशः प्रसज्यते ॥ (119)
अर्थान्तरमभावश्चेत्, उक्तं संस्मर्तुमर्हसि ।

इणो[1](योजतेर)र्थः, संयोगो [2]युजेः । धात्वर्थश्च प्रायेण क्रियेत्यर्थः (116) घटस्य प्रागभावः प्रध्वंसाभावः इति प्रसिद्धः संबन्धः इति चेत्, तर्हि प्रागभावादिशब्देन घट एवोच्यते, ततोऽन्यो वेति विकल्प्य, आद्यं दूषयति—**प्रागभाव इति** । (117)

घटासत्त्वं च निराकृतं स्यात्, इत्याह—**न चेति** । [3]कल्प एवायं न संभवति, इत्याह—**प्रागिति** । हेतुमाह—**अवधीति** । अवधिः—प्रतियोगी, तद्वानभाव इत्यर्थः । (118) पुरुषस्य चैतन्यमितिवत् संबन्धं प्रकल्प्य, घटस्याभावः इति व्यपदेशः, इत्याह—अ(न्ये)[थे]ति । संबन्धस्य कल्पितत्वे [4]संबन्धिनोऽपि कल्पितत्वम्, इति परिहरति—**क्लृप्तस्येति** । (119) द्वितीयकल्पमनुवदति—**अर्थान्तरमिति** । 'व्यतिरेके सदेवासत्' (वा. 11) इत्यादिनोक्तं स्मर, इत्याह—**उक्तमिति** ।

पराभिमतजन्मनिरासः

अभावं निराकृत्य, प्रागसतः सत्तासमवायः, [5]स्वकारणसमवायो वा जन्म

---

1. **इणोऽर्थ इति** समवोपसृष्टस्येणधातोरर्थः समवाय इत्यर्थः ।
2. **युजेरर्थ इति** समुपसृष्टयुज्धातोः संयोगः अर्थः इत्यर्थः ।
3. **कल्प एवायमिति** प्रागभावादिशब्देन घट एवोच्यते इति कल्प एवेत्यर्थः ।

* प्रागभावादेः घटान्तर्भावः, घटस्य तस्मिन्नन्तर्भावो वा । आद्ये तस्य नासत्त्वमित्याह—**न चेति** । **एवमिति**, अभावस्य घटाद्यन्तर्भावे सतीति यावत् । द्वितीयं प्रत्याह—**प्रागभाव इति** । उभयत्र हेतुमाह—**अवधीति** । **इति शास्त्रप्रकाशिका** ।

4. **संबन्धिनोऽपीति** प्रागभावादेरिति शेषः ।
5. **स्वकारणसमवायो वेति** । एतेन 'स्वहेतुसत्तासंबन्धः' इत्यस्य स्वहेतौ संबन्धः सत्तासंबन्धश्चेत्यर्थ इत्युक्तं भवति । घटस्य स न युज्यते इत्यत्रत्यस्य तच्छब्दस्य उत्तरेण स्वहेतुसत्तासंबन्धपदेनान्वयः ।

शशशृङ्गादिकल्पस्य घटस्य स न युज्यते ॥ (120)

स्वहेतुसत्तासंबन्धः, संबन्धस्य सदाश्रयात् ।
अथास्त्वयुतसिद्धानां नासतोऽयुतसिद्धता ॥ (121)

न भावाभावयोर्योगो नापि चायमभावयोः ।
सतोरेव यतो योगः, सिद्धं कार्यमतः सदा ॥ * (122)

द्वैतैकत्वात्मकं रूपं वैराजं कार्यमात्मनः ।
समुद्र एव ह्यस्येति विराट्कारणमब्रवीत् ॥ (123)

संभूय कार्यभूतानि भूतयोनिं यतो विभुम् ।
जन्मस्थितिलयान्यान्ति समुद्रस्तेन विश्वकृत् ॥ (124)

परैरिष्टम् । तन्निराचष्टे—**शशेति** । असतः अपृथक्सिद्धस्य कारणसंबन्धं शङ्कते—**अथेति** । अयुतसिद्धत्वमेव[न]संभवति, इत्याह—**नेति** । (120-121) 'तस्मात् सदेव कार्यं प्रागुत्पत्तेः' इति भाष्यं व्याचष्टे—**न भावाभावयोरिति** । (122)

'मृत्युनैवेदमावृतमासीत्' इत्यत्र मृत्युपदार्थनिरूपणम्

मृत्युनावृतमित्यत्र मृत्युशब्देन [1]समुद्रशब्दः पर एवोच्यते इत्युक्तम् । कथं समुद्रशब्दस्यार्थान्तरे रूढस्येश्वरविषयत्वम्, अत्राह—**द्वैतेति** । समस्तव्यस्तात्मको विराट् । आत्मनः—परमेश्वरस्य कार्यम् । विराट्कारणमीश्वरः **'समुद्र एवास्य बन्धुः'** इत्यत्र समुद्रशब्देनोक्त इत्यर्थः । (123) [2]रूढेरपि लिङ्गान्तरानुगृहीता योगवृत्तिर्बलीयसीति समुद्रशब्दस्य परमेश्वरे वृत्तिं दर्शयति—**संभूयेति** । मिलित्वेत्यर्थः । संभूयोत्पद्य द्रवन्ति—लयं गच्छ(ती)न्ति आकाशादीनि भूतानि अस्मिन्निति व्युत्पत्त्या समुद्रः परमेश्वरः इत्याशयः । (124)

---

* सदेति वर्तमानकालवत् भूतभविष्यत्कालयोरपीत्यर्थः ।

1. समुद्रशब्दः—समुद्रशब्दबोध्यः ।
2. रूढेरपीति रूढिर्योगमपहरतीति न्यायस्तु प्रकृते रूढ्यर्थासंभवात्त्याज्य इति भावः ।

तत्समुद्रं परं ब्रह्म संविन्मात्रसतत्त्वकम् ।
अविज्ञातात्मयाथात्म्यं हेतुत्वेनेह शब्द्यते ॥ (125)

इदं जगदुपादानं सर्वशक्त्यजमव्ययम् । *
स्वात्मैकाज्ञानवृत्तेन ग्रसिष्णु प्रभविष्णु च ॥ (126)

स्वाभासवर्त्मनैवैतत् स्वात्माज्ञानजभूमिषु ।
इतं बहुत्वमेकं सत् वियद्यद्वद्घटादिषु ॥ (127)

अकारणं सदज्ञानात् कारणत्वं यथैत्यजम् ।
सर्वकारकतामेवं क्रियातत्फलतामपि ॥ (128)

प्रासङ्गिकं परमेश्वरस्य कारणत्वमाविद्यकमिति निरूपणम्

परमेश्वरस्य असङ्गचिन्मात्रस्य कथं कारणत्वम्, अत्राह—**तत्समुद्रमिति** । (125) [1]विनैवाज्ञानं ब्रह्मणो जगदाकारपरिणामः किं न स्यात्, अत्राह—**इदमिति** । (126) [2]प्रतीचां परस्परं भेदः [3]ब्रह्मणश्चाभेदो यथा पारमार्थिकः, तथा कारणत्वमपि पारमार्थिकम्, अत्राह—**स्वाभासेति** । स्वस्य–ब्रह्मणः आभासो यस्मिन् तदज्ञानं(आ)[स्वा]भासः, तद्द्वारा, स्वाविद्याकल्पितहैरण्यगर्भविराडादिक्षेत्रेषु बहुत्वं इतं—गतमित्यर्थः । (127) 'सर्वगन्धः सर्वरसः' इति श्रुतेः सर्वात्म(त)त्वमिव कारणत्वं पारमार्थिकम्, अत्राह—[4]**अकारणमिति** । कूटस्थचिद्रूपं ब्रह्म [5]मायावेशात् नभःप्रभृतीनि भूतानि सृष्ट्वा तदात्म-

---

1. भास्करपक्षावलम्बनेन शङ्कते—**विनैवाज्ञानमिति** ।

* **सर्वशक्ति**—आत्माविद्याख्यशक्तियुक्तम् । **स्वात्मैकाज्ञानवृत्तेन**—स्वस्यात्मनि यदेकं दण्डायमानं अज्ञानं तस्य वृत्तं परिणामित्वम्, तेन। **ग्रसिष्णु**—कदाचित् जगतो ग्रसनशीलम्। **प्रभविष्णु**—कदाचित् जगदाकारेण प्रभवनशीलम् ।

2. **प्रतीचां**—प्रत्यगात्मनां, जीवानामिति यावत् ।

3. **ब्रह्मणश्चेति** ब्रह्मस्वरूपादित्यर्थः । ब्रह्माभिन्नाः सर्वे जीवाः परस्परं भिन्ना इति यावत् ।

4. **अकारणमिति** । 'तदेतद्ब्रह्मापूर्वमनपरम्' इति श्रुत्या ब्रह्मणः कारणत्वं निषिद्धम् ।

5. **मायावेशादिति** 'मायां तु प्रकृतिं विद्यात्' इति श्रुत्या कारणत्वस्य मायिकत्वमुक्तमिति भावः ।

* साध्यसाधनतां तस्माद्ज्ञानैकव्यपाश्रयाम् ।
उच्चैरनूद्य तत्तत्त्वं वेदान्ताः प्रत्यपीपदन् ॥ (129)

अकारणमकार्यं सत् कार्यकारणतामगात् ।
मोहादेव, ततः शास्त्रं तदुच्छित्तौ प्रवर्तते ॥ (130)

* आपीताशेषसंसारं शुद्धसंस्कारसंश्रयम् ।
अव्याकृतमिदं ब्रह्म ह्यन्तर्यामीति चोच्यते ॥ (131)

अज्ञानानुपमर्देन व्याकृतिर्यास्य जायते ।
स्वप्नविज्ञानवन्नासौ सत्यमेयव्यपाश्रया ॥ (132)

नावस्थितं भौतिककारणमित्यर्थः । (128) (सं)बन्धध्वंसिज्ञानार्थवेदान्तारम्भानुपपत्तिरत्र [1]प्रमाणम्, इत्याह—**साध्यसाधनतामिति** । [2]एवं सति कार्यकारणतामनूद्य ब्रह्मप्रतिपादनमुपपद्यते, नान्यथेत्यर्थः । (129) 'सच्च त्यच्चाभवत्' (तै. 2-6) इति सत्तार्थभवतिप्रयोगात् पारमार्थिकमेव कारणत्वम्, अत्राह—**अकारणमिति** । निर्विशेषवस्तुप्रतिपत्त्यर्थं स्वाविद्याद्वारेण जगत्कारणं 'नैवेह' इत्यादिनोच्यते इति भावः । (130) क्वचित् अव्यक्तात् जगज्जन्म श्रूयते, क्वचिदन्तर्यामिणः । कथं ब्रह्मणः कारणत्वम्, अत्राह—**आपीतेति** । (131)

---

1. **अत्र प्रमाणमिति** कारणत्वस्याविद्यकत्वे प्रमाणमित्यर्थः ।

2. **एवं सति**—कारणत्वस्याविद्यत्वे सति ।

* सृष्ट्यादिश्रुतिदृष्टत्वात्कार्यकारणभावस्य ब्रह्मवत् वस्तुत्वमाशङ्क्याह—**साध्येति** वेदान्ताः कल्पितकार्यादेः स्वरूपं प्रत्यग्ब्रह्म तात्पर्येण प्रतिपादयितुं प्रवृत्ताः । न सृष्ट्यादिप्रपञ्चः तेषु विवक्षितः । तस्यापूर्वत्वाभावादफलत्वाच्चेत्यर्थः । कार्यकारणत्वस्य मोहनिमित्तत्वे सहेतुबन्धध्वस्तौ हेतुभूतज्ञानार्थत्वेन शास्त्रारम्भोऽपि सिद्ध्यतीत्युक्तेऽर्थापत्तिमाह—**ततःशास्त्रमिति** इति **शास्त्रप्रकाशिकाकाराः** ।

* **आपीताशेषसंसारं**—स्वस्मिन्नुपसंहृतसर्वप्रपञ्चम् । **शुद्धसंस्कारसंश्रयं**—स्थूलरूपं विहाय केवलसंस्काराश्रयभूतम् । संस्कारस्य संश्रयः-संश्रयणं यस्मिन्निति संस्कारसंश्रयम् । ईदृशं ब्रह्म उपाधिप्राधान्येन अव्याकृतमिति, उपहितप्राधान्येन अन्तर्यामीति चोच्यते इति वार्त्तिकार्थः ।

सम्यङ्ज्ञानसमुत्पत्तौ हेतुत्वं तु निगच्छति । *
निद्रां हत्वा यतः स्वप्नज्ञानादपि विबुध्यते ॥ (133)

उपेयप्रतिपत्त्यैव प्रमाणानां प्रमाणता ।
* वस्तुस्थित्या न सत्यत्वमिति पूर्वमवादिषम् ॥ (134)

नामरूपादिना येयमविद्या प्रथतेऽसती ।
* माया तस्याः परं सौक्ष्म्यं मृत्युर्नैवेति भण्यते ॥ (135)

मृत्युर्वै तम इत्येवमाप एवेदमित्यपि ।
अविद्या प्रथते मौली व्यक्ताव्यक्तात्मनानिशम् ॥ (136)

जगतः प्रत्यक्षादिप्रसिद्धस्य नाव्याकृतकार्यत्वम्, अत्राह—**अज्ञानेति**। प्रत्यगज्ञाने स्थिते या [1]अभिव्यक्तिः सा [2]तदाभासेत्यर्थः । (132) शास्त्राचार्यादेर्मिथ्यात्वे ब्रह्मज्ञानं ततो न स्यात्, अत्राह—**सम्यङ्ज्ञानेति** । (133) उपायमिथ्यात्वे ब्रह्मज्ञानमप्रमा स्यात् धूमाभासजन्याग्निज्ञानवत्, अत्राह—**उपेयेति** । (134)

प्रासङ्गिकं परिसमाप्य, मृत्युपदार्थमाह—**नामेति** । (135) मृत्युशब्देन प्रत्यगज्ञानं कारणमुच्यते इत्ययुक्तम् । 'मृत्युर्वै तमः छाया, तेनैव ज्योतिषा मृत्युं तमश्छायां तरति, सा तत्र प्रायश्चित्तिः' इति **तैत्तिरीयब्राह्मणे** मृत्युशब्द-

---

1. **अभिव्यक्तिरिति व्याकृतिः** इत्यस्य विवरणम् ।
2. **तदाभासेति** अभिव्यक्त्याभासेत्यर्थः ।

* **हेतुत्वं तु निगच्छतीति** असत्यमपि शास्त्राचार्यादीति शेषः । **स्वप्नज्ञानादपीति** स्वप्ने जायमानं व्याघ्रादिज्ञानं असत्यमेव, विषयासत्यत्वेन ज्ञानसत्यत्वायोगात् । तच्च निद्रानिरोधेन सम्यग्बोधं जनयति । तद्वत् शास्त्रादिकं असत्यमपि ब्रह्मावबोधं जनयेदित्यर्थः ।

* **वस्तुस्थित्या न सत्यत्वमिति** शास्त्रस्वरूपस्य न सत्यत्वमित्यर्थः । गमकतौपयिकस्याविनाभावस्य सत्त्वे सत्यादिवासत्यादपि प्रमात्मकानुमितिर्जायते । असत्येन प्रतिबिम्बेन बिम्बानुमानदर्शनात् । अविनाभावस्यासत्त्वे तु सत्यादपि न प्रमा जायते सत्येन घटेन हेतुना वह्नेः प्रमानुमितेरनुदयात् । धूमाभासे तु अविनाभावविरहात् तज्जन्यानुमितिः न प्रमा भवतीति भावः ।

* **तस्याः परं सौक्ष्म्यमिति** अविद्याया मायायाः अव्यक्तनामरूपमध्यक्षायोग्यमपञ्चीकृतमहाभूतावस्थातिरिक्तं स्वरूपं मृत्युशब्देनोच्यते इत्यर्थः ।

एतेभ्योऽसौ समुत्थाय स्वाभासानात्मजन्मना ।
याति क्षेत्रज्ञतामीशः कूटस्थोऽपि ह्यविद्यया ॥ (137)

आपोऽत्यणुतराः सत्यमसृजन्तेति हि श्रुतिः ।
क्रियाविज्ञानशक्त्यात्मा सोऽपि ब्रह्मासृजत्परः ॥ (138)

विराड्ब्रह्माथ ससृजे मनुं देवं प्रजापतिम् ।
मनुर्देवान् मनुष्यांश्च स्थास्नु कृत्स्नं चरिष्णु च ॥ (139)

साध्यसाधनवत्कृत्स्नकार्यरूपविवक्षया ।
श्रुतिः प्रवृत्ते सेयं नैवेहेतीह यत्नतः ॥ (140)

स्यान्यत्र[1] प्रयोगात्, तथा [2]सप्तमे 'आप एवेदमग्रे आसुः ता आपः सत्यमसृजन्त सत्यं ब्रह्म' (बृ. 7-5-1) इत्यपां कारणत्वश्रवणात्, अत्राह—**मृत्युरिति**। मूलकारणमज्ञानमेव(न)[3]तत्र त(यो)[त्रो]च्यते इत्यर्थः। (136) जगतोऽविद्याकार्यस्य आत्ममात्रत्वेऽपि नाद्वैतसिद्धिः [4]क्षेत्रज्ञस्याविद्याकार्यत्वाभावात्, अत्राह—**ए[ते]भ्य इति**। कार्यकरणाकारपरिणतेभ्यो भूतेभ्यः समुत्थाय, समुत्थानं स्पष्टयति-**स्वाभासानात्मजन्मना**-स्वप्रतिबिम्बोदयद्वारा, [5]क्षेत्रज्ञत्वं यातीत्यर्थः। (137) अशनायया अन्तःकरणधर्मेण हिरण्यगर्भस्यात्र कारणत्वमुच्यते, नाव्याकृतस्य, इत्याशङ्क्य, तत्प्रतिपादनाय [6]श्रुत्यन्तरप्रसिद्धं सृष्टिक्रममाह—**आप इति**। अपञ्चीकृतभूतसूक्ष्माणि अत्यणुतराः - सूक्ष्माः। ताः सत्यं—अपञ्चीकृतपञ्चभूतात्मकं सूत्रम् असृजन्त। क्रियाविज्ञानशक्त्यात्मा—बुद्ध्युपाधिः हिरण्यगर्भोऽपि[ब्रह्म] विराजम्, असृजत्। विराट् प्रजापतिमसृजत्। (138-139) तत्रैवं सति **'नैवेह**

---

1. **अन्यत्र प्रयोगात्**—स्वाभाविकज्ञानकर्मणोः प्रयोगात्।
2. **सप्तमे**—बृहदारण्यकसप्तमाध्याये।
3. **तत्र तत्रेति** तैत्तरीयब्राह्मणे सप्तमे चेत्यर्थः।
4. **क्षेत्रज्ञस्य**—जीवस्य।
5. **क्षेत्रज्ञत्वं यातीति** तथाच अविद्यया परस्यैवाविकृतस्य जीवत्वात् नाद्वैतहानिरिति भावः।
6. **श्रुत्यन्तरप्रसिद्धेति** सप्तमाध्यायस्थश्रुतिप्रसिद्धेत्यर्थः।

* अशनायापिपासाभ्यां मृत्यो रूपं प्रचक्षते ।
प्राणस्य तत्र संवर्गात् वागाद्यध्यात्मदैवयोः ॥ (141)

*एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ (142)

सृष्टिमेतां समुद्दिश्य तन्मनोऽकुरुतेति या ।
*श्रुतिः प्रवृत्ता निर्वक्तुं यावदव्याकृतं परा (143)

यद्वा विराजमुद्दिश्य संकल्पमकरोन्मनः ।
आत्मन्वी स्यामिति तथा साकूतः सृष्टिकारणः ॥ (144)

किंचन' इत्याद्या 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ. 3-4-7) इत्यन्ता कार्यस्य जगतो यद्रूपं - मूलकारणं तद्विवक्षयैव प्रवृत्ता, इत्याह—**कार्यरूपेति** । (140)

[1]कथं तर्हि अशनायाशब्दस्य मृत्युशब्देन सामानाधिकरण्यम्, अत्राह—**अशनायेति** । प्रा(माण्य)[णस्य]मृत्योरिति संबन्धः । हेतुमाह—**तत्रेति** । प्राणे अध्यात्मं वागादीनां संहारात्, अधिदैवतं वायौ अग्न्यादीनां संहारात् तस्य [2]मृत्युतेत्यर्थः । (141) मूलकारणात् सृष्टिरिष्टा चेत्, [3]आकाशप्रमुखा वाच्या । तत्र '**तन्मनोऽकुरुत**' इति वाक्यशेषानुपपत्तिः, इति शङ्कां तिरस्कर्तुं पूर्वकीर्तितां सृष्टिपरिपाटीं कीर्तयति—**एतस्मादिति** । (142) '**तन्मनोऽकुरुत**' इति मूलकारणस्येक्षणव्यापारस्य विवक्षितत्वात् न विरोधः, इत्याशयवानाह—**सृष्टिमिति** । (143) '**तदिति मनसो निर्देशः**' इति भाष्यमनुसृत्यार्थान्तरमाह—**यद्वेति** ।

---

1. **कथं तर्हीति** 'मृत्युनैवेदमावृतमासीदशनायया' इति श्रुताविति शेषः ।

* **अशनायेति** प्राणधर्मत्वादशनायापिपासयोः प्राणरूपत्वं, धर्मधर्मिणोस्तादात्म्यादिति भावः ।

2. **मृत्युतेति** प्रसिद्धमृत्योरिव संहर्तृत्वादिति भावः

3. **आकाशप्रमुखा वाच्येति** तैत्तिरीयादौ तथैव ब्रह्मसृष्टेरभिधानादिति भावः ।

* **एतस्माज्जायते** इति मुण्डकश्रुतिः (मु. 2-1-3) ।

* **यावदव्याकृतमिति** 'तद्धेदं तर्ह्यव्याकृतमासीत्' इति पर्यन्ता श्रुतिरित्यर्थः । तत्-कारणं, मनः-ईक्षणमकरोदिति श्रुत्यर्थो बोध्यः ।

* स्वविभूतीक्षणं सृष्टौ विभोरर्चनमुच्यते ।
आपोऽजायन्त इति च सर्वभूतोपलक्षणम् ॥ (145)

विद्योत्पत्तिप्रधानत्वात् सृष्टिर्वा न विवक्ष्यते ।
तथाच प्रतिवेदान्तं सृष्टिर्नानाविधेक्ष्यते ॥ * (146)

अर्चतो मे यतो जज्ञे कमम्भः सुखकृत्ततः ।
अर्काभिधोऽथ संवृत्तः प्राणो मृत्युः प्रजापतिः ॥ (147)

मूलकारणं सूत्रात्मनावस्थितं विराजमुद्दिश्य [1]संकल्पाद्यात्मकं मनः अकरोदित्यर्थः । **'आत्मन्वी स्याम्'** इत्यस्यार्थमाह—**आत्मन्वीति** । सृष्टि[2]कारणः-हिरण्यगर्भः, [3]संवृत्त इत्यर्थः । (144) साभिप्रायस्यापि सामर्थ्यविकलस्य न स्रष्टृत्वम्, इत्याशङ्क्य 'सोऽर्चन्नचरत्' इत्येतत् व्याकुरुते—**स्वविभूतीति** । (145) **'आकाशप्रभृतीनां त्रयाणामुत्पत्त्यनन्तरम्'** इति **भाष्यं** सर्वभूतोपलक्षणम् इति व्याख्यातम् । तदाक्षिपति [4]**वार्त्तिकत्वसिद्ध्यर्थं—विद्येति** । (पृ)[सृ]ष्टेर्विवक्षितत्वे स्यादुपलक्षणं, न तु विवक्षितेत्यर्थः । [5]अत्रैव हेत्वन्तरमाह—**तथाचेति** । (146) **'[6]अर्चतः'** इत्यादेरर्थमाह—[**अर्च**]**त इति** । यथा मृत्युरीश्वरः सूत्रात्मा जातः, तथा [7]तद्रूपेणार्कशब्दवाच्योऽभूदित्यर्थः । (147)

---

1. धर्मधर्मिणोस्तादात्म्यमभिप्रेत्याह—**संकल्पाद्यात्मकं मन इति** ।
2. **सृष्टिकारण इति** सृष्टेः कारणं ब्रह्म कारणमस्येति हिरण्यगर्भः विवक्षितः इति भावः ।
3. **संवृत्त इति** साकूतः—साभिप्रायः संवृत्त इत्यर्थः ।

* **स्वविभूतीति** स्वसामर्थ्यालोचनमर्चनमित्यर्थः । 'तस्यार्चत आपोऽजायन्त' इति अपां सृष्टिरुक्ता । तत्र अप्शब्दः सर्वभूतोपलक्षकः इत्यर्थः ।

4. **वार्त्तिकत्वसिद्ध्यर्थमिति** दुरुक्तचिन्तनस्य वार्त्तिकलक्षणघटकत्वादिति भावः ।
5. **अत्रैव**—सृष्टेरविवक्षितत्वे एव ।

* **नानाविधेति** आकाशाद्या **तैत्तिरीयके**, तेजआद्या **छान्दोग्ये**, प्राणाद्या **आथर्वणे**, अन्यत्र क्रमशून्या सृष्टिरुच्यते । अतो नासौ विवक्षितेत्यर्थः ।

6. **अर्चत इत्यादेरिति** 'अर्चते वै कमभूदिति तदेवार्कस्यार्कत्वम्' इति वाक्यस्येत्यर्थः ।
7. **तद्रूपेणेति** सूत्रात्मरूपेणेत्यर्थः ।

उपासनमतोऽस्यापि नाग्नेरेवेति निश्चितिः ।
अर्कनामाभिसंबन्धो नोपासनमृते यतः ॥ (148)

यदि वाग्नेरिदं नाम तस्य प्रकरणित्वतः ।
*** आपो वा अर्क इति तु चित्यनामार्थमेव तत् ॥ (149)**

शर आसीदिति गिरा शक्त्यवस्था विवक्ष्यते ।
सा पृथिव्यभवच्चेति विराजो जन्मशब्दनम् ॥ (150)

तपोऽप्सु तप्यमानासु ह्यण्डं जज्ञे हिरण्मयम् ।
इति श्रुतिर्जगादार्थं यथैवेह प्रपञ्च्यते ॥ (151)

सूत्रात्मनः अर्कनामनिर्वचनफलमाह—**उपासनमिति** । [1]अतश्शब्दार्थं स्पष्टयति—**अर्केति** । अपूर्वसंज्ञासंबन्धस्यापर[2]योगाभावात् अन्यथेत्यर्थः । (148) सिद्धान्तमाह—**यदि वेति** ।

द्वितीयकण्डिकार्थनिरूपणम्

कथमग्नेरर्कनामत्वम् ? अश्रवणात्, अत्राह—**आप इति** । (149) बीजवदु-[3]च्छूनावस्था शरशब्देनोच्यते, इत्याह—(स)[श]र **इति** । **'सा पृथिव्यभवत्'** इत्येतत् व्याचष्टे—**सेति** । (150) सूत्राद्विराजो जन्म इत्यर्थे वाक्यान्तरमुदा-

---

1. **अतःशब्दार्थमिति** 'उपासनमतोऽस्यापि' इति पूर्वार्धगतस्य अतःशब्दस्यार्थमित्यर्थः ।

2. **अपरयोगाभावादिति** उपासनाभिन्नफलसंबन्धाभावादित्यर्थः । तन्नाम्नोपासनस्य तु 'कं ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद '(बृ)इति श्रुत्या फलमभिहितं बोध्यम् ।

* **आप इति** भूतान्तरसहितानामपां सूत्ररूपाणामर्कत्वश्रवणं चित्याग्नेः अर्कनाम्नः अर्थप्रतिपत्त्यर्थम् । स हि विराट् पूर्वोक्तास्वप्सु वक्ष्यमाणनीत्या प्रतिष्ठितः । अतः अर्चनात् कसंबन्धाच्च अर्कः चित्योऽग्निरित्यर्थः ।

3. **उच्छूनावस्थेति** सूत्रात्मन इत्यादिः । 'आपो वा अर्कः । तद्यदपां शर आसीत् तत्समहन्यत । सा पृथिव्यभवत्' इति (बृ)श्रुतिः । तत्र शरशब्दस्य शरसदृशार्थकत्वात् शक्त्यवस्था अर्थ इति वार्त्तिके उक्तम् । शक्त्यवस्थापदमत्र उच्छूनावस्थापदेन विवृतं बोध्यम् । स्थूलप्रपञ्चात्मकविराजः सूक्ष्मप्रपञ्चात्मकसूत्रादुत्पत्तिः अस्मिन् श्रुतिवाक्ये विवक्षितेति भावः ।

एवं व्यष्टिसमष्ट्यात्मा वैराजं देहमात्मनः ।
प्राचीक्लृपदथेदानीं सृष्टिस्तस्य विवक्ष्यते ॥ (152)

श्रान्तस्येति तु देहस्य कर्मायोग्यत्वमुच्यते ।
श्रमहेतुरतस्तापः तप्तस्येत्यभिशब्द्यते ॥ (153)

भास्वज्ज्ञानं भवेत्तेजो रसः प्राणो विवक्षितः ।
क्रियाविज्ञानशक्तित्वात् प्रकृतस्य प्रजापतेः ॥ (154)

अनवच्छिन्नवपुषः पिण्डावच्छेदहेतुतः ।
खस्य कुम्भादिनेवासोः निरवर्ततशब्दनम् ॥ (155)

नामरूपादिमद्देहसंबन्धात् तद्विधर्मकः ।
* अरूपोऽपि हि सूत्रात्मा लक्ष्यते रूपवानिव ॥ (156)

हरति—**तपोऽप्स्विति ।** अपञ्चीकृतभूतरूपासु अप्सु संकल्पं कुर्वतीषु हिरण्मयं-ज्योतिर्मयम्, वैराजं शरीरं ताभ्यो निर्वृत्तमित्यर्थः । 'आपो ह वा इदमग्र आसुः सलिलमेव, ता अकामयन्त कथं नु प्रजायेमहीति, ता अश्राम्यंस्तास्तपोऽतप्यन्त, तास्वन्तर्हिरण्मयमण्डं संबभूव ।' (शत-ब्रा) इति **श्रुत्यन्तरोक्तम्**, इत्याह—**इति श्रुतिरिति ।** (151) [1]द्वैताद्वैतात्मा हिरण्यगर्भः स्थूलं देहमात्मनः सृष्टवान्, इत्याह—**एवमिति** । '**तस्यामश्राम्यत्**' [2]इत्यादेस्तात्पर्यमाह—**अथेति ।** स्थूलसृष्ट्यनन्तरं सूत्रात्मनः स्रष्टुः तेन स्थूलेन परिच्छेदः सृष्टिर्विवक्ष्यते इत्यर्थः । (152) '**तस्य**' इत्यादौ [3]पदयोरपुनरुक्तमर्थमाह—**श्रान्तस्येति ।** (153) तेजोरसशब्दयोरर्थमाह—**भास्वदिति ।** (154) **निरवर्ततशब्दार्थमाह—अनवच्छिन्नेति ।** असोः—प्राणस्य अनवच्छिन्नवपुषः इति संबन्धः । (155)

---

1. **द्वैताद्वैतात्मेति** 'व्यष्टिसमष्ट्यात्मा' इत्यस्य विवरणरूपम् ।
2. **इत्यादेरिति** 'तस्यामश्राम्यत्, तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्ततााग्निः ।' इति श्रुतिः ।
3. **पदयोरिति** श्रान्तस्य, तप्तस्य इति पदयोरित्यर्थः ।

* **अरूपोऽपीति** अपिशब्दादनामापीत्यर्थः । **रूपवानिवेति** नामवानिवेत्यपि बोध्यम् ।

सूक्ष्मस्थूलशरीराभ्यां चिदाभाभ्यामविद्यया ।
* संवृतः परमेशोऽपि त्रैलोक्यात्माग्निरुच्यते ॥ (157)

* अशरीरं शरीरेषु अनवस्थेष्ववस्थितम् ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ (158)

विराड्देहावनद्धोऽसुरध्यात्माद्याधिगः खवत् । *
व्यष्टितामेति, तद्धीनः समष्टित्वेन तिष्ठति ॥ (159)

उर्व्यामुत्पादितायां तु श्रमात्तापात्प्रजापतेः ।
निरवर्ततेवास्यात्मा परिच्छेदाभिमानतः ॥ (160)

स्थूलदेहपरिच्छिन्नः स एवाद्यः प्रजापतिः ।
अग्निरेष यतस्तस्मादुपास्योऽयं प्रयत्नतः ॥ (161)

* स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥ (162)

सूत्रस्य स्थूलावच्छेदफलमाह—**नामेति** । (156) [1]शरीरद्वयावच्छिन्नपरः अग्निगिरा उच्यते, इत्याह—**सूक्ष्मस्थूलेति** । (157) पर(म)[स्य]देहद्वयावच्छेदे किं प्रमाणम्, अत्राह—**अशरीरमिति** । (158) परस्यैव देहद्वयावच्छेदे सूत्रस्यापि स्वत एव व्यष्टित्वात् न विराजो विशेषः, अत्राह—**विराडिति** । (159) 'खस्य कुम्भादिनेवासोः' इत्युक्तार्थमनुवदति उपासनं दर्शयितुम्—**उर्व्यामिति** । (160) तदुपासनमाह—**स्थूलेति** । (161) सूत्रस्य स्थूलदेहावच्छेदे **पुराणवाक्यमुदाहरति—स वै इति** । (162)

---

1. **शरीरद्वयावच्छिन्नपरः**—सूक्ष्मं स्थूलं चेति शरीरद्वयेनावच्छिन्नः परः आत्मा ।

* **परमेशोऽपि** इत्यत्र अग्निरेवार्थः ।

* **अशरीरं शरीरेषु** इति वार्त्तिकं कठवल्लीवाक्यम् ।

* **अध्यात्माद्याधिगः**—अध्यात्माधिभूताधिदैवादिषु उपाधिषु गतः—प्रविष्टः । सूत्रस्य सूक्ष्मसमष्टित्वं, विराजः स्थूलसमष्टित्वमिति बोध्यम् ।

* **स वै इति** अत्र तच्छब्दैः सूत्रात्मा परामृश्यते । अग्रे इत्यस्य व्यष्टिसृष्टेः पूर्वमित्यर्थः ।

अनुपाख्यतनुः सोऽयं व्यवहारप्रसिद्धये ।
आत्मानं व्यभजत् स्थूलैः त्रिधा वाय्वग्निभानुभिः ॥ (163)

स्वरूपानुपमर्देन स विराड् देवतात्मभिः ।
उपासनादिसिद्ध्यर्थमात्मानं व्यभजत्स्वयम् ॥ (164)

मूलात्मैव त्रिधात्मानमभिनत्स प्रजापतिः ।
इत्यस्य प्रतिपत्त्यर्थं स एष इति भण्यते ॥ * (165)

तस्य प्रथमजस्याग्नेर्विराजोऽर्कस्य वाजिवत् ।
*** दर्शनस्य विधानार्थं तस्य प्राचीति कीर्त्यते ॥ (166)**

यस्मात्कारणमुल्लङ्घ्य कार्यं नान्यत्र वर्तते ।
*** अप्सु कारणभूतासु तस्मादग्निः प्रतिष्ठितः ॥ (167)**

तृतीयकण्डिकार्थनिरूपणम्
प्रजापतेरात्मनः त्रेधा विभागः उपासनविशेषश्च

[1]'स त्रेधा' इत्यादेरर्थमाह—**अनुपाख्येति** । (163) कस्त्रेधात्मानं व्यभजत्, अत्राह—**स्वरूपेति** । त्रिधाभावकर्ता विराडिति पूर्वपक्षः । (164) इदानीं सिद्धान्तमाह—[2]**मूलात्मेति** । (165) '[3]तस्य प्राची दिक्' इत्यादेस्तात्पर्यमाह—**तस्येति** । (166) 'स एषोऽप्सु प्रतिष्ठितः' इत्यस्य युक्तिमाह—

---

1. **स त्रेधा इत्यादेरिति** 'स त्रेधात्मानं व्यकुरुत आदित्यं तृतीयं, वायुं तृतीयम् स एष प्राणस्त्रेधा विहितः' (बृ) इति वाक्यस्येत्यर्थः । आदित्यस्य तृतीयत्वं अग्निवाय्वपेक्षया, वायोस्तृतीयत्वं अग्न्यादित्यापेक्षयेति बोध्यम् ।

2. **मूलात्मेति** सूत्रात्मेत्यर्थः ।

* **स एष इति भण्यते इति** विराजः त्रेधाभावकर्तृत्वे 'स एष प्राणस्त्रेधा विहितः' (बृ) इति वाक्यशेषानर्थक्यमिति भावः ।

3. **तस्य प्राची दिक् इत्यादेरिति** 'तस्य प्राची दिक् शिरः, असौ चासौ चेर्मौ । अथास्य प्रतीची दिक् पुच्छम्, असौ चासौ च सक्थ्यौ । दक्षिणा चोदीची च पार्श्वे । द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः ।' (बृ) इति वाक्यस्येत्यर्थः । ईर्मौ—बाहू । ऐशानी आग्नेयी च 'असौ चासौ च' इत्युच्येते । द्वितीयेन 'असौ चासौ च' इत्यंशेन वायव्या नैरृती चोच्येते ।

* **दर्शनस्य**—उपासनस्य । **कीर्त्यते इति** लोकाद्यात्मत्वमग्नेः इति शेषः ।

* **अप्सु कारणभूतासु**—भूतान्तरसहितासु अप्सु सूत्ररूपास्विति यावत् ।

अप्प्रतिष्ठागुणं देवमुपास्ते योऽनिशं नरः ।
यत्र क्व चैति तत्रासौ प्रतिष्ठां लभते शुभाम् ॥ (168)

योऽबादिपरिपाट्यैवं विराजमसृजत्स्वयम् ।
कीदृग्व्यापारसंयुक्तः सोऽस्राक्षीदिति भण्यते ॥ (169)

अत्तृसर्गोऽथवोक्तः प्राक् अन्नसर्गोऽधुनोच्यते ।
अशनायावतो यस्मान्नास्त्यन्नविरहात् स्थितिः ॥ (170)

त्रेधा व्यभजदात्मानमित्येतद्वा प्रदर्श्यते ।
अग्निप्राणौ पुरैवोक्तावथ संवत्सरोद्भवः ॥ (171)

यस्मादिति । (167) '[1]यत्र क्व चैति' इत्यादेरर्थमाह—(अ)[अप्प्र]तिष्ठेति । (168)

तुरीयकण्डिकार्थनिरूपणम्
आदित्यस्य संवत्सररूपेण जन्मकथनम्

'[2]सोऽकामयत' इत्यादेः [3]भाष्योक्तसंबन्धमाह—योऽबादीति । सलिलावनिप्रभृतिक्रमेणेत्यर्थः । (169)

'कनीयोऽन्नं करिष्ये' इति वाक्यशेषालोचनया [4]संबन्धान्तरमाह—अत्रेति । 'तेजोरसो निरवर्तत' इति अत्तृसर्गमुक्त्वा, अन्नसर्ग उच्यते इत्यर्थः । (170) संबन्धान्तरमपि दर्शयति—त्रेधेति । 'तेजोरसो निरवर्तत' इत्यग्निरुक्तः । इदानीमादित्यस्य [5]संवत्सररूपेण जन्मोच्यते इत्यर्थः । (171) '[6]स मनसा'

---

1. **यत्र क्व चैतीति** 'यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान्' (बृ) इति श्रुतिः । **तदेव**—तत्रैवेत्यर्थः । गुणफलमत्रोक्तम् ।
2. **सोऽकामयतेत्यादीति** 'सोऽकामयत द्वितीयो म आत्मा जायेतेति' (बृ) इति श्रुतिः ।
3. स्वयं संबन्धान्तरस्य वक्ष्यमाणत्वादाह—**भाष्योक्तसंबन्धमिति** ।
4. **संबन्धान्तरमिति** सोऽकामयतेत्यादेरित्यादिः ।
5. **संवत्सररूपेणेति** यद्यपि 'आदित्यं तृतीयम्' (बृ)इति वाक्येन आदित्यस्यापि जन्मोक्तम् । तथापि तस्य संवत्सररूपेण जन्मात्रोच्यते इति भावः ।
6. **स मनसा इत्यादीति** 'स मनसा वाचं मि नं समभवत् अशनायामृत्युः' (बृ)इति श्रुतिः ।

* मनसा ज्ञाननिर्देशः त्रयी वागिति भण्यते ।
सर्गक्रमं स वेदोक्तं ज्ञानेनालोचयत्प्रभुः ॥ (172)

* ज्ञानेनाप्रतिघेनासौ वेदोक्तां सृष्टिपद्धतिम् ।
समन्वालोचयच्छम्भुः सिसृक्षुर्विविधं जगत् ॥ (173)

* आलोच्यालोचकयोर्हि योगो मिथुनमुच्यते ।
प्रसिद्धं मिथुनं चात्र न कथं चन युज्यते ॥ (174)

* अनन्तराग्निसंबन्धप्रसङ्गविनिवृत्तये ।
अशनायेति हि प्राह मूलकारणसंगतिम् ॥ (175)

इत्यादि व्याचष्टे—**मनसेति** । (172) जगत्पतेः प्राक् ज्ञानसाधनाभावात् कथमालोचनम्, अत्राह—**ज्ञानेनेति** । 'ज्ञानमप्रतिघं यस्य' (मनु.) इति स्मृतेरित्यर्थः । (173) [1]मिथुनपदार्थमाह—**आलोच्येति** । (174) 'अशनाया मृत्युः' इत्यशनायाग्रहणतात्पर्यमाह—**अनन्तरेति** । (175) [2]रेतःशब्दार्थमाह —**जगत इति** । पुरा-साधकावस्थायामित्यर्थः । (176) तत् त्रयं किमर्थं कदा वा

---

* **मनसेति** मनसा इति ज्ञाननिर्देशः इति योजना । **प्रभुः**—सूत्रात्मा मृत्युः ।

* ईश्वरो वैदिकीं सृष्टिं ज्ञानेनालोचयितुं नालं पुरुषत्वादस्मदादिवत् इत्याशङ्क्य, प्रतिहतज्ञानत्वमुपाधिरित्याह — **ज्ञानेनेति** कल्पितानां प्राणिनां कर्मफलभोगार्थं ईश्वरस्य सिसृक्षा इति मत्वाह—**शम्भुरिति** इति **शास्त्रप्रकाशिकाकाराः** ।

1. **मिथुनपदार्थमिति** 'स मनसा वाचं मिथुनं समभवत्' इत्यत्र मिथुनपदस्यार्थमित्यर्थः ।

* **आलोच्यालोचकयोर्योगः** -आलोच्यस्य सृष्टिक्रमस्य आलोचकस्य मनश्शब्दित-ज्ञानस्य च विषयविषयिभावः संबन्धः । **न कथञ्चनेति** अध्यात्मप्रकरणे स्त्रीपुंसयोरप्रस्तुतत्वात् प्रसिद्धमिथुनं न ग्रहीतुं शक्यते इति भावः ।

* **अनन्तराग्निसंबन्धप्रसङ्गविनिवृत्तये** अनन्तरप्रकृतः योऽग्निः—विराट्, तस्य सोऽकामयतेत्यत्र तच्छब्देन परामर्शनिवृत्तये । **मूलकारणसंगतिम्**—सूत्रात्मना तच्छब्दस्य परामर्शमिति यावत् ।

2. **रेतःशब्देति** 'तद्रेत आसीत्' (बृ)इति वाक्ये इत्यादिः ।

जगतः प्रक्रियाबीजं यदवैषीत्पुरा गृही । *
द्वैतैकत्वात्मकं ज्ञानं कर्म च ज्ञानसंभृतम् ।
भावना च तयोरेतत् त्रयं रेतोऽभिधीयते ॥ (176)

सृष्ट्यालोचनहेत्वेतत् सृष्टावाविरभूद्विभोः ।
तद्भावभाव्यपः सृष्ट्वा रेतोबीजेन स प्रभुः ॥ (177)

सर्वलोकैकबीजेन गर्भ्यण्डेन बभूव ह ।
'अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥ (178)

* तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।'
इत्येवं मनुनाप्युक्तः श्रौतोऽयं सर्गविस्तरः ॥ (179)

आपो ह वा इति तथा ह्ययमेव क्रमः श्रुतौ ।
ज्ञानकर्मादिबीजस्य गर्भ एवं प्रजापतेः ॥ (180)

स संवत्सरोऽभवदिति परिमाणोऽयमुच्यते ।
अशनायादिमत्त्वात्स स्वभावबलचोदितः (181)

प्रादुर्भूतमिति, तदाह—**सृष्ट्यालोचनहेत्विति** । सृ(ष्टो)[ष्टे]रालोचनं हेतुर्यस्य तत तथोक्तम् । तस्य बीजत्वं दर्शयति—**तद्भावेति** । आविर्भूतज्ञानादियुक्तः तेनैव पञ्चीकृतभूतानि सृष्ट्वा तेषु प्रविश्य जगद्धेतुनाण्डेन गर्भवानासीदित्यर्थः । किमत्र मानम्, अत्राह—**अप एवेति** । (मनु. 1-8) (177-178-179) "आपो ह वा इदमग्र आसुः सलिलमेव" (शतपथ) इत्यादिश्रुतिरप्यत्र मानम्, इत्याह—**आप इति** । (180) कियन्तं कालमण्डेन गर्भीबभूव इत्याकांक्षायामाह—**स इति** । कालनिर्माता आदित्यः संवत्सरः । तदु(पप)[त्प]त्तिपर्यन्तं गर्भीबभूवेत्यर्थः । [1]'तं जातम्' इत्यादेरर्थमाह—**अशनायेति** (181)

---

* **प्रक्रियाबीजं**—सृष्टिकारणम् । **ज्ञानसंभृतम्**—ज्ञानसमुचितम् । **तत् त्रयमिति** ज्ञानकर्मणी भावना चेति त्रयमित्यर्थः ।

* **हैमम्**—ज्योतिर्मयम् ।

1. **तं जातमित्यादेरिति** 'तं जातमभिव्याददात्, स भाणकरोत्, सैव वागभवत्' (बृ)इति श्रुतिः ।

सृष्ट्वाऽथ घस्मरः पुत्रं तमभिव्याददात् क्षुधा ।
भिनत्ति सर्वमर्यादां नान्वयाद्यप्यपेक्षते ॥ (182)

अस्य दग्धोदरस्यार्थे को न कुर्यादसांप्रतम् ॥ (183) *

अन्न एव यतो वृत्तिरत्तुरन्नाद एव च ।
अन्नस्य, युक्तमेवातः तमभिव्याददादिति ॥ (184)

जन्मान्तरसमभ्यस्तविद्याकर्मादिहेतुतः ।
जन्यकर्मप्रयुक्तः सन् शिशुर्भाणित्यथाकरोत् ॥ (185)

यथोक्तहेतुवशगः स्वभावप्रहितोऽप्यसुः ।
कुमारोत्थरवत्रस्तः स्वभावं चिच्छिदे भयात् ॥ (186)

अत्यन्तमपि शूराणां स्वस्वभावैकहेतुतः ।
तित्तिरादिसमुत्पाते वेपथुर्जायते भयात् ॥ (187)

घस्मरः—अदनशीलः । तं पुत्रमभिलक्ष्य [1]व्याददादिति यावत् । परमकारणादुत्पन्नस्य[2] पुत्रभक्षणमयुक्तं धर्मातिक्रमप्रसङ्गात्, अत्राह—**भिनत्तीति** । क्षुधितस्य धर्मातिक्रमो भवतीत्यनुक्रो[शो] दर्शितः । (182-183) इदानीं प्राणस्य पुत्रादन[3]मुचितमेव, इत्याह—**अन्न इति** (184) [4]भाणिति शब्दकरणकारणमाह—**जन्मान्तरेति** । आदिपदेन संस्कारग्रहः । प्राणिकर्मणश्च तत्र [5]हेतु[त्व]माह—**जन्येति** । (185) [6]हिंस्रस्वभावः कस्मात्तं न भक्षितवान्, अत्राह—**यथोक्तेति** । प्राणिकर्मवशादित्यर्थः । (186) अतिशूरस्य प्रजापतेः कथं बालकशब्दश्रवणात् भीः, अत्राह—**अत्यन्तमिति** । (187)

---

1. **व्याददात्** अत्तुं मुखविदारणं कृतवानित्यर्थः ।
2. **उत्पन्नस्येति** मृत्योरिति शेषः ।

* **को न कुर्यादसांप्रतमिति** व्यवहारदशायां विवेकिनामपि पश्वादिभिरविशेष इति भावः ।

3. **उचितमेवेति** अत्तुः स्वार्थं सृष्टान्नादनमुचितमेवेति यावत् ।
4. **भाणिति शब्दकरणेति** कुमारस्य विराज इत्यादिः ।
5. **तत्र हेतुत्वम्**—भाणितिशब्दकरणे हेतुत्वम् ।
6. **हिंस्रस्वभाव इति** मृत्युरिति शेषः ।

एवं स शिशुसंरावसंलब्धालोचनक्षणः ।
ऐक्षतेह न कामार्तः कश्चिदालोचने क्षमः ॥ * (188)

मन्यतिश्चाभिपूर्वोऽयं हिंसार्थः स्यात्प्रसिद्धितः ।
यदीममभिहिंसिष्ये कनीयोऽन्नं भवेद्ध्रुवम् ॥ (189)

कारणादल्पमेव स्यात् तद्व्याप्तेरदितिर्यतः । *
अन्नमल्पं ततोऽप्यल्पात् कनीयोऽन्नं भवेदतः ॥ (190)

पञ्चमकण्डिकार्थनिरूपणम्
सर्वान्नसृष्टिः प्रजापतेरदितित्वं च

'[1]स ऐक्षत' इत्यस्यार्थमाह—**एवमिति** । (188) 'अभिपूर्वो मन्यतिः हिंसार्थः' इति भाष्यमयुक्तमिव भाति, प्रमाणाभावात्, अत्राह—**मन्यतिश्चेति** । 'रुद्रोऽस्य पशूनभिमन्येत, नास्य रुद्रः पशूनभिमन्यते, पशूनाभिमंस्य[ते] इति, 'ततो वै रुद्रः पशूनाभ्यमन्यत' इत्यादिश्रुति**प्रसिद्धित** इत्यर्थः (189) कथमन्नस्याल्पत्वम्, अत्राह—**कारणादिति** । कारणात्—सूत्रात्, वैराजं शरीरं अन्नबीजत्वादन्नशब्दितं अल्पम्, सूत्रात्मना व्याप्तत्वात् । [2]तत्र हेतुमाह—**अदितिर्य[त]इति** । [3]एतद्व्यापकत्वेन सूत्रस्यादितित्वं यत इत्यर्थः । [4]ईयसुनोऽर्थ-

---

* **असुः**—प्राणः, मृत्युरिति यावत् । **स्वभावं चिच्छिदे**—मक्षणादुपरतवानिति यावत् । **तित्तिरः**—पक्षिविशेषः । तित्तिरिशब्देनाप्ययमुच्यते इति बोध्यम् ।

1. **स ऐक्षत इत्यस्येति** 'स ऐक्षत, यदि वा इममभिमंस्ये कनीयोऽन्नं करिष्ये इति' (बृ) इति श्रुतिः । **इमम्**—कुमारं, विराजम् ।

* **न कामार्तः कश्चिदालोचने क्षम इति** तथापि निपुणत्वादुक्तनिमित्तवशादैक्षत इति भावः ।

2. **तत्र हेतुम्**—वैराजशरीरस्य सूत्रात्मना व्याप्तत्वे हेतुम् ।

3 **एतद्व्यापकत्वेन**—वैराजशरीरव्यापकत्वेन ।

4. **ईयसुन इति** 'कनीयः' इति श्रौतपदे इत्यादिः ।

* अन्नस्याल्पत्वे हेत्वन्तरमाह—**अदितिरिति** यतः सूत्रं 'अदितिर्द्यौः' इत्यादावदितिरिति प्रसिद्धम्, अतः तेन प्रतिक्षणं मक्ष्यमाणमन्नमल्पं युक्तमित्यर्थः इति **शास्त्रप्रकाशिकाकाराः** ।

लोकेऽपीदं सुप्रसिद्धमाङ्गनाबालपण्डितम् ।
जग्धनिश्शेषबीजस्य तत्फलं नाप्यतेऽण्वपि ॥ (191)

कुमारवक्त्रोद्गतया वाचर्गादीन् ससर्ज सः ।
पश्चादींश्च कुमारेण ह्यात्मनाऽजीजनज्जगत् ॥ (192)

स्रष्ट्रत्त्रोः कार्यभक्ष्याभ्यामन्योन्याव्यतिरेकतः । *
स्रष्टृत्वात्स सृजत्येव खाद्यतेऽन्नं सदाऽऽद्यतः ॥ (193)

सर्वमत्ति यतः सृष्टं तस्माददितिरुच्यते ।
नामज्ञस्तमुपासीनः सर्वस्यात्ताऽदितिर्भवेत् * ॥ (194)

माह—**ततोऽपीति** । तद्भक्षणे(न)[त]तोऽल्पादपि अन्नमल्पं भवेत् । तस्यान्नबीजत्वादित्यर्थः । (190) [1]अल्पत्वं साधयति—**लोकेऽपीति** । (191) 'स [2]तया वाचा' इत्यादेरर्थमाह—**कुमारेति** । (192) स्रष्टृत्वमत्तृत्वं किं कदाचिदेव उत सर्वदेति, सर्वदा, इत्याह—**स्रष्ट्रत्त्रोरिति** । (193) '[3]अदितेरदितित्वम्' इत्येतत् व्याचष्टे—**सर्वमिति** । (194) 'सर्वमस्यान्नं भवति'

---

1. **अल्पत्वमिति** अन्नस्येत्यादिः ।

2. **स तया वाचेत्यादेरिति** 'स तया वाचा तेनात्मना इदं सर्वमसृजत, यदिदं किञ्चर्चो यजूंषि सामानि छन्दांसि यज्ञान् प्रजाः पशून्' । इति (बृ) श्रुतिः । अत्र, तया-पूर्वोक्तया त्रय्या वाचा, तेनात्मना-मनसा मिथुनीभावमालोचनमुपगम्य इदं सर्वमसृजतेत्यर्थः । मिथुनीभूतया त्रय्या ऋगादीन् ससर्जेति नोपपद्यते इति न शङ्कनीयम् । यतः मनसः अव्यक्तोऽयं मिथुनीभावस्त्रय्या । बाह्यस्तु ऋगादीनां विद्यमानानामेव कर्मसु विनियोगभावेन व्यक्तीभावः सर्गः इति भाष्यव्याख्यानं क्लिष्टमिति मत्वा, क्लेशमनुद्भाव्य, वार्त्तिककारैः 'वाचा' इत्यस्य प्रकृतकुमारमुखनिर्गतवाक्परत्वं, 'आत्मना' इत्यस्य प्रकृतकुमारपरत्वं च वर्णितमिति बोध्यम् ।

* **अन्योन्याव्यतिरेकतः**—अन्योन्यपरिहारेणानवस्थितेरिति यावत् ।

3. **अदितेरदितित्वमिति** 'स यद्यदेवासृजत तत्तदत्तुमध्रियत, सर्वं वा अत्तीति, तददितेरदितित्वमिति' (बृ) इति श्रुतिः ।

* **सर्वस्यात्तेति** सर्वस्यैतस्य जगतोऽन्नभूतस्य अत्ता सर्वात्मनैव भवति । अन्यथा विरोधात्, नहि सर्वस्य कश्चिदेकोऽत्ता दृश्यते । तस्मात् सर्वात्मा भवतीत्यर्थः ।

सर्वात्तृत्वेन सिद्धेऽर्थे सर्वान्नोक्तिः किमीर्यते ।
अन्नमेव भवेदन्नं नान्नमत्त्रस्य कुत्रचित् ॥ (195)

प्राणात्मात्त्वैव सोऽवश्यमुपासनबलाद्भवेत् ।
य एवमभिधानज्ञ उपासीतादितिं सदा ॥ (196)

अश्वाश्वमेधनाम्नोऽथ कारणप्रतिपत्तये ।
सोऽकामयत इत्यादिः परो ग्रन्थोऽवतार्यते ॥ (197)

यज्ञेन भूयसा यक्ष्ये इत्येवं स प्रजापतिः ।
अश्वमेधो भवेद् भूयान् भूयोदक्षिणका हि सः ॥ (198)

यजेय भूयोऽपीत्येवमकामयत भावितः ।
क्रत्वात्मेत्यभिमानेद्धः पूर्वजन्मन्यभूत्प्रभुः ॥ (199)

इति पुनरुक्तमिति शङ्कते—सर्वात्तृत्वेनेति । 'सर्वस्यैतस्यात्ता भवति' इत्यनेनैवार्थसिद्धं सर्वस्यान्नत्वमित्यर्थः । अन्नस्यान्नत्वमेव नात्तृत्वमिति प्रतिपत्त्यर्थमेतद्वाक्यम्, इति परिहरति—अन्नमेवेति । (195) 'य [1]एवमेतत्' इति वाक्यार्थमाह—प्राणेति । (196)

षष्ठकण्डिकार्थनिरूपणम्

अश्वनिर्वचनम्

पूर्वोत्तरवाक्यसंगत्यभावात् [2]उत्तरवाक्यमव्याख्येयम्, इत्यत्राह—अश्वेति । प्रजापतेः अश्वाश्वमेधशब्दवाच्यत्वे निमित्तमुत्तरवाक्येनोच्यते इत्यर्थः । (197) संगतिमुक्त्वा अक्षराणि योजयति—यज्ञेनेति । अकामयत इति शेषः । भूयान् यज्ञः कः, इत्यत्राह—अश्वमेध इति । [3]भूयस्त्वे हेतुमाह—भूय इति । प्राच्यादि चतुष्टयम(वाय्वा)[ध्वर्य्वा]दिभ्यः चतुर्भ्यो दक्षिणा । तदवशिष्टं धनं सदस्येभ्य इत्यर्थः । (198) कथमकामयत, अत्राह—यजेयेति । (भावमाधत्त)

---

1. य एवमेतदिति 'य एवमेतददितेरदितित्वं वेद' (बृ) इति श्रुतिः ।
2. उत्तरवाक्यमिति 'सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति' इत्यादिवाक्यमित्यर्थः ।
3. भूयस्त्वे हेतुमिति अश्वमेधस्येत्यादिः ।

पूर्वजन्माभिनिर्वृत्तप्रयोगापेक्षयोच्यते ।
भूयो यजेयेति वचः, सदा तद्भावभावनात् ॥ (200)

क्रत्वात्मैवाभिसंपन्नः द्वैतैकत्वात्मकः प्रभुः ।
इह तत्फलतां यातो भूयोवाग्युज्यते ततः ॥ * (201)

कारणप्रवणं सर्वं कार्यं दृष्टं जगत्यपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ (202)

यशोवीर्यैकहेतुत्वात् प्राणा यश इहेष्यताम् ।
* **यशः प्रकाशरूपेण वीर्यं तद्बलहेतुतः ॥** (203)

[भावितत्वं]भूयःशब्दप्रयोगे कारणं साधयति—**क्रत्वात्मेति** । (199) अतीते जन्मनि यजमानः कर्ता अभूदश्वमेधस्य । हिरण्यगर्भः भूयो यजेय इत्याह । अतः कर्तृभेदात् कथं भूयःशब्दः, इत्याशङ्क्याह—**पूर्वजन्मेति** । यजमान एव हिरण्यगर्भः संवृत्तः नान्य इत्यर्थः । (200) कर्मज्ञानफलत्वेन कल्पादौ यजमानस्य हिरण्यगर्भात्मनोत्पत्तिं स्पष्टयति—**क्रत्वात्मैवेति** । (201) हिरण्यगर्भस्य फलभूतस्य कथं दुःखात्मकयागकरणेच्छा, अत्राह—[1]**कारणेति** । भगवद्वाक्यमत्र प्रमाणम्, इत्याह—**प्रकृ(त)[ति]मिति** । (202) '[2]प्राणा वै यशो वीर्यम्' इति प्राणानां यशस्त्वं वीर्यत्वं चोक्तम्, तत्र हेतुमाह—**यश इति** । (203) '[3]तदेवम्' इत्यादिभाष्यार्थमाह—**उदक्रामदिति** । 'यशोवीर्यैकहेतुत्वात्' इत्यसिद्धो [4]हेतुः

---

* **भूयोवाक्**—'भूयो यजेय' (बृ)इत्यत्र भूयश्शब्दः ।

1. **कारणेति** । कर्ता हि भोक्तुः फलावस्थस्य प्रकृतिः । स च क्रतुमन्वतिष्ठत् । अतस्तद्वशात् फलभूतस्यापि प्रजापतेस्तदनुष्ठानेच्छेत्यर्थः ।

2. **प्राणा वै इत्यादि** भूयो यजेय इति कामनानन्तरं, तस्य श्रमः यशोवीर्योत्क्रमणं च 'सोऽश्राम्यत् तपो तप्यत, तस्य श्रान्तस्य तप्तस्य यशोवीर्यमुदक्रामत्' (बृ)इति वाक्येनोक्तम् । तत्र चक्षुरादयः प्राणा एव यशोवीर्यपदार्थः इति श्रुतिः स्वयमेव विवृणोति 'प्राणा वै यशो वीर्यम्' इति, इति बोध्यम् ।

* **प्रकाशरूपेणेति** प्रकाशः - ख्यातिः, तद्धेतुत्वेन यशस्त्वमित्यर्थः ।

3. **तदेवमित्यादिभाष्येति** 'तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत' (बृ)इति श्रुतिविवरणं 'तदेवं यशोवीर्यभूतप्राणेषूत्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुं - उच्छून-भावं गन्तुमध्रियत अमेध्यं चाभवत्' इति भाष्यवाक्यं बोध्यम् ।

4. **हेतुरिति** प्राणानां यशस्त्वे वीर्यत्वे चेत्यादिः ।

उदक्रामद्यशो वीर्यं विराजः श्रमकर्शितात् ।
लिङ्गात्मेह यशो वीर्यमुभयं हि तदुद्भवम् ॥ (204)

पूर्वदेहेऽभिषङ्गोऽभूदपविद्धतनोरपि । *
सङ्गत्यागो ह्यसंभाव्यो विनैकात्म्यावबोधनात् ॥ (205)

जातदेहाभिषङ्गः संस्तादात्म्यप्रतिपित्सया ।
* मेध्यमित्यादिकं कामं सोऽकामयत कामुकः ॥ (206)

अपविद्धयशोवीर्यं शरीरं कवियोगतः ।
यतोऽश्वयदतोऽश्वोऽसुः संवृत्तः स प्रजापतिः ॥ (207)

* व्यपेतसद्यशोवीर्यममेध्यं मेध्यतामगात् ।
तत्प्रवेशाद्यतोऽतोऽयमश्वमेधोऽभवत्प्रभुः । (208)

अश्वाश्वमेधावेवं च प्रजापत्यात्मनाञ्जसा ।
अभिष्टुतौ कथं नाम भवेतामिति भण्यते ॥ (209)

मानाभावात्, अत्राह—लिङ्गेति । स्थूलदेहे प्राणसंबन्धे सत्येव यशो वीर्यं, नासति इत्यन्वयव्यतिरेकसिद्धमित्यर्थः । (204) 'शरीर एव मन आसीत्' इत्यस्यार्थमाह—पूर्वेति । (205)

सप्तमकण्डिकार्थनिरूपणम्

अश्वमेधनिर्वचनम्

जातदेहाभिषङ्गः किमकरोत्, अत्राह—जातेति । (206) 'ततोऽश्वः समभवत्' इत्यादेरर्थमाह—अपविद्धेति । कवियोगतः—प्राणनिर्गमनात् । अश्वयत्—उच्छूनतां गतमित्यर्थः (207) 'तन्मेध्यमभूत्' इत्यादि वाक्यं व्याकुरुते—व्यपेतेति । (208) प्रजापतेरश्वत्वमश्वमेधत्वं च न प्रतिपादनीयं

---

* **अपविद्धतनोरपि**—शरीरान्निर्गतस्यापि ।

* **मेध्यमित्यादिकं काममिति** मेध्यं - मेधार्हं - यज्ञियं इदं - शरीरं स्यात्, अनेन शरीरेण आत्मन्वी - शरीरवान् स्यामिति काममित्यर्थः ।

* **व्यपेतेति** व्यपेते सती यशोवीर्ये यस्मादिति विग्रहः बोध्यः **अश्वमेधोऽभवत्प्रभुरिति** शरीरं प्राणवियोगादश्वयत् तत्प्रवेशाच्च मेध्यमिति अश्वमेधसंज्ञामर्हति । प्रजापतेः तत्तादात्म्यादश्वमेधत्वमित्यर्थः ।

काललोकादिवपुषस्त्वश्वस्याग्नेश्च सांप्रतम् ।
समस्योपासनं वाच्यमित्यर्थो ग्रन्थ उत्तरः ॥ (210)

विधायकपदाभावादसंगानं परस्परम् ।
पदानामिति मा प्रापदित्यर्थेयं परा श्रुतिः ॥

एष एवं यथातत्त्वमश्वमेधं विवेद यः ।
वक्ष्यमाणेन रूपेण वेदं विद्यादतस्तथा ॥* (212)

प्रयोजनाभावात्, अत्राह—अश्वेति । अश्वाश्वमेधौ प्रजापत्यात्मना कथमभिष्टुतौ भवेतामिति [1]निरूप्य, एवं भण्यते—अश्वत्वमश्वमेध (कं)[त्वं] चोच्यते इत्यर्थः । (209) क्रत्वङ्गयोरश्वाग्न्योरुपासनस्य सिद्धत्वात् 'एष ह वा इत्याद्युत्त[2]रवाक्यं किमर्थम्, अत्राह—कालेति । (उ)[नो]क्ताश्वाग्न्युपासनयोर्भिन्नत्वं, किन्तु एकत्वमेवेति प्रतिपादनायोत्तरग्रन्थारम्भ इत्यर्थः (210)

एकमेवेदमुपासनमिति निरूपणम्

पूर्वत्र उपासनविधायकपदाभावेन उपास[3]नद्वयमप्यविवक्षितम् । अतः कथं तदेकत्वप्रतिपादनम्, अत्राह—विधायकेति । असंगानं—असंबन्धः । तच्छङ्कानिवृत्त्यर्थं विधि[4]पदसहितमुत्तरवाक्यं प्रवृत्तमित्यर्थः । (211) पूर्वत्र 'अदितेरदितित्वं वेद' इति [5]गुणोपासनविधिः, न [6]प्रधानविधिः । अत्र पुनः 'अश्वमेधं (वि)वेद' इति प्रधानविधिरिति विशेषं मत्वा, [7]अक्षराणि योजयति—एष इति । विधिपर्यवसानमाह—विद्यादिति । (212) अस्य विधेः प्रकटकरणार्थं पुरावृत्त-

---

1. निरूप्य—आलोच्य ।
2. उत्तरवाक्येति 'एष ह वा अश्वमेधं वेद य एनमेवं वेद' (बृ)इत्यादिवाक्यमित्यर्थः ।
3. उपासनद्वयमिति अश्वोपासनमग्न्युपासनं चेति द्वयमित्यर्थः ।
4. विधिपदसहितमिति 'अश्वमेधं वेद' इति विधायकपदसहितमित्यर्थः ।
5. गुणोपासनेति अदितित्वरूपगुणोपासनेत्यर्थः ।
6. प्रधानविधिः—प्रधानोपासनविधिः ।
7. अक्षराणीति 'एष ह वा अश्वमेधं वेद य एनमेवं वेद' इति श्रुत्यक्षराणीत्यर्थः ।

* अत इति तस्यैवाश्वमेधवेदित्वादित्यर्थः ।

आत्मानमश्वं संकल्प्य काललोकादिधर्मिणम् ।
तथाविधशरीरः सन् सर्वलोकपितामहः ॥ (213)

यजेयमश्वमेधेन भूयोऽपीत्यभ्यमन्यत ।
भूर्लोकाद्यात्मकं सोऽश्वमात्मानं निरवग्रहम् । (214)

यावदब्दं मुमोचाश्वं स्वच्छन्दं मुक्तबन्धनम् ।
ततः संवत्सरादूर्ध्वं तं चाप्यालभतात्मने ॥ (215)

स्वात्मावयवभूताभ्यो देवताभ्यो यथायथम् ।
ग्राम्यारण्यान्पशून् प्रादादन्याभ्यः स प्रजापतिः ॥ (216)

यतोऽकरोद्विराडेवं तस्मादेवेह याज्ञिकाः ।
प्रोक्षितं सर्वदेवत्यं प्राजापत्यं तुरङ्गमम् ॥ (217)

आलभन्ते यतस्तस्माद्यथाव्याख्याततत्त्ववित् ।
कुर्यादेवं यथोक्तार्थं मृत्युत्वप्रतिपित्सया ॥ (218)

माह—**आत्मानमिति** । [1]आदिपदेन देवतासंग्रहः । (213) ततः किमकरोत्, अत्राह—**भूर्लोकेति** । निरवग्रहं—[2]निरङ्कुशम् । स्वच्छन्दं—[3]स्वेच्छाचारिणम् । 'तं संवत्सरस्य परस्तात्' इत्येतदर्थमाह—**तत इति** । (214–215–216) प्रजापतिरेवं कृतवान् इत्यत्र किं प्रमाणम्, अत्राह—**यत इति** । (217) प्रदर्शितार्थवादस्य विधिशेषत्वमाह—**यतस्तस्मादिति** । यतः एवं प्रजापतिरुपासितवान् अतः अन्यो(वि)[पि] प्रजापतित्वफलार्थी चेदु[4]पासीतेत्यर्थः । (218)

---

1. **आदिपदेन**—'काललोकादिधर्मिणम्' इत्यत्रादिपदेन ।
2. **निरङ्कुशमिति** अप्रतिबद्धमित्यर्थः ।
3. **स्वेच्छाचारिणमिति** अप्रतिबद्धत्वफलमिदं स्वेच्छाचारित्वम् । 'आत्मानमश्वम्' इत्यादिना 'मुक्तबन्धनम्' इत्यन्तेन 'तमनवरुध्यैवामन्यत' इति श्रुत्यर्थो दर्शितः । 'ततः संवत्सरादूर्ध्वम्' इत्यादिना 'स प्रजापतिः' इत्यन्तेन 'तं संवत्सरस्य परस्तादात्मने आलभत । पशून् देवताभ्यः प्रत्यौहत्' इति श्रुत्यर्थो वर्णितः इति बोध्यम् ।
4. **उपासीतेति** आत्मानं पशुमश्वं मेध्यं कल्पयित्वा, सर्वदेवत्योऽहं प्रोक्ष्यमाणः, आलभ्यमानस्त्वहं मद्देवत्य एव स्याम्, अन्ये ग्राम्या आरण्याश्च पशवः यथादैवतं अन्याभ्यो.देवताभ्य आलभ्यन्ते मदवयवभूताभ्य एवेत्युपासीतेत्यर्थः ।

कर्मोपासनमुक्त्वाथ तत्फलोपदिदिक्षया ।
एष वा इति यत्नेन ह्याजगामोत्तरा श्रुतिः ॥ (219)

दर्शनाद्यभिनिर्वृत्तो यस्त्वेवं हयसाधनः ।
प्रत्यक्षं फलरूपेण स एष इति दृश्यते ॥ (220)

अश्वमेधक्रियापूर्वपरिणामैकवर्त्मना ।
अश्वमेधो रविः साक्षादुषा इत्यादिनोदितः ॥ (221)

तस्य संवत्सर आत्मा तस्यादित्यैकहेतुतः । *
तस्य क्रत्वात्मनश्चित्यो योऽङ्गभूतः पुरोदितः ॥ (222)

फलात्मकः स एवैषः पार्थिवोऽग्निः प्रदर्श्यते ।
आत्मान एते तस्यापि त्रयो लोका यथोदिताः ॥ (223)

अश्वमेधोपासनफलनिरूपणम्

'एष ह वा अश्वमेधः' इत्यादेस्तात्पर्यमाह—**कर्मेति ।** अश्वमेधोपासनफलं वक्तुमुत्तरवाक्यमित्यर्थः । (219) तात्पर्यमुक्त्वा [1]अक्षराणि योजयति—**दर्शनेति ।** [2]अश्वमेधोपासनमश्वमेधश्चादित्य एवेत्यर्थः । (220) क्रियायाः कथमादित्यत्वम् ? अपूर्वद्वारा, इत्याह—**अश्वमेधेति ।** 'उषा वा' इत्यादिनोक्तोऽश्वमेधो रविरेवेत्यर्थः । (221) '[3]तस्य' इति वाक्यार्थमाह—**तस्येति ।** 'अयमग्निरर्कः' इत्यस्य तात्पर्यमाह—**तस्य क्रत्वात्मन इति ।** योऽयं पार्थिवोऽग्निश्चित्यः स आदित्य एवेत्यर्थः (222) 'तस्येमे लोकाः' इत्यस्यार्थमाह—[4]**आत्मान इति ।** (223)

---

1. **अक्षराणि**—'एष ह वा अश्वमेधः य एष तपति' इति श्रुत्यक्षराणि ।
2. 'दर्शनाद्यभिनिर्वृत्तः' इत्यस्य दर्शनेन निर्वृत्तः आदिपदार्थकामेन निर्वृत्तश्चेत्यर्थः । तस्य फलितमर्थमाह—**अश्वमेधोपासनमश्वमेधश्चेति ।**
3. **तस्येति** 'तस्य संवत्सर आत्मा' इति वाक्येत्यर्थः ।

* **आदित्यैकहेतुत इति** आदित्योदयास्तमयाभ्यामहोरात्रादिद्वारा संवत्सरव्यवस्था । अतस्तस्य संवत्सरात्मत्वं युक्तमित्यर्थः ।

4. **आत्मान इति** शरीरावयवा इत्यर्थः ।

क्रतुतत्साधनात्मानावादित्याग्नी यथोदितौ ।
निवृत्तात्माधिकारौ तावेकैवासौ भवेदसुः ॥ (224)

अशनायावती योक्ता मृत्युः सर्वान्नघस्मरा ।
सैवात्मा विदुषः साक्षादात्मा स्यादजरोऽमरः ॥ (225)

नैनमाध्यात्मिको मृत्युः तन्मृत्युत्वादवाप्नुयात् ।
सकृन्मृत्वाऽसुदेहेन मुच्यते सर्वबन्धनात् ॥ (226)

अग्न्यादिभेदभिन्नानां देवतानामशेषतः ।
आत्माऽभिन्नो भवत्येषः यथोक्तोपासनाद् बुधः ॥ (227)

इति द्वितीयं ब्राह्मणम्

क्रत्वङ्गस्याग्नेः कथं क्रतुभूतादि[1]त्यैक[त्व]म्, अत्राह—**क्रत्विति**। क्रतोरात्मा आदित्यः तत्फलत्वात्, क्रतुसाधनत्वादग्निः[2]। [3]तौ प्राण एवेत्येकत्वेनोपास्यौ। त्रेधा[4]भावकल्पनाफलस्योपासनादिव्यवहारस्य सिद्धत्वेन [5]तयोर्निष्पन्नाधिकारत्वादित्यर्थः। (224) 'अप पुनर्मृत्युं जयति' इत्यादेरर्थमाह—**अशनायावतीति**। प्राणदेवता सर्वस्यात्मा अजरोऽमरो विदुष आत्मा स्यादित्यर्थः। (225) देहिनो दुष्परिहर एवाध्यात्मिकमृत्युसंबन्धः, इत्याशङ्क्य, 'नैनं[6] मृत्युः' इत्यादेरर्थमाह—**नैनमिति**। तदेव स्पष्टयति—**सकृदिति**। (226) तत्र हेतुत्वेन '[7]एतासां देवतानाम्' इति वाक्यं योजयति—**अग्न्यादीति**। (227)

इति द्वितीयं ब्राह्मणम्

---

1. **आदित्यैकत्वं**—आदित्याभेदः।
2. **अग्निरिति** क्रतोरात्मेत्यनुषङ्गः।
3. **तौ प्राण एवेति** अग्न्यादित्यौ प्राण एवेत्यर्थः। एतेन 'तावेतावर्काश्वमेधौ। सो पुनरेकैव देवता भवति मृत्युरेव' इति श्रुत्यर्थो दर्शितः। सा, उ इति पदच्छेदः श्रुतौ कर्तव्यः।
4. **त्रेधाभावकल्पनेति** 'स त्रेधात्मानं व्यकुरुत' इत्यादिनोक्तस्य अग्निवाय्वादित्यात्मना त्रेधा प्राणकल्पनेत्यर्थः।
5. **तयोः**—अग्न्यादित्ययोः।
6. **नैनं मृत्युरित्यादेरिति** 'नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवति' इति श्रुतिः।
7. **एतासामिति** 'एतासां देवतानामेको भवति' इति श्रुतिः।

इति द्वितीयं ब्राह्मणम्

अथ तृतीयं ब्राह्मणम्

शास्त्रोक्तज्ञानयुक्तानां कर्मणां ज्ञानतस्तथा ।
सर्वत्र वेदशास्त्रेऽस्मिन् मृत्युभावः फलं श्रुतम् ॥ (1)

आध्यात्मिकपरिच्छेदव्यावृत्तिर्यत्समाश्रयात् ।
स मृत्युर्मृत्युशब्देन फलभूतोऽत्र वर्ण्यते ॥ (2)

या त्वश्वमेधगत्युक्तिः सोपलक्षणसिद्धये ।
कर्मज्ञानान्तराणां स्यान्नाश्वमेधगृहीतये ॥ (3)

अल्पीयःफलसंप्राप्तिरल्पीयो ज्ञानकर्मतः ।
अल्पत्वमभिभूतेःस्यात् तयोरासुरपाप्मभिः ॥ (4)

अथ तृतीयं ब्राह्मणम्

पूर्वोत्तरब्राह्मणयोः संबन्धनिरूपणम्

पौर[1]स्त्यब्राह्मणस्या[2]पुनरुक्तमर्थं दर्शयितुं वृत्तमनुद्रवति—**शास्त्रेति । ज्ञान**-सहितकर्मणां केवलोपासनस्य च मृत्युभावः फलमुक्तमित्यर्थः । (1) मृत्युः परमात्मा । तद्भावस्य धीकर्मसमुच्चयसाध्यत्वे [3]ब्रह्मविद्यानर्थक्यम्, अत्राह—**आध्यात्मिकेति ।** यत्स(गा)[मा]श्रयात्—यस्य सूत्रात्मनः अहमिति ध्यानात्, आध्यात्मिकदेहादिपरिच्छेदाभिमानव्यावृत्तिः । [4]सूत्रात्मैव मृत्युरित्यर्थः । (2) अश्वमेधतदुपासनयोः फलं मृत्युप्राप्तिरुक्ता, नोपास्त्यन्तराणां कर्मान्तराणां च इत्यत्राह—**या त्विति** । (3) धीयुक्तकर्मान्तराणामपि [5]तत्फलत्वे पितृलोकाद्यल्प-

---

अथ तृतीयं ब्राह्मणम्

उद्गीथदेवतायाः प्राणस्योपासननिरूपकमिदं ब्राह्मणं उद्गीथब्राह्मणमिति व्यवह्रियते ।

1. **पौरस्त्यब्राह्मणस्य**—'द्वया ह प्राजापत्याः' इत्यादेः उद्गीथब्राह्मणस्य ।
2. **अपुनरुक्तमिति** अधस्त्यब्राह्मणेनेत्यादिः । अत्राध्याये प्रथमं ब्राह्मणं अश्वब्राह्मणमिति, द्वितीयं अश्वमेधब्राह्मणमिति च व्यवह्रियते ।
3. **ब्रह्मविद्यानर्थक्यमिति** ब्रह्मविद्याफलस्य परमात्मभावस्य निरुक्तसमुच्चयादेव लाभादिति भावः ।
4. **सूत्रात्मैवेति** तथा च सूत्रात्मभावस्यैव समुच्चयेन लाभात्, न परमात्मभावफलिकायाः ब्रह्मविद्याया आनर्थक्यमिति भावः ।
5. **तत्फलत्वे**—मृत्युप्राप्तिफलकत्वे । धीकर्मसमुच्चयः इत्यत्र धीपदेनोपासनं विवक्षितं बोध्यम् ।

कुतस्तस्याभिभूतस्य रागाद्यासुरपाप्मभिः ।
उद्भूतिः कर्मणोऽत्यर्थं ज्ञानस्य च निगद्यताम् ॥ (5)

मृत्युं साक्षादवाप्नोति ज्ञानयुक्तेन कर्मणा ।
इत्येतत् बहुशोऽश्रावि पूर्वग्रन्थेषु चागमैः ॥ (6)

तज्ज्ञानोत्पत्तिविघ्नापध्वस्तिकृज्ज्ञानलब्धये ।
उद्गीथदेवतावाप्त्यै प्रारब्धेहोत्तरा श्रुतिः ॥ (7)

ननु मृत्योरतिक्रान्तेरुद्गीथज्ञानकर्मणोः ।
फलस्य संश्रवात् नातो मृत्युप्राप्तिस्तयोः फलम् ॥ (8)

नाग्न्यादिदेवतात्मत्वतत्फलावगमाच्छ्रुतेः ।
स्वाभाविकासङ्गमृत्योरतिक्रान्तिः पृथक् फलम् ॥ (9)

फलाप्राप्तिः, अत्राह—**अल्पीय इति** । वैदिकधीकर्मणोरल्पत्वे [1]अश्वमेघादेरपि तत्प्रसङ्गः, अत्राह—**अल्पत्वमिति** । रागादिदोषदूषितत्वात् क्षुद्रत्वमित्यर्थः । (4) रागाद्यभिभूतयोः पितृलोकादि फलमित्ययुक्तम् । प्राणाद्युपासनेष्वपि तदभिभवसंभवात् अनभिभूतधीकर्मणोरभावात्, इति शङ्कते—**कुत इति** । कस्मात्कारणात् तत्समु(द्र)[द्भ]व इत्यर्थः । (5) [2]तयोरुद्भवकारणमुपास्यप्राणदेवतेति दर्शयितुं विस्तरेणानूदितमर्थं संक्षेपतोऽनुवदति—**मृत्युमिति** । (6) [3]पौरस्त्याघस्त्यब्राह्मणसंबन्धमाह—**तज्ज्ञानेति** । मृत्युप्राप्तिफलज्ञानकर्मणोः अभिभवकारणं रागादिविघ्नः, तस्यापध्वस्तिकृत् यत् प्राणयाथात्म्यज्ञानं, तदर्थमुद्गीथब्राह्मणमित्यर्थः । (7)

उद्गीथज्ञानकर्मणोः मृत्युप्राप्तिफलत्वमाक्षिपति—**नन्विति** । 'मृत्युमतिक्रान्तो दीप्यते' (बृ. 3-3-12) इति तदतिक्रमफलस्य [4]वक्ष्यमाणत्वादित्यर्थः । (8) परिहरति—**नेति** । उद्गीथज्ञानकर्मणोः अग्न्यादिदेवतात्मत्वं

---

1. **अश्वमेधादेरपि तत्प्रसङ्ग इति** अश्वमेधस्यापि परिच्छिन्नविषयत्वेनाल्पत्वप्रसङ्ग इत्यर्थः ।

2. **तयोः**—धीकर्मणोः ।

3. **पौरस्त्येत्यादि** पौरस्त्यस्य अधस्त्यब्राह्मणेन संबन्धमित्यर्थः ।

4. **वक्ष्यमाणत्वादिति** 'सोऽग्निरभवत्' 'स वायुरभवत्' इत्यादिनेत्यादिः ।

कोऽसौ स्वाभाविकः पाप्मा तस्योद्भूतिस्तथा कुतः ।
तस्मान्निवृत्तिः केन स्यात् कथं चेत्येतदुच्यते ॥ (10) *

यथोक्तार्थप्रसिद्ध्यर्थं श्रुतिराख्यायिकात्मिका ।
द्वया हेत्येवमाद्येयं प्रचक्राम परीक्षितुम् ॥ (11)

प्राजापत्यं पदं यो यो ह्यधिकारी परीप्सति ।
* तन्निर्धार्यानया श्रुत्या पदमाप्नोत्युपासनात् ॥ (12)

पूर्वजन्मनि यद्वृत्तं वर्तमानप्रजापतेः ।
तदवद्योतको हेति निपातोऽत्र प्रयुज्यते ॥ (13)

फलम्, इत्यत्र हेतुमाह — **तत्फलेति** । अग्न्यादिदेवताभावस्य उद्गीथज्ञान-कर्मफलस्य वक्ष्यमाणत्वादित्यर्थः । [1]किं तर्हि 'मृत्युमतिक्रान्तः' इति, तत्राह— **[स्वा]भाविकेति** । पृथक्फलं—अवान्तरफलम् । परमफलं सूत्रात्मत्वमित्यर्थः । (9)

देवासुराख्यायिकार्थप्रतिपादनम्

ब्राह्मणार्थमुक्त्वा इदानीं [2]आख्यायिकायाः श्रौतमर्थमाह—**कोऽसाविति** । तस्मात्-पाप्मनः । केन - साधनेन[नि]वृत्तिः स्यात् । कथं—किंच तत्रेतिकर्तव्यमित्यर्थः । (10) तदेतं निरूपयितुं उत्तरश्रुतिः, इत्याह—**यथोक्तेति** । (11) किमेतत् प्राणयाथात्म्यनिरूपणमुद्गीथो (पासनमुद्गीथो) पासकस्यैव, उत सर्वेषां प्राणोपासकानामिति, सर्वेषामित्याह—**प्राजापत्यमिति** । (12)

प्रथमकण्डिकार्थनिरूपणम्

[3]'ह' इति निपातार्थमाह—**पूर्वेति** । (13) 'प्राजापत्याः' इत्यत्र

---

1. **किं तर्हीति** तर्हि - उद्गीथज्ञानकर्मणोः मृत्युप्राप्तिफलकत्वे 'मृत्युमतिक्रान्तो दीप्यते' इति वाक्यं किम् - किंफलपरमित्यर्थः ।

2. **आख्यायिकायाः**—देवासुराख्यायिकायाः ।

* 'कथं वेत्येतदुच्यते' इति मुद्रितपुस्तकपाठः ।

* **अनया श्रुत्येति** यो यः सौत्रं स्थानं वाञ्छति स सः अनया श्रुत्या शुद्ध्यादिगुणकं प्राणं निश्चित्य, तत्र तत्रोक्ततत्तद्गुणविशिष्टस्य प्राणस्योपासनात् तत्पदं लभते । तस्मादयं विचारः सर्वप्राणोपासनोपकारीत्यर्थः ।

3. **'ह' इति निपातार्थमिति** 'द्वया ह प्राजापत्याः देवाश्चासुराश्च' इति श्रुतौ 'ह' निपातस्यार्थमित्यर्थः ।

भविष्यद्वृत्तिमाश्रित्य यजमानः प्रजापतिः ।
इहाभिधीयतेऽन्यस्तु न कश्चित्सप्रयोजनः ॥ (14)

ज्ञानकर्मोपदेशो हि नरं प्रत्येव सर्वथा ।
सर्वः श्रौतो यतस्तस्मात् स एवेहाभिधीयते ॥ (15)

तत्कर्मज्ञानजत्वाच्च तत्प्राणाः शुद्ध्यशुद्धिजाः । *
प्राजापत्या इहोच्यन्ते वागाद्युक्तश्च लिङ्गतः ॥ (16)

उद्गीथोपास्तिसंबन्धात् द्वया हेत्यादिकस्य च ।
उपास्यार्थविशुद्ध्यर्था प्रवृत्ताख्यायिका ततः ॥ (17)

अभ्यारोहजपस्येह प्राण एवास्तु देवता ।
कस्माद्वागादयो नेति तत्परीक्षात ईर्यते ॥ (18)

प्रजापतिपदार्थमाह—**भविष्यदिति** । मुख्यार्थलाभार्थं हिरण्यगर्भ एव किं न स्यात्, अत्राह—**अन्यस्त्विति** । स्वयं फलरूपत्वादित्यर्थः । (14) फलभूतस्य ग्रहणं किं न स्यात्, अत्राह—**ज्ञानेति** । प्राजापत्यानां वागादीनां देवासुरत्व-कल्पनया प्रजापतेः ज्ञानादि कर्तव्यमुच्यते । तद्यज[1]मानग्रहणे घटते । **सर्वः सर्वथेति** । श्रौतः स्मार्तश्च गुणप्रधानत्वेन समप्रधानत्वेन च सर्वप्रकार इत्यर्थः । (15)

'तस्यैव प्रजापतेः' इत्यादिभाष्यं व्याचष्टे—**तत्कर्मेति** । [2]वागादी-नामेव ग्रहणे लिङ्गमाह—**वागादीति** । (16) त(द्वया)[र्ह्या]ख्यायिकाया न प्रयोजनं, कर्मार्जितत्वज्ञानस्य सुकरत्वात्, अत्राह—**उद्गीथेति** । उपास्यप्राण-शुद्धिराख्यायिकाफलमित्यर्थः । (17) [3]स्वनिष्ठै(व्या)[वा]ख्यायिका अस्तु । उद्गीथ-संबन्धः संश्लेषपाठादपि स्यात्, अत्राह—**अभ्यारोहेति** । 'असतो मा सद्गमय,

---

1. **यजमानग्रहणे घटते इति** मनुष्याधिकारत्वाच्छास्त्रस्येति भावः ।

* **शुद्ध्यशुद्धिजा इति** शुद्धिशब्दितशास्त्रीयज्ञानकर्मजाः देवाः । अशुद्धिशब्दित-स्वाभाविकज्ञानकर्मजाश्चासुरा इति भावः ।

2. **वागादीनामेवेति** एवेन प्रसिद्धेन्द्रविरोचनादिदेवासुरव्यवच्छेदः ।

3. **स्वनिष्ठैव**—स्वार्थतात्पर्यवत्येव ।

अन्वयव्यतिरेकाभ्यां प्राणप्राधान्यसिद्धये ।
प्रवृत्ताख्यायिका यत्नात् वागादीन्द्रियनिन्दया ॥ (19)

* शास्त्रस्वभावजज्ञानकर्मसंस्कारहेतुतः ।
देवासुरत्वं प्राणानां विरुद्धोपाधिकारणात् ॥ (20)

सहस्रादिर्यथा भेदः प्राणस्यैकस्य शब्द्यते ।
भूयोऽधिकारभेदेन वागादीनां तथा भिदा ॥ (21)

सहजं सर्वभूतानां वृत्तमासुरमिष्यते ।
यत्नाधेयं यतो दैवं ज्यायांसः स्युस्ततोऽसुराः ॥ (22)

इह वागादयः शब्दाः देवतार्थाभिधायकाः ।
मर्त्यत्वान्न तु गृह्यन्ते करणस्थानगोचराः ॥ (23)

मृत्योर्माऽमृतं गमय' (बृ. 3-3 -28) इति वक्ष्यमाणा[1]भ्यारोहजपस्य उद्गीथोपास्तेश्च प्राण एव देवता, न वागादयः कस्मात्, इति शङ्कायां, तस्या देवतायाः परीक्षा आख्यायिकया क्रियते इत्यर्थः । (18) एतद्वाक्यं न (प्रमा)[प्रा]णप्रशंसापरं, वागादीन्द्रियपरत्वात्, अत्राह—**अन्वयेति** । (19) प्राणानां कथं [2]देवासुरत्वम्, अत्राह—**शास्त्रेति** । (20) वागादीनामौपा(दि)[धि]कभेदे दृष्टान्तमाह—**सहस्रेति** । भूयोऽधिकारभेदेन—अनेकस्थानसंबन्धेन सूत्रात्मनः षडुत्तर[त्रिशताधिक]त्रिसहस्रसंख्याको भेदः 'कति देवा याज्ञवल्क्य' (बृ. 5·9-1) इत्यादावुच्यते यथा, तथा वागादीनां [3]शास्त्रीयेतरकर्मादिवासनावैशिष्ट्यात् द्वैविध्यमित्यर्थः । (21) असुरज्यायस्त्वे हेतुमाह—**सहजमिति** । (22) वागादिशब्देन इन्द्रियाण्युक्तानि । इदानीं तदधिष्ठातृदेवता गृह्यन्ते इति दर्शयति—**इहेति** । (23)

---

1. **अभ्यारोहजपस्य**—अभ्यारोहनामकजपस्य ।
2. **देवासुरत्वमिति** देवत्वमसुरत्वं चेत्यर्थः ।

* **शास्त्रेति** शास्त्रीयज्ञानकर्मसंस्कृतत्वं स्वाभाविकज्ञानकर्मसंस्कृतत्वं चेति विरुद्धोपाधिसंबन्धात् कारणात् यजमानस्य वागादिप्राणानां देवत्वमसुरत्वं चेत्यर्थः ।

3. **शास्त्रीयेतरकर्मादीति** शास्त्रीयतदितरस्वाभाविककर्मादीत्यर्थः ।

देवतैकात्म्यमेवेह दैवज्ञानक्रियाफलम् ।
अध्यात्मादिपरिच्छेदः आसुरत्वान्न गृह्यते ॥ (24)

हिंसाभिप्रवणं चेतः प्रायेण श्रेयसामपि ।
भूयांसोऽतोऽसुराः देवाः कनीयांसोऽतियत्नजाः ॥ (25)

धर्माधर्मैकसाध्यत्वात् ब्रह्मादेः स्थावरावधेः ।
अस्पर्धन्त ततोऽन्योन्यं दैतेया विबुधैः सह ॥ (26)

* आसुरेभ्योऽधिकारेभ्यो व्युत्थाप्येह प्रजापतिम् ।
दैवीभूमीर्नयामैनमिति देवचिकीर्षितम् ॥ (27)

दैवेभ्य एनमाच्छिद्य कामक्रोधादिसाधनाः ।
आनयामासुरीर्भूमीरिति दैतेयनिश्चितिः ॥ (28)

यत्नायत्नसमुत्थाभ्यां वृत्तिभ्यां देवदानवाः ।
* दैव्यासुरीभ्यामन्योन्यमस्पर्धन्त विरोधतः (29)

---

[1]हेत्वन्तरमाह — देवतेति । वागाद्युपासनफलत्वेना[2]ग्न्यादिप्राप्तेरुच्यमानत्वादित्यर्थः। (24) प्रसिद्धवागादीन्यु[3]पेत्य, 'स्वाभाविकी हि' इति भाष्यं व्याचष्टे—हिंसेति। (25) 'लोकेषु निमित्तभूतेषु' इत्येतद्भाष्यं व्याचष्टे—धर्मेति। (26) देवानामभिप्रायमाह—आसुरेभ्य इति। (27) देवैः स्पर्धां कुर्वतामसुराणां कोऽभिप्रायः, अत्राह—दैवेभ्य इति। (28) 'देवानां च' इत्यादिभाष्यतात्पर्यमाह—यत्नेति । (29) 'एवं कनीयस्त्वा(दि)[द]भिभूय-

---

1. हेत्वन्तरमिति वागादिशब्देन देवताग्रहणे इत्यादिः ।
2. अग्न्यादिप्राप्तेरिति 'सोऽग्निरभवत्' इत्यादिनेत्यादिः ।
3. उपेत्य—वागादिशब्दैरुपेत्य ।
अत्र "द्वया ह प्राजापत्या देवाश्चासुराश्च । ततः कानीयसा एव देवाः ज्यायसा असुराः । त एषु लोकेष्वस्पर्धन्त । ते ह देवा ऊचुः । हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति ।" इति श्रुतिरनुसन्धेया ।

* आसुरेभ्य इति । व्यवहारमार्गे स्थितं यजमानं स्वाभाविकज्ञानकर्मभ्यो बिमुखीकृत्य शास्त्रीयज्ञानकर्मणी प्रापयाम इति देवानां विवक्षितमित्यर्थः । एतद्वैपरीत्येनासुराणां चिकीर्षितं बोध्यम् ।

* देवासुरस्पर्धा—देवानामसुराणां च वृत्त्युद्भवाभिभवौ ।

भूयो बलेन ते देवा आसुरेण निराश्रयाः ।
अर्द्यमाना न शरणं लेभिरेऽल्पत्वकारणात् ॥ (30)

अनीक्षमाणास्ते शर्म संभूयोचुः परस्परम् ।
क्रियतामविचारेण हन्तेत्यनुमतौ पदम् ॥ (31)

अस्मज्जिगीषूनसुरान् जित्वोद्गात्रात्मसंश्रयात् ।
अतिलङ्घ्यासुरं भावं देवतात्मानमाप्नुमः ॥ (32)

* उद्गीथदेवताप्राप्तिर्ज्ञानकर्मसमुच्चयात् ।
अभ्यारोहजपः कर्म, ज्ञानं त्विह परीक्ष्यते ॥ (33)

विधिशेषार्थवादत्वान्नेदं ज्ञाननिरूपणम् ।
इति चेन्नैतदेवं स्यात् एवं वेदेति तद्विधेः ॥ (34)

माना:' इति भाष्यं व्याचष्टे—भूय इति । (30) 'ते ह देवा ऊचुः' इत्येतद्यो-जयति—अनीक्षमाणा इति । क्रियतामविचारेण इत्येतत् हन्तशब्देनोच्यते, इत्याह—हन्तेत्यनुमताविति । (31) 'असुरान्यज्ञे उद्गीथेन' इत्येतद्व्या-कुरुते—अस्मदिति । उद्गातुरात्मा-प्राणः, तदाश्रयणेन असुरभावपरित्यागेन प्राणभावं यास्यामः इत्यर्थः । (32) प्राणप्राप्तिः केन स्यात्, अत्राह—उद्गीथेति । (33)

द्वया हेत्यादिकं न ज्ञाननिरूपणपरमित्याक्षेपः तत्परिहारश्च

[1]आख्यायिकाया [2]विधिशेषत्वेनार्थवादत्वान्नेदं(नं)[3][दं] ज्ञानम् विवक्षितम्, इति शङ्कते—विधीति । जपविधिशेषत्वम्, उद्गीथविधिशेषत्वं वा । नाद्यः इत्याह—नैतदिति । (34) द्वितीयमनुवदति—उद्गीथेति । परिहरति—नेति ।

---

* उद्गीथदेवतावाप्तिरिति उद्गीथदेवता प्राणः, तदवाप्तिरित्यर्थः ।

1. आख्यायिकायाः—देवासुराख्यायिकायाः ।
2. विधिशेषत्वेन—अभ्यारोहजपविधिशेषत्वेन ।
3. इदं ज्ञानमिति प्राणोपासनमित्यर्थः ।

उद्गीथविधिशेषश्चेदुद्गीथप्रकृतौ श्रवात् ।
नातत्प्रकरणान्नचाग्र्यमितोऽन्यत्र च तद्विधेः ॥ (35)

विद्याप्रकरणत्वाच्च नेहोद्गीथो विधीयते ।
* जपस्य चाप्यनित्यत्वात् स्यादेवंवित्प्रयोज्यता ॥ (36)

उदारफलवद्यस्मादपि ज्ञानमिह श्रुतम् ।
तद्धैतदित्यतो ज्ञानं फलवत्त्वाद्विधित्सितम् ॥ (37)

शुद्ध्यशुद्ध्युक्तितश्चेह प्राणोपासा विवक्षिता ।
वागादिनिन्दया मुख्यप्राणोपासा न चेदिह ॥ (38)

औद्गात्रस्य कर्मणः प्रकृतौ—प्रस्तावे संनिधौ [1]पुराकल्पस्य—द्वयेत्यादेः श्रवणात् [2]तच्छेषत्वमेव, अत्राह—**इतोऽन्यत्रेति** । क्रियाप्रकरणे [3]तद्विधानात् विनियोजकाभावात् न तच्छेषत्वमित्यर्थः । (35) [4]अत्रवोद्गीथविधिरिति, नेत्याह—**विद्येति** । जपविधिशेषत्वाभावे हेत्वन्तरमाह—**जपस्येति** । जपमन्तरेणापि विद्याफलसिद्धेः जपस्यावश्यानुष्ठेयत्वाभावात्, विद्यामन्तरेण जपादेव फलासिद्धेश्च विद्याप्राधान्यात् एवंवित्प्रयोज्यत्वं जपस्येत्यर्थः । (36) 'तद्धैतल्लोकजिदेव' इत्युत्कृष्टफलश्रवणाच्चोपासना विधेया, इत्याह—**उदारेति** । (37) प्राणोपासनस्य

---

1. **पुराकल्पस्य**—स्तुतिर्निन्दा परकृतिः पुराकल्पः इति प्रभेदचतुष्टयान्तर्गतस्य अर्थवादभेदस्य ।
2. **तच्छेषत्वमेव**—उद्गीथविधिशेषत्वमेव ।
3. **तद्विधानात्**—उद्गीथविधानात् ।
4. **अत्रैवोद्गीथविधिरिति** उद्गीथब्राह्मणे एव 'उद्गाय' इति श्रवणात् उद्गीथविधिरित्यर्थः ।

   अत्र प्रघट्टके जपशब्देन अभ्यारोहजपः, विद्याशब्देन प्राणोपासनं च विवक्षितमिति बोध्यम् ।

* "प्राणविज्ञानवता अनुसन्धेयो जपः न तद्विज्ञानात् प्रागस्ति । तन्नासौ पश्चाद्भावी प्रागेव सिद्धं विज्ञानं प्रयोजयति । न हि प्रयाजादि दर्शपूर्णमासप्रयोजकम्, तत्प्रयोज्यत्वात् । एवं प्राणवित्प्रयोज्यो जपः न ज्ञानप्रयोजकः । तस्य प्रयोजकत्वेन प्रागेव सिद्धेः । तथा च नास्य तद्विधिशेषतेत्यर्थः ।" इत्यपि, 'जपस्य चाप्यनित्यत्वात् स्यादेवंवित्प्रयोज्यता' इति वार्तिकमार्गं विवृण्वन्ति **शास्त्रप्रकाशिकाकाराः** ।

विधित्सिताथ तन्निन्दा स्तुतिश्चानस्य किंफला ।
अतोऽर्थवादाद्धि विधिलिङ्गादत्रानुमीयते ॥ (39)

प्राणस्वरूपापत्तिश्च यतोपासाफलं श्रुतम् ।
उपासनमतोऽनस्य विधित्सितमितीक्ष्यताम् ॥ (40)

उपासनमसोः काममस्तु सूक्तोपपत्तितः ।
शुद्ध्यादिगुणवत्ता तु न मानादुपपद्यते ॥ (41)*

गुणवत्ताप्यसोरस्तु यथास्योपासनं तथा ।
प्रामाणिक्युभयत्रापि प्राप्तिर्यस्मादिहेक्ष्यते ॥ (42)

ननु स्तुत्यर्थतैवास्य शुद्ध्यादेरवगम्यते ।
उपासाविधिशेषत्वादर्थवादोऽत ईक्ष्यताम् ॥ (43)

विधेयत्वे लिङ्गान्तरमाह—**शुद्धीति** । [1]एतत् व्यतिरेकमुखेनोपपादयति—**वागादीति** । अनस्य—प्राणस्येत्यर्थः । यत् स्तूयते तद्विधीयते इति न्यायादपि विधिः कल्प्यते, इत्याह—**अत इति** । (38–39) प्राणस्योपास्यत्वे 'मृत्युमतिक्रान्तो दीप्यते' इति फलवचनमुपपन्नं स्यात्, इत्याह—**प्राणेति** । फलितमाह—**उपासनमिति** । (40)

उपास्यप्राणस्य न शुद्ध्यादिगुणवत्त्वेत्याक्षेपः तत्परिहारश्च

'भवतु नाम प्राणस्योपासनम्' इत्यादि **भाष्यं** व्याचष्टे—**उपासनमसोरिति** । (41) गुणवत्त्वमपि प्रतीयमानत्वादुपगन्तव्यमिति देवताधिकरणन्यायेन परिहरति—**गुणवत्तेति** । (42) 'स्यात् श्रुतत्वात्' इति **भाष्यं** व्याख्याय, 'न [2]स्यात्' इत्येतत् व्याचष्टे—**नन्विति** । (43) मानान्तरप्राप्तिविरोधयोरभावे स्वतः प्रामाण्यवादिभिः अर्थवादस्य स्वार्थे प्रामाण्यमुपगन्तव्यम्, इति परिहरति–

---

1. **एतत्**—प्राणस्य शुद्धयुक्तेः वागादीनामशुद्ध्यक्तेश्च प्राणोपासनं विवक्षितमित्येतत् ।

* **न मानादुपपद्यते इति** उक्तश्रुतेः उपास्तिविधिपरत्वेन शुद्ध्यादिगुणकदेवतायां तात्पर्यविरहादिति भावः ।

2. **न स्यादित्येतदिति** 'न स्यात्, उपास्यत्वे स्तुत्यर्थत्वोपपत्तेः' इति भाष्यमिमित्यर्थः ।

प्रामाणिकोऽभिसंबन्धो यस्मात्प्राणस्य गम्यते ।
किं बलं समुपाश्रित्य शुद्ध्यादेरर्थवादता ॥ (44)

न हि मानं विहायेह साध्यसाधननिश्चितौ ।
चक्षुरन्यत्प्रपश्यामो यद्बलात् स्यादयं मृषा ॥ (45)

आसन्यत्वादयोऽनस्य न च योषाग्निवद्यतः ।
तेषां प्रत्यक्षतः सिद्धेरतः शुद्ध्यादिमानसुः ॥ (46)

अक्षाद्यविषया ये तु गुणा आगमतो मताः ।
मानाविरोधात् केनैषां शुद्ध्यादीनां मृषार्थता ॥ (47)

---

[1]**प्रामाणिक इति** । (44) शुद्ध्यादिगुणस्य प्राणसंबन्धे मानान्तराभावाद[2]स्यानुपलम्भात् मिथ्यात्वम्, अत्राह—**न हीति** । साध्यसाधननिश्चितौ—यागादेः स्वर्गादिसाधनत्वनिश्चये । मानं विहाय—[3]श्रुतं विना । चक्षुरन्यत्—[4]प्रमाणान्तरम् । न पश्यामः । येन श्रुतिगम्यसाध्य[5]साधनसंबन्धस्य मानान्तरगम्यत्वेन अयं श्रौतः शुद्ध्यादिगुणः मानान्तरानुपलब्धः मृषा स्यादित्यर्थः । (45) प्रत्यक्षसिद्धत्वाच्चा-[6]सन्यत्वादेः न मृषात्वम्, इत्याह—**आसन्यत्वेति** । (46) विमताः शुद्ध्यादयः न मिथ्या, प्राणगुणत्वात् आसन्यत्वादिवदिति प्रयो(ग)[गे]प्रत्यक्षाद्यविरुद्धत्वमुपाधिः इत्याशङ्क्य,[7]साधनव्याप्तिमाह—**अक्षादीति** । (47)

---

1. **प्रामाणिक इति** तथाचायं भूतार्थवाद इति भावः ।
2. **अस्य**—शुद्ध्यादिगुणस्य ।
3. **श्रुतं विना**—श्रुतिं विना ।
4. **चक्षुरन्यत्** इत्यत्र चक्षुःशब्दस्य यथाश्रुतार्थो न घटते, श्रुतेः चक्षुष्ट्वाभावेन श्रुतिं विना अन्यत् चक्षुरित्यस्यासंगतत्वात् । अतः चक्षुःशब्दं प्रमाणपरतया व्याचष्टे—**प्रमाणान्तरमिति** ।
5. **साध्यसाधनसंबन्धस्य**—साध्यसाधनभावरूपसंबन्धस्य ।
6. **आसन्यत्वादेरिति** आस्ये भवः आसन्यः—मुखान्तर्बिलस्थः । तस्य भावः आसन्यत्वम् । तच्च प्रत्यक्षसिद्धम् । योषाया अग्नित्वं यथा मिथ्या, तथा न मिथ्येति भावः ।
7. **साधनव्याप्तिमिति** आगमैकसमधिगम्ये प्राणगुणत्वसाधनवति शुद्ध्यादौ मानान्तराप्रवृत्तेः तद्विरोधविरहेण प्रत्यक्षाद्यविरुद्धत्वस्य सत्त्वात् साधनव्यापकत्वमेवेति भावः ।

श्रोत्रादिवत्प्रमाणानामसाधारणमेयता ।
* तन्मेयग्रथने मानं न किंचिदनुभूतितः ॥ (48)

परमार्थातिरेकाद्वाऽभेदाद्वा परमार्थतः ।
वस्तुनः स्यान्मृषात्मत्वं नैवमप्युपपद्यते ॥ (49)

लभते व्यतिरेकं चेत् परमार्थात्ततोऽपरम् ।
स्वमहिम्नैव तत्सिद्धेः किमिव स्यान्मृषार्थता ॥ (50)

प्राणगुणत्वा[दासन्यत्वा]दिवत् शुद्ध्यादीनां मानान्तरविषयत्वम्, अत्राह—**श्रोत्रेति** । इन्द्रियाणां विषयव्यवस्था यथा, तथा सर्वप्रमाणानामसाधारणविषयत्वात् न शुद्ध्यादिषु मानान्तरप्रवेश इत्यर्थः । मानमेयसंबन्धग्राहिप्रमाणान्तरे मेयस्यापि स्फुरणात् नासाधारणमेयत्वं मानानाम्, इत्यत्राह—**तन्मेयेति** । ग्रथनं-संबन्धः । [1]मानमेयसंबन्धः साक्षिवेद्य इत्यर्थः । (48)

मृषात्वस्य दुर्वचत्वात् प्राणगतशुद्ध्यादेरमृषात्वमिति निरूपणम्

मृषात्वस्य दुर्वचत्वाच्च शुद्ध्यादेरमृषात्वमिति प्रतिपादनाय विकल्पयति—**परमार्थेति** । परमार्थाद्भिन्नमभिन्नं वेति विकल्पार्थः । [2]कस्मिन् सति किं स्यात्, अत्राह—**नैवमपीति** । पक्षद्वयेऽपीत्यर्थः (49) [3]प्रथमकल्पानुपपत्तिं प्रथयितु-[4]मनुवदति—**लभत इति** । दूषयति—**स्वमहिम्नेति** । परमार्थात् व्यतिरिक्तस्य

---

1. **मानमेयसंबन्धः**—विषयविषयिभावः ।

* **तन्मेयग्रथने**—तस्य मानस्य मेयेन संबन्धे । 'तन्मेयप्रथने' इति शास्त्रप्रकाशिकासंमतः पाठः ।
"मानमेययोः संबन्धः तेनैव मानेन गम्यते, अन्येन वा । नाद्यः, अंशतः स्वग्रहापत्तेः । द्वितीये, संबन्धग्राहिणा संबन्धिनोऽपि ग्रहान्नासाधारणमेयता मानानाम्, अत आह—**तन्मेयेति** । मानमेययोः संबन्धः तच्छब्दार्थः । स एव मेयः । तस्य प्रथनं स्फूर्तिः । तस्य साक्ष्यनुभवादन्यन्न मानमस्तीति यावत् ।" इति **शास्त्रप्रकाशिका** ।

2. **कस्मिन् सति किं स्यादिति** परमार्थात् भेदाभेदपक्षयोर्मध्ये कस्मिन् पक्षे स्वीकृते सति किं दूषणं स्यादित्यर्थः ।

3. **प्रथमकल्पानुपपत्तिं**— परमार्थात् भेदकल्पस्यायुक्तताम् ।

4. **अनुवदतीति** प्रथमकल्पमित्यादिः ।

परमार्थात्मकत्वे तु न किंचिद्वितथं क्वचित् ।
असत्यस्याप्यसत्यत्वं परमार्थसदात्मना ॥ (51)

सत्यासत्यविभागोऽयमविभागात्मवस्तुनि ।
प्रत्यगज्ञानहेतूत्थः तद्बोधादेव तद्धतिः ॥ (52)

स्वाभासफलकारूढः तदज्ञानजभूमिषु ।
तत्स्थोऽपि तदसंबद्ध ईश्वराद्यात्मतां गतः ॥ (53)

तदज्ञानं तदुत्थं च जगत्कृत्स्नं तदात्मकम् ।
यतोऽतस्तदनूद्याह ह्यात्मैवेति श्रुतिः स्फुटम् ॥ (54)

ऐकात्म्यमेव मानानां सर्वेषां मेयमिष्यते ।
*यथा, तथा प्रवक्ष्याम उदर्केऽप्युपपत्तिभिः ॥ (55)

---

[1]तेन संसर्गायोगात् स्वत एव सिद्धेर्व्यक्तव्यत्वाद[2]मिथ्यात्वमित्यर्थः । (50) द्वितीय-दूषणं विशदयति—**परमार्थेति** । भेदपक्षमङ्गीकृत्य दूषणमुक्तम् । इदानीं स एव न संभवति, इत्याह—**असत्यस्येति** । परमार्थात् व्यतिरिक्तस्य [3]स्वरूपसिद्धेः असत्यस्यापि स्वरूपसत्त्वं सदात्मना वाच्यमित्यर्थः । (51) सत्यासत्यविभागस्त्व-[4]यापीष्यते, कथं [5]सिद्ध्येत्, अत्राह—**सत्येति** । अज्ञानकल्पितत्वफलमाह—**तद्बोधादिति** । (52) ईश्वरादेः(स्तु)[श्व]त्यर्थस्य परमार्थत्वात् [6]ईशितव्य[प्र]पञ्चस्यापि परमार्थत्वम्, अत्राह—**स्वाभासेति** । ईश्वरत्वं कारणत्वं साक्षित्वं चाविद्याकृतमि-त्यर्थः । (53) [7]सर्वस्य कल्पितत्वे मानमाह—**तदज्ञानमिति** । (54) द्वैतस्य मिथ्यात्वे, प्रत्यक्षादेर[8]नालम्बनस्यामान[त्व]म्, अत्राह—**ऐकात्म्येति** । (55)

---

1. **तेन**—परमार्थेन ।
2. **अमिथ्यात्वमिति** स्वतःसिद्धस्य आत्मवदमिथ्यात्वं स्यादित्यर्थः ।
3. **स्वरूपसिद्धेरिति** निःस्वरूपत्वे तुच्छत्वापत्तेरिति भावः ।
4. **त्वयापि**—सिद्धान्तिनापि ।
5. **कथं सिद्ध्येदिति** अस्मत्पक्षोक्तदोषस्य जागरूकत्वादिति भावः ।
6. **ईशितव्यप्रपञ्चस्यापि परमार्थत्वमिति** ईशितव्यापेक्षत्वादीश्वरत्वस्येति भावः ।
7. **सर्वस्य कल्पितत्वे**—सेश्वरस्य जगतः कल्पितत्वे ।
8. **अनालम्बनस्य**—वस्त्वविषयकस्य ।

* **उदर्के**—अव्याकृतप्रकरणे इति यावत् ।

मिथ्येति प्रत्ययोत्पत्तिस्तथा कारणदोषतः ।
*बाध्यज्ञानस्य हेतुः स्यात् नातोऽन्यद्बाध्यकारणम् ॥ (56)

न चेहोभयमप्यस्ति कुतो मिथ्येति भण्यते ।
मितेर्मेये समाप्तत्वात् मिथ्यात्वं न मितेर्भवेत् ॥ (57)

तस्मादविपरीतार्थज्ञानाच्छ्रेयो ह्यवाप्यते ।
विपरीतार्थतायास्तु न हेतुर्जगतीक्ष्यते ॥ (58)

वस्तुनिष्ठैव मा यस्मान्न तदज्ञानजाश्रया ।
तस्मात्तन्मोहविध्वस्तौ ध्वस्तिः स्यान्मोहजस्य च ॥ (59)

न चैवं सति मानानां व्यर्थता स्यात्कथंचन ।
यथाभूतार्थबोधित्वमेवमेव मितेर्भवेत् ॥ (60)

अद्वैतश्रुतेरमानत्वात् ऐकात्म्यमेव न सिद्ध्यति इत्याशङ्क्य, [1]तदु[प]पादनाय अप्रामाण्यज्ञप्त्युत्पत्त्योः कारणमाह—**मिथ्येति** । **हेतुः स्यात्** प्रमाणसामग्रीति शेषः । (56) [2]प्रकृते [3]तदुभयमपि नास्ति, इत्याह—**न चेति** । श्रौतज्ञानस्य स्वतः प्रामाण्याच्च न मिथ्यात्वम्, इत्याह—**मितेरिति** । (57) अद्वैतज्ञानस्य प्रमाणत्वात् ततः कैवल्यमित्यस्मिन्नर्थे 'अविपरीतार्थप्रतिपत्तेः' इत्यादि भाष्यमवतारयति—**तस्मादिति** । विपरीतार्थभावे हेतुरुक्तः, इ(त्या)[त्यत्रा]ह—**विपरीतेति** । (58) संसृष्टपरोक्षधीहेतोः शब्दादसंसृष्टापरोक्षार्थधीर्विपरीतार्था, अत्राह—**वस्तुनिष्ठेति** । अपरोक्षाद्वितीयवस्तुगोचरैव प्रमा तदज्ञानजन्यसंसृष्टपरोक्षगोचरा न भवतीत्यर्थः । तत्त्वज्ञानादज्ञानकार्यसंसृष्टाद्यर्थस्य निवृत्तिश्रुतेश्च न विपरीतार्थत्वशङ्का, इत्याह—**तस्मादिति** । (59) किंच, जडस्य स्वतोऽसिद्धेः तद्गोचरमानस्य [4]तत्साधनत्वं, तदबोधनिवर्तकत्वं चेति [5]द्विकरता स्यात् । स्वयंप्रभे तु

---

1. **तदुपपादनाय**—ऐकात्म्योपपादनाय ।

* **नातोऽन्यद्बाध्यकारणमिति** मिथ्येति प्रत्ययः कारणदोषश्चेत्युभयस्मादन्यत् न बाध्यज्ञानस्य ज्ञापकं कारकं वेत्यर्थः ।

2. **प्रकृते**—श्रुतिजन्ये ऐकात्म्यज्ञाने ।

3. **तदुभयमपि**—अप्रमाणयज्ञप्तिकारणं, तदुत्पत्तिकारणं चेत्युभयमपि ।

4. **तत्साधनत्वं**—जडसाधकत्वम् ।

5. **द्विकरता**—कार्यद्वयकारिता ।

ईश्वरादिविकल्पानां प्रत्यग्वस्त्वविकल्पितम् ।
विषयो न मृषाबुद्धिः परमार्थं विना यतः ॥ (61)

यावत्किंचिन्मितेः प्राप्तं न तन्मिथ्या मितत्वतः ।
मिथ्येति ग्राहयच्छास्त्रमनर्थार्थं यतो भवेत् ॥ (62)

नाम्नि ब्रह्मेति दृष्टं चेन्न भेदप्रतिपत्तितः ।
प्रतिमावद्धि नामादौ ज्ञाते ब्रह्मेति धीरियम् ॥ (63)

यथा निर्ज्ञातभेदे हि विष्णुधीरुपलात्मनि ।
* विधीयते, तथा नाम्नि ब्रह्मदृष्टिर्विधीयते ॥ (64)

अज्ञातरज्जुतत्त्वो हि रज्जुं सर्पधियेक्षते ।
नामादौ तु यतो नैवं तस्मादसदिदं वचः ॥ (65)

---

[1]निवर्तकत्वमेवेति न द्विकरत्वम् । अतोऽपरोक्षाखण्डविषया प्रमा, इत्याह— **न चेति** । ज्ञानयाथार्थ्यं च [2]आत्मविषयत्वेनैव स्यात्, अनात्मनः कल्पितत्वात्, इत्याह—**यथाभूतेति** । (60) ईश्वरादेः कल्पितत्वस्वीकारात् कथं यथाभूतार्थ (लेहि)[बोधि]त्वं मानानाम्, अत्राह—**ईश्वरेति** । कारणादिप्रपञ्चस्य कल्पितत्वे शून्यशेषः स्यात्, अधिष्ठानाभावात्, अत्राह—**न मृषेति** । (61) 'अविपरीतार्थप्रतिपत्तेः' इत्यादिभाष्यस्य परेष्टमिथ्यात्वानिरूपणार्थ[3]मर्थं प्रतिपाद्य, तस्यैव **भाष्यस्य** प्राणसंबन्धि (बु)[गु]द्ध्यादिगुणसत्यत्वमर्थान्तरमाह—**यावदिति** । (62) शास्त्राद्यथार्थप्रतिपत्तेरेव श्रेयोऽवाप्तिः, इत्यत्र व्यभिचारं चोदयति— **ना(स्ती)[म्नी]ति** । भेदप्रतिपत्तिपूर्वकत्वान्नाम्नि ब्रह्मदृष्टेर्न मिथ्यात्वं [4]तस्याः, इति परिहरति—**नेति** । उक्तेऽर्थे 'न प्रतिमावत्' इत्यादिभाष्यं योजयति— **प्रतिमावदिति** । (63) दृष्टान्तं स्पष्टयति—**यथेति** । (64) भिन्नयोरगृहीतभेदयो-

---

1. **निवर्तकत्वमेव**—तद्बोधनिवृत्तिजनकत्वमेव । मानस्येति शेषः ।
2. **आत्मविषयत्वेनैवेति** अबाधितार्थबोधकत्वस्यैव प्रामाण्यरूपत्वादिति भावः ।
3. **अर्थं प्रतिपाद्य**—निगूढमर्थं प्रतिपाद्य ।
4. **तस्याः** — नाम्नि ब्रह्मदृष्टेः ।

* **ब्रह्मदृष्टिर्विधीयते इति** विहितत्वात् नाम्नि ब्रह्मदृष्टिः **क्रियारूपेति बोध्यम्** ।

ब्रह्म नैवेह वस्त्वस्ति दृष्टिरेवेति चेन्मतम् ।
नगादिषु सतामेव सत्सु दृष्टिसमन्वयात् ॥ (66)

गौणस्य मुख्यापेक्षत्वात् मुख्यं ब्रह्म विना न सत् ।
गौणं ब्रह्म, यथा गौणो वह्निर्मुख्याग्निपूर्वकः ॥ (67)

न चासद्विषया काचित् बुद्धिर्जगति वीक्ष्यते ।
*** सर्वार्थव्यभिचारेऽपि संविदव्यभिचारिणी ॥ (68)**

र[1]भेदधीर्मिथ्या । [2]तदभावाच[न]नाम्नि ब्रह्मधीर्मिथ्या, इत्याह—**अज्ञातेति** । (65)

नास्ति ब्रह्म, नामादौ ब्रह्मदृष्टिरेवारोप्यते इत्याक्षेपः तत्परिहारश्च

[3]असतो ब्रह्मणः भेदधर्मित्व[4]प्रतियोगित्वायोगात् अविवेकपूर्विकैव नामादौ ब्रह्मधीः, इति शङ्कते—**ब्रह्मेति** । इह—नामादौ । ब्रह्मदृष्टिरेवारोप्यतां, ब्रह्म तु नास्ति, मानाभावादित्यर्थः । ब्रह्मदृष्टिः सदर्था शास्त्रीयदृष्टित्वात् '[5]इयमेवर्गग्निः साम' (छा 1-6-1) इत्यादिदृष्टिवत्, इति परिहरति—**नेति** । (66) नामादेर्ब्रह्मभावः मुख्यब्रह्मपूर्वकः गौणत्वात्, य एवं स एवम्, यथा माणवकस्याग्निभावः मुख्याग्निपूर्वकः, इत्याह—**गौणस्येति** । (67) ब्रह्मबुद्धिः [6]सालम्ब(न)[ना] बुद्धित्वात् घटबुद्धिवत्, इत्याह—**न चेति** । रजतादिबुद्धौ व्यभिचारः, इत्यत

---

1. **अभेदधीर्मिथ्येति** स्थाणौ पुरुषाभेदबुद्धिः मिथ्याधीः । तयोः पूर्वं भेदज्ञानाभावादित्यर्थः ।
2. **तदभावाच**—नामब्रह्मणोः भेदाग्रहाभावाच ।
3. **असतो ब्रह्मण इति** ब्रह्मनास्तिकस्येयं शङ्का ।
4. **भेदधर्मित्वप्रतियोगित्वायोगादिति** तथा च विवेकग्रहो दुर्वच इति भावः ।
5. **इयमेवेत्यादि** 'इयमेवर्क्' इति ऋचि पृथिवीदृष्टिः, 'अग्निः साम' इति साम्नि अग्निदृष्टिश्च विधीयते । सत्यर्थे सत एवार्थस्य पृथिव्यादेः सा दृष्टिरित्यर्थः ।
6. **सालम्बना**—वस्तुविषयिणी ।

* "किंच सर्वस्य मात्राद्यर्थस्य व्यभिचारेऽपि चिद्वस्तु भावाभावसाधकमव्यभिचार्यस्ति । तत् कथं कूटस्थं संविदेकरसं ब्रह्म नास्ति, इत्याह—**सर्वार्थेति** ।" इति **शास्त्रप्रकाशिका** ।

न चापीहागमाभासोऽचोदनालक्षणत्वतः ।
क्रियार्थैरविशिष्टत्वाद्विद्यार्थोक्तेः परात्मनि ॥ (69)

ज्योतिष्टोमादिका यद्वद्विशिष्टानेकसाधना ।
एवंक्रमप्रयुक्ताङ्गा तथा चैवंफला क्रिया ॥ (70)

अन्यप्रमाणाविषया वाक्यादेवावगम्यते ।
* यथा, तथेहापूर्वादिवस्तूक्तेरेव गम्यते ॥ (71)

न च वाक्याद्विपर्यस्ता यदि वा संशयात्मिका ।
बुद्धिरुत्पद्यतेऽस्माकं यथाभूतार्थबोधिनः ॥ (72)

आह—**सर्वेति** । रजतादिभावाभावसाधकसंविदेव तत्रा(द्या) [ष्या] लम्बनमिति भावः । (68)

वेदान्तेभ्यो न ब्रह्मसिद्धिः विधिविकलतया तेषामप्रमाणत्वादित्याक्षेपः तत्परिहारश्च

तत्त्वमादिवाक्यानां विधिविकलानामप्रमाणत्वात् न तेभ्यो ब्रह्मसिद्धिः । अतो [1]नास्ति तत्, इत्यत्राह—**न चेति** । [2]कुतः, इत्यत आह—**क्रियार्थैरिति** । (69) 'जिज्ञास्यभेदाच्च' इति भाष्यकारैरेव [3]दर्शितो विशेषः, इत्याशङ्क्य, विवक्षितसाम्यमाह—**ज्योतिष्टोमेति** । विशिष्टा—दर्शपूर्णमासादिभ्योऽन्या । अनेकसाधना—(पिशुष्ट)[विशिष्ट]व्रीह्यादियुक्ता । एवंक्रमयुक्ताङ्गा—दीक्षणीयेष्टिः प्रायणीयेष्टिः प्रवर्ग्यादिः अग्नीषोमीयपशुः प्रातस्सवनमित्यादियुक्ता । एवंफला—स्वर्गादियुक्तेत्यर्थः । (70) ततः किम्, इत्याशङ्क्य, दृष्टान्तानुवादेन दार्ष्टान्तिकमाह—**अन्येति** । (71) अबोधकत्वलक्षणाप्रामाण्याभावेऽपि मिथ्या-

---

1. **नास्ति तत्**—ब्रह्म नास्ति ।
2. **कुतः इत्यत आह**—विधिविकलं तत्त्वमादिवाक्यं कुतो नागमाभासः इत्याशङ्कायामाह ।
3. **दर्शितो विशेष इति** क्रियार्थानां विद्यार्थानां च वेदवाक्यानां वैलक्षण्यं जिज्ञास्यभेदेन दर्शितमित्यर्थः ।

* **अपूर्वादिवस्तु**—अपूर्वमनपरमनन्तरमित्यादिविशेषितं वस्तु-ब्रह्म । **उक्तेरेव**—वेदान्तवाक्यादेव ।

कार्याभावादयुक्तं चेन्नोक्तिबुद्धेस्तथार्थतः । *
भावनार्थस्य नैवेह भाव्यार्थत्वात्तथार्थता ।
किन्तु मानार्पितत्वात्सा यथाभूतार्थतेष्यते ॥ (73)

नापि तद्विषणायाश्च कार्यत्वात्स्यात्तथार्थता ।
प्रमाणाभिजनादेव यथाभूतार्थता धियः ॥ (74)

अन्योन्याश्रयतादोषः कार्यप्रामाण्यवादिनः ॥ (75)

बोधकत्वसंशयितबोधकत्वयोरन्यतरदप्रामाण्यम्, अत्राह—**न चेति** । (72) निरस्तमेव चोद्यमधिकविवक्षया अनुवदति—**कार्येति** । नियोगनिष्ठत्वं न प्रामाण्यप्रयोजकं, चैत्यं वन्देत स्वर्गकामः इत्यादौ व्यभिचारात् । किन्तु अबाधितानवगतार्थबोधकत्वम्, इति परिहरति—**नेति** । उक्तिबुद्धेः—[1]वाक्यजज्ञानस्येत्यर्थः । [2]नियोगोपरागमन्तरेण शब्दप्रामाण्यं कथमिति चेत् । किमर्थस्य परमार्थत्वार्थं [3]तदपेक्षा, ज्ञानप्रमात्वार्थं वा । नाद्यः, इत्याह—**भावनार्थस्येति** । कर्तव्यार्थस्य, इह—कर्मकाण्डे । भाव्यार्थ(वत्) [त्वात्]—कर्तव्यार्थत्वात् । [4]न तथात्वम्, अनाप्तनियोगे व्यभिचारात् । किन्तु मानावगतत्वादित्यर्थः । (73) [5]द्वितीयं दूषयति—**नापीति** । कर्तव्यताज्ञानस्यापि मात्वं न [6]तदर्थत्वात्, अनाप्तनियोगज्ञाने व्यभिचारात् । किन्तु माकरणजत्वात् । अतोऽकि[7]ञ्चित्करं कार्यपरत्वमित्यर्थः (74) कार्यपरत्वे प्रामाण्यं, सति प्रामाण्ये कार्यपरत्वमितीतरेतराश्रयाच्च [8]तदप्रयोजकम्, इत्याह—**अन्योन्येति** । (75) वाक्यस्य प्रत्यक्षवद-

---

1. उक्तिबुद्धेः इत्यत्र उक्तेः—वाक्यात् बुद्धिः—ज्ञानं इति व्युत्पत्त्या लब्धमर्थमाह—**वाक्यजज्ञानस्येति** ।

* **तथार्थतः**—तथाभूतार्थवत्त्वात् ।

2. **नियोगोपरागं**—नियोगसंबन्धं - नियोगविषयत्वमिति यावत् ।
3. **तदपेक्षा**—नियोगापेक्षा ।
4. **न तथात्वं**—न परमार्थत्वम् ।
5. **द्वितीयं**—ज्ञानप्रमात्वार्थं नियोगापेक्षा इति द्वितीयकल्पम् ।
6. **तदर्थत्वात्**—कर्तव्यार्थविषयकत्वादिति यावत् ।
7. **अकिञ्चित्करं**—प्रमात्वाप्रयोजकम् ।
8. **तदप्रयोजकं**—कार्यपरत्वमप्रयोजकम् ।

प्रमाणाधिगतौ सत्यां पुंसो मेयानुरोधतः ।
अनुष्ठेयोऽननुष्ठेय इति पश्चान्मतिर्भवेत् ॥ (76)

एकरूपं यतो मानं विरुद्धानेकरूपिणाम् ।
* भानुवद्बोधकं दृष्टं नाताऽनुष्ठेयतो मितिः ॥ (77)

नन्ववाक्यप्रमाणत्वमननुष्ठानतो भवेत् । *
पदानां संहतिर्यस्मान्न दृष्टेह क्रियां विना ॥ (78)

पदार्थत्वे च तत्सिद्धिर्लिङ्गप्रत्यक्षसंश्रयात् ।
आगमैकप्रमाणत्वान्न पदार्थत्वमिष्यते ॥ (79)

---

[1]बुद्धबोधकत्वेन मात्वे [2]कार्याकार्यधीः कुतः, अत्राह—**प्रमाणेति** । मानसी सा इत्युक्तं **संबन्धग्रन्थे** इत्यर्थः । (76) वेदस्यैकत्वात् **एकस्मिन् सिद्धे** साध्ये वा मात्वं स्यात्, न विरुद्धानेकवस्तुनि, इत्यत्राह—**एकरूपमिति** । विरुद्धानेकाकारपटादिबोधकाध्यक्षवदबुद्धबोधकत्वेन वेदमात्वमित्यर्थः । (77)

ब्रह्मणो वाक्यार्थत्वं पदार्थत्वं वा न संभवतीत्याक्षेपः तन्निरासश्च

ब्रह्मणो वाक्यार्थत्वं पदार्थत्वं वा । नाद्यः, इत्याह—**नन्विति** । क्रियापदव्यतिरेकेण पदसं(ग)[ह]त्ययोगात् वाक्यासिद्धेरित्यर्थः । (78) द्वितीयं दूषयति—**पदार्थत्वे चेति** । वाक्य[3]प्रमाणत्वं न स्यात् । संग[4]त्यवगमोपायभूतप्रत्यक्षानुमानाभ्यामेव पदार्थसिद्धेरित्यर्थः । [5]प्रथमकल्पाङ्गीकारेण परिहरति—

---

1. **अबुद्धबोधकत्वेन**—अनधिगतार्थबोधकत्वेन ।
2. **कार्याकार्यधीः**—इदं कार्यं, इदमकार्यमिति धीः ।
* "ननु प्रेप्साजिहासे शास्त्राजायेते । ततोऽस्य कारकत्वात् न क्वचिदपि मानता इत्यत आह—**भानुवदिति** । किंच विमतं परेष्टकार्यादन्यत्रैव मानं मानत्वात् चक्षुरादिवत् इति विवक्षन्नाह—**नात इति** ।" इति **शास्त्रप्रकाशिका** ।
* **अननुष्ठानतः**—अकार्यत्वादिति यावत् ।
3. **वाक्यप्रमाणत्वमिति** वाक्यैकमेयत्वमित्यर्थः ।
4. **संगत्यवगमोपायभूतेति** प्रत्यक्षेणानुमानेन वा उपस्थिते एवार्थे पदशक्तिज्ञानात्मकसंगत्यवगमस्य जायमानत्वादिति भावः ।
5. **प्रथमकल्पाङ्गीकारेण**—वाक्यार्थत्वाङ्गीकारेण ।

अस्यस्मीत्यभ्युपेतत्वान्नैवमप्युपपद्यते ।
अस्ति मेरुर्यथा वर्णचतुष्टयविशेषणः ॥ (80)

अकार्येऽपि हि मेर्वादावस्ति मेरुरिति श्रुतेः ।
सम्यग्धीर्जायते यद्वत्तथा तत्त्वमसीत्यतः ॥ (81)

मेर्वादिज्ञानवच्चेत्स्यान्निष्फलत्वादमानता ।
नैवं, तत्फलसाक्षात्त्वाज्ज्ञानोद्भूतेरनन्तरम् ॥ (82)

भिद्यते हृदयग्रन्थिः ब्रह्माप्येतीति च श्रुतेः ।
* न चार्थवादतैतस्यां जुह्वामिव फलश्रुतेः ॥ (83)

निषिद्धानिष्टसंबन्धो वाक्यादेवावगम्यते ।
न चानुष्ठेयता तस्य मनागप्युपपद्यते ॥ (84)

आगमेति । (79) आख्यातपदाभावात् वाक्यासिद्धिरुक्ता, अत्राह—**[अस्य] स्मीति** । सोदाहरणमुक्तं स्पष्टयति—**अस्तीति** । शुक्लकृष्णपीतलोहितरूपचतुष्टय-द्रव्यविशिष्टं द्रव्यं मेरुरस्ति इति शब्दात् यथा मेर्वादौ धीरस्ति, तथा सर्वत्र संसृष्टमात्रे धीसंभवात् न कार्यमात्रपरत्वं सर्वशब्दानामित्यर्थः । दृष्टान्तानुवादेन दार्ष्टान्तिकमाह—**सम्यगिति** । (80-81) ब्रह्मधीरफला वस्तुमात्रधीत्वात् संमतवत्, इति शङ्कते—**मेर्वादीति** । [1]विद्वदनुभवविरुद्धकाला[2]त्ययापदिष्टम्, इति परिहरति—**नैवमिति** । (82) श्रुतिविरोधोऽपि, इत्याह—**भिद्यत इति** । 'ब्रह्मैव सन् ब्रह्माप्येति' इति फलश्रुति[3]रविवक्षिता, अत्राह—**न चेति** । (83)

निषेधवाक्यस्येव तत्त्वमादेः स्वार्थपरतया प्रामाण्यमिति निरूपणम्

'ब्राह्मणो न हन्तव्यः' इत्यादीनां मानत्वमङ्गीकुर्वता तत्त्वमादेः स्वार्थपरत्वं न निराकर्तुं शक्यम्, इत्याह—**निषिद्धेति** । ब्राह्मणवधादेरनिष्टफलसाधनत्वं

---

1. **विद्वदनुभवः**—ज्ञानफलशोकादिनिवृत्तेरनुभवः ।
2. **कालात्ययापदिष्टमिति** बाधितमित्यर्थः । ब्रह्मधियः अफलत्वसाधकमनुमानमिति शेषः ।
3. **अविवक्षिता**—अविवक्षितस्वार्था ।

* **न चार्थवादतेति** ब्रह्मधियः अन्यशेषत्वे प्रमाणाभावादिति भावः ।

निषेधसंस्कृतधियो निषिद्धविषये न च ।
पलाण्ड्वादावकरणादन्या धीर्जायते श्रुतेः ॥ (85)

यथा निषेधवाक्येभ्यो नान्याऽकरणतो मतिः ।
तत्त्वमस्यादिवाक्येभ्यस्तद्वदेवेति निश्चयः ॥ (86)

मृगतोये प्रवृत्तस्य तृडार्तस्योषरेक्षणात् ।
तमोध्वस्तौ निवृत्तिः स्यात्तथात्मज्ञानतोऽपि नः ॥ (87)

तस्मान्निषेधशास्त्रस्य यथाभूतार्थनिष्ठता ।
पुंव्यापारस्य गन्धोऽपि न तत्रास्तीति निश्चयः ॥ (88)

आत्मयाथात्म्यविज्ञाननिष्ठता तद्वदीक्ष्यताम् ।
तत्त्वमस्यादिवाक्यानां नानुष्ठानं मनागपि ॥ (89)

वेदैकगम्यमित्यर्थः । (84) अहननादि [1]कार्यमितिपरत्वमेव निषेधवाक्यानाम्, अत्राह—**निषेधेति** ।

पलाण्डुं गृञ्जनं चैव लशुनं ग्रामकुक्कुटम् ।
छत्राकं विड्वराहं च मत्या जग्ध्वा पतेन्नरः ॥ (मनु. 5-19)

इति **वचनात्** स्वभाव[2]प्राप्तिक्रियानिवृत्त्यौदासीन्यं प्रतीयते, नान्यदित्यर्थः । लशुनविशेषः—पलाण्डुः । (85) निषेधवाक्यात् [3]सिद्धार्थधीरिव तत्त्वमादेरपि, इत्याह—**यथेति** । (86) वाक्यात् सर्वव्यापारोपरमहेतुज्ञानोत्पत्तौ लौकिकदृष्टान्तमाह—**मृगेति** । (87) प्रकृतमुपसंहरति—**तस्मादिति** । (88) दार्ष्टान्तिकं निगमयति—**आत्मेति** । अज्ञानकृतकर्तृत्वाद्यशेषविशेषनिवर्तकत्वेन प्रामाण्यमित्यर्थः । (89)

---

1. **कार्यमितिपरत्वमेव**—कार्यं इत्येवंपरत्वमेव ।
2. **स्वभावप्राप्तीति** स्वभावेन प्राप्तिः यस्याः, तादृशक्रियायाः भक्षणादिकायाः निवृत्त्योपलक्षितमौदासीन्यमित्यर्थः ।
3. **सिद्धार्थधीरिव**—हननादिगतानिष्टसाधनत्वस्य धीरिव ।

कलञ्जभक्षणस्येव ननु न श्रौतकर्मणः ।
अज्ञानहेत्वनर्थार्थकारिता गम्यते मितेः ॥ (90)

नैवमज्ञानहेतुत्वानर्थार्थत्वेन तुल्यता ।
कलञ्जभक्षणेनातः तन्निवृत्तौ निवर्तते ॥ (91)

शास्त्रमात्रनिमित्तत्वान्नित्यानां नैवमिष्यते ।
मिथ्याज्ञानादिहेतुत्वं काम्यानामिव चेन्मतम् ॥ (92)

नाविद्यारागद्वेषादिदोषदुष्टस्य तद्विधेः ।
स्वर्गादिकामिनो यद्वदग्निहोत्रविधिस्तथा ॥ (93)

मोहकामादिदुष्टस्य नित्यं कर्म विधीयते ।
न स्वतः काम्यनित्यत्वविवेकोऽस्तीह कर्मणः ॥ (94)

कर्तृस्थेन हि स्वर्गादिकामदोषेण काम्यता ।
अतो नान्येन काम्यत्वं कर्मणः स्यात्कथं चन ॥ (95)

कलञ्जभक्षणादेरज्ञानकार्यत्वादनर्थफलत्वाच्च निषेधवाक्यानां तन्निवर्तकत्वेन प्रामाण्यं युक्तम् । श्रौतकर्मणामज्ञानमूलत्वानर्थफलत्वयोरभावान्न [1]तन्निवर्तकत्वेन वेदान्तप्रामाण्यम्, इति शङ्कते—**कलञ्जेति** । (90) अज्ञानहीनस्य अहं ब्राह्मणः, ममेदं कर्म [2]इत्यनुपपत्तेः अज्ञान[3]जत्वादि तुल्यम्, इति परिहरति—**नैवमिति** । अज्ञाननिवृत्तौ कर्मनिवृत्तिरिति फलितमाह—**अत इति** । (91) काम्यकर्मणामज्ञानहेतुत्वमनर्थकरत्वं च, न नित्यानां, [4]केवलशास्त्रमूलत्वात्, इति शङ्कते—**शास्त्रेति** । (92) नित्यानामपि केवलशास्त्रमूलत्वमसिद्धम्, इत्याह—**नेति** । दृष्टान्तेनैतत्प्रपञ्चयति—**स्वर्गादीति** । किं च, काम्यानां दुष्टत्वमिच्छता नित्यानामपि दुष्टत्वमेष्टव्यम्, उत्पत्तिविनियोगप्रयोगाधिकाररूपाभेदात्, इत्याह—**न स्वत इति** । (93–94) कथं तर्हि तद्विभागः, अत्राह—**कर्तृस्थेनेति** ।

---

1. **तन्निवर्तकत्वेन**—श्रौतकर्मनिवर्तकत्वेन ।
2. **इत्यनुपपत्तेः**—इति प्रत्ययस्य (अध्यासस्य) अनुपपत्तेः ।
3. **अज्ञानजत्वादि तुल्यमिति** कलञ्जभक्षणादिना श्रौतकर्मणामित्यादिः ।
4. **केवलशास्त्रमूलत्वादिति** केवलपदेन रागादेः मूलत्वव्यवच्छेदः ।

* आविरिञ्चाद्विरक्तस्य तद्विविक्तात्मकामिनः ।
मोक्षे पुंसोऽधिकारः स्यान्न कामापहृतात्मनः ॥ (96)

पराचः कामानित्येवं कामानित्यपरं तथा ।
योऽकाम इति तद्वच्च श्रुतिः कामनिषेधनी ॥ (97)

अविद्याया न चोच्छित्तौ ज्ञानादन्यदपेक्ष्यते ।
ज्ञानोत्पत्तौ न चैवान्यत् शमादिभ्यो ह्यपेक्ष्यते ॥ (98)

नित्यता चेति शेषः । स्वर्गकामः, पशुकामः, इति विशेषार्थिनः काम्यविधिः, इष्टानिष्टप्राप्तिपरिहारमात्रार्थिनः नित्यविधिरित्यर्थः । कामप्रयुक्तं काम्यम्, जीवनप्रयुक्तं नित्यमिति विभागः, अत्राह—**अतो नान्येनेति** । नित्यस्यापि फलरागप्रयुक्तत्वात्, काम्यस्यापि जीवत एव विधानादित्यर्थः । (95)

कर्मज्ञानाधिकारिभेदः

कामादिग्रस्तस्य कर्माधिकारे तस्यैव ज्ञानाधिकारोऽपीति नाधिकारिभेदः स्यात्, अत्राह—**आविरिञ्चादिति** । (96) विरक्तस्य विद्याधिकारे मानमाह—**पराच इति** । 'पराचः कामाननुय(ति) [न्ति]बालाः ते मृत्योर्य(ति)[न्ति] विततस्य(परागि)[पाशम्]' (का. 2-1-2) इत्येकं, 'कामान्यः कामयते मन्यमानः स काम(म)भिर्जायते तत्र तत्र' (मु. 3-2-2) इत्यपरमपि वाक्यं [1]निन्दाद्वारेण विरक्तस्य ज्ञानाधिकारं दर्शयति । 'अथाकामयमानो योऽकाम आत्मकाम आप्तकामः' (बृ. 6-4-6) इत्याद्या श्रुतिः [2]साक्षादेव दर्शयतीत्यर्थः । (97) विरक्तस्य विद्याधिकारात् न ज्ञानकर्मणोरेकाधिकारः इत्युक्तम् । तदयुक्तं, 'य एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छति' इत्यादिश्रुतेः कर्मणामपि मुक्तिहेतुत्वेनाधि[3]कारिभेदायोगात्, इत्याशङ्क्य, कर्मणां साक्षान्मुक्तिहेतुत्वं, ज्ञानहेतुत्वं वा, ज्ञानसाधनहेतुत्वं वेति विकल्प्य, आद्यं

---

* **आविरिञ्चात्**—हिरण्यगर्भप्राप्तिपर्यन्तमिति यावत् ।

1. **निन्दाद्वारेणेति** कामिनामित्यादिः ।
2. **साक्षादेवेति** विरक्तस्य ज्ञानाधिकारमिति शेषः ।
3. **अधिकारिभेदायोगादिति** ज्ञानकर्मणोरित्यादिः ।

शमाद्युत्पत्तये नान्यत् बुद्धिशुद्धेरपेक्ष्यते ।
बुद्धिशुद्धौ च नित्यादिकर्मभ्यो नान्यदिष्यते ॥ (99)

आत्माज्ञानैकहेतुत्वात् वाङ्मनःकायकर्मणाम् ।
आत्मज्ञानेन तद्बाधात् कर्मापेक्षा कुतो भवेत् ॥ (100)

* यदज्ञानात्प्रवृत्तिर्या तज्ज्ञानात्सा कुतो भवेत् ।
प्रत्यगज्ञानोद्भवे तस्मात् समाप्तिः सर्वकर्मणाम् ॥ (101)

न चोच्छिन्नात्ममोहस्य सदैवात्मधियः स्थितेः ।
प्रतीच्यवसरोऽस्तीह वाङ्मनःकायकर्मणाम् ॥ (102)

कर्मणोऽवसरश्चेत्स्यात् त्वद्भिक्षावसरो यथा ।
* नात्मवस्तुनिमित्तत्वात् सम्यग्बुद्धेः सदा स्थितेः ॥ (103)

* न वस्त्ववसरापेक्षं स्वतःसिद्धत्वकारणात् ।
क्रियैवावसरापेक्षा तस्याः कारकतन्त्रतः ॥ (104)

दूषयति—[**अविद्याया इति**] । द्वितीयं दूषयति—**ज्ञानेति** । तृतीयं परास्यति—**शमादीति** । का तर्हि श्रुतेर्गतिः कर्मविषयायाः, तत्राह—**बुद्धीति** । (98-99) [1]परम्परयापि कर्मणां मोक्षोपयोगश्चेत्, किमिति साक्षादेव नेष्यते, अत्राह—**आत्मेति** । (100) नष्टाज्ञानस्यापि कर्मदर्शनात् [2]तदपेक्षा स्यात्, अत्राह—**यदज्ञानादिति** । ज्ञानोत्पत्तेरूर्ध्वं बाधितानुवृत्त्या प्रवृत्त्याभासइत्यर्थः । (101) उत्पन्नात्मज्ञानस्यापि तन्नाशादूर्ध्वं कर्म स्यात्, अत्राह—**न चेति** । **स्थितेः** प्रवाहरूपेणेति शेषः । (102) भिक्षाटनादेरिव अग्निहोत्रादेरवसरः स्यात्, इति शङ्कते—**कर्मण इति** । विदुषः भिक्षाटनाद्यवसरोऽपि नास्ति, इत्याह—**नेति** । (103) ब्रह्मणो वस्तुत्वात् [3]घटवत् कालसंबन्धित्वात्

---

1. **परम्परयापि**—बुद्धिशुद्धिद्वारा ज्ञानोत्पादकमेणापि ।
2. **तदपेक्षा**—कर्मापेक्षा ।
* **तज्ज्ञानादिति** ऊर्ध्वमिति शेषः ।
* **नेति** भिक्षाटनादेः प्रवृत्त्याभासत्वमुक्तमनुसन्धेयम् ।
* **अवसरापेक्षं**—कालापेक्षम् ।
3. **घटवत् कालसंबन्धित्वादिति** कालसंबन्धित्वं सत्त्वमित्यभिमानः ।

सम्यङ्ज्ञानशिखिप्लुष्टं कुतोऽज्ञानं पुनर्भवेत् । *
शुद्धदोषोद्भवत्वाच्च न तु कर्मैवमिष्यते ।। (105)

क्षुधादिदोषहेत्वेव त्वस्मद्भुज्यादि नो मतम् ।
नियतानेकहेतुत्वान्नातो भुजिसमा क्रिया ।। (106)

दोषहेतावपि यथा कालादिनियमस्तथा ।
भवद्भिक्षाटनादौ स्यादिति चेन्नैतदेव तु ।। (107)

तद[1]भिन्नस्य विदुषः कालसंबन्धे[2]त[द्व]त् कर्मसंबन्धोऽपि स्यात्, अत्राह—**नवस्त्विति**। कस्य कालापेक्षा, अत्राह—**क्रियेति** । (104) विदुषो **नष्टाज्ञानस्य** न कर्मेत्युक्तम् । ननु नष्टस्याज्ञानस्य पुनरुद्भवे कर्म स्यादिति, तत्राह—**सम्यगिति** । विदुषो भिक्षाटनादि न संभवतीत्युक्तम् । इदानीं, [3]तत्संभवेऽपि न तत्साम्यमग्निहोत्रादेः, इत्याह—**शुद्धेति** । (105) [4]केवलक्षुधादिदोषोद्भवनिमित्तभिक्षाटनादिवत् जीवनाद्यभिमानोद्भवनिमित्तं कर्मापि स्यात्, अत्राह—**क्षुधादीति** । तदु[5]द्भवस्यानियतत्वात् कर्मणः सायंप्रातरादिनियतकालत्वादनुपपत्तिरित्यर्थः । (106) भिक्षाटनादेर्दोषहेतुत्वेऽपि, 'चातुर्वर्ण्यं चरेद्भैक्ष्यम्,' '**एककालं चरेद्भैक्ष्यम्**,' 'यती[6]नान्तु चतुर्गुणम्' इत्यादिनियमवत् अग्निहोत्रादिनियमः विदुषः स्यात्, इति शङ्कते—**दोषेति** । दोषहेतावपि त्वद्भिक्षाशौचादौ यथा कालवर्णसंख्यानियमः, तथा अग्निहोत्रादिनियमोऽपि स्यात् इति योज्यम् । **नियमशास्त्रं न**

---

1. **तदभिन्नस्य**—ब्रह्माभिन्नस्य ।
2. **तद्वत्**—कालसंबन्धवत् ।

* कुतोऽज्ञानं **पुनर्भवेदिति** अज्ञानभेदे मानाभावादिति भावः ।

3. **तत्संभवेऽपि**—विदुषः भिक्षाटनादिसंभवेऽपि ।
4. **केवलक्षुधादीति** अत्र वार्त्तिकगतशुद्धपदव्याख्यानं केवलपदम् । शास्त्रसहितत्वमत्र कैवल्यं बोध्यम् ।
5. **तदुद्भवस्य**—क्षुधादिदोषोद्भवस्य ।
6. यतीनां तु चतुर्गुणम् इति शौचसंख्यानियमः ।

नैवायं नियमोऽस्माकं परिसंख्या हि सा यतः ।
क्रियाप्रयोक्त्री नाप्येषा तस्माद्विषममुच्यते ॥ (108)

नातोऽपवादकृत्सा स्यादैकात्म्यज्ञानजन्मनः ।
सर्वकर्माधिकाराणां निषेधायात्मधीभवः ॥ (109)

निषेधविधिवत्तस्मात् प्रत्यग्याथात्म्यधीविधिः ।
प्रत्यङ्मोहैकहेतुत्वात् वाङ्मनःकायकर्मणाम् ॥ (110)

तस्माद्वस्त्वेकनिष्ठस्य प्रामाण्यं वचसो ध्रुवम् ।
प्रतिषेधविधेर्यद्वदुभयोरविशेषतः ॥ (111)

विद्वद्विषयम्; [1]तस्य वि(द्वन्य)[ध्य][2]तिक्रान्तत्वात् भिक्षाटनादेर्बाधितानुवृत्तित्वात्, इति परिहरति—**नैतदिति** । (107) विद्व[3]द्विषयत्वेऽपि **न** नियमविधिरयम्, किन्तु परिसंख्याविधिः, इति दर्शयति—**नैवायमिति** । परिसंख्याविधिरपि क्रियामाक्षिपेत्, अत्राह—**क्रियेति** । सा खलु अन्यनिवृत्तिं प्रयोजयति, न क्रियामिति, कुतोऽग्निहोत्रादिप्रसङ्ग इत्यर्थः । विधेर्भा[4]वार्थविषयत्वनियमादस्ति क्रियाक्षेपकत्वम्, इत्याशङ्क्य, न विद्याविरुद्धक्रियाक्षेपकत्वम्, इत्याह—**तस्मादिति** । भिक्षादेः [5]शुद्धदोषकृतत्वात् कर्मणोऽतथात्वाद्वैषम्यमित्यर्थः । (108)

तर्हि तत्त्वज्ञानानुत्पत्तिरेव यतेर(स्यास)[प्याश्र]मित्वेन देहाभिमान[व]त्त्वात्, अत्राह—**नात इति** । यतः परिसंख्यापि निवृत्तिफला न विरुद्धक्रियाप्रयोक्त्री, तस्मान्नात्मधियो(बो)[बा]धिकेत्यर्थः । निषेधवाक्यवत् वेदान्तानां प्रामाण्यं यत् पुरा प्रस्तुतं तदेवानुसृत्याह—**सर्वकर्मेति** । कुत एतदित्याह—**प्रत्यङ्मोहेति** । विचारसिद्धमर्थं निगमयति—**तस्मादिति** । (109-110-111)

---

1. **तस्य**—विदुषः ।
2. **विध्यतिक्रान्तत्वादिति** न च तस्य यथेष्टचेष्टाप्रसङ्गः । अधर्माविवेकयोः तद्धेत्वोरभावात् । अविद्यावस्थायामपि यथेष्टचेष्टाया अभावात्, तत्संस्कारस्याप्यभावेन बाधितानुवृत्तिरूपाया अपि यथेष्टचेष्टाया अयोगात् ।
3. **विद्वद्विषयत्वेऽपीति** निरुक्तशास्त्रस्येत्यादिः ।
4. **भावार्थविषयत्वनियमात्**—धात्वर्थक्रियाविषयत्वनियमात्
5. **शुद्धदोषकृतत्वात्**—शास्त्राद्यनपेक्षदोषजन्यत्वात् ।

स्वाभाविकैकदोषोत्थो व्यवहार इहासुरः ।
शास्त्रैकहेतुर्दैवः स्यात् तयोः स्पर्धा विरोधतः ॥ (112)

प्राकृतासङ्गविज्ञानकार्ये ह्यधिकृतिः स्वतः ।
सुरद्विषां, सुराणां तु शास्त्रोत्थज्ञानदीपितः ॥
कर्मज्ञानाधिकारः स्यात् संग्रामस्तद्विरोधतः ॥ (113)

उत्कर्षो मानुषादूर्ध्वं पुंसः केवलधर्मतः ।
अधोभावस्त्वधर्मात् स्यात् द्वाभ्यां मानुष्यसंभवः ॥ (114)

आग्रजस्थाणुपर्यन्तशरीरग्रहणान्यतः ।
लोकेष्विति श्रुतिर्वक्ति विरोधस्तन्निबन्धनः ॥ (115)

द्वितीयकण्डिकाव्याख्यानाय स्वतन्त्रवादव्यवहितस्य
पूर्वप्रकृतस्यानुवादः, देवासुरस्पर्धानिरूपणम्

[1]प्रासङ्गिकं परिसमाप्य 'ते ह वाचम्' इत्यादि व्याचिख्यासुः [2]स्वतन्त्रवादव्यवहितं प्रकृतमिति, [3]तत् सोपस्कारमनुवदति—**स्वाभाविकेति** । यजमानदेहस्थवागादीनामविद्याकार्यरागादिकृतो व्यवहारः आसुरः, [4]शास्त्रीयज्ञानपूर्वको दैवः । तयोरासुरदैवयोः विरोधतः तेषां स्पर्धेत्यर्थः । (112) [5]उभयेषामेकस्मिन् कार्ये अधिकारसंभवात् कुतो विरोधः, अत्राह—**प्राकृतेति** । [6]अज्ञानकार्यासङ्गपूर्वकज्ञानसहिते कर्मणि सुरद्विषां अधिकारः—प्रवृत्तिरित्यर्थः । (113) अधिकृतः सुराणां जये पराजये चासुराणां यतितव्यम्, इति दर्शयितुमाह—**उत्कर्ष इति** । (114) किमत्र प्रमाणम्, अत आह—**आग्रजेति** । यतो धर्मादि-

---

1. **प्रासङ्गिकं**—उपास्यप्राणदेवतायाः शुद्ध्यादिगुणवत्त्वप्रतिपादनप्रसङ्गागतं वेदान्तानां सिद्धे ब्रह्मणि प्रमाणत्वविचारम् ।
2. **स्वतन्त्रवादव्यवहितमिति** निरुक्तवादस्य श्रुत्यक्षरार्थाननुप्रवेश एव स्वातन्त्र्यमिति बोध्यम् ।
3. **तत्**—प्रकृतं प्रथमकण्डिकार्थम् ।
4. **शास्त्रीयज्ञानपूर्वक इति** व्यवहार इत्यनुषज्यते ।
5. **उभयेषामिति** सुराणामसुराणां चेत्यर्थः ।
6. **अज्ञानकार्यासङ्गेति** अत्र अज्ञानकार्येति प्राकृतासङ्गेति वार्त्तिकस्थप्राकृतपदविवरणं बोध्यम् ।

अधोलोकफलेष्वेव प्राकृतज्ञानकर्मसु ।
यत्नादासञ्जनीयोऽयं पितेत्यासुरनिश्चयः ॥ (116)

प्राकृतासङ्गतो मुक्त्वा पितायं दैवसाधनैः ।
उत्कृष्टव्यो यथाशक्ति विबुधानां चिकीर्षितम् (117)

नरप्रजापतितनावेवं देवासुरा मिथः ।
स्वस्वभावानुरोधेन तेऽस्पर्धन्त स्ववृत्तिभिः ॥ (118)

यदोद्भवति शास्त्रोत्था दैवी वृत्तिः तदाऽऽसुरी ।
व्येति यस्मात्ततोऽशेषं देवानां स जयः स्मृतः (119)

आसुरी तु यदा सेना कामक्रोधपुरःसरा ।
जायते ह्यजयस्तेषामसुराणां जयस्तु सः ॥ (120)

स्वाभाविकत्वादासुर्या भूयस्या सेनयाऽर्दिताः ।
न शर्म लेभिरे देवाः स्वात्मत्राणासमीक्षणात् ॥ (121)

फलानि पूर्वोक्तानि श्रुत्यभिप्रेतानि, अ(ता)तः [1]'एषु लोकेषु[अ]स्पर्धन्त' इति वाक्यं मोक्षादर्वाचीनफलं देहादिनिमित्तमिति दर्शयतीत्यर्थः । **विरोधस्तन्निबन्धन इति ।** फलनिमित्ता स्पर्धेत्यर्थः । (115) देवैः स्पर्धां कुर्वतां दैते[2]यानामभिप्राय-माह—**अधोलोकेति** । यस्मात्, इति आसुरनिश्चयः तस्मात्, [3]उत्कृष्टव्योऽय-मिति विबुधानां चिकीर्षितमिति संबन्धः । (116 - 117) स्पर्धामुपपादितां निगमयति—**नरेति ।** भविष्यत्प्रजापतिदेहे इत्यर्थः । (118) कदा देवानां जयः, कथं च स्यात्, अत्राह—**यदेति** । (119) आसुरजयपरिज्ञानमन्तरेण [4]नासौ शक्यप्रतिबन्धः इति, तमप्याह—**आसुरी त्विति** । (120) असुरसेना-प्राचुर्ये हेतुमाह—**स्वाभाविकत्वादिति** । (121) कदा चिदपि तर्हि सुराणां

---

1. **एषु लोकेषु** इत्यत्र लोकशब्देन देहग्रहणानि विवक्षितानि । सप्तमी निमित्तार्था इति बोध्यम् ।
2. **दैतेयानां**—असुराणाम् ।
3. **उत्कृष्टव्य इति** मनुष्यत्वादारभ्य प्रजापतित्वप्राप्तेरिति शेषः ।
4. **असौ**—आसुरः जयः ।

स्वभूमेश्च्याव्यमानानां सुराणामसुरैस्तदा ।
प्रादुरासीन्मतिः साध्वी दैतेयभयनाशिनी ॥ (122)

* उद्गीथं समुपाश्रित्य ज्योतिष्टोमक्रताविह ।
तिरस्कृत्याऽऽसुरं, दैवं भावं यामोऽधुना वयम् ॥ (123)

कर्तृत्वादीह यत्सिद्धं वागादिद्वारमीक्ष्यते ।
आत्मनस्तद्विद्योरर्थं निरविद्ये निषेधतः ॥ (124)

लौकिको वैदिकः सर्वो व्यवहारश्च वक्ष्यते ।
अन्नत्रयाधिकारे हि मन आदावनात्मनि ॥ (125)

* भूतेहानुविधायित्वात् क्षेत्रज्ञस्य तमस्विनः ।
कूटस्थात्मातिरेकेण रूपमन्यन्न लक्ष्यते ॥ (126)

जयो न स्यात्, अत्राह—**स्वभूमेरिति**। (122) तामेव(प्र)[म]तिं प्रकटयति—**उद्गीथमिति**। (123)

अभिवदनादिव्यवहारस्य वागादिगतत्वेन प्रदर्शने तात्पर्यम्

'ते ह वाचमूचुः' इत्यादेरर्थवादस्य वागादिगतत्वेन व्यवहारं दर्शयतः तात्पर्यमाह—**कर्तृत्वादीति** । इह—आत्मनि । कर्तृत्वादि दृष्टं तत् वागादीन्द्रियसंबन्धकृतं न स्वाभाविकमित्यर्थः । (124) न केवलं 'ध्यायतीव लेलायतीव' इत्यादिवाक्यादि[1]त्थंभावः, वाक्यशेषादपि, इत्याह—**लौकिक इति**। **मनआदौ** इत्यादिपदेन वाक्प्राणयोर्ग्रहणम् । (125) परमात्मनि कर्तृत्वाद्यभावेऽपि क्षेत्रज्ञस्य [2]तदस्त्येव [3]भासमानत्वात्, अतो [4]नानयोरभेदः, अत्राह—**भूतेहेति** । (126)

---

* **उद्गीथं**—उद्गीथदेवताम् ।

1. **इत्थंभावः** — आत्मनि दृष्टकर्तृत्वस्य स्वाभाविकत्वाभावः ।
2. **तदस्त्येव**—कर्तृत्वादि अस्त्येव ।
3. **भासमानत्वात्**—क्षेत्रज्ञगतत्वेन भासमानत्वात् ।
4. **नानयोरभेदः** — न क्षेत्रज्ञपरमात्मनोरभेदः ।

* **भूतेहानुविधायित्वादिति** भूतात्मिकाया बुद्धेः या ईहा—चेष्टा, तदनुसारित्वादित्यर्थः ।

एवं ताः संप्रधार्योचुरुद्गीथं साधनं परम् ।
तत्परीक्षां प्रयत्नेन चक्रुः संभूय देवताः ॥ (127)

वाचं संभावयामासुरियं ह्युद्गीथकर्मणि ।
अत्यर्थं व्यापृता दृष्टा वाचमूचुस्ततः सुराः ॥ (128)

त्वं न उद्गाय उद्गानं त्वत्प्रधानं भवत्विदम् ।
उद्गीथ इति चोद्गानं कर्मैवेहाभिधीयते ॥ (129)*

स्तोत्रेणास्याभिसंबन्धात् भक्तिमात्रं न तु क्वचित् ।
वागभिमानिनी चेह वाक्शब्देनाग्निरुच्यते ॥ (130)

विषयोऽध्येषणाया हि चेतनावान्यतो मतः ।
उपासिक्रियया योगो देवताया इहेष्यते ॥ (131)

द्वितीयकण्डिकार्थनिरूपणम्

औद्गात्रे कर्मणि वाचो नियोगः, तस्याः आसुरपाप्मवेधश्च

एवं [1]तात्पर्यमुक्त्वा [2]पदशोऽर्थमाह—**एवमिति** । (127) उद्गीथपरीक्षां प्रक्रम्य कथमौद्गात्रे कर्मणि वाक् नियुज्यते । उद्गीथो हि [3]सामभक्तिविशेषः । तत्रैव नियुज्यताम्, अत्राह—**वाचमिति** । (128) वाचः [4]तत्र व्यापारदर्शनेऽपि कथमौद्गात्रे तन्नियोगः, उद्गीथादन्यत्वादौद्गात्रस्य इत्युक्तचोद्यस्य कः परिहारः, अत्राह—**उद्गीथ इति चेति** । (129) [5]हेतुमाह—**स्तोत्रेणेति** । 'अथातः पवमानानाम्' इति पवमानाख्यस्तोत्रसंबन्धप्रतीतेः, 'स यत्र प्रस्तुयात् तदेतानि जपेत्' इति [6]लिङ्गाच्चेत्यर्थः । अचेतनाः चक्षुरादयः कथमचेतनां वाचं नियुञ्जते,

---

1. **तात्पर्य**—अर्थवादतात्पर्यम् ।
2. **पदश इति** "ते ह वाचमूचुः त्वं न उद्गायेति, तथेति तेभ्यो वागुदगायत् ।" इति श्रुतिरनुसन्धेया ।
3. **सामभक्तिविशेषः**—साम्नः भागविशेषः । पाञ्चभक्तिकं साप्तभक्तिकं वा साम इति वदन्ति ।
4. **तत्र**—औद्गात्रकर्मणि ।

* **इह** 'हन्तासुरान् यज्ञे उद्गीथेनात्ययाम' इति श्रुतिवाक्ये ।

5. **हेतुमाह**—उद्गीथपदेन औद्गात्रकर्माभिधाने हेतुमाह ।
6. **लिङ्गाच्चेति** उद्गीथभक्तिमतिक्रम्य उद्गानमात्रसंबन्धित्वेनाङ्गभूतजपकर्मविधानात् लिङ्गादित्यर्थः ।

अतोऽपि देवतैवेह वाक्शब्देनाभिधीयते ।
* तद्भूतेः पुरुषार्थत्वात् देवता हीश्वरा परा ॥ (132)

सैवातः प्रतिपत्तव्या सर्वासु ध्यानभूमिषु ।
नत्विह प्रतिपत्तव्याः करणस्थानगोचराः ॥ (133)

पारार्थ्याचेतनत्वाभ्यां मर्त्यत्वाच्चापि कारणात् ॥ (134)

एवं वागादयः शब्दाः देवतार्थाभिधायिनः ।
सर्वत्र प्रतिपत्तव्या यत्रोपासा विवक्षिता ॥ (135)

जपमन्त्राभिधेयं वागित्येवं विनिश्चिताः ।
उपासांचक्रिरे देवा एषैवोद्गीथदेवता ॥ (136)

देवाभ्युदय उद्गानं देवेभ्योऽर्थाय वागियम् ।
यथाशक्त्युदगायत्तं यो भोगो वाङ्निबन्धनः ॥ (137)

अत्राह—**वागिति** । **अध्येषणा**—नियोगः । 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' (ऐ. 1-2-4) इति श्रुतेः अग्निरेव वाग्देवता । देवताग्रहणे हेत्वन्तरमाह—**उपासिक्रिययेति** । (130-131) वागुपास्तेरग्निभावफलत्वाच्च वाक्शब्देन[1] तद्ग्रहणम् , इत्याह—**तद्भूतेरिति** । (132) इन्द्रियमात्राग्रहणे हेतुमाह—**न त्विहेति** । उक्तं निगमयति—**एवमिति** । (133-134-135) असुरजयस्य जपमन्त्राभिधेयप्राणदेवताधीनत्वात् तं परित्यज्य, कथं वाचमुपासितवन्तः, अत्राह—**जपेति** । (136)

'[2]तथा' इत्यादिवाक्यतात्पर्यमाह—**देवेति** । देवानामभ्युदये कार्ये, तदुपाय उद्गानम् । तस्मादुदगाय(मि)[दि]त्यर्थः (137) कोऽसौ [3]वाङ्निबन्धनो

---

1. **तद्ग्रहण**—देवताग्रहणम् ।

* **तद्भूतेः**— देवताभावस्य ।

2. **तथेत्यादीति** "तथेति तेभ्यो वागुदगायत् । यो वाचि भोगः तं देवेभ्य आगायत् । यत्कल्याणं वदति तदात्मने ।" इति श्रुतिः ।

3. **वाङ्निबन्धनो भोग इति** 'यो वाचि भोगः' इत्यत्र सप्तमी निमित्तार्थेति व्याख्यातप्रायम् ।

येन भोगेन वाग्देवांश्चक्षुरादीनहर्निशम् ।
साक्षाद्भवति तं भोगमुदगायदशेषतः ॥ (138)

पवमानेषु सोद्गात्री याजमानं यथाविधि ।
फलमुद्गाय शेषेषु ह्युदगायदथात्मने ॥ (139)

स्तोत्रेषु परिशिष्टेषु वागागायदथात्मने ।
यत्कल्याणं वदत्येषा ह्यात्मने तदचीक्लपत् ॥ (140)

यथाशास्त्रं यथायोगं वर्णदोषविवर्जितम् ।
वर्णोच्चारणसामर्थ्यं ममैवास्तु तदीदृशम् ॥ (141)

कल्याणवदनोत्थं यत् कृत्स्नं देवेभ्य एव तत् ।
फलं वदनमात्रं तु वाच एव न दैविकम् ॥ (142)

भोगः, तत्राह——**येनेति** । वाग्देवता अभिवदननिमित्तेन साधारणोपकारेण कार्यकरणसंघातमवतीत्यर्थः । (138) केषु स्तोत्रेषु या[1]जमानमुद्गानं, केष्वा[2]त्मार्थमिति विभागं दर्शयति——**पवमानेष्विति** । ज्योतिष्टोमे द्वादश स्तोत्राणि । तत्र पवमानाख्येषु त्रिषु याजमानमेवोद्गानं, कर्मफलस्यो[3]त्सर्गतो यजमानगामित्वात् परिशिष्टेषु नवसु आ[4]र्त्विज्यमित्यर्थः । आत्मार्थत्वेन किं गीतम्, अत्राह——**यदिति** । (139—140) कीदृशं कल्याणवदनं, तदाह——**यथेति** । व्याकरणादिलक्षणोक्तताल्वादिस्थानसंबन्धानुगुण्येनातिद्रुतत्वादिदोषहीनं यथा भवति तथा वर्णोच्चारणे सामर्थ्यमार्त्विज्यमागीतमित्यर्थः । (141) [5]पवमानेषु गीतं याजमानं किमतो[6] विलक्षणमिति, तत्प्रागुक्तं विविच्य दर्शयति——**कल्याणेति** । (142)

---

1. **याजमानमुद्गानं**——यजमानगामिफलकमुद्गानम् ।
2. **आत्मार्थं**——आत्मगामिफलकम् । आत्मशब्दोऽत्रोद्गातुः ऋत्विजो बोधकः । एवमुत्तरत्रापि ।
3. पुत्रेष्ट्यादिस्थले तेजस्वित्वादिफलस्य कर्तृभिन्नपुत्रगामित्वादाह——**उत्सर्गत इति** ।
4. **आर्त्विज्यमिति** आत्मने अन्नाद्यमागायेत् इति वचनात् ऋत्विग्गामि फलमिति बोध्यम् ।
5. **पवमानेषु गीतमिति** पवमानस्तोत्रगानसाधितं फलमिति यावत् ।
6. **अतः** — गानसाध्यात् ऋत्विग्गतात् कल्याणवदनात् फलादिति यावत् ।

* तमस्युत्सार्यमाणे तु वाचोद्गात्रा सुरद्विषाम् ।
स्वाधिकाराच्चयाव्यमानास्ते विदुर्देवहृद्गतम् ॥ (143)

अनेन वाचोद्गात्रा नो बलं ध्वान्तं तु देवताः ।
* ज्योतिषा स्वेन निर्जित्य यास्यन्त्यग्न्यादिरूपताम् ॥ (144)

महन्नो भयमायातमिति बुबुधिरेऽसुराः ।
कर्मण्यनुचिते तेषां प्रहीणमनसां तदा ।
वदनादावभिष्वङ्ग आत्मसंभावनादभूत् ॥ (145)

यत्कल्याणमिति छिद्राद्विदुः सुरचिकीर्षितम् ।
* अनेन वै न उद्गाता वाचात्येष्यन्ति स्वं वपुः ॥ (146)

इति ज्ञात्वा ह्यभिद्रुत्य स्वैरासङ्गशरोर्मिभिः ।
विविधुस्तानथोद्गातॄंस्ते विद्धास्तत्यजुः क्रियाः ॥ (147)

'ते[1] विदुः' इत्युत्तरवाक्यं व्याकुरुते—**तमसीति** । आसुरस्य रागद्वेषादेर्बलस्यापचयाल्लिङ्गात् असुरैः सुराभिप्रायोऽवगत इत्यर्थः । (143) [2]किं तदिति, तदाह—**अनेनेति** । (144) वाचः कल्याणवदने सङ्गवत् इतरेषामपि स्वीयव्यापारे अभिषङ्गोऽभूत्, इत्याह—**कर्मणीति** । (145) संप्रति श्रुत्युक्तमसुराणां सुराभिप्रायज्ञानलिङ्गमाह—**यदिति** । छिद्रात्–कल्याणवदनासङ्गरूपादित्यर्थः । (146) ज्ञात्वा अभिप्रायं किं कृतवन्तः, अत्राह—**इति ज्ञात्वेति** । (147) केनाभि-

---

1. **ते विदुरिति** "ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति । तमभिद्रुत्य पाप्मनाऽविध्यन् ।" इति श्रुतिः ।

* **तमसि** अविवेकपूर्वकरागद्वेषादौ । **स्वाधिकारात्** — स्वाभाविकज्ञानकर्मभ्य इति यावत् ।

2. **किं तत्** — देवहृद्गतं किमित्यर्थः ।

* **स्वेन ज्योतिषा** — शास्त्रीयज्ञानादिना ।

* **अनेन वै न उद्गात्रेति** वाचा उद्गात्रा नः अस्मान् अतीत्य स्वं वपुः–अग्न्यादिभावमेष्यन्ति इति योजना ।

* नानादन्यस्य सामर्थ्यं विद्यतेऽसुरनाशने ॥ (148)

* अनेनाप्रतिरूपेण वचसा कार्यशायिना ।
पाप्मादिदोषसंपर्कः कारणस्थोऽनुमीयते ॥ (149)

* व्युत्थायाख्यायिकारूपात् श्रुतिः स्ववपुषाधुना ।
आचष्टे कारणे वृत्तं कार्यगेणासुरात्मना ॥ (150)

दृष्टेनाप्रतिरूपेण कार्यगेणानुमीयते ।
कारणे पाप्मवेधोऽभूद्यो वाचि प्राक् प्रजापतेः ॥ (151)

प्रायेण वागादयः क्रियाः तत्यजुः, अत्राह—(आन)[ना]नादिति । (148) प्रजापतेः महात्मनः तामसदोषसंसर्गायोगादभूतार्थवादमात्रमेतत्, अत्राह—**अनेनेति** । प्रजापतिसृष्टप्रजावर्गगतेन अनुभूयमानासत्य[1]वचनादिना प्रजासु ताम[2]सदोष उन्नी[3]यमानः कारणग[4]ततथाविधातिशयपूर्वकः कार्यगतातिशयत्वात्, य एवं, स एवम् यथा पटशौक्ल्यादिः तत्कारणतन्तुशौक्ल्यपुरःसरः । अन्यथा आकस्मिकत्वप्रसङ्गादित्यर्थः । (149) '[5]स यः' इत्यादेस्तात्पर्यमाह—**व्युत्थायेति** । (150) [6]किमाचष्टे, तदाह—**दृष्टेनेति** । (151)

---

* **नानादिति** अनात्—प्राणात् अन्यस्य न सामर्थ्यमित्यर्थः ।

1. **असत्यवचनादिनेति** कार्येणेति शेषः ।
2. **तामसदोषः**—पाप्मा ।
3. **उन्नीयमानः**—अनुमीयमानः ।
4. **कारणगततथाविधातिशयपूर्वकः**—कारणगततामसदोषपूर्वकः ।

* "तथापि प्राजापत्यासु प्रजासु पाप्मवेधो न युक्तः, कारणे तदभावात्, अन्यथा आकस्मिकत्वापत्तेः, इत्याशङ्क्याह—**अनेनेति** ।" इत्यवतारयन्ति **शास्त्रप्रकाशिकाकाराः** ।

5. **स यः इत्यादेरिति** "स यः स पाप्मा, यदेवेदमप्रतिरूपं वदति, स एव स पाप्मा ।" इति श्रुतिः ।

* "आनुमानिकेऽपि दर्शितेऽर्थे श्रुतिसंवादाभावादविश्वासमाशङ्क्य, 'स यः' इत्यादिवाक्यमवतारयति—**व्युत्थायेति** वाग्देवताया नोपास्यतेति निश्चित्य अर्थवादभावात् वैमुख्येनोत्थिता श्रुतिः स्वेनैव-विद्यमानवादित्वात्मना सौत्रे पापादि तत्कार्यं प्रजासु दृष्टानृताद्यनुमितं तद्गतासुरासङ्गपाप्मलिङ्गेनेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

6. **किमाचष्टे इति** व्युत्थिता श्रुतिरिति शेषः ।

स यो वाच्यसुरैः क्षिप्तः पाप्मा कार्ये स दृश्यते ।
प्रमाविरोधि यद्वाक्यं तत्तत्कार्यसमाश्रयम् ॥ (152)

स एव स इति ह्युक्तिः कार्यकारणसंस्थयोः ।
प्रजासु साक्षाद्यः पाप्मा यश्च तत्कारणाश्रयः ॥ (153)

* प्राणं चक्षुस्तथा श्रोत्रं मनश्चैवमनुक्रमात् ।
वव्रुर्देवा यथा वाणीं विद्धाः सर्वे तथासुरैः ॥ (154)

कर्मेन्द्रियाणां सर्वेषां वागेवात्रोपलक्षणम् ।
चक्षुःश्रोत्रे धीन्द्रियाणां मनो बुद्धेस्तथैव च ॥ (155)

---

[1]सकारचतुष्टयस्यापुनरुक्तमर्थमाह—स य इति । स यः पाप्मा प्रजापतेः कार्यभूतासु प्रजासु दृश्यते । कोऽसौ । प्रमाविरोधि—विधिप्रतिषेधशास्त्रविरोधि । यत् असत्यबीभत्सादिवदनं तत् तस्य-प्रजापतेः कार्यसमाश्रयम् । स पाप्मेत्यर्थः । (152) उपरितन[2]सकारद्वयार्थमाह—स एवेति । प्रजासु दृश्यमानपाप्मा यः, स एव प्रजापतेर्वाचि पाप्मेत्यर्थः । (153)

तृतीयादिकण्डिकाचतुष्टयार्थनिरूपणम्
घ्राणचक्षुःश्रोत्रमनसां नियोगः, तेषामासुरपाप्मवेधश्च

उत्तरपर्यायतात्पर्यमाह — प्राणमिति । (154) कर्मेन्द्रियाणामनुक्तानः ग्रहणहेतुमाह—कर्मेति । (155) अप्रामाणिक(म)[मि][3]तत् श्रुतमात्रग्रहणे लाघ-

---

1. सकारचतुष्टयस्य—'स यः' इत्यादिश्रुतिवाक्यगततच्छब्दचतुष्टयस्य ।
2. उपरितनसकारद्वयेति 'स एव स पाप्मा' इत्यत्र तच्छब्दद्वयेत्यर्थः ।
3. एतत्—सर्वेन्द्रियग्रहणम् ।

* प्राणं—घ्राणं, घ्राणदेवतामिति यावत् । 'घ्राणं चक्षुः' इति मु. पु. पाठः । अत्रेयं स्थलशुद्धिः । वाचः पाप्मवेधनिरूपणानन्तरं, घ्राणदेवतां प्रति प्रार्थना, ततः तयोद्गानं, ततः यजमानगामि सर्वसाधारणं फलं, कल्याणं जिघ्रतीति आत्मार्थं फलम्, आसुरपाप्मवेधः, अप्रतिरूपं जिघ्रतीति पाप्मा, चोक्तानि । एवमेव ततः चक्षुः ततः श्रोत्रं, ततः मनश्च प्रति प्रार्थना । ततः तैरुद्गानं, तस्य सामान्यफलं, कल्याणं पश्यति, कल्याणं शृणोति, कल्याणं संकल्पयति इति प्रत्येकमात्मार्थं फलं ततः आसुरपाप्मवेधः, ततः अप्रतिरूपं पश्यति, अप्रतिरूपं शृणोति, अप्रतिरूपं संकल्पयति, इति च पाप्मा च निरूपितानीति ।

कृत्स्नं जगदनादाय नैकस्यापीष्यते क्रिया ।
प्राणस्य किमु वक्तव्यं कृत्स्नाध्यात्मेन्द्रियग्रहः ॥ (156)

यद्यपीदं जगत्कृत्स्नं गृह्यते संहतत्वतः ।
तथापि चोदितोऽत्रार्थ उपास्यो नागतोऽर्थतः ॥ (157)

कल्याणेतररूपेण परिशिष्टेष्वपीक्ष्यते ।
विभाग आसुरो वेधस्तेन तेष्वनुमीयते ॥ (158)

* **अतस्तदर्थमाहेयमेवम्विति पुनः श्रुतिः ।**
यथा वागादयो विद्धास्तद्वज्ज्ञेयास्त्वगादयः ॥ (159)

सिद्धान्वागादिदृष्टान्तान् पुरस्कृत्यात उच्यते ।
* **एवम्वित्युक्तशेषाणां पाप्मविद्धत्वसिद्धये ॥ (160)**

वात्, अत्राह—**कृत्स्नमिति** । 'इयं पृथिवी सर्वेषां भूतानां मधु' (बृ. 4-5-1) इत्यादौ सर्वः सर्वस्य सहकारीति वक्ष्यमाणत्वात्, एकस्यापीन्द्रियस्य निखिलजगदनादाय स्वव्यापारहेतुत्वं नास्ति । किमु वाच्यमाध्यात्मिकनिखिलकरणस्वीकारमन्तरेण हेतुत्वं नास्तीति । अतो युक्तमनुक्तानामुपलक्षणमित्यर्थः । (156) निखिलस्य सहकारित्वेनोपात्तस्य वागादिवदुपास्यत्वप्रसक्तिः, अत आह—**यद्यपीति** । उपास्यत्वेन श्रुतस्य वागादेरेव उपास्यत्वं, न तु कार्यानुपपत्त्या सहकारित्वेना[1]गतस्य जगतः । 'यश्चार्थादर्थो न स चोदनार्थः' इति न्यायादित्यर्थः । (157) यथा वागादिषु पाप्मवेधो विज्ञायते, न तथा अनुक्ते(ख)[षु,अ]तो न ते[2]षामुपलक्षणम्, अत्राह—**कल्याणेति** । त्वगादिष्वपि कल्याणस्पर्शनादिकं दृश्यमानं [3]पाप्मवेधमनुमापयतीत्यर्थः । (158) '[4]एवमु खल्वेताः' इति श्रुतिमुक्तार्थे अवतारयति—**अत इति** । (159) विमतं पाप्मानुविद्धं तत्कार्यत्वात् वागादिवत् इति प्रयोगो

---

1. **आगतस्य**—लब्धस्य ।
2. **तेषां**—अनुक्तान्तेन्द्रियाणाम् ।
3. **पाप्मवेधं**—अप्रतिरूपस्पर्शनादिपाप्मवेधम् ।
4. **एवमु खल्वेताः इति श्रुतिमिति** "एवमु खल्वेता देवताः पाप्मभिरुपासृजन् एवमेनाः पाप्मनाविध्यन् ।" इति श्रुतिः ।

* **तदर्थं**—पाप्मवेधमर्थम् ।

* **उक्तशेषाणां**—उक्तव्यतिरिक्तानामिन्द्रियाणामिति यावत् ।

अविध्यन्निति योऽर्थोऽस्य तद्व्याख्यानाय यत्यते ।
स्वैः स्वैस्तानिन्द्रियासङ्गैः पाप्मभिस्त उपासृजन् ॥ (161)

यत्संसर्गं पुरा चक्रुरविध्यंस्तदिहोच्यते ।
या विद्धा देवतास्तासां प्रक्रियासंहृतिः पृथक् ॥ (162) *

आसङ्गपाप्मभिर्विद्धा यस्माद्वागादयोऽसुरैः ।
वर्जनीयास्ततस्ताः स्युर्नोपास्याः श्रेय ईप्सुभिः ॥ (163) *

एवं निराशाः पूर्वासु देवतास्वसुरार्दनात् ।
पारिशेष्यादथाजग्मुर्मध्यमं प्राणमादरात् ॥ (164)

विवक्षितः, इत्याह—**सिद्धानिति** । (160) 'पाप्मभिरुपासृजन्' 'पाप्मना अविध्यन्' इत्यनयोरर्थभेदाभावात्पुनरुक्तिः, इत्यत्राह—**अविध्यन्निति** । 'पाप्मभिरुपासृजन्' इति व्याख्यानवाक्यमिति मत्वा तदर्थमाह—**स्वैरिति** । (161) 'अविध्यन्' इत्येतद्व्याख्येयमिति दर्शयन्, तदर्थमाह—**यदिति** । व्याख्यान-व्याख्येयभावादपुनरुक्तिरिति भावः । पूर्ववाक्यैः असुराः पाप्मभिः वागादीनर्दितवन्तः इत्युक्तत्वात् [1]व्यर्थमिदम्, अत्राह—**या इति** । पाप्मोपसंसृष्टवागादिदेवताप्रकरणमवान्तरमुपसंहृतमित्यर्थः । (162) उपसंहृतप्रकरणस्य विवक्षितमाह —**आसङ्गेति** । (163)

सप्तमकण्डिकार्थनिरूपणम्

मुख्यप्राणं प्रति प्रार्थना आसुराणां विनाशः देवानां जयश्च

'[2]अथ हेमम्' इत्येतस्यार्थमाह—**एवमिति** । वागादीनां स्वप्राधान्येनोपास्यत्वं(प्रति) निरस्तमित्यर्थः । (164) अथशब्दार्थमाह—**अथेति** । 'इ(य)

---

1. **व्यर्थमिदम्**—'एवमु खल्वेता देवताः' इत्यादिवाक्यं व्यर्थम् ।

* **प्रक्रियासंहृतिः** — प्रकरणोपसंहारः ।

* **नोपास्या इति** वागादयः स्वप्राधान्येन नोपास्या इत्यर्थः ।

2. **अथ हेममिति** "अथ हेममासन्यं प्राणमूचुः त्वं न उद्गायेति, तथेति तेभ्य एष प्राण उदगायत् । ते विदुः अनेन वै न उद्गात्रात्येष्यन्तीति ।" इति श्रुतिः ।

अथेत्यनन्तरोक्तिः स्यात् तथाऽभिनयवृत्तये ।
इममित्यप्रसिद्धत्वात् प्राणस्येह त्वगादिवत् ॥ (165)

अस्ति यस्मादसुर्नित्यमासन्योऽयमतो मतः ।
वागादिभ्यो विभागार्थं विशेषणमसोरिदम् ॥ (166)

जपमन्त्राभिधेयोऽत्र पारिशेष्यात्प्रतीयताम् ।
उद्गीथदेवता प्राण इत्यभूत् सुरनिश्चयः ॥ (167)

मन्त्रप्रयोगे सर्वेषां संनिधौ तत् प्रकाशितम् ।
भारमुत्सहते वोढुं, योऽनो यामस्तमाश्रयम् ॥ (168)

परीक्षमाणास्ते त्राणं यथोक्ताख्यानवर्त्मना ।
क्रमेणासेदुरासन्यं प्राणं पाप्मपराभवात् ॥ (169)

श्रेयोऽर्थिनां मनुष्याणामुपास्यप्रतिपत्तये ।
इयमाख्यायिका चक्षुर्नान्यथोपास्यनिश्चितिः ॥ (170)

मम्' इत्येतद्व्याचष्टे—**तथेति** । संकेतवशात् विवक्षितार्थप्रकाशकः कायावयवव्यापारः अभिनयः । अत्रैवाभिनये हेतुमाह—**अप्रसिद्धत्वादिति** । (165) आसन्यपदार्थमाह—**अस्तीति** । (166) केनाभिप्रायेण सुराणां प्राणोपगमनम्, अत्राह—**जपेति** । मन्त्रप्रकाश्योद्गीथदेवताश्रयादसुरजयस्य निश्चितत्वात् [1]तदुभयं प्राणस्येति ज्ञात्वा गतवन्त इत्यर्थः । (167) कथं प्राणस्य मन्त्रप्रकाश्यत्वेनोद्गीथदेवतात्वम्, अत्राह—**मन्त्रेति** । तत्—प्राणस्य असुरपराभवहेतुत्वम् । अन इति पदच्छेदः । 'असतो मा सद्गमय' इत्यादिमन्त्रार्थस्य [2]तत्रैव संभवादित्यर्थः । (168) तर्हि प्रथमत एव तत्सिद्धेः वृथा पूर्वत्र वागादिविचारणम्, अत्राह—**परी(क्ष्य)[क्ष]माणा इति** । (169) कुतः पुनरियमाख्यायिका श्रुत्या प्रणीयते, इत्याह—**श्रेयोऽर्थिनामिति** । (170)

---

1. **तदुभयं**—मन्त्रप्रकाश्योद्गीथदेवतात्वं असुरपराभवहेतुत्वं चेत्युभयम् ।
2. **तत्रैव**—प्राणे एव ।

यः प्राणे भोग इति न पूर्ववद्भण्यतेऽत्र किम् ।
वागादीनामिव यतो नासोभोगो विशिष्यते ॥ (171)

* अकृत्स्नभोगतो युक्तं वागादिषु विशेषणम् ।
सर्वस्यैवासुभोगत्वात् किं कुतोऽत्र विशिष्यते ॥ (172)

अभिसन्धिरविव्यत्सन्नित्यभूत्सुरविद्विषाम् ।
अनिष्ठितक्रियारम्भोऽविव्यत्सन्निति भण्यते ॥ (173)

विव्यत्सोद्देशमात्रेण प्राणो हन्ता सुरद्विषाम् ।
इत्यर्थप्रतिपत्त्यर्थमीदृग्दृष्टान्त उच्यते ॥ (174)

'यो वाचि भोगः' [1]इत्यादिवदत्रापि[2] कस्मान्नोच्यते, इति शङ्कते—**य इति**। व्यवच्छेद्याभावात् विशेषणानुपादानम्, इति परिहरति—**वागादीनामिति**। (171) तर्हि वागादीनामपि भोगो न विशेष्यः प्राणभोगवत्, अत्राह—**अकृत्स्नेति**। (172) '[3]अवि(ध)[व्य]त्सन्' इत्यस्यार्थमाह—**अभिसन्धिरिति**। तदेव स्पष्टयति—**अनिष्ठितेति**। [4]पापसंसर्गकरणेच्छा आसीदित्यर्थः। (173) 'स यथा' इत्यादेस्तात्पर्यमाह—**वि(ध)[व्य]त्सेति**। प्राण(विधान-छेदेय) [वेधनेच्छोदय]मात्रेणेत्यर्थः। (174) 'यथा' इत्यादेरर्थमाह—**बिभित्सयेति**। अश्मनो भे(दान)[दने]च्छयेति यावत्। लोष्टः—पांसुपिण्डः। न खनितुं

---

1. **इत्यादिवदिति** यः प्राणे भोगः तं देवेभ्य आगायत् इत्यादीति शेषः।
2. **अत्रापि** —मुख्यप्राणपर्यायेऽपि।

* **अकृत्स्नेति** वाचो हि वचनमेव भोगः। न दर्शनादिकम्। चक्षुषो दर्शनमेव भोगः, न वदनादिकम्। एवमशेषस्य वागादिभोगत्वाभावात् प्रातिस्विकं भोगमादाय 'यो वाचि भोगः' इत्याद्युक्तम्। दर्शनश्रवणादेः सर्वस्यापि प्राणभोगत्वात्, यः प्राणे भोगः इति प्रातिस्विकरूपेण नोक्तमिति समुदायार्थः।

3. **अविव्यत्सन्निति** "तमभिद्रुत्य पाप्मनाविव्यत्सन्। स यथा अश्मानमृत्वा लोष्टो विध्वंसेत। एवं हैव विध्वंसमाना विष्वञ्चो विनेशुः।" इति श्रुतिः।
4. 'अनिष्ठितक्रियारम्भः' इत्यस्य, अनिष्ठिता—अनिष्पन्ना क्रिया पापसंसर्गकरणरूपा तस्या आरम्भः—इच्छा इत्यर्थः इत्यभिसन्धायाह—**पापसंसर्गकरणेच्छेति**।

* विभित्सया यथा वेगाल्लोष्टः क्षिप्तोऽश्मनोऽन्तिकात् ।
नश्येत्स्ववेगाच्छतधा ह्याखणाश्मसमागमात् ॥ (175)

अप्रधृष्यं तथा प्राणमृत्वा नेशुः सहस्रधा ।
* दैत्यास्तन्नाशतो देवा देवा एवाभवन् सदा ॥ (176)

अत एव मनुष्यत्वहेतवोऽप्यसुराः समम् ।
विनेशुर्विष्वग्गतयः लोष्टः क्षिप्तो यथाश्मनि ॥ (177)

प्राणस्वभावसंपत्तेः प्राणवद्देवता अपि ।
देवा एवाभवन् दैत्यकृत्स्नपाप्मविनाशतः ॥ (178)

वागादीन्द्रियसंघातो याजमानो यथा पुरा ।
प्राणात्मभावाद्धत्वागः वैराजं रूपमाप्तवान् ॥ (179)

तथा यस्तमुपासीत यथोक्ताख्यानवर्त्मना ।
विराजैवात्मना हत्वा पापं भवति सोऽचिरात् ॥ (180)

जीवाविष्ट उपास्योऽत्र देवताविग्रहः सदा ।
प्राणो हिरण्यगर्भात्मा यावत्तदभिमानिता ॥ (181)

शक्यते टङ्कादिभिरिति अखन एव आखणः । (175) [1]दार्ष्टान्तिकश्रुतिं व्याचष्टे —**अप्रधृष्यमिति** । (176) ‘वि(श्व)[ष्व]ञ्चो विनेशुः’ इत्येतदर्थं स्पष्टयति —**अत इति** । (177) ‘[2]ततो देवाः’ इत्येतदर्थमाह—**प्राणेति** । अस्मादुपासनात् प्राणभावात् । (तैरेवं पापं निवृष्टं) चक्षुरादयः एवं चादित्यादिभावं गता इत्यर्थः । (178) ‘भवत्यात्मना’ इत्यादिकं व्याख्याति—**वागादीति** । आगः—पापं परिच्छिन्नाभिमानम् । उपासना(द्वश)[वशात्]तद्रूपः स्यादित्यर्थः । (179-180) विराडुपाधेरचेतनत्वात् घटादिवन्नोपास्यत्वम्, अत्राह—**जीवेति** ।

---

* ‘बिभित्सायै’ इति मु. पु. पाठः ।

1. **दार्ष्टान्तिकश्रुतिं**—‘एवं हैव विध्वंसमानाः’ इत्यादिश्रुतिम् ।

* **देवा देवा एवाभवन्**—देवाः वागादयः देवताप्रतिबन्धकपरिच्छेदाभिमानं हित्वा अग्न्यादिदेवा एवाभवन्नित्यर्थः ।

2. **ततो देवा इति** “ततो देवा अभवन् परा असुराः भवत्यात्मना परा अस्य द्विषन् भ्रातृव्यो भवति य एवं वेद ।” इति श्रुतिः ।

भावनोपचयाद्भूत्वा परिच्छेदं स्वमासुरम् ।
देवतात्मानमेत्याशु सदा तद्भावभावितः ॥ (182)

तत्तमोमात्रविध्वंसान्न तु प्राणादिराप्यते ।
कार्यत्वात्कारणं मुक्त्वा न हि तत्कार्यसंभवः ॥ (183)

* देवो भूत्वेह देवोऽसौ भावनोपचयाद्भवेत् ।
पुंव्यापारोद्भवत्वं नः श्रुत्यापि प्रतिपादितम् ॥ (184)

ब्रह्मैवाप्येति ब्रह्मैव प्रागप्यासीद्यतोऽद्वयम् ।
तन्मोहमात्रविध्वंसादित्यपि श्रुतिशासनम् ॥ (185)

स्वतःसिद्धौ तदन्येषां श्रुतिकोपः प्रसज्यते ।
अतोऽन्यदार्तं तद्व्याप्येकमेवेति च श्रुतिः ॥ (186)

उपास्तेरवधिमाह—**यावदिति** । देहात्मप्रत्ययवत् देवता[1]त्मप्रत्ययदार्ढ्यं यावत् स्यादित्यर्थः । (181) ज्ञानमात्रात् ब्रह्मप्राप्तिवत् अत्रापि ज्ञानमात्रात् [2]तद्भावसंभवादभ्यासोऽनर्थकः, अत्राह—**भावनेति** । (182) देवताज्ञानमज्ञाननिवृत्तिद्वारा ब्रह्मज्ञानवत् [3]तद्भावफलम् , अत्राह—**तत्तम इति** । हेतुमाह—**कार्यत्वादिति** । प्राणभावस्य साध्यत्वात् साधनापेक्षायां ज्ञानसहितं कर्म साधनत्वेन संबध्यते इत्यर्थः । (183) प्राणात्मभावस्य धीमात्रसाध्यत्वं ब्रह्मभाववदनुमीयताम् , इत्याशङ्क्य श्रुतिविरोधमाह—**देव इति** । (184) तर्हि प्राणवत् आत्मभावोऽपि न धीमा(त्र)[त्रात्] स्यात् , अत्राह—**ब्रह्मेति** । ब्रह्मप्राप्तेः प्रागपि ब्रह्मैव सन् जीवः अज्ञानादब्रह्मवद्भासमानः विद्यया अविद्यानिवृत्तौ ब्रह्मभावे नान्यदपेक्षते इत्यर्थः । (185) ब्रह्मभाववत् प्राणभावोऽपि स्वतःसिद्धः, इत्यत्राह—**स्वत इति** । 'अतोऽन्यदार्तम्' (बृ. 5-4-2) 'नेह नानास्ति किंचन' (बृ. 6-4-19)

---

1. **देवतात्मप्रत्ययदार्ढ्यं**—प्राणदेवतायामहमिति प्रत्ययस्य दार्ढ्यम् ।
2. **तद्भावसंभवात्**—प्राणभावसंभवात् ।
3. **तद्भावफलं**—देवताभावफलकम् ।

* **देवो भूत्वेति** देवो भूत्वा देवानप्येति इति श्रुतिः । इहैव देहे भावनाप्रकर्षात् देवभावमनुभूय देहपातादूर्ध्वमुपास्यो देवः स्यात् इति तदर्थो बोध्यः ।

नाव्याकृतादेः संसिद्धौ परमात्मातिरेकतः ।
ब्रह्मवन्मानमस्तीह तथा निर्मोक्षताऽपतेत् ॥ (187)

अथात्माविद्याव्यक्तादिरूपेण प्रथते तदा ।
तन्निवृत्तौ निवृत्तिः स्यान्निवृत्तिः केवलात्मता ॥ (188)

प्राणस्येव पराभूतो द्विषन्पाप्माऽसुरोऽखिलः ।
उपासीनस्य तं प्राणं कृत्स्नो नश्येत्तथाऽसुरः ।
* द्विषंश्चाप्यद्विषञ्छत्रुरासुरादन्य इष्यते ॥ (189)

नित्यविघ्नकृदेवैष प्राणाप्तावासुरो मतः ।
अतो विशेष्यते श्रुत्या द्विषन् भ्रातृव्यरूपया ॥ (190)

'सर्वं खल्विदं ब्रह्म, (छा. 3-10-1) इत्यादिश्रुतिविरोधः स्यादित्यर्थः । (186) अव्याकृतादेः स्वतःसिद्धत्वे न केवलं, मानविरोधः, मानमपि नास्ति इत्याह—**नाव्याकृतेति** । स्वतन्त्रस्य अव्याकृतप्राणादेर्नित्यसिद्धत्वे चैतन्यवन्निवृत्तिरपि न स्यात्, इत्याह—**तथेति** । (187) अनादित्वेऽपि कल्पितत्वात् न निर्मोक्ष[ता], इति शङ्कते—**अथेति** । अङ्गीकरोति—**तदेति** । निवृत्त्या [1]**सद्वितीयत्वम्**, अत्राह—**निवृत्तिरिति** । [2]वृत्तिव्यक्तिचैतन्यमात्रमित्यर्थः । (188) 'परास्य द्विषन्' इत्यादेरर्थमाह—**प्राणस्येति** । द्विषन्निति विशेषणमनर्थकं, व्यवच्छेद्याभावात्, इत्याशङ्क्य, व्यवच्छेद्यं दर्शयितुमाह—**द्विषंश्चेति** । भ्रातृव्यरूपया—भ्रातृव्यः इत्येवंरूपया । भ्रातृव्यः—सापत्नः । (189-190)

यच्छब्दयोगः प्राथम्यमित्युद्देश्यस्य लक्षणम् ।
तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणम् ॥

---

1. **सद्वितीयत्वमिति** आत्मन इति शेषः । तथाचाद्वैतहानिरिति भावः ।

2. **वृत्तिव्यक्तिचैतन्यमात्रमिति** वृत्तौ—अखण्डाकारवृत्तौ व्यक्तिः—अभिव्यक्तिः यस्य चैतन्यस्य, तन्मात्रमित्यर्थः ।

* **द्विषंश्चेति** 'यतोऽद्वेष्टापि भवति कश्चित् भ्रातृव्यो भरतादितुल्यः । ' इति भाष्यवाक्यमत्रानुसन्धेयम् ।

उक्तासुरपराभूतौ नान्योऽरिस्त्वशिष्यते ।
य एवं वेदेति विधिः फलोक्तेरर्थवादतः ॥ (191)

अनुषङ्गिफलोक्त्या वा तदुपासा विमुक्तये ।
* आत्मविद्याधिकारेऽस्मिंस्तदुपासाविधानतः ॥ (192)

आत्मविद्योपकारित्वं तस्माद्वाक्याच्च गम्यते ॥ (193)

अथायास्याङ्गिरोदूर्भिर्विशिष्टमसुकर्मकम् ।
उपासनं विधास्यामीत्यारब्धैषोत्तरा श्रुतिः ॥ (194)

अनुवादाद्विधिर्ज्यायाननुवादे वृथा श्रमः ।
पुरुषार्थाभिसंबन्धादतो विधिरिहाश्रितः ॥ (195)

इति न्यायात्, 'य एवं वेद' इति न विधिः यच्छब्दोपबन्धात्, इत्याशङ्क्याह—**य इति** । हेतुमाह—**फलेति** । फलवचनस्य(श्रु)[स्तु]तेः [1]विधिलिङ्गत्वात् हिरण्यगर्भप्राप्तिफलं तदुपासनं विधीयते इत्यर्थः । (191) **यद्वा** मुक्तिफलत्वेन तदुपासनविधिः, हिरण्यगर्भभावस्तु आनुषङ्गिकफलम्, इत्याह—**अनुषङ्गीति** । तत्र प्रकरणं प्रमाणयति—**आत्मेति** । (192) हिरण्यगर्भोपास्तेः मुक्तिफलत्वे ब्रह्मविद्यानर्थक्यम्, अत्राह—**आत्मविद्येति** । सूत्रोपासनं [2]तत्प्राप्तिफलं, शुद्धिद्वारा ब्रह्मविद्यामुत्पाद्य तद्द्वारा मुक्तिफलमित्यर्थः । न केवलं प्रकरणमेव, वाक्यमप्यस्ति, इत्याह—**वाक्याच्चेति** । 'उक्तोपनिषत्कः इतो विमुच्यमानः क्व गमिष्यसि' (बृ. 6-2-1) इति वाक्यादप्येतत् गम्यते इत्यर्थः । (193)

अष्टमादिषोडशकण्डिकापर्यन्तश्रुतितात्पर्यकथनम्

[3]'ते होचुः' इत्यादेः गुणविशिष्टप्राणोपासाविधौ तात्पर्यमाह—**अथेति** । (194) अङ्गरसादेरार्थिकत्वात् लोकसिद्धत्वाच्चानुवादो न विधिः, अत्राह—**अनुवादादिति** । (195)

---

1. **विधिलिङ्गत्वादिति** यत् स्तूयते तद्विधीयते इति न्यायादिति भावः ।
* **आत्मविद्याधिकारे**—आत्मविद्याप्रकरणे ।
2. **तत्प्राप्तिफलं**—सूत्रप्राप्तिफलकम् ।
3. **ते होचुरित्यादेः**—"ते होचुः क्व नु सोऽभूत् यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसः अङ्गानां हि रसः ।" इत्यादिकस्य ।

श्रूयते फलसंबन्धो यास्तूपासासु तास्विह ।
दध्नेन्द्रियादिवज्ज्ञेयो विधिर्गुणसमाश्रयः ॥ (196)

प्रधानफलसंबन्धो यत्र तु स्याच्छ्रुतेर्मुखात् ।
विशिष्टः स विधिर्ज्ञेयः यथाग्नेयादयस्तथा ॥ (197)

अत्राप्ताग्र्यादिरूपास्ते प्राणालिङ्गनसंश्रयात् । *
कृतोपकारं स्मृत्वोचुः प्राणा वागादयस्तदा ॥ (198)

उपासनानुवादेन को गुणविधिः, को वा गुणविशिष्टोपासनाविधिः, इत्यतः, [1]तं विभज्य दर्शयति—**श्रूयत इति**। 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र प्रधानाग्निहोत्रफलात् स्वर्गात् फलान्तरस्य इन्द्रियपाटवस्य श्रुतत्वात् गुणविधिरेवायं प्राप्तहोमानुवादेन यथा, तथा 'भर्ता श्रेष्ठः पुरोगन्ता' इत्यादि फलान्तरं यत्र श्रूयते, स गुणविधिरित्यर्थः । (196) [2]अयास्यादिषु प्रधानफलात् फलान्तराश्रव(ण)[णे] [3]विशिष्टविधिः, इत्याह—**प्रधानेति**। प्रधानफलं श्रुतमश्रुतं वास्तु। फलान्तरं यत्र न श्रूयते, तत्र विशिष्टविधिः। '**आग्नेयोऽष्टाकपालः**' इत्यत्र अष्टाकपालविशिष्टद्रव्यदेवतासंबन्धविधिः [4]तदाक्षिप्तयागस्य, द्रव्यदेवतयोस्त्वर्थाद्विधिसंबन्धः, [5]तद्वदत्रापि। आदिपदात् सोमेन यजेतेत्युत्पत्तिविधिर्विशिष्टविधिश्च यथेत्यर्थः । (197)

अष्टमकण्डिकार्थनिरूपणम्

एवं तात्पर्यमुक्त्वा अक्षरार्थमाह—**अत्राप्तेति**। (198) किमूचुरिति,

---

1. **तं**—गुणविधिं गुणविशिष्टोपासनाविधिं च ।
2. **अयास्यादिषु** उपास्यगुणेषु इति शेषः । विषयसप्तमीयम् ।
3. **विशिष्टविधिः**—अयास्यादिगुणविशिष्टप्राणोपासनविधिः ।
4. **तदाक्षिप्तयागस्येति** अग्निदेवताष्टाकपालद्रव्यसंबन्धाक्षिप्तयागस्येत्यर्थः । द्रव्यदेवतयोः यागस्वरूपत्वादिति भावः ।
5. **अत्रापीति** अयास्यादिगुणविशिष्टोपास्तिविधावपि, अर्थात् गुणस्य विधिसंबन्ध इत्यर्थः । सोमेन यजेतेत्यत्र सोमशब्दस्य सोमवति लक्षणया सोमविशिष्टयागविधिः । अर्थात् विशेषणस्य विधिसंबन्धः इति बोध्यम् ।

* **प्राणालिङ्गनसंश्रयात् इति** मुख्यप्राणस्य प्रधानत्वेनाश्रयणरूपादवष्टम्भादित्यर्थः ।

अनन्ताग्न्यादिभावेन यो नः सञ्जितवानसुः ।
क्वन्वसौ वर्तते ह्यात्मा योऽस्मच्छत्रुविनाशकृत् ॥ (199)

वितर्कयन्तस्ते प्राणा उक्त्वैवं प्रत्यगात्मसु ।
कुर्वाणमुपकारं तं ददृशुः प्राग्विवादरात् ॥ (200)

लोकेऽपि हि विचार्यार्थमथ संविदते जनाः ।
यथा, वागादयस्तद्वद्विजज्ञुः प्राणमात्मनि ॥ (201) *

सामान्योक्तावास्य इति तद्विशेषणमुच्यते ।
अन्तरित्यन्यथा मा भूत्प्रसङ्गः प्राणनिश्चितौ ॥ (202)

त्वगादयोऽपि सन्त्यास्ये यतोऽतस्तद्विशेषणम् ।
विशिनष्टि ततः प्राणमास्यान्तर्बिलचारिणम् ॥ (203)

आस्यपर्यन्तशायीनि त्वगादीनि न मध्यतः ।
प्राणस्तु मध्य आस्यस्य तस्मादन्तर्विशेषणम् ॥ (204)

सर्वेन्द्रियाणामथवा प्राण आत्मेति कथ्यते ।
अयमास्येऽन्तरित्येवमस्नाभिनिदर्शनात् ॥ (205)

तदाह—**अनन्तेति** । (199) नुशब्दो वितर्कार्थः, इत्याह—**वितर्कयन्त इति** । (200) आत्मस्थं विचारमन्तरेणा(म)[व]गन्तुं शक्यत्वात् व्यर्थो विचारः, अत्राह—**लोकेऽपीति** । (201) 'आस्येऽन्तः' इत्यत्र अन्तरिति विशेषणकृत्यमाह—**सामान्येति** । आस्ये इत्युक्ते त्वगादेरपि प्राणत्वप्रसक्तिः । तन्निरासार्थमन्तरिति विशेषणमित्यर्थः । (202) कथं त्वगादेः [1]प्रसक्तिः, अत्राह—**त्वगिति** । (203) [2]तर्हि अन्तरिति विशेषणेन [3]तद्व्यावृत्तिर्न स्यात्, अत्राह—**आस्यपर्यन्तेति** । (204) अन्तः इति विशेषणस्यार्थान्तरमाह—**सर्वेति** । अन्तश्शब्देन [4]वागादीनां

---

* **आत्मनि**—कार्यकरणसंघाते ।

1. **प्रसक्तिः**—प्राणत्वप्रसक्तिः ।
2. **तर्हि**—त्वगादीनामास्यवृत्तित्वे ।
3. **तद्व्यावृत्तिः**—त्वगादीनां व्यावृत्तिः ।
4. **वागादीनां स्वरूपं प्राण इति** । 'प्राणं तर्हि वागप्येति' इत्यादिश्रुत्या तेषां प्राणस्वरूपत्वावगमादिति भावः ।

अयमास्येऽन्तरित्येवं प्राणं दृष्ट्वा यतः पुरा ।
व्याजह्रुरमरास्तस्मात्प्राण आयास्यसंज्ञितः ॥ (206)

अङ्गानां करणानां च रसः सारो यतस्ततः ।
* प्राण आङ्गिरसः प्रोक्तः तद्विद्भिस्तद्गुणाश्रयात् ॥ (207)

कथमाङ्गिरसः प्राणः इत्यस्य प्रतिपत्तये ।
अन्वयव्यतिरेकाभ्यामुपरिष्टात्प्रवक्ष्यते ॥ (208)

तथाऽन्योऽपि गुणोऽनस्य दूरिति प्रतिपाद्यते ।
उदारफलसिद्ध्यर्थं सा वा एषेत्यतः श्रुतिः ॥ (209)

उपास्तिक्रमसिद्ध्यर्थं क्रमभङ्गोऽयमिष्यते ।
यतोऽतोऽङ्गिरसं त्यक्त्वा दूरित्येवाभिधीयते ॥ (210)

स्वरूपं प्राण उच्यते । हेतुमाह—**अरनाभीति** । नाभ्याश्रयाणामराणां रथना-भावर्पितत्वदृष्टान्तात् अखिलस्यापि भूतभौतिकप्रपञ्चस्य प्राणसमर्पितत्वमु(क्त्वा)[क्ता]र्थानुसारेण श्रुतौ दर्शितमित्यर्थः । (205) 'सोऽयास्यः' इत्यस्यार्थमाह—**अयमिति** । (206) अङ्गिरसत्व(मा)[मुप]पादयति—**अङ्गानामिति** । करणसारत्वं प्राणगुणमाश्रित्य तस्याङ्गिरसत्वमिति विवक्षितमाह—**तद्गुणेति** । (207) वागादीनामन्यतमस्य करणसारत्वं, प्राणस्यै(वचे)[वे]ति कुतो निर्णयः, अत्राह—**कथमिति** । (208)

नवमकण्डिकार्थनिरूपणम्
प्राणस्य दूर्गुणवत्त्वम्

'[1]सा वा एषा' इत्यादेस्तात्पर्यमाह—**तथेति** । (209) अङ्गिरसत्वं [2]प्रतिपाद्यमप्रतिपाद्य, दूर्गुणं [3]प्रतिपादयति । [4]तत्र कोऽभिप्रायः, तमाह—

---

* **तद्गुणाश्रयात्**—तस्य-प्राणस्य गुणः—करणसारत्वं, तत्समाश्रयणात् ।

1. **'सा वा एषा' इत्यादेरिति** "सा वा एषा देवता दूर्नाम । दूरं ह्यस्या मृत्युः । दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद ।" इति श्रुतिः ।
2. **प्रथमप्रतिपाद्यं**—पाठक्रमेण प्रथमं प्रतिपादयितव्यम् ।
3. **प्रतिपादयतीति** श्रुतिरिति शेषः ।
4. **तत्र**—तथा प्रतिपादने ।

विशिष्टोपास्तिरेवेयं प्रधानफलकीर्तनात् ।
नायं गुणविधिर्ज्ञेयस्तत्फलस्याश्रुतत्वतः ।। (211)

* क्रियायां गुणभूतोऽर्थो देवतेत्युपदिश्यते ।
अस्त्युपास्तिक्रियायोगो देवताऽतोऽन उच्यते ।। (212)

दूरमेवंविदः पाप्मा कथमध्यवसीयते ।
एवंवित्त्वविरोधित्वाद्दूरं पाप्मा भवेदतः ।। (213)

विषयेन्द्रियसंबन्धजो हि पाप्माऽऽसुरो यतः ।
* श्रौतानन्तादहंमानात्परिच्छिन्नो विरुध्यते ।। (214)

उपास्तीति । [1]दूर्गुणः प्रथममुपास्यः, पश्चादङ्गरसगुणः इत्यर्थः (210) 'दूरं ह वा' इति गुणोपासनफलश्रवणात् गुणविधिरेवायम्, इत्यत्राह—**विशिष्टेति ।** सूत्रात्मोपासनस्य द्वेधा फलं, पापक्षयः [2]तद्भावश्च । तत्र दूर्गुणोपास्तेः [3]दुरितक्षयफलश्रवणात् विशिष्टविधिरित्यर्थः । (211) संप्रदानकारकत्वेन [4]क्रियागुणभूते देवताशब्दप्रयोगात् कथं [5]प्राणस्य देवतात्वम्, अत्राह—**क्रिया[या]मिति ।** (212) पापक्षयस्य नित्यनैमित्तिककर्मफलत्वात् कथं(कश्चौ)[प्राणो]पासनफलत्वम्, इति शङ्कते–**दूरमिति ।** [6]तीर्थस्नानादेरिवोपासनस्यापि पापनिवृत्तिफलत्वम्, इति परिहरति–**एवंवित्त्वेति ।** ब्राह्मणादिपरिच्छेदाभिमानिनां पापसंबन्धः । प्राणात्माभिमानिनः तदभावान्न पापसंबन्ध इत्यर्थः । (213) परिच्छेदाभिमानो वा

---

1. **दूर्गुणः प्रथममुपास्य इति** दूर्गुणवतः शुद्धस्यैवोपास्यत्वमिति भावः ।
2. **तद्भावश्च**—सूत्रात्मभावश्च ।
3. **दुरितक्षयफलश्रवणादिति** तथा च तस्य प्रधानोपासनफलान्तर्गतत्वेन प्रधानफलातिरिक्तत्वाभावात् नात्र दध्नेन्द्रियकामस्येत्यत्रेव गुणविधिरिति भावः ।
4. **क्रियागुणभूते**—अग्न्यादौ । त्यज्यमानद्रव्योद्देश्यत्वं देवतात्वमिति भावः ।
5. **कथं प्राणस्य देवतात्वमिति** त्यज्यमानद्रव्योद्देश्यत्वाभावादित्यर्थः ।

* **गुणभूतः**—कारकरूपः । **देवताऽतोऽन उच्यते इति** कर्त्रतिरिक्तचेतनत्वे सति उपास्तिक्रियाकारकत्वं देवतात्वं विवक्षितमिति भावः ।

6. **तीर्थस्नानादेरिवेति** नित्यनैमित्तिकातिरिक्तेत्यादिः ।

* **अनन्तादहंमानात्**—अपरिच्छिन्ने प्राणात्मनि अहमभिमानात् ।

चक्षुरादिपरिच्छेदः प्राकृतज्ञानहेतुकः ।
युक्तोऽध्यात्मैकरूपस्य बाधः शास्त्राभिमानतः ॥ (215)

परिस्पन्दात्मिका वृत्तिः श्रोत्रादिष्वपि विद्यते ।
प्राणस्याथेन्द्रियाणां तु शब्दाद्यर्थावलेहिनी ॥ (216)

शब्दादिग्राहिणी वृत्तिः स्वैरासङ्गात्मपाप्मभिः ।
दूषिता, न परिस्पन्दो दूरं मृत्युरसोस्ततः ॥ (217)

मृत्युर्दूरं यथा प्राणात् तदात्मत्वात् तथासुरः ।
तद्विदश्च भवेन्मृत्युर्दूरमित्युपदिश्यते ॥ (218)

---

[1]तस्य कस्मान्न स्यात्, अत्राह—**विषयेति** । (214) अपरिच्छेदाभिमाने(न)[ना]-बाधितत्वात् यु(क्त)[क्तः]पापसंबन्धः, अत्राह—**चक्षुरादीति** । (215) प्राणस्य पापसंबन्धाभावसिद्धौ [2]तदभिमानिनः [3]तदभावः सिद्धयेत् । प्राणस्यैव पा(प)[पा] संबन्धः कथम्, प्राणत्वादित[4]तरवत्, अत्राह—**परिस्पन्देति** । चलनरूपा वृत्तिः [5]देहमात्रव्यापिनीत्यर्थः । [6]प्राणान्तरवृत्तिरपि तथैव, इत्यत आह—**अथेति** । अथशब्दः शङ्काद्योतनः । तुशब्दो विशेषार्थः । तमेव विशेषं दर्शयति—**शब्दादीति** । श्रोत्रेण न रूपदर्शनं, चक्षुषा न शब्ददर्शनमिति परिच्छिन्नत्वात् कल्याणासङ्गदूषितेत्यर्थः । परिच्छेदस्यैव पापफलत्वात् अपरिच्छेदस्य पुण्यफल-त्वात् न प्राणवृत्तिर्दूषिता, इत्याह—**न परिस्पन्द इति** । (216-217) एवं प्राणस्य शुद्धत्वमुपपाद्य, तदुपासकस्यापि [7]तदाह—**मृत्युरिति** । (218)

---

1. **तस्य**—प्राणोपासकस्य ।
2. **तदभिमानिनः**—प्राणे अहमभिमानवतः ।
3. **तदभावः**—पापसंबन्धाभावः ।
4. **इतरवत्**—घ्राणादीन्द्रियवत् । घ्राणादीनामपि प्राणपदव्यपदेश्यत्वमस्ति । अतो न दृष्टान्ते साधनवैकल्यम् ।
5. **देहमात्रव्यापिनी**—कृत्स्नदेहव्यापिनी ।
6. **प्राणान्तरवृत्तिरपि तथैव**—घ्राणादीन्द्रियवृत्तिरपि देहव्यापिनी ।
7. **तदाह**—शुद्धत्वमाह ।

दिशामन्त इह प्राह्यो मध्यदेशोपलक्षितः ।*
अनन्ताकाशदेशत्वात् नाञ्जसान्तो दिशां यतः ॥ (219)

श्रुतिस्मृतिसदाचारसंस्कृताशयवज्जनम् ।
अवधीकृत्यान्तत्वोक्तेर्न तु दोषो मनागपि ॥ (220)

मध्यदेशावधिस्तस्माद्दिगन्त इति कथ्यते ।

दशमकण्डिकार्थनिरूपणम्

'दिशा[1]मन्तः' इत्यस्यार्थमाह—**दिशामिति** । दिक्शब्देन मध्यदेशो गृह्यते । तदन्तः - तदतिरिक्तो देश इत्यर्थः । [2]कुत एवं तत्, अत्राह—**अनन्तेति** । 'आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः' इति मध्यदेशः **स्मृति**-प्रसिद्धो द्रष्टव्यः । (219)

विन्ध्यस्य दक्षिणे भागे कलौ वासः प्रशस्यते ।
तत्र वेदाश्च यज्ञाश्च यत्र गोदावरी नदी ॥

इति [3]**स्मृत्यन्तरविरोधः**, अत्राह—**श्रुतीति** । श्रौतस्मार्तकर्मसंस्कृतबुद्धयः पुरुषाः मध्यदेशो नार्यावर्त एव । तस्यापि मध्यदेशत्वं तादृशपुरुषाधिष्ठेयत्वात् । [4]**अन्यथा** [5]तत्र चण्डालाद्यधिष्ठितदेशस्य त्यागायोगादित्यर्थः । (220) मध्यदेशशब्दस्य तर्हि अनेकार्थत्वं स्यात्, अत्राह—**मध्यदेशेति** । [6]विशिष्टपुरुषाणामेव मुख्यं[7]

---

1. **दिशामन्त इति** "सा वा एषा देवता एतासां देवतानां पाप्मानं मृत्युमपहत्य, यत्रासां दिशामन्तः तद्गमयाञ्चकार । तदासां पाप्मनो विन्यदधात् । तस्मान्न जनमियात्, नेत्पाप्मानं मृत्युमन्ववायानीति ।" इति श्रुतिरनुसन्धेया ।
* **मध्यदेशोपलक्षित इति** मध्यदेशेन उपलक्षितः—व्यावर्तितः, मध्यदेशव्यतिरिक्त इत्यर्थः ।
2. **कुत एवं तदिति** दिशामन्तपदेन मध्यदेशातिरिक्तदेशग्रहणं कुतः प्रमाणात्, प्राच्यादीनामवसानस्य ग्रहणं कुतो नेति यावत् ।
3. **स्मृत्यन्तरेति** आर्यावर्तातिरिक्तदेशविशेषस्य वासयोग्यत्वप्रतिपादकेत्यर्थः ।
4. **अन्यथा**—आर्यावर्तस्यैव मध्यदेशत्वे ।
5. **तत्र**—आर्यावर्ते ।
6. **विशिष्टपुरुषाणां**—श्रौतस्मार्तकर्मसंस्कृतबुद्धिविशिष्टानां पुरुषाणाम् ।
7. **मुख्यं मध्यदेशत्वं**—मुख्यया वृत्त्या मध्यदेशपदप्रतिपाद्यत्वम् ।

प्रात्यन्तिकजनोद्देशः पापीयोजनसंश्रयात् ।
वर्ज्यतेऽतः प्रयत्नेन तद्विद्भिरधुनातनैः ॥ (221)

तेषु प्रत्यन्तदेशेषु तन्निवासिषु चासुरान् ।
यतो विन्यदधात्प्राणस्तस्मात्तद्वर्जयेद्द्वयम् ॥ (222)*

जनो विशिष्टो देशेन देशो जनविशेषितः ।
पाप्मोपसृष्टमुभयं शिष्टास्तद्वर्जयन्त्यतः ॥ (223)

समाहारोऽथवा भेदो नेदित्येतत्पदं भवेत् ।
अनीप्सितानिवृत्तिः स्यात् समाहारेऽविवक्षिते ॥ (224)

इत्थं न चेदहं कुर्यां प्रतिषेधश्रुतीरितम् ।
अन्ववायानि पाप्मानं प्रतिषेधातिलङ्घनात् ॥ (225)

मध्यदेशत्वं, इतरस्य तत्संबन्धादुप[1]चरितमित्यर्थः । मध्यदेशस्योक्तलक्षणत्वे को लाभः, तत्राह—प्रात्यन्तिकेति । (221) 'पाप्मनो विन्यदधात्' इत्येतत् व्याचष्टे —तेष्विति । (222) [2]एकस्य परित्यागे अर्थादितरपरित्यागस्य सिद्धत्वात् द्व(ती)यमित्ययुक्तम्, अत्राह—जन इति । अतिशयेन पापसंसृष्टत्वप्रकटनार्थमुभयं त्याज्यमुक्तं युक्तमित्यर्थः । (223) 'नेत्पाप्मानम्' इत्यादेरर्थमाह—समाहार इति । नेत् इत्येकं पदं, न इत् इति पदद्वयं वेत्यर्थः । पदद्वयपक्षे कोऽर्थः, तत्राह—अनीप्सितेति । समाहारे—एकपदत्वे । अविवक्षिते—पदद्वयमिति पक्षे, अनीप्सितस्य अनिष्टस्य पापस्य अनिवृत्तिः वाक्यार्थः स्यादित्यर्थः । (224) तदेव विशदयति—इत्थमिति । 'तस्मा[3]न्न जनम्' इत्यादिश्रुतीरितमहं, इत् - इत्थं, न कुर्यां यदि, तदा पाप्मानमन्ववायानि—संगच्छेयम् । तस्मात् प्रतिषेधश्रुत्या यथोक्तं तथैव कर्तव्यमित्यर्थः । (225)

---

1. उपचरितमिति लक्षणया मध्यदेशपदप्रतिपाद्यत्वमिति यावत् ।
* वर्जयेद्द्वयं—प्रत्यन्तदेशः तद्देशवासी जनश्चेति द्वयम् वर्जयेत् ।
2. एकस्येति देशतन्निवासिजनयोरेकतरस्येत्यर्थः ।
3. तस्मान्न जनमित्यादीति 'तस्मान्न जनमियात् नान्तमियात्' इति श्रुतिः

इति भेदविवक्षायां व्याख्या कार्या पदद्वये ।
माऽर्थस्तु तथाऽभेदे व्याख्येयः प्रतिषेधकृत् ॥ (226)

* सामान्यविषयश्चायं निषेधो नानविद्वतः ।
बलवत् प्रक्रियातो हि वाक्यं सामान्यमात्रगम् ॥ (227)

आसुरेणावरुद्धांस्तान् वागादीन्हतपाप्मनः ।
देवत्वं प्रापयत्प्राणः कथमित्येतदुच्यते ॥ (228)

ज्ञानतोऽज्ञानहानिः स्यात् देवत्वं भावनाबलात् ।
आनन्तर्ये क्रियाद्वित्वादथशब्दो भवेद्ध्रुवम् ॥ (229)

---

[1]अखण्डपदविवक्षितमाह—माऽर्थस्त्विति । पाप्मानं मा अन्ववायानीत्यर्थः । (226) प्राणोपासनप्रकरणात् तदुपासकस्यैवायं निषेधो न सर्वेषाम्, इत्याशङ्क्याह—सामान्येति । प्रकरणं प्राणोपासकस्य, वाक्यं तु सर्वस्य । [2]तयोः समवाये परस्य प्रकरणस्य दौर्बल्यं, मलवद्वाससो व्रतकलापविधानवत् इति वाक्यं बलवदित्यर्थः ।

एकादशादिषोडशान्तकण्डिकाषट्कार्थनिरूपणम्
वागादीनामग्न्यादिदेवभावरूपफलकथनम्

प्राणोपासनस्य पापक्षयफलमुक्त्वा अग्न्यादि(देव)देवताभावफलकथनायो-[3]त्तरं वाक्यम्, इत्याह—आसुरेति । (228) अथशब्दं व्याचष्टे—ज्ञानत इति । देवतास्वरूपज्ञाना[त्तदज्ञान]निवृत्तिः, ततस्तस्मिन् प्रसूतध्यानप्रकर्षात् तद्भावः इति [4]क्रिययोर्भेदात् [5]आनन्तर्यार्थोऽथशब्द इत्यर्थः । (229) 'मृत्युमत्यवहत्'

---

1. अखण्डपदेति 'नेत्' इति एकपदेन विवक्षितमित्यर्थः । अत्र 'नेदिति परिभयार्थे निपातः ।' इति भाष्यम् ।
2. तयोः समवाये—वाक्यप्रकरणयोः समावेशे ।
* न अनविद्वतः इति अनवित्—प्राणोपासकः, तद्विषयकः न निषेध इत्यर्थः ।
3. उत्तरं वाक्यं—"सा वा एषा देवता एतासां देवतानां पाप्मानं मृत्युमपहत्य अथैना मृत्युमत्यवहत् ।" इति वाक्यम् ।
4. क्रिययोर्भेदात्—ज्ञानध्यानक्रिययोर्भेदात् ।
5. आनन्तर्यार्थः—ज्ञानानन्तर्यार्थः ।

मृत्युमत्यवहत्प्राणः सामान्योक्तेर्विशेषतः ।
विशिष्टदेवतावाप्तिर्वागादीनां प्रपञ्च्यते ॥ (230)

नेदीयसी यतोऽन्येभ्यो वागेवोद्गीथकर्मणि ।
प्राणस्य तेन सोद्गातुः प्रथमेत्यभिधीयते ॥ (231)

वागाद्यग्न्याद्यवाप्त्यैवं पाप्मनोऽपास्य सर्वतः ।
वैराजं पदमेत्येवं यजमानः सुभावितः ॥ (232)

कल्याणासङ्गसंबन्धाद्वागाद्यधर्मकारणम् ।
त्यक्त्वाऽनं मुख्यमात्मानमाश्रयेन्मृत्युवर्जितम् ॥ (233)

इत्या[1][म्ना]नादेव वागादीनामग्न्यादिभावस्य सिद्धत्वात् '[2]स वै वाचम्' इत्याद्युत्तरवाक्यं व्यर्थम्, अत्राह—**मृत्युमिति** । (230) 'प्रथमाम्' इति वाचः प्राथम्यं—प्राधान्यमुक्तम् । तत्र को हेतुः, अत्राह—**नेदीयसीति** । अन्तरङ्गेत्यर्थः । (231) वागादीनामग्न्यादिभावेऽपि किमुपासकस्य स्यात्, अत्राह—**वागादीति** । वागादीनामग्न्यादिप्राप्तिरेव उपासकस्य वैराजप्राप्तिरित्यर्थः । (232) प्राणोपासनस्य विशिष्टफलत्वात् वागादिकं हित्वा प्राणमुपासीत, इत्याह—**कल्याणेति** । **मृत्युवर्जितं**—दोषरहितमित्यर्थः । (233)

---

1. **आम्नानादेव**—वचनादेव ।
2. **स वै वाचमित्यादीति**

'स वै वाचमेव प्रथमामत्यवहत्, सा यदा मृत्युमत्यमुच्यत । सोऽग्निरभवत्, सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ।'

'अथ प्राणमत्यवहत्, स यदा मृत्युमत्यमुच्यत, स वायुरभवत्, सोऽयं वायुः परेण मृत्युमतिक्रान्तो दीप्यते ।'

'अथ चक्षुरत्यवहत्' तद्यदा मृत्युमत्यमुच्यत, स आदित्योऽभवत्, सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ।'

'अथ श्रोत्रमत्यवहत्' तद्यदा मृत्युमत्यमुच्यत, ता दिशोऽभवन्, ता इमा दिशः परेण मृत्युमतिक्रान्ताः ।'

'अथ मनोऽत्यवहत्, तद्यदा मृत्युमत्यमुच्यत, स चन्द्रमा अभवत्, सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भाति । एवं ह वा एनमेषा देवता मृत्युमतिवहति, य एवं वेद ।' इति पर्याया अनुसन्धेयाः ।

* वागाद्यैः पञ्चभिर्युक्तं विराजं साधिभौतिकम् ।
हित्वाऽध्यात्मपरिच्छेदं ततस्तं प्रतिपद्यते ॥ (234)

साधिभूताधिदैवं च नामरूपक्रियात्मकः ।
* सूत्रं प्राणोऽङ्गिराः सत्यमृक्सामेत्यन उच्यते ॥ (235)

तमेकं सर्वभूतेषु ज्ञानकर्मफलाश्रयम् ।
आस्वभावात्मविज्ञानादुपास्ते यः स तं व्रजेत् ॥ (236)

उक्तमभ्युदयार्थं यद्वागादीनामथाधुना ।
आगानमवशिष्टेषु स्तोत्रेषूद्गातुरुच्यते ॥ (237)

वागादेस्त्याज्यत्वेनोक्तत्वात् अनुपासनमेव प्राप्तम्, अत्राह—**वागाद्यै-रिति** । पञ्चभिरिति त्वगादीनामुपलक्षणम् । प्राणस्य विराड्भावमापादयति—**साधिभौतिकमिति** । आध्यात्मिकाधिभौतिकपरिच्छेदत्यागे प्राणो विराडेवेत्यर्थः । (234) परिच्छिन्नत्वं प्राणस्य स्वभावः । तत् कथं परित्यज्यते, अत आह—**साधिभूतेति** । प्राणस्य सर्वात्मत्वं श्रुतौ प्रतिपाद्यते इत्यर्थः । (235) प्राणस्या-परिच्छिन्नत्वे तदुपासकस्य तदात्मता युक्ता, इति फलितमाह—**तमेक-मिति** । (236)

सप्तदशकण्डिकार्थनिरूपणम्
मुख्यप्राण आत्मने अन्नाद्यमागायत्

'[1]आत्मने अन्नाद्यमागायत्' इत्यस्य तात्पर्यमाह—**उक्तमिति** । [2]वागा-दिशब्दवाच्ययजमानस्य पवमानेषु अभ्युदयार्थमागानमुक्तम् । इदानीं परिशिष्टेषु स्तोत्रेषु प्राणस्यो[3]द्गातुरभ्युदयार्थमागानमुच्यते इत्यर्थः । (237) अ(न्नाद्ये)[न्नाद्य]

---

* **विराजमिति** आश्रयेत् इति पूर्वेण संबन्धः ।

* **सूत्रं प्राण इति** आभ्यां पदाभ्यां क्रियात्मत्वमुक्तम् । अङ्गिराः सत्यमित्याभ्यां रूपात्मकत्वं, ऋक्सामपदाभ्यां नामात्मकत्वंच प्राणस्योक्तं बोध्यम् ।

1. **आत्मने इति** "अथात्मने अन्नाद्यमागायत् । यद्धि किञ्चान्नमद्यते अनेनैव तदद्यते इह प्रतितिष्ठति ।" इति श्रुतिः ।
2. **वागादिशब्दवाच्ययजमानस्येति** वागादिशब्देन विवक्षितस्य वागाद्युपाधिकस्य यजमानस्य ।
3. **उद्गातुरभ्युदयार्थमिति** वचनबलात् फलस्य ऋत्विग्गामिता बोध्या ।

सामान्यभोज्यविषयस्त्वन्नशब्दो यतस्ततः ।
आद्यमित्युच्यते तस्य विशेषणतया वचः ॥ (238)

यत आदाविदं वृत्तमन्नागानमनात्मनि ।
* तस्मात्तत्कार्यभूतासु प्रजास्वद्यापि दृश्यते ॥ (239)

यद्धि किञ्चेति सर्वार्थमेवेत्यत्रावधारणम् ।
प्राणेनैव तु तत्सर्वं लोकोऽन्नं ह्यत्ति सर्वदा ॥ (240)

अन्नोपकारः सर्वेषामविशिष्टः समीक्ष्यते ॥ (241)
अथावधारणं कस्मादनेनैवेति भण्यते ।
प्राणद्वारक एवैषामुपकारो न तु स्वतः ॥ (242)

कथं तद्द्वारकस्तेषामुपकार इतीर्यते ।
ननु दूरिति हि प्राण उक्तो वागादिवत्कथम् ।
आत्मार्थान्नाद्यसंगीतेर्विद्धो नासुरपाप्मभिः ॥ (243)
स्थितिमात्राभिसंबन्धान्नायं दोष इहेष्यते ॥ (244)

शब्दयोरपुनरुक्तमर्थमाह—**सामान्येति** । (238) कार्यभूतप्राणिषु अन्नस्वीकरणं दृष्ट्वा तत्कारणे तत्स्वीकरणमनुमातुं च शक्यते, इत्याह—**यत इति** । **अनात्मनि**—प्राणात्मनीत्यर्थः । (239) 'यद्धि किञ्च' इत्यादेरर्थमाह—**यद्धीति** । (240) 'प्राणेनैव' इत्यवधारणमयुक्तम् । इतरेषामपि अन्ननिमित्तोपकारदर्शनात्, इति शङ्कते—**अन्नोपकार इति** । परिहरति—**प्राणेति** । (241-242) उपकार[कर]णस्य प्राणद्वारकत्वे किं मानम्, इत्याह—**कथमिति** । 'इह प्रतितिष्ठति' इत्येतदत्र मानम्, इत्याह—**ईर्यत इति** । 'इह प्रतितिष्ठति' इत्यस्य व्याव(र्त)[र्त्य]शङ्कान्तरमाह—**नन्विति** । (243) स्थित्यर्थत्वेनान्नस्य स्वीकारात् भोगार्थत्वेन तदस्वीकारात् न पापसंबन्धः, इति परिहरति—**स्थितीति** । (244) आद्यव्याख्याने वाक्यं योजयति—**असाविति** । असुः—प्राणः । तस्मिन् प्राणे प्रतिष्ठितं सदन्नं देहं प्राणांश्चावति । तस्मात् 'अनेनैव'

---

* अद्यापि दृश्यते इति स्वार्थमन्नस्वीकरणमिति शेषः ।

असावन्नं स्थितं यस्माद्देहं प्राणानवत्यतः ।
* यत्नाच्छ्रुतिरतो वक्ति त्विहान्नं प्रतितिष्ठति ॥ (245)

स्थितिमात्रं ह्यसोरन्नं यद्वासङ्गो न शङ्क्यते ।
भर्ता श्रेष्ठः पुरोगन्ता ह्यन्नादोऽधिपतिस्तथा ।
इत्यादिगुणविध्यर्थं परो ग्रन्थोऽवतार्यते ॥ (246)

अयं गुणविधिर्ज्ञेयः प्रत्येकं तत्फलश्रुतेः ॥ (247)

जग्धमन्नं यतो देहलिङ्गभावेन याति नः ।
परिणामं व्रजत्तस्मादेतावदिति भण्यते ॥ (248)

त्वय्येवात्मार्थमागीते त्वय्येवान्नमतोऽखिलम् ।
वयं चान्नमृते स्थातुं नालं क्षणमपीश्वर ॥ (249)

इत्यव[1]धारणमित्यर्थः । (245) द्वितीयव्याख्याने [2]वाक्यं योजयति—**स्थितिमात्रमिति** । 'यद्वा' इति व्याख्यान्तरार्थम् ।

अष्टादशकण्डिकार्थनिरूपणम्
प्राणादिदेवताप्रार्थनया प्राणेनान्नविभजनम्

'[3]ते देवाः' इत्यादेस्तात्पर्यमाह—**भर्तेति** । स्वसुवर्णादिरादिपदार्थः । (246) गुणविशिष्टविधेरुक्तत्वात् [4]किमर्थमिदम्, अत्राह—**अयमिति** । (247) 'एतावत्' इत्यस्यार्थमाह—**जग्धमिति** । देहलिङ्गस्थितिरन्नाधीना नान्यायत्तेत्यर्थः । (248) किमतः, तत्राह—**त्वयेति** । (249) 'अनु नोऽस्मिन्नन्न आभजस्व' इत्यस्यार्थमाह—**संतर्प्येति** । आभजस्वेति प्रधानकर्तृव्यापारविधिश्रवणे कथं

---

* **इहान्नं प्रतितिष्ठतीति** इह इत्यस्य प्राणे इत्यर्थः प्रथमव्याख्याने ।

1. **अवधारणमिति** युक्तमिति शेषः ।
2. **वाक्यं**—'इह प्रतितिष्ठति' इति वाक्यम् । इह—देहाकारपरिणते अन्ने प्राणः तिष्ठतीत्यर्थः द्वितीयव्याख्याने ।
3. **ते देवा इत्यादेरिति** "ते देवा अब्रुवन् । एतावद्वा इदं सर्वं यदन्नं आत्मने आगासीः । अनु नोऽस्मिन्नन्न आभजस्वेति ।" इति श्रुतिः ।
4. **किमर्थमिदम्**—उत्तरवाक्यं किमर्थम् ।

संतर्प्यातः स्वमात्मानमन्नेनास्मानपीश्वर । *
आभाजयस्व क्षुधितान् छान्दसत्वाण्णिचोऽश्रवः ॥ (250)
मामृतेऽन्नं न वः शक्तं पोष्टुं क्षणमपि क्वचित् ।
अन्नार्थिनोऽतो मां सर्वेऽप्यभिसंविशताऽऽशु वै ॥ (251)
तेनैता देवताः सर्वास्तृप्यन्त्यन्नेन सर्वशः ।
इत्यर्थस्य कुतः सिद्धिरिति चेदुच्यते यतः ॥ (252)
त्रिधा जग्धं भवत्यन्नं परिणामविशेषतः ।
स्थवीयान्मध्यमोऽणीयानित्येवं कालतोऽग्नितः ॥ (253)
स्थवीयान्यात्यधोभागो रसादिक्रमशोऽपरः ।
स्थूलं ह्युपचिनोतीमं कुड्यं मृत्स्नेव सर्वदा ॥ (254)
यस्त्वणीयान् रसः सूक्ष्मः स ऊर्गमृतमुच्यते ।
नाडीः सूक्ष्माः प्रविश्यासौ देवताः प्रीणयत्यथ ॥ (255)

---

[1]हेतुकर्तृव्यापारविषयत्वेनार्थक(प्य)[थन]म्, अत्राह—**छान्दसत्वादिति**। (250) '[2]ते वै मा' इत्यादेरर्थमाह—**मामिति**। (251) '**तेनैतास्तृप्यन्ति**' इत्ययुक्तम्, [3]अन्यभुक्तान्नेन [4]अन्यतृप्त्ययोगात्, इति शङ्कते—**ते(ने)नेति** । [5]उद्ग्रन्थमेव परिहरति—**उच्यत इति**। (252)

प्राणभुक्तेनान्नेन वागादिदेवतातृप्तेरुपपादनम्

'अशितमन्नं त्रेधा विधीयते' इत्यादिश्रुत्यन्तरानुरोधेनाह—**[त्रिधेति]**। मृ(च्छा)[त्स्ना]—[6]मृत्तिका। देवताः प्रीणयति—करणग्रामं प्रीणयतीत्यर्थः। (253-254-255) अन्नरसेनात्मनोऽप्युत्तम्भना(चंत्र)[दि]कार्यदर्शनात् भौति-

---

* **ईश्वर** शब्दः यजमानपरः

1. **हेतुकर्तृव्यापारविषयत्वेन**—प्रयोजककर्तृव्यापारविषयत्वेन । णिजर्थान्तर्भावेण इति यावत् ।
2. **ते वै मा इत्यादेरिति** "ते वै माभिसंविशतेति, तथेति तं समन्तं परिण्यविशन्त । तस्माद्यदनेनान्नमत्ति, तेनैतास्तृप्यन्ति।" इति श्रुतिवाक्यमनुसन्धेयम् ।
3. **अन्यभुक्तान्नेन**—प्राणभुक्तान्नेन।
4. **अन्यतृप्त्ययोगात्**—वागादीनां तृप्तेरयोगात् ।
5. **उद्ग्रन्थं**—ग्रन्थानारूढम्।
6. **मृत्तिका**—संस्कृता मृत् ।

स्वाम्यर्थ एव चोत्तम्भः तृप्तिरापूर एव च ।
ततस्तु या सुखोद्भूतिः विज्ञानात्मन एव सा ॥ (256)

ता एता देवताः सप्तदश ज्ञानक्रियात्मिकाः ।
सोऽयं सप्तदशग्रामः भोक्तुः करणलक्षणः ॥ (257)

बुद्धीन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाण्यपि ।
वायवः पञ्च बुद्धिश्च मनः सप्तदशं विदुः ॥ (258)

अपास्ताध्यात्मरूपाणां देवतानां समाश्रयः ।
भूतपञ्चकमेवेदं साधारण्याद्भवेत्सदा ॥ (259)

* पयोऽम्भोवदिदं लिङ्गं नानारूपैः समन्वितम् ।
आविर्भावतिरोभावैः कारणात्मनि वर्तते ॥ (260)

कत्वापत्तिः, इत्यत्राह—**स्वामीति** । उत्तम्भः—स्थितिः, तृप्तिः—(पु)[तु]ष्टिः, आपूरः—उपचयः वृद्धिः, इत्येतदन्नरसपरिणामकार्यं कार्य[1]करणसंघातार्थमित्यर्थः । तर्हि तन्निमित्तं सुखमपि [2]तस्यैवेति भूतात्मवादप्रसङ्गः, अत्राह—**ततस्त्विति** । (256) अणिष्ठो रसः यासां देवतानां तृप्तिकरः, ताः कति, इत्यत्राह—**ता इति** । करणग्रामस्य [3]शेषित्वात् स्वातन्त्र्यप्रसक्तिः, अत्राह—**सोऽयमिति** । (257) कानि तानि, इत्यत्राह—**बुद्धीति** । (258) देवताशब्देन करणसमुदायोपादाने तस्य स्थूलदेहाश्रयत्वात् [4]तन्नाशे नाशात् मुक्तिरेव स्यात्, अत्राह—**अपास्तेति** । (259) भूतपञ्चकस्यापि कार्यत्वेनाकारणत्वात् न करणग्रामाश्रयत्वमिति चेत्, तर्हि मूलकारणमेवाश्रयः, इत्याह—**पयोऽम्भोवदिति** । (260)

---

1. **कार्यकरणसङ्घातार्थमिति** 'स्वाम्यर्थः' इति वार्तिकांशविवरणं बोध्यम् ।
2. **तस्यैव**—कार्यकरणसङ्घातस्यैव ।
3. **शेषित्वात्**—प्रधानत्वात् ।
4. **तन्नाशे**—स्थूलदेहनाशे ।

* **पयोऽम्भोवदिति** यथा पयसः क्षीरस्य अम्भसश्च दध्यादिना हिमादिना च नानारूपत्वम्, एवमिदं सप्तदशकं लिङ्गं समष्टिव्यष्ट्यात्मकं नानाविधाकारोपेतं कालभेदेन आविर्भावतिरोभावाभ्यां मूलकारणे तिष्ठतीत्यर्थः ।

* कूटस्थबोधतन्मोहचिदाभासैकमात्रया ।
जाग्रत्स्वप्नावयं पीत्वा ह्यास्ते प्राणात्मना प्रभुः ॥ (261)

अपास्ताशेषबाह्यार्थः तज्जवासनयाश्रितः ।
अभ्यस्तप्रत्यगज्ञानः विरिञ्चः पर उच्यते ॥ (262)

* जाग्रत्काले विशेषेण स्थित्वा हृदयसद्मनि ।
द्वासप्ततिसहस्राणि नाडीर्व्याप्यावतिष्ठते ॥ (263)

तत् मूलकारणं प्रधानमेव नात्मा, इत्यत आह—कूटस्थेति । [1]निर्विकार-चैतन्याश्रयविषयो मोहः कूटस्थबोधतन्मोहः । [2]कूटस्थबोधे तस्य मोहः इति व्युत्पत्तेः । (सू [त]त्र चिदाभासः—चैतन्यप्रतिबिम्बः, तदेकरूपतया मीयते इति मात्रा । तया साभासाविद्यामात्रत्वेन [3]अवस्थाद्वयं संहृत्य, [4]संप्रसादे प्राज्ञात्मना वर्तते इत्यर्थः । (261) [5]मकारवाच्यमुक्तम् । इदानी[6]मुकारवाच्यः सूत्रात्मापि पर एव, इत्याह—अपास्तेति । (262) तथापि अकारवाच्यस्य विश्वस्य ततोऽन्य-त्वात् नाद्वैतसिद्धिः, अत्राह—जाग्रदिति । (263) अवस्थात्रयानुगतस्य संवा-

---

1. **निर्विकारचैतन्याश्रयविषयमोहः**—निर्विकारचैतन्यं आश्रयः विषयश्च यस्य तादृशो मोहः । तादृशचैतन्याश्रितः तादृक्चैतन्यविषयकः मोहः इति यावत् ।
2. **कूटस्थबोधतन्मोहपदात्** तदर्थलाभप्रकारमाह—**कूटस्थबोधे तस्य मोहः इति व्युत्पत्तेरिति** अत्र तच्छब्देन कूटस्थबोधोक्तेः तादृशबोधविषयकः मोहः लब्धः । सप्तमीसमासेन तादृशबोधाश्रितत्वमपि लभ्यते इति भावः ।
3. **अवस्थाद्वयं**—जाग्रत्स्वप्नावस्थाद्वयम् ।
4. **संप्रसादे**—सुषुप्तौ ।

* "**कूटस्थेति** निर्विकारस्य चिदात्मनः तादृगनिर्वाच्यः यो मोहः तेन चिदाभासः यस्यां मोहरचितायामविद्यायां सा तथा । सा चैका दण्डायमानत्वेनावच्छिन्नाः सा च भीयमानशब्दादिनिदानतया तदात्मिका । तया स्थानद्वयं तत्कार्यं चोप-संहृत्यायमीशः स्वापे कारणात्मना वर्तते ।" इति **शास्त्रप्रकाशिका** ।

5. **मकारवाच्यमिति** अकारोकारमकारसमुदायात्मकप्रणवघटकमकारस्य वाच्य-मित्यर्थः ।
6. **उकारवाच्य इति** प्रणवघटकेत्यादिः । एवमुत्तरत्रापि ।

* **जाग्रत्काल इति** जाग्रत्काले स्थूलानर्थान् भुञ्जानः स्थूलाभिमानी **विश्वपदव्य-पदेश्यः** सन् परमात्मैव विराडात्मना तिष्ठतीत्यर्थः ।

स एष परमात्मैव स्वात्ममोहसहायवान् ।
प्राणात्मना करोत्येषः पश्यत्यग्न्यात्मना तथा ॥ (264)

इन्द्राग्नी ताविमावुक्तौ प्राण इन्द्रस्तथोमतः ।
प्रकाशकत्वाद्वागग्निरेवमेकः प्रजापतिः ॥ (265) *

अत्राद्यभेदतो द्वौ वा यदि वाऽध्यर्ध उच्यते ।
यदि वायं त्रयस्त्रिंशत् द्वासप्ततिरथापि वा ॥ (266)

अनन्तभेदभिन्नो वा एक एवात्र उच्यते ।
सर्वोऽप्येष विकल्पश्च पुनरेकैकशस्तथा ॥ (267)

रिणः परस्मादन्यत्वमाशङ्क्य [1]वाक्यभूतप्रणवलक्ष्यं प्रत्यग्ब्रह्मणोरेकत्वमाह—स एष इति । कारणत्वेन सूत्रत्वेन विराडात्मत्वेन च परमात्मैव प्राणरूपेण कर्ता, अग्निरूपेण ज्ञातेत्यर्थः । (264) [2]इन्द्रात्मना करोतीति वाच्ये, प्राणात्मनेत्ययुक्तमुक्तम्, वागादिकरणग्रामद्वारा दर्शनशक्तिप्रसिद्धेः अग्न्याद्यात्मना पश्यतीत्यप्ययुक्तम्, अत्राह—इन्द्राग्नी इति । (265) क्रियाविज्ञानशक्तिरूपेण [3]प्राणशब्दस्यावस्थानेऽपि नाद्वैतसिद्धिः, अत्त्रादिभेदात्, अत्राह—(अ)[अत्राद्येति । अत्ता अग्निः, आद्यं सोमः इत्यत्त्राद्यभेदः । अधि अर्धं यत्र सोऽध्यर्थः । प्राण एको जगदर्धमित्यर्थः । अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः, इन्द्रः, प्रजापतिरिति त्रयस्त्रिंशत् । त्रयस्त्रिंशतो देवानामवान्तरभेदेन द्वासप्ततिः । (266) किमवान्तरसंख्यानिवेशेन । मायावशादेक एव अनन्तधा विकल्प्यते, इत्याह—अनन्तेति । (267-268) भिन्नाभिन्नत्वात् पदार्थानां कथमद्वैतसिद्धिः,

---

1. वाक्यभूतप्रणवलक्ष्यमिति ओमिति पदं योगरूढम्, विश्वतैजसप्राज्ञाः क्रमेण अकारोकारमकाराणामर्थाः, अकारादिसमुदायस्य वाक्यभावापन्नस्य तुरीयं प्रत्यग्ब्रह्मैक्यमर्थः, इति वेदविदां सिद्धान्तः ।
2. इन्द्रात्मना करोतीति वाच्ये इति या काचित् बलकृतिः इन्द्रकर्मैव तदित्युपगमादिति भावः ।

* एवमेकः प्रजापतिरिति उक्तरीत्या क्रियाशक्तिमद्रूपेण कर्ता, ज्ञानशक्तिमद्रूपेण ज्ञातेति, एकः परमात्मैव सूत्रदेहमापन्नः कर्त्राद्यात्मना तिष्ठतीत्यर्थः ।

3. प्राणशब्दस्य—प्राणशब्दितस्य ।

देवासुरादिभेदेन जातिरूपक्रियागुणः ।
एकैकोऽनन्ततां याति पुनरेकात्मतामतः ॥ (268)

* समस्तव्यस्ततैवेह प्रत्यगज्ञानभूमिका ।
नत्वपास्तसमस्तान्ध्ये नेति नेति परात्मनि ॥ (269)

* सर्वेणैव विकल्पेन यथोक्तेनावतिष्ठते ।
यथाधिकारं सर्वत्र परो जगति सर्वथा ॥ (270)

न हि कृत्स्नमनादाय जगदेतन्मनागपि ।
क्रियायै कारकं किंचित् तस्मात्सर्वात्मनेहते ॥ (271)

कारणात्मा जगत्कृत्स्नं श्रौतदर्शनसाधनः ।
यतः प्रागकरोत्कर्म तत्कार्येऽपि तथा ततः ॥ (272)

अत्राह—समस्तव्यस्ततेति । (269) यत् यथा भाति तत्तथैवेत्युत्सर्गात् द्वैतमेव पारमार्थिकं किं न स्यात्, अत्राह—सर्वेणेति । यथाधिकारं - तत्तत्स्थानम[न]तिक्रम्येति यावत् । विगीतं स्वानुगतैकस्मिन् कस्मिंश्चित् कल्पितं विभक्तत्वात् रज्ज्वां सर्पधारादिवदित्यर्थः । (270) उक्तप्रयोगस्यानुग्राहकतर्कमाह—न हीति । कर्त्रादीनां मध्ये किञ्चिदपि कारकं जगदेतत् सहायत्वेनानुपादाय क्रियायै—क्रियासिद्ध्यर्थं न भवति । हि—मधुब्राह्मणे प्रसिद्धमेतत् । अत्यन्तभेदे [1]तदयोगात् [2]सर्वात्मना—परमात्माभेदेनैव चेष्टते इत्यर्थः । (271) सर्वस्य सर्वकारणत्वे युक्त्यन्तरमाह—कारणात्मेति । हिरण्यगर्भः समस्तं जगत् श्रौतकर्मज्ञानसाधनः सर्वपदार्थनिष्पन्नसाधनत्वात् यथा असाक्षीत् । तथा तत्कार्यं जगदपि सर्वमादाय

---

* समस्तव्यस्ततेति अज्ञानाश्रिता समस्तव्यस्तता प्राणात्मन्येव । न तु निरस्ताविद्ये प्रज्ञानघने परात्मनीत्यर्थः ।

* "तर्हि सूत्रस्य परस्य च सर्वात्मत्वात् द्वौ सर्वात्मानौ स्यातामित्याशङ्क्याह—सर्वेणेति सर्वत्र जगति तत्तदधिकारस्थानमनतिक्रम्य, परमात्मैव उक्तानुक्तसर्वविशेषात्मना तिष्ठति । अतः तस्यैव सर्वप्रकारेण स्थितिरिति कुतः सर्वात्मद्वयमित्यर्थः ।" इति शास्त्रप्रकाशिका ।

1. तदयोगात्—सहायत्वायोगात् ।
2. सर्वपदार्थनिष्पन्नसाधनत्वादिति सर्वपदार्थैः निष्पन्नं साधनं यस्य, तत्त्वादित्यर्थः ।

एकापूर्वप्रयुक्तत्वात्समस्तव्यस्तरूपिणाम् ।
सर्वः सर्वमुपादाय सर्वत्रातः प्रवर्तते ॥ (273)

* अध्यात्माद्यधिभूताधिदैवतं सर्वदाखिलम् ।
सर्वं सर्वक्रियाः कुर्यादेकापूर्वप्रयुक्तितः ॥ (274)

* यतः प्रजापतिः पूर्वमेतस्मिन् दर्शने स्थितः ।
यज्ञेन कर्मणाऽस्राक्षीज्जगदेतच्चराचरम् ॥ (275)

नाड्योऽस्य रश्मयोऽनन्ता हृदयं मण्डलं रवेः ।
अहोरात्राणि तावच्च शतसंवत्सरायुषः ॥ (276)

एतया संपदा पूर्वं यजमानेन तद्विदा ।
अग्नयोऽर्काश्चिता आसन् षट् च त्रिंशत्सहस्रशः ॥ (277)

कार्यं करोतीत्यर्थः । (272) सर्वस्य सर्वकारणत्वे अनुमानमाह—एकेति । हिरण्यगर्भस्यैक[स्य]साधकावस्थायामपूर्वं, एकापूर्वम् । तेन प्रसूतं जगत् । अतः [वि]मतं परस्परसहकार्यपेक्षमेव कार्य)प)[क]रं एकापूर्वप्रसूतत्वात् देवदत्तशरीरभागवदित्यर्थः ।(273) भोगसाधनत्वमुपाधिः, इत्याशङ्क्य, अदृष्टसृष्टं भोगसाधनमेवेति साधनव्याप्तिमाह—अध्यात्मेति । आदिपदेनावान्तरभेदग्रहणम् । (274) एकापूर्वप्रयुक्तत्वहेतोरसिद्धिमाशङ्क्य, श्रुतिगम्योऽयमर्थः, इति परिहरति—यत इति । (275) किं [1]दर्शनं, [तदाह] ना(ग्र)[ड्य] इति । अस्य—यजमानस्य, अनन्ता नाड्यो रश्मयः, नाडीषु [2]रश्मिदृष्टिः कार्या, हृदये सूर्यम[3]ण्डलदृष्टिः कार्या पूर्वं यजमानेन चिता इष्टकाः अग्न्यर्कशब्दवाच्याः षट्त्रिंशत्सहस्राणि आसन् । शतायुषः पुरुषस्य अहोरात्रा अपि तावन्तः । एतया संपदा—संख्यायो[गे]न,

---

* "तदेव (पूर्ववार्त्तिकोक्तमेव) व्यनक्ति-अध्यात्मेति ।" इति शास्त्रप्रकाशिका ।

* पूर्वं साधकावस्थायाम् ।

1. किं दर्शनमिति 'एतस्मिन् दर्शने स्थितः' इति वार्त्तिकोक्तं दर्शनं कीदृशमित्यर्थः ।
2. रश्मिदृष्टिःकार्येति आनन्त्यसाम्यात् ।
3. सूर्यमण्डलदृष्टिरिति एकत्वसाम्यात् ।

एकैकस्मिन्परिस्पन्दे एवं सर्वापि देवता ।
एका चानेकरूपा च ह्यध्यात्मादिविभागतः ॥ (278)

विभ्वी सर्वगतानन्ता समाप्ता च प्रतिक्रियम् ।
प्रतिद्रव्यफलं कृत्स्ना खण्डादौ गोत्ववत् स्थिता ॥ (279) *

एष प्रजापतेरुक्तो महिमा तद्वदेव तु ।
यजमानोऽपि तादात्म्यात्तथैव भवति ध्रुवम् ॥ (280)

गुणोपास्तिफलोक्त्यर्थमेवं हेति श्रुतिः परा ।
यथोक्तार्थमुपासीनं प्रति प्रवर्तेऽधुना ॥ (281)

वागाद्योऽभिसंविष्टा जीवनार्थमन्नं यथा ।
ज्ञातयोऽभिविशन्त्येवं तद्विदं जीवनार्थिनः ॥ (282)

तद्विदा—संख्यासामान्यविदा, यजमानेन अग्न्यर्कशब्दवाच्यासु इष्टकासु [1]अहोरात्रदृष्टिः कार्येत्यर्थः । (276-277) परस्य सर्वात्मत्वमुपपादितमुपसंहरति—एकैकस्मिन्निति । यस्मात्सर्वं सर्वस्य कार्यं कारणं च तस्मादेकैकस्मिन् परिस्पन्दे व्यपारे सर्वा - प्राणदेवता स्थितेत्यर्थः । तदेव विशदयति—अध्यात्मादीति । एकत्र समाप्तत्वे अन्यत्रावस्थानं न स्यात्, अत्राह—खण्डादाविति । (278-279) प्रजापतेरुक्तमाहात्म्यानुवादेन तदुपासकस्यापि [2]तद्दर्शयति—एष इति । (280)

'एवं ह वा' इत्यादिश्रुत्यर्थनिरूपणम्

'[3]एवं ह वा एनम्' इत्यादेस्तात्पर्यमाह—गुणेति । (281) अक्षरार्थ-

---

1. अहोरात्रदृष्टिः कार्येति अहोरात्रेषु इष्टकादृष्टिः इति भाव्यम् । तथाचोक्तं ध्यानमभ्यस्यन् यजमानः स्वकर्म प्राणिकर्म चानुसरन् स्वफलभूतं जगत् सृष्टवानिति भावः ।

* खण्डादाविति खण्डादिव्यक्तौ प्रत्येकं परिसमाप्तस्यापि गोत्वस्य यथा अन्यत्र व्यक्ताववस्थानं, तथेत्यर्थः ।

2. तद्दर्शयति—उक्तमाहात्म्यं दर्शयति ।

3. एवं ह वेति । "एवं ह वा एनं स्वा अभिसंविशन्ति भर्ता स्वानां श्रेष्ठः पुर एता भवति, अन्नादोऽधिपतिः य एवं वेद ।" इति श्रुतिः ।

भर्ता च संनिविष्टानां श्रेष्ठश्च गुणतो भवेत् ।
यथोक्तगुणवैफल्यं पुर एता न चेद्भवेत् ॥ (283) *

सर्वमेतद्वृथैव स्यात् न चेद्दीप्ताग्निमान् भवेत् ।
अन्नाद इत्यतो वक्ति साफल्यप्रतिपत्तये ॥ (284)

द्विषत्सु स्वेषु च न चेदाधिपत्यं तथापि च ।
प्रोक्तवैफल्यमाशङ्क्य ह्याहाधिपतितां फलम् ॥ (285)

प्राण आत्मेत्युपासीनो यथोक्तं फलमश्नुते ।
तज्ज्ञातयोऽपि फलिनो यथा वागादयस्तथा ॥ (286)

प्राणसंस्पर्धिनो यद्वद्विनेशुरसुरास्तथा ।
प्राणविद्विद्विषः सर्वे नालं भार्येभ्य एव च ॥ (287)

उद्बुभूषति यो द्वेषात् स्वेषु प्राणविदं प्रति ।
प्रतिस्पर्धी न सोऽलं स्यात् भरणाय कथं च न ॥ (288)

माह—**वागादय इति** । (282) भर्तृत्वादौ सति पुरोगन्तृत्वमकिंचित्करत्वात् न वक्तव्यम्, अत्राह—**यथोक्तेति** । (283) अन्नादत्वमनपेक्षितत्वान्न वाच्यम्, अत्राह—**सर्वमिति** । (284) अधिष्ठाय पालनसामर्थ्यमाधिपत्यम् । तस्यापि संकीर्तनीयत्वं व्यतिरेकद्वारा उपपादयति—**द्विषत्स्विति** । (285) सुखप्रतिपत्त्यर्थमुक्तं संक्षिप्याह—**प्राण इति** । (286) "[1]य उ हैवं विदम्' इत्यादि वाक्यतात्पर्यमाह—**प्राणसंस्पर्धिन इति** । (287) एतदेव स्फुटयितुं 'प्रतिबुभूषति' इत्येतद्योजयति— **उद्बुभूषतीति** । (288) भर्तृत्वाभाववचनं

---

* **पुर एता**—अग्रगण्य इति यावत् ।

1. **य उ हैवंविदमिति** "य उ हैवंविदं स्वेषु प्रतिबुभूषति, न हैवालं भार्येभ्यो भवति, अथ य एतमनु भवति, यो वैतमनु भार्यान् बुभूषति स हैवालं भार्येभ्यो भवति ।" इति श्रुतिः । **नालं भार्येभ्यो भवतीति** स्वेन भरणीयानां भरणाय न समर्थो भवतीत्यर्थः ।

नासौ श्रेष्ठः पुरोगन्ता नान्नादोऽसुखद्भवेत् ।
न च ज्ञातिष्वधिपतिः स्पर्धमानोऽनवेदिना ॥ (289) *

सोऽयास्याङ्गिरसः प्रोक्तः तत्रायास्यो यथा तथा ।
निर्णीतः प्रागथेदानीमाङ्गिरसत्वविनिर्णयः ॥ (290)

पूर्वोक्तस्यानुवादोऽयं सोऽयास्येत्याद्युपक्रमः ।
श्रुत्याऽङ्गिरसत्वसिद्ध्यर्थमुच्यते न्यायपूर्वकम् ॥ (291)

सिद्धोऽङ्गानां रसः प्राणः, प्राणोऽङ्गानां रसः कथम् ।
हीति हेतावतः प्राह तद्व्याख्यानाय चोत्तरः ॥ (292)

श्रेष्ठत्वाद्यभावोपलक्षणम् । प्राणविदः श्रैष्ठ्यादेरुक्तत्वात् तद्द्वेष्टुः तदभावस्य युक्तत्वात्, इत्याह—**नासाविति** । (289)

व्यवहितेन संबन्धकथनपूर्वकमेकोनविंशकण्डिकार्थनिरूपणम्
प्राणस्याङ्गिरसत्वप्रतिपादनम्

'सोऽ[1]यास्य आङ्गिरसः' इत्याद्युत्तरवाक्यं न व्याख्येयम्, **अन[2]न्तरश्रुत्या संबन्धाभावात्**, इत्याशङ्क्य, [3]व्यवहितेन संबन्धमाह—**स इति** । (290) तर्हि 'अङ्गानां हि रसः' इत्यादि(भि)रेवारभ्यताम्, [4]किं पूर्वेण, अत्राह—**पूर्वोक्तस्येति** । (291) अक्षरार्थमाह—**सिद्ध इति** । तत्र प्रमाणं पृच्छति—**प्राण इति** । हिशब्दोक्ता प्रसिद्धिरेव मानम्, इत्याह—**हीति हेताविति** । काऽसौ प्र(ति)सिद्धिः, अत आह—**तद्व्याख्यानायेति** । (292)

---

* **अनवेदिना**—प्राणोपासकेन ।

1. **सोऽयास्य इति** ''सोऽयास्य आङ्गिरसः अङ्गानां हि रसः, प्राणो वा अङ्गानां रसः, प्राणो हि वा अङ्गानां रसः । तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति, तदेव तच्छुष्यति, एष हि वा अङ्गानां रसः ।'' इति श्रुतिरनुसन्धेया ।
2. **अनन्तरश्रुत्या**—अव्यवहितपूर्वश्रुत्या ।
3. **व्यवहितेनेति** 'अयमास्येऽन्तरिति सोऽयास्य आङ्गिरसः अङ्गानां हि रसः' इति अष्टमकण्डिकयेति यावत् ।
4. **किं पूर्वेणेति** 'सोऽयास्य आङ्गिरसः' इति वाक्यं किमर्थमित्यर्थः ।

* **तद्व्याख्यानाय**—प्रसिद्धिव्याख्यानाय । **उत्तरः**—'तद्यस्मात्कस्मात्' इत्यादिभागः ।

यस्मात्कस्माच्चिदङ्गाद्धि प्राण उत्क्रामतीह नुः ।
नीरसं सत्तदेवाङ्गमाशु शुष्यति तत्र च ॥ (293)

* यत एवमिदं दृष्टमन्वयव्यतिरेकतः ।
तस्मादाङ्गिरसः प्राणो ज्ञेय आत्मेति पण्डितैः ॥ (294)
कार्यस्य रूपभूतस्य कर्मणः करणस्य च ।
न केवलं प्राण आत्मा नाम्नोऽप्यात्मेति भण्यते ॥ (295)
एवं सर्वात्मकत्वेन स्तुवन्प्राणं प्रयत्नतः ।
आदरं कुरुते शास्त्रमुपास्यत्वाय देहिनाम् ॥ (296)
बृहस्पत्यादिभिर्धर्मैरसोरन्यदुपासनम् ।
विशिष्टमभिधित्स्वाह शास्त्रं पूर्ववदेव च ॥ (297)

---

[1]तत् व्याचष्टे—यस्मादिति । नुः—नरस्य । (293) उपसंहरति—यत इति । (294)

विंशैकविंशकण्डिकार्थनिरूपणम्
प्राणस्य बृहस्पतित्वं ब्रह्मणस्पतित्वं च

[2]एष उ एव' इत्यादेस्तात्पर्यमाह—कार्येति । आङ्गिरसत्वप्रतिपादनेन [3]कार्यकरणात्मत्वं प्रतिपादितम् । शब्दराशेरप्यात्मेति स्तुत्यर्थं प्रतिपाद्यते इत्यर्थः । (295) स्तुतिः किमर्था, तत्राह—एवमिति । (296) वाक्यस्य तात्पर्यान्तरमाह—बृहस्पत्यादिभिरिति । (297) पुनरपि वाक्यस्यार्थान्तरमाह—वागिति । वाचः प्राणमात्रत्वात् प्राण एवोद्गीथदेवता न वागिति [4]प्रतिपादनार्थान्तरा स्तुति-

---

1. **तत्**—उत्तरवाक्यम् ।

* **अन्वयव्यतिरेकतः**—सति प्राणे हस्ताद्यङ्गं रसवत्, असति नीरसमित्यन्वयव्यतिरेकाभ्याम् ।

2. **एष उ एवेति** 'एष उ एव बृहस्पतिः । वाग्वै बृहती तस्या एष पतिः । तस्मादु बृहस्पतिः ।' इति श्रुतिः ।

3. **कार्यकरणात्मत्वमिति** समस्तजगदात्मकत्वं प्राणस्य विवक्षितम् । जगच्च नामरूपक्रियास्वरूपम् । तत्र कार्यात्मत्वेन रूपात्मकत्वं, करणात्मत्वेन क्रियात्मत्वं चोक्तम् । नामात्मत्वप्रतिपादनाय उत्तरं कण्डिकात्रयमिति भावः । **वाक्यस्य**—'एष उ एव बृहस्पतिः' इत्यादिकस्य । एवमुत्तरत्रापि ।

4. **प्रतिपादनार्थान्तरा**—प्रतिपादनं अर्थान्तरं—प्रयोजनान्तरं यस्याः सा तथा ।

वाग्व्यापृततमा दृष्टा यत उद्गीथकर्मणि ।
देवता सैव न प्राण इत्याशङ्क्येदमुच्यते ॥ (298)
कौष्ठ्याग्निप्रेरितो वायुर्नानास्थानसमाहतः ।
वर्णतामेति येनातः प्राण एव बृहस्पतिः ॥ (299)
* यजुर्ब्रह्मेति श्रवणादन्ते साम्नो ग्रहादपि ।
ऋग्यजुःसामनिर्देशः क्रमेणेति प्रतीयते ॥ (300)
सेति वाचोऽभिधानं स्यादमः प्राणाभिधा तथा ।
सामोभयं समुदितं गुणप्राधान्यरूपतः ॥ (301)

रित्यर्थः । (298) वाक्प्राणयोरपर्यायशब्दवाच्ययोः कथमेकत्वम्, अत्राह— **कोष्ठ्येति** । कोष्ठनिष्ठिताग्निना प्रेरितो वायुरूर्ध्वं गच्छन् उरःप्रभृतिभिः स्थानैरभिहन्यमानः पञ्चाशद्वर्णभेदेन व्यज्यते इत्यर्थः । (299) बृहस्पतिशब्दस्य सुरगुरौ रूढत्वात् [1]स एव परिगृह्यताम्, अत्राह—**यजुरिति** । [2]उत्तरवाक्ये 'वाग्वै ब्रह्म' इति [3]यजुःश्रवणात् तत्र यजुष्पतित्वं - ब्रह्मणस्पतित्वमुक्तमिति, तदनुसारादत्र बृहस्पतित्वं ऋक्पतित्वमित्यर्थः । [4]तत्रापि ब्रह्मशब्दो(ह्म)[निरुक्ता]दर्थान्तरपरः, इत्यत्राह—**अन्त इति** । (300)

द्वाविंशकण्डिकार्थनिरूपणम्

प्राणस्य सामत्वम्

'एष उ एव साम' इत्यत्र सामपदार्थमाह—**सेति** । वाचः स्त्रीलिङ्गत्वात् सेत्यभिधानं, प्राणस्य पुंलिङ्गत्वात् अम इत्यभिधेत्यर्थः । समस्तसामपदस्य किमभिधेयमित्याशङ्क्य, वागुपसर्जनः प्राणः साम, इत्याह—**सामेति** । (301)

---

1. **स एव**—सुरगुरुरेव ।
2. **उत्तरवाक्ये**—"एष उ एव ब्रह्मणस्पतिः । वाग्वै ब्रह्म तस्या एष पतिः, तस्मादु ब्रह्मणस्पतिः ।" इति वाक्ये ।
3. **यजुःश्रवणादिति** 'वाग्वै ब्रह्म' इत्यत्र ब्रह्मशब्दस्य यजुरर्थ इति भावः ।
4. **तत्रापि**—'वाग्वै ब्रह्म' इत्यत्रापि ।

* अन्ते इति वाक्यशेषे प्राणस्य सामात्मकत्वोक्तेः, उपक्रमेऽपि तस्य यजुरादिरूपता विवक्षितेति भावः । "एष उ एव साम । वाग्वै सा अमैषः सा चामश्चेति । तत्साम्नः सामत्वम् ।" इति श्रुतिः ।

एकार्थवृत्तिता यस्मात्तेनैकवचनं कृतम् ।
शब्दयोः सामयोस्तस्मात्प्राणः सामाभिधीयते ॥ (302)

इतरस्यापि सामत्वं प्राणनिर्वर्त्यतो मतम् ।
प्राण एव ततः साम युक्तो वागुपसर्जनः ॥ (303)

निःशेषभूतसाम्याद्वा साम प्राणोऽभिधीयते ।
प्रत्यगज्ञानहेतुत्वात्तज्ज्ञस्यानन्त्यमुच्यते ॥ (304)

अतिसूक्ष्मशरीरा हि पुत्तिका प्लुषिरुच्यते ।
पुत्तिकादिशरीरेण समः प्राणस्तदाश्रयात् ॥ (305)

मशकेभविराड्देहैः समः प्राणो यथोदितः ।
* तथा हैरण्यगर्भेण लिङ्गात्मा सम एव तु ॥ (306)

गुणप्रधानभावेऽपि वाक्प्राणयोर्भेदात् कथमेकवचनप्रयोगः, अत्राह— **एकार्थेति ।** वागुपसर्जनैकस्मिन्प्राणे [1]सामशब्दयोः वृत्तिर्यस्मात्, तेन सामेत्येकवचनमित्यर्थः । (302) 'गीतिषु सामाख्या' (पू. मी. 2-1-36) इति जैमिनिना [2]अन्यस्यैव सामत्वमुक्तम्, अत्राह—**इतरस्यापीति** । (303) [3]'यद्वेव समः प्लुषिणा' इत्यादिवाक्यतात्पर्यमाह—**निःशेषेति** । सर्वैः समत्वात् सामत्वमित्यर्थः । सर्वसमत्वेन प्राणस्यानन्त्यप्रतिपादनात् ब्रह्मणस्तन्न स्यात् अनन्तद्वयायोगात्, अत्राह—**प्रत्यगिति** । आपेक्षिकमिति शेषः । (304) 'समः प्लुषिणा' इत्ये[त]दर्थमाह—**अतिसूक्ष्मेति** । (305) 'समो(न)[4][म]शकेन' इत्यादिवाक्यं दृष्टान्तत्वेन योजयति—**मशकेति** । 'समोऽनेन सर्वेण' इति दार्ष्टान्तिकः इत्याह—**तथेति** । प्राणसूत्रात्मनोरेकत्वेऽपि गगनं गगनोपममितिवदुपमानो-

---

1. **सामशब्दयोः**—साशब्दः अमशब्दश्चेति द्वयोः ।
2. **अन्यस्यैव**—प्राणान्यस्य गानविशेषस्यैव ।
3. **यद्वेव सम इति** "यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः, समोऽनेन सर्वेण, तस्माद्वेव समः ।" इति श्रुतिरनुसन्धेया ।
4. **समो मशकेन इत्यादिवाक्यं**—समो मशकेन, समो नागेन, सम एभिः त्रिभिर्लोकैः, इति वाक्यत्रयम् ।

* '**लिङ्गात्मेति** क्रियाशक्तिमतो ज्ञानशक्तिमता साम्यमिति भावः ।' इति **शास्त्रप्रकाशिका** ।

वाय्वात्मनि समाप्तत्वात्करणानामशेषतः ।
सर्वदेहसमत्वं स्यात्प्राणिकर्मानुरूपतः ॥ (307)

प्रतिप्राणि परिच्छेदो ज्ञानकर्मानुरोधतः ।
धर्माधर्मानपेक्षः सन्नानन्त्येनावतिष्ठते ॥ (308)

* साम्न आप्नोति सायुज्यमैकात्म्यं प्राणरूपताम् ।
समानलोकताऽनेन सालोक्यमिति शब्द्यते ॥ (309)

विकल्पासंभवाद्विद्वानश्नुतेऽतः फलद्वयम् ।
* वैचित्र्याद्भावनादेर्वा त्रिविधं फलमुच्यते ॥ (310)

भूयोऽल्पीयःफलत्वं चेत्तुल्यसाधनयोर्न तत् ।
योगैश्वर्यात्समा सिद्धिः कालादेरीश्वरादतः ॥ (311)

प्रमेयभावोपपत्तिरिति भावः । (306) प्रा(स)[ण]स्य सर्वसमत्वे हेतुमाह—**वाय्वात्मनीति** । एकस्य सूत्रस्य कथं तत् विरुद्धपरिमाणयोगित्वम्, अत्राह—**सर्वेति** । (307) प्राणिकर्मानुरूपत्वे नास्ति प्रमाणम्, इत्यत आह—**प्रतिप्राणीति** । 'यथाकर्म यथाश्रुतम्' (का. 5·7) इति श्रुतिरत्र मानमित्यर्थः । परिच्छेदवत् आनन्त्यमपि जन्यकर्मनिमित्तत्वादनवस्थितम्, अत्राह—**धर्मेति** । (308)

'[1]अश्नुते साम्नः' इत्यादिफलवचनार्थमाह—**साम्न इति** । ऐकात्म्यं जीवब्रह्मणोरिव स्वरूपैक्यं न भवति, किन्तु समानशरीरेन्द्रियभागित्वम्, इत्याह—**प्राणरूपतामिति** । (309) सार्ष्टिसहितं सालोक्यं सायुज्यं च फलं शास्त्रप्रामाण्यात् एकरूपोपासनादेव स्यात्, इति शङ्कते—**विकल्पेति** । उपासनातारतम्यादेव फलभेदः, कार्यवैचित्र्यस्य कारणवैचित्र्याधीनत्वात्, इति परिहरति—**वैचित्र्यादिति** । (310) कारणवैचित्र्यस्याश्रुतस्य कल्पनायां गौरवप्रसङ्गात्

---

1. **अश्नुते इति** 'अश्नुते साम्नः सायुज्यं सलोकतां य एवमेतत्साम वेद ।' इति फलश्रुतिः ।

* **अनेन**—प्राणेन सूत्रात्मना ।
"प्रसिद्धसामतादात्म्यं व्यावर्तयितुमैकात्म्यमाचष्टे **प्राणरूपतामिति**" इति **शास्त्रप्रकाशिका** ।

* '**वैचित्र्याद्भावनादेर्वा**' इत्यत्र वाकारः शङ्कानिरासद्योतकः ।

एकमेव जगद्बीजमीशाभिप्रायहेतुतः ।
भूरिनानाप्रभेदेन प्रत्यात्मं व्यवतिष्ठते ॥ (312)

कुर्यान्मेरावणुधियमणौ मेरुधियं तथा ।
सर्वत्राप्रतिघात्येव प्रत्यगज्ञो महेश्वरः ॥ (313)

* अतत्त्वज्ञस्य तमसो रज्ज्वज्ञानोरगादिवत् ।
अष्टावस्थाप्रभेदेन मिथ्याज्ञानं प्रजायते ॥ (314)

* प्रत्यगज्ञानविध्वस्तौ रज्ज्वज्ञानहताविव ।
तत्कल्पितनिवृत्तिः स्यादष्टावस्थस्य बोधतः ॥ (315)

---

[1]एकरसमेवोपासनम्, इति शङ्कते—**भूय इति** । कारणस्य वैचित्र्याभावे कार्यवैचित्र्यस्याकस्मिकत्वापातः, इति परिहरति—**न तदिति** । हेतुमाह—**योगेति** । कालस्यादिः—कालादिः, ईश्वरः—हिरण्यगर्भः । तस्मात् उपासकानां योगैश्वर्यात्—ज्ञानकर्मातिशयात्, समा सिद्धिः—उत्कृष्टज्ञानकर्मसामर्थ्यात् संसिद्धिः—सायुज्यम् । अधमयोः ज्ञानकर्मणोः आसिद्धिः—अल्पफलम्, सालोक्यम् । मध्यमयोः मध्यमफलं (स्पष्टी)[सार्ष्टिः]भवति यस्मादित्यर्थः । (311) हेतुफलवैचित्र्यमद्वैतवादे न स्यात्, अत्राह—**एकमेवेति** । जगन्मूलमज्ञानं [2]चैतन्याभासखचि(तिं)[तं] साधनादिभेदेन [3]विवर्तते इत्यर्थः । (312) अज्ञानमप्यविद्यमानं कथमुत्पादयेत्, अत्राह—**कुर्यादिति** । (313) सर्वस्य विकारस्य कल्पितत्वमसिद्धं, [4]शरीरेन्द्रिय-

---

1. **एकरसमेवोपासनं**—एकरूपमेव प्राणोपासनम् ।
2. **चैतन्याभासखचितमिति** ईशाभिप्रायहेतुतः इति वार्त्तिकभागे ईशाभिप्रायपदेन चैतन्याभासः विवक्षित इति भावः ।
3. **विवर्तते**—परिणमते ।
4. **शरीरेन्द्रियमनोबुद्धिविषयविराट्सूत्रान्तर्यामिणामिति** शरीराद्यष्टावस्थं विकारजातमित्युच्यते इति भावः ।

* "केचित्तु द्वैतस्य नाज्ञानजत्वं, पिण्डो जातिः विराट् दैवमव्याकृतं अन्तर्यामी साक्षी इत्यष्टावस्थस्य तस्य वस्तुत्वादित्याहुः । तान् प्रत्याह—**अतत्त्वेति** ।" इति **शास्त्रप्रकाशिका** ।

* विमतमज्ञानजं तदन्वयव्यतिरेकवत्त्वात् रज्जुसर्पवत् इत्यनुमानं जगतः मिथ्यात्वे मानमुच्यते 'प्रत्यगज्ञानविध्वस्तौ' इति वार्तिके इति **शास्त्रप्रकाशिकाकारा** वर्णयन्ति ।

अनात्मवस्तु सकलं प्रत्यगज्ञानहेतुजम् ।
यथा तथोत्तरत्रापि युक्तिभिश्चाभिधास्यते ॥ (316)

औद्गात्रमेव चोद्गीथो भक्तिर्वा का चिदिष्यताम् ।
प्रसिद्धेरिति चेन्मैवमुद्गीथो ह्यसुरेव तु ॥ (317)

उपसर्ग उदित्येषः स चात्यन्तक्रियाश्रितः ।
संयोज्य क्रिययाऽतस्तं व्याचष्टे श्रुतिरञ्जसा ॥ (318)

* उत्तब्धं विधृतं यस्मात् प्राणेन जगदित्वरम् ।
उत् प्राणोऽतः, प्रसिद्धिस्तु गुणादुद्गीथ उच्यते ॥ (319)

मनोबुद्धिविषयविराट्सूत्रान्तर्यामिणां परमार्थत्वात्, इत्यत आह—**अतत्त्वज्ञस्येति**। (314) जगतोऽध्यस्तत्वे किं फलमिति, तदाह—**प्रत्यगिति** । (315) जगतोऽध्यस्तत्वे सिद्धे [1]स्यादेतत् । तदेवासिद्धम्, अत्राह—**अनात्मेति** । [2]पुरस्तात् प्रमाणतर्काभ्यां साधितम् । साधयिष्यते चोप[3]रिष्टादित्यर्थः । (316)

त्रयोविंशकण्डिकार्थनिरूपणम्
प्राणस्य उद्गीथत्वम्

'एष[4] उ वा उद्गीथः' इत्यत्र उद्गीथशब्देन साम[5]भक्तिर्वा, औद्गात्रं (कर्म) [वो]च्यते, इति चोदयति—**औद्गात्रमिति** । सामभागादेर्नोद्गीथत्वम्, इत्याह—**मैवमिति** । (317) उद्गीथशब्दस्य प्राणे यौगिकत्वं वक्तुं उत्पदार्थमाह—**उपसर्ग इति** । (318) प्राणे तदर्थं दर्शयति—**उत्तब्धमिति** । इत्वरं - गत्वरमित्यर्थः । उद्गीथशब्दस्य प्राणवाचकत्वे कथं [6]सामादौ वृत्तिरिति, उपचारादि-

---

1. **स्यादेतदिति** बोधतः अष्टावस्थस्याज्ञानकल्पितस्य निवृत्तिरित्येतत् ।
2. **पुरस्तात्**—संबन्धग्रन्थे ।
3. **उपरिष्टात्**—अव्याकृतविचारे ।
4. **एष उ वेति** "एष उ वा उद्गीथः । प्राणो वा उत् । प्राणेन हीदं सर्वमुत्तब्धं वागेव गीथा । उच्च गीथा चेति स उद्गीथः ।" इति श्रुतिः ।
5. **सामभक्तिः**—सामभागः - प्रथमः सामावयवः उद्गीथनाम्ना प्रसिद्धः ।
* **उत्तब्धमिति** जगद्धारयितृत्वं उत्पदार्थ इति भावः ।
6. **सामादौ**—सामावयवोद्गीथभक्तौ ।
* 'प्रसिद्धस्तु' इति मु.पु. पाठः ।

अनया गीयते यस्मात् गीथा वाक् तेन भण्यते ।
उच्च गीथा च तद्योगादुद्गीथ इति शब्द्यते ॥ (320)

उद्गाता नैमिशीयानामयास्योपासनादभूत् ।
अयास्यनामा सोऽगायद्वाचा प्राणप्रधानया ॥ (321)

बृहस्पत्यादिभिर्धर्मैरुपास्यानमनो भवेत् ।
भावनोत्कर्षतोऽतोऽयं विचारस्तं प्रतीष्यते ॥ (322)

त्याह—**प्रसिद्धिस्त्विति** । प्राणनिर्वर्त्यत्वादित्यर्थः । (319) प्राणस्य उच्छब्दार्थयोगमुक्त्वा, गीथशब्दार्थयोगं वक्तुं [1]तदर्थमाह—**अनयेति** । [2]उभययोगात् उद्गीथः प्राणः, इत्याह—**उच्चेति** । (320)

चतुर्विंशकण्डिकार्थनिरूपणम्
वागुपसर्जनप्राणस्य उद्गीथदेवतात्वे ब्रह्मदत्तशपथनिरूपणम्

उद्गीथदेवता प्राण एव न वागादयः इत्युक्तार्थद्रढिम्ने '[3]तद्धापि ब्रह्मदत्तः' इत्यादिवाक्यम्, इत्याह—**उद्गातेति** । नैमिशारण्यवासिनामृषीणां सत्रे बहुकर्तृके कर्मणि उद्गाता अयास्योपासनादयास्य आसीत्, स च वागुपसर्जनं प्राणमौद्गात्रदेवतात्वेन गृहीत्वा, प्राणप्रधानया वाचा अगायत् । तस्मात् प्राण एव देवता, इत्येषोऽर्थः विचारपूर्वं निर्धार्यते इत्यर्थः । (321) देवताविशेषविचारो न कर्तव्यः अफलत्वात्, अत्राह—**बृहस्पतीति** । उद्गीथदेवतां प्राणं बृहस्पतित्वादिगुणविशिष्टमुपास्य, स एव भवेत् । अतः तद्दृष्टिकरणाय विचार्यते इत्यर्थः । (322)

---

1. **तदर्थं**—गीथाशब्दार्थम् ।
2. **उभययोगात्**—उच्छब्दार्थस्य जगद्धारयितृत्वस्य, गीथाशब्दार्थस्य वाचः उपसर्जनत्वेन च संबन्धात् ।
3. **तद्धापीति** "तद्धापि ब्रह्मदत्तश्चैकितानेयः राजानं भक्षयन्नुवाच अयं त्यस्य राजा मूर्धानं विपातयतात् यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति, वाचा च ह्येव स प्राणेन चोदगायदिति ।" इति श्रुतिवाक्यम् ।

हृदयेनाभिसंबन्धात् देवतात्र प्रजापतिः ।
* उद्गीथदेवतेहास्तु सविता वा मनः श्रितः ॥ (323)

वागीश्वरत्वादिन्द्रो वा यदि वा वर्णदेवता ।
पदवाक्यस्वरस्थाननादादिविषयापि वा ॥ (324)

एवं विप्रतिपन्नेषु नानावादिषु निश्चितः ।
प्राणप्रधानया वाचा ह्ययास्योऽगायदित्यतः ।
ब्रह्मदत्तश्चकारोच्चैः शपथं वादिनः प्रति ॥ (325)

फलवत्त्वेऽपि न विचार्यत्वम्, असन्देहात्, अत्राह–**हृदयेनेति**। प्रजापतिः बुद्धेर्देवता। उद्गानं चात्र बुद्धौ संनिहितमिति हृदयेन द्वारेण उद्गानसंबन्धात् प्रजापतिः अत्र–उद्गीथे देवता अस्तु, इत्येकः पक्षः। पक्षान्तरमाह–**सवितेति**। हेतुमाह—**मनः श्रित इति**। मनसः चन्द्रमा देवता। [1]सविता चात्र चन्द्रः, 'पौर्णमास्योदितश्चन्द्रः सूर्य इत्यभिधीयते' इति **वचनात्**। (323) पक्षान्तरमाह—**वागीश्वरत्वादिति**। वीर्यवत्कर्मेन्द्रियनिष्पाद्यत्वाद्वाचः वाग्विशेषत्वादुद्गानस्येत्यर्थः। मतान्तरमाह—**यदि वेति**। वर्णात्मक[न]उद्गानस्य [2]तदभिमानिन्येव देवतेत्यर्थः। आदिपदेन करणघोषादिसंग्रहः। (324) **सन्देहबीजं** विप्रतिपत्तिं, पूर्वपक्षं च प्रदर्श्य, सिद्धान्तमाह–**एवमिति**। यस्मिन् यज्ञे ब्रह्मदत्तः उद्गाता बभूव, तत्र दिदृक्षया समागतेषु विप्रतिपन्नेषु सत्सु, ब्रह्मदत्तः तान् वादिनः प्रति, वागुपसर्जनः प्राण एव उद्गीथदेवतेति शपथं चकार। शपथकरणे हेतुमाह—**प्राणेति**। पूर्वेषामृषीणां यज्ञे अयास्यो नामर्त्विक् प्राणप्रधानया वाचा उदगायदिति निश्चितो हि—यस्मात् अत इत्यर्थः। (325) शपथं प्रकटयति—

---

1. **सविता चात्र चन्द्र इति** 'सविता वा मनःश्रितः' इति वार्त्तिके सवितृपदबोध्यः चन्द्र इत्यर्थः।

* "पक्षान्तरमाह—**उद्गीथेति**। मनः- तदधिष्ठितं चक्षुः। तदाश्रयः सविता। 'आदित्यश्चक्षुर्भूत्वा अक्षीणि प्राविशत्' इति श्रुतेः। अस्ति चौद्गात्रस्य तत्र संबन्धः, 'त्वं न उद्गाय' इत्युक्तेः। तस्मादिह यज्ञे सवितैव उद्गीथदेवतेत्यर्थः।" इति **शास्त्रप्रकाशिका**।

2. **तदभिमानिन्येव**– वर्णाद्यभिमानिन्येव।

यदीतोऽनप्रधानाया वाचो ह्यन्येन केनचित् ।
देवान्तरेण सोऽगायद्यास्यः प्राणविग्रहः ॥ (326)

सर्वप्रमाणभूतोऽभूदुद्गाता सत्रिणां पुरा ।
विसंवादस्त्वभूत्तेषामुद्दिश्योद्गीथदेवताम् ॥ (327)

उद्गाता नैमिषीयानां मदभ्युपगताद्यदि ।
प्राणवाग्द्वयतोऽन्येन देवेनासौ प्रयत्नवान् ॥ (328)

उदगायत्तदा सोमो भक्ष्यमाणः शिरो मम ।
मिथ्याभिवादिनः साक्षात् विपातयतु सत्वरः ॥ (329)

श्रुतिः समर्थयामास वाचेति शपथक्रियाम् ।
शपथस्यापि मानत्वमस्मादेव तु कारणात् ॥ (330)

वाचः प्राणस्य च यतः उद्गीथे व्यापृतिः स्फुटा ।
प्राधान्येन, तदन्येषां न तथा लक्ष्यते सदा ॥ (331)

यदीत इति । देवान्तरेण—प्रजापतिप्रभृतिना । सोऽगायत् यदि, तदा मे मिथ्यावादिनो मूर्धानं सोमः पातयतु इत्युत्तरेण संबन्धः । (326)

[1]**अयास्य** एव कस्मादत्र[2] साक्षीक्रियते, अन्य एव साक्षी स्यात्, अत्राह—**सर्वेति** । पूर्वस्मिन् काले [3]सत्रिणां नैमिषीयानां सत्रे **अयास्यः** उद्गाताभूत् । सर्वप्रमाणभूतः—सर्वेषामाप्तः । तस्मादुद्गीथदेवतामुद्दिश्य विवादेन साक्षीकरणं युक्तमित्यर्थः । (327) 'यदीतोऽनप्रधाना[याः]' इत्यत्रोक्तमनूद्य, श्रुत्यक्षरार्थमाह—**उद्गातेति** । (328–329) 'वाचा च ह्येव स प्राणेन चोदगायत्' इति श्रुतेस्तात्पर्यार्थमाह—**श्रुतिरिति** । शपथेनोक्तमर्थं श्रुतिरपि स्वमुखेन साधयतीत्यर्थः । शपथस्य [4]स्वतन्त्रमानत्वात् किं श्रुतिसमर्थनेन, अत्राह—**शपथस्येति** । श्रुतिमूलत्वेनेत्यर्थः । (330) वागुपसर्जनप्राणस्य उद्गानकर्तृदेवतात्वे

---

1. **अयास्यः** —तन्नामा ऋषिः उद्गाता ।
2. **अत्र**—उद्गीथदेवताविषये ।
3. **सत्रिणामिति** बहुकर्तृकः यागविशेषः सत्रयागः ।
4. **स्वतन्त्रमानत्वात्**—इतरानपेक्षप्रमाणत्वात् ।

* आकृत्यर्थाभिसंबन्धादभिधानस्य न श्रुतेः ।
ब्रह्मदत्ताभिसंबन्धादनित्यत्वं प्रसज्यते ॥ (332)

उद्गीथदेवतामेवं परीक्ष्याथाधुना श्रुतिः ।
स्वादिधर्माभिसंबन्धं प्रचक्राम प्रभाषितुम् ॥ (333)

याजमानमिदं ज्ञानं स्वादेः प्राग्यत्समीरितम् ।
पञ्चमाद्युक्तिदृष्ट्यास्य ह्येकवाक्यत्वहेतुतः ॥ (334)

युक्तिमाह—**वाच इति** । (331) **ब्रह्मदत्तादेः** विग्रहवतः अस्मदादिवदनित्यत्वात् तद्विषयवेदवाक्यस्यापि लौकिकवाक्यवत् सापेक्षत्वेन स्वतः प्रामाण्यहानिः, अत आह—**आकृत्येति** । (332)

पञ्चविंशकण्डिकार्थनिरूपणम्
उपास्यप्राणस्य स्वगुणवत्त्वम्

[1]'तस्य हैतस्य' इत्यादेस्तात्पर्यमाह—**उद्गीथेति** । स्वसुवर्णप्रतिष्ठाविधानायोत्तरं[2] वच इत्यर्थः । (333) गुणोपासनं कियत् याजमानं, आर्त्विज्यं वा कियत् इत्यनिश्चितत्वात् तं नियमार्थमाह—**याजमानमिति** । स्वसुवर्णादिगुणज्ञानात्प्राक् अयास्यादिगुणविशिष्टं यत् प्राणोपासनमुक्तं, तत् यजमानस्वामिकं, फलस्योत्सर्गतो यजमानगामित्वात् । पञ्चमाध्यायादिवाक्योपन्यस्तज्ञानेनास्यैकत्वात्, [3]तत्र च 'केन यजमानो मृत्योराप्तिमतिमुच्यते' (बृ. 5-1-3)इति [4]याजमानत्वश्रवणादित्यर्थः । (334)

---

* **आकृत्यर्थेति** ब्रह्मदत्तादिपदस्य आकृतिवाचकत्वेन व्यक्तिवाचकत्वाभावात् नानित्यत्वं वेदस्येत्यर्थः ।

1. **तस्य हैतस्येति** "तस्य हैतस्य साम्नो यः स्वं वेद, भवति हास्य स्वम् । तस्य वै स्वर एव स्वम् । तस्मादार्त्विज्यं करिष्यन् वाचि स्वरमिच्छेत् । तया वाचा स्वरसंपन्नयार्त्विज्यं कुर्यात् । तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एव । अथो यस्य स्वं भवति, भवति हास्य स्वं, य एवमेतत् साम्नः स्वं वेद ।" इति श्रुतिरनुसन्धेया ।

2. **उत्तरं वचः**—कण्डिकात्रयम् ।

3. **तत्र च**—पञ्चमाध्याये च ।

4. **याजमानत्वश्रवणादिति** मृत्यतिक्रमार्थविज्ञानस्येत्यादिः ।

स्वसुवर्णप्रतिष्ठाधीरुद्गातुरिति गम्यते ।
ऋत्विङ्नामाभिसंबन्धान्न त्वसौ यजमानगा ॥ (335)
एष एवंविदुद्गातेत्यमुतो लिङ्गतो भवेत् ।
उद्गातुरपि विज्ञानं दृष्टार्थत्वाच्च कारणात् ॥ (336)
कर्त्राश्रितं स्वं विज्ञेयं माधुर्यादीह सामनि ।
यतस्तद्धनवत् तस्मात्स्वरार्थं यत्नमाचरेत् ॥ (337)
धनवन्तं यथा यत्नाद् दिदृक्षन्तीह सङ्घशः ।
तथा यत्नात्समीक्षन्ते स्वरसंपत्समन्वितम् ॥ (338)
बाह्यवित्तेन संबन्धमुक्त्वाथान्तर्धनात्मना ।
संबन्धं वक्तुकामेयं प्रचक्रामोत्तरा श्रुतिः ॥ (339)

---

[1]स्वादिगुणज्ञानमपि याजमानम्, इत्यत्राह—**स्वसुवर्णेति** । स्वादिगुणज्ञानफलमुद्गातृगामि, इत्यत्र हेतुमाह—**ऋत्विगिति** । 'तस्मादार्त्विज्यं करिष्यन्' इति [2]गुणत्रयस्य उद्गा[3]तृसंयोगावगमादित्यर्थः । (335) यजमानेन दक्षिणया क्रीतत्वात् परकर्मणि प्रविष्टस्य उद्गातुर्न विज्ञानफलभागित्वम्, अत्राह—**एष इति** । वचनसिद्धत्वात् प्रत्यक्षेणोपलभ्यमानत्वाच्चेत्यर्थः । (336) [4]विज्ञानं विविच्य, स्वादिपदार्थमाह — **कर्त्राश्रितमिति** । कण्ठमाधुर्यं सामपदोदितस्य प्राणस्य स्वमित्यर्थः । 'तस्मादार्त्विज्यम्' इत्यादेरर्थमाह—**यत इति** । (337) माधुर्यस्य स्वत्वे गमकमाह —**धनवन्तमिति** । (338)

---

1. **स्वादिगुणज्ञानं**—प्राणगतत्वेन स्वादिगुणस्योपासनम् । अत्र प्रकरणे ज्ञानविज्ञानशब्दौ उपासनपरौ वेदितव्यौ ।
2. **गुणत्रयस्य** स्व, सुवर्ण, प्रतिष्ठात्मकगुणत्रयस्य ।
3. **उद्गातृसंयोगः**—उद्गातृसंबन्धः ।
4. **विज्ञानं विविच्येति** याजमानत्वेन आर्त्विज्यत्वेन च विभज्य विज्ञानं-उपासनं निरूप्येति यावत् ।

'तस्य हैतस्य साम्नो यः सुवर्णं वेद, भवति हास्य सुवर्णं, तस्य वै स्वर एव सुवर्णं, भवति हास्य सुवर्णं य एवमेतत् साम्नः सुवर्णं वेद ।" "तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद, प्रति ह तिष्ठति, तस्य वागेव प्रतिष्ठा । वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयते । अन्न इत्युहैक आहुः ।' इति श्रुतिवाक्यम् ।

बाह्योऽस्य धर्मः सौस्वर्यं सौवर्ण्यन्त्वान्तरं धनम् ।
तदन्तरतमोऽनस्य प्रतिष्ठागुण उच्यते ॥ (340)

जिह्वामूलीयकादीनि ह्यष्टौ स्थानानि वागिह ।
गानप्रतिष्ठाहेतुत्वात् हीति हेतुवचस्तथा ॥ (341)

अन्नप्रतिष्ठमागानमेक आहुर्विपश्चितः ।
अनिषेधात् द्वयोरेका प्रतिष्ठेहावसीयताम् ॥ (342)

अन्नस्य परिणामेऽनः स्थितो गीतित्वमेति हि ।
अनप्रतिष्ठा देहोऽतः श्रुत्येह प्रतिपाद्यते ॥ (343)

उपासनं विकल्पेन वागन्नाख्यप्रतिष्ठयोः ।
वाक्प्रतिष्ठमुपासीत यदि वान्नप्रतिष्ठितम् ॥ (344)

षड्त्रिंश सप्तविंशकण्डिकार्थनिरूपणम्
सुवर्ण, प्रतिष्ठागुणयोर्विधिः

'तस्य हैतस्य' इत्यादेस्तात्पर्यमाह—बाह्येति । (339) किं तत् बाह्यं धनं, किं वा यदान्तरम्, अत्राह—बाह्योऽस्येति । सौस्वर्यं कण्ठनिष्पन्नताधर्मत्वात् बाह्य, सौवर्ण्यं तु वर्णाश्रयत्वादन्तरङ्गमित्यर्थः । प्रतिष्ठागुणः [1]ताभ्यामप्यन्तरङ्गः प्राणस्य, इत्याह—तदन्तरतम इति । (340) 'तस्य ह वै वागेव प्रतिष्ठा' इत्यस्यार्थमाह—जिह्वेति ।

'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥' (341)

'अन्न इत्युहैक आहुः' इत्यस्यार्थमाह–अन्न इति । कात्र प्रतिष्ठा ग्राह्या, न ह्येकस्य प्रतिष्ठाद्वयं युक्तम्, अत्राह—अनिषेधादिति । (342) अन्नशब्दार्थं दर्शयन् तत्र[2] युक्तिमाह—अन्नस्येति । (343) व्रीहियववाक्यवत् तुल्यबलत्वात् ऐच्छो विकल्पः, इत्याह—उपासनमिति । (344)

---

1. ताभ्यामपि—सौस्वर्यसौवर्ण्याभ्यामपि ।
2. तत्र युक्तिम् — अन्नस्य प्राणप्रतिष्ठात्वे युक्तिम् ।

यदर्थमतियत्नेन महिमाऽनस्य कीर्तितः ।
अभ्यारोहजपः सोऽथ प्राप्तावसर उच्यते ॥ (345)

यथोक्तज्ञानवत्तायामिदं कर्म विधित्स्यते ।
कार्त्स्न्येन तस्य चोक्तत्वादतस्तदभिधीयते ॥ (346)

एवं विद्वत्प्रयोज्यत्वादत एव न सूत्रितम् ।
नित्यकर्मेत्र सूत्रेषु तेन विद्वत्प्रयोज्यता ॥ (347)

उद्गीथलिङ्गसंयोगात् गानमात्रेऽस्य शक्तितः ।
नियमोऽस्यैवकारेण पवमानेषु कथ्यते ॥ (348)

अष्टाविंशकण्डिकार्थनिरूपणम्
अभ्यारोहजपस्य तन्मन्त्रार्थस्य च निरूपणम्

[1]'अथातः पवमानानाम्' इत्यादेः अनन्त[2]रग्रन्थेन कः संबन्ध इत्याशङ्क्य, प्रसङ्गं करोति—**यदर्थमिति**। यस्य प्राणोपासनस्य शेषिणः शेषत्वेन जपविध्यर्थमनेकगुणतत्फलोक्तिद्वारा प्राणस्य ध्यानात्मा महिमा वर्णितः, सः अभ्यारोहजपः अनन्त[3]रवाक्येनोच्यते इत्यर्थः। (345) अतःशब्दार्थमाह—**यथोक्तेति**। (346) मन्त्रजपस्य कर्मत्वे **कल्पसूत्रकारैः** सूत्रितत्वप्रसङ्गः, अत्राह—**एवं विद्वदिति**। **तेन विद्वत्प्रयोज्यतेति**। [येन] विद्व[4]त्प्रयोज्यता (न) तेनानित्यत्वमित्यर्थः। (347) एवकारार्थमाह—**उद्गीथेति**। 'उद्गीथेनात्ययाम' 'त्वं न उद्गाय' इति चोद्गीथसंबन्धावगमात् गा[5]नमात्रकाले जपकर्मप्रसक्तौ एवकारेण [6]कालसंकोचः क्रियते इत्यर्थः। (348) पवमानेष्वपि सर्वत्र[7] प्राप्तौ पवमान-

---

1. "अथातः पवमानानामेवाभ्यारोहः। स वै खलु प्रस्तोता साम प्रस्तौति, स यत्र प्रस्तुयात्, तदेतानि जपेत्। असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमयेति।" इति श्रुतिः।
2. **अनन्तरग्रन्थेन** — अव्यवहितपूर्वग्रन्थेन।
3. **अनन्तरवाक्येन** — अथातः पवमानानामेवाभ्यारोहः इत्यादिवाक्येन।
4. **विद्वत्प्रयोज्यता** — प्राणविज्ञानवता कर्तव्यता।
5. **गानमात्रकाले** — गानसामान्यकाले।
6. **कालसंकोच इति** पवमानस्तोत्रगानकाले एव जपः कर्तव्यः, न तु इतरस्तोत्रगानकाले इति बोध्यते इति यावत्।
7. **सर्वत्र प्राप्तौ** — उद्गीथप्रतिहारप्रस्तावादिकालेषु जपप्रसक्तौ।

ततोऽपि कालसंकोचं स वा इत्यादिनाऽवदत् ।
प्रस्तोता प्रस्तुयाद्यत्र तदैतानि जपेदिति ॥ (349)

एतानीति च निर्देशाद्यजूंषीत्यवगम्यते ।
श्रुतावेव च दृष्टत्वात् स्वरः शातपथो जपे ॥ (350)

जपकर्माभिधा चेयमभ्यारोह इतीष्यते ।
यौगिकी चाभिधा ज्ञेया क्रियायोगस्य संभवात् ॥ (351)

हित्वाऽध्यात्मपरिच्छेदं दैवं बीजमतः परम् ।
अभ्यारोहत्यनेनातो ह्यभ्यारोहो जपः स्मृतः ॥ (352)

तिरोहितार्थरूपत्वान्मन्त्राणां न नृधीगतिः ।
मन्त्रार्थं स्वयमेवातो व्याचष्टे श्रुतिरञ्जसा ॥ (353)

पूर्वं पदार्थान् व्याख्याय पश्चाद्वाक्यार्थमब्रवीत् ।
फलं पश्चाद्यथोक्तस्येत्येष व्याख्याक्रमः श्रुतेः ॥ (354)

प्रस्तावकाले, इत्याह—**ततोऽपीति** । (349) यजुर्मन्त्राणामनियताक्षरपादत्वात् 'असतो मा सद्गमय' इत्यारभ्य एको, द्वौ, वा मन्त्रौ, इत्याशङ्क्याह—**एतानीति** । एषां मन्त्रत्वे मन्त्रस्वरेण तल्लक्षणग्रन्थोक्तेन भवितव्यम्, अत्राह—**श्रुताविति** । ब्राह्मणोत्पन्नत्वात् ब्राह्मणस्वर एव मन्त्राणां स्वर इत्यर्थः । (350) अभ्यारोहमुपक्रम्य जपकर्मविधानं प्रक्रमविरुद्धम्, इत्यत आह—**जपेति** । (351) [1]रूढ्यभावेऽपि यौगिकी वृत्तिः इत्युक्तम् । तत्र योग[2]माह—**हित्वेति** । (352) 'स[3] यदाह' इत्यादिब्राह्मणतात्पर्यमाह—**तिरो(हे)[हिते]ति** । (353) ला[4]घवात् वाक्यार्थ एव कथ्यतां, किं पदार्थकथनेन, अत्राह—**पूर्वमिति** । पदार्थज्ञानकार्य-

---

1. **रूढ्यभावेऽपीति** अभ्यारोहपदस्येत्यादिः ।
2. **योगमाह** — अवयवार्थमाह ।
3. "स यदाह असतो मा सद्गमयेति, मृत्युर्वा असत् सदमृतं, मृत्योर्माऽमृतं गमय, अमृतं मा कुर्वित्येवैतदाह । तमसो मा ज्योतिर्गमयेति, मृत्युर्वै तमः ज्योतिरमृतं, मृत्योर्माऽमृतं गमय अमृतं मा कुर्वित्येवैतदाह । मृत्योर्माऽमृतं गमयेति, नात्र तिरोहितमिवास्ति ।" इति श्रुतिरनुसन्धेया ।
4. **लाघवात्** — उक्तिलाघवात् ।

यत्स्यात् स्वाभाविकं ज्ञानं यच्च कर्म स्वभावजम् ।
तदधःपातहेतुत्वात् मन्त्रेऽसदिति भण्यते ॥ (355)

सद्देवभावहेतुत्वात् शास्त्रीये ज्ञानकर्मणी ।
सत्पदेनाभिधीयेते मन्त्रेऽस्मिन् प्राग्यथोदिते ॥ (356)

असन्मृत्युस्तयोर्ज्ञेयः पूर्वयोर्मृत्युहेतुतः ।
अमृतं मृत्युघातित्वात् शास्त्रीये ज्ञानकर्मणी ॥ (357)

आसुरज्ञानकर्मभ्यां मां व्युत्थाप्याथ तज्जितेः ।
गमयाशु ततो दैवे शास्त्रीये ज्ञानकर्मणी ॥ (358)

मन्त्रार्थे यत्नमाहाथ ह्यमृतं मामिति श्रुतिः ।
द्वितीयमन्त्रानूक्तिः स्यात् तमसो मेत्युदीरणम् ॥ (359)

आपेक्षिकत्वान्मृत्युः स्यात् शास्त्रीये ज्ञानकर्मणी ।
स्वार्थं फलमपेक्ष्यैते परार्थत्वात्तमो मते ॥ (360)

त्वाद्वाक्यार्थज्ञानस्येत्यर्थः । (354) 'असतो मा सद्गमय' इत्यत्र असत्पदार्थमाह—**यदिति**। (355) सत्पदार्थमाह—**सदिति** । कर्मकाण्डोक्तमग्निहोत्रादिकं, 'उषा वा' (बृ. 3-1-1) इत्यादिनोक्तं ज्ञानं च सत्पदवाच्यमित्यर्थः । (356) 'मृत्युर्वा असत्' इत्यादिब्राह्मणार्थमाह—**असदिति** । तयोः– शास्त्रीयाशास्त्रीययोर्मध्ये तावत् अशास्त्रीये ज्ञानकर्मणी मृत्युः, [1]तयोः मृत्युहेतुत्वादित्यर्थः । (357) 'अमृतं मा कुर्वित्येवैतदाह' इति वाक्योक्तेरर्थमाह—**आसुरेति** । (358) 'मृत्योर्मा अमृतं गमय' इत्यनेन[2]वाक्यार्थस्योक्तत्वात् पुनरु[3]क्तमिदम् , अत्राह—**मन्त्रार्थेति** । तात्पर्यवचनमिदमित्यर्थः । अथशब्दः वाक्यार्थकथनानन्तर्यं तात्पर्योक्तेर्दर्शयति । 'तमसो मा ज्योतिर्गमय' इति द्वितीयमन्त्रानुवादः व्याख्यानार्थः, इत्याह—**द्वितीयेति** । (359)'मृत्युर्वै तमः' इत्यस्यार्थमाह–**आपेक्षिकत्वादिति** । तारतम्येन वर्तमाननित्यफलत्वादित्यर्थः । तथापि कथं तयोः[4]तमस्त्वम् , अत्राह—**स्वार्थमिति** । (360)

---

1. **तयोः** — अशास्त्रीयज्ञानकर्मणोः ।
2. **वाक्यार्थस्योक्तत्वात्**—'असतो मा सद्गमय' इति वाक्यार्थस्योक्तत्वात् ।
3. **पुनरुक्तमिदम्**—'अमृतं मा कुर्वित्येवैतदाह' इति वाक्यं पुनरुक्तमित्यर्थः ।
4. **तयोः तमस्त्वम्** — शास्त्रीयज्ञानकर्मणोः तमःपदबोध्यत्वम् ।

साधनात्तमसो मां त्वं ज्योतिः साध्यं नयामृतम् ।
फलात्पृथैव तमोध्वंसादमृतं मेत्यतोऽवदत् ॥ (361)

पूर्वयोर्मन्त्रयोर्योऽर्थः विस्तरेणोदितः पुनः ।
मन्त्रेण स तृतीयेन संक्षेपेणाभिधीयते ॥ (362)

प्रसङ्गमुत्तरे मन्त्रे पूर्वयोरिव वीक्ष्य हि ।
तिरोहितार्थतामाह नात्रेत्यादिवचः श्रुतिः ॥ (363)

यथाप्रार्थितमागाय याजमानं फलं परम् ।
त्रिष्वेव पवमानेषु यथा वागादिभिः पुरा ॥ (364)

'मृत्योर्मामृतं गमय' इति वाक्यस्यार्थमाह—**साधनादिति** । 'अमृतं मा कुरु' इत्यादितात्पर्य[1]वचनार्थमाह—**फलेति** । अतःशब्दस्य ध्वंसादित्यनेन संबन्धः । (361) [2]अपूर्वार्थाभावात् तृतीय [3]मन्त्रानर्थक्यम्, अत्राह–**पूर्वयोरिति**। (362) 'ना[4]त्र' इत्यादिवाक्यतात्पर्यमाह—**प्रसङ्गमिति** । [5]पूर्वयोर्मन्त्रयोः तिरोहितार्थतामालक्ष्य, तयोरिव चरम[6]मन्त्रे तत्प्रसङ्गमालक्ष्य 'नात्र' इत्यादि वच आहेत्यर्थः । (363)

उत्तरसंगतिकथनाय वृत्तं संकीर्तयति–**यथेति** । पुरा वागादिभिः यथा प्रार्थितं यजमानवाञ्छितमनतिलङ्घ्य तदर्थं त्रिषु स्तोत्रेषु आगानं कृत्वा, परिशिष्टेषु स्वार्थमागीतं तथोद्गा(था)[ता]पीत्यर्थः । (364)

---

1. **तात्पर्यवचनार्थं** — 'मृत्योर्माऽमृतं गमय' इति वाक्यतात्पर्यबोधकस्य 'अमृतं मा कुर्वित्येवैतदाह' इति श्रुतिवचनस्यार्थम् ।
2. **अपूर्वार्थाभावात्** — पूर्वमन्त्राबोधितस्यार्थस्याभावात् ।
3. **तृतीयमन्त्रानर्थक्यं** — 'मृत्योर्माऽमृतं गमय' इति मन्त्रस्यानर्थक्यम् ।
4. **नात्रेति** नात्र तिरोहितमिवास्ति' इति वाक्येत्यर्थः ।
5. **पूर्वयोः मन्त्रयोः** — असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, इति मन्त्रयोः ।
6. **चरममन्त्रे** — 'मृत्योर्मा अमृतं गमय' इति मन्त्रे ।

अथ यानीतराणीति ह्युद्गातान्नाद्यमात्मने ।
आगायेद्वचनात्कर्तुः कामयोगोऽपि गम्यते ॥ (365)
कस्मादात्मन आगायेदिति हेतुरिहोच्यते ।
यस्मात्स एष एवंविदुद्गाताऽतोऽन एव सः ॥ (366)
अतोऽलमात्मने कामानागातुं स्वामिने तथा ।
*यस्मादीश्वर उद्गाता कामावाप्तावतः शुभम् ॥ (367)
तस्मात्तेषु वरं कामं यजमानो यथारुचि ।
नवसूद्गीयमानेषु तं वृणीताविचारयन् ॥ (368)
प्रयोगानुगमे चैतद्दर्शनं येन चोद्यते ॥ (369)

पवमानव्यतिरिक्तेषु आत्मार्थमुद्गातुरागानम्

'अथ[1] यानि' इत्यादेरर्थमाह—अथेति । 'आत्मने अन्नाद्यम्' इति वचनात् उद्गानकर्तुरपि फलसंबन्धोऽवगम्यते इत्यर्थः । (365) [2]परकर्मप्रविष्टस्य आत्मार्थमागानं कथम्? इति शङ्कते—कस्मादिति । उद्गातुः स्वात्मार्थागानसंभवे हेतुः उत्तरवाक्येनोच्यते, इत्याह—हेतुरिति । '[3]एष एवंविदुद्गाता' इति हेतुवचनं व्याचष्टे—यस्मादिति । (366) 'आत्मने वा' इत्यादेरर्थमाह—अत इति । 'तस्माद् तेषु' इत्यादेरर्थमाह—यस्मादिति । तेषु नवसु उद्गीयमानेषु अतः—उद्गातुः कामं वृणीतेत्यर्थः । (367-368)

जपकर्मसहितमपि प्राणविज्ञानं देवभावफलकमिति निरूपणम्

'[4]तद्धैतत्' इत्यादिवाक्यावतरणार्थमाह—प्रयोगेति । ज्योतिष्टोम-

---

1. अथ यानीति "अथ यानीतराणि स्तोत्राणि, तेष्वात्मनेऽन्नाद्यमागायेत् । तस्माद् तेषु वरं वृणीत यं कामं कामयेत तम् ।" इति श्रुतिः ।

2. परकर्मप्रविष्टस्य — यजमानकर्तृके यज्ञे ऋत्विक्तया प्रविष्टस्य उद्गातुः ।

3. एष एवंविदिति "स एष एवंविदुद्गाता आत्मने वा यजमानाय वा यं कामं कामयते तमागायति ।" इति हेतुवचनं बोध्यम् ।

* ईश्वरः — समर्थः ।

4. तद्धैतदिति 'तद्धैतल्लोकजिदेव' इति श्रुतिवाक्यम् ।

तस्मात्स्याद्देवतावाप्तिर्ज्ञानकर्मसमुच्चयात् ।
* तस्मान्न का चिदाशङ्का कर्मिणं प्रति विद्यते ॥ (370)

कर्महीनेऽपि विदुषि स्यान्न वेत्यतिशङ्कयते ।
तदाशङ्कापनुत्त्यर्थं तद्वैतदिति हि श्रुतिः ॥ (371)

* इहैव देवभूतत्वादाशङ्का किंनिबन्धना ।
जपकर्मानबोधाभ्यां लोकप्राप्तौ हि शङ्कयते ।
ज्ञानादेव भवेन्नेति, तद्वैतदिति हि श्रुतिः ॥ (372)

जीवतो देवभूतस्य भावनोपचयात्कुतः ।
देवावाप्तौ भवेच्छङ्का मनुष्यस्य तदाप्तिवत् ॥ (373)

कर्मिणोऽपि हि देवाप्तिः ज्ञानादेव न कर्मणः ।
समुच्चयात्तु तत्प्राप्तावागमादेव निश्चितिः ॥ (374)

प्रकरणे [1]प्राणदर्शनविधानात् [2]तस्य जपकर्मणश्च समुच्चयात् [3]देवतावाप्तिरित्यर्थः । किमतः, तत्राह—**तस्मान्न का चिदिति** । (369-370-371) उक्तशङ्कामाक्षिपति—**इहैवेति** । श्रुत्यवष्टम्भेन शङ्कां साधयति—**जपेति** । शङ्कापरिहारार्थं वाक्यम्, इत्याह—**तद्वैतदिति** । (372) श्रुतिविवक्षितं परिहारं विशदयति—**जीवत इति** । मनुष्यस्य देवाप्तौ शङ्का युक्ता, न तु देवस्यैव तदवाप्ताविर्थः । (373) शङ्कानुपपत्तौ हेत्वन्तरमाह—**कर्मिणोऽपीति** । देवभावस्य [4]धीमात्रफलत्वे [5]कर्मानर्थक्यात् समुच्चयादेव [6]तत्प्राप्तिः, इत्यत आह—**समुच्चयादिति** । देवभावस्य समुच्चयफलत्वे यथा आगमः प्रमाणं, तथा केवलधीफलत्वेऽप्यागमादेव

---

1. **प्राणदर्शनं**—प्राणोपासनम् ।
2. **तस्य**—प्राणोपासनस्य ।
3. **देवतावाप्तिः**—सूत्रभावावाप्तिः ।
* **न का चिदाशङ्केति** देवताप्तौ इति शेषः ।
* **इहैव**—जीवदवस्थायामेव । **जपकर्मानबोधाभ्यां**—अभ्यारोहजपप्राणोपासनाभ्याम् ।
4. **धीमात्रफलत्वे**—प्राणोपासनमात्रफलत्वे ।
5. **कर्मानर्थक्यात्**—कर्मानर्थक्यप्रसङ्गात् ।
6. **तत्प्राप्तिः**—देवभावप्राप्तिः ।

तद्वैतत्प्राणविज्ञानं यथाव्याख्यातरूपकम् ।
भवेल्लोकजिदेवेह कर्मशून्यमपि ध्रुवम् ॥ (375)

न हैवालोक्यतायै नुरस्याशापीह विद्यते ।
इहैव लोकभूतत्वादप्राप्तेऽर्थे हि शङ्क्यते ॥ (376)

इहैवासुरभावस्य प्राणोऽस्मीत्यभिमानतः ।
प्रध्वस्तत्वात्कुतः शङ्का तन्मूलासंभवाद्भवेत् ॥ (377)

इदमत्र विचिन्त्यं स्यात् ज्ञानकर्मसमुच्चयात् ।
देवभावः किमुद्गातुर्यजमानस्य वाथ किम् ॥ (378)

न समुच्चय उद्गातुः कर्माभावादिहेष्यते ।
* परकर्मप्रवेशात् स्यादुद्गाता न स्वकर्मणि ॥ (379)

निश्चय इत्यर्थः । (374) श्रुतिं योजयति—**तद्वैतदिति** । (375) '[1]**न हैव**' इत्यादेरर्थमाह—**न हेति** । (376) मनुष्योऽस्मीति परिच्छेदाभिमानविरोधात् [2]**इहैव न** फलभूतत्वम्, अत्राह—**इहैवासुरेति** । (377)

ज्ञानकर्मसमुच्चयात्फलावाप्तिः कस्येति विचारः

कर्मसमुच्चितमुपासनं केवलं च फलसाधनमुक्तम् । तत्र समुच्चयात्फलावाप्तिः कस्य इति निर्धारयितुं विचारयति—**इदमिति** । (378)

स्वसुवर्णादिज्ञानफलवत् समुच्चयफलमप्युद्गातुरेव स्यात्, इत्याशङ्क्याह—**न समुच्चय इति** । [3]कर्माभावे हेतुमाह—**परेति** । (379) ज्ञानमुपेत्य कर्माभावमुक्त्वा, ज्ञानमपि [4]तस्य नास्ति, इत्याह—**क्रियेति** । उद्गानक्रियासंबन्धा[त्]

---

1. **न हैवेति** "न हैवालोक्यताया आशास्ति, य एवमेतत्साम वेद ।" **इति** श्रुतिः ।
2. **इहैव**—जीवदवस्थायामेव ।
3. **कर्माभावे इति** उद्गातुः इत्यादिः ।

* **परकर्मप्रवेशात्**—यजमानकर्तृके ज्योतिष्टोमादिकर्मणि ऋत्विक्तया प्रवेशात् ।

4. **तस्य**—उद्गातुः ।

क्रियायोगाच्च तन्नाम्नो ज्ञानाभ्यासोऽपि दुर्लभः ।
साक्षात्कृतिश्च संतत्या संततिश्च न विद्यते ॥ (380)

न च धीजन्ममात्रेण परमात्मप्रबोधवत् ।
संभाव्यो देवभावोऽस्य देवो भूत्वेति च श्रुतेः ॥ (381)

उद्गातुर्विदुषो नापि परकीयेन कर्मणा ।
समुच्चयप्रसिद्धिः स्यात् तयोर्भिन्नाश्रयत्वतः ॥ (382)

यजमानस्य कर्मास्ति ज्ञानं तूद्गातृसंश्रयम् ।
समुच्चयोऽतस्तस्यापि भिन्नाधिष्ठानतो न च ॥ (383)

मतं तद्याजमानं स्यात् ज्ञानं यत्प्रागुदीरितम् ।
स्वयमेव कृतार्थत्वात् कापेक्षास्यर्त्विजं प्रति ॥ (384)

---

[1]उद्गातृनाम्न इत्यर्थः। क्रियायां व्यापृतस्य ज्ञानाभ्यासाभावेऽपि यथाशास्त्र-मुद्गानानुष्ठानात् देवतासाक्षात्कारः स्यात्, अत्राह—**साक्षात्कृतिरिति** । (380) ब्रह्मभाववत् देवभावोऽपि ज्ञानमात्रात्स्यात्, अत्राह—**न चेति** । (381) उद्गातु-र्विज्ञानोपगमेऽपि [2]न समुच्चयः स्वीयकर्माभावात् । तर्हि यजमानकर्मसमुच्चयः, इत्याशङ्क्याह—**उद्गातुरिति** । (382) तर्हि यजमानस्य समुच्चयात् देवभावः, इत्यत आह—**यजमानस्येति** । (383)

यजमानस्य उद्गातुश्च समुच्चयात् फलावाप्तिरिति निरूपणम्

इत्थमुभयोः समुच्चयात् देवभावे निरस्ते, यजमानस्य [3]तावत् समुच्चयात् देवभावं साधयति—**मतमिति** । यजमानस्य कर्म तावदस्ति । यत्प्रागुक्तं प्राणोपासनं तद्याजमानं मतं-इष्टम् इति धीकर्मसमुच्चयात् फलं यजमानस्येत्यर्थः ।

---

1. **उद्गातृनाम्न इति** 'तन्नाम्नः' इति वार्त्तिकभागस्य विवरणं बोध्यम् । उद्गातृ-संज्ञकस्य ऋत्विजः इति तदर्थः ।

* **सन्तत्या**—विजातीयप्रत्ययानन्तरितज्ञानसन्तानेन ।

2. **न समुच्चयः**—न कर्मणा समुच्चयः ।

3. **तावत्**—आदौ ।

कर्मण्युद्गात्रपेक्षावत् ज्ञानेऽपीति मतं यदि ।
उद्गातुरपि तत्तुल्यं नोद्गातर्ते क्रिया यतः ॥ (385)

याजमानं यथा कर्म ह्याश्रित्य फलवद्भवेत् ।
अन्नाद्यागानमुद्गातुः तज्ज्ञानं तद्वदाश्रितम् ॥ (386)

समुच्चयाच्चेदुभयोरुद्गातृयजमानयोः ।
देवभावः, किमर्थेयं तद्धैतदिति हि श्रुतिः ॥ (387)

पुनः असमुच्चयवादी शङ्कते---**स्वयमिति** । उपासनस्य याजमानत्वे तन्निष्पत्त्यर्थ-मुद्गात्रपेक्षा न स्यात् स्वयं तत्र यजमानस्य सामर्थ्यादित्यर्थः । (384) समाधत्ते—**कर्मणीति** । यदि कर्मणि याजमानेऽपि निष्पत्त्यर्थमुद्गात्रपेक्षा इति मतम्, तर्हि तद्वदेव ज्ञानेऽपि याजमाने जन्मार्थं तदपेक्षा इति समुच्चयात् यजमानस्य देवभावः इत्यर्थः । उद्गातुरपि समुच्चयात् देवताभावं साधयति—**उद्गातुरिति** । यथा उद्गातारमन्तरेण ज्योतिष्टोमादिक्रिया नास्ति, तथा [1]तामन्तरेण उद्गातापि न सिद्धयति, क्रियारूढस्योद्गातृत्वात् । अतो ज्ञानस्य क्रियया समुच्चयात् देवत्वमित्यर्थः । (385) भिन्ना[2]धिकरणत्वात् समुच्चयानुपपत्तिरित्युक्तम्, अत आह—**याजमानमिति** । यथा यजमानस्वामिकं कर्माश्रित्य[ते]न समुच्चितं सत् उद्गातुर्विज्ञानं अन्नादिफलं साधयति । तथा तत्—ज्ञानं तस्योद्गातुर्ज्ञानम् याजमानेनाश्रितं तेन समुच्चितं सत् यजमानकर्म स्वफलं साधयति । तस्मात् भिन्नाधिकरणयोरपि ज्ञानकर्मणोः समुच्चयादुभयोरपि देवभावसंभव इत्यर्थः । (386) तर्हि केवलज्ञानात् देवत्वप्राप्तिः कस्य, इत्याशयवानाह—**समुच्चयाच्चेदिति** (387) श्रुतिप्रामाण्यात् केवला[त्]ज्ञानात् फलमिष्टं चेत्, तर्हि कर्महीनानां वर्णिनामाश्रमिणाञ्च [3]तत्, इति

---

1. **तामन्तरेण**—ज्योतिष्टोमादिक्रियामन्तरेण ।
2. **भिन्नाधिकरणत्वादिति** धीकर्मणोरिति शेषः ।
3. **तत्**—केवलज्ञानात् देवतावाप्तिफलम् ।

इति तृतीयं ब्राह्मणं समाप्तम्

—:*:—

सर्वाश्रमाणां तर्हीदं सामान्येनाभिधीयते ।
तद्धैतदिति, सिद्धत्वात् उद्गातृयजमानयोः ॥ (388)
देवभावेन विज्ञानं संस्करोत्येव तद्धियम् ।
परार्थमपि सत्कस्मादनपेक्षं न सिद्धये ॥ (389)

इति तृतीयाध्यायस्य तृतीयमुद्गीथब्राह्मणम्

—: * :—

राद्धान्ती आह–सर्वेति । (388) केवलज्ञानस्य फलहेतुत्वं साधयति–देवेति । यथा उद्गीथोपासनं परार्थमपि–याजमानमपि सत् तत्कर्तारं समुद्गातारं संस्करोत्येव —देवभावं गमयत्येवातत्स्वामिकमपि । तद्वदनपेक्षं—स्वकर्तृस्वामिकम् कस्मात् फलं न प्रयच्छतीत्यर्थः । (389)

इति तृतीयाध्यायस्य तृतीयमुद्गीथब्राह्मणम्

—: * :—

अथ तृतीयाध्यायस्य चतुर्थं ब्राह्मणम्

ज्ञानकर्मफलं चैतत्कर्मकाण्डप्रचोदितम् ।
आत्मैवेत्यादिशास्त्रेण सृष्ट्यादौ कर्तृतोच्यते ॥ (1)

जगदुत्पत्तिसंहारस्थित्यादौ जगदात्मनः ।
क्रियाधीफलभूतस्य स्वातन्त्र्यमुपवर्ण्यते ॥ (2)

स्तुत्यानया च वेदोक्तक्रियाज्ञानस्तुतिर्भवेत् ।
कृता, विवक्षितं त्वत्र सर्वमप्येतदीरितम् ॥ (3)

वैदिकं साधनं ज्ञेयं ज्ञानकर्मात्मकं पुरा ।*
महानर्थफलायैव न मोक्षायेति निश्चितिः ॥ (4)

अथ तृतीयाध्यायस्य चतुर्थं ब्राह्मणम्

वृत्तवर्तिष्यमाणब्राह्मणयोः संगतिप्रतिपादनम्

वृत्तवर्तिष्यमाणब्राह्मणयोः संगतिप्रतिपादनाय वृत्तमनुद्रवति—**ज्ञानेति** । ज्ञानस्य केवलस्य, कर्मसमुच्चितस्य सूत्रप्राप्तिरूपं फलं ज्ञानकर्मविषये पूर्वस्मिन् ब्राह्मणे प्रकाशितमित्यर्थः । 'आत्मैव' इत्यादेरिदानीं स्थूलतात्पर्यमाह—**आत्मैवेति** । फलभूतस्य प्रजापतेः सृष्ट्यादौ स्वातन्त्र्यं 'तद्धेदं' (बृ. 3-4-7) इत्यतः प्राक्तनग्रन्थेनोच्यते इत्यर्थः । (1) परस्यैव जगज्जन्मादिकारणत्वं न सूत्रस्य, अत्राह—**जगदिति** । नियन्तृत्वे च परस्यैव सूत्ररूपेण स्थितत्वान्न विरोध इत्यर्थः । (2) [1]स्वातन्त्र्यकथने किं फलम्, अत्राह—**स्तुत्येति** । 'आत्मैव' इत्यादेरवान्तरतात्पर्यमुक्त्वा, परमतात्पर्यमाह—**विवक्षितं त्विति** । (3-4) तीव्रानर्थकारणत्वे हेतुमाह—**वैदिकमिति** । ब्रह्मविद्याधिकारतः—ब्रह्मधीप्रकरणे पाठादित्यर्थः । ज्ञानकर्माख्यसाधनस्य श्रुतिस्मृतिप्रसिद्धस्य संसारफलत्व-

---

चतुर्थं ब्राह्मणम्

पुरुषविधः आसीत् इत्युपक्रमादिदं पुरुषविधब्राह्मणमिति व्यवह्रियते ।

1. स्वातन्त्र्यकथने इति प्रजापतेः सृष्ट्यादावित्यादिः ।

* ज्ञानकर्मात्मकमिति अत्र ज्ञानपदार्थः उपासनम् ।

वैदिकं साधनं सर्वमविद्योत्थत्वकारणात् । *
तीव्रानर्थफलायेति ब्रह्मविद्याधिकारतः ।

विवक्षितोऽर्थो यत्नेन तद्वैराग्यविधित्सया ॥ (5)
यतोऽविरक्तः संसारान्नात्मज्ञानाय कल्पते ।

तदेतदात्मतत्त्वं हि पदनीयमितीरणात् ॥ (6)
पुत्रादिभ्यस्तथा प्रेयानिति वक्ष्यति सादरम् ॥ (7)

वेदोक्तं निखिलं पुंसः सत्वशुद्धिफलं स्मृतम् । *
कर्म ध्यानादिकं यत्नात् श्रेयोऽर्थिभिरनुष्ठितम् ॥ (8)

सम्यक्संशुद्धधिषणः संसारं वेत्ति तत्त्वतः ।
दृष्टसंसारतत्त्वश्च वैराग्यं संसृतेर्व्रजेत् ॥ (9)

प्रतिपादनस्य किं फलम्, अत्राह—**तद्वैराग्येति** । (5) वैराग्यं वा किमर्थम्? अत्राह—**यत इति** । कर्मज्ञानफलादविरक्तस्य न विद्याधिकारः । अतो वैराग्यवर्णनमित्यर्थः । परस्य न त्रय्यन्ततात्पर्यगोचरत्व[म]पु(न)[म]र्थत्वात्, अत्राह—**तदेतदिति** । 'तदेतत्पदनीयम्' (बृ. 3-4-7) इति वाक्यात् पुमर्थत्वं सिद्धम् । अपुमर्थस्य [1]पदनीयत्वानुपपत्तेः । (6) [2]हेत्वन्तरमाह—[3]**पुत्रादिभ्य इति** । (7) ज्ञानकर्मणोरनर्थफलत्वे कर्मशास्त्रमनर्थपर्यवसायि, इत्याशङ्क्याह—**वेदोक्तमिति** । (8) सत्वशुद्ध्या, किं स्यात्, अत्राह—**सम्यगिति** । (सि)[शु]द्धान्तःकरणस्य [4]नित्यानित्यवस्तुविवेको भवतीत्यर्थः । विवेको वैराग्यहेतुः, इत्याह—**दृष्टेति** । (9) यत्किञ्चिद्विषयवैराग्यं सर्वेषां सर्वदास्ति, इत्यत आह—**आविरिञ्चादिति** । कर्मकाण्डप्रकाशितसाधनादेव संसारोपरमलाभात् ब्रह्मविद्यानर्थक्यम्,

---

* **अविद्योत्थत्वकारणादिति** अहं कर्तेति मिथ्याज्ञानजन्यत्वात् कर्मादेः अविद्योत्थत्वं बोध्यम् ।

1. **पदनीयत्वानुपपत्तेः**—गमनीयत्वानुपपत्तेः ।
2. **हेत्वन्तरमिति** आत्मतत्त्वस्य पुमर्थत्वे इत्यादिः ।
3. **पुत्रादिभ्य इति** परमप्रेमास्पदानन्दरूपत्वेन पुमर्थत्वमुक्तं बोध्यम् ।

* **सत्वशुद्धिफलमिति** तथा च प्रणाड्या कर्मशास्त्रस्य परमपुमर्थपर्यवसायित्वमिति भावः ।

4. **नित्यानित्यवस्तुविवेक इति** अयमेव संसारतत्त्ववेदनपदार्थः ।

आविरिञ्चाद्विरक्तो हि संसारान्निविवृत्सति ।
न चोक्तज्ञानकर्मभ्यः सा निवृत्तिः प्रसिद्ध्यति ॥ (10)

वाङ्मनःकायकर्मभ्यः तत्साध्यकटुकत्वतः ।
व्युत्थायानर्थनिःसारसाधनान्यनुमार्गति ॥ (11)

नित्यान्यपि च कर्माणि तत्संस्कारफलाश्रयात् ।
परित्यजति सर्वाणि कृत्स्नसंसारदोषदृक् ॥ (12)

संसारवह्निजं दुःखं संभावयति ना परम् ।
भूयो दुःखं किमन्यत् स्यान्नित्यानुष्ठानहानितः ॥ (13)

अत्राह—**न चेति** । (10) कुतस्तर्हि [1]तत्सिद्धिः, अत्राह—**वागिति** । अनर्थनिःसारसाधनानि—[2]संसारान्निर्गमनोपायान् । सर्वकर्मत्यागपूर्वकश्रवणादिजन्यज्ञानं संसारनिवर्तकमित्यर्थः । (11) काम्यनिषिद्धयोस्त्यागेऽपि न नित्यानां त्यागः, [3]यावज्जीवश्रुतिचोदितत्वात्, अत्राह—**नित्यानीति** । (12) कथं तर्हि नित्यकर्मणां त्यागः, [4]अकरणे प्रत्यवायप्रसङ्गात्, अत्राह—**संसारेति** । [5]शुद्धान्तःकरणः हिरण्यगर्भपर्यन्तं फलं जननमरणादिसंसारतापजं दुःखं संभावयति । तस्य सांसारिकं सकलं कुम्भीपाकवदनुभवतः नित्यानुष्ठानहानितः भूयः—दुःखतरं दुःखं किमन्यत् स्यात् । तस्मादेव तामवस्थामापन्नः [6]करणादेव [7]बहुतरदुःखं मन्यमानः त्यजत्येव

---

1. **तत्सिद्धिः** — संसारनिवृत्तिसिद्धिः ।
2. **अनर्थनिःसारसाधनानि** इत्यस्य, अनर्थः- संसारः तस्मात् निःसारः—**निर्गमनं**, तस्य साधनानि इत्यर्थमभिसन्धायाह—**संसारान्निर्गमनोपायानिति** । "अनर्थे संसारे निःसारे ध्वस्तिहेतुसम्यग्ज्ञानार्थं कर्माणि संन्यस्योक्तोऽधिकारी श्रवणादीनि पुनः पुनरावर्तयति ।" इति **शास्त्रप्रकाशिका** ।
3. **यावज्जीवश्रुतीति** 'यावज्जीवमग्निहोत्रं जुहुयात्' इति श्रुतिः ।
4. **अकरणे प्रत्यवायप्रसङ्गादिति** 'अकुर्वन्विहितं कर्म' इत्यादिशास्त्रादिति भावः ।
5. **शुद्धान्तःकरण इति** 'संभावयति ना परम्' इत्यत्र 'ना' इति पदार्थविवरणम् ।
6. **करणादेवेति** नित्यकर्मणामित्यादिः ।
7. **बहुतरदुःखमिति** नित्याकरणजदुःखादित्यादिः ।

मुक्तेर्बिभ्यत इत्यादि तथाच श्रुतिशासनम् ।
तन्मूला च स्मृतिः साक्षाद्वेदानित्यादिका स्फुटा ॥ (14)

अविज्ञातं परं तत्त्वं जनिमत्कारणं श्रुतौ ।
* आन्त्यात्कार्यात्तदेव स्यात्सर्वकार्यविशेषणम् ॥ (15)

* तेन तेनात्मकार्येण स्वात्माभासतमोऽवधिः ।
विशिष्टः ससृजे विष्णुस्तेजोऽबन्नादि मायया ॥ (16)

अविद्ययाऽस्य स्रष्टृत्वं कूटस्थस्यापि सर्वदा ।
यथावस्तुधियः सूतेः प्राङ्नित्यं तेन तन्मतम् ॥ (17)

नित्यान्यपीत्यर्थः । (13) विरक्तस्य कर्मत्यागे मानमाह—**मुक्तेरिति** । स्फुटा—निश्चितप्रमिति(:) जनिकेत्यर्थः । (14)

ब्रह्मैव समस्तजगत्कारणमिति प्रतिपादनम्

एवं महातात्पर्यमुक्त्वा, इदानीं ब्रह्मैव समस्तजगत्कारणमिति प्रतिपादयति—**अविज्ञातमिति** । ब्रह्मणो मूलकारणत्वेऽपि सूत्रादेरवान्तरकारणत्वम्, अत्राह—**आन्त्यादिति** । सर्वकार्यविशेषणं—[1]सर्वकार्यकारणमित्यर्थः । (15) स्वयंप्रकाशस्याविज्ञातत्वमयुक्तम्, इत्याशङ्कयोक्तं विशदयति—**तेनेति** । स्वस्या[त्मन आ] भासो यस्मिन्नज्ञाने तत् स्वात्माभासं तमः, तत् अवधिः — [2]परिच्छेदहेतुः यस्य सः स्वात्माभासतमोऽवधिः । तेन तेन—पूर्वपूर्वसृष्टकार्येण विशिष्टः ससृजे इत्यर्थः । (16) [3]कारणत्वे मृदादिवत् विकारप्रसङ्गः, अत्राह—**अविद्ययेति** । कारणस्यानित्यत्वे [4]तत्परम्परापातात् तस्य नित्यत्वे वाच्ये, सदा कार्यं स्या[द]तः

---

* **आन्त्यात्कार्यादिति** अन्त्यं कार्यं पृथिवी, तत्पर्यन्तमित्यर्थः ।

1. 'सर्वकार्यविशेषणम्' इत्यत्र विशेषणशब्देन व्यावर्तकं लभ्यते । कार्याणां व्यावर्तकश्च कारणरूपो विवक्षितः इत्याशयेनाह—**सर्वकार्यकारणमित्यर्थ इति** ।

* "कथं निर्विकारस्य परस्य कारणतेत्याशङ्कय, अविज्ञातमिति सूचितं विशदयति—**तेनेति** ।" इति **शास्त्रप्रकाशिका** ।

2. **परिच्छेदहेतुः** — उपाधिरिति यावत् ।

3. **कारणत्वे इति** ब्रह्मणः इत्यादिः ।

4. **तत्परम्परापातात्**—कारणपरम्पराप्रसङ्गात् ।

ज्ञानकर्मादितन्त्रं सत्सूत्रं जज्ञे ततो विभोः ।
ज्ञानक्रियाशक्तिमद्यत्रेदं जगदाहितम् ॥ (18)
विराडपि ततो जातस्त्रैलोक्यात्मकदेहवान् ।
यथोक्तज्ञानकर्मभ्यां मनोर्जन्म ततोऽपि च ॥ (19)
या महाप्रलयात् सृष्टिः सा विरिञ्चस्य वक्ष्यते ।
आन्तरप्रलयाद्या तु विराजोऽधीयमुच्यते ॥ (20)
'स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ॥' (21) *
* प्रत्यग्रूपः परार्थेभ्यो योऽनन्यानुभवं प्रति ।

---

[1]किमिदमुक्तं प्रागिति, तत्राह—नित्यमिति । प्राक्शब्दः [2]उभयत्र संबध्यते । [3]प्राक् नित्यमित्यर्थः । (17) [अ] विशेषेण जनिमत्कारणं ब्रह्म इत्युक्तम् । तत्र क्रमं दर्शयति—ज्ञानेति । आदिपदेन तत्संस्कारस्वीकारः । (18–19) मूलकारणात् हिरण्यगर्भस्य जन्म कुत्र प्रतिपाद्यते, तत्राह—येति । 'तद्धेदम्' (बृ. 3-4-7) इत्यादौ वक्ष्यते इत्यर्थः । विराजो मन्वादिसृष्टिरत्रोच्यते, इत्याह—आन्तरेति । आन्तरप्रलयादधि—परस्तात् या विराजो मन्वादिसृष्टिः सेयं 'इममेवात्मानं द्वेधापातयत्' (बृ. 3-4-3) इत्यत्रोच्यते इत्यर्थः । (20) विराजो मन्वादिस्रष्टृत्वे पुराणवाक्यं प्रमाणयति—स वै इति । (20)

प्रथमकण्डिकार्थनिरूपणम्
उद्भाष्यं वार्त्तिककाराणां परमात्मपरत्वेन
'आत्मैवेदम्' इति वाक्ययोजनम्

एवं भाष्याभिमततात्पर्यमभिधाय परमात्मपरत्वेन '[4]आत्मैवेदम्' इत्यादि

---

1. किमिदमुक्तं प्रागितीति यथावस्तुधियः सूतेः — उत्पत्तेः प्राक् स्रष्टृत्वमिति न युक्तमिति भावः।
2. उभयत्र संबध्यते—स्रष्टृत्वमित्यत्र, नित्यमित्यत्र च संबध्यते ।
3. प्राक् नित्यमिति तत्त्वधियोऽनन्तरं कार्यवत् कारणमपि नास्त्येवेति भावः ।
* अग्रे व्यष्टीभूतस्थूलपिण्डसर्गात् पूर्वमिति यावत् ।
भूतानां—व्यष्टीभूतस्थूलपिण्डानाम् ।
4. आत्मैवेदमिति 'आत्मैवेदमग्र आसीत् पुरुषविधः ।' इति श्रुतिवाक्यम् ।
* 'प्रत्यग्भूतः' इति मु. पु. पाठः ।

प्रथते स इहात्मेति जगत्यस्मिन्निगद्यते ॥ (22)

* आत्माभासैकसंसिद्धेः तदज्ञानसमुद्भवम् ।
आत्मैव भण्यते मोहात् तदात्माव्यतिरेकतः ॥ (23)

एवेत्यवधृतावेतदात्मीयार्थनिषेधकृत् ।
मन्वादिजन्मनः पूर्वमात्मैवेदमभूज्जगत् ॥ (24)

* अध्यात्मादिविभागे स्यादात्मात्मीयादिभेदधीः ।
तस्मिन्नसति सा न स्यादपेक्षाविरहाद्विभोः ॥ (25)

वाक्यं योजयिष्यन् आत्मपदार्थमाह—**प्रत्यगिति** । परार्थेभ्यः—कार्यकारणेभ्यः प्रत्यग्रूपः अनन्यानुभवं प्रति प्रथते–स्वतः प्रकाशते यः, सः इह वाक्ये आ(त्मने) [त्मे]त्युच्यते इत्यर्थः । (22) कार्यकारणविलक्षणत्वादात्मनः परिच्छेदः स्यात्, अत्राह—**आत्मेति** । 'भूतात्मा चेन्द्रियात्मा च' इत्यादौ यथा देहादिकमात्मन्यध्यासादात्मशब्दं तथा कार्यादेरप्यात्ममात्रत्वात् [1]न वस्तुतः परिच्छेद इत्यर्थः । (23) एवशब्दार्थमाह—**एवेति** । **मन्वादिजन्मनः** आकाशादिजन्मनः इत्यर्थः । (24) जगतः अज्ञातात्ममात्रत्वेऽपि तद्विषयाज्ञानसद्भावात् एवेति अन्ययोगव्यवच्छेदासिद्धिः, अत्राह—**अध्यात्मादीति** । अपेक्ष्यते इत्यपेक्षा-व्यवह्रियमाणमज्ञानं, तदभावादित्यर्थः । (25) प्रागुत्पत्तेः दृग्दृश्यप्रपञ्चाभावे शून्यतैव स्यात्,

---

* "भूतात्मा इन्द्रियात्मा इत्यादौ भूतादावप्यात्मशब्दात् तदेवात्र किं न ग्राह्यमित्याशङ्क्याह—**आत्माभासेति** । आत्माज्ञानोद्भूतं भूतादि जाड्यात् न स्वतः सिद्ध्यति । अतः चिदाभासेनैकेनैव तत्सिद्धेः तदात्मन्यध्यस्तं आत्मेत्युच्यते । कल्पितस्याधिष्ठानमन्तरेण सत्तास्फूर्त्योरभावात् तत् भूतादि आत्माभासत्वात् नात्रात्मशब्दः । न हि संभवति मुख्ये गौणार्थो ग्राह्यः इत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

1. **न वस्तुतः परिच्छेद इति** कार्यकारणादेरवस्तुत्वादिति भावः ।

* "प्रागवस्थायामज्ञातात्ममात्रत्वेऽपि ज्ञेयस्य जगतः, न तज्ज्ञानाभावः ब्रह्मणः सर्वज्ञत्वात् । अतोऽवधारणानुपपत्तिः, इत्याशङ्क्याह—**अध्यात्मादीति** । ...कथं तर्हि तदा ब्रह्म सर्वज्ञं, न हि कां चिदवस्थामास्थाय तत् तथोच्यते, तत्राह—**अपेक्षेति** । अथत्यर्थे तज्ज्ञानापेक्षाभावात् ईश्वरस्य विद्यमानसर्वार्थाप्रतिबन्धज्ञानात् सर्वज्ञतेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

मिथोऽपास्तव्यपेक्षं हि नामरूपादिमज्जगत् ।
प्रत्यङ्मात्रप्रमाणं स्यात्परागेवैति चित्रताम् ॥ (26)

अपामार्गलतेवायं विरुद्धफलदो भवः ।
प्रत्यग्दृशां विमोक्षाय संसाराय पराग्दृशाम् ॥ (27)

* व्याकृताव्याकृतं विश्वं प्रत्यक्प्रत्ययमात्रकम् ।
मोहोत्थाहमिति ज्ञानात् भयारत्यादिमद्भवेत् ॥ (28)

अहं ममेति विज्ञानं विद्यया ध्वंसितं यदा ।
तदाद्वये दृशौ दृष्टे न भयादि तमोहृतेः ॥ (29)

इदंधीनामगम्यं यच्चित्रं सत्प्रथते हिरुक् ।
मन्वादिसृष्टेस्तत्पूर्वमात्मैवाभूदिदं जगत् ॥ (30)

अत्राह—**मिथ इति** । इदं प्रमाणं, इदं प्रमेयं, अयं प्रमाता इति परस्परापेक्षया व्यक्त्यभावादात्ममात्रमित्यर्थः । आत्मनः एकरूपत्वात् तन्मात्रत्वे जगतोऽप्यैकरूप्यं स्यात्, अत्राह—**परागिति** । सृष्टौ व्यज्यमानं विचित्रमेव व्यज्यते इत्यर्थः। (26) प्रतीचो जगच्चित्रभित्तित्वे किं फलम्, इत्याशङ्क्य, ज्ञातस्य तस्य मुक्तिहेतुत्वं, अज्ञातस्य (सं)बन्धहेतुत्वम्, इति सोदाहरणमाह—**अपामार्गेति** । अपामार्ग-मञ्जरी यथा अग्रत आरभ्य अधः स्पृश्यमाना सुस्पर्शा सुखकरी भवति, वैपरीत्येन दुस्पर्शा दुःखकरी(वे)त्यर्थः । (27) नाज्ञा(ना)त आत्मा बन्धहेतुः आत्मत्वात् ज्ञातात्मवत् इत्याशङ्क्य, 'सोऽबिभेत्' (इति) इत्यादिश्रुतिविरोधः, इत्याह—**व्याकृतेति** । व्यक्ताव्यक्तरूपेण वर्तमानं प्राणिजातं प्रत्यक्चैतन्यसाक्षिकं भयारतिकामादिदूषितं भवतीत्यर्थः । (28) ज्ञातात्मा भयादिमान् आत्मत्वात् अज्ञा[ता]त्मवत्, इत्यत्राह—**अहमिति** । 'न बिभेति कुतश्चन' (तै. 2-9) इत्यादिश्रुतिविरोध इत्यर्थः । (29)

प्रासङ्गिकं परिसमाप्य, प्रकृतमक्षरव्याख्यानमनुसरति—**इदमिति** । इदं-धीनामगम्यं—पराक्प्रत्ययशब्दगम्यम्, प्रत्यक्षादिसंनिधापितं जगच्चित्रं विद्याकर्म-

---

* निरुक्तरीत्या बन्धमोक्षहेतौ तस्मिन्, साक्षिप्रत्यक्षं मानमित्येवंपरतां '**व्याकृता-व्याकृतम्**' इति वार्त्तिकस्य वर्णयति **शास्त्रप्रकाशिका** ।

एतावद्वास्तवं वृत्तं मोहोत्थं भण्यतेऽधुना ।
कोशपञ्चकतां यातः प्रत्यगज्ञानतो यतः ॥ (31)

स एव परमोऽप्यात्मा कामाविद्याद्युपप्लवात् ।
संवृत्तः पुरुषाकारः इत्यनुक्रोशतीव नः ॥ (32)

आनन्दाद्यन्नपर्यन्तान्कारणेतररूपिणः ।
पुरुषादिप्रकारांस्तान् प्रत्यक्तत्त्वानलक्षयत् ।
पुरुषविध इत्युक्त्या ह्यूर्ध्वं चैवं प्रवक्ष्यते ॥ (33)

वाङ्मनःप्राणकोशांस्त्रीन् विराडन्नमयः स्वयम् ।
तद्वेदमिति चानन्दो नैवेहेति तथोच्यते ॥ (34)

पूर्वप्रज्ञाभिरुपचितं, हिरुक् प्रथते—प्रत्यग्रूपाद्भिन्नमेव यद्भातीत्यर्थः । [1]मन्वादिसृष्टेः—आकाशादिसृष्टेः प्रागित्यर्थः । (30) 'पुरुषविधः' इति [2]कोशपञ्चकतापत्तेरुच्यमानत्वात् [3]सापि पारमार्थिकी, इत्यत्राह—**एतावदिति** । यत् पुरुषविधत्वं मोहोत्थमित्युक्तम्, किं तदिति, तदाह—**कोशेति** । प्रत्यक् परमात्मापि अज्ञानतः कामादिदोषसंसर्गात् कोशपञ्चकतां यातः — अन्नम(था)[या]द्यानन्दमयान्ताना(मा)त्मत्वेन मन्यमानः पुरुषाकारः संवृत्तः, किमतः वर्तते, इति मातृस्थानीया श्रुतिरनुक्रोशतीत्यर्थः । (31–32) पुरुषविधशब्दः पुरुषप्रकारवचनत्वात् कोशपञ्चकं न प्रतिपादयेत्, अत्राह—**आनन्देति** । आनन्दमयः कारणकोशः, कार्यमयः अन्नमयकोशः, [4]मध्यतनकोशास्त्रयः कार्यकारणरूपाः । तान् प्र[त्य]क्तत्त्वान्—प्रत्यगात्मन्यध्यस्ततया तन्मात्र[रूपान्], पुरुषविधशब्दः [5]अलक्षयदित्यर्थः । पुरुषादीत्यादिपदेन कर्त्रादिरूपसंग्रहः । पुरुषविधोक्त्या श्रुतिः कोशपञ्चकमलक्षयत्, इत्यत्र गमकमाह—**ऊर्ध्वं चेति** । (33) एतदेव व्यनक्ति—**वाङ्मन इति** । 'मनो वाचं प्राणम्' (बृ. 3-5-3) इति मनोमयविज्ञानमयप्राणमयाः

---

1. मन्वादिसृष्टेरिति इदं मन्वादिजगत् सृष्टेः पूर्वम् इति योजना शास्त्रप्रकाशिकाभिमता बोध्या ।
2. कोशपञ्चकेति अन्नमय प्राणमय मनोमय विज्ञानमयानन्दमयाः पञ्च कोशाः ।
3. सापि—पञ्चकोशात्मकतापि ।
4. मध्यतनकोशास्त्रयः — प्राणमयमनोमय विज्ञानमयाः त्रयः कोशाः ।
5. अलक्षयत्—लक्षणावृत्त्या अबोधयत् ।

अग्निर्मूर्धेति च तथा मन्त्रेणापि प्रकाशितः ।
सामानाधिकरण्यं च तद्धेदमिति युक्तिमत् ॥ (35)

पृथिव्याद्यक्षरान्तश्च प्रश्नो वाचक्नवस्तथा ॥ (36)

प्रत्यग्दृष्टयनुविद्धाहंप्रत्ययैकप्रमाणकः ।
सोऽनुवीक्ष्यात्ममोहोत्थदृष्टयाऽविद्योत्थरूपकम् ॥ (37)

---

[1]त्र्यन्नप्रकरणे, [2]वाक्शब्देन विज्ञानोपलक्षणात् । 'पुरुषविधः' इत्यन्नमयोऽभिहितः । 'तद्धेदं तर्ह्यव्याकृतम्' (बृ. 3 - 4 - 7) इति कारणकोशोऽभिधीयते । 'नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत्' (बृ. 3 - 2 - 1) इति च कारणकोश उक्त इत्यर्थः । (34) 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः' (मु. 2 - 1 - 4) इत्यादिमन्त्रोऽप्यन्नमयकोशे मानम्, इत्याह—**अग्निरिति । प्रकाशितः** अन्नमय इति शेषः । परस्यैव कोशपञ्चकात्मकत्वे लिङ्गान्तरमाह—**सामानाधिकरण्यञ्चेति** । जगद्रूपकोशपञ्चकवाचीदंशब्दस्य अज्ञातपरवाचकतच्छब्दसामानाधिकरण्यं, पृथिव्यादिपञ्चकस्य[3]परपर्यवसानगोचरः (वावक्तव्यः) [[4]वाचक्नवः] प्रश्नश्चात्र लिङ्गमित्यर्थः । (35–36)

'आत्मैवेदम्' इत्यत्र विराडात्मपदार्थ इति भाष्यमतानुसारेण 'सोऽनुवीक्ष्य' इत्याद्युत्तरश्रुत्यर्थनिरूपणम्

एवं स्वमतेन आत्मशब्दः परमात्मगोचरः इति व्याख्यातम् । इदानीं **भाष्यकाराभिमतं** विराजमेवात्मशब्देन गृहीत्वा, आह—**प्रत्यगिति** । प्रत्यक्चैतन्यानुगताहंधीमात्रगम्यो विराडात्मा प्रत्यगविद्यामयं विश्वं अविद्योत्थया दृष्ट्या

---

1. **त्र्यन्नप्रकरणे** सप्तान्नब्राह्मणे अन्नत्रयनिरूपणावसरे इति यावत् । अभिधीयन्ते इति शेषः ।

2. कथं तत्र कोशत्रयाभिधानं, विज्ञानबोधकपदाभावात्, इत्याशङ्कयाह—**वाक्शब्देनेति** । 'वाङ्मनःप्राणकोशांस्त्रीन्' इत्यत्र वक्ष्यतीति शेषः ।

3. **परपर्यवसानेति** अक्षरशब्दितेत्यादिः ।

4. **वाचक्नवः प्रश्नः** — वाचक्नवी गार्गी । तया कृतः वाचक्नवः प्रश्नः पञ्चमाध्यायस्थः ।

यदभ्यस्तं पुरास्याभूदहमेवेदमित्यदः ।
दर्शनं तदपेक्ष्यायमनुशब्दः प्रयुज्यते ॥ (38)

अहमेवेदमस्मीति दर्शनं यत्सुभावितम् ।
तत्फलं यत्तदन्वीक्ष्य नात्मनोऽन्यद्ददर्श सः ॥ (39)

* तस्मादर्थान्तरासूतेरेकपिण्डात्ममात्रतः ।
नापश्यदपरं किञ्चित्सोऽहमित्यभ्यधादथ ॥ (40)

त्रैलोक्यात्मकदेहात्मा नापश्यदपरं पृथक् ।
भिन्नार्थानभिसंबन्धात् प्रतीच्येवास्य धीरभूत् ॥ (41)

* सशब्ददर्शनं यादृक् प्रागभ्यस्तं तथैव सः ।
व्याजहार फलावस्थो ह्यहमित्यात्मवाचकम् ॥ (42)

अनुवीक्ष्य नात्मनोऽन्यदपश्यदित्यर्थः । (37) [1]अपे(क्षा)[क्ष्या]संभवादनुशब्दोनर्थकः, अत्राह—**यदिति** । विराडहमिति यद्दर्शनं [2]साधकावस्थायामभ्यस्तं, दपेक्ष्य पश्चादर्थे प्रयुक्तोऽयमनुशब्द इत्यर्थः । (38) अन्वीक्षणे किं फलम्, ह—**अहमेवेति** । (39) अन्यस्यादर्शने हेतुमाह—**तस्मादिति** । [3]ततः ?, अत्राह—**सोऽहमिति** । (40) द्वितीयदर्शनाभावे मनसो निर्विषयवस्थानायोगात् आत्ममात्राकारेण परिणतम्, इत्याह—**त्रैलोक्येति** । (41) हंशब्दोल्लिखितप्रत्ययस्योत्पत्तौ को हेतुः, अत आह—**सशब्देति** । (42)

---

1. **अपेक्ष्यासंभवादिति** पूर्ववृत्तमपेक्ष्य पश्चादर्थे अनुशब्दः प्रयुज्यते अनुवदतीत्यादौ तथा दर्शनात् । विराजः इतः पूर्वमीक्षणस्य अपेक्ष्यस्यासंभवात् कथमन्वीक्ष्य इति अनुशब्दप्रयोग इति समुदायार्थः ।

2. **साधकावस्थायां**—यजमानावस्थायाम् ।
"सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत, सोऽहमस्मीत्यग्रे व्याहरत्, ततोऽहंनामाभवत् । तस्मादप्येतर्हि आमन्त्रितः अहमयमित्येवाग्रे उक्त्वा, अथान्यन्नाम प्रब्रूते यदस्य भवति ।" इति श्रुतिरत्रानुसन्धेया ।

* **तस्मादर्थान्तरासूतेः**—विराड्देहात् भिन्नस्य देहस्यानुत्पत्तेः ।

3. **ततः किमकरोत्**—द्वितीयादर्शनानन्तरं विराट् किमकरोत् ।

* 'सशब्दं दर्शनम्' इति मु. पु. पाठः ।

उपासनार्थं नामास्य तस्योपनिषदित्यतः ।
अतोऽहमित्यनेनैव ह्यात्मनाऽत्मानमभ्यधात् ॥ (43)

अहमित्यभ्यधादग्रे यस्मादात्मानमात्मना ।
अहंनामाभवत्तस्माद्विराडेष प्रजापतिः ॥ (44)

तत्कार्यगेण लिङ्गेन ज्ञापयन्कारणाभिधाम् ।
तस्मादपीति वक्त्येतां प्रसिद्धिं लोकसाक्षिकीम् ॥ (45)

यथोक्तमहिमः कस्मात्संवृत्तः पुरुषो विराट् ।
इति हेतूपदेशाय स यदित्यादि भण्यते ॥ (46)

मिथो जिगीषतां पुंसां ज्ञानकर्मादिसाधनैः ।
पुरा देवात्मतां योऽगात् प्लुष्टास्तेनेतरे जिताः ॥ (47)

अहंशब्दस्य सर्वप्राणिसाधारणत्वात् प्रजापतेः अहंनामत्वं किमर्थमुपदिष्टम्, अत्राह—**उपासनार्थमिति** । प्रमाणमाह—**तस्येति** । तस्य—आध्या(त्म)[त्मि]कस्य चाक्षुषपुरुषस्य अहमिति [1]रहस्यं नाम इत्यतो—वाक्यात् अहंनामत्वमुपासनार्थमित्यर्थः । अहंनामत्वस्योपासनार्थत्वादेव आत्मवाचकशब्दान्तरपरिहाणेन अहंनामप्रयोगः, इत्याह—**अत इति** । (43) 'ततोऽहंनामा' इत्येतदर्थमाह—**अहमिति** । (44) प्रजापतेरहंनामत्वे लोकप्रसिद्धिरपि प्रमाणम्, इत्याह—**तदिति** । (45) विराजि पुरुषशब्दप्रवृत्तिनिमित्तस्य दुर्निरूपत्वात् 'स वै पुरुष उच्यते' इत्यादिप्रयोगानुपपत्तिः, इति शङ्कते—**यथोक्तेति** । पुरुषत्वे हेतूपदेशपर[2]मुत्तरं वाक्यम्, इत्याह—**इति हेत्विति** । (46)

[3]वाक्यार्थं कथयति—**मिथ इति** । अहं पूर्वमहं पूर्वमिति [4]प्रजापतिप्रेप्सूनां मध्ये प्रथमत एव ज्ञानादिसाधनातिशयात् यः तद्भावं गतः तेन इतरे दग्धवत् जिता भवन्ति । तस्मात् [5]पूर्वमौषदिति पुरुषो विराडित्यर्थः । (47)

---

1. **रहस्यमिति** उपनिषत्पदविवरणम् ।
2. **उत्तरं वाक्यं**—"स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान् पाप्मन औषत्, तस्मात् पुरुषः ।" इति श्रुतिवाक्यम् ।
3. **वाक्यार्थं**—उक्तश्रुतिवाक्यार्थम् ।
4. **प्रजापतिप्रेप्सूनामिति** 'जिगीषताम्' इत्यस्य विवरणम् ।
5. **औषदिति**—उष दाहे । अदहदित्यर्थः ।

वैराजपदसंप्रेप्सोर्यजमानमहाजनात् ।
एनांस्यौषद्यतोऽग्रेऽतः संवृत्तः पुरुषाभिधः ॥ (48)

औषत् स्वान्पाप्मनः पूर्वं ज्ञानाद्यतिशयाग्निना ।
वैराजपदलिप्सुभ्यस्तेनासौ पुरुषाभिधः ॥ (49)

यथोक्तोपासनफलं वक्ष्यामीत्युत्तरं वचः ।
ओषतीत्यादिकं ज्ञेयं वेदोपासीत यः सदा ॥ (50)

योऽसावतीन्द्रियोऽग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
* सर्वभूतमयोऽचिन्त्यः स एष स्वयमुद्बभौ ॥ (51)

पुरुषोऽस्मीत्युपास्त्यर्थं पुरुषार्थोऽयमुच्यते ।
ओषतीत्युक्तितः साक्षात् गुणोपास्तिफलश्रवात् ॥ (52)

'तस्मात्पुरुषः' इत्येतदर्थमाह—[1]**वैराजेति** । (48) प्राजापत्यप्रतिबन्धकानामेनसां दाहकत्वं नोत्प्रेक्षामात्रम्, 'सर्वान्पाप्मन औषत्' इति श्रुत्योक्तत्वात्, इत्याह—**औषदिति** । (49) '[2]ओषति ह वै' इत्यादेस्तात्पर्यमाह—**यथोक्तेति** । प्राजापत्यप्रेप्सून् मन्दोपासकान् ओषित्वा पुरुषोऽभवदिति पुरुषगुणविशिष्टविराडुपासकः प्रजापतिरेव स्यादित्यर्थः । (50) विराडात्मनो जगद्रूपत्वे तदुपासनं सर्वेषां नित्यसिद्धत्वान्न विधेयम्, इत्याशङ्क्य, [3]तत्स्वरूपं **मनुनोक्तं** दर्शयति—**योऽसाविति** । अतीन्द्रियः—बुद्धीन्द्रियाविषयः । अग्राह्यः—कर्मेन्द्रियाविषयः । हेतुः—**सूक्ष्म इति** । तर्हि जगदात्मत्वं न स्यात्, अत्राह—**अव्यक्त इति** । रूपादिरहितत्वात् चक्षुराद्ययोग्यत्वं सूक्ष्मत्वमित्यर्थः । सः—परमात्मा सूत्रात्मनावस्थितो विराडात्मना प्रादुर्भवतीति ध्वनयति—**स एष इति** । अचि(न्तो)[न्त्यः]—बुद्धेरगोचर इति यावत् । (51) पुरुषनामनिर्वचनं निष्प्रयोजनं कस्मात् कृतं श्रुत्या, इत्यत्राह—**पुरुषोऽस्मीति** । (52)

---

1. **वैराजेति** प्राजापत्यप्रतिबन्धकपापदाहकत्वं पुरुषपदप्रवृत्तिनिमित्तमिति भावः ।
2. **ओषति हेति** 'ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति, य एवं वेद ।' इति फलश्रुतिः ।
3. **तत्स्वरूपं**—विराट्स्वरूपम् ।

* 'स एव' इति मु. पु. पाठः ।

अभिष्टुतं प्रयत्नेन फलं यज्ज्ञानकर्मणोः ।
एवंमहिमप्येतत् संसारं नात्यवर्तत ॥ (53)

प्रत्यग्याथात्म्यविज्ञानविरहादन्यसाधनम् । *
यावत्किंचित्फलं नादः सर्वानर्थनिवृत्तये ॥ (54)

निरस्तातिशयं कर्म ज्ञानं चाप्यापि बालवत् ।
यतोऽबिभेद्विद्यावानतोऽसावस्मदादिवत् ॥ (55)

* न ह्यविद्यामनादाय वस्तुयाथात्म्यसंश्रयात् ।
कश्चिद्बिभेत्यबिभेच्च तेनाविद्वान्प्रजापतिः ॥ (56)

प्रत्यग्याथात्म्यविद्यैव निःशेषपुरुषार्थकृत् ।
इत्येतत्प्रतिपत्त्यर्थं विराट्स्थानस्य कुत्सनम् ॥ (57)

द्वितीयकण्डिकार्थनिरूपणम्

प्रकृष्टमपि धीकर्मफलं संसार एवेति निरूपणम्

'[1]सोऽबिभेत्' इत्यादेस्तात्पर्यमाह—**अभिष्टुतमिति** । [2]धीकर्मफलं प्रकृष्टमपि संसार एवेति प्रतिपादनाय उत्तरं वाक्यमित्यर्थः । अभिष्टुतं—संस्तुतमित्यर्थः । (53) [3]प्राजापत्यपदस्य संसारान्तर्भावः केनाभिप्रायेणोच्यते, अत्राह—**प्रत्यगिति** । (54) धीकर्मफलात्मनः प्रजापतेः ज्ञानवत्त्वात् न संसारः, अत्राह —**निरस्तेति** । (55) (न)[भ]यादेर्वास्तवत्वात् न [4]तेनाविद्यानुमानम्, अत्राह—**न हीति** । (56) मन्दमध्यमाधिकारिणां साधनत्वेन विराडुपासनस्य विधित्सित-

---

1. **सोऽबिभेदिति** "सोऽबिभेत् । तस्मादेकाकी बिभेति । स हायमीक्षांचक्रे । यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति । तत एवास्य भयं वीयाय । कस्माद्ध्यभेष्यत् । द्वितीयाद्वै भयं भवति ।" इति श्रुतिरनुसन्धेया ।
2. **धीकर्मफलमिति** सौत्रं पदमिति यावत् ।
3. **प्राजापत्यपदस्य**—प्राजापत्यस्थानस्य । निरतिशयैश्वर्यवतोऽपीति शेषः ।

* **अन्यसाधनम्**—प्रत्यग्याथात्म्यज्ञानान्यसाधनाधीनम् ।

4. **तेन**—भयेन । प्रजापतेरिति शेषः । कल्पितस्यैवाविद्याजन्यत्वादिति भावः ।

* "विराजो भयहेतुरविद्यास्तीत्यन्वयमुखेनोक्त्वा, व्यतिरेकमुखेनाह—**न हीति**" इति शास्त्रप्रकाशिका ।

यतोऽबिभेद्विराट् पूर्वमेकाक्यस्मीति मूढवत् ।
तस्मात्तत्कार्यभूतोऽज्ञ एकाक्यद्य बिभेति ना ॥ (58)

एवं भयाभिभूतः स ईक्षांचक्रेऽथ लोकवत् ।
भयाहेतु यथातत्त्वदर्शनं कृतवान् विभुः ॥ (59)

स्रजीव कल्पिताहिर्ना तत्त्रासादाकुलेन्द्रियः ।
आलोचयेद्यथा तत्त्वं भीध्वस्तौ तद्वदीश्वरः ॥ (60)

आलोचयन्यथातत्त्वमपास्तध्वान्ततद्भवम् ।
अनन्यानुभवं साक्षात् ददर्शैकात्म्यमात्मनि ॥ (61)

* प्रत्यग्याथात्म्यविज्ञानशिखिप्लुष्टमहत्तमाः ।
आप्ताशेषपुमर्थोऽथ सोऽमन्यत ततो विराट् ॥ (62)

देहेन्द्रियमनोबुद्धिभावाभावादिसाक्षिणम् ।
प्रत्यञ्चं मदिति प्राह तद्दृष्ट्या नेक्षते द्वयम् ॥ (63)

त्वात् [1]तत्कुत्सनं न प्रस्तुतानुगुणम्, अत्राह—**प्रत्यगिति** । (57) '**तस्मादेकाकी बिभेति**' इत्येतदर्थमाह—**यत इति** । (58) भीतः किं कृतवान्, अत्राह—**एवमिति** । [2]तदीक्षणं स्पष्टयति—**भयेति** । [3]भयनिवर्तकं तत्त्वज्ञानं संपादितवानित्यर्थः । (59) भयनिवृत्तिहेतुतत्त्वज्ञानं स्पष्टयितुं '**लोकवत्**' इति दृष्टान्तं स्पष्टयति—**स्रजीवेति** । (60) आलोचनफलमाह—**आलोचयन्निति** । (61) आत्मसाक्षात्कारस्य किं फलम्, अत्राह—**प्रत्यगिति** । तत्त्वज्ञानानन्तरं ततः—ज्ञानात्, आप्ताशेषपुमर्थोऽहमित्यमन्यतेत्यर्थः । (62) '**यन्मदन्यन्नास्ति**' इति वाक्ये मच्छब्दार्थमाह—**देहेति** । आदिपदेन कर्तृत्वादिसंग्रहः । [4]वाक्यार्थेऽन्वयित्वंपदार्थज्ञानफलमाह—**तद्दृष्टयेति** । (63) पदार्थज्ञानादेव

---

1. **तत्कुत्सनं**—प्राजापत्यस्थाननिन्दा ।
2. **तदीक्षणं**—प्रजापतेरीक्षणम् ।
3. **भयाहेतु** इत्यत्र विवक्षितमर्थमाह—**भयनिवर्तकमिति** ।

* **प्रत्यग्याथात्म्येति** वार्तिके, 'अथशब्दो यदार्थे, ततःशब्दः तदर्थे' इति **शास्त्रप्रकाशिका** ।

4. **वाक्यार्थे**—तत्त्वमसि इति महावाक्यस्यार्थे ।

* प्रतीच्येव यदेहात्मा प्रत्यगात्मानमीक्षते ।
अन्वयव्यतिरेकाभ्यां ब्रह्मास्मीति तदेक्षते ॥ (64)

प्रत्यग्दृष्ट्या तदज्ञानतज्जं नैवेक्षते स्वतः ।
ब्रह्मप्रतीचोरैकात्म्यात् तद्दूरीकृत्य गर्जति ॥ (65)

प्रत्यक्तां मदिति प्राह त्वन्यन्नास्तीति चैकताम् ।
कस्मादिति च हेतूक्तिः भीत्याचिक्षिप्सया परम् ॥ (66)

प्रत्यक्ता ब्रह्मणो यस्मात् ब्रह्मता चात्मनः स्वतः ।
एवं सति कुतो मे भीरिति विद्वांस्त्रपायते ॥ (67)

ब्रह्मविद्यामृते नान्यद्भयहेतुविनाशकृत् ।
संभाव्यमिति नः प्राह तत एवेति च श्रुतिः ॥ (68)

प्रत्यगज्ञानमेवैकं भीतिहेतुर्भवेद्यदि ।
तत एवेति वचनं तदेवं स्यात्समञ्जसम् ॥ (69)

---

[1]कृतार्थत्वात् वाक्यार्थज्ञा [ना] नर्थक्यम्, इत्याशङ्क्य, वाक्यार्थधीहेतुत्वेनैव पदार्थधियः फलसाध (नेने) [नता,] इत्याह—**प्रतीचीति** । (64) 'कस्मान्नु बिभेमि' इत्यस्य तात्पर्यमाह—**प्रत्यगिति** । (65) वाक्यं व्याचष्टे—**प्रत्यक्तामिति** । यच्छब्दार्थमाह—**यस्मादिति** । कस्माच्छब्दः क्षेपार्थः, इत्याह —**आचिक्षिप्सयेति** । (66) हेतुत्वं स्पष्टयति—**प्रत्यक्तेति** । त्रपायते - लज्जावानिव भवतीत्यर्थः । (67) 'तत एवास्य भयं वीयाय' इत्यस्यार्थमाह—**ब्रह्मेति** । 'अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलम् ।' (भ. गी. 18-12) इत्यादिस्मृतिसमुच्चयार्थः चकारः । (68) किं तद्भयकारणमिति, तदाह—**प्रत्यगिति** । (69)

---

1. **कृतार्थत्वादिति** द्वैतदृष्टिध्वस्तेरिति भावः ।

* **आत्मा** अधिकारीति यावत् ।
वाक्यार्थज्ञानादेव द्वैतदृष्टिध्वस्तेः अलं पदार्थधियेत्याशङ्क्य, तां विना वाक्यार्थज्ञानायोगात् मैवमित्याह—**प्रतीचीति** इति **शास्त्रप्रकाशिका** ।

कस्माद्ध्यभेष्यदिति च पूर्वोक्तार्थसमर्थनम् ।
श्रुत्याकारि कुतो भीतिर्ध्वस्ताज्ञानतदुद्भवे ॥ (70)

प्रजापतेराविरभूत् कुत एकत्वदर्शनम् ।
शास्त्राचार्यादितद्धेतोरसत्त्वात्तदसंभवः ॥ (71)

*** अन्यानपेक्षं तदभूदिति चेन्नैवमिष्यते ।**
अस्मदादेरपि तथा प्रसङ्गः स्यान्न चेष्यते ॥ (72)

मतं जन्मान्तराभ्याससंस्कारोत्थमिदं यदि ।
नैरर्थक्यप्रसक्तिः स्यात् सम्यग्ज्ञानस्य सर्वतः ॥ (73)

पूर्व[1]वाक्यार्थसमर्थनार्थत्वादुत्त[2]रवाक्यस्य न पौन[3]रुक्त्यं शङ्कनीयम्, इत्याह—**कस्मादिति** । (70)

प्रजापतेः तत्त्वज्ञानं न संभवतीति आक्षेपः

प्रजापतेः तत्त्वज्ञानात्कैवल्यमुक्तमयुक्तम्, हेत्वभावेन ज्ञानासंभवात्, इत्याक्षिपति—**प्रजापतेरिति** । निरतिशयैश्वर्यवतो न शमादि संभवति, नापि संन्यासः [4]अनधिकारात्, न च शास्त्रश्रवणम्, आचार्यासंभवादित्यर्थः । (71) श्रुत्याचार्यादिनिरपेक्षं [5]तस्य ज्ञानम्, इति शङ्कते—**अन्यानपेक्षमिति** । विमतं शास्त्रादिसापेक्षं तत्त्वज्ञानत्वात् अस्मदादितत्त्वज्ञानवत्, इति निराकरोति—**नैवमिति** । (72) प्रजापतेः यजमानावस्थायां आचार्यादिप्रसादादुत्पन्नं ज्ञानम् । [6]**संस्कारात्** [7]फलावस्थायामेकत्वं[8] स्मर्यते, इति शङ्कते—**मतमिति** । दूषयति—**नैरर्थ(के)[क्ये]ति** । सर्वतः—सर्वस्य, अस्मदादेरित्यर्थः । (73) **नैरर्थक्यं**

---

1. **पूर्ववाक्यार्थेति** 'तत एवास्य भयं वीयाय' इति वाक्यार्थेत्यर्थः ।
2. **उत्तरवाक्यस्य**—'कस्माद्ध्यभेष्यत् द्वितीयाद्वै भयं भवति' इति वाक्यस्य ।
3. **पौनरुक्त्यमिति** 'तत एवास्य' इति पूर्ववाक्येनेत्यादिः ।
4. **अनधिकारादिति** मनुष्याधिकारत्वाच्छास्त्रस्येति भावः ।
5. **तस्य**—प्रजापतेः ।

* **अन्यानपेक्षमिति** शास्त्राचार्याद्यनपेक्षमित्यर्थः ।

6. **संस्कारादिति** तदाहितादित्यादिः ।
7. **फलावस्थायां**—प्रजापत्यवस्थायामिति यावत् ।
8. **एकत्वं**—प्रत्यगात्मैकत्वम् ।

दग्धाशेषान्तरायस्य विराजोऽपि महत्तमः ।
नाधाक्षीदात्मविद्या नः काऽऽशाऽविद्यापनुत्तये ॥ (74)

अन्त्य एव तमोघाती प्रत्ययश्चेन्मतं यदि ।
* स्यादनैकान्तिको हेतुरन्यान्त्येष्वसमीक्षणात् ॥ (75)

नान्त्योऽविद्यापनुद्बोध इति सर्वत्र गम्यताम् ।
ऐकात्म्यवस्तुबोधित्वादुपान्त्यप्रत्ययो यथा ॥ (76)

साधयति— **दग्धेति** । शुद्ध[1]सत्त्वस्यापि ज्ञानादज्ञानानिवृत्तौ संभावितानेककल्मषस्य अस्मदादेः का[2]श्रद्धेत्यर्थः । (74) यद्यपि साधकावस्थायामस्य ज्ञानमभूत्, तथापि तस्याज्ञानात् हिरण्यगर्भादिरूपेण जन्मादि संभवति । अन्तकालोत्पन्नस्यैव तस्य तन्निवर्तकत्वात्, अस्य चानन्तकालीनत्वात्, इति शङ्कते—**अन्त्य एवेति** । तमोनिवर्तकत्वे नान्त्यत्वादिकं प्रयोजकं, मरणकालीनदेहात्मप्रत्ययादौ [3]व्यभिचारात् । अत ऐकात्म्यज्ञानत्वमेव प्रयोजकं वाच्यम् । अत्र दूषणमाह— **स्यादिति** । अन्यान्त्येषु—उपान्त्यादिष्विति यावत् । (75) एतत् व्यनक्ति— **नान्त्य इति** । (76)

---

1. **शुद्धसत्वस्यापीति** प्रजापतेरिति शेषः ।

2. **का श्रद्धेति** ज्ञानादज्ञाननिवृत्तावित्यादिः ।

3. **व्यभिचारादिति** अज्ञाननिवर्तकत्वाभावादिति यावत् ।

* "अन्त्यस्य च ज्ञानस्य निवर्तकत्वे, किमन्त्यत्वं हेतुः, किंवा ज्ञानत्वं, आहोस्विदैक्यज्ञानत्वमिति, विकल्प्य, आद्ये दोषमाह—**स्यादिति** । प्रजापतेः अन्त्यमैक्यज्ञानमज्ञानध्वंसीत्यत्र अन्त्यत्वं हेतुः अज्ञानध्वंसित्वेनानियतः अन्यस्य यजमानस्य अस्मदादीनाञ्च अन्त्येषु ज्ञानेषु तद्ध्वंसादृष्टेरित्यर्थः । द्वितीयं दूषयति— **नान्त्य इति** अस्मासु प्रजापतौ च नान्त्यं ज्ञानं ज्ञानत्वादज्ञानध्वंसि, पूर्वज्ञानेषु बन्धहेत्वज्ञानध्वंसित्वादृष्टेः ज्ञानत्वहेतोरनैकान्त्यादित्यर्थः । तृतीयं प्रत्याह — **ऐकात्म्येति** प्रजापतेरन्त्यमैकात्म्यज्ञानं तथात्वादज्ञानध्वंसीत्ययुक्तम्, उपान्त्यतादृग्ज्ञानवत् अन्तेऽपि तदयोगात् उपान्त्ये हेतोरनैकान्त्यादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

स्याद्वा सत्साधनोत्पत्तेर्लोकवज्ज्ञानमात्मनः ।
यथेह कार्यकरणैः पुण्यकर्मोद्भवैर्नृणाम् ॥ (77)

'प्रज्ञा मेधा स्मृतिः स्थैर्यं ज्ञानादाववसीयते ।
वैशारद्यं तथैव स्याद्विराजोऽपि महाधियः ॥ (78)

'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यश्चैव धर्मश्च सहसिद्धमिति' स्मृतिः ॥ (79)

सहैव सिद्धं चेत् ज्ञानं, भीतिहेतोरसंभवः ।
ध्वान्तापध्वंसिरविणा न तमः सह जायते ॥ (80)

नैवमन्योपदेशार्थप्रतिषेधपरत्वतः ।
सहसिद्धगिरस्तस्मान्नैष दोषः प्रसज्यते ॥ (81)

श्रद्धातात्पर्यशुश्रूषाप्रणिपातादि साधनम् ।
विद्याजन्मैकहेतूनां वैफल्यं चेन्न तद्यतः ॥ (82)

निरुक्ताक्षेपस्य समाधानम्

तस्मात् प्रजापतेः ज्ञानं न संभवतीति पूर्वपक्षे, सिद्धान्तयति—**स्याद्वेति** । प्रकृष्टादृष्टाकृष्टकार्यकरणस्य जन्मान्तराभ्यस्तपदपदार्थवाक्यतदर्थस्य स्मर्यमाणपद-वाक्यादिसामर्थ्यात् अहं ब्रह्मास्मीति ज्ञानं संभवतीत्यर्थः । लोकवत् इति दृष्टान्तं विशदयति—**यथेति** । सकृदु[क्तार्थ]ग्रहणसामर्थ्य मेधा । स्थैर्यं—अचञ्चलचित्तत्वम् । दार्ष्टान्तिकमाह—**वैशारद्यमिति** । (77-78) [1]अत्र प्रमाणमाह—**ज्ञानमिति** । अप्रतिघं—अप्रतिबद्धमित्यर्थः । (79) ज्ञानस्य स(हि)[ह] सिद्धत्वे भयादेरनुपपत्तिः कारणाभावात्, इति शङ्कते—**सहैवेति** । (80) परिहरति—**नैवमिति** । [2]सहसिद्धशब्दस्य आचार्यादिनिरपेक्ष-परत्वात्, केवलश्रुतिपर्यालोचनात् अविलम्बेन ज्ञानोत्पत्तेः, भयादि हिरण्यगर्भस्य संभवतीत्यर्थः । (81) ज्ञानोत्पत्तेः प्राक् भयादिसंभवेऽपि नाचार्यादिनिरपेक्षज्ञान-

---

1. **अत्र प्रमाणं**— प्रजापतेः ज्ञानादिवैशारद्ये प्रमाणम् ।
2. **सहसिद्धशब्दस्य**—'ज्ञानमप्रतिघम्' इत्यादिस्मृतिघटकस्य सहसिद्धशब्दस्य ।

गुणवद्दोषवद्रूपविकल्पितसमुच्चितम् ।
विद्याजन्मैकहेतुत्वात् लोकवत्स्यात्समञ्जसम् ॥ (83)

रूपादिज्ञानसंभूतौ तद्धेतूनामनेकधा ।
विकल्पो दृश्यते लोके तथेहापीति निश्चितिः (84)

गुणवद्दोषवत्त्वश्च तथैव च समुच्चयः ।
प्रबोधोत्पत्तिहेतूनां दृष्टो बोधादिकार्यकृत् ॥ (85)

वृषदंशादयो रात्रौ नेत्रगोचरसंगति-
मात्रेण रूपं वीक्षन्ते नापेक्षन्ते ततोऽपरम् ॥ (86)

अतीतानागताद्यर्थज्ञानोत्पत्तौ च हेतुताम् ।
योगिनां मन एव स्यादस्माकं सर्व एव तु ॥ (87) *

दोषवद्गुणवत्त्वेन विकल्पोऽनेकधा पुनः ।
मातृमानप्रमेयाणां गुणवद्दोषवत्त्वतः ॥ (88)

संभवः, शा[1]स्त्रविरोधात्, इति शङ्कते—**श्रद्धेति** । आदिपदेन शमादिसंग्रहः । परिहरति—**न तदिति** । (82) 'यतः' इत्युक्तहेतुं स्पष्टयति—**गुणवदिति** । प्रकृष्टत्वं—गुण[व]त्त्वम् । अपकृष्टत्वं—दोषवत्त्वम् । श्रद्धादीनामुपचितानां अपचितानां, विकल्पितानां, समुच्चितानाञ्च ज्ञानजन्मन्येकस्मिन्नेव हेतुत्वात् न वैकल्यम्, रूपज्ञानहेतुचक्षुरालोकादीनां विकल्पसमुच्चयवदित्यर्थः । (83) 'लोकवत्' इत्युक्तं विशदयति—**रूपादीति** । (84) न केवलं विकल्पः, गुणवत्त्वादिकमपि दृश्यते, इत्याह—**गुणवदिति** । आदिपदेव व्यवहारसंग्रहः । (85) कर्तृभेदेन व्यवस्थितविकल्पमुदाहरति—(पृष्ट)[वृष]**दंशादय इति** । मार्जारादय इत्यर्थः । (86) विकल्पार्थे प्रकारान्तरमाह—**अतीतेति** । **हेतुतां** गतमिति शेषः । कथं तर्हि समुच्चयः, अत्राह—**अस्माकमिति** । (87) **धीहेतू**-नामुक्तविकल्पादन्यो विकल्पो न दृश्यते, अत आह—**दोषवदिति** । कुत एतत्, अत्राह—**मात्रिति** । माता—[2]परिणामी । तस्य दोषः मन्द-

---

* **अस्माकमिति** रूपादिज्ञानोत्पत्ताविति शेषः ।

1. **शास्त्रविरोधादिति** 'गुरुमेवाभिगच्छेत्' 'तद्विद्धि प्रणिपातेन' इति श्रुतिस्मृति-विरोधादित्यर्थः ।

2. **परिणामीति** प्रमातुरन्तःकरणस्य साभासस्य परिणामित्वमित्यर्थः ।

नातिक्रान्तभवे त्वासीत् ब्रह्मविद्या प्रजापतेः ।
इत्येतद्गम्यतेऽविद्याभयारत्यादिमत्त्वतः ।। (89)

* विद्यायां चेन्न मोक्षोऽभूत् कस्याशा नो वृथा भवेत् ।
मोक्षोऽभयश्रुतेर्नार्थस्तत्र को मोह इत्यतः ।। (90)

एकाकिनो विराजो वाऽविद्यासंवीतचेतसः ।
पूर्वजन्मोत्थसंस्काराद्भयमाविरभूदिह ।। (91)

प्रज्ञत्वादि । तद्राहित्यं गुणः । मानं—चक्षुरादि । तस्य दोषो मन्दशक्तित्वादि । तद्रहितत्वं गुणः । मेयदोषो दूरतादि । तद्रहितत्वं गुणः । तस्मात् प्रजापतेः श्रद्धादिव्यतिरेकेण ज्ञानोदयेऽपि अस्मदादेः श्रद्धादिहेतुसमुच्चयादेव तदुत्पत्तेः न श्रद्धादिवैफ(ल)[ल्य]मित्यर्थः । (88) यजमानावस्थायां प्रजापतेर्[1]ज्ञानं नाभू(ता)-दिति यदुक्तं, तदङ्गीकरोति—**नातिक्रान्तेति** । आदिपदेन क्षुधादिसंग्रहः । (89) यत्पुनः अन्त्यस्यैव ज्ञानस्याज्ञाननिवर्तकत्वं निराकृतं, तदपीष्टमेव, इत्याह—**विद्यायां चेदिति** । कस्य–प्रजापतेरिति यावत् । 'तत्र को मोहः कः' (ईशा. 7) इत्यादिवाक्यात् अभयश्रुतेः–श्रुतस्याभयस्य, नार्थः–असत्त्वमेव स्यादित्यर्थः । (90)

विराडैक्यज्ञानं भीतिनिवर्तकं, नैकात्म्यज्ञानमिति पूर्वपक्षः

विराडैक्यज्ञानं भीतिनिवर्तकमिति पूर्वपक्षं रचयन्, आदौ 'सोऽबिभेत्' इत्येतदर्थमाह—**एकाकिन इति** । वाशब्दः सिद्धान्तं व्यावर्तयति । एकाकित्वं न भयहेतुः द्वितीयदर्शनस्य तत्प्रयोजकत्वात्, अत्राह—**अविद्येति** । (91) 'स हायम्' इत्यादेरर्थमाह—**भयेति** । 'यन्मदन्यन्नास्ति' इत्यादेरर्थमाह—

---

1. ज्ञानं—प्रत्यग्याथात्म्यज्ञानम् ।

* "यदि विद्यायां विद्यमानायामेव प्रजापतेर्मोक्षो नाभीत्, तर्हि कस्य मोक्षविषयो मनोरथो वृथा न स्यात् । न हि प्रजापतेर्विद्या मुक्तये न पर्याप्ता, सैवास्माकं तद्धेतुरिति श्रद्धातुं शक्यम्" इत्यपि 'कस्याशा नो वृथा भवेत्' इति वार्तिकभागं विवृणोति **शास्त्रप्रकाशिका** ।

सोऽबिभेत् इत्यादि श्रुतिवाक्यं पूर्वमेवोद्धृतं बोध्यम् ।

भयप्रध्वंसिनं हेतुमीक्षांचक्रेऽथ जातभीः ।
मत्तो यन्नान्यदस्तीति ह्यथ कस्माद्बिभेम्यहम् ॥ (92)

एक एवाहमस्मीह द्वितीयाद्धि भयोत्थितिः ।
द्वितीयो न मदन्योऽस्ति कस्माद्धेतोर्भयं मम ॥ (93)

तत एव विराडैक्यविज्ञानादेव तद्भयम् ।
वीयाय न परज्ञानादतोऽरतिरपीष्यते ॥ (94)

एकाक्यस्मीति विज्ञानात् त्रैलोक्यात्मैकगोचरात् ।
अगाद्भयं यतोऽतोऽभूदरतिस्तस्य कामिनः ॥ (95)

सम्यग्विज्ञानविध्वस्तावविद्यायाः कुतोऽरतिः ।
ध्वस्तान्ध्यस्यापि सा चेत्स्यादनिर्मोक्षः प्रसज्यते ॥ (96)

नाविद्याघातिविज्ञानाद्भयध्वस्तिरभूद्विभोः ।
अरत्युद्भूतिलिङ्गेन ह्ययमर्थोऽवसीयते ॥ (97)

न चेहावसरोऽस्त्यस्य सम्यग्ज्ञानस्य कश्चन ।
पिण्डसृष्टौ प्रवृत्तायां नाकस्मात् ज्ञानगीः शुभा ॥ (98)

मत्त इति । इह कल्पादौ नान्यदस्ति, हि यस्मात्, अथ—अस्माद्धेतोः, अहं कस्मात् बिभेमि—किंनिमित्तं भयं करोमीत्यर्थः । (92) द्वितीयाभावस्य भयाभावप्रयोजकत्वं व्यतिरेकमुखेनाह—**एक एवेति** । अहमत्र चौरव्याघ्रादिश्राये अरण्ये एक एवास्मि, द्वितीयः सहचरो नास्तीति द्वितीयात् भयहेतुतया दृष्टात् चौरादेः भयोत्थितिः प्रसिद्धेत्यर्थः । (93) 'तत एवास्य' इत्यादेरर्थमाह—**तत एवेति** । (94) भयनिवर्तकै[1]क्यज्ञाना[2]दरतिरपि निवर्तेत, अत्राह—**एकाकीति** । (95) परज्ञानादेव विराजः भयनिवृत्तिः, अनिवृत्तिररतेः, इति किं न स्यात्, अत्राह—**सम्यगिति** । (96) फलितमाह—**नाविद्येति** । (97) दग्धाज्ञानलेशवशात् अर[3]त्याद्यनुवृत्तेः परज्ञानादेव विराजो भीतिध्वस्तिः, अत

---

1. ऐक्यज्ञानादिति विराडैक्यज्ञानादित्यर्थः ।
2. अरतिरपि—'स वै नैव रेमे' इति वाक्येनोच्यमाना प्रजापतेररतिरपि ।
3. अरत्याद्यनुवृत्तेरिति संभवादिति शेषः ।

प्रक्रियानुचितं वस्तु सुसाध्वपि समीरितम् ।
अकालकुसुमानीव नैव प्रीतिकरं सताम् ॥ (99)

मिथुनारतिमोहादेः प्रत्यग्याथात्म्यवेदिनः ।
आगमैस्तु निषिद्धत्वात् कुतस्तस्येह संभवः ॥ 100)

आत्मक्रीड आत्मरतिक्रियावानिति चागमः ।
तथात्ममिथुन इति यस्त्वात्मरतिरित्यपि ॥ (101)

कार्यकारणसंबन्धः साविद्यस्यैव युक्तिमान् ।
अपूर्वानपराद्युक्तेर्न ध्वस्तान्ध्यस्य युज्यते ॥ (102)

अप्युत्पन्नात्मबोधानामधिकारासमाप्तितः ।
अरत्यादि यथा दृष्टं तथैव स्यात्प्रजापतेः ॥ (103)

अप्रविष्टस्वभावस्य सशब्देन परिग्रहात् ।
स एष इत्यत्र वाक्ये नैवाकस्मिकशब्दनम् ॥ (104)

आह—**न चेति**। पिण्डसृष्टौ—विराजो मन्[1]वादिसृष्ट्यधिकारे। **नाकस्मात्**—प्रकरणविच्छेदं विनेत्यर्थः। (98) सृष्टिप्रकरणेऽपि विशि[2]ष्टफलत्वादात्मज्ञानमुपदिष्टम्, अत्राह—**प्र(क्र)[क्रि]येति**। (99) परज्ञानस्यानवकाशत्वे हेत्वन्तरमाह—**मिथुनेति**। आदिपदेन द्वितीयेच्छादिसंग्रहः। (100) [3]आगमानाह—**आत्मेति**। (101) उदाहृतश्रुतेरनुग्राहकतर्कमाह—**कार्येति**। (102)

निरुक्तपूर्वपक्षे सिद्धान्तकथनम्

सिद्धान्तयति—**अप्युत्पन्नेति**। व्यासपराशरप्रभृतीनामुत्पन्नविद्यानामपि प्रारब्धकर्मवशात् अरत्यादिदर्शनात्, प्रजापतेरपि स्वाधिकारसमाप्तिपर्यन्तमुत्पन्नविद्यस्य भयारत्यादि न विरुद्धमित्यर्थः। (103) यत्तु 'अकालकुसुमानीव' (वा. 99) इति [प्र][4]क्रियानुचितत्वमुक्तम्, अत्राह—**अप्रविष्टेति**। 'यन्मद-

---

1. **मन्वादिसृष्ट्यधिकारे**—मन्वादिसृष्टिप्रकरणे।
2. **विशिष्टफलत्वात्**—उत्कृष्टमोक्षफलसाधनत्वादिति यावत्।
3. **आगमानिति** परज्ञानवतः मिथुनीभावादिवारकानागमानित्यर्थः।
4. **प्रक्रियानुचितत्वं**—प्रकरणाननुरोधित्वम्।

अंसतोषाक्षमाहेतोः चेतसो यानवस्थितिः ।
सा विध्वस्तात्ममोहस्याप्यरतिः संबभूव ह ॥ (105)

यतोऽरतिग्रहग्रस्तधिषणोऽभूत्प्रजापतिः ।
एकाकी तेन तत्सृष्टावेको न रमते नरः ॥ (106)

श्रौत्यानया प्रसिद्ध्या तु कार्यलिङ्गैश्च कारणम् ।
सदानुमिन्वते सांख्यास्तथा चान्येऽपि वादिनः ॥ (107)

अरत्यपनुनुत्सुः सन् स द्वितीयं यथारुचि ।
विराडैच्छद्दतेऽविद्यां नेच्छेशस्योपपद्यते ॥ (108)

न्यन्नास्ति' इत्यत्रैवोक्तस्य ब्रह्मणः 'स एष इह प्रविष्टः' (बृ. 3-4-7) इति सशब्देन प्रकृतगामिना परामर्शात् अन्यत्र ब्रह्मप्रस्तावाभावात्, '[1]तद्धेदम्' (बृ. 3-4-7) इत्यत्रापि अप्रस्तुतपरामर्शायोगात् [2]अत्र ब्रह्म प्रस्तुतमित्यर्थः । (104)

तृतीयकण्डिकार्थनिरूपणम्

मनुसृष्टेः मनुष्यसृष्टेश्च निरूपणम्

'[3]स वै नैव रेमे' इत्यत्र अरतिपदार्थमाह—अस[न्तो]षेति । विषयाप्राप्त्या असन्तोषः, तदनन्तरमक्षमा, ततः चेतसोऽनवस्थितिः अरतिः अरमणं स्वानुभवसिद्धमित्यर्थः । (105) 'तस्मादेकाकी न रमते' इत्यस्यार्थमाह—यत इति । कार्यगतमरमणं [4]कारणस्थस्य गमकमित्यर्थः । (106) अत्र कार्यलिङ्गकानुमानगम्यं कारणमिति [5]परभ्रान्तिरेव मानम्, इत्याह—श्रौत्येति । (107) 'स द्वितीयमैच्छत्' इत्यस्यार्थमाह—अरतीति । ज्ञानोत्पत्तेः प्राक् अविद्वानै-

---

1. ननु 'तद्धेदं तर्ह्यव्याकृतमासीत्' इति वाक्ये प्रस्तुतस्य ब्रह्मणः 'स एष इह प्रविष्टः इति वाक्ये तच्छब्देन परामर्शोऽस्तु, इत्याशङ्कयाह–तद्धेदमित्यत्रापीति । तत्रापि तच्छब्दस्यैव श्रवणात्, ततः पूर्वमेव ब्रह्मणः प्रस्तुतत्वं वक्तव्यमिति भावः ।
2. अत्र—'यन्मदन्यन्नास्ति' इति वाक्ये ।
3. स वै इति "स वै नैव रेमे । तस्मादेकाकी न रमते । स द्वितीयमैच्छत् । स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ ।" इति श्रुतिरनुसन्धेया ।
4. कारणस्थस्य—प्रजापतिगतस्यारमणस्य ।
5. परभ्रान्तिः—परेषां सांख्यनैयायिकादीनां भ्रमः ।

* सोऽरत्यतिग्रहाविष्टस्तदपध्वस्तये विराट् ।
संसक्तजायापुंमानो यावांस्तावान् बभूव ह ॥ (109)

* स्त्रीपुंसौ संपरिष्वक्तौ यावन्मानौ बभूवतुः ।
स तावत्परिमाणोऽभूद्योगेन परमेश्वरः ॥ (110)

इच्छामात्रमरत्युत्थं पुंस्यलब्धस्थिति स्त्रियम् ।
प्रयुङ्क्ते योग्यतस्तस्मात्तदलब्ध्वाऽरतिः प्रभोः ॥ (111)

उपस्थिते च मनसि तस्य योषिद्भूत्क्रतोः । *
सत्यसंकल्पहेतोः स स्त्रीसक्त इव चाभवत् ॥ (112)

मिथुनद्वारिका यास्य सृष्टिः सैवाधुनोच्यते ।
यतोऽसाविममेवाथ द्विधात्मानमपातयत् ॥ (113)

इममेवेत्यवधृतेर्न विराजो द्विधाऽभिधा ।
यः स्त्रीपुंस्परिमाणोऽभूत् स एवातो द्विधा कृतः ॥ (114)

च्छदित्यर्थः । (108) 'स हैतावानास' इत्यस्यार्थमाह —सोऽरतीति । (109) तस्य तावत्परिमाणत्वे किं कारणम्, इत्याशङ्क्य, उपासनकर्मसामर्थ्यम्, इत्याह—स्त्रीपुंसाविति । (110) श्रुतौ स्त्रीग्रहणं किमर्थं कृतम्, अत्राह—इच्छेति । अरतेः स्त्रीसंबन्धनिवर्त्यत्वात् [1]तदलाभादभ्युत्थानात् योग्यतया द्वितीयं स्त्रीपिण्डमैच्छदित्यर्थः । (111) तदीयेच्छा मुधैव स्यादिष्टार्थसिद्धिकारणाभावात्, अत्राह —उपस्थिते चेति । (112) '[2]स इममेवात्मानम्' इत्यादेस्तात्पर्यमाह—मिथुनेति । मानसवाचिकसृष्टिव्युदासेन कायिकी सृष्टिरत्रोच्यते इत्यर्थः । (113) 'आत्मानमपातयत्' इत्ययुक्तम्, [3]कर्तृकर्मभावविरोधात्, अत्राह—इममिति ।

---

* अरत्यतिग्रहाविष्टः—अरतिरूपः यः अतिविषमग्रहः तेनाविष्ट इति यावत् ।
* स्त्रीपुमांसौ परिष्वक्तौ' इति मु. पु. पाठः । योगेन—उपासनाकर्मसामर्थ्येन ।
1. तदलाभात्—स्त्रीसंबन्धालाभात् ।
* क्रतोः—संकल्पात् ।
2. स इममेवेति "स इममेवात्मानं द्वेधाऽपातयत् । ततः पतिश्च पत्नी चाभवताम् । तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः । तस्मादयमाकाशः स्त्रिया पूर्यत एव । तां समभवत् । ततो मनुष्या अजायन्त ।" इति श्रुतिरनुसन्धेया ।
3. कर्तृकर्मभावविरोधादिति द्वेधापातनक्रियायामेकस्य विराजः कर्तृत्वस्य कर्मत्वस्य चायोगादिति यावत् ।

पातनादेव निर्वृत्तेः पतिपत्न्यौ जगत्यपि ।
योषिद्विदलवद्भाति पुंसः शुक्त्यादिभागवत् ॥ (115)
स्त्र्याकांक्षो हि तु भागोऽयं पुमाकाशस्ततः स्त्रिया ।
सम्यगापूर्यते व्योम शुक्तिसंपुटवद् ध्रुवम् ॥ (116)
विराजमसृजद्ब्रह्मा सोऽसृजत्पुरुषं विराट् ।
पुरुषं तं मनुं विद्धि कस्येयं मानवी प्रजा ॥ (117)
तां स्त्रियं मैथुनेनाथ मनुः समभवत्तदा ।
स्वकर्मभिर्नियुक्तः सन् तथा चोत्पाद्य कर्मभिः ॥ (118)
भूरिजात्यभिसंबन्धो जन्यकर्मवशात् स्त्रियाः ।
मनोश्चैवं ससर्जेदमापिपीलिकमात्मनः ॥ (119)
द्वन्द्वयुक्तं जगत्यस्मिन् यावत्किञ्चित्समीक्ष्यते ।
तदस्राक्षीन्मनुः सर्वं स्त्रीपुंद्वन्द्वप्रयोगतः ॥ (120)

---

[1]संसक्तस्त्रीपुंमानपिण्डं द्वेधा अपातयदित्यर्थः । (114) 'ततः' इत्यादेरर्थमाह—**पातनादिति** । 'तस्मात्' इत्यादेरर्थमाह—**योषिदिति** । विदलं—भागः । आदिपदेन वंशादिसंग्रहः । (115) 'तस्मादयमाकाशः' इत्यादेरर्थमाह—**स्त्र्याकांक्षो हीति** । व्योम—पुमाकाश इत्यर्थः । (116) 'द्वेधाऽपातयत्' इति **मनुशतरूपयोः** सृष्टेर्विवक्षितत्वात् [2]तयोः सृष्टिरनुक्तेति शङ्का न कार्या, इत्याह—**विराजमिति** (117) 'तां समभवत्' इत्यादेरर्थमाह—**तामिति** । शतरूपाया[3]मनोः सृष्ट्यानन्तर्यम(स्य)थशब्दार्थः । (118)

संक्षेपेण चतुर्थकण्डिकार्थनिरूपणम्

मनुना गवादिपिपीलिकान्तसृष्टिः

'[4]सा गौः' इत्यादेस्तात्पर्यमाह—**भूरीति** । (119) '**आपिपीलिकम्**' इत्येतद्विशदयति—**द्वन्द्वेति** । (120)

---

1. **संसक्तस्त्रीपुंमानपिण्डमिति** विराजः कर्तृत्वं तादृशपिण्डस्य कर्मत्वमिति न विरोध इति भावः ।
2. **तयोः**—मनुशतरूपयोः ।
3. **मनोरिति** अत्र चकारोऽध्याहार्यः ।
4. **सा गौरिति** "सा हेयमीक्षाञ्चक्रे कथं नु मात्मन एव जनयित्वा संभवति, हन्त

मनोः सशतरूपस्य पिण्डसृष्टिरिहोदिता ।
सोमाग्नीन्द्रादिका यापि साप्युक्तत्वदपेक्ष्य सः ॥ (121)

जगत्सृष्ट्वात्मनः साक्षात् ज्ञानकर्मादिसाधनः ।
अवेत्सृष्टं जगत् स्रष्टा ह्यहं वावाखिलं जगत् ॥ (122)

अहं वाव जगत्सृष्टं यतोऽसृक्ष्यहमेव तत् ।
सृष्टिनामा मनुर्जात एतस्मादेव कारणात् ॥ (123)

यथा मनुरिदं सृष्टमहमस्मीत्यबुध्यत ।
एवमन्योऽपि यो वेद सृष्टिकृत्स्यादसावपि ॥ (124)

पञ्चमकण्डिकार्थनिरूपणम्

'सोऽवेत्' इत्यादि व्याख्यातुं वृत्तं संकीर्तयति—**मनोरिति** । पिण्डात्–विराड्देहात् मनोः सृष्टिः, मनोः पिण्डात्–शरीरात् मनुष्यादिसृष्टिश्चोक्तेत्यर्थः । [1]अनुग्राहकसृष्टेरनुक्तत्वात् कथं 'अहं वा (च)[व] सृष्टिः,' इत्यवधारितवान्, अत्राह—**सोमेति** । या वक्ष्यमाणा अनुग्राहकसृष्टिः साप्युक्तैवानुग्राह्यसृष्टिवदिति मन्यते विरा(डे)[डि]त्यर्थः । (121)

वृत्तं संकीर्त्य, अन[2]न्तरवाक्यार्थमाह–**जगदिति** । (122) 'ततः सृष्टिरभवत्' इत्यस्यार्थमाह—**अहमिति** । (123) 'सृष्ट्याम्' इत्यादिफल[3]वचनार्थमाह—**यथेति** । (124)

तिरोऽसानीति । सा गौरभवद् ऋषभ इतरः । तां समेवाभवत् ततो गावोऽजायन्त बडवेतराभवत् अश्ववृष इतरः, गर्दभी इतरा गर्दभ इतरः, तां समेवाभवत् । तत एकशफमजायत । अजेतराऽभवत् बस्त इतरः, अविरितरा मेष इतरः, तां समेवाभवत् । ततोऽजावयोऽजायन्त । एवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यः तत्सर्वमसृजत ।" इति श्रुतिरनुसन्धेया ।

1. **अनुग्राहकसृष्टेः**—अग्न्यादिसृष्टेः ।
2. **अनन्तरवाक्येति** 'सोऽवेदेहं वा व सृष्टिरस्मि, अहं हीदं सर्वमसृक्षीति, ततः सृष्टिरभवत्' इत्युत्तरवाक्येत्यर्थः ।
3. **फलवचनेति** 'सृष्ट्यां हास्यैतस्यां भवति, य एवं वेद' इति फलवचनश्रुतीत्यर्थः ।

सृष्टानामथ भूतानामग्न्यादिप्रमुखा इमाः ।
अनुग्रहीत्रीर्वक्ष्यामीत्यतः प्रवृत्ते श्रुतिः ॥ (125)

भेदादधिकृतेरेषामग्न्यादीनामनेकधा ।
भेदो वर्णेषु सर्वेषु ब्रह्मक्षत्रादिलक्षणः ॥ (126)

अनुग्राहकदेवानां सर्गोऽयं प्रस्तुतो महान् ।
तत्राग्नेरुदितोत्पत्तिर्न त्विन्द्रादेरिहोच्यते ॥ (127)

अविद्याधिकृतौ तेषां सृष्टिरूर्ध्वं प्रवक्ष्यते ।
कर्माधिकृतिसंबन्धप्रतिपत्त्यर्थमेव तु ॥ (128)

षष्ठकण्डिकार्थनिरूपणम्

अनुग्राहकाग्न्यादिसृष्टिनिरूपणम्

'[1]अथेत्यभ्यमन्थत्' इत्यादेस्तात्पर्यमाह—**सृष्टानामिति** । अनुग्राह्य-ब्राह्मणादिसृष्ट्यनन्तरं अनुग्राहकाग्न्यादिसृष्टिं वक्तुमुत्तरवाक्यं प्रवृत्तमित्यर्थः । (125) अनुग्राह्यब्राह्मणादिरूपेण अग्न्यादीनामेवावस्थानस्य वक्ष्यमाणत्वात् कथमेकस्यै-वानुग्राह्यत्वमनुग्राहकत्वं च, अत्राह—**भेदादिति** । अग्न्यादीनामधिकृतेः अध्या-त्मा(दि)[धि]दैवभेदेन अनेकधा भेदात् एकैकदेवतायाश्च अनेकधाभावस्य **शाक-ल्यब्राह्मणे** वक्ष्यमाणत्वात्, वर्णेषु ब्राह्मणादिषु रूपभेदः । अतः कल्पितभेदात् अनुग्राह्यानुग्राहकत्वसिद्धिरित्यर्थः । (126) अनुग्राहकसर्गे प्रस्तुते[2]तदेकदेश—वादिन्याः श्रुतेरभिप्रायं पृच्छति—**अनुग्राहकेति** । तत्र कोऽभिप्राय इति शेषः । (127) अभिप्रायमाह—**अविद्येति** । अविद्याप्रकरणे कर्मसंनिधौ देवसर्गाम्नानं, देवानामविद्यात्मककर्मशेषत्वं, न तु विद्याशेषत्वम्, इति प्रतिपादनार्थमित्यर्थः । (128) इन्द्रादिसर्गो वक्ष्यते चेत् 'एष उ ह्येव सर्वे देवाः' इत्युपसंहारो न युक्तः, अत्राह—**तमिति** । '[3]तद्यदिदमाहुः' इत्यादेस्तात्पर्यमाह—**अविद्वदिति** ।

---

1. **अथेत्यभ्यमन्थदिति** "अथेत्यभ्यमन्थत् मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतः, अलोमका हि योनिरन्तरतः ।" इति श्रुतिः ।
2. **तदेकदेशवादिन्याः**—अनुग्राहकदेवतैकदेशप्रतिपादिकायाः । इन्द्रादिसर्गस्यानु-क्तत्वादिति भावः ।
3. **तद्यदिति** "तद्यदिदमाहुः अमुं यज, अमुं यजेति, एकैकं देवम् । एतस्यैव सा विसृष्टिः । एष उ ह्येव सर्वे देवाः ।" इति श्रुतिवाक्यमनुसन्धेयम् ।

तं सर्गमुक्तवत्सर्वमपेक्ष्येहोपसंहृतिः ।
अविद्वद्देवताभित्तिप्रतिषेधाय सांप्रतम् ॥ (129)

गुणोत्पत्तिक्रियारूपस्तुतिनामाद्युपाधिभिः ।
विभित्सन्ति स्वतोऽभिन्नां देवतां मूढदृष्टयः ॥ (130)

यदिदं कर्मिणः प्राहुः कर्मभूमावमेधसः ।
अमुमग्निममुं सोमं यजेति यजिसंश्रवात् ॥ (131)

यजेति लिङ्गान्निर्देषा कर्मिणामेव गम्यते ।
न तु विध्वस्तमोहानां प्रत्यङ्ग्ञात्मैकशायिनाम् ॥ (132)

'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टः तस्य कार्यं न विद्यते ॥' (133)

अविदुषामेकस्यां परस्यां देवतायां यो भेद(:)प्रत्यय: तन्निषेधार्थं 'तद्यदिदम्' इत्यादि प्रवृत्तमित्यर्थः । (129) कथमे[1](षां)[ते] परदेवतां भिन्दन्ति, इत्यत्र ह—**गुणेति** । अग्नये पावकाय, अग्नये शुचये इत्यादौ गुणभेदात् देवताभेद: । यदाग्नेयोऽष्टाकपालो भवति इति पौर्णमास्यादिकालयागोत्पत्ति-भेदात्, दर्शपूर्णमासयोरेव प्रयाजानूयाजादिक्रियाभेदाद्भेदः । तत्रैव ऐन्द्रं दधि, ऐन्द्रं पयः, इति दधि[2]पयोरूपभेदात्, 'अग्निर्मूर्धा दिवः ककुत्,' 'अयमग्निः सहस्रिणः,' 'अग्निमीळे पुरोहितम्,' इत्यादिस्तुतिभेदात्, 'वैश्वानरं द्वादशकपालम्,' 'आग्नेयो ब्राह्मणः,' इत्यादौ नामभेदात् । आदिपदात् ऐन्द्राग्नम्, अग्नीषोमीयम्, इत्यादौ देवतान्तरसाहचर्यादित्यर्थः । (130) 'अमुं यज अमुं यज' इति वाक्यं योजयति—**यदिदमिति** । (131) कर्मिवत् ज्ञानिनामपि श्रेयोमार्गप्रवृत्तावियं निन्दा स्यात्, अत्राह —**यजेतीति** । (132) ज्ञानिनामपि कर्मित्वं ज्ञानस्य कर्माङ्गत्वात्, अत्राह —**यस्त्विति** । (133) [3]अस्मिन् वाक्ये [4]मुक्तस्य कर्माभाव उच्यते, इत्याशङ्क्य,

---

1. एते—कर्मिण: ।
2. दधिपयोरूपभेदादिति द्रव्यदेवतयोः यागरूपत्वादिति भावः ।
3. अस्मिन् वाक्ये—'यस्त्वात्मरतिरेव स्यात्' इति गीतावाक्ये ।
4. मुक्तस्य कर्माभाव उच्यते इति न ज्ञानिनः इति शेषः ।

उत्पन्नैकात्म्ययाथात्म्यभास्वद्विज्ञानभास्कर-
संप्लुष्टाविद्याबहुलतमसां कर्मनिह्नुतिम् ॥ (134)

सर्वकर्माधिकाराणां निषेधं प्रत्यपीपदत् ।
पुराणः शाश्वतो विष्णुः प्रपन्नाय किरीटिने ॥ (135)

मिथो भिन्नं यदाहुस्ते एकैकं देवमध्वरे ।
तदसत्प्रतिपत्तव्यं यतोऽभिन्नैव देवता ॥ (136)

भेदग्राहि न नो मानं घटादावपि विद्यते ।
किमु निःशेषभिन्नार्थव्यापिन्यात्मन्यसौ मयि ॥ (137)

नाभावरादिवद्विश्वमध्यात्मादिविभागवत् ।
ओतप्रोतात्मना तस्थौ विराट्सूत्रादिवस्तुषु ॥ (138)

विविधास्यैव सा सृष्टिरिति हेतुसमीरणम् ।
कारणं न विहायेह कार्यमन्यत्र वर्तते ॥ (139)

---

[1]तस्य तात्पर्यमाह—**उत्पन्नेति** । (134–135) निन्दाया निषेधलिङ्गत्वात् तन्निषेधं दर्शयति—**मिथ इति** । (136) प्रतीचि भेदाभावं [2]किंपुनर्न्यायेनाह —**भेदेति** । (137) [3]श्रुतिरपि भेदाभावे मानम्, इत्याह—**नाभा(वे)[वि]ति** । भौतिकं सर्वं भूतव्यतिरेकेण नास्ति । तान्यपि स्थूलानि विराट्संज्ञकानि सूक्ष्मभूतव्यतिरेकेण न सन्ति । तान्यपि सूक्ष्माणि सूत्रसंज्ञकानि मूलकारणव्यतिरेकेण न सन्ति । तच्च साभासमज्ञानं मूलकारणं प्रत्यगात्मव्यतिरेकेण नास्ति । तस्मात् यथा रथस्य नाभौ अराः समर्पिताः, तथा अध्यात्मादिविभक्तं जगत् परंपरया प्रती(त्य)[च्य]ध्यस्तमित्यर्थः । (138)

'एष उ ह्येव सर्वे देवाः' इति देवताभेदनिराकरणप्रतिज्ञा । तत्र हेतुरुच्यते, इत्याह—**विविधेति** । (139) प्रतिज्ञावाक्यं योजयति—**यत इति** ।

---

1. **तस्य**—गीतावाक्यस्य ।
2. **किंपुनर्न्यायेन** — कैमुतिकन्यायेन । घटपटादीनां भेदप्रत्ययः न प्रामाणिकः इत्यसकृत् वार्तिके प्रतिपादितं बोध्यम् ।
3. **श्रुतिरपि**—'तद्यथा अरा नाभौ समर्पिताः' इति श्रुतिरपि ।

यत एवमतो देवाः सर्वेऽपि स्युः प्रजापतिः ।
तस्यां तस्यामधिकृतौ तत्तद्रूपं प्रपद्यते ॥ (140)

एक एव तु विश्वात्मा मायया मोहयन् जगत् ।
एकतां बहुतामेति कुम्भवन्मणिसंश्रयात् ॥ (141)

अभिन्न एव भूतात्मा प्रतिभूतसमाश्रितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ (142)

अत्र विप्रतिपद्यन्ते तदन्यात्मनिषेधिनः ।
हिरण्यगर्भ एवात्मा यः परात्मेति गीयते ॥ (143)

संसार्येवेह स इति तथाऽन्येऽपि प्रचक्षते ।
पक्षयोरनयोः श्रेयान् कःपक्ष इति चिन्त्यते ॥ (144)

विरिञ्चि एव तु परो मन्त्रब्राह्मणवाक्यतः ।
इन्द्रमित्यादिमन्त्रोक्तिः एष ब्रह्मेति च श्रुतिः ॥ (145)

प्रजापतिकार्यं जगत् यत इत्यर्थः । (140) प्रजापतिरेव इन्द्रादितत्तद्रूपत्वं तस्मिन् तस्मिन् कार्यसंबन्धे प्रतिपद्यते इत्युक्तम् । ननु एकं नानेति व्याहतम्, अत्राह— **एक एवेति** । मणिकृपाणदर्पणादिव्यञ्जकभेदात् यथा एक एव कुम्भो भिद्यते इत्यर्थः । (141)

एक एवानु[1]भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥

इति **योगवासिष्ठस्मृतिरत्र** मानम्, इत्याह—**अभिन्न इति** । (142)

सर्वदेवात्मकस्य प्रजापतेः स्वरूपनिर्धारणम्

प्रजापतिरेव सर्वे देवाः इत्युक्तम् । तस्य स्वरूपनिर्धारणार्थं विप्रतिपत्तिमाह—**अत्रेति** । असंसार्येव सः इत्येके । संसारीत्यपरे । स्वतः पर एवायमविद्यया संसरतीति सिद्धान्तः । (सूत्र) प्रथमपूर्वपक्षमाह—**तदन्येति** । (143) द्वितीयपूर्वपक्षमाह—**संसारीति** । (144) प्रथमपूर्वपक्षे प्रमाणं दर्शयितुमाह—

---

1. **अनुभूतात्मा**—अनुभूतिस्वरूप इति यावत् ।
'एक एव हि भूतात्मा' इति योगवासिष्ठपाठः अन्यत्र दृश्यते ।

एतमेके वदन्त्यग्निं योऽसाविति स्मृतेरपि ।
संसार्येव स विज्ञेयः श्रुतिमन्त्रस्मृतीरणात् ॥ (146)

पाप्मदाहारतिभीतिमर्त्यत्वादिश्रुतेर्मितेः ।
हिरण्यगर्भमिति च स्मार्तान्यपि वचांसि नः ॥ (147)

ब्रह्मा विश्वसृजो धर्म इति कर्मफलात्मता ।
स्मृत्याप्यभाणि बहुशः कस्य संसारिरूपता ॥ (148)

मिथो विरुद्धवादित्वात् द्वयोरागमयोरपि ।
अप्रामाण्यप्रसक्तिश्चेन्न क्लृप्त्यन्तरसंश्रयात् ॥ (149)

विरिञ्च इति । (145) अत्र [1]**स्मृतिद्वयमुदाहरति**—(मनु. 12·123) **एत-मिति** । द्वितीयपूर्वपक्षानुवादनेन [2]तत्र मानमाह—**संसार्येवेति** । (146) श्रुतिं दर्शयति—[3]**पाप्मेति** । आदिशब्दात् [4]द्वितीयेच्छाश्रुतिसंग्रहः । **श्रुतेर्मितेः**—श्रुतिमानादित्यर्थः । मन्त्रमुदाहरति—**हिरण्यगर्भमिति** । **स्मृति-वचनान्यपि** तस्य संसारित्वमस्मान् ग्राहयन्ति, इत्याह—**स्मार्तानीति** । (147) तानि संगृह्णाति—**ब्रह्मेति** । [5]विराडात्मा । विश्वसृजः—मन्वादयः । धर्मः—यमः । महान्—प्रकृ(तिः)[तेः] आद्यो विकारः सूत्रात्मा । अव्यक्तं कर्मपूर्वप्रज्ञादि-विशिष्टरूपेण मूलकारणम्, इति विवेकः । (148)

स्वतः पर एवायमविद्यया संसरतीति सिद्धान्तवर्णनम्

एवं पूर्वपक्षयित्वा सिद्धान्तं दर्शयितुं प्रसङ्गमाह—**मिथ इति** । सिद्धान्त-यति—**नेति** । (149) कथं [6]संसारित्वविरुद्धार्थवचनानामेकत्र प्रामाण्यम्,

---

1. **स्मृतिद्वयं**—मनुवाक्यद्वयम् ।
2. **तत्र मानं**—प्रजापतेः संसारित्वे प्रमाणम् ।
3. **पाप्मेति** पापसत्त्वे एव तद्दाहस्य संभवात् पाप्मदाहः संसारित्वं गमयतीति भावः ।
4. **द्वितीयेच्छाश्रुतिः**- 'स द्वितीयमैच्छत्' इति श्रुतिः ।
5. 'ब्रह्मा विश्वसृजो धर्मः महानव्यक्तमेव च' इति मनुवचनस्थितानां ब्रह्मादिप-दानामसंकीर्णमर्थमाह—**विराडात्मेत्यादिना** ।
6. **संसारित्वविरुद्धार्थवचनानामिति** संसारित्वस्य तद्विरुद्धार्थस्य असंसारित्वस्य च प्रतिपादकवचनानामित्यर्थः ।

प्रत्यगज्ञानजानेकविविधोपाधिसंगतेः ।
* विरुद्धार्थत्ववचसां स्यादेकत्रापि संभवः ॥ (150)

अपास्ताविद्यातज्जत्वादस्थूलाद्युक्तिगोचरः ।
स्वाभासाविद्योपाधिः सन् साक्ष्यन्तर्यामितां व्रजेत् ॥ (151)

तथा हिरण्यगर्भत्वं बुद्ध्युपाधिः स एव तु ।
तमःसत्वरजोयोगाद्याति क्षेत्रज्ञतामजः ॥ (152)

अभिन्नबुद्ध्याऽभिन्नत्वं भिन्नधीभिश्च भिन्नताम् ।
एति चित् स्वतमोहेतोर्न किञ्चिदपि दुःस्थितम् ॥ (153)

* अशनायावदुत्पत्तेरुत्पन्नाः प्राणिनोऽखिलाः ।
अत्तारोऽन्नविरहान्नालं स्थानाय संहताः ॥ (154)

इत्याशङ्क्य, [1]संग्रहवाक्यं विवृणोति—**प्रत्यगिति** । प्रत्यक्स्वरूपोपाधौ अज्ञान-(ज्ञा/[जा]नेकविरुद्धोपाधिसंगतेश्चेत्यर्थः । (150) स्वरूपोपाधौ कस्य प्रामाण्यम्, अत्राह—**अपास्तेति** । अज्ञानमात्रमुपाधीकृत्य कस्य सविशेषवाक्यस्य प्रामाण्यम्, अत्राह—**स्वाभासेति** । (151) कारणोपाधिरीश्वरः इत्युक्तम् । संप्रति अपञ्चीकृतभूतपञ्चकोपाधेः ज्ञानक्रियाशक्तिमदन्तःकरण(वशि)[विशि]ष्टस्य सूत्रात्मतामाह—**तथेति** । पञ्चीकृतभूतपञ्चकोपाधेः सुखदुःखमोहाकारपरिणाम्यन्तःकरणविशिष्टस्य अधिदैवतं विराड्भावः, अध्यात्मं जीवत्वम्, इत्याह—**तम इति** । (152) [2]क्लृप्त्यन्तरमुपपादितमुपसंहरति—**अभिन्नेति** । (153)

'अथ यत्किञ्च' इत्यादिश्रुत्यर्थनिरूपणम्

'अथ यत्किञ्च' इत्यादि[:] प्रयोजनाभावादन्नस्य सृष्टिर्न वक्तव्या,

---

1. **संग्रहवाक्यं**—सिद्धान्तार्थस्य संग्रहेण प्रतिपादकं 'क्लृप्त्यन्तरसंश्रयात्' इति वार्त्तिकमागम्, 'कल्पनान्तरोपपत्तेरविरोधात्' इति भाष्यवाक्यं वा ।

* **विरुद्धार्थत्ववचसां**—विरुद्धार्थत्वेन प्रतीयमानवचनानाम् ।

2. **क्लृप्त्यन्तरमिति** । 'क्लृप्त्यन्तरसंश्रयात्' (वा. 149) इत्यनेन विवक्षितमित्यादिः ।

* **अशनायावदुत्पत्तेरिति** अशनायावान् अत्ता प्रजापतिः । तस्मादुत्पत्तेरित्यर्थः ।

तस्मात्सोमान्नसृष्ट्यर्थं परो ग्रन्थोऽवतार्यते ।
यत्किञ्चेदं जगत्यस्मिन्नार्द्रं वस्तूपलक्ष्यते ।
रेतसस्तत्ससर्जेश उत्पन्नस्थितयेऽशनम् ॥ (155)

जगत्कारणरूपिण्य आपो रेतोऽभिधा इह ।
सोम एवेत्यवधृतेरग्नीषोमव्यवस्थितिः ॥ (156)

नानाक्रियाभिसंबन्धादग्निः सोमश्च गम्यताम् ॥ (157)

सोम एवेति तं विद्याद्यद्यग्निरपि हूयते ।
सोमोऽप्यग्निरिति ज्ञेयो यदि तत्रापि हूयते ॥ (158)

द्वेधा भिन्नं जगत्सर्वमन्नमन्नाद एव च ।
अन्नं चराचरं कृत्स्नमन्नादः प्राण उच्यते ॥ (159)

अत्राह—**अशनायावदिति** । (154) [1]वाक्यं योजयति—**यत्किञ्चेति** । (155) रेतःशब्दार्थमाह—**जगदिति** । 'ता अन्नमसृजन्त' (छा. 6 - 2 - 4) इति श्रु[ते]रित्यर्थः । 'सोम एवान्नं अग्निरन्नादः' इत्यत्रावधारणस्य विवक्षितमाह—**सोम इति** । अग्नीषोमात्मकत्वं जगतः सिद्धमित्यर्थः । (156) अन्नस्य सोमत्वं न नियतं, अग्नेरपि जलादिना संहारात् । अत्तु(सि)[रग्नि]त्वं च न नियतं, सोमस्यापि कदा चिदिज्यमानत्वेन अत्तृत्वात्, अत्राह—**नानेति** । अग्निरपि हवनक्रियाकर्मत्वेन संबद्धः सोमः । सो(मे)[मो]पि हवनक्रियाकर्तृत्वेन संबद्धः अग्निः इत्यव[2]धारणसिद्धिरित्यर्थः । (157) एतदेव स्पष्टयति—**सोम एवेति** । (158) अत्त्रन्नप्रकरणमुपसंहरति—**द्वेधेति** । (159) '[3]सैषा' इत्यादिवाक्यतात्पर्यमाह-

---

1. **वाक्यमिति** "अथ यत्किञ्चेदमार्द्रं तद्रेतसोऽसृजत तदु सोमः । एतावद्वा इदं सर्वमन्नं चैवान्नादश्च । सोम एवान्नमग्निरन्नादः ।" इति श्रुतिवाक्यम् ।

2. **अवधारणसिद्धिरिति** 'सोम एवान्नम्' इति श्रुतेः यदन्नं तत् सोम एवेत्यर्थः ।

3. **सैषेति** "सैषा ब्रह्मणोऽतिसृष्टिः, यच्छ्रेयसो देवानसृजत । अथ यन्मर्त्यः सन्नमृतानसृजत, तस्मादतिसृष्टिः । अतिसृष्ट्यां हास्यैतस्यां भवति य एवं वेद ।" इति श्रुतिरनुसन्धेया ।

फलाभिधित्सयेदानीं देवसृष्टिविदः श्रुतिः ।
प्रवर्ततेऽथ सैषेति तत्स्तुतिस्तावदुच्यते ।। (160)

अनुग्राहकदेवानां या सृष्टिरुदिता पुरा ।
अतिसृष्टिरनुग्राह्यसृष्टेः सा स्यात्प्रजापतेः ।। (161)

अश्रेयोभ्योऽनुग्राह्येभ्यः ससर्ज श्रेयसः सुरान् ।
यतोऽतिसृष्टिस्तेनेयं यैषेहाग्न्यादिरीरिता ।। (162)

मर्त्यो वा यजमानः सन्नस्राक्षीदमृतान् सुरान् ।
अतिसृष्टिरतः प्रोक्ता सातिसाध्वीति निश्चिता ।। (163)

प्रजापतिरिवैतस्यां सृष्टौ स्यात्सर्गकृन्नरः ।
यथोक्तसृष्टिविद्यः स्यात्तस्यैतत्फलमीरितम् ।। (164)

अविद्यापटसंवीतचक्षुषामियमेव तु ।
वैदिकं साधनं ज्ञेयं ज्ञानकर्मस्वभावकम् ।। (165)

कर्त्रादिकारकापेक्षं विरिञ्चादिफलप्रदम् ।
व्याकृतं तदशेषेण श्रुत्या व्याख्यायि यत्पुरा ।। (166)

अथैतस्य यथोक्तस्य साध्यसाधनरूपिणः ।

फलेति । एवं समुदायतात्पर्यमुक्त्वा 'अति(ह)[सृ]ष्टयाम्' इत्यतः प्राक्तनतात्पर्यमाह—**तत्स्तुतीति** । त(दे)[द्दे]वसृष्टिस्तुत्यर्थमित्यर्थः । (160) वाक्यं योजयति —**अनुग्राहकेति** । (161) अतिसृ(ष्ट)[ष्टि]त्वे हेतुमाह—**अश्रेयोभ्य इति** । (162) 'मर्त्यः सन्' इति वाक्यार्थमाह—**मर्त्यो वेति** । (163) 'अतिसृष्ट्यां हैतस्याम्' इत्येतदर्थमाह—**प्रजापतिरिति** । (164)

पूर्वोत्तरग्रन्थसंबन्धप्रतिपादनाय वृत्तं संकीर्तयति—**अविद्येति** । अज्ञानां ज्ञानकर्माख्यं साधनं हिरण्यगर्भान्तफलं यत् श्रुत्या पुरो व्याख्यायि 'इषे त्वा' इत्यादिना, तदियदेव व्याकृतं जगत्, कर्मकाण्डप्रतिपादितसाधनसाध्यं कृत्स्नं संसारात्मकमित्यर्थः । (165-166) तस्य संसारस्य बीजावस्था साभासप्रत्यगविद्या

* जगतो व्याकृतस्याभूत् बीजावस्थाविनश्वरी ।
तन्निर्दिदिक्षया यत्नात्प्रवृत्तैषा परा श्रुतिः ॥ (167)

संसृत्यनर्थस्य यतो निदानं सैव नापरम् ।
यतो मूलमनर्थानामात्माज्ञानं जगत्यपि ॥ (168)

तद्ध्वंसादेव निःशेषपुमर्थाप्तिरतो भवेत् ।
* जिहासितस्यानर्थस्य हेतुः स्यात्सशरीरता ॥ (169)

न वै सशरीरस्येति श्रुतेरध्यवसीयते ।
धर्माधर्मौ च देहस्य योनिरित्यागमाश्रयात् ॥ (170)

विहितं प्रतिषिद्धञ्च कर्म मूलं तयोरपि ।
न ह्यक्रियस्य संबन्धो धर्मेणास्तीतरेण वा ॥ (171)

वक्तव्येति 'तद्धेदम्' इत्यादि वाक्यम्, इत्याह–अथेति । (167) प्रधानादिकार्यं जगत्, नाज्ञानकृतम्, अत्राह—संसृतीति । कुत एतत्, अत्राह—यत इति । आत्मसामर्थ्यमविदित्वा परदारादौ प्रवर्तमानस्यानर्थदर्शनादित्यर्थः । (168) संसारस्याज्ञानकार्यत्वे लाभमाह—तद्ध्वंसादिति । कर्तृत्वादिसंसारानर्थस्य अज्ञानमूलत्वे स्वापादावपि [1]तत्प्रसङ्गः इत्याशङ्क्य, मैवं, देहात्मप्रत्ययद्वारेणानर्थकारणत्वात्, इत्याह—जिहासितस्येति । (169) [स] शरीरता वा [2]न कुतः स्यात्, अत्राह—धर्मेति । 'तद्य इह रमणीयचरणाः' (छा. 5-10 7) इत्यादिश्रुतेरित्यर्थः । (170) धर्मादिकमपि अविद्यामूलत्वात् स्वापादौ किं न स्यात्, अत्राह–वि(ह)[हि]तमिति । अनुष्ठानमपूर्वस्य कारणमित्यर्थः । हेतुमाह

'तद्धेदं' तर्ह्यव्याकृतमासीत्' इत्यादिका सप्तमकण्डिका अव्याकृतकण्डिकेति व्यवह्रियते ।

* 'बीजावस्थाविनश्वरी' इत्यत्र अविनश्वरी इति पदच्छेदे ज्ञानं विना नाशरहितेत्यर्थः । विनश्वरी इति च्छेदे ज्ञाननाश्येत्यर्थः ।

1. तत्प्रसङ्गः — कर्तृत्वादिसंसारप्रसङ्गः । अज्ञानस्य तदा सत्त्वादिति भावः ।

* सशरीरता शरीरसाहित्यं, शरीरसंबन्धपर्यवसितम् । शरीरसंबन्धश्च शरीराभिमानरूपः इति, शरीरात्माभिमानः इत्यर्थः ।

2. न कुतः स्यादिति स्वापादौ कुतो न स्यात् अज्ञानस्य मूलस्य सत्त्वादित्यर्थः ।

नाकारकस्य जगति क्रियया संगतिस्तथा ॥ (172)

तद्भावभावहेतुत्वात् कारकत्वस्य कारणम् ।
रागद्वेषौ, न तौ मुक्त्वा जगत्यन्यत्प्रवर्तकम् ॥ (173)

स यथाकाम इत्युक्त्वा क्रत्वादेः प्रसवं श्रुतिः ।
कामाभावे च तद्धानिं योऽकामश्चेति चावदत् ॥ (174)

साध्वसाध्विति चाध्यासौ मूलं विद्यात्तयोरपि ।
रागद्वेषौ यतो दृष्टौ नैवर्ते साध्वसाधुनी ॥ (175)

अन्तरेण प्रमेयार्थं नापि ते साध्वसाधुनी ।
साध्वसाध्विति वा ज्ञानं ज्ञातमेयस्य जायते ॥ (176)

प्रमातृत्वादिसंबन्धो नासदात्मकवस्तुनि ।
नञ्घटाद्यर्थविज्ञानं सत्येव जगतीष्यते ॥ (177)

—**न हीति** । (171) क्रियायाः (यतः) किं कारणं, यतः स्वापे तदभावः, अत्राह—**नाकारकस्येति** । (172) कार(ण)[क]त्वं क्रियाकारणम(प्य)[स्तु], तस्य किं कारणम्, अत्राह—**कारकत्वस्येति** । (173) रागद्वेषयोः प्रवर्तकत्वे श्रुतिरपि मानम्, इत्याह—**स यथेति** । 'स यथाकामो भवति तत्क्रतुर्भवति, यत्क्रतुर्भवति तत्कर्म कुरुते (बृ. 6 - 4 - 5) इति श्रु(तिं)[तिः]क्रत्वादेः प्रसवं - रागादुत्पत्तिं उक्त्वा, ' योऽकाम आप्तकामः (बृ. 6 - 4 - 6) [1]इत्याद्या च कामाभावे क्रत्वादेरभावमवददित्यर्थः । चकारः अन्वयव्यतिरेकसमुच्चयार्थः । (174) रागद्वेषयोः किं कारणम्, अत्राह—**साध्विति** । (175) [2]शोभनाशोभनाध्यासो निर्मूलत्वात् न भवेत् इत्याशङ्क्य, [3]ज्ञातार्थस्य तन्मूलतामाह—**अन्तरेणेति** । (176) ज्ञातत्वं कुतः स्यात्, अत्राह—**प्रमातृत्वादीति** । ज्ञातत्वहेतोः प्रमातृ-प्रमाणादिसंबन्धस्य नृशृङ्गादावदर्शनात् सत्त्वं ज्ञातत्वकारणमित्यर्थः । अनुभवेनैतत् साधयति—**नञ्घटेति** । (ना)[भा]वाभावज्ञानं भावनिष्ठं दृष्टमित्यर्थः । (177) सत्त्वासत्त्वयोः किं कारणम्, तदाह—**प्रत्यगिति** । कुत्र चित्—देशे काले

---

1. **इत्याद्या चेति** श्रुतिरिति शेषः ।
2. **शोभनाशोभनाध्यासः**—शोभनाध्यासः अशोभनाध्यासश्चेत्यर्थः ।
3. **ज्ञातार्थस्य**—ज्ञातत्वविशिष्टस्यार्थस्य ।

* प्रत्यग्याथात्म्यसंमोहमृते सत्त्वं न कुत्र चित् ।
प्रत्यग्याथात्म्यसंबुद्धौ न सत्तन्नासदुच्यते ॥ (178)

असाधारणमज्ञानं प्रतीच्येव यतः स्थितम् ।
एतत्प्रमेयमेवातः प्रमाणं नान्यदिष्यते ॥ (179)

एवं प्रमेयसिद्ध्यर्थं प्रवृत्तैषोत्तरा श्रुतिः ।
क्रियाकारकरूपेऽस्मिन् व्यवहारे तमोऽन्वयात् ।
अक्रियाकारकं वस्तु पारोक्ष्यान्नैव लभ्यते ॥ (180)

वस्तुनि चेत्यर्थः । ब्रह्मणः सत्त्वं स्वाभाविकं दृष्टमित्याशङ्क्य, व्यावहारिकं सत्त्वमविद्याकृतम्, इत्याह—**प्रत्यग्याथात्म्येति**। (178) आत्मानात्मसाधारणमज्ञानमनर्थकारणं, न तु प्रत्यगज्ञानमेव, इत्यत आह—**असाधारणमिति**। आत्माश्रयमात्मविषयमज्ञानं आत्मनोऽसाधारणं, नत्वात्मानात्मसाधारणमज्ञानमस्ति । यस्मात् अहमज्ञ इति प्रतीच्येवाज्ञानं निश्चितम् । अन्यस्याज्ञानाश्रयत्वेनानुभवायोगादित्यर्थः । अनात्मनोऽप्यज्ञातत्वमेष्टव्यं मेयत्वात्, अत्राह—**एतदिति** । (179)

आत्मन एवाज्ञातत्वं मेयत्वं चेति प्रति[1]ज्ञामात्रमित्याशङ्क्य, अस्यार्थस्य प्रतिपादनाय 'तद्धेदम्' इत्यादिवाक्यम्, इत्याह—**एवमिति** । आत्मन एव ज्ञातत्वे प्रत्य[2]क्षादिप्रवृत्तेः तेनैवात्मसिद्धेः वेदान्तश्रवणानर्थक्यम्, अत्राह—**क्रियेति** । व्यवह्रियते इति व्यवहारः—व्यवह्रियमाणं जगत् । अस्मिन् कारणाज्ञानानुगमात् क्रियाकारकनिर्मुक्तं वस्तु न प्रतीयते । अतो विशि[3]ष्टस्य मान्तरमेयत्वं, केव[4]लस्य वेदान्तगम्यत्वमित्यर्थः । (180) जगज्ज्ञानेऽपि वस्तु न ज्ञायते चेत्, अद्वैतहानिः, अत्राह—**तद्धीति** । प्रत्यग्वस्तु तत्त्वतः प्रत्यक्षाद्यदृष्टं सदज्ञानं तत्कार्यं च सर्वं बिभर्ति । अतो द्वैतस्य कल्पितत्वात् नाद्वैतविरोध इत्यर्थः ।

---

* 'प्रत्यग्याथात्म्यसंमोहमृते सत्त्वं न कुत्र चित्' इत्यत्र सत्त्वं असत्त्वमिति च पदच्छेदः । सत्त्वासत्त्वोभयं प्रत्यग्याथात्म्याज्ञानकृतमित्यर्थः ।

1. **प्रतिज्ञामात्रमिति** मात्रपदेन युक्ततान्यवच्छेदः ।
2. **प्रत्यक्षादिप्रवृत्तेरिति** आत्मन्येवेत्यादिः ।
3. **विशिष्टस्य मान्तरमेयत्वं**—विशिष्टस्यात्मनः प्रत्यक्षादिप्रमाणान्तरमेयत्वम् ।
4. **केवलस्येति** आत्मन इति शेषः ।

तद्वयदृष्टं सदज्ञानकार्यं स्रगिव पन्नगम् ।
सर्वं बिभर्त्यसक्तं सदसक्तमिति च स्मृतेः ॥ (181)

अपूर्वाद्यात्मकं वस्तु यत्र साक्षात्प्रसिद्ध्यति ।
तत् कात्स्न्याल्लभ्यते तत्र व्यवहारो न मोहजः ॥ (182)

यथासिद्धानुवादेन पूर्वं नो ह्यभ्यधात् स्फुटम् ॥ (183)

पदानीह तदर्थांश्च प्रसिद्धानेव लोकतः ।
आदाय कर्मशास्त्रं तन्निषेधविधिबोधकृत् ॥ (184)

इतः परं वस्तुतत्त्वपरीक्षणकृतक्षणा ।
श्रुतिः प्रवृत्ताऽतस्तावत्प्रमेयोऽर्थोऽत्र चिन्त्यते ॥ (185)

द्वैता[1]स्पदत्वे असङ्गत्वविरोधः, अत्राह—**असक्तमिति** । संबन्धस्य कल्पितत्वे मानमाह—**असक्तमिति चेति** । 'असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च' (भ. गी. 13-14) इति स्मृतेरित्यर्थः । (181) अज्ञातात्माश्रयं जगदित्युक्तम्, ज्ञातात्मन्यपि कर्तृत्वादिस्फुरणात्, अत्राह—**अपूर्वादीति** । यत्र—विद्यावस्थायां अकार्यकारणात्मकं वस्तु प्रत्यग्भावेनापरोक्षं भवति, तत्र कर्तृत्वादिरज्ञानजो न व्यवह्रियते इत्यर्थः । (182) उपा[2]सनकाण्डे अखण्डार्थसिद्धेः न ज्ञानकाण्डसाफल्यम्, अत्राह—**यथासिद्धेति** । लौकिकपदार्थानुवादेन हिरण्यगर्भाद्युपासनविधानात् न तत्र वस्तु स्पष्टमित्यर्थः । (183) तथापि कर्मकाण्डे वस्तुनः सिद्धत्वात् किं तत्त्वमादिना, अत्राह—**पदानीति** । इह—व्युत्पत्तिकाले । लोकतः—वृद्धव्यवहारात् इदमिष्टसाधनमिदमनिष्टसाधनमित्येतावति उपक्षीणं कर्मशास्त्रं न वस्तुपर्यवसितमित्यर्थः । (184) एवमन[3]न्यसाधारणं विषयं प्रतिपाद्य फलितमाह—**इत इति** ।

उत्तरग्रन्थतात्पर्यनिरूपणम्

उक्तग्रन्थसन्दर्भारम्भं प्रतिपाद्य, अनन्तरतात्पर्यमाह—**अतस्तावदिति** । अज्ञातत्वनिरूपणाय 'तद्धेदम्' इत्यादि वाक्यमित्यर्थः । (185) प्रतिपाद्यवस्तुत-

---

1. **द्वैतास्पदत्वे इति** प्रत्यग्वस्तुनः इत्यादिः ।
2. **उपासनकाण्डे**—'उषा वा अश्वस्य' इत्यादिके ।
3. **अनन्यसाधारणं विषयं**—वस्तुतत्त्वम् ।

संसाराख्यमहाव्याधेः किं मूलमिति चिन्त्यते ।
तद्ध्वस्तये चिकित्सेयं तदा फलवती भवेत् ॥ (186)

ऊर्ध्वमूल इति तथा मन्त्रवर्णोऽपि विद्यते ।
गीतास्वपि तथैवैतदूर्ध्वमूलमितीरणम् ॥ (187)

* अशेषानर्थमूलस्य प्रत्यगज्ञानरूपिणः ।
ध्वस्तौ ध्वस्तिरनर्थानां पुमर्थश्च समाप्यते ॥ (188)

निरस्तातिशयानन्दरूपता प्रत्यगात्मनः ।
अथैष यो वै भूमेति श्रुत्यैव प्रतिपाद्यते ॥ (189)

त्वमेव निरूप्यतां, किमज्ञातत्वनिरूपणेन, अत्राह—**संसारेति** । संसाररोगनिरासाय निदानज्ञाने सति श्रवणादिचिकित्सा फलवती स्यात् ।

> 'संचयं च प्रकोपं च प्रसरं स्थानसंश्रयम् ।
> व्यक्तिभेदञ्च यो वेत्ति दोषाणां स भवेद्भिषक् ॥ (सुश्रु०)

इत्यभिहितत्वादित्यर्थः । (186) संसारस्य आकस्मिकत्वात् मूलमेव नास्ति । सदपि वा,[1]तत् प्रधानादिकमेव, नाज्ञातं ब्रह्म, इत्य(T)[त आ]ह—**ऊर्ध्वेति** । ऊर्ध्वं—उत्कृष्टं अज्ञातं ब्रह्म मूलं यस्य संसारस्य स तथा । 'ऊर्ध्वमूलोऽवाक्-(शोष एवो) [शाख एषोऽ] श्वत्थः सनातनः' (का. 2 - 3 - 1) इति श्रुतिः । 'ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम्' (भ. गी. 15 - 1) इति स्मृतिरित्यर्थः । (187) ज्ञानिनोऽपि संसारदर्शनात् नाज्ञानं तत्कारणम्, अत्राह—**अशेषेति** । नानर्थनिवृत्तिमात्रं धीफलम्, आनन्दाभिव्यक्तिरपि तत्फलम्, इत्याह—**पुमर्थश्चेति** । आनन्दस्वभावत्वादात्मन इत्यर्थः । (188) आत्मनो नानन्दरूपत्वं मानाभावात्, इत्याशङ्क्य, 'अथैष एव परमानन्दः' (बृ. 6 - 3 - 32) 'यो वै भूमा तत्सुखम्' (छा. 7 - 23 - 1) इति श्रुतिरत्र मानम्, इत्याह—**निरस्तेति** । (189) प्रतीचः सुखस्वरूपत्वे दुःखसंसर्गोऽपि स्यात्, सुखस्य

---

1. **तत् प्रधानादिकमेव**—संसारमूलं प्रधानादिकमेव ।

* **अशेषेति**—ज्ञानिनो बन्धधीः बाधितानुवृत्तिरिति भावः ।

स्वत आनन्दयाथात्म्यात् कुतो दुःखेन संप्लुतिः ।
तथापि निह्नुते शास्त्रे न लिप्यत इतीरणात् ॥ (190)

अज्ञातात्मैकसंसिद्धबीजावस्थमिदं जगत् ।
तदित्यनेनाभ्यधायि परोक्षार्थाभिधायिना ॥ (191)

अव्याकृतस्य जगतो भूतकालाभिसंगतेः ।
सुखावबुद्धये हेति निपातोऽत्र प्रयुज्यते ॥ (192)

नामरूपादिविकृतं पराञ्ज्ञानैकगोचरः ।
सहस्रभेदवत् साक्षादिदमा जगदुच्यते ॥ (193)

सामानाधिकरण्यस्य तदिदंपदयोः श्रुतेः ।
कार्यकारणयोर्नित्यमभेदोऽध्यवसीयते ॥ (194)

दुःखा(दि)[वि]नाभावात्, इत्याशङ्क्य, स्वाप[1]सुखेन व्यभिचारात् मैवम्, इत्याह—**स्वत इति**। का तर्हि दुःखनिवारकवाक्यानां गतिः, अप्राप्तप्रतिषेधायोगादिति ? भ्रान्ति[2]प्राप्तितन्निवारणं गतिः, इत्याह—**तथापीति**। '**न लिप्यते लोकदुःखेन बाह्यः**' (का. 2-2-11) इति वचनादित्यर्थः। (190)

सप्तमकण्डिकार्थनिरूपणम्

तात्पर्यमुक्त्वा, प्रासङ्गिकं च परिसमाप्य, अक्ष[3]रार्थमाह—**अज्ञातेति**। [4]तदात्मैकेन सती या बीजावस्था साभासप्रत्यगविद्या तद्रूपं जगत् परोक्षं, [5]तदभिधायिसर्वनाम्ना तत्पदेन उक्तमित्यर्थः। (191) जगतः परोक्षत्वे हेतुमाह—**अव्याकृतस्येति**। परोक्षता इति शेषः। हशब्दार्थमाह—**सुखेति**। (192) इदंशब्दार्थमाह—**नामेति**। आदिपदं कर्मार्थम्। (193) सामानाधिकरण्यतात्पर्यमाह—**सामानाधिकरण्यस्येति**। श्रुतेः — श्रवणादित्यर्थः। (194)

---

1. **स्वापसुखेन व्यभिचारादिति** स्वापदशायां दुःखाभावेन स्वापकालिकसुखे दुःखव्यभिचारादित्यर्थः।
2. **भ्रान्तिप्राप्तितन्निवारणं**—भ्रान्त्या प्राप्तिः यस्य तत् भ्रान्तिप्राप्ति। तादृशं तत् दुःखं, तन्निवारणमित्यर्थः।
3. **अक्षरार्थमिति** 'तद्धेदं तर्ह्यव्याकृतमासीत्' इति श्रुतिवाक्यस्येत्यादिः।
4. **तदात्मैकेन**—अज्ञातात्मना एकेन।
5. **तदभिधायिसर्वनाम्ना**—परोक्षार्थकेन सर्वनामसंज्ञकेन।

* न क्रियाकार्यविरहात् कारणं सिद्ध्यति क्वचित् ।
निष्क्रियं कारणं चेत्स्यात् तद्वन्नित्यं फलोत्थितिः ॥ (195)

* तयोश्च युगपद्भावे न स्यात्कारणनिश्चितः ।
क्रियान्तरप्रसक्तेश्च तत्कार्यत्वेऽनवस्थितिः ॥ (196)

कार्यं चाक्रियमाणं सन्न कार्यत्वं समश्नुते ।
अकर्तृकं चेत्कार्यं स्यात् कारणं कार्यतां व्रजेत् (197)

कार्यकारणयोर्वस्तुत्वाद्भेद इति चेत्, [1]तर्हि निष्क्रियं कारणं, सक्रियं वा । नाद्यः, इत्याह—**न क्रियेति** । क्रियारूपकार्याभावादित्यर्थः । व्यतिरेके दण्डमाह—**निष्क्रियमिति** । तद्वत्—कारणवदित्यर्थः । (195) [2]द्वितीये, कार्यकारणयोः यौगपद्यं, पूर्वापरभावो वा । नाद्यः, इत्याह—**तयोश्चेति** । द्विती[3]यं दूषयति—**क्रियान्तरेति** । प्रथमकार्यस्य निष्पत्त्यर्थं क्रियापेक्षा । तत्क्रियासिद्ध्यर्थं क्रियान्तरस्यावश्यभावादनवस्थेत्यर्थः । (196) कार्यस्य क्रियापेक्षायामपि न [4]क्रियायाः तदपेक्षा स्वयं क्रियात्वात् इत्याशङ्क्य, सापि कार्यमकार्यं वा, प्रथमं प्रत्याह—**कार्यं चेति** । चशब्देन अकार्यत्वे नित्या फलो(च्छित्तिः)[स्थितिः] स्यादित्यर्थः । विपक्षे दोषमाह—**अकर्तृकं चेदिति** । (197) कार्यकारणयोर्विचारासहत्वात्

'इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥' इत्युक्तत्वादिति भावः ।

* 'न क्रियाकार्यविरहे' इति मु. पु. पाठः ।

1. 'तर्हि निष्क्रियं कारणम्' इत्यादिना कार्यकारणयोरवस्तुत्वं—कल्पितत्वं प्रतिपाद्यते ।

2. **द्वितीये**—कारणस्य सक्रियत्वे ।

3. **द्वितीयं**—कार्यकारणयोः पूर्वापरभावम् ।

* "न द्वितीयः—कारणं सक्रियमिति कल्पः न । क्रियातद्वतोर्यौगपद्यं, क्रमो वा । आद्ये न तयोः शृङ्गयोरिव तद्भावः निश्चायकाभावात्, इत्याह—**तयोश्चेति** प्रथमं कारणं पश्चात् क्रियेति क्रमश्चेत्, तत्राह—**क्रियान्तरेति** ।" इति **शास्त्रप्रकाशिका** ।

4. **न क्रियायाः तदपेक्षा**—क्रियायाः उत्पत्तौ, कारणे क्रियापेक्षा नेत्यर्थः ।

कारणत्वात् सदन्यस्य कार्यत्वाच्च सतस्तथा ।
अन्योन्याव्यतिरेकाच्च कुतो नाशादिसंभवः ॥ (198) *

क्रिया वा तत्फलं वा स्यात्कारकं वा न किञ्चन ।
निरन्वयोऽयं नाशः स्यादेषामन्यतमोऽपि न ॥ (199)

क्रियायाः फलरूपेण ध्वस्तिर्नावस्थितेर्भवेत् ।
तेन तेन विशेषेण कारणं प्रथते सदा ॥ (200)

---

[1]असत्त्वमेव, इत्यत आह— **कारणत्वादिति** । कारणं सत् अन्यस्य—कार्यस्य कारणत्वात् तुच्छव्यावृत्तिमन्तरेण कारणत्वायोगात् । कार्यमपि सत्—तुच्छव्यावृत्तम् । सत एव कार्यत्वात् असतो नृशृङ्गादेः तदयोगादित्यर्थः । 'अन्यस्य' इत्युक्तत्वात् कार्यकारणयोः भेदः, अत्राह— **अन्योन्येति** । [2]भेदाभेदयोरप्ययोगात् द्वयमपि कल्पितमित्यर्थः । एवं सत्त्वे असत्त्वे च जन्मानुपपत्त्या कल्पितत्वमुक्त्वा, नाशादिविकारानुपपत्त्यापि तावदाह— **कुत इति** । (198) कार्यं निरन्वयं नश्यतीति तार्किकैरङ्गीकारात् कथं [3]तदसंभवः, अत्राह— **क्रियेति** । **न किञ्चन** —ना[4]स्त्येवेति यावत् । पक्षचतुष्टयेऽपि तदसंभवमाह— **एषामिति** । (199) प्रथमकल्पानुपपत्तिं प्रकटयति— **क्रियाया इति** । फलात्मना स्थिरत्वात् ध्वस्तिः न संभवति इत्यत्र हेतुमाह— **तेनेति** । क्रियाकारकफलरूपेण मूलकारणमेव प्रथते, सर्वस्य सद्रूपत्वस्फुरणात् । अतो न कस्यापि निरन्वयनाश इत्यर्थः । (200)

---

1. **असत्त्वमेव**—तुच्छतैव ।
2. **भेदाभेदयोरप्ययोगादिति** गवाश्ववत् भेदे कार्यकारणभावो न संभवति । अभेदे, एकस्मिन्नेव कार्यकारणभावप्रसङ्गः । अतः कार्यकारणयोः भेदः अभेदश्च न वास्तव इति भावः ।

* "किञ्च जन्मनाशादिविकाराणां वस्तुतो भेदाभेदाभ्यां दुर्भणत्वात् कूटस्थे तस्मिन् कल्पितत्वमेव तयोः, इत्याह—**कुत इति** ।" इति **शास्त्रप्रकाशिका** ।

3. **तदसंभवः**—निरन्वयनाशासंभवः ।
4. **नास्त्येवेति यावदिति** तुच्छताऽभिसंहिता ।

यथा जन्मादिकर्तृत्वात् बीजं नैव विनश्यति ।
नाशेऽपि तस्य नंष्टृत्वात् न नंष्टुः स्याद्विनाशिता ॥ (201)

एवं चेन्न सतो नाशो नोत्पत्तिरसतस्तथा ।
अव्याकृताभिधानाच्च कार्यस्य स्यात्कदाचन ॥ (202)

* तत्त्वबोधातिरेकेण न नाशोऽन्यो यथा तथा ।
महताऽतिप्रयत्नेन ह्युदर्केऽपि प्रवक्ष्यते ॥ (203)

नामरूपाद्यभिव्यक्तेः प्राक्तनः काल उच्यते ।
तर्हीति, ह्यनभिव्यक्तमव्याकृतगिरोच्यते ॥ (204)

* अविद्याकर्मसंस्कारास्तेजोऽप्क्ष्मासूत्रसंश्रयाः ।
खे लीनास्त्वस्तितामात्रा अव्यक्ताख्याः सहात्मना ॥ (205)

दृष्टान्तेनैतत् स्पष्टयति—**यथेति** । आदिपदेन वृद्ध्यादिसंग्रहः । नाशेऽपि नंष्टुः — तत्कर्तुः, विनाशिता—तुच्छता न स्यात् । नाशस्य नंष्टृतन्त्रत्वात्—तदाश्रयत्वादित्यर्थः । (201) निरन्वयनाशनिराकरणफलमाह—**एवं चेदिति** । जन्मनाशयोः दुर्निरूपत्वं यदीत्यर्थः । (202) संसारस्य निरन्वयनाशमन्तरेण कैवल्यायोगादे[1]ष्टव्योऽसौ, अत्राह—**तत्त्वेति** । अन्यो नाशः — निरन्वयनाश इत्यर्थः । (203) तर्हिअव्याकृतपदयोरर्थमाह—**नामेति** । (204) असर्वज्ञानां [2]सदा जगदनभिव्यक्तमेवेति, तर्हीति विशेषणवैयर्थ्यम्, अत्राह—**अविद्येति** । मिथ्याज्ञानमविद्या । धर्माधर्मौ कर्म । विविधकार्यवासनाः संस्काराः । सूत्रशब्देन भूतद्वयग्रहणात्, अपञ्चीकृतपञ्चभूतानि खे—मूलकारणे लीनानि भोक्त्रात्मना सह अव्याकृतशब्दवाच्यानीत्यर्थः । (205)

---

1. **एष्टव्योऽसौ**—निरन्वयविनाशः सिद्धान्तिनापि स्वीकरणीयः ।

* **तत्त्वबोधेति** तत्त्वरूपः बोधः स्वरूपज्ञप्तिः, तद्रूप एव निरन्वयनाशः, न तदतिरिक्तः सिद्धान्ते इति भावः ।

2. **सदा**—नामरूपाद्यभिव्यक्तिकालेऽपीति यावत् ।

* **अविद्याकर्मसंस्कारेत्यादि वार्त्तिके** सूत्रपदेन वायुः गृह्यते, 'वायुर्वै गौतम तत्सूत्रम्' इति श्रुतेः । खे इत्यस्य भूताकाशे इत्यर्थः, इत्यभिप्रयन्ति **शास्त्रप्रकाशिकाकाराः** ।

कार्यकारणभेदेन प्रपञ्चो यः पुरोदितः ।
यश्चोर्ध्वं वक्ष्यते तस्मात्परस्तादेतदुच्यते ॥ (206)

* प्रथते वैश्वरूपेण यतोऽविद्यैव सर्वथा ।
अविद्यामात्रयाथात्म्यादतस्तद्भेदमुच्यते ॥ (207)

मा भूत् व्याकृतधीः पुंसां नामरूपात्मवस्तुनि ।
ऐकात्म्यव्यक्तितोऽन्यत्र तस्मादेवेति गीरियम् ॥ (208)

सामानाधिकरण्योक्तिर्व्यक्तस्याव्यक्तसिद्धये । *
न हि कार्त्स्न्यमभिव्यक्तेर्व्यक्तस्याकार्त्स्न्यदर्शनात् ॥ (209)

'तन्नामरूपाभ्याम्' इति व्याकरणवचनात् मूलकारणमत्र नोच्यते, इत्याशङ्क्याह—कार्येति । उक्तवक्ष्यमाणप्रपञ्चादुपरिष्टात् तमाश्रित्य तदित्याद्युच्यते । 'नामरूपाभ्याम्' इति आकाशप्रमुखं जगत् गृह्यते । न प्रसिद्धे नामरूपे । नच तद्व्याकरणमृने मूलकारण(म)[मिति] तद्ग्रहणं युक्तमित्यर्थः । (206) सामानाधिकरण्यं कार्यकारणयोर्भेदनिराकरणायेत्युक्तम् । अत्रैव हेत्वन्तरमाह—प्रथत इति । कार्यकारणयोरज्ञानशरीरत्वात् युक्तं सामानाधिकरण्यमित्यर्थः । (207)

'नामरूपाभ्यामेव' इत्यवधारणार्थमाह—मा भूदिति । शुक्तिरिव रजतरूपेण विश्वं नामरूपाभ्यामेवाभिव्यक्तं, न [1]स्वरूपेण प्रत्यगात्मनेत्यर्थः । (208) नामरूपाभ्यां व्यक्तेराभासत्वे हेत्वन्तरमाह—सामानाधिकरण्येति । इदं तदव्याकृतमिति सामानाधिकर(ण्यादि)[ण्यमि]त्यर्थः । आत्मव्यक्तिं विना जगतो मुख्यव्यक्त्यभावे युक्त्यन्तरमाह—न हीति । व्यक्ते जगति कार्त्स्न्यं अद्वितीयं ब्रह्मेति नोपलभ्यते हि-यस्मात् तस्मात्, प्रत्य(द्वय)[गद्वया] बोधात् न साक्षात्

---

* "कार्यकारणयोर्नित्यमभेदः इत्युक्त्वा, 'कार्यकारणभेदेन' इति वदतः व्याहतिः, इत्याशङ्क्याह—प्रथत इति । वैश्वरूपेण—कार्यं कारणमित्यनेकाकारेणेत्यर्थः । सर्वदा—त्रिष्वपि कालेष्विति यावत् । कार्यकारणयोराविद्यत्वात् उक्तसामानाधिकरण्यात्तयोरभेदोपपत्तिः, भेदेन चानुवादः तद्रूपेणाविद्याया भानात् 'इन्द्रो मायाभिः' इत्यादिश्रुतेः । तन्न व्याहतिरित्यर्थः ।" इति शास्त्रप्रकाशिका ।

1. न स्वरूपेण प्रत्यगात्मनेति एवकारार्थवर्णनम् ।

* अव्यक्तसिद्धये—अव्यक्तत्वसिद्धये ।

* प्रमात्रादिनिषेधेन श्रुत्याऽव्याकृतमुच्यते ।
तद्वित्तिसाधनाभावात्कथं तदवगम्यते ॥ (210)

विधूताशेषसंबन्धमनन्यानुभवात्मकम् ।
कूटस्थसंविन्मात्रैकं ब्रह्मास्मीतिस्वभावकम् ॥ (211)

* अतिरोहितसंवित्कं सदानस्तमितोदितम् ।
निःसामान्यविशेषं तत्प्रत्यगात्मैकनिष्ठितम् ॥ (212)

व्यक्तिः । कात्स्न्यानभिव्यक्तौ हेतुमाह—**व्यक्तस्येति** । अकात्स्न्यदर्शनात्—विभक्तत्वादित्यर्थः । (209)

'तद्धेदम्' इत्यादौ अव्याकृतशब्देन अज्ञातं वस्तु प्रतिपाद्यं न सिद्ध्यति मानाभावात्, इति शङ्कते—**प्रमात्रादीति** । (210)

नित्यानुभवसाधनम्

स्वरूपानुभवादव्यक्तसिद्धिः न मानादिति वक्तुमनुभवं साधयति—**विधूतेति** । ज्ञानसंबन्धाभावे कथं तत्सिद्धिः, अत्राह—**अनन्येति** । जन्मादिमत् ज्ञानं कथं तद्विपरीतात्मरूपम्, अत्राह—**कूटस्थेति** । ब्रह्मण एव ज्ञानरूपत्वं न जीवस्य, अत्राह—**ब्रह्मास्मीति** । (211) फल[1]लिङ्गानुमेयं ज्ञानं नापरोक्षप्रत्ययरूपम्, अत्राह—**अतिरोहितेति** । 'फलात्फलेऽनवस्था स्यात् फलं चेन्न प्रदीपवत्' इति न्यायादित्यर्थः । आत्मनः संविद्रूपत्वेऽपि न कौटस्थ्यम्, [2]अविरतोदयस्वरसभङ्गु-

---

* "तद्धेत्यादौ अव्याकृते प्रकृते मानमस्ति न वेति विकल्प्य, आद्यं दूषयन्नाशङ्कते—**प्रमात्रादीति** । न हि तत्र मानमस्तीति वक्तुं शक्यं, प्रकृतश्रुतिविरोधादिति भावः । द्वितीयं निरस्यति—**तद्वित्तीति** । यदि तत्र नास्ति मानं, तदा तदसिद्धिः साधकाभावादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

1. **फललिङ्गानुमेयं ज्ञानमिति** ज्ञानेन विषये ज्ञाततापरपर्यायं प्राकट्यं फलं जायते। तच्च प्रत्यक्षम् । तेन कारणस्य ज्ञानस्यानुमानमिति भाट्टमतमत्राभिसंहितम् ।

2. **अविरतोदयेति** अत्र प्रतिक्षणविनाशिज्ञानसन्ततिरूप आत्मेति सौगतमतमभिसंहितम् ।

* "संविद्रूपमपि ब्रह्म न स्वप्रकाशं संविदो वेद्यत्वादित्याशङ्क्याह—**अतिरोहितेति** न हि सा वेद्या घटवदसंवित्वापत्तेः अनवस्थानाच्चेति भावः ।" इति **शास्त्रप्रकाशिका** ।

स्वतोऽवबुद्धं तद्यस्मान्निरविद्यमतः सदा ।
संगतिर्निरविद्यस्य नाविद्याहेतुजैर्मलैः ।। (213)

एवंस्वभावमप्येतदविज्ञातं स्वभावतः ।
तमोवृत्तमपेक्ष्यैतन्न तु यद्वास्तवं स्वतः ।। (214)

स्वानुभूत्यनुसारेण यथोक्तोऽर्थोऽवसीयताम् ।
मानहेत्वतिवर्तित्वान्नेह मात्रादिसंभवः ।। (215)

तस्मिन्नपहतध्वान्तेऽप्यविद्या स्वानुभूतितः ।
स्वानुभूतिर्न वेद्मीति प्रागैकात्म्यप्रबोधतः ।। (216)

ज्ञातात्मतत्त्वो जानाति त्रिकालं तदसंभवम् ।
अन्यतः संगतिः सेयमविचारितसिद्धिका ।। (217)

ज्ञानत्वात्, अत्राह—सदेति । सविशेषत्वे घटादिवत् दृश्यत्वं, (न वि)[निर्वि]-शेषत्वे नृशृङ्गसाम्यं, निर्विशेषस्यावस्तुत्वात्, अत्राह—निःसामान्येति । [1]अन्त्य-विशेषेण व्यभिचार इत्यर्थः । (212)

एवं नित्यबुद्धत्वं प्रसाध्य शुद्धत्वं प्रसाधयति—स्वत इति । शुद्धत्वेऽपि न मुक्तत्वम्, अत्राह—संगतिरिति । (213) पूर्वमज्ञात[म्]इत्युक्तम्, इदानीं निरविद्यमिति, अतो व्याघातः, अत्राह—एवमिति । स्वभाव(वत्)[तः]इत्येतत् स्फुटयति—तमोवृत्तमिति । (214)

अज्ञातत्वस्य नित्यानुभवसिद्धत्वम्

एवं नित्यानुभवं प्रसाध्य तत्प्रसादादज्ञातत्वसिद्धिमाह—स्वानुभूतीति । यत् सिद्ध्यति तन्मानादेव, इत्यत्राह—मानेति । मानहेतोः कारकादेरभावादि-त्यर्थः । (215) स्वप्रकाशात्मनोऽ[2]ज्ञानायोगात् कथमज्ञातत्वम्, अत्राह—तस्मि-न्निति । अनुभवमेव प्रकटयति—स्वानुभूतिरिति । (216) स्वतःप्रकाशमान-(म)स्याज्ञानसंसर्गे, कुतस्तन्निवृत्तिः, अत्राह—ज्ञातेति । अज्ञानसंसर्गोपगमे

---

1. अन्त्यविशेष इति वैशेषिकसिद्धे परमाण्वादिनिष्ठे अन्त्यविशेषे निर्विशेषेऽपि वस्तुत्वसत्त्वेन, निर्विशेषत्वं अवस्तुत्वव्यभिचारीति भावः ।

2. अज्ञानायोगादिति तमःप्रकाशयोरिव स्वप्रकाशाज्ञानयोर्विरोधादिति भावः ।

* स्वभावव्यतिरेकाभ्यां ध्वान्तसिद्धेरसंभवात् ।
न चेत्प्रमाणतः सिद्धिरस्याव्याकृतरूपिणः ।
न चैकात्म्यस्वभावेन कुतस्तन्मानगोचरः ॥ (218)

तद्धेदमित्यनेनोक्तिर्व्याकृताव्याकृतात्मनोः ।
प्रमाणयोग्यतैवोक्ता न त्वैकात्म्यमितात्मता ॥ (219)

अव्याकृतमविज्ञातं प्रमाणाविषयं मतम् ।
प्रमाणानभिसंबद्धं प्रमाणाच्चेति साहसम् ॥ (220)

अविज्ञातार्थगन्तॄणि प्रमाणानीति वादिनाम् ।
सर्वेषामभ्युपेतोऽर्थः कुतोऽसाविति चिन्त्यते ॥ (221)

असङ्गत्वविरोधः, अत्राह—**अन्यत इति** । अन्येनेति यावत् । (217) तत्त्वान्यत्वाभ्यामज्ञानस्याप्रमेयत्वेऽपि स्वरूपेण तत् प्रमाणगम्यम्, अत्राह—**न चेदिति । प्रमाणतः—सिद्धिः** व्यतिरेकेणेति शेषः । [1]व्यतिरेकाव्यतिरेकाभ्यामप्रमेयं स्वरूपेणापि न मेयमित्यर्थः । (218) 'तद्धेदम्' इति वाक्यमेयमज्ञातत्वम्, अत्राह—**तद्धेति ।** अनेन वाक्येन व्याकृताव्याकृतरूपयोः उक्तिः—कथनमात्रमस्ति । तत्र प्रमाणयोग्यता—अज्ञातता उक्तैवानुभवसिद्धत्वादनूदिता च । अतो नैकात्म्यवत् वाक्यमेयतेत्यर्थः । (219) अज्ञातत्वस्य प्रमेयत्वे व्याघातं वक्तुं तत्स्वरूपमाह—**अव्याकृतमिति** । तद्व्याख्यानमविज्ञात(मे)[मि]ति । किमतः, अत्राह—**प्रमाणेति ।** प्रमाणस्याविषयभूतं प्रमाणात् सिद्ध्यतीति व्याहतम्, [2]प्रमाणविषयत्वे [3]तन्निरस्यत्वानुपपत्तेरित्यर्थः । (220)

अज्ञातत्वस्य स्वरूपानुभवसिद्धत्वाभावे मानमेयव्यवहारासिद्धिः

प्रत्यगात्मैवाज्ञानस्याश्रयो विषयश्च, स्वरूपानुभवादेव [4]तत्संबन्धसिद्धिः इति

---

* **स्वभावव्यतिरेकाभ्यां ध्वान्तसिद्धेरसंभवादिति** ध्वान्तस्य—अज्ञानस्य स्वभावेन—सद्रूपेण—वस्तुत्वेन न सिद्धिः, अबाधापत्तेः । नापि व्यतिरेकेण—सद्भेदेन सिद्धिः, अवस्तुनि भेदानुपपत्तेरित्यर्थः ।

1. **व्यतिरेकाव्यतिरेकाभ्यां**—सद्भेदेन सदभेदेन चेत्यर्थः ।
2. **प्रमाणविषयत्वे इति** अज्ञातत्वस्येत्यादिः ।
3. **तन्निरस्यत्वानुपपत्तेः**—प्रमाणनिरस्यत्वानुपपत्तेः ।
4. **तत्संबन्धसिद्धिः**—प्रत्यगात्माज्ञानयोः संबन्धसिद्धिः ।

ज्ञातो वार्थोऽथवाज्ञात उभयं वा न चोभयम् ।
प्रमाणानां प्रमेयः स्यात् सर्वमेतद्विचार्यते ॥ (222)

मानमेयत्वसंभित्तौ न पश्यामोऽत्र साधनम् ।
ज्ञातस्याव्यतिरेकित्वात् अज्ञातस्याप्यमानतः ॥ (223)

जगत्यर्थो हि यः कश्चित् ज्ञात एव स बुद्धिवत् ।
मानादेव स विज्ञात इत्येतत्स्यात् कुतोऽमितेः ॥ (224)

स्वमतमुक्तम् । इदानीं एवमनभ्युपगच्छतां मानमेयव्यवहारासिद्धिं वक्तुं, [1]अभ्युपगममाह—**अविज्ञातेति** । सः अज्ञातः स्वतः स्फुरति, प्रमाणाद्वा, साक्षिणो वेति विचार्यते, इत्याह—**कुत इति** । (221)

अज्ञातत्वस्य स्वप्रकाशत्वानङ्गीकारात् साक्षिवेद्यत्वे वेदान्तसिद्धान्तसिद्धिः, इत्यभिसन्धाय, प्रमाणगम्यत्वपक्षे विचारान्तरमाह—**ज्ञातो वेति** । अज्ञातत्वेन प्रमाणगम्यत्वं स्वप्रकाशस्य वा जडस्य वा उभयात्मकस्य अनुभयात्मकस्य वेति विचार्यमित्यर्थः । (222)

जडस्य मेयत्वं **तार्किकैरङ्गीकृतमुपपन्नं** [2]चेदेवमेव, तत्राह—**मेयेति** । जडस्याज्ञातत्वेन मेयत्वे मानमिदं मेयमिदमिति [3]तद्भेदे न मानमस्तीत्यर्थः । विषयविषयिभावेन तयोः भेदसिद्धिश्चेत्, तर्हि ज्ञातरूपेण मानविषयत्वं, अज्ञातरूपेण वा । नाद्यः, इत्याह—**ज्ञातस्येति** । स्फुरितरूपस्य मानादभिन्नत्वात् तद्भेदसाधकमानान्तरस्वीकारे अनवस्थानादित्यर्थः । [4]नेतरः, इत्याह—**अज्ञातस्येति** । मानप्रवृत्तेः प्रागज्ञातस्य मानेन स्फुरणानुपपत्तेरित्यर्थः । (223) क्रियातत्कर्मणोर्भेदनियमात् कथं [5]ज्ञातस्याव्यतिरे(क)[कि]त्वम्, अत्राह—**जगतीति** । प्रमाणभूमौ योऽर्थो व्यवह्रियते सः स्वतः एव ज्ञातः व्यवह्रियमाणत्वात् बुद्धिवत् इत्यर्थः । स्वगोचरज्ञानादपि व्यवह्रियमाणत्वसंभवादप्रयोजको हेतुः, अत्राह—

---

1. **अभ्युपगममिति** वादिनामित्यादिः ।
2. **एवमेव**—जडस्य मेयत्वमेव ।
3. **तद्भेदे**—मानमेयभेदे ।
4. **नेतरः**—अज्ञातरूपेण जडः मानविषयः इति कल्पो न युक्तः ।
5. **ज्ञातस्याव्यतिरेकित्वं**—ज्ञातस्य ज्ञानाभेदः । ज्ञानस्य क्रियात्वेन ज्ञातार्थस्य च तत्कर्मत्वेन तयोर्भेद एवेति भावः ।

मानातिरेकासंसिद्धेर्मेय एव तथा न किम् ।
न हि दीपान्तराद्दीपो भारूपत्वं प्रपद्यते ॥ (225)

* ज्ञातरूपातिरेकेण नान्यद्रूपं समीक्ष्यते ।
एवं चेन्मानतो मेयो विज्ञात इति का प्रमा ॥ (226)

न चापर उपायोऽस्ति मेयसद्भावसिद्धिकृत् ।
मानेभ्यस्तत्फलासत्तेरन्धकारप्रनृत्तवत् ॥ (227)

स्वत एव प्रसिद्धश्चेत् प्रमेयोऽर्थस्तथापि न ।
अनन्यायत्तसंसिद्धेर्मेयत्वं किंनिबन्धनम् ॥ (228)

मानादिति । (224) अर्थस्य ज्ञातत्वानुपपत्तिरत्र मानम्, अत आह—**मानेति** । स्वतः सिद्धोऽपि मेयो मानात् सिद्ध्यति, इत्यत्राह—**न हीति** । (225)

[1]इदानीमेव ज्ञातत्वानुपपत्त्या तस्य मानफलत्वसिद्धिः, अत्राह—**ज्ञातेति** । [2]पूर्वानवगमगतौ इदानीमेव [3]ज्ञातत्वगतिः, [4]अतश्च पूर्वानवगमावगतिरिति इतरेतराश्रय इत्यर्थः । उपसंहरति—**एवं चेदिति** । ज्ञातस्याव्यतिरेकित्वमज्ञातस्या-(मा,[भा]वत्वं यदीत्यर्थः । (226) जडस्य स्वत एव तर्हि सिद्धिरस्तु, तत्राह—**न चेति** । **अपरः** मानादिति शेषः । जाड्यविरोधात् स्वतोऽसिद्धेः, मानाच्चासिद्धौ अन्धकारप्रनृत्तवत् सर्वव्यवहारलोपः स्यादित्यर्थः । (227)

द्वितीयकल्पं निरस्य,(ज्ञा)ज्ञातो वेति प्रथमकल्पमनुवदति—**स्वत एवेति** । दूषयति—**तथापीति** । मानादयं सिद्धः इति विशेषावगमायोगादित्यर्थः । यथा [5]तव स्वप्रकाशस्यैव मेयत्वं, एवं ममापि, इत्यत्राह—**अनन्यायत्तेति** ।

---

1. **इदानीमेव**—मानप्रवृत्त्यनन्तरमेव ।
2. **पूर्वानवगमगतौ**—पूर्वमज्ञातत्वज्ञाने सति ।
3. **ज्ञातत्वगतिः**—ज्ञातत्वज्ञानम् ।
4. **अतश्च**—इदानीमेव ज्ञातत्वज्ञानात् ।

* "यत्तु नाज्ञातं रूपमस्ति मानाभावादिति, तन्न, घटज्ञातत्वमानस्य तदज्ञातत्वेऽपि मानत्वादित्याशङ्क्य, 'अज्ञातस्याप्यमानतः' इत्येतत् विवृणोति—**ज्ञातरूपेति** । न तावद्विषयस्य ज्ञातत्वमानं स्वकाले तत्राज्ञातत्वं साधयति, ज्ञातत्वसाधनोपक्षयात्, कालान्तरे चासत्त्वात् । न च ज्ञातरूपातिरेकि रूपं वस्तुनोऽस्ति योग्यानुपलम्भादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

5. **तव**—सिद्धान्तिनः ।

निःसाधनो न साध्योऽस्ति नासाध्यं साधनं क्वचित् ।
तुल्यशक्तिमतां नापि मिथोऽपेक्षास्ति कुत्रचित् ॥ (229)

नासिद्धयोः स्वतोऽपेक्षा सिद्धयोश्चापि नेष्यते ।
नापेक्ष्यापेक्षकत्वं हि लोकेऽप्यतिशयं विना ॥ (230)

नापि सिद्धः स्वतोऽसिद्धं नृशृङ्गवदपेक्षते ।
तथाऽसिद्धः स्वतःसिद्धं नात्यन्ताभावरूपतः ॥ (231)

अपेक्षते चेत्सिद्धोऽसौ नासिद्धोऽपेक्षितुं क्षमः ।
* येनातो ज्ञानतः सिद्धिं स्वतः सिद्धोऽप्यपेक्षते ॥ (232)

मत्पक्षे मानस्याज्ञाननिवर्तकत्वात्, त्वत्पक्षे अज्ञानस्य पारमार्थिकस्य निवृत्त्ययोगात् वस्तुसिद्धेर्भा[1]विकत्वादित्यर्थः । (228) किंच, मानमेययोः मिथोऽनपेक्षत्वं, सापेक्षत्वं वा । नाद्यः, इत्याह—**निःसाधनेति** । मेयत्वं मानसाध्यत्वात् कथं तद्विना सिद्ध्येत् । मानमपि मेयसाधकं, विना मेयं निरालम्बनं न सिद्ध्येदित्यर्थः । द्वितीये, मानमपि स्वतःसिद्धं, न वा । प्रथमं प्रत्याह—**तुल्येति** । मानमेययोरुभयोरपि स्वतः सिद्धत्वे मिथोऽपेक्षा न स्यादित्यर्थः । अपिशब्दात्, स्वतोऽसिद्धत्वे मानान्तरात् सिद्धौ अनवस्था, अत्यन्तासिद्धावसत्त्वमित्यर्थः । (229) किंच, स्वतोऽसिद्धयोरपेक्षा, सिद्धयोः, सिद्धासिद्धयोर्वा । नाद्यः, इत्याह—**नासिद्धयोरिति** । स्वतोऽसतोरस्फुरतोश्च न मिथोऽपेक्षा, [2]वन्ध्या(स्त)[सू]नुखपुष्पवदित्यर्थः । द्वितीयं दूषयति—**सिद्धयोश्चेति** । हेतुमाह—**नापेक्षेति** । अपेक्षाफलाभावादित्यर्थः । (230) [3]तृतीयेऽपि सिद्धस्यापेक्षाकर्तृत्वं, असिद्धस्य वा । नाद्यः, इत्याह—**नापीति** । द्वितीयमपवदति–**तथेति** । विमतो नापेक्षाश्रयः असत्त्वात् नृशृङ्गवत् । (231) **अपेक्षते चेदिति** । असतः क्रियाश्रयत्वायोगा-

---

1. **भाविकत्वात्**—परमार्थत्वादिति यावत् ।
2. **वन्ध्यासूनुखपुष्पवत**—वन्ध्यासूनुखपुष्पयोरिव ।
3. **तृतीयेऽपि**—सिद्धासिद्धयोः सापेक्षत्वेऽपि ।

* " **येनेति** उक्तन्यायात् कस्य चित् कस्मिंश्चिदपि येन नापेक्षा, तेन अज्ञानकृतत्वात्तस्याः स्वतःसिद्धोऽप्यात्मा स्वाज्ञानेनाज्ञातत्वात् ज्ञानतः सिद्धिमपेक्षते । अतः स्वतोऽपेक्षाभावात् सापेक्षं सर्वं सर्पवत्कल्पितमित्यर्थः । " इति **शास्त्रप्रकाशिका** । 'येनातोऽज्ञानतः' इति मु. पु. पाठः ।

विश्वेश्वरोऽपि प्राहैतत्प्रपन्नाय किरीटिने ।
भावाभावत्वमज्ञानादतद्वत्येव कल्पितम् ॥ (233)

'नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥' (234)

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
तथा न जायत इति विध्वस्ताशेषकल्पनम् ॥ (235)

वासुदेवः सर्वमिति प्रत्यक्षश्रुतिपूर्वकम् ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ (236)

दित्यर्थः । सिद्धस्यापेक्षा [1]पुरस्तान्निरस्ता । संप्रति 'सिद्धोऽसौ' इति [2]तदङ्गीकारे पूर्वापरविरोधः, अत्राह—**येनेति** । असिद्धस्य अपेक्षानिरासपरत्वात् विरोधाभावः । कस्य चिदपि कस्मिंश्चिदपि अपेक्षा न युक्ता येन, अतः स्वतःसिद्धः—ज्ञानतः सिद्धिं नापे(क्षि [क्ष]त इति नकारोऽनुषञ्जनीयः । (232)

एवं कस्यापि नापेक्षा घटते इति प्रतिपादनेन अर्थात् सापेक्षस्य रज्जुभुजङ्गवत् कल्पितत्वात् द्वैतं स्वतःसिद्धे प्रती(वि)[चि]कल्पितम् इत्युक्तम् । [3]तत्र **भगवद्वाक्यं** मानम्, इत्याह—**विश्वेश्वरोऽपीति** । (233) वाक्यमुदाहरति—**नासत इति** । उभयोः—सदसतोः । अन्तः—निर्णयः । तस्मादेकस्मिन् भावाभावत्वं कल्पितमित्यर्थः । (234) अत्रैव वाक्यान्तरमाह—**ज्ञेयमिति** । ब्रह्म 'न सत्तन्नासदुच्यते' (भ.गी. 13-12) इत्युत्तरार्धमुपजीव्यम् । वस्तुतो जन्मादिविकाराभावेऽपि मानमाह—**तथेति** । विध्वस्ताशेषकल्पनमाह इति संबन्धः । (235) आत्मनोऽशेषकल्पनामूलत्वस्मृतिर्निर्मूला न मानम्, अत्राह—**वासुदेव इति** । 'इदं सर्वं यद(मेया,[यमा]त्मा' (बृ. 4-4-6) इत्यादिश्रुतिर्मूलमित्यर्थः । निर्विकारे [4]जन्मादिविकारकल्पितत्वे मानमाह—**अहमिति** । (236) प्रतीचो

---

1. **पुरस्तात्**—'सिद्धयोश्चापि नेष्यते' इत्यत्र ।
2. **तदङ्गीकारे**—सिद्धस्य सापेक्षत्वाङ्गीकारे ।
3. **तत्र**—प्रतीचि द्वैतस्य कल्पितत्वे । एवमुत्तरत्रापि ।
4. **जन्मादिविकारकल्पितत्वे**—जन्मादिविकारस्य कल्पितत्वे

सत्यज्ञानादिरूपस्य प्रत्यगात्मन एव च ।
कारणत्वं सुविस्पष्टं श्रुतौम् हि बहुशः श्रुत ॥ (237)

अज्ञातात्मातिरेकेण ब्रुवतः कारणं तथा ।
सम्यग्ज्ञानान्न मुक्तिः स्यात् न ज्ञानं वस्तुनुत् क्वचित् ॥ (238)

कर्मभ्योऽपि न मुक्तिः स्यात् कर्मापि न हि वस्तुनुत् ।
* तस्यानित्यफलोत्पत्तौ प्रभविष्णुत्वकारणात् ॥ (239)

कूर्मलोमादिवच्चेत्स्यादबुद्धत्वं तथापि वः ।
स्वतः सर्वज्ञतैव स्यान्न वस्त्वज्ञातमस्ति हि ॥ (240)

न च मानात्प्रसिद्धिः स्यात् कूर्मलोमादिवस्तुनः ॥ (241)
ज्ञातार्थव्यतिरेकेण मानानां मानता यतः ।

विश्वकारणत्वविषयस्मृतेः मूलश्रुतिमाह— सत्येति । 'सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायाम्' (तै. 2-1) इति ब्रह्मणः प्रत्यग्भावमभिधाय, 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै. 2-1) 'इदं सर्वमसृजत' (तै. 2-6) 'यतो वा इमानि भूतानि' (तै. 3-1) इत्यादिना तस्य कारणत्वमुक्तमित्यर्थः । (237)

[1]प्रधानादिकार्यप्रपञ्चस्य प(रा)[रमा]र्थत्वात् अज्ञानान्नात्मनि कल्पितत्वम्, अत्राह—अज्ञातेति । (238) कर्मणैव बन्धध्वंसः, दुरितस्येव प्रायश्चित्तादिना, इत्यत्राह—कर्मभ्योऽपीति । दुरितमपि देहात्मप्रत्ययमूलत्वात् कल्पितमित्यर्थः । हेत्वन्तरमाह—तस्येति । (239) अज्ञातात्मनोऽपि न कारणत्वं युक्तं, [अ]ज्ञातत्वे मानोपगमे सिद्धान्तविरोधात्, [2]अन्यथा तदसिद्धेः इति शङ्कते—कूर्मेति । अनुभवगम्याज्ञातत्वानङ्गीकारे बाधकं दर्शयन् परिहरति—तथापीति । सर्वे सर्वज्ञाः स्युः क्वचिदप्यज्ञानाभावादित्यर्थः । (240) कूर्मलोमादि प्रतीतं न वा । [3]न चेत्, आश्रयहीनं निदर्शनम् । भ्रान्तिप्रतीतं चेत्, अज्ञातमुपेतव्यम्, तन्मूलत्वात् भ्रान्तेः । मानप्रतीतं चेत्, अत्राह—न चेति । तुच्छत्वादित्यर्थः । (241)

---

1. प्रधानादिकार्यप्रपञ्चस्य—प्रधानादेः कार्यस्य प्रपञ्चस्य ।

* तस्येति मुक्तेः नित्यत्वादिति भावः ।

2. अन्यथा—अज्ञातत्वे मानानुपगमे ।

3. न चेदिति प्रतीतमिति शेषः ।

मेयार्थापह्नुतिश्च स्यान्नाज्ञातमिति जल्पतः ॥ (242)
ततश्च वेदसिद्धान्तसंत्यागः कारणादृते ।

न भिद्यते प्रमेयोऽर्थो मानाद्येषां च वादिनाम् ।
तेषां दुःशकमत्यन्तमबुद्धार्थावबोधनम् ॥ (243)

ज्ञानमेयप्रभेदेऽपि मानस्य स्वार्थरूपिणः ।
बौद्धराद्धान्तसक्तिः स्यात् स्वार्थस्य क्षणिकत्वतः ॥ (244)

स्वार्थं प्रत्येव संसिद्धेः परार्थस्येह वस्तुनः ।
स्वात्मादिवदनात्मार्थो मृषा स्यात् क्षणिकोऽपि वा ॥ (245)

इतश्चाज्ञातमुपेतव्यम्, इत्याह—ज्ञातेति । ज्ञातादर्थादतिरेकेण — अन्येन अज्ञातार्थेन मानानां मात्वं, 'ज्ञाते कोऽतिशयो [1]मितेः' इति न्यायात् । अतः अज्ञातासत्त्वे मेयापह्नुतिः [2]तत्फलापह्नुतिश्च स्यादित्यर्थः । (242) किमतः, अत्राह—ततश्चेति । वेदगम्यधर्मादेः प्रत्यक्षादिगम्यरूपादेश्च सिद्ध्यर्थमज्ञातमुपेतव्यमित्यर्थः ।

'ज्ञातो वार्थोऽथवाऽज्ञातः' (वा. 222) इति पक्षद्वयं प्रत्यक्षेऽपि । तत्र ज्ञातपक्षः कापि(ला)[लः, आ]त्मनः स्वप्रकाशत्वोपगमात् । इदानीं उभयं वेति तृतीयपक्षं बौद्धाभिमतं प्रतिक्षिपति—न भिद्यत इति । मानात् मेयो न भिद्यते इति येषां मतं, तेषामपि अवगतस्य मेयत्वमशक्यसंपादनमुच्यते इत्यर्थः । (243) अभेदे मानमेयव्यवहारासिद्धिश्चेत्, भेदे तत्सिद्धिः, अत आह—ज्ञानेति । मानव्यापारात्प्रागज्ञातस्य साक्षिसिद्धस्यानङ्गीकारे मानस्य संवेदनस्य स्वविषयाकारस्य क्षणिकत्वात् तस्य च स्वकालीनार्थसाधकत्वात् [3]प्रागुत्तरकालयोः अर्थसत्त्वे मानाभावात् अर्थस्यापि क्षणिकत्वप्रसङ्गात् बौद्धसिद्धान्त(श,[स]क्तिः स्यादित्यर्थः । (244) अर्थस्य स्वतःसिद्धत्वान्न क्षणिकत्वम्, अत्राह—स्वार्थमिति । परार्थस्य-जडस्य, स्वार्थं प्रत्येव—स्वतः सिद्धमपे(क्षै)[क्ष्यै]व सिद्धेः, अन्यथा असिद्धेः, दृग्दृश्ययोः संयोगादिसंसर्गायोगात् चिदात्मनि कल्पितः स्यात् । मानात् सिद्ध्यु-

---

1. मितेरिति मानादित्यर्थः ।
2. तत्फलापह्नुतिश्चेति अज्ञातत्वनिवृत्तेरेव मानफलत्वादिति भावः ।
3. प्रागुत्तरकालयोः—संवेदनपूर्वोत्तरकाल्योः ।

* न च सौगतसिद्धान्तः तत्सिद्धौ मित्यभावतः ।
मेयमानैकतोऽभावादज्ञातत्वस्य तत्क्षणे ॥ * (246)

अथाभ्युपेयतेऽज्ञातः प्रमेयाव्यतिरेकतः ।
एकत्रापि प्रमाणत्वप्रसिद्ध्यर्थं क्षणात्मनि ॥ (247)

मानात्मकेऽपि मेयेऽर्थे यद्यबुद्धत्वमिष्यते ।
अज्ञातत्वापनुन्मानात्किमन्यदिति कथ्यताम् ॥ (248)

स्वतो वा परतो वेदमज्ञातत्वं भवद्भवेत् ।
स्वतश्चेत्तत्तमोवत्स्यात् ज्ञातत्वं रज्जुसर्पवत् ॥ (249)

पगमे [1]प्रागुक्तनयेन क्षणिकः स्यादित्यर्थः । (245) भवतु बौद्धराद्धान्तः, को दोषः, तत्राह—**न चेति** । [2]मित्यभावं साधयति—**मेयेति** । तयो[रेक]त्वात् मानकाले चाज्ञातत्वायोगात् विज्ञानवादे नाज्ञातज्ञापनमित्यर्थः । (246) [3]एकस्मिन्नपि क्षणे मानमेयभावार्थं मेयाभिन्नत्वेनाज्ञातत्वस्येष्टत्वादज्ञातज्ञापकमानसिद्धिः, इति शङ्कते—**अथेति** । (247) दूषयति—**मानेति** । मानाभिन्नमेयात्मकाज्ञातत्वं न माननिरस्यम् अविरोधात् । [4]नाप्यन्यतः, [5]तन्निवृत्तेरयोगादनङ्गीकाराच्च । अतो व्यवहारोच्छेद इत्यर्थः । (248) मानाभिन्नमेयस्याज्ञातत्वं स्वाभाविकं, आगन्तुकं वेति विकल्पयति—**स्वतो वेति** । स्वाभाविकस्य निवृत्त्ययोगात् ज्ञातत्वमेव तमोव(द)[ति-अ]ज्ञाते कल्पितं स्यादित्यर्थः । (249)

---

1. **प्रागुक्तनयेन**—क्षणिकस्य स्वविषयाकारसंवेदनस्य मानस्य स्वकालीनार्थसाधकत्वात् मानपूर्वोत्तरकालयोः अर्थस्य सत्त्वे मानाभावात् अर्थस्य क्षणिकत्वमिति नयेन ।
2. **मित्यभावं**—बौद्धसिद्धान्तसिद्धौ मानाभावम् ।

* **तत्क्षणे**—मानोत्पत्तिक्षणे ।

* "**नचेति** विज्ञानवादः बाह्यार्थवादश्च न युक्तौ, तन्मूलमानाभावात् भ्रान्तिमूलत्वात् । उक्तं च 'समुदाय उभयहेतुकेऽपि तदाप्राप्तिः' इति 'नाभाव उपलब्धेः' इति च । अतस्तन्मतमसंगतमित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

3. **एकस्मिन्नपि क्षणे**—ज्ञानक्षणे । बौद्धसमये क्षणिकोऽर्थः क्षणशब्देन व्यवह्रियते इत्यनुसन्धेयम् ।
4. **नाप्यन्यत इति** निरस्यमिति शेषः ।
5. **तन्निवृत्तेरयोगादिति** अन्यत इत्यस्यावृत्त्या मानान्येनाज्ञातत्वनिवृत्तेरयोगादित्यर्थः ।

* अथान्यतस्तदज्ञातं किंरूपं वस्त्वितीर्यताम् ।
मानादवगतं तच्चेन्मैवमव्यतिरेकतः ॥ (250)

अन्वयव्यतिरेकाभ्यां यथोक्तोऽर्थः प्रसिद्ध्यति ।
ताभ्यां विना कुतोऽज्ञायि त्वेवंरूपमितीर्यताम् ॥ (251)

न चेह वास्तवं रूपं तदध्यासेन बाध्यते ।
रज्जुसर्पधिया लोके न रज्जुरिति धीवृतिः ॥ (252)

स्वसंवित्तित्वमात्रे च न तमःसंभवः क्वचित् ।
तथाभ्युपगमे तस्य नापनुत्तिः कुतश्चन ॥ (253)

न चोभयमिति [1]तुरीयमतमनुवदति—**अथेति**। अज्ञानादज्ञातं वस्तु, ज्ञानाच्च ज्ञातम् । स्वतो नाज्ञातं ज्ञातं वेत्यर्थः । दूषयति—**किमिति** । उभयोः परतस्त्वे तदुभयव्यतिरिक्तं वस्तुरूपं वाच्यम् । तत्र संभवतीत्यर्थः । वह्न्यादेरौष्ण्यस्वाभाव्यानुभवात् न नैःस्वाभाव्यम्, इति शङ्कते—**मानादिति** । अन्वयव्यतिरेकयोरनुपपत्तेर्मानासिद्धिः, इत्याह—**मैवमिति** । (250) अन्वयव्यतिरेकानुपपत्तौ मानानुपपत्तिं प्रकटयति—**अन्वयेति** । मानव्यापारात्प्रागज्ञातसिद्धौ, ज्ञातमिदमिदानीं मानादिति मानेन अन्वयव्यतिरेकाभ्यामवगतमुष्णत्वादि वस्तुरूपं स्यात् । प्रागज्ञातत्वानवगमे नायं विशेषः सिद्ध्यतीत्यर्थः । (251) तस्मात् ज्ञातत्वं रज्जुसर्पवत् इत्येव स्थितम् । तत्राज्ञातत्वं कल्पितं, पारमार्थिकं वा । आद्ये अपसिद्धान्तः । द्वितीये दोषमाह—**न चेति** । (252) **सौगतमत एव** प्रसङ्गात् दोषान्तरमाह—**स्वसंवि(द)[त्ति]त्वेति** । स्वप्रभस्याज्ञानसंसर्गायोगादज्ञातत्वायोग इत्यर्थः । स्वसंविदिते अज्ञानोपगमे दोषमाह—**तथेति** । स्वरूपज्ञानादज्ञाननिवृत्तिः, ज्ञानान्तराद्वा । आद्ये, न तत्र कदाचिदप्यज्ञानं स्यात् । द्वितीये, अपसिद्धान्तः स्वसंवेद्यत्वस्वीकारादिति [2]तन्निवृत्त्यनुपपत्तिरित्यर्थः । (253)

---

1. **तुरीयमतमिति** 'ज्ञातो वार्थोऽथवाऽज्ञात उभयं वा न चोभयम्' (वा. 222) इति वार्त्तिके तुरीयतयोपन्यस्तं मतमित्यर्थः ।

* "न चोभयमिति चतुर्थेन सह द्वितीयमुत्थापयति—**अथेति** अज्ञातत्वस्याज्ञानकृतत्वे कल्पितत्वमिति द्वितीये दोषं मत्वा, चतुर्थं दूषयति—**किंरूपमिति** ।" इति **शास्त्रप्रकाशिका**

2. **तन्निवृत्त्यनुपपत्तिरिति** अज्ञातत्वनिवृत्तेरनुपपत्तिरित्यर्थः ।

* दुर्बलानां विरुद्धानां बलवद्भिरपाक्रिया ।
* विरुद्धैरेव दृष्टा सा तदैकात्म्ये कथं भवेत् ॥ (254)

बाध्यबाधकयोर्योगः स्वशक्त्यनपहारतः ।
योऽन्यथा संगतिं ब्रूते चर्मवद्वेष्टयेत्स खम् ॥ (255)

न च जाड्यातिरेकेण ह्यविद्या काचिदिष्यते ।
अविद्यां गमयित्वेति श्रुतितोऽप्यवसीयताम् ॥ (256)

अज्ञातत्वमपि धीरूपं, अधीरूपं वा । द्वितीये, यत्प्रतीयते सा धीरिति [1]सिद्धान्तहानिः । आद्ये, तन्निवृत्तिर्न स्यात्, इत्याह–**दुर्बलानामिति** । (254) ज्ञानादज्ञातत्वनिवृत्तिरेव मा भूत्, इत्याशङ्क्य, प्रकाशतमसोरिव [2]तयोः [3]निवर्त्यनिवर्तकत्वश(वतै)[क्त्यै] व संबन्धः, इत्याह—**बाध्येति** । (255) स्वसंवित्तिस्वमात्रे च न तमसः संभवः इत्युक्तम् । [4]तत्रैव हेत्वन्तरमाह—**नचेति** । [5]जाड्याविद्ययोरेकत्वा[त् स्व]संविदिते जाड्यविरोधादित्यर्थः । जाड्याविद्ययोरैक्ये मानमाह—**अविद्यामिति** । पूर्वदेहे त्यक्ते, प्राक् देहान्तरप्राप्तेः या स्तिमितता, तामविद्यां प्रापय्य—अचेतनं कृत्वा (मा)[आत्मा]नमुपसंहरति [इति] [6]वक्ष्यमाणश्रुतेः जाड्यमेवाविद्येत्यर्थः । (256) मिथ्याज्ञानादेः मा(न)[नात्]

---

1. **सिद्धान्तहानिः**—विज्ञानवादिसिद्धान्तहानिः ।

* **तदैकात्म्ये**—अज्ञातत्वस्य धिया सहैकत्वे ।

* "अस्तु तर्हि कादाचित्कज्ञानादवास्तवाज्ञानसंबन्धध्वस्तिः इत्याशङ्क्याह–**दुर्बलानामिति** । दृश्यते हि रजतभुजङ्गादिविभ्रमधियां शुक्तिरज्ज्वादिसम्यग्धिया बाध्यत्वमिति भावः । सामान्यन्यायस्य प्रकृतेऽनुपपत्तिमाह—**सेति** । कादाचित्कज्ञानाधीनाज्ञानसंबन्धापाक्रियेति यावत् । प्रकाशमाने वस्तुनि कादाचित्कज्ञानानुपगमात्, न तत्राज्ञानसंबन्धः तेन निरस्यते । न हि ज्ञाने ज्ञानान्तरमित्यर्थः" इति **शास्त्रप्रकाशिका** ।

2. **तयोः**—ज्ञाताज्ञातत्वयोः ।

3. **निवर्त्यनिवर्तकत्वशक्त्यैव संबन्ध इति** शक्तिः सामर्थ्यम् । शक्त्यैवेति अभेदे तृतीया । निवर्त्यनिवर्तकभाव एव संबन्ध इति यावत् ।

4. **तत्रैव**—स्वसंविदिते अज्ञातत्वासंभवे एव ।

5. **जाड्याविद्ययोरेकत्वात्**—जाड्यस्य अविद्याशब्दिताज्ञातत्वाभेदात् ।

6. **वक्ष्यमाणश्रुतेः**—षष्ठाध्याये चतुर्थब्राह्मणे 'एवमेवायमात्मेदं शरीरं निहत्य अविद्यां गमयित्वा अन्यमाक्रममाक्रम्यात्मानमुपसंहरति' इति वक्ष्यमाणश्रुतेः ।

अज्ञातं न यथा मानात् मिथ्याधीसंशयौ तथा ।
न्यायः पुरोदितः सर्वः यस्मादस्ति तयोरपि ॥ (257)

अपि सर्वप्रमाणानामज्ञातत्वादिसिद्धये ।
नेक्ष्यतेऽन्यतमन्मानं स्वतः सिद्धं न चापि तत् ॥ (258)

न तावदिह संभाव्यं प्रत्यक्षं तदसंभवात् ।
विषयेन्द्रियसंबन्धविरहात्तदसंभवः ॥ (259)

न च दुःखादिधीवत्स्यात् ज्ञातस्यैवानुभूतितः ।
प्रत्यक्षार्थवदेवैषा मिथ्याधीरनुभूयते ॥ (260)

* प्रत्यक्षादिफलं ज्ञानं कथं तस्य प्रमेयता ।

सिद्धि(त)[व] दज्ञानस्यापि [1]सा किं न स्यात्, अत्राह—अज्ञातमिति । मानसिद्धस्य [2]तन्निवर्त्यत्वायोगादित्यर्थः । (257) 'अज्ञातं न यथा मानात्' इति कथम्? सर्वमानानामज्ञातादौ मानत्वात्, अत्राह—अपीति । [3]स्वप्रभम(न्य) ज्ञातादीति, नेत्याह—स्वत इति । (258) 'नेक्ष्यतेऽन्यतमन्मानम्' इत्येतत्कथम् इत्याशङ्क्य, किं तत्र बाह्यप्रत्यक्षं मानं, उत मानसं, अनुमानं वेति विकल्प्य, नाद्यः, इत्याह—न तावदिति । (259) द्वितीयं दूषयति—नचेति । दुःखादिवदज्ञातत्वादेः [4]न मानसप्रत्यक्ष(त्वादि)[त्वमि]त्यर्थः । दुःखादेरपि [5]साक्षिवेद्यत्वात्, मानसप्रत्यक्षत्वमङ्गीकरणवादः । तृतीयं निराकरोति—ज्ञातस्येवेति । अनुभूतिर्ज्ञानफलं, [6]ततो ज्ञानमेवानुमेयं, नाज्ञातत्वादीत्यर्थः । अज्ञातत्वादेरपरोक्षत्वाच्च नानुमेयत्वम्, इत्याह—प्रत्यक्षेति । (260)

---

1. सा—मानासिद्धिः ।
2. तन्निवर्त्यत्वायोगात्—माननिवर्त्यत्वयोगात् ।
3. स्वप्रभं—स्वयंप्रकाशम् । अज्ञातत्वस्य स्वप्रकाशत्वान्न मानापेक्षेत्यर्थः ।
4. न मानसप्रत्यक्षत्वं—न मानसप्रत्यक्षगम्यत्वम् ।
5. साक्षिवेद्यत्वादिति सिद्धान्ते इत्यादिः ।
6. ततः—ज्ञानफलभूतानुभूत्या ।

* अत्र ज्ञानपदं ज्ञातत्वपरम् ।

माफलं न च मेयस्थं क्रियाफलवदिष्यते ॥ (261)

*** अपि मानाभिसंबन्धो मेयार्थेनैव युक्तिमान् ।**
माफलस्य तु मात्रैव ह्यतोऽन्यत्र वृथा श्रमः ॥ (262)

माफलस्य तु मेयत्वे प्राप्नोतीहानवस्थितिः ।
प्रमाफलाभिसंबन्धः किंमान इति कथ्यताम् ॥ (263)

ज्ञातत्वलिङ्गेन ज्ञानस्यानुमेयत्व[1]मङ्गीकृत्योक्तम् । तदपि न संभवति, इत्याह—**प्रत्यक्षादीति** । फलस्य मेयत्वे [2]अनवस्था, अमेयत्वे [3]लिङ्गासिद्धिरित्यर्थः । फलस्य मेयनिष्ठत्वाद्रूपादिवन्मेयत्वम्, अत्राह—**माफलमिति** । छिदिफलस्य द्वैधीभावस्य छेद्यनिष्ठत्ववत् माफलस्य न मेयनिष्ठत्वं, रूपादिवदप्रकाशत्वेनार्थासाधकत्वप्रसङ्गादित्यर्थः । (261) घटः स्फुरतीति सामानाधिकरण्यात् मेयाश्रितं माफलम्, इत्याशङ्क्याह—**अपीति** । स्फुरणजनकज्ञानविषयत्वात् [4]तथा व्यवहारः । [5]अन्यथा भूतचैतन्यवादप्रसक्तौ मोक्षसाधनानुष्ठानवैयर्थ्यादित्यर्थः । **अतोऽन्यत्रेति** । प्रमातुरन्यत्र-प्रमेये माफलस्वीकारः । देहात्मवादनिरासानुपपत्तेरिति शेषः । (262) किञ्च, फलं स्वदृश्यं मानदृश्यं वा । आद्ये न तस्य जन्मादिसिद्धिः । द्वितीये न तस्य सत्त्वम् । तृतीयं प्रत्याह—**माफलस्येति** । इह—प्रमाणभूमावित्यर्थः । प्रमातत्फलयोः कार्यकारणभावसंबन्धस्येव फलस्यापि मेयत्वम्, अत्राह

---

1. **अङ्गीकृत्य**—भाट्टसंमतमङ्गीकृत्य ।
2. **अनवस्थेति** फलस्य मेयत्वे मानाधीनज्ञातत्ववत्त्वं, तस्यापि ज्ञातत्वस्य मेयत्वे, तत्रापि फलान्तरमित्यनवस्थेत्यर्थः ।
3. **लिङ्गासिद्धिः**—ज्ञानलिङ्गस्य असिद्धिः—अज्ञानम् ।
4. **तथा व्यवहारः**—घटः स्फुरतीति व्यवहारः ।
5. **अन्यथा**—माफलस्य स्फुरणस्य घटाद्याश्रितत्वे ।

* "किञ्च मानस्य विषयिभावः मेयेनैव, न फलेन, तस्य मेयताया निरस्तत्वात्, इत्याह-**अपीति** । मानस्य मेयेनैव संबन्धेऽपि फलस्य तेन विषयतया स भविष्यति । न च तस्यामेयत्वं, असिद्धिप्रसङ्गात् । न हि तस्य स्वतः सिद्धिः, अनात्मत्वात् । न हि कादाचित्कस्यात्मता, इत्याशङ्क्याह—**माफलस्येति** । फलस्य मेयेन संबन्धो निरस्तः । न च तस्य मानेन विषयतया संबन्धः, मेयान्तर्भावात् फलत्वायोगात् । अतः तस्य मानादौ संगतिः इति उक्त्यायासो वृथैव । माभाभितस्य स्वाश्रयेण सहानुभवविरुद्धत्वादित्यर्थः ।" इति शास्त्रप्रकाशिका ।

इहापि चानवस्थेति नानुमाऽतोऽत्र युज्यते ।
न च रागादिसंसिद्धौ मानव्यापार ईक्ष्यते ॥ (264)

रागादेर्नापि चाभावः भावात्तदनुभूतितः ।
न च कश्चित्फले भेदो मेयमानप्रमातृषु ॥ (265)

मानकार्यं फलं चेत्स्यान्न स्यात्तन्मातृमानयोः ।
* तदभावे च माभावात् कुतस्तत्स्यात् प्रमां विना ॥ (266)

—**प्रमेति** । (263) विमतं सहेतुकं कार्यत्वात् घटवत् इत्यनुमानगम्यः सः, इत्यत्राह—**इहापीति** । तस्यानुमेयत्वे स्यादनवस्था, तत्रापि फलान्तरसंबन्धापत्तेरित्यर्थः । [1]यथा रागादेरात्मधर्मस्य मेयत्वं, एवं ज्ञानस्यापि मेयत्वस्थितौ परिशेषात् फललिङ्गानुमेयत्वसिद्धिः, अत्राह—**नचेति** । (264) [2]तर्हि रागादिर्नास्ति वेत्याशङ्क्य, स्वप्रभानुभवसिद्धत्वान्नाभावः, इत्याह—**रागादेरिति** । नानुभवस्य स्वप्रभत्वं, विभक्तत्वेन कार्यत्वात्, अत्राह—**नचेति** । (265) संवेदनस्य प्रसिद्धिबलात् मानकार्यत्वम्, इति शङ्कते—**मानेति** । कार्यत्वे, फलं मातृमानयोः साध(न)कं न स्यात् [3]कार्यसंस्कारवत् । [4]अतश्च [5]तयोरभाव एव स्यात्, इति दूषयति—**न स्यादिति** । मानमेयात्मकं जगत् शून्यमेवास्तु, को दोषः, अत्राह—**तदभावे चेति** । मात्रादेरसत्त्वे मानाभावे व्याघातः, तदभावे साधकाभावात् शून्यासिद्धिरित्यर्थः । प्रसङ्गात् शून्यं निराकृत्य प्रकृतं कार्यस्य फलत्वं निराकरोति—**कुत इति** । मानाभावात् संवेदना-

1. **यथा रागादेरात्मधर्मस्य मेयत्वमिति** पररीत्या वादः ।
2. **तर्हि**—रागादेः मानव्यापाराविषयत्वे ।
3. **कार्यसंस्कारवदिति** संवेदनकार्यः संस्कारः न मातृमानसाधकः; तथा माकार्यमपि संवेदनं मातृमानयोः साधकं न स्यात् । तथाच साधकाभावात् मातृमानयोरभावे प्रमाया अभावात् तत्फलं न स्यात् इति समुदायार्थः ।
4. **अतश्च**—कार्यस्य मातृमानसाधकत्वाभावाच्च ।
5. **तयोः**—मातृमानयोः ।

* "माननिमित्तव्यवहाराभावेऽपि तत्फलनिमित्तः स्यात्, इत्याशङ्क्याह—**कुत इति** मानं विना फलासिद्धेः न तत्कृतो व्यवहार इत्यर्थः ।" इत्यपि व्याचक्षते **शास्त्रप्रकाशिकाकाराः** ।

* प्रमात्रादेरभावे च नाप्यभावः प्रमेष्यते ।
सुषुप्ते मातृपूर्वत्वात्सर्वमान्याप्रतेरिह ॥ (267)

न प्रत्यक्षानुमानाभ्यामतोऽर्थापत्तितोऽपि न ।
न हि दृष्टं श्रुतं वर्ते सार्थापत्तिः प्रसिद्ध्यति ॥ (268)

सादृश्यासंभवाच्चेह नोपमानस्य संभवः ।
मिथ्याज्ञानादिसंसिद्धौ न चाभावोऽपि शङ्क्यते ॥ (269)

अत्यन्तापूर्वदृष्टेऽर्थे प्राङ्नाद्राक्षमिमं नगम् ।
प्रत्यभिज्ञायते साक्षात् दृष्टपूर्वो यथा तथा ॥ (270)

भाव इत्यर्थः । (266) प्रमात्राद्यभावस्य मेयत्वात् प्रतियोगिनो मात्रादेरपि मेयत्वम्, अत्राह—**प्रमात्रादेरिति** । अपिशब्दः तावदर्थे । स्वापे मात्राद्यभावे तद्विषयमानानुदयस्य मानत्वाभावे हेतुमाह—**मातृपूर्वत्वादिति** । (267) तर्हि प्रत्यक्षाद्यन्यतमेन [1]तत्सिद्धिः, (न्य) अत आह—**नेति** । मात्राद्यभावो गम्यते इति शेषः । **अतः**—मातृपूर्वत्वादिति हेतोरेवेत्यर्थः । दृष्टानुपपत्तिः श्रुतानुपपत्तिर्वा अर्थापत्तिबीजम् । तदभावाच्च स्वापे नार्थापत्तिसंभवः, इत्याह—**न हीति** । (268) उपमानानुपपत्तावपि [2]हेत्वन्तरमाह—**सादृश्येति** । मात्राद्यभावे सादृश्यदर्शनायोगाच्चेत्यर्थः । भावमानगोचरस्य अज्ञातत्वादेः अभावमागोचरत्ववत् [3]मात्राद्यभावस्यापि स्यात्, अत्राह—**मिथ्येति** । (269) भावाभावमानागोचरत्वात् तर्हि अज्ञानादिकं न सिद्ध्येत्, अत्राह—**अत्यन्तेति** । अर्थे—नगादौ अत्यन्तादृष्टपूर्वे प्रागिमं न दृष्टवानिति परामृश्य दृष्टपूर्ववत् अदृष्टोऽपि साक्षात् ज्ञायते । तस्मादज्ञातत्वादि प्रत्यभिज्ञासिद्धमित्यर्थः । (270)

---

* **प्रमात्रादेरिति** प्रमात्रभावस्य न मानगम्यत्वमिति भावः । **नाप्यभावः प्रमेष्यते**—मानाभावरूपं प्रमाणं प्रमात्रभावसाधकं नेष्यते । मान्यापारस्य मातृपूर्वकत्वात् स्वापकाले प्रमातुरभावेन प्रमाणाप्रवृत्तेरिति भावः ।

1. तत्सिद्धिः—प्रमात्रभावसिद्धिः ।
2. हेत्वन्तरमिति स्वापे प्रमातृपूर्वकप्रमाणव्यापारासंभवहेतुमपेक्ष्य हेत्वन्तरमित्यर्थः ।
3. मात्राद्यभावस्यापि स्यादिति अभावमागोचरत्वमिति शेषः ।

न च मात्रादिसद्भावस्तस्यात्यन्तमदृष्टतः ।
* न प्रामाण्यात् न चाभावात् प्रत्यभिज्ञात इष्यते ॥ (271)

तस्मात्प्रमाप्रमाभासाप्रमाणानामशेषतः ।
स्वार्थानन्यप्रमाणात्स्यात्प्रसिद्धिस्तमसस्तथा ॥ (272)

* आन्तरं मेयमाश्रित्य स्वतःसिद्धमनन्यमम् ।
भावाभावादिमद्विश्वं सर्वमेतत्प्रसिद्ध्यति ॥ (273)

तर्हि अज्ञातत्वादेः प्रत्यभिज्ञागोचरत्वात् मेयत्वम्, अत्राह—**नचेति**। इदानीमेव दृश्यमाने प्राक्तनाज्ञातत्वगोचरमानुवृत्तौ प्रमातुरभावात् [1]पूर्ववृत्तमानाभावेन तज्जसंस्काराभावात् प्रामाणिकप्रत्यभिज्ञाऽसिद्धेरित्यर्थः। कथं तर्हि 'प्रत्यभिज्ञायते साक्षात्' इत्युक्तम्, अत्राह—**न प्रामाण्यादिति**। अनुभवसिद्धत्वादज्ञातत्वादेः प्रत्यभिज्ञागोचरत्वोपचार इति भावः। (271) अज्ञातत्वादेरमेयत्वात् अनुभवादेव सिद्धिः, इत्युपसंहरति—**तस्मादिति**। स्वार्थान[न्य]प्रमाणात्—अनन्यशेषस्वप्रकाशप्रत्यक्चैतन्यादित्यर्थः। (272) आत्मनो नाज्ञातत्वादिसाधकत्वं मेयत्वात् घटवत्, अत्राह—**आन्तरमिति**। [2]जडत्वमुपाधिः, इत्याह—**स्वतःसिद्धमिति**। [3]साधनव्याप्तिं निराकरोति—**अनन्यममिति**। संविद्रूपमित्यर्थः। (273)

---

1. **पूर्ववृत्तमानाभावेनेति** पूर्वं जातप्रमाणज्ञानजन्यसंस्कारस्य प्रामाणिकप्रत्यभिज्ञायां हेतुत्वादिति भावः।

* 'न प्रमाणात्' इति मु- पु- पाठः।

2. **जडत्वमुपाधिरिति** अज्ञातत्वादिसाधकत्वाभावरूपसाध्यवति सर्वत्र घटादौ जडत्वसत्त्वात् साध्यव्यापकता।

3. **साधनव्याप्तिमित्यादि** मेयत्वसाधनवति पक्षे आत्मनि संविद्रूपे जडत्वस्यासत्त्वात् तस्य साधनाव्यापकतेति समुदायार्थः।

* "मानादिसाधकमानस्यापि मानान्तरापेक्षत्वादनवस्थेत्याशङ्क्याह—**आन्तरमिति**। साधकत्वादेव साक्षिणि मानत्वोक्तिः, न तत्र मुख्या मानतेत्यर्थः। तर्हि मेयत्वादेव तस्य मानापेक्षेति, नेत्याह—**स्वतःसिद्धमिति**। तदेव कथं ? संविद्रूपत्वादित्याह—**अनन्यममिति**। उक्तलक्षणे साक्षिणि मानत्वोक्तौ हेतुं व्यनक्ति—**भावेति**। भावाभावौ—जन्मनाशौ। विश्वं मात्रादि।" इति **शास्त्रप्रकाशिका**।

मेयार्थानभिसंबन्धान्न यथावस्तुधीरियम् ।
ज्ञातत्वात्तदभावोऽपि प्रात्यक्ष्यान्नेष्यते स्मृतिः ॥ (274)

* इदं रजतमित्येवंरूपं वस्तु न कुत्रचित् ।
न शुक्तौ रजतज्ञानं नेदन्ता रजतेऽस्ति नः ॥ (275)

मिथ्याज्ञानस्यानुभवसिद्धत्वम्

विश्वस्य साक्षिवेद्यत्वं स्फुटयितुं मिथ्याज्ञानस्यानुभवसिद्धत्वे हेतुमाह—**मेयेति**। मिथ्याधियोऽर्थसाधकत्वाभावात् नार्थसंवेदनेन सिद्धिरित्यर्थः। तर्हि साधकाभावान्नास्त्येव, इत्यत्राह—**ज्ञातत्वादिति**। अनुभवसिद्धत्वात् तदभावोऽपि नेष्यते इत्यर्थः। [1]अमुष्मिन् तदंशास्मृतिरेव मिथ्याज्ञानम्, इ(त्या) [त्यत्रा]ह—**प्रात्यक्ष्यादिति**। अपरोक्षानुभवत्वादित्यर्थः। (274) देशान्तरादिगतरजतस्य सदृशदर्शनसमुद्बुद्धसंस्कारात् स्मर्यमाणत्वात् प्रात्यक्ष्यमसिद्धम्, अत्राह—**इदमिति**। रूप्यमात्रस्य देशान्तरादौ सत्त्वेऽपि इदमंशावच्छिन्नं प्रतीयमानं न क्वापीत्यर्थः। तथापीदं रूप्यमिति विशिष्टं रूपं किं शुक्तावस्ति, रूप्ये वा, बुद्धौ वा, देशान्तरे वा कालान्तरे वा। नाद्यः, इत्याह—**नेति**। बाधविरोधादित्यर्थः। द्वितीयं दूषयति—**(त)[ने]दन्तेति**। रजतस्य परोक्षत्वोपगमादख्यातिवादिनेत्यर्थः। (275)

---

1. **अमुष्मिन् तदंशास्मृतिरेव मिथ्याज्ञानमिति** अख्यातिमते इदं रजतमिति नैकं ज्ञानं, परन्तु ग्रहणस्मरणात्मकज्ञानद्वयम्। विप्रकृष्ट (देशान्तरस्थ) रजतगततत्तांशो न स्मरणविषयः। प्रमुष्टतत्ताकदेशान्तरगतरजतगोचरस्मरणमेव अविवेकपूर्वकं, मिथ्याज्ञानमिति व्यवह्रियते। अमुष्मिन्—विप्रकृष्टे देशान्तरस्थरजते। तदंशास्मृतिः—तत्तांशस्य अस्मरणं। तत्तामविषयीकृत्य जायमाना स्मृतिरिति यावत्।

* "देशान्तरादिवर्तिरूप्यात्मना पुरःस्थितशुक्तिभानमेव मिथ्याधीः। सा च फललिङ्गेति, अन्यथाख्यातिमतमाशङ्क्याह—**इदमिति**। इदंरूपस्य पुरोदेशे, देशान्तरादौ च रूप्यस्य सत्त्वेऽपि, विशिष्टं रूपमिह दृष्टं न क्वचिदस्ति। न तदिहास्ति बाधधीविरोधात्। नान्यत्र, साधकाभावात्। न चेदमसदेव, अपरोक्षत्वात्। तस्मात् विशिष्टदृष्टिरनिर्वचनीयख्यातिः। सा च साक्षिवेद्येति भावः।" इति **शास्त्रप्रकाशिका**।

* तदन्यत्र द्वयाभावात् साक्ष्यादावपि नेष्यते ।
न चेहार्थावबोधोऽस्ति मिथ्याज्ञानत्वकारणात् ॥ (276)

मिथ्याज्ञानादिसंसिद्धौ क उपाय इतीर्यताम् ।
*सम्यग्धीतोऽथ तत्सिद्धिर्न तस्या मेयसंगतेः ॥ (277)

---

[1]परिशिष्टकल्पान् दूषयति—**तदन्यत्रेति** । **साक्ष्यादौ**—बुद्ध्यादा-वित्यर्थः । प्रमाणाभावादिति हेतुरत्र विवक्षितः । विमतं ज्ञानं यथार्थं ज्ञानत्वात् संमतवत् । अतो न विशिष्टैकज्ञानं, अपि तु निरन्तरोत्प(त्ता)[न्ना][2]विविक्तानेक-ज्ञानम्, अत्राह—**न चेति** । विवेकस्य वस्तुमा(त्रा)[त्रस्या]ग्रहायोगात् भ्रान्ति-त्वानुपपत्तिविरोधात् न सत्यार्थज्ञानमित्यर्थः । (276)

एवमनिर्वचनख्यातिं प्रसाध्य [3]तस्य साक्षिवेद्यत्वसाधनाय, आह—**मिथ्येति** । [4]किमत्र प्रष्टव्यं, मानात्त[5]त्सिद्धेः, इत्याह—**सम्यगिति** । [6]तत् मानसप्रत्यक्षं, अनुमानं वा । नाद्यः, इत्याह—**नेति** । **तस्याः**—सम्यग्धियः, मेयेन संबन्धात् मिथ्याज्ञानस्य मेयत्वे, [7]तद्विशेषणतया मेयत्वेन [8]तदर्थस्यापि सत्यत्वप्रसङ्गात् न मिथ्याज्ञानं मेयमित्यर्थः । (277) एतदेव स्पष्टयति—**मेयेति** । सत्त्वादिसा-

---

1. **परिशिष्टकल्पान्**—बुद्धौ वा, देशान्तरे वा, कालान्तरे वा, इत्युक्तकल्पान् ।

* "साक्षिणि मातरि वा विशिष्टं रूपं, तस्य प्रतिभामात्रदेहत्वात्, तस्याश्च तदन्य-तरस्थत्वादित्येके । बुद्धावित्यपरे । तान् प्रत्याह—**साक्ष्यादाविति**" इति **शास्त्रप्रकाशिका** ।

2. **अविविक्तानेकज्ञानमिति** विविक्तत्वेन—भिन्नत्वेनागृहीतं ग्रहणस्मरणात्मक-ज्ञानद्वयमिति यावत् ।

3. **तस्य**—अनिर्वचनख्यातिरूपस्य मिथ्याज्ञानस्य ।

4. **अत्र**—मिथ्याज्ञानसिद्धौ । उपायत्वेनेति शेषः ।

5. **तत्सिद्धेः**—मिथ्याज्ञानसिद्धेः ।

6. **तत्**—मिथ्याज्ञानसाधकं मानम् ।

7. **तद्विशेषणतयेति** मिथ्याज्ञानविशेषणतयेत्यर्थः । ज्ञानस्य विषयनिरूप्यत्वात् विषयविशेषितस्यैव मिथ्याज्ञानस्य मानसप्रत्यक्षविषयतेति भावः ।

8. **तदर्थस्य**—मिथ्याज्ञानविषयस्यार्थस्य विशिष्टरूपस्य ।

* "पृष्टं मत्वा उपायमाह—**सम्यगिति** । न सा तत्साधिका, तस्या मेयार्थसंबन्धेन तत्रैव [मेय एव] प्रमाहेतुत्वात्, इत्याह—**नेति** ।

* मेयप्रमामृते कार्यं मानानां नान्यदिष्यते ।
न च सत्त्वादिमात्रेण रूप्यादिमितिसंभवः ॥ (278)
तस्यासाधारणात्मोत्थविज्ञानविषयत्वतः ।
तस्माद्रजतसंस्कारसंस्कृतात्स्वान्ततः स्मृतिः ॥ (279)
प्रथतेऽविकृतात्मैकनित्यदृष्टेः परात्मनः ॥ (280)
ज्ञानज्ञात्रतिरेकेण तमस्यपि न विद्यते ।
मेयं वस्तु ततोऽज्ञानं प्रत्यक्षं सप्रमातृकम् ॥ (281)

दृश्यस्य मिथ्याधीविषयत्वात् स्फुरणलिङ्गेन मिथ्याधीरनुमेयेति द्वितीयमाशङ्क्याह—**नचेति** । (278) हेतुमाह—**तस्येति** । रूप्यादेरसाधारण्येन (स्वीका)[संस्का]रोत्थज्ञानविषयत्वात् न तज्ज्ञानस्य सामान्यमात्रं विषय इत्यर्थः । सादृश्यस्य मिथ्याज्ञानकारणत्वात् विषयत्वेनैव तत्कारणत्वम्, अत्राह—**तस्मादिति** । यस्मात् रजतसदृशमिति न प्रतीयते तस्मात्, कारणान्तरायोगात् पूर्वानुभूतरजतसंस्कारसहितान्तःकरणावच्छिन्नप्रत्यगज्ञानात् रजतभ्रान्तिः संस्कारोद्भवत्वात् स्मृति-(वि)[रिव]स्मृतिः तद्रूपेत्यर्थः । (279-280)

प्रमात्रा सहाज्ञानस्य अनुभवसिद्धत्वम्

मिथ्याज्ञानादेः साक्षिवेद्यत्वेऽपि अज्ञानं मेयं अनादित्वात् आत्मवत्, इत्यत्राह—**ज्ञानेति** । ज्ञायते अनेनेति ज्ञानमन्तःकरणं, तस्य ज्ञाता-कूटस्थानुभवः । तद्व्यतिरेकेण तमसि-अज्ञानेऽपि, न किञ्चिदवेदिषम् अज्ञोऽस्मि इत्यज्ञानसिद्धिकाले मेयं—मानव्याप्यं रूपं न विद्यते । तस्मात् अज्ञानं प्रमात्रा सह प्रत्यक्षं—अनुभववेद्यमित्यर्थः । (281) अज्ञानस्य साक्षिवेद्यत्वेऽपि मात्रादेः

---

* मिथ्याज्ञानादेरपि मेयत्वात् तत्संबद्धा सम्यग्धीः तत्र प्रमां करिष्यतीति चेत्, नेत्याह—**मेयेति** । न मिथ्याज्ञानादेरपि मेयत्वं, अज्ञानकार्यस्य तद्वदज्ञातत्वायोगात् । न च मेये प्रमां विना मानानामन्यत् फलम् । अतोऽज्ञानकार्यस्य न सम्यग्धीतः सिद्धिरित्यर्थः । ननु नाज्ञानं मिथ्याधीहेतुः, किन्तु सत्त्वादि सादृश्यम् । सदृशदर्शनोद्बुद्धसंस्कारकारिता हि रजतादिधीः, तत्राह—**न चेति** । शुक्तिज्ञानात् तदज्ञाने ध्वस्ते, सत्यपि सत्त्वादिसादृश्ये रूप्यज्ञानाभावात् अन्वयव्यतिरेकाभ्यां शुक्त्यज्ञानमेव तद्धेतुरित्यर्थः ।" इति शास्त्रप्रकाशिका ।

न हि संविदनारूढः प्रमात्रादिः प्रसिद्ध्यति ।
संविन्मात्रैकयाथात्म्यात् प्रमात्रादेरनात्मनः ।। (282)

ज्ञातोऽयमर्थोऽज्ञातो वा धीरियं कर्तृसंश्रया ।
स्मृतिः सा न यथावस्तु तेनासावप्रमोदिता ।। (283)

न हि वस्त्वनुरोध्येतत् ज्ञाताज्ञातत्वलक्षणम् ।
रूपं वस्त्वपरिज्ञानसमुत्थं ज्ञातृसंश्रयम् ।। (284)

ज्ञाताज्ञातविभागोऽतः स्वतःसिद्धात्मप्रमातृकः ।
संविदा ज्ञाततासिद्धिर्मितेरपि न मात्मना ।। (285)

वस्त्वज्ञातं समुद्दिश्य तत्प्रमित्सन्ति मानिनः ।
ज्ञातत्वकार्यतश्चातः सिद्धं तत्फलतोऽथवा ।। (286)

साक्षिवेद्यत्वं कुतः, अत्राह—**न हीति** । [1]संवित्संबन्धस्य परमार्थसतो दुर्निरूपत्वात् संविदध्यस्तत्वेन तत्सिद्धिः इति हेतुमाह—**संविन्मात्रेति** । (282) अयं ज्ञातः अयमज्ञात इति ज्ञानस्य प्रमात्वात् प्रमात्रादेः नाध्यस्तत्वम्, अत्राह—**ज्ञातोऽयमिति** । [2]कर्तृत्वस्य कल्पितत्वात् [3]तदाश्रया धीरपि **स्मृतिः**—भ्रान्तिरित्यर्थः । (283) यथार्थज्ञानस्य कथं भ्रान्तित्वम्, अत्राह—**न हीति** । **वस्त्वनुरोधि**—सत्त्वानुसारि, पारमार्थिकमित्यर्थः । (284) कुतस्तर्हि ज्ञाताज्ञातविभागसिद्धिरिति, अनुभवात्, इत्याह—**ज्ञातेति** । ज्ञानगतज्ञातत्वादिवत् ज्ञेयगत(त्व) ज्ञातत्वादिकमपि मानगम्यम्, इत्यत्राह—**संविदेति** । **मितेः**—ज्ञानस्य, ज्ञाततासिद्धिः । अपिशब्दादज्ञाततासिद्धिश्च अनुभवेन, नानुमानान्तरेण अनवस्थानादित्यर्थः । (285) अज्ञातत्वस्य परिशेषादनुभवगम्यत्वं साधयति—**वस्त्विति** । अज्ञातं मेयमिति स्वीकारात् अज्ञातत्वस्य साधकं वाच्यम् । ज्ञानकार्यज्ञातत्वात् [4]तत्सिद्धिः, [5]तत्फलात् व्यवहाराद्वा । नाद्यः, तयोः ज्ञातत्वाज्ञात-

---

1. **संवित्संबन्धस्येति** संयोगादेरिति शेषः ।
2. **कर्तृत्वस्य कल्पितत्वादिति** अक्रिये आत्मनि मानकर्तृत्वस्याध्यासं विनाऽयोगादिति भावः ।
3. **तदाश्रया**—कल्पितकर्तृत्वाश्रया, कल्पितकर्तृत्वविषयिणीति यावत् ।
4. **तत्सिद्धिः**—अज्ञातत्वसिद्धिः ।
5. **तत्फलादिति** ज्ञानकार्यज्ञातत्वस्य फलादित्यर्थः ।

यतोऽज्ञातत्वसंसिद्धिर्ज्ञातत्वस्यापि चाञ्जसा ।
तत एव च मानत्वं संविदर्ते न तत्त्रयम् ॥ (287)

* षष्ठगोचरवन्नेदमज्ञातत्वं समीक्ष्यते ।
न च प्रत्यक्षवत्सिद्धं स्वानुभूतिसमाश्रयात् ॥ (288)

प्रमात्रादिविविक्तार्थमनुभूयोत्थितस्ततः ।
नावेदिषमिति प्राह स्वानुभूत्यनुसारतः ॥ (289)

* प्रमात्राद्युत्थितेः पूर्वं चिदन्यानन्वयात्तमो-
विशेषणा चिदेवैका स्वानुभूत्यैव गम्यते ॥ (290)

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयम्' इत्येतत्स्वानुभूतितः ॥ (291)

त्वयोः भिन्नकालयोः संबन्धा(त्) ग्रहात् । नेतरः, व्यवहारस्य ज्ञातत्वमात्र-गमकत्वात् । [1]अतोऽनुभवगम्यमित्यर्थः । (286) ज्ञातत्वसाधकमेव अज्ञात-त्वस्यापि साधकं, [2]तस्य तत्पूर्वत्वात्, अत्राह—**यत इति** । अज्ञातत्ववत् यतोऽनुभवात् ज्ञातत्वस्य सिद्धिः, तत एव मानत्वमपि सिद्ध्यति । **संविदर्ते** —अनुभवेन विना, **त्रयं**—अज्ञातत्वं ज्ञातत्वं मानत्वं च न सिद्ध्यतीत्यर्थः । (287) अज्ञातत्वादि न मेयं चेत्, नास्त्येव, इत्यत्राह— **षष्ठेति** । अपरोक्षत्वादित्यर्थः । तर्हि घटवत् प्रत्यक्षसिद्धत्वम्, अत्राह— **न चेति** । (288) प्रमात्रादेरसत्त्वेऽपि स्वापे अज्ञानानुभवस्य [3]परामर्शलिङ्गेन कल्प्यमानत्वात्, इति हेतुमाह—**प्रमात्रादीति** । स्वानुभूत्यनुसारतः अनुभूयेति संबन्धः । (289) स्वापे अनुभवसाधकस्याप्यभावात् कथमज्ञानविशिष्टानुभवसिद्धिः, अत्राह—**प्रमात्राद्यु(त्प)**)[**त्थि**]**तेरिति** । (290) अज्ञातत्वादेः **मनुवचन**—गम्यत्वात् न साक्षिवेद्यत्वम्; अत्राह—**आसीदिति** । अप्रज्ञातं—प्रागुत्पत्तेः

---

1. **अनुभवगम्यमिति** अज्ञातत्वमिति शेषः ।
2. **तस्य तत्पूर्वत्वादिति** ज्ञातत्वस्य अज्ञातत्वपूर्वकत्वादित्यर्थः ।

* **षष्ठेति** षष्ठेन्द्रियार्थस्य यथा असत्त्वं तथेत्यर्थः ।

3. **परामर्शलिङ्गेन**—अहमस्वाप्सं न किञ्चिदवेदिषमिति प्रबोधकालीनपरामर्शेन लिङ्गेन ।

* **चिदन्यानन्वयात्**—चितः अन्येन अज्ञानजेन अन्वयस्य-संबन्धस्याभावात् ।

प्रथते यः स्वयं साक्षात् अज्ञातत्वादिभूमिषु ।
स प्रमेयः स्वयंज्योतिः प्राक्प्रसिद्धेः प्रमातृतः ॥ (292)

एष एवानवगतः स्वतोऽवगततत्त्वकः ।
एतावन्मात्रसंव्याप्तेरज्ञानादेः पुरा मितेः ॥ (293)

यथेह घटविज्ञाने घटाकारोऽनुभूयते ।
ज्ञातृतत्साक्षिणौ चैवं नाज्ञाने साक्षिणोऽपरम् ॥ (294)

अज्ञातत्वं न मानेभ्यः ज्ञातत्वं तत्कृतं यतः ।
तैरप्यज्ञातता चेत्स्यात् काऽतिशीतिर्मितेर्भवेत् ॥ (295)

स्वानुभूत्यैव संसिद्धेः नाज्ञातः खरशृङ्गवत् ।
संवित्तेरप्यसंबोधात् स्यात्तन्मानव्यपेक्षिता ॥ (296)

प्रत्यक्षागम्यम् । अलक्षणं—[1]अलिङ्गगम्यम् । अविज्ञेयं—[2]परिशिष्टमानागम्यम् । अनुभवसिद्धानुवादकं [3]तद्वचनमित्यर्थः । (291) अज्ञातत्वादेरमेयत्वे कस्य मेयत्वमित्याशङ्क्य, आत्मन एवाज्ञातत्वोपलक्षितस्य, इत्याह—**प्रथत इति** । (292) स्वप्रकाशस्य नाज्ञातत्वम्, अत्राह—**एतावदिति** । सम्यङ्ज्ञानात्पूर्वमज्ञानादेश्चिन्मात्रव्याप्तेः—तत्र कल्पितत्वेन सिद्धेः अज्ञानात् अज्ञातत्वं तस्य युक्तमित्यर्थः । (293) अज्ञानस्यानुभवसिद्धत्वे युक्त्यन्तरमाह—**यथेति** । ज्ञातृतत्साक्षिणौ—घटाकारपरिणतान्तःकरणप्रत्यगात्मानौ । घटोऽयमिति ज्ञाने घटाकारोऽनुभूयते,—अपरोक्षो भवति यथा, नैवमहमज्ञः इत्यज्ञानेऽनुभूयमाने अज्ञानसाधकसाक्षिव्यतिरिक्तं साधकं स्फुरतीत्यर्थः । (294) अज्ञातत्वस्य मानतः स्फुरणासत्त्वेऽपि [4]तदुत्पत्तिर्मानाद्भवति, इत्यत्राह—**अज्ञातत्वमिति** । (295) अज्ञातत्वस्य माना[त्] स्फुरणजननयोरभावे तुच्छत्वं स्यात्, अत्राह—**स्वानुभूत्येति** । जडस्य साक्षिवेद्यत्वात् न मानापेक्षा चेत्, अनुभवस्य सर्वसाधकस्य स्वतःसिद्धस्य

---

1. **अलक्षणम्** इत्यत्र लक्षणपदं ज्ञापकार्थतया लिङ्गपरम् । न विद्यते लक्षणं—लिङ्गं यस्येति व्युत्पत्त्या लब्धमर्थमाह—**अलिङ्गगम्यमिति** ।
2. **परिशिष्टमानागम्यमिति** प्रत्यक्षानुमानातिरिक्तमानचतुष्टयागम्यमित्यर्थः ।
3. **तद्वचनमिति** 'आसीदिदम्' इत्यादि मनुवचनमित्यर्थः ।
4. **तदुत्पत्तिः**— अज्ञातत्वोत्पत्तिः ।

प्रत्यक्षकुम्भवत्साक्षात् सुषुप्तेऽनन्यबोधगम् । *
आत्मा ह्यात्मानमैकात्म्यादात्मना वेत्त्यकारकः ॥ (297)
पराक्प्रवणया दृष्ट्या धीस्थोऽज्ञोऽज्ञानमात्मनि ।
व्योमकार्ष्ण्यादिवत्तज्जं संभावयति न स्वतः ॥ (298)
नैवाज्ञानं मृषाज्ञानं संशयज्ञानमिष्यते ।
प्रत्यक्प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु ॥ (299)
न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः ।
कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् (300) *

सुतरां तदपेक्षा नास्तीति मानवैयर्थ्यम्, अत्राह—**संवित्तेरिति ।** अनुभवस्याज्ञातत्वात् [1]तन्निवृत्त्यर्थं [2]तस्मिन् माने–तत्त्वमादिवाक्येऽप्यपेक्षा स्यादित्यर्थः । (296) संविदो ज्ञातत्वे जडत्वादन्यसाधकत्वं न स्यात्, अत्राह—**प्रत्यक्षेति ।** यथा जागरे कुम्भमपरोक्षमनुभवति, एवं स्वापे **अनन्यबोधगं**—प्रकाशान्तराविषयं साक्षात् वेत्ति । तत्र कर्तृकरणकर्मक्रियाभावे हेतुः **अकारक इति ।** तत्र युक्तिः **ऐकात्म्यादिति ।** (297) अज्ञानादिकमनुभवसिद्धत्वात् अनुभववत्सत्यं स्यात्, इत्यत्राह—**परागिति ।** आत्मा केवलात्मनि पराक्प्रवणया दृष्ट्या अज्ञानं संभावयति—अनादिसिद्धैक्याध्यासेनाज्ञानं साधयति । अज्ञः—अज्ञानैक्याध्यासवान् **धीस्थः**—स्वात्मनि ऐक्येनाध्यस्तबुद्धिरूपेण स्थितः, तज्जं—अज्ञानकार्यं देहेन्द्रियादिकमारोपयतीत्यर्थः । (298) एतदेव व्यतिरेकमुखेनाप्याह—**नैवेति ।** (299)

सुप्तोत्थितस्य एतावन्तं कालं नाज्ञासिषमिति ज्ञानं न स्मृतिः

अज्ञानस्यानुभववेद्यत्वे सुप्तोत्थितस्य न किञ्चिदवेदिषमिति तत्स्मृतिर्न, [3]अनुभवस्याविनाशिनः संस्काराभावात् । अतो मानगम्य[म]ज्ञानम्, इ(त्या)-

---

1. **तन्निवृत्त्यर्थं**—अज्ञाननिवृत्त्यर्थम् ।
2. **तस्मिन् माने**—तद्विषयकमाने ।
* "'अनन्यबोधगम्' इत्यनेनाधारान्तरनिरासः" इति **शास्त्रप्रकाशिका ।**
3. **अनुभवस्याविनाशिन इति** विनाशिन एव सूक्ष्मोत्तरावस्थारूपसंस्कारसंभवादिति भावः ।
अभातीतक्—अतीतताभाक्, अतीतमिति यावत् ।

न भूतकालस्पृक् प्रत्यक् न चागामिस्पृगीक्ष्यते ।
* स्वार्थदेशः परार्थोऽर्थो विकल्पस्तेन स स्मृतः ॥ (301)

न हि प्रत्यक्षविज्ञानादतीतत्वं समीक्ष्यते ।
न चानागतता मेये मिथ्याज्ञानमतो भवेत् ॥ (302)

* यत्तत्त्वकं स्याद्यद्वस्तु न तत्तदतिवर्तते ।
नाज्ञातरज्जुजः सर्पः रज्जुमुल्लङ्घ्य वर्तते ॥ (303)

तस्मात्त्रिसृष्ववस्थासु ह्यागमापायिनीष्वजः ।
स्वतोऽलुप्तदृशा यस्मादात्मात्मानं सदेक्षते ॥ (304)

[त्यत्रा]ह—**न सुषुप्तेति** । आत्मनः कालापरिच्छेदात् तद्गताज्ञानस्यापि कालापरिच्छेदात् [1]तत्परामर्शो न स्मृतिः । किन्तु कालः अज्ञानं च साक्ष्यध्यस्तत्वात् [2]तेनैव प्रथते इत्यर्थः । (300)

प्रतीचः कालापरिच्छेदं साधयति—**न भूतेति** । [3]कार्यत्वादिप्रसङ्गादित्यर्थः । प्रतीचो देशाद्यसंबन्धे देशादेः स्वातन्त्र्यात् परमार्थत्वम्, अत्राह—**स्वार्थेति** । सर्वोऽपि जडो रज्ज्वां भुजङ्गवत् अजडे वर्तते । अतः स [4]शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इत्यर्थः । (301) प्रत्यक्षादिसिद्धस्य कथं विकल्पत्वम्, अत्राह—**न हीति** । प्रत्यक्षस्य वर्तमानमात्रग्राहित्वात् अनुमादेश्च [5]तन्मूलत्वादित्यर्थः । (302) कल्पितस्याधिष्ठाना(दि)[द्भिन्नत्वमि]त्युक्तत्वात् अद्वैतहानिः, अत्राह—**यत्तत्त्वकमिति** । (303) अनुभवस्यापि कार्यत्वात् कल्पितत्वमिति

---

1. **तत्परामर्शः** — सुषुप्तिकालीनाज्ञानपरामर्शः ।
2. **तेनैव**—साक्षिणैव ।
3. **कार्यत्वादिप्रसङ्गादिति** आत्मनः कालपरिच्छेदाभावे 'अन्यत्र भूताच्च भव्याच्च' इति श्रुतिरपि प्रमाणम् बोध्यम् ।

* **स्वार्थदेशःपरार्थोऽर्थः** परार्थः–अस्वतन्त्रः, जडः सर्वोऽपि, स्वार्थदेशः—स्वार्थः स्वतन्त्रः आत्मा देशो यस्येति व्युत्पत्त्या आत्माश्रित इत्यर्थः । स्वार्थस्याश्रयत्वं चाधिष्ठानभावेन इति अक्षरार्थोऽवसेयः ।

4. **शब्दज्ञानानुपातीत्यादि** वाचारम्भणमात्रमिति यावत् ।
5. **तन्मूलत्वात्**—वर्तमानमात्रग्राहिप्रत्यक्षमूलकत्वात् ।

* **यत्तत्त्वकमिति** कल्पितस्याधिष्ठानमेव तत्त्वमिति सर्वस्यापि जडस्य आत्मैव तत्त्वम् । अतः द्वितीयस्य तत्त्वस्याभावात् नाद्वैतहानिरिति भावः ।

देहान्तरेष्वपि तथा ह्यन्योन्यव्यभिचारतः ।
प्रत्यक्प्रत्यय एवैकः सर्वत्राव्यभिचारवान् ॥ (305)

चैतन्यमात्ररूपं सत्प्रथतेऽज्ञानमात्मनि ।
प्रत्यक्कूटस्थनिष्ठत्वात् तद्बाध्यं कारणेतरत् ॥ (306)*

* नैव तत्स्यात्स्वकार्येषु तेषां ताद्रूप्यहेतुतः ।
जडस्वभावतो नान्यद्रूपं कार्येषु गम्यते ॥ (307)

एवं चेत्कोऽनयोर्भेदः कार्यकारणयोर्मितेः ।
अन्वयव्यतिरेकाभ्यां न जाड्यमतिवर्तते ॥ (308)

शून्यता स्यात्, अत्राह—तस्मादिति । यस्मादात्मा [1]तिसृष्ववस्थासु अलुप्तदृशा आत्मानं समीक्षते तस्मात् कूटस्थ इत्यर्थः । (304) प्रतिदेहं भेदात् कथं कौटस्थ्यम्, अत्राह—देहान्तरेष्विति । (305) सकारणप्रपञ्चस्य कल्पितत्वे हेत्वन्तरमाह—चैतन्येति । प्रत्यक्कूटस्थनिष्ठत्वात्—प्रत्यगात्मन्यध्यस्तत्वात् । विमतं अध्यस्तं जडत्वात् रज्जुसर्पवदित्यर्थः । (306) कथमज्ञानस्य चैतन्यव्यतिरेकेण स्वरूपाभावः, [2]स्वकार्याश्रयत्वादज्ञानस्य, इत्यत्राह—नैवेति । कार्याणां तन्मात्रत्वं साधयति—जडेति । (307) कार्याणां कारणाद्भिन्नत्वात् कथं [3]तन्मात्रत्वम्, अत्राह—एवमिति । मानाभावेन [4]भेदं निराकृत्य अभेदं साधयति—अन्वयेति । अज्ञाने सत्येव कार्यदर्शनात्, [5]असति मुक्तावदर्शनात् अज्ञानरूपजाड्यं नातिक्रामति कार्यमित्यर्थः । (308)

---

1. तिसृष्ववस्थासु—जागराद्यासु इत्यर्थः ।
* कारणेतरदिति कारणं तदितरत्कार्यञ्चेत्यर्थः ।
2. स्वकार्याश्रयत्वादिति स्वस्य—अज्ञानस्य कार्यं—अन्तःकरणं तदाश्रितत्वादित्यर्थः ।
3. तन्मात्रत्वं—कारणीभूताज्ञानमात्रत्वम् ।
* 'नैवं' इति मु. पु. पाठः ।
4. भेदं—कार्यकारणयोर्भेदम् ।
5. असति मुक्तावदर्शनादिति मुक्तिदशायां अज्ञाने असति कार्यस्यान्तःकरणादेरदर्शनादित्यर्थः ।

कार्यकारणरूपाभ्यामतद्वत्तत्त्विका ततः ।
आत्माविद्यैव सर्वत्र प्रथते स्वात्मसाक्षिका ॥ (309)

नैवात्मना स्वभावेन स्वात्मानं लभते जडः ।
यतोऽतः स्वार्थदेशः स स्वार्थश्चानन्यसिद्धिकः ॥ (310)

स्वतो बुद्धे कुतोऽविद्या तामृते संसृतिः कुतः ।
इति बुद्धात्मतत्त्वस्य गीरियं न तमस्विनः ॥ (311)

यथोच्छिन्नात्ममोहस्य निह्नोतुरपि निह्नुतिः ।

एवं प्रागात्मसंबोधादद्वयैकात्म्यनिह्नुतिः ॥ (312)

काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः ।
या निशा सर्वभूतानामित्यवोचत्स्वयं हरिः ॥ (313)

फलितमाह—**कार्येति** । यतः अविद्यैव कार्यं कारणं च ततः सैव **अतद्वत्तत्त्विका**–कार्यकारणनिर्मुक्तात्मतत्त्विकेत्यर्थः । (309) हेतुमाह—**नैवेति** । दृग्दृश्यसंसर्गायोगादित्यर्थः । आत्मा परायत्तसिद्धिकः वस्तुत्वात् घटवत्, अताह—**स्वार्थश्चेति** । (310) स्वयंप्रकाशात्म(त्वदेश)[त]त्त्वं[न]तमोरूपाज्ञानादिव्यवहितम्, इत्यत्राह–**स्वत इति** । विद्योदयादूर्ध्वं [1]तदभावोऽङ्गीक्रियते न [2]पूर्वमनुभवसिद्धत्वादित्यर्थः । (311) स्वप्र(भावा)[भत्वा]दविद्याकालेऽपि अद्वयानन्तवस्तुप्रकाशात् [3]तद्विरोध एव, इत्यत्राह—**यथेति** । यथा दग्धाविद्यस्य तन्निह्नोतुः—अविद्यानिवर्तकब्रह्मबोधस्यापि निह्नुतिः । एवं ज्ञानोत्पत्तेः प्राक् अद्वयात्मनः निह्नुतिः—असत्कल्पत्वम्, अज्ञानबलादित्यर्थः । (312) उक्तं सदृष्टान्तमाह–**काकेति** । या काकादीनां प्रसिद्धा निशा, तस्यामुलूको जागर्ति पर्यटति, तद्दृष्ट्या सा निराक्रियते । यदा चोलूकादीनां निशा तदा काकादयो जाग्रति । त[द्व]त् द्वैतदर्शनं विदुषां निशा । मूढानां पुन[र]द्वैतरूपं निशेत्यर्थः । प्रमाणमाह—

---

1. **तदभावः**—आत्मनः अज्ञानव्यवधानाभावः ।
2. **पूर्वमिति** विद्योदयात्पूर्वमित्यर्थः ।
3. **तद्विरोध एव**—तमोरूपज्ञानव्यवधानविरोध एव ।

तस्मान्न वास्तवं रूपं तद्ध्वान्ताद्यपनोदकृत् ।
तस्मिन् सत्येव मोहादि व्युत्पत्तेः प्रागभूद्यतः ॥ (314)

प्रमाणारूढमेवैतद्भ्रन्त्यविद्यामशेषतः ।
ब्रह्मविद्भिरतो यत्नात्प्रमाणमिह संश्रितम् ॥ (315)

उताविद्वानिति तथा प्रश्नपूर्वं स्वयं श्रुतिः ।
निर्णेनेक्ति स्फुटं वस्तु यथोक्तेनैव वर्त्मना ॥ (316)

* आत्मासाधारणार्थोत्थरूपमात्रसमाश्रयात् ।
तन्मानमपि मानत्वं लभते न तु केवलम् ॥ (317)

या निशेति । (313) स्वरूपबोधस्याज्ञानतत्कार्यसाधकत्वात् न तन्निवर्तकत्वम्, इत्युपसंहरति—**तस्मादिति** । **व्युत्पत्तेः प्राक्**—तत्त्वज्ञानात् पूर्वमित्यर्थः । (314) तर्हि अज्ञानं न निवर्तेत तन्निवर्तकाभावात्, इत्याशङ्क्य, [1]बुद्धीद्धो बोधस्तन्निवर्तकः, इत्याह—**प्रमाणेति** । (315) श्रुतिर[2]त्र मानम्, इत्याह—**उतेति** । ब्रह्मणो विद्वदविद्वत्साधारणत्वात् अविद्वानपि तत् प्राप्नोति, [किंवा] विद्वान् प्राप्नोति[इति]प्रश्नं 'उताविद्वानमुं लोकं प्रेत्य' (तै. 2·6) इत्यादिना समुत्थाप्य 'यदा........ऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति' (तै. 2·7) इति वृत्तिफलकारूढचैतन्यस्य अज्ञाननिवर्तकत्वनिश्चयं करोतीत्यर्थः । (316) वृत्तिव्यक्तचैतन्यस्य अज्ञाननिवर्तकत्वे रूपादिज्ञानव्यक्तचैतन्यस्यापि मुक्तिहेतुत्वप्रस(क्त)[क्तिः], अत्राह—**आत्मेति** । आत्मनो यः असाधारणार्थः—अखण्डानन्दस्वभावः, तन्मात्रग्राहकतयोत्थं यद्रूपं, तद्बलादेव तद्व्यक्तचैतन्यं मानत्वं—अज्ञाननिवर्तकत्वं लभते । केवलं तु—तन्निरपेक्षं, [3]वृत्तिमात्रव्यक्तं वा न लभते इत्यर्थः । (317) वाक्यात् धीजन्मकाले मात्रादि-

---

1. **बुद्धीद्धः बोधः**—वाक्यप्रमाणजनितबुद्धिवृत्त्युपारूढं स्वरूपचैतन्यम् ।
2. **अत्र**—वृत्तिव्यक्तचैतन्यस्याज्ञाननिवर्तकत्वे ।
3. **वृत्तिमात्रव्यक्तं वा**—घटादिवृत्तिसाधारणवृत्तिसामान्याभिव्यक्तं चैतन्यं वा ।

* " बुद्धीद्धबोधस्य अज्ञानध्वंसित्वं किमिति कल्प्यते, बोधस्यैव केवलस्य किं न स्यात्, सर्वसाधकस्य मानत्वे अनपेक्षत्वात्, इत्याशङ्क्याह—**आत्मेति** । अज्ञानसाधकस्य केवलस्वरूपचैतन्यस्य अज्ञाननिवर्तकत्वायोगात्, सच्चिदानन्दाद्वयप्रत्य-

तावन्मात्रैकयाथात्म्यप्रत्यगात्मत्वकारणात् ।
पराक्ष्विव न भेदोऽत्र मात्रादेः प्रत्यगात्मनि ॥ (318)

* स्वचिदाभासवन्मोहपृष्ठेनैवेति कर्तृताम् ।
कूटस्थोऽपि स्वतः प्रत्यङ्ङात्मवृत्त्यपेक्षया ॥ (319)

सर्वधीविक्रियासाक्षिण्येवं सिद्धे स्वतो दृशौ ।
कार्यं येऽनुभवं प्राहुर्वाच्यं तैः कार्यसाधनम् ॥* (320)

न जायतेऽज इत्यादि विज्ञानघन इत्यपि ।
कृत्स्नपुंविक्रियोत्सारि वाक्यं कस्मादुपेक्ष्यते ॥ (321)

विभागोऽस्ति चेत्, [1]सोऽपि विभक्ताकारग्राहकः स्यात् । न चेत्, कार[2]णाभावान्न जायेत, अत्राह—**तावन्मात्रेति** । मात्रादिविभागो धीजन्मकाले सन्नपि ज्ञानबाधितः प्रत्यगेव स्यादित्यर्थः । (318) धीकर्ता प्रतीचोऽन्यश्चेत्, अद्वैतहानिः, अनन्यश्चेत् आत्मनः कौटस्थ्यहानिः, अत्राह—**स्वचिदाभासेति** । (319)

अनुभवस्य कार्यत्वाभावः

वृत्तिव्यक्तचैतन्यमज्ञाननिवर्तकमिति(उ)[वद]ता चैतन्यं नित्यमित्युक्तम् । तदयुक्तं, तस्य कार्यत्वात्, अत्राह—**सर्वेति** । (320)

न केवलमनुभवस्य कार्यत्वे मानाभावः, [3]तद्विरोधोऽपि, इत्याह—**न जायत इति** । 'न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित्'

गाकारवाक्योत्थवृत्तिरूपं यद् ज्ञानं, तावन्मात्रसहायादेव अज्ञानध्वंसित्वरूपं मानत्वमश्नुते स्वरूपचैतन्यमित्यर्थः । यद्वा, किमिति बोधेद्धा बुद्धिः सकार्यमज्ञानं निरस्यति, वाक्योत्था बुद्धिरेव तन्निरस्यतु, मानत्वेन स्वफले स्वयमेव शक्तेः, इत्याशङ्क्याह—**आत्मेति** । वृत्तिज्ञानं केवलं अज्ञानध्वंसित्वरूपं मानत्वं नाश्नुवीत, जडस्य वस्तुबलं विना अज्ञाननिवर्तकत्वायोगात् । असाधारणरूपेणाभिव्यक्तस्वरूपचैतन्यावष्टम्भादेव वृत्तिज्ञानं मानत्वमाप्नोति इत्यर्थः" इत्यपि व्याचक्षते **शास्त्रप्रकाशिकाकाराः** ।

1. **सोऽपि**—वाक्यजबुद्धिवृत्तीद्धः बोधोऽपि ।
2. **कारणाभावात्**—बुद्धिवृत्तिकारणस्य प्रमात्रादेरभावात् ।

* **स्वचिदाभासेति** तथा च न तात्त्विककौटस्थ्यविरोध इति भावः ।
* **कार्यसाधनमिति** कार्यत्वसाधकं प्रमाणमित्यर्थः ।

3. **तद्विरोधोऽपि**—मानविरोधोऽपि ।

प्रमात्राद्युत्थितेः पूर्वं कारकं दुर्लभं मितेः ।
तदभावात्क्रियाभावः तामृते कार्यता कुतः ॥ (322)

* एतच्चानुभवादेव भवताप्यभ्युपेयते ।
कारकव्यापृतिस्तत्र निपुणेनापि नेक्ष्यते ॥ (323)

* अकुर्वत्कारणं चेत्स्यात् तद्वत् कार्यं सदा भवेत् ।
कार्येतरानवसितिः संभूतौ युगपत्तयोः ॥ (324)

(का. 1-2-18) 'अजो....ऽजरोऽमृतः' (बृ- 6-4-25) 'अपूर्वोऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ. 6-5-13) 'एवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एव' (बृ. 4-4-12) इति श्रुतिविरोध इत्यर्थः । (321) स्वापादौ कार्याभावेऽप्यनुभवभावात् न [1]तस्य कार्यत्वम्, इत्याह—**प्रमात्रादीति** । (322) स्वापे कारकाभावः असिद्धः, अत्राह—**एतच्चेति** । (323)

कार्यकारणभावस्य कल्पितत्वम्

अनुभवस्य कार्यत्वं निराकर्तुं, अकुर्वत् कारणं, कुर्वद्वा इति विकल्प्य, आद्यं दूषयति—**अकुर्वदिति** । तद्वत्—कारणवत् । कार्यकारणयोः सदातनत्वे को दोषः, अत्राह—**कार्येति** । इदं कार्यं, इदं कारणमिति निश्चयो न स्यात्, अविशेषादित्यर्थः । (324) अकुर्वदपि कारणं कार्यात्पूर्वमेव भावि स्वभावादेव,

---

1. **तस्य**—अनुभवस्य ।

* "अनुभूतिरेव स्वापे नास्ति, कथमकार्यत्वं साध्यते, तत्राह—**एतच्चेति** सौषुप्तश्चेत्तदनुभवोऽस्ति, कारकमपि तत्र स्यात् कार्येण तत्कल्पनात्, इत्याशङ्क्याह—**कारकेति** ।" इति **शास्त्रप्रकाशिका** ।

* अकुर्वतः कारणत्वे, कारणं नित्यमनित्यं वा, आद्ये कारणवत् कार्यमपि नित्यं स्यादविशेषात् । द्वितीये, तयोः यौगपद्यं क्रमो वा । आद्ये कार्यकारणनिर्णयो न स्यात् । द्वितीये, कार्यस्य पश्चाद्भावित्वेऽपि एकस्मात् कारणात् विरुद्धानेककार्याणामुत्पत्तिः स्यात् । कुर्वतः कारणत्वे, कुर्वत्त्वं नित्यं न वा । आद्ये कार्यमपि सदा स्यात् । द्वितीये, तस्यापि हेत्वन्तरापेक्षायामनवस्था । कुर्वत्त्वस्य कार्यत्वकृतानवस्थावत्, तदाधारस्यापि कार्यत्वनिमित्ताऽनवस्था स्यात् इत्येवं कार्यकारणभावनिरासिवार्त्तिकत्रयस्याशयं वर्णयन्ति **शास्त्रप्रकाशिकाकाराः** ।

विरुद्धानेककार्याणामेकस्मादेव कारणात् ।
अकुर्वतः प्रसक्तिः स्यात् अकुर्वत्त्वाविशेषतः ॥ (325)

अथ कुर्वदभीष्टं तत् तत्कार्यं तर्हि भण्यताम् ।
अकार्यं कारकमिति सुप्तोन्मत्तप्रभाषितम् ॥ (326)

'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।'
इति श्रीमत्सुरेशस्य वाक्यमेवं समञ्जसम् ॥ (327)

प्रमेये च क्रियायां च प्रमाणेऽथ प्रमातरि ।
तच्छक्त्युपाधिहेतुत्वाज्जायमानेव चिद्ध्रुवा ॥ (328)

यथा सद्व्यतिरेकेण न किञ्चिद्वस्तु सिद्ध्यति ।
तद्वद्व्यतिरेकेण घटाभावाद्यसंभवात् ॥ (329)

इत्यत्राह—**विरुद्धेति** । (325) द्वितीयमनुवदति—**अथेति** । कुर्वद्रूपस्य कार्यत्वात् तत्रापि कारणान्तरं तत्राप्येवमिति अनवस्था, इति दूषयति—**तत्कार्यं तर्हीति** । कुत एतत्, अत्राह—**अकार्यमिति** । क्रियोपरक्तस्य कारकत्वादित्यर्थः । (326) कार्यकारणभावस्य कल्पितत्वे **भगवद्वाक्यं** मानम्, इत्याह—**मयेति** । (327) प्रागीरितरीत्या संविदोऽकार्यत्वे कथं तत्कार्यत्वप्रसिद्धिः, अत्राह—**प्रमेये चेति** । कूटस्थाप्यनुभूतिः प्रमेयादिनिमित्तमज्ञानवशात् (ज्ञा)[जा]यते इत्यर्थः । (328) प्रमात्रादेर्निमित्तत्वोपगमात् [1]व्यतिरेकादद्वैतहानिः, अत्राह—**यथेति** । [2]तथोक्तमिति शेषः । तर्हि अव्यतिरेकात् सप्रपञ्चं वस्तु स्यात्, अत्राह—**तद्वदिति** । अव्यतिरेकेणापि न सिद्ध्यतीति संबन्धः । हेतुमाह—**घटेति** । [[3]अव्यतिरेके सन्मात्रपरिशेषात् घटतदभावादेरसंभवात्] इत्यर्थः । (329)

---

1. **व्यतिरेकात्**—चैतन्यवस्तुनो भेदात् ।

2. **तथोक्तमिति** 'नैवेह किञ्चनाग्र आसीत्' इति श्रुत्यर्थविचारावसरे इत्यादिः ।

3. **अव्यतिरेके**—सद्व्यतिरेके ।

न हि सद्व्यतिरेकेण त्वसद्वस्त्वपि सिद्ध्यति ।
तस्यापि सदपेक्षत्वात् किमन्यत्स्यात्सता विना ॥ (330)

यथैवं संविदर्तेऽसन्नैति संभावनामपि ।
सदप्यभावरूपं वा तद्वद्व्यतिरेकतः ॥ (331)

अविद्या वाथ तत्कार्यं नाभेदान्नातिरेकतः ।
सिद्धायते यतोऽतः स्यादविचारितसिद्धिकम् ॥ (332)

नीलोत्पलदलाभं खं द्विरेफोदरवत्तमः ।
अविचारितसिद्ध्येवं तमस्तज्जश्च वीक्ष्यताम् ॥ (333)

---

[1]व्यतिरेकासिद्धौ हेत्वन्तरमाह—**न हीति** । असतः कथंचित् सद्व्यतिरेकप्राप्तिः, सदसतोर्विरोधात् । तस्यापि सद्व्यतिरेको न युज्यते, तदपेक्षत्वात् । किमु सद्रूपस्य घटादेरित्यर्थः । (330) [2]सतो भावाभावयोः भेदाभेदौ निरस्य, [3]संविदः [4]तयोः [5]तौ निराकुर्वन् आह—**यथेति** । यथा संविदा विना [6]सदसदपि संभावनां नैति जडत्वात्, (न) [तद्वत् भावरूपम] भावरूपं च संविद्रूपादव्यतिरेकेण न संभवति तन्मात्रत्वप्रसङ्गादित्यर्थः । (331)

सोदाहरणं सकारणस्य द्वैतस्य कल्पितत्वोपसंहारः

तस्मात् सकारणस्य द्वैतस्य कल्पितत्वं सिद्धम्, इत्याह—**अविद्येति** । (332) कल्पितत्वे दृष्टान्तमाह—**नीलेति** । आकाशमरूपमचाक्षुषञ्च स्पर्शरहितद्रव्यत्वात् आत्मवदिति [7]**भाट्टं प्रति** साध्यमुदाहरणम् । **तार्किकान्** प्रति उदाहरति—**द्विरेफेति** । [8]अभावरूपे तमसि नैल्यमारोपितमित्यर्थः । (333)

---

1. **व्यतिरेकासिद्धौ**—सद्व्यतिरेकासिद्धौ ।
2. **सतः**—सद्रूपात् ।
3. **संविदः**—संविद्रूपात् ।
4. **तयोः**— भावाभावयोः ।
5. **तौ**—भेदाभेदौ ।
6. **सदसदपि**—भावरूपमभावरूपमपि ।
7. भाट्टमते आकाशस्य रूपवत्त्वचाक्षुषत्वाङ्गीकारादाह—**भाट्टं प्रति साध्यमिति**
8. **अभावरूपे तमसि**—प्रौढप्रकाशकतेजःसामान्याभावात्मके तमसि ।

स्वमहिम्ना न संसिद्ध्येत् स्वतोऽनवगतात्मकम् ।
भावाभावौ न वस्त्वेति प्रत्याख्यातं यदात्मना ॥ (334)

तस्मादजायमानैव जायमानेव लक्ष्यते ।
अनुभूतिस्तदज्ञानहेतूत्थानात्मजन्मना ॥ (335)

तद्विनाशेऽपि तत्साक्ष्याद्विनश्यन्तीव लक्ष्यते ।
यतोऽतः कार्यतां तस्या नेश्वरोऽपि प्रसाधयेत् ॥ (336)

स्वात्मसाक्षिकतां मुक्त्वा भावाभावात्मवस्तुनः ।
यतोऽसिद्धिरतः प्रत्यङ्निरस्ताखिलविक्रियः ॥ (337)

कार्यं सर्वं यतो दृष्टं प्रागभावपुरस्सरम् ।
तस्यापि संवित्साक्षित्वात्प्रागभावो न संविदः ॥ (338)

जडस्य मिथ्यात्वे दृश्यत्वानुपपत्तिरूपार्थापत्तिर्मानम्, इत्याह—**स्वमहिम्नेति**। दृगात्मन्यध्यस्ततया सिद्धिरित्यर्थः । आत्मा जन्मादिमान् अधिष्ठानत्वात् शुक्तिवत्, जन्मादिमत्त्वात् रजतादिवत् कल्पितत्वम्, अत्राह—**भावेति**। **वस्तु**—प्रत्यगात्मा, [1]भावाभावौ **नैति**—**न संगच्छते**। यस्मात् **आत्मना** तदुभयं **प्रत्याख्यातं**—**निरस्तं**, [2]तत्साक्षित्वादित्यर्थः । (334)

अनुभवस्य जन्मादि कल्पितमित्युपसंहारः

अतो जन्मादि कल्पितम्, इत्युपसंहरति—**तस्मादिति**। प्रत्यगज्ञानकार्य-(वृत्तिबुद्धि) [[3]बुद्धिवृत्ति] जन्मनाशयोः, [4]तद्वतीव **लक्ष्यते** इत्यर्थः । (335-336) [5]जन्मनाशाभावेऽपि परिणामादिविकारोऽस्त्येव, अन्यथा भोक्तृत्वाद्यसंभवात्, अत्राह—**स्वात्मेति**। विक्रियाणां दृश्यत्वात् नात्मधर्मत्वमित्यर्थः । (337) आत्मा न जायते प्रागभावहीनत्वात् आकाशवत्, इत्याशयेनाह—**कार्यमिति**। हेत्व-सिद्धिमुद्धरति—**तस्यापीति**। (338) एवमविकारि वस्तु(त्वं) न्यायसिद्धं(त्वे)चेत्,

---

1. **भावाभावौ**—जन्मनाशौ ।
2. **तत्साक्षित्वादिति** साक्षिणः साक्ष्यनाश्रयत्वादिति भावः ।
3. **बुद्धिवृत्तिजन्मनाशयोरिति** सतोरिति शेषः ।
4. **तद्वतीव**—जन्मनाशवतीव । अनुभूतिरिति शेषः ।
5. **जन्मनाशाभावेऽपीति** अनुभूतेरित्यादिः ।

* **प्रमात्राद्यतिरेकेण ह्यसंविदितरूपकम् ।**
मेयं सिद्धमिहैवैतन्न वेदादन्यतः क्वचित् ॥ (339)
वस्तुवृत्तमपेक्ष्यैतन्न स्वतः परतस्तमः ।
तज्जं वा तत्तमोऽपेक्ष्य ह्यव्याकृतगिरोच्यते ॥ (340)
चिदाभासं तमो ज्ञेयं नाज्ञासिषमितीक्षणात् ।
जगज्जनिस्थितिलया एवंभूते परात्मनि ॥ (341)

किं वेदेन मानेन, इ(त्या)[त्यत्रा]ह—**प्रमात्रादीति** । मेयं—ऐकात्म्यं, इह—मानभूमौ, प्रमात्रादिभावरहितं न्यायेन सिद्धमपि, असंविदितरूपकं—अनिवृत्ताज्ञानम् । अतो वेदात्—वेदान्तवाक्यात्, अन्यतः—अन्यस्मिन् क्वापि न तदज्ञाननिवृत्तिरित्यर्थः । (339) अज्ञानतत्कृता(चा)ज्ञातत्वयोः परमार्थत्वात् न वेदान्तवाक्यधिया निवृत्तिः, (इत्या)[इत्यत्रा]ह—**वस्तुवृत्तमिति** । अद्वैतदृष्ट्या **अज्ञानं** तत्कार्यञ्च न सिद्ध्यति, विरोधात् । तथा स्वतो न सिद्ध्यति जडत्वात् । नापि परतः, संसर्गायोगात् । अतोऽनिर्वाच्यमित्यर्थः । [1]अव्याकृतवाक्यमेयत्वात्त[2]मसः नानिर्वाच्यत्वम्, अत्राह—**तत्तमोऽपेक्ष्येति** । 'अस्याविद्येति अविद्यायामेवासित्वा प्रकल्पते (सं. वा. 176) इत्युक्तत्वादित्यर्थः । (340) स्वतः परतश्च [3]सिद्ध्यसंभवे कथमज्ञानप्रतीतिः, अत्राह—**चिदाभासमिति** । [4]चैतन्यप्रतिबिम्बविशेषमज्ञानमनुभवात् सिद्ध्यतीत्यर्थः । शुद्धस्यैवात्मनो जगत्का-

---

* "कूटस्थां संविदमुक्त्वा तत्रैवाज्ञातत्वम्, इत्याह—**प्रमात्रादीति** इह—संविद्येव कूटस्थायां सिद्धं—विद्यमानं असंविदितरूपकं—अज्ञातत्वम् मात्राद्यतिरेकेण मेयं ज्ञेयम् इति योजना । कथं तर्हि तत् ज्ञातव्यम्, तदाह—**एतदिति** । वेदनं वेदः—**अनुभवः** । तस्मादन्यतः—तं वर्जयित्वा क्वचिन्माने सत्येव तदज्ञातत्वं न सिद्ध्यति, किन्तु अनुभवादेवेत्यर्थः । यद्वा, संविद्येवाज्ञातत्वमित्युक्तम् । इदानीमेवकारार्थमाह—**एतदिति** । अनुभवं हित्वा अन्यत्र कुत्र चिदाश्रये न एतत्—अज्ञातत्वमित्यर्थः । यद्वा, यत्रैतदज्ञातत्वं, तस्मिन्ननुभवे किं मानं, तदाह—**नेति** । वेदवाक्यमेव तत्र मानं, तद्विहाय अन्यस्मिन् कस्मिंश्चिन्माने तर्के वा सति न एतत्—अनुभवतत्त्वं सिद्ध्यतीत्यर्थः । " इति **शास्त्रप्रकाशिका** ।

1. **अव्याकृतवाक्येति** 'तद्धेदं तर्ह्यव्याकृतमासीत्' इति वाक्येत्यर्थः ।
2. **तमसः**—अज्ञानस्य ।
3. **सिद्ध्यसंभवे इति** अज्ञानस्येत्यादिः ।
4. **चैतन्यप्रतिबिम्बविशेषं**—चैतन्यप्रतिबिम्बविशेषितमिति यावत् ।

तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् ।
परः कारणतामेति भावनाज्ञानकर्मभिः ॥ (342)

यावत्कार्यगतं किञ्चित् भावनादि समीक्ष्यते ।
तमसा बीजभूतं तत् व्यज्यते संस्कृतेः पुनः ॥ (343)

तमो नियामकं यस्मात् स्वकार्याणां तदन्वयात् ।
ऊर्ध्वं व्यक्तेः पुरा चैव तदेवातो नियामकम् ॥ (344)

* नियम्यकार्यमापेक्ष्य नियन्तैष तमोऽवधिः ।
तेष्वेव चित्स्वभावः सन् साक्षितां प्रतिपद्यते ॥ (345)

रणस्याव्याकृतत्वात् किमज्ञानेन, अत्राह—**जगदिति** । (341) परस्यैव कार[ण]त्वे चेतनाचेतनविभागः कुतः, अत्राह—**तम इति** । विषमां सृष्टिं [1]विदधतः वैषम्यनैर्घृण्ये स्याताम्, अत्राह—**भावनेति** । (342) प्रलयकालीनकर्मणामनभिव्यक्तत्वात् न [2]निमित्तकारणत्वम्, अत्राह— **यावदिति** । अन्तःकरणगतं कर्मादि ईश्वरेक्षणसहकृतसंस्कारादभिव्यक्तमीश्वरस्योपकरणं भवतीत्यर्थः । (343) प्रलये कर्मादीनामविद्यात्मना संवृत्तानां कथमसांकर्ये[ण] प्रति[पु]रुषं व्यवस्थया कालनियमेन चाभिव्यक्तिः, अत्राह—**तम इति** । [3]प्राक् व्यक्तेः नाशादूर्ध्वं मध्ये चाज्ञानकार्याणां [4]तेन व्याप्तिः यस्मात्, [तस्मात्] तदेवाज्ञानं स्वकार्यकर्मादेः व्यवस्थया व्यक्तौ नियामकमित्यर्थः । (344) ईश्वरोऽन्तर्यामी नियामकः, न तमः, अत्राह—**नियम्येति** । अज्ञानोपहितस्य किमिति नियामकत्वं, वास्तवमेव तत्साक्षित्व-(मवे)[मि]त्याशङ्क्य, साक्षित्वमपि कल्पितमित्याह—[5]**तेष्वेवेति** । (345)

---

1. **विदधत इति** परस्येति शेषः ।
2. **न निमित्तकारणत्वमिति** स्वरूपसतः कर्मणः कार्यकरत्वे प्रलये कार्यापत्त्या अभिव्यक्तस्यैव कर्मणः निमित्तकारणत्वमिति भावः ।
3. **प्राक् व्यक्तेः**—अभिव्यक्तेः पूर्वम् ।
4. **तेन**—अज्ञानेन ।

* 'नियम्यं कार्यम्' इति मु. पु. पाठः ।

5. **तेष्वेव**—अज्ञानतत्कार्येष्वेव ।

निगीर्णं सजलूकादि दुष्टं देशं यथाश्रयेत् ।
भावनाज्ञानकर्माणि तथा यान्ति तमस्विनम् ॥ (346)

उत्पत्तिस्थितिनाशेषु कारणं नातिवर्तते ।
कार्यं सर्वं यथा लोके तथेहाप्यवसीयताम् ॥ (347)

कार्येष्वपि च सर्वेषु कर्तृत्वं यत्समीक्ष्यते ।
अस्यैव तद्विजानीयादतः सर्वकृदुच्यते ॥ (348)

तत्तेज ऐक्षत इति तेजोदेहं सदेव तु ।
उत्तरोत्तरकार्याणां श्रुत्या स्रष्टृतयोच्यते ॥ (349)

तथा संवर्गविद्यायामप्राणः प्राणतां गतः ।
अध्यात्ममधिदैवञ्च प्राणवायुतयोदितः ॥ (350)

प्रलये ब्रह्मीभूतं कर्मादि, मुक्तं त्यक्त्वा किमिति अज्ञमेवाश्रयेत्, अत्राह—**निगीर्णमिति** । यथोक्तम्,

'संपृक्तात् दुष्टशु(द्वयज्मुकात्)[द्वासात् जलूका]दुष्टशोणितम् ।
आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकादिव ॥' इति ।

आदिपदादौषधविशेषसंग्रहः । (346) भावनादेरज्ञकार्यत्वाच्च तदाश्रयता, इत्याह—**उत्पत्तीति** । (347) तर्हि ब्रह्मणः सर्वकारणत्वहानिः, अत्राह—**कार्येष्विति** । (348)

तत्तत्कार्यरूपेण स्थितः पर एव कारणमिति निरूपणम्

तत्तत्कार्यरूपेण स्थित्वा [1]परमेव कारणम्, इत्यत्र श्रुतिमुदाहरति—**तत्तेज(मि)[इ]ति** । [2]सन्धेरकरणं, विवक्षित एव सन्धिर्भवतीति न्यायात् । तेजसः अपाञ्च जडानामीक्षणायोगात् तत्तद्रूपस्थितं[3]सदेव स्रष्टृ प्रतिपाद्यते इत्यर्थः । (349) **संवर्गविद्याधिकारे** प्राणत्वम(प्रमा)[प्रा]णस्येश्वरस्योच्यते । तदन्यस्योपास्यत्वा-

---

1. **परमेव**—परं ब्रह्मैव ।
2. **सन्धेरकरणमिति** 'तत्तेज ऐक्षत इति' वार्त्तिकभागे इत्यादिः ।
3. **सदेव**—सद्रूपं ब्रह्मैव ।

नामोपक्रममाशान्तमरनाभिनिदर्शनात् ।
ओतप्रोतं जगत्सर्वं प्राण एवोपदिश्यते ॥ (351)

तथैवाकाशशब्देन तत्र तत्रैष एव तु ।
तदेतत्सत्यमिति च सबीजः पर उच्यते ॥ (352)

प्राणो ह्येष सर्वभूतैरिति चाथर्वणे वचः ।
प्राणबन्धनं सोम्येति सर्वकारणमुच्यते ॥ (353)

एष स्वकार्यं संश्रित्य नानाभेदान्प्रपद्यते ।
स्वोत्सृष्टतोयधाराद्यैर्वैश्वरूप्यं रविर्यथा ॥ (354)

योगात् [1]ईश्वरस्यैव फलहेतुत्वात्, इत्याह—**तथेति** । अवायोर्वायुत्वमप्युक्तमुपासनार्थम्, इत्याह—**अधिदैवञ्चेति** । 'वायुर्वाव संवर्गः यदा वा अग्निरुद्वा(प)यति वायुमेवाप्येति' (छा. 4 - 3 - 1) अध्यात्ममपि, 'प्राणो वाव संवर्गः स यदा स्वपिति प्राणं तर्हि वागप्येति' (छा. 4 - 3 - 3) इत्यादि श्रूयते इत्यर्थः । (350) एकस्यैवात्मनः तत्तद्रूपोपाधिकस्य सर्वकारणत्वे वाक्यान्तरमाह—**नामेति** । 'यद्वै किञ्चैतदध्यगीष्ठाः नामैवैतत्' (छा. 7 - 1 - 3) 'नामोपास्ते' इत्युपक्रम्य 'यथा वा अरा नाभौ समर्पिताः एवमस्मिन् प्राणे सर्वं समर्पितम्' (छा. 7 - 15 - 1) इति चोक्त्वा 'प्राणो ह्येतानि भूतानि भवन्ति' (छा. 7 - 15 - 4) इति श्रूयते इत्यर्थः । (351) 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' (छा. 1 - 9 - 1) इत्यादि(व)[च]मानम्, इत्याह—**तथैवेति** । भूतपञ्चकोपाधिकस्य सत्यशब्दनिर्देशमाह—**तदेतदिति** । 'एतस्माज्जायते प्राणः' (मु. 2-1-3) इत्यादिना परस्मात् सृष्टेः प्रकृतत्वादित्यर्थः । (352) वाक्यान्तरमाह—**प्राणेति** । 'प्राणो ह्येष[यः] (सर्वै) [सर्वभूतै] र्विभाति' (मु. 3-1-4) इति श्रूयमाणं मुख्यप्राणस्य कार्यत्वाद्युक्तमित्यर्थः । [2]प्राणशब्दस्य ब्रह्मत्वे वाक्यान्तरमाह—**प्राणेति** । उदाहृतश्रुतीनां तात्पर्यमाह—**सर्वेति** । सर्वकारणत्वात्सर्वमेवेत्यर्थः । (353) क्षेत्रज्ञानां

---

1. **ईश्वरस्यैव फलहेतुत्वादिति** 'फलमत उपपत्तेः' इति न्यायादिति भावः ।
2. **प्राणशब्दस्य**—प्राण इति शब्दो यस्य, तस्येत्यर्थः, प्राणशब्दबोध्यस्येति यावत् ।

* प्राणभूतादिजन्मैव जन्मात्मन इहोच्यते ।
वियतोऽजन्मनो जन्म यथा कुम्भादिजन्मना ॥ (355)

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
नाव्याकृतं परादन्यदागमादवगम्यते ॥ (356)

स्वकार्याण्येव संश्रित्य मृदसाधारणा यथा ।
सामान्यरूपतामेति स्वकार्यैः कारणं तथा ॥ (357)

तदेतन्नित्यमज्ञानं तज्जकालाद्यनाप्लुतेः ।
सर्वकालानुवर्त्येव लोके नित्यमितीर्यते ॥ (358)

मिथः परस्माच्च भिन्नत्वात् [1]कथमद्वितीयम्, अत्राह—**एष इति** । आदिपदादादर्शादिसंग्रहः । (354) जननमरणादिविरुद्धधर्मकत्वात् [2]भेदः, अत्राह—**प्राणेति** । इह—लोके शास्त्रे चेत्यर्थः । **अजन्मनः**—स्वतो जन्मरहितस्य वि(षय)[यत] इत्यर्थः । (355) तथापि न परस्य कारणत्वम्, तदवस्थाभेदस्याव्याकृताख्यस्य जगत्कारणत्वात्, अत्राह—**एतस्मादिति** । आगमात् परस्य कारणत्वावगमात् अव्याकृतं न[3]ततोऽन्यदित्यर्थः । (356) परस्य सत्सामान्यस्य विशेषापेक्षस्य अव्याकृतं विशेषः ततोऽन्यश्च, तत्राह—**स्वकार्याणीति** । सामान्यरूपत्वमापेक्षिकत्वात् [4]कल्पितमित्यर्थः । (357) अज्ञानशबलस्य कारणत्वे कार्यस्य कारणत्वमिष्टं स्यात्, अज्ञानस्य मिथ्याज्ञानरूपस्य कार्यत्वात्, अत्राह—**तदेतदिति** । देशकालादेरज्ञानकार्यत्वात् स्वकारणपरिच्छेदकत्वायोगादज्ञानमना[5]दीत्यर्थः । (358)

---

1. **कथमद्वितीयमिति** ब्रह्मेति शेषः ।
2. **भेद इति** क्षेत्रज्ञानामित्यादिः ।

* **प्राणेति** तथा चात्मन्यविद्यमानानां जननमरणादीनां विरुद्धधर्माणां न भेदकत्वमिति भाव:

3. **न ततोऽन्यत्**—न परस्मादन्यत् ।
4. **कल्पितमित्यर्थ इति** तथा च सति कुतः सत्सामान्यविशेषत्वेनाव्याकृतस्य ततोऽन्यता इति भावः।
5. **अनादीति** 'नित्यमज्ञानम्' इति वार्तिके विवक्षितं नित्यत्वमनादित्वमेव, न ध्वंसाप्रतियोगित्वमिति भावः ।

नित्यस्यानुच्छित्तिरिति चोद्यस्यापि न संभवः ।
नित्याज्ञानसमुच्छित्तौ यतः प्रामाण्यमाश्रितम् ॥ (359)
प्रमान्तरैरविज्ञातं प्रमेयं वस्तु भण्यते ।
तत्तत्त्वमात्रगं तत्स्थध्वान्ततुन्मानमुच्यते ॥ (360)
आगन्तु चेदिहाज्ञानमनिर्मोक्षः प्रसज्यते ।
पुरेवानागतं भूयो नैष्यतीत्यत्र का प्रमा ॥ (361)
कार्यकारणरूपेण द्वयोरव्यतिरेकतः ।
गुणप्रधानरूपेण कार्यकारणगीरियम् ॥ (362)

---

[1]प्रागभावेतरानादेर्निवृत्तिर्न स्यात्, अत्राह—नित्यस्येति । (359) अज्ञाननिवर्तकत्वेन मानानां मानत्वं यदि, तर्हि किं तत् मानं मेयं च, अत्राह—प्रमान्तरैरिति । अज्ञानमुपलक्षणं, न विशेषणत्वेन मेयान्तर्गतमिति मा[2](त्राचा)-[त्रचो]र्थः । (360) आत्मन्यज्ञानस्य अनादित्वाभावे दोषमाह—आगन्तु चेदिति । यथा मुक्तेरर्वागसदज्ञानमाविर्भूतं, तथा [3]तदूर्ध्वमपि [4]तदाविर्भवेदित्यर्थः । (361) अज्ञानविशिष्टं ब्रह्म कारणं, जगत् कार्यमिति स्वीकारे अद्वैतहानिः, अत्राह—कार्येति । अव्यतिरेक[त]इति । अभेद इत्यर्थः । [5]तसिः सार्वविभक्तिकः । एकत्वे कार्यकारणता न स्यात्, अत्राह—गुणेति । रज्जुतदध्यस्तसर्पयोरिव [पारतन्त्र्य] स्वातन्त्र्यरूपेण कार्यकारणव्यवहार इत्यर्थः । (362)

---

1. प्रागभावेतरानादेरिति घटादिप्रागभावः अनादिरपि घटाद्युत्पत्तौ निवर्तते । तद्भिन्नः अनादिः आत्मा न निवर्तते । अज्ञानस्य भावस्यानादित्वे तस्य निवृत्तिः न स्यादित्यर्थः ।
2. मात्रचोऽर्थ इति 'तत्तत्त्वमात्रगम्' इत्यत्रत्यमात्रच्प्रत्ययस्यार्थ इत्यर्थः । 'अविज्ञातं प्रमेयम्' इति पूर्वार्धे अज्ञातत्वविशिष्टस्य न मेयत्वं विवक्षितम्, अपि तु अज्ञातत्वोपलक्षितवस्तुन एवेति समुदायार्थः ।
3. तदूर्ध्वमपि—मुक्तेरनन्तरमपि ।
4. तत्—अज्ञानम् ।
5. तसिः सार्वविभक्तिक इति तसिल्प्रत्ययः सर्वविभक्त्यर्थेऽपि भवति । 'अव्यतिरेकतः' इत्यत्र प्रथमार्थे तसिः । तथा च अव्यतिरेकः इत्युक्तं भवति इत्यर्थः ।

न कारणं विना कार्यं न कार्यं कारणं विना ।
अन्योन्यापेक्षतः सिद्धेः विनान्योन्यं न तद्द्वयम् ॥ (363)*

भावनाज्ञानकर्मादि कार्योत्पत्तेः प्रयोजकम् ।
तद्भूतौ तदभिव्यक्तेस्ततस्वापेऽव्याकृतात्मता ॥ (364)

स्वकर्तुरुपभोगार्थं कर्माव्याकृतरूपकम् ।
* व्यक्तीभूतं प्रयुङ्क्ते क्ष्माबग्न्यन्तं साधनत्रयम् ॥ (365)

वाय्वाकाशौ समाश्रित्य पूर्वेषां साधनात्मता ।
त्रयाणामप्यतस्तानि वाय्वाकाशौ प्रयुञ्जते ॥ (366)

प्रयोजकप्रयोज्यत्वं कर्मसाधनयोर्भवेत् ।
स्वस्वामिभोगसिद्ध्यर्थमेवं व्याकृततेष्यते ॥ (367)

कारणस्य स्वतन्त्रत्वे चैतन्यवत् परमार्थत्वम्, अत्राह—**न कारणमिति** । अपेक्षाफलमाह—**विनेति** । घटाद्यभावेऽपि मृदादिदर्शनात् लोकदृष्ट्या **कारणं** स्वतन्त्रमुक्तम्, न वस्तुवृत्तापेक्षमित्यर्थः । (363) कारणस्यास्वातन्त्र्ये हेत्वन्तरमाह—**भावनेति** । आदिपदेनेश्वरादिसंग्रहः । हेतुमाह—**तद्भूताविति** । भावनादिव्यक्तौ कार्योत्पत्तेः, [1]तदव्यक्तौ कार्यस्य अव्याकृतात्मता—अनुत्पत्तिरिति [2]तत् प्रयोजकं, तत्सापेक्षंच कारणमित्यर्थः । (364) तत् भावानादि किमर्थं जगदारभते, तत्राह—**स्वकर्तुरिति** । (365) [3]तर्हि वाय्वाकाशोत्पत्तौ किं प्रयोजकम्, अत्राह—**वाय्वाकाशाविति** । आकाशप्रमुखा सृष्टिर्द्रष्टव्या । (366) [4]साधनशब्दोदितभूतपञ्चकस्य कार्यत्वं, [कर्मादेः] कारणत्वं चोक्तमुप-

---

* **विनान्योन्यमिति** परस्परसापेक्षत्वात् कार्यं कारणं चेति द्वयमपि कल्पितमेवेत्यर्थः ।

1. **तदव्यक्तौ**—भावनादीनामनभिव्यक्तौ ।

2. **तत् प्रयोजकं**—भावनाज्ञानकर्मादि कार्योत्पत्तिप्रयोजकम् ।

* **साधनत्रयं**—उपभोगसाधनत्रयम् ।

3. **तर्हि**—कर्मणः पृथिव्यादिभूतत्रयोत्पत्तिप्रयोजकत्वे ।

4. **साधनशब्दोदितभूतपञ्चकस्येति** 'कर्मसाधनयोर्भवेत्' इत्यत्र **साधनपदेन** उपभोगसाधनार्थकेन पृथिव्यादिभूतपञ्चकं विवक्षितमिति बोध्यम् ।

व्यक्तिर्नियतकालैव जगतोऽव्यक्तरूपिणः ।
अन्तर्यामिकृता चैषा नान्यः संभाव्यते प्रभोः ॥ (368)

वायोरिव प्रवृत्तिः स्यात्तथा चैवोपसंहृतिः ।
निर्निमित्तात्तथैवेशाज्जगज्जन्मस्थितिक्षयाः ॥ (369)

* न प्रयोज्यो यदा भोगः स्वाम्यर्थः कर्मणस्तदा ।
हित्वा कर्माखिला व्यक्तीरविशेषात्मतां व्रजेत् ॥ (370)

अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् ।
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥ (371)

अज्ञानमात्रोपाधित्वादविद्यामुषितात्मभिः ।
कौटस्थ्यान्निर्द्वयोऽप्यात्मा साक्षीत्यध्यस्यते जडैः ॥ (372)

ज्योतिषामपि तज्ज्योतिरसद्धीपरिमोषणात् ।
तमोरूपमिवाभाति भानुर्नक्तंदृशामिव ॥ (373)

संहरति—**प्रयोजकेति** । (367) कर्मादेः सदा सत्त्वात् सदा कार्यव्यक्तिप्रसङ्गः, अत्राह—**व्यक्तिरिति** । (368) ईश्वरस्य नियामकत्वे राजादिवत् सशरीरत्वम्, अत्राह—**वायोरिति** । यथा वायुरशरीरः स्वकार्यं नियमयति, तथा **निर्निमित्तात्**—अशरीरादीशात्, जन्मादिकार्यं स्यादित्यर्थः । (369) कर्मादेः जगदुत्पत्तिनिमित्तत्वात् [1]तत्क्षये (कं)[किं] प्रयोजकम्, अत्राह—**न प्रयोज्येति** । भोगार्थत्वात् जगद्व्यक्तेः, यदा भो(गे)(गो) न प्रयुज्यते, तदा कर्म जगता सह लीयते इत्यर्थः । (370) यथेशस्याधि[2]ष्ठाननिरपेक्षस्य कारणत्वं, एवमज्ञाननिरपेक्षस्यापि स्यात्, अत्राह—**अस्येति** । (371) न केवलं कारणत्वं कल्पितम्, साक्षित्वमपीति प्रागुक्तं स्मारयति—**अज्ञानेति** । (372) स्वयंप्रकाशप्रत्यगभिन्नब्रह्मानुभवस्य सदा प्रसङ्गात् नाज्ञानसंभवः, अत्राह—**ज्योतिषा-**

---

1. **तत्क्षये**—जगतःक्षये ।

* "स्रष्टुरीश्वरस्य देहाद्यनपेक्षत्ववत् कर्माद्यनपेक्षता किं न स्यादित्याशङ्क्याह—**नेत्यादिना** कर्माद्यनपेक्षस्येश्वरस्य न जन्मादिहेतुता रागादिमत्त्वप्रसङ्गात् ।" इति **शास्त्रप्रकाशिका** ।

2. **अधिष्ठाननिरपेक्षस्य**—शरीरनिरपेक्षस्य ।

* मोहतत्कार्यनीडं यत्कूटस्थाभासरूपकम् ।
ज्ञानं तदविनाभूतः परः साक्षीति भण्यते ॥ (374)

* इदं तत्सर्ववेदेषु यथाभूतार्थवित्तये ।
सदेवेत्यादिभिर्वाक्यैः कारणं ब्रह्म गीयते ॥ (375)

सर्वज्ञः सर्वशक्तिश्च सर्वात्मा सर्वगो ध्रुवः ।
जगज्जनिस्थितिध्वंसहेतुरेष सदेश्वरः ॥ (376)

यः पृथिव्यामितीशोऽसावन्तर्यामी जगद्गुरुः ।
हरिर्ब्रह्मा पिनाकीति बहुधैकोऽपि गीयते ॥ (377)

मिति । (373) अज्ञानात्साक्षित्वमित्यसंगतमुक्तम्, 'साक्षी चेता केवलो निर्गुणश्च' (श्वे. 6-11) इति शुद्धस्य तच्छ्रवणात्, अत्राह—**मोहेति** । अज्ञाने तत्कार्ये च स्थितं यत् चिदाभासज्ञानं तेन तादात्म्यं गतः परः साक्षी । तस्मादज्ञानात् चिदाभासाच्च साक्षित्वमित्यर्थः । (374) अद्वितीयस्याज्ञानवशात् कारणत्वकल्पने किं फलमित्याशङ्क्य, नि[1]ष्प्रपञ्चतत्प्रतिपत्तिः फलम्, इत्याह—**इदं तदिति** । (375) ईश्वरो न सर्वकर्ता चेतनत्वात् कुलालवत् इत्याशङ्क्य, 'यः सर्वज्ञः सर्ववित्' (मु. 1-1-9) इति विरोधमाह—**सर्वज्ञ इति** । (376) क्वचित् चतु[2]राननस्य कारणत्वं श्रुतं, क्वचित् पुरुषोत्तमस्य, क्वचित् पिनाकिनः । अतः कथं ब्रह्मणः सर्वकारणत्वम्, अत्राह—**यः पृथिव्यामिति** । पृथिव्यादौ तस्यान्तर्यामित्वेन स्थितिश्रवणादित्यर्थः । (377)

---

* "परस्मादन्यस्यैव तर्हि साक्षिता, मोहमाहात्म्यादन्यत्रापि तद्योगादित्याशङ्क्याह—**मोहेति** ।" इति **शास्त्रप्रकाशिका** ।

1. **निष्प्रपञ्चतत्प्रतिपत्तिरिति** निष्प्रपञ्चस्य तस्य-अद्वितीयब्रह्मणः प्रतिपत्तिरित्यर्थः ।

* "परस्यैवाज्ञानात् साक्षित्वेऽपि कथं तस्यैव तद्वशात् कारणत्वं, मानाभावादित्याशङ्क्याह—**इदमिति** । ननु प्रेक्षावत्प्रवृत्तेः ज्ञानपूर्वकत्वात् ब्रह्मणः सर्वकारणत्वे सर्वत्राप्रतिबद्धं ज्ञानं वाच्यम् । न च तदस्ति मानाभावात्, तत्राह—**सर्वज्ञ इति** ।" इति **शास्त्रप्रकाशिका** ।

2. **चतुराननस्य**—चतुर्मुखब्रह्मणः ।

* कूटस्थस्य न साक्षित्वं द्वितीयासंगतेर्भवेत् ।
नाशिनोऽपि न साक्षित्वं नाशेनाव्यतिरेकतः ॥ (378)

अज्ञानमात्रहेतौ तु सर्वमेतत्समञ्जसम् ।
कर्तृत्वाद्यन्यथाज्ञानहेतुत्वादात्मरूपिणः ॥ (379)

प्रत्यग्रूपस्य स्थास्नुत्वात् ज्ञातुर्मोहेन चान्वयात् ।
कूटस्थस्यापि साक्षित्वमागमापायिनं प्रति ॥ (380)

आत्मात्मवत्त्वसंबन्ध आत्मात्माज्ञानयोर्मतः ।
परोऽविवेको भूतानामात्माविद्येति कथ्यते ॥ (381)

ईशादिविषयान्तं यत्तदविद्याविजृम्भितम् ।

कारणत्वमज्ञानकृतमस्तु, साक्षित्वं तु न तत्कृतं स्वरूपचैतन्येन [1]तदुपपत्तेः, अत्राह—**कूटस्थस्येति** । तर्हि परिणामिनः प्रमातुः साक्षित्वमिति चेत्, न तस्यानित्यत्वात्, इत्याह—**नाशिनोऽपीति** । अनित्यत्वे हेतुमाह—**नाशेनेति** । विकारस्य नाशव्याप्तेरित्यर्थः । (378) तर्हि नास्त्येव साक्षित्वम्, अत्राह—**अज्ञानेति** । कृतिसमवायात् कर्तृत्वं यथा पारमार्थिकं, तथा साक्षित्वमपि, तत्राह—**कर्तृत्वादीति** । (379) अज्ञानमपि केन द्वारेण साक्षित्वप्रयोजकम्, अत्राह—**प्रत्यग्रूपस्येति** । ज्ञातुः—चैतन्यप्रतिबिम्बस्य । मोहेन—अविद्यया । प्रत्यग्रूपस्य बिम्बचैतन्यस्य च साभासमोहेनान्वयात् साक्षित्वं, न स्वतः अविकारित्वादित्यर्थः । (380)

आत्मना अज्ञानस्य कः संबन्धः इति चेत्, [2]अध्यासः इत्याह—**आत्मेति** । किं त(न)[द]ज्ञानमिति, तदाह—**पर इति** । भूतानां कारणभूतोऽविवेकोऽज्ञानमित्यर्थः । (381) तदज्ञानमात्मन्येवेति कथमवधारणम्, ईशा-

---

1. **तदुपपत्तेः**—साक्षित्वोपपत्तेः ।

* परस्य मातुरन्यत्वे, अनन्यत्वे च साक्षित्वं न संभवतीति पूर्वपक्षपरतया 'कूटस्थस्य न साक्षित्वम्' इति वार्तिकं, आविद्ये जगति तद्वशात् परस्य साक्षित्वकारणत्वान्तर्यामित्वाद्युपपन्नमिति सिद्धान्तपरतया, 'अज्ञानमात्रहेतौ तु' इति वार्तिकञ्च योजयन्ति **शास्त्रप्रकाशिकाकाराः** ।

2. **अध्यास** इति अध्यस्तं तादात्म्यमित्यर्थः ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
इति वेदशिरस्सूक्तिस्तथाचोद्घुष्यते स्फुटा ॥ (382)

दैवी ह्येषा गुणमयी मम मायेति च स्मृतिः ।
वैष्णवी खल्वियं मायेत्यपि लोकेऽपि गीयते ॥ (383)

मानान्तरानधिगतं मेयं तावन्निरूपितम् ।
स्वानुभूत्यनुसारेण प्रत्यङ्मात्रसतत्त्वकम् ॥ (384)

* एतन्निदानमधुना मिथ्याज्ञानं निरूप्यते ।
यतो बिभ्यति भूतानि संसारानर्थलक्षणात् ॥ (385)

यदेव नित्यमज्ञानं मिथ्याज्ञानं तदेव तु ।
कारणेतररूपेण तयोरव्यभिचारतः ॥ (386)

देरपि तत्संभवात्, अत्राह—**ईशादीति** । अत्र[1] श्रुतिमुदाहरति —**मायां त्विति** । (382) **दैवीति** । अघटमानं दृष्ट्वा वक्तारो भवन्ति, विष्णोरेषा मायेति । सा प्रसिद्धिरपि [2]तत्र मानम्, इत्याह—**वैष्णवीति** । एकः अपिशब्दः वस्तुत्वेऽनुपपत्तिं ध्वनयति । द्वितीयः[3] समुच्चयार्थः । (383) मानव्यापारात् प्राक् प्रतिपन्नमज्ञातत्वं मानप्रवर्तकम् । स्वयंप्रभादन्यस्याज्ञातत्वसाधकत्वासंभवात् तस्यैवाज्ञातत्वं मानगम्यत्वं चेति प्रतिपाद्य, वृत्तं संकीर्तयति—**मानान्तरेति** । आत्मन एवाज्ञातत्वमज्ञत्वं चानुभवैकगम्यमिति 'तद्धेदम्' इत्यादिनोक्तमित्यर्थः । (384)

'तन्नामरूपाभ्यामेव व्याक्रियत' इति श्रुत्यर्थवर्णनम्

अज्ञातात्मकार्यं जग(दे)[दि]ति 'तन्नामरूपाभ्याम्' इत्यादिनोच्यते, इत्याह—**एतदिति** । मिथ्याज्ञानमिति [4]कर्मव्युत्पत्त्या कल्पितं जगदुच्यते । कारणानन्तरं कार्यनिरूपणमिति संगतिमाह—**अधुनेति** । (385) अज्ञातस्य कारणस्य मिथ्याज्ञा(त)[न]स्य कार्यस्य मिथो भेदात् अद्वैतासिद्धिः, अत्राह—

---

1. **अत्र श्रुतिं**—ईश्वरादेरविद्याविजृम्भितत्वे प्रमाणभूतां श्रुतिम् ।
2. **तत्र मानं**—ईशस्य मायित्वे प्रमाणम् ।
3. **द्वितीय इति** अपिशब्दः इत्यनुवर्तते ।
4. **कर्मव्युत्पत्त्येति** ज्ञायते इति ज्ञानमत्र ज्ञेयमिति भावः ।

* **एतन्निदानं**—अज्ञातात्मकारणकम् ।

हेत्वन्तरानपेक्षं सत्तदव्याकृतरूपकम् ।
व्यक्ततां स्वयमेवैति निमित्तं नास्त्यसंहृतम् ॥ (387)

सुषुप्तादुत्थिती राज्ञः स्वयमेव यथा तथा ।
जग्धाशेषजगन्मूर्तेरव्यक्ताद्व्याकृतिर्मुहुः ॥ (388)

अनिश्चिता यथा रज्जुरिति न्यायोपबृंहितम् ।
स्फुटार्थं गौडपादीयं वचोऽर्थेऽत्रैव गीयते ॥ (389)

तदिदं नामरूपाभ्यामनामकमरूपकम् ।
एवं व्याक्रियताज्ञानहेतुमात्रव्यपाश्रयात् ॥ (390)

यदेवेति । [1]भिन्नयोः कार्यकारणभावासंभवात् तयोः अव्यभिचारतः—अभेदादित्यर्थः (386) अज्ञातशुक्त्यादेरिन्द्रियतद्दोषापेक्षस्य रजतादि(निवृत्ति)[विवर्त]दर्शनात् अज्ञातात्मनोऽपि [2]तदपेक्षा स्यात् विश्वविवर्ते, इ(त्या)[त्यत्रा]ह—**हेत्वन्तरेति** । इन्द्रियतद्दोषाणां प्रलये संहृतत्वात् नेन्द्रियदोषाज्जगद्भ्रम इत्यर्थः । (387) [3]अत्र दृष्टान्तमाह—**सुषुप्तादिति** । (388) दृष्टान्तेन संभावितार्थमाप्त[4]-वाक्येन द्रढयति—**अनिश्चितेति** ।

'[अनिश्चिता] यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥'

(मा. का. 2.17) इति वाक्यं सदसतोः जन्मनाशासंभवन्यायसंदृब्धमित्यर्थः । (389)

तात्पर्यमुक्त्वा [5]अक्षरार्थमाह—**तदिदमिति** । (390) वाचकव्यक्तीनां

---

1. **भिन्नयोरिति** अश्वमहिष्योरिवेति शेषः ।
2. **तदपेक्षा**—इन्द्रियतद्दोषापेक्षा ।
3. **अत्र दृष्टान्तं**—बाह्यनिमित्तानपेक्षस्य अज्ञातात्मनः स्रष्टृत्वे दृष्टान्तम् ।
4. **आप्तवाक्येन**—गौडपादाचार्यवाक्येन ।
5. **अक्षरार्थमिति** "तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नामरूपाभ्यामेव व्याक्रियत असौनामायमिदंरूप इति । तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियते असौ नामायमिदंरूप इति ।" इति श्रुतिरत्रानुसन्धेया ।

* अभिधानाकृतिर्नामशब्देनेहाभिधीयते ।
अभिधेयाकृतिस्तद्वद्रूपमित्युपदिश्यते ॥ (391)

एवं द्वाभ्यां प्रकाराभ्यामीशो व्याकृतजन्मनाम् ।
व्यवहाराय पर्याप्तो न त्वव्यक्तात्मना यतः ॥ (392)

नाम्नः सामान्यमात्रस्य त्वसाविति समीरणम् ।
विशेषनाम्ना संयोज्य देवदत्तादिनोच्यते ॥ (393)

तद्वद्रूपस्य सामान्यं रूपमित्युपदिश्यते ।
तदुपात्तविशेषं सच्छुक्लकृष्णादिनोच्यते ॥ (394)

एवेत्यवधृतावेतदात्मवृत्तव्यपेक्षया ।
आत्माविद्यासमुत्थाभ्यामेव व्याक्रियते परः ॥ (395)

वाच्यव्यक्तीनां चानन्त्यात् 'नामरूपाभ्याम्' इति द्विवचनमयुक्तम्, अत्राह— **अभिधानेति** । (391) वाच्यवाचकसामान्ययोर्द्वित्वात् द्विवचनोपपत्तावपि न [1]तृतीया उपपद्यते, नामरूपयोरभिव्यक्तावकरणत्वादित्याशङ्क्य, [2]इत्थंभावतृतीयेत्याह—**एवमिति** । (392) 'असौ नामायम्' इत्यत्र असावित्यस्यार्थमाह— **नाम्न इति** । [3]'देवदत्तो यज्ञदत्तः' इत्यादि भाष्यं व्याचष्टे—**विशेषेति** । नामसामान्यं विशेषनाम्ना देवदत्तादिना संयोज्य भाष्यकृद्भिरुच्यते इत्यर्थः । (393) 'इदंरूपः' इत्यत्र इदंशब्दार्थमाह—**तद्वदिति** ।[4] 'इदं शुक्लम्' इत्यादि भाष्यं विभजते—**तदुपात्तेति** । रूपसामान्यं विशेषनिष्ठं शुक्लकृष्णादिरूपेणोच्यते भाष्यकारैरित्यर्थः । (394) एवकारार्थमाह—**एवेति** । (395)

---

* **अभिधानेति** वाचकसामान्यं नामशब्दार्थः, वाच्यसामान्यं रूपशब्दार्थः । तयोः द्वित्वमुपपन्नमिति भावः ।

1. **तृतीया**—नामरूपाभ्यामित्यत्र तृतीयाविभक्तिः ।
2. **इत्थंभावतृतीया**—'इत्थंभूतलक्षणे' इति सूत्रविहिता इत्थंभावार्थिका तृतीया ।
3. **देवदत्तो यज्ञदत्त इत्यादिभाष्यं**—"देवदत्तो यज्ञदत्तः इति वा नामास्य इत्यसौनामायम्" इति भाष्यवाक्यम् ।
4. **इदं शुक्लमित्यादिभाष्यं**—"इदं शुक्लं इदं कृष्णं वा रूपमस्येति इदंरूपः ।" इति भाष्यवाक्यम् ।

न तु विध्वस्तनिःशेषप्रत्यगज्ञानतद्भव-
सामान्यभेदैकात्म्याख्यतदनन्यप्रमात्मना ॥ (396)

आदावव्याकृतं तत्त्वं नामरूपक्रियात्मना ।
* स्वयं तद्व्याकृतिमगाद्यथैतर्हि तथैव तत् ॥ (397)

नामरूपाभ्यामेवेति न समुच्चयनिश्चितौ ।
समस्तव्यस्तरूपाभ्यां लोकेऽपि व्याकृतिर्यतः ॥ (398)

जातितो बधिरस्येह व्यक्तिः स्याद्रूपमात्रजा ।
जात्यन्धादेश्च नाम्नैव तथा चोभयथाप्यसौ ॥ (399)

अज्ञातात्मैकहेतूनां मिथोऽपेक्षात्मनां श्रुतौ ।
नेयत्तास्तीह तत्त्वानामानन्त्यान्न क्रमस्तथा ॥ (400)

'मा भूद्व्याकृतधीः पुंसाम्' (वा. 3-4-208) इति पूर्वोक्तमेव व्यवच्छेद्यमाह—**न त्विति**। विध्वस्ताः निःशेषाः प्रत्यगज्ञानं तद्भवाः सामान्यभेदाः—[1]जातिव्यक्तयः, यस्मिन् ऐकात्म्ये तदाख्येन तेनानन्यप्रमात्मना—[2]स्वप्रकाशानुभवरूपेणेत्यर्थः। (396) 'तदिदम्' इत्यादेरर्थमाह—**आदाविति**। (397) नामरूपाभ्यां समुच्चिताभ्यामेव व्याकरणं, न [3]त्वेकैकेन इत्येतदर्थमवधारणम्, इत्याशङ्क्याह—**नामेति**। (398) व्यस्तेन समस्तेन च व्याकरणमुदाहरति—**जातित इति**। आदिपदेन उत्खातनेत्रसंग्रहः। (399) व्याक्रियमाणानां सख्याक्रमौ कस्मान्नोक्तौ, अत्राह—**अज्ञातेति**। (400) तर्हि सृष्टिरेकरूपा

---

1. सामान्यभेदाः इत्यतः सामान्यं च भेदाश्चेति व्युत्पत्त्या लब्धमर्थमाह—**जातिव्यक्तय इति**।

2. **स्वप्रकाशानुभवरूपेणेति** परो न तु व्याक्रियते इति योजना।

* **यथैतर्हि तथैव तदिति** एतर्हि—वर्तमाने काले सुषुप्तावव्याकृतं तत्त्वं जागरादौ व्याक्रियमाणं दृष्टम्। अतः सर्गादावपि पूर्वमव्याकृतस्य व्याकरणं दृष्टानुसारात् कल्प्यमित्यर्थः।

3. **एकैकेन**—नाममात्रेण रूपमात्रेण च।

* प्रक्रियानियमो नापि पुंव्युत्पत्तिप्रधानतः ।
प्रतिश्रुति विगीतिश्च प्रक्रियाणां समीक्ष्यते ॥ (401)

यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥ (402)

उद्भूतिस्थितिहानीनां न क्वचित् संभवो यथा ।
मुख्यां वृत्तिं समाश्रित्य तथोदर्केऽपि वक्ष्यते ॥ (403)

न जायते जन्यते वा नापि हन्ति न हन्यते ।
तमःसंवृतदृष्टीनां षड्विकारादिवीक्षणम् ॥ (404)

यदर्थं सर्वशास्त्राणां प्रवृत्तिरतिविस्तरा ।
आत्मज्ञानावतारार्थः सर्वशास्त्रसमुद्यमः ॥ (405)

निश्चिता न स्यात्, अत्राह—**प्रक्रियेति** । यदि अविवक्षिता सृष्टिः, तर्हि किमर्थमुच्यते, अत्राह—**पुंव्युत्पत्तीति** । सृष्टेरविवक्षितत्वे लिङ्गमाह—**प्रतिश्रुतीति** । [1]क्वचिदाकाशप्रमुखा, क्वचित् तेजःप्रमुखेत्यर्थः । (401) सृष्टीनां विरुद्धरूपत्वे काऽत्र साध्वी मन्तव्या, अत्राह—**ययेति** । (402) श्रुतिप्रतिपन्नजन्मादीनां ब्रह्मवत् परमार्थत्वात् विवक्षितैव सृष्टिः, अत्राह—**उद्भूतीति** । (403) [2]अत्र प्रमाणत्वेन 'न जायते म्रियते वा' (का. 1-2-18) इत्यादिमन्त्रमर्थत उदाहरति —**न जायत इति** । आदिपदेन कर्तृत्वादिसंग्रहः । (404)

'स एष इह प्रविष्टः' इति वाक्यावतरणम्

(प्रवृत्ति)[[3]प्रवेश] वाक्यस्थसशब्दापेक्षितमाचक्षाणो **भाष्यकारः** यदाह 'यदर्थः सर्वशास्त्रारम्भः' इति, तत् संगृह्णाति—**यदर्थमिति** । **वात्स्यायनादि**सर्वशास्त्राणां किमर्थमारम्भः, अत्राह—**आत्मेति** । (405) आत्मधीफलत्वे

---

* **पुंव्युत्पत्तिप्रधानतः**—सृष्टिश्रुतेः पुरुषस्य व्युत्पत्तिशब्दिततत्त्वज्ञानतात्पर्यवत्त्वादिति यावत् ।

1. **आकाशप्रमुखेति** सृष्टिरिति शेषः । एवमुत्तरत्रापि ।

2. **अत्र प्रमाणत्वेन**—उद्भूत्यादीनामपरमार्थत्वे प्रमाणत्वेन ।

3. **प्रवेशवाक्यस्थेति** 'स एष इह प्रविष्टः' इति वाक्यं प्रवेशवाक्यम् ।

विरोधः सर्वशास्त्राणां स्वाभिधेयव्यपेक्षया ।
निवृत्त्यर्थेऽविरोधित्वादत एतत्समीरितम् ॥ (406)

स्वत एव यतः पुंसां प्रवृत्तिः स्वार्थसिद्धये ।
तत्रानुवादि शास्त्रं स्यान्निवृत्तावेव तन्मितिः ॥ (407)

अपि वात्स्यायनादीनां शास्त्राणामुक्तहेतुतः ।
प्रामाण्यमविरुद्धं स्यादैकात्म्यज्ञानजन्मने ॥ (408)

प्रवर्तमानः पुरुषः शास्त्रोद्दीपितवर्त्मना ।
प्रवृत्तिविषयं दुष्टं दृष्ट्वाऽतो विनिवर्तते ॥ (409)

* अनित्यदुःखशून्यत्वं पदार्थानां ब्रुवन्स्फुटम् ।
बुद्धोऽपि रागाद्युच्छित्तौ यतते नात्मनिह्नुतौ ॥ (410)

शास्त्राणां मिथो विरोधो न स्यात्, अत्राह—**विरोध इति** । षट् पदार्थाः, षोडश पदार्थाः इत्यादि[1]तत्तच्छास्त्राभिधेयार्थविषयं विरोधप्रतिभानम् । न तु तात्पर्यार्थे अशेषविशेषनिवृत्तिद्वारा ब्रह्मात्मैक्यलक्ष(णमि)[णे, इ]त्यतो युक्तमेव [2]**तद्भाष्य**मित्यर्थः । (406) स्वर्गपशुपुत्रादिपुरुषाभिमतद्योतनेन शास्त्रं किमिति प्रमाणं न स्यात्, अत्राह—**स्वत इति** । स्वर्गादेः पुमर्थाभासत्वात् स्वतः कर्तव्यतया सिद्धत्वाच्च तद्धेतुबोधने शास्त्रस्य पर्यवसानायोगात् रागादिनिवृत्तिद्वारा सर्वसंसारविधुरे प्रत्यगात्मनि प्रामाण्यमित्यर्थः । (407) आत्मनोऽन्यस्यानवगतत्वायोगाच्च [3]तत्रैव प्रामाण्यं युक्तम्, इत्याह—**अपीति** । (408) **वात्स्यायनादि** शास्त्रान्तरशब्दसामर्थ्यात् प्रतीयमानभोगादिषु रक्तस्य ततो निवृत्त्यसंभवात् कथं तेषामैकात्म्यपरत्वम्, अत्राह—**प्रवर्तमान इति** । अनित्यत्वपारतन्त्र्यादिदोषं दृष्ट्वा प्रवृत्तिविषयान्निवर्तते इत्यर्थः । (409) **मीमांसान्यायविस्तरादीनां** [4]वाक्योप-

---

1. **तत्तच्छास्त्रेति** वैशेषिकनैयायिकादिशास्त्रेत्यर्थः ।
2. **तद्भाष्यमिति** ' यदर्थः सर्वशास्त्रारम्भः' इति भाष्यमित्यर्थः ।
3. **तत्रैव प्रामाण्यमिति** आत्मन्येव प्रामाण्यमित्यर्थः । अनवगतार्थगन्तृत्वस्यैव प्रामाण्यस्वरूपत्वादिति भावः ।
4. **वाक्योपकारकतयेति** ऐकात्म्यतात्पर्यनिर्णयादिजननद्वारेणेत्यादिः ।

* **अनित्यदुःखशून्यत्वमिति** अनित्यत्वं दुःखरूपत्वं नैरात्म्यञ्चेत्यर्थः ।

'त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ।
त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥' (411)

एकवाक्यत्वतो यद्वा ऐकात्म्यज्ञानजन्मने ।
वेदशास्त्रस्य कृत्स्नस्य तथा पूर्वमवादिषम् ॥ (412)

प्रमाणानि च शास्त्राणि तत्प्रामाण्यं न चान्यतः ।
अज्ञातात्मावबोधित्वात् तथा पूर्वमवादिषम् (413)

यस्मिंश्चाविद्ययाध्यासः संसारानर्थलक्षणः ।
स्वाभाविक्या कृतो मिथ्या शुक्त्यादौ रजतादिवत् ॥ (414)

कारकतया आत्मज्ञानपर्यवसानेऽपि न **सौगतशास्त्रस्य** तत्परत्वं, आत्मनिराकरणपरत्वात्, अत्राह—**अनित्येति** । निराकर्तुरात्मत्वेन [1]तन्निराकरणासिद्धेरित्यर्थः । (410) सर्वशास्त्राणां रागादि(व)निवर्तकत्वेन मुक्तिपरत्वं स्थिरीकर्तुं रागादिध्वंसस्य मुक्तिहेतुत्वे मानमाह—**त्याग एवेति** । (411) सर्वशास्त्राणां मुक्तिपरत्वे **दिगम्बरादीनां** पाषण्डित्वप्रसिद्धिविरोधः, इत्याशङ्क्य, '**यदर्थः**' इत्यादिभाष्यस्यार्थान्तरमाह—**एकवाक्यत्वत इति** । सर्वस्य वेदरूपशास्त्रस्य एकवाक्यत्वात्, ऐकात्म्यज्ञानार्थ आरम्भ इत्यर्थः । सिद्ध[2]साध्यार्थभेदे कथमेक[3]वाक्यत्वम्, अत्राह—**तथेति** । (412) 'सर्वे वेदा यत्पदमामनन्ति' (का. 1-2-15) इत्युक्तार्थप्रतिपादकवाक्यानुग्राहकतर्कमाह—**प्रमाणानीति** । आत्मनोऽन्यस्य अज्ञातत्वाभावात् अज्ञातार्थपरिच्छेद(व)[क]त्वेनैव णत्वात् ऐकात्म्यपरः सर्वो वेद इत्यर्थः । (413) '[4]यस्मिन्नविद्यया' इत्यादि-

---

1. **तन्निराकरणासिद्धेरिति** आत्मनो निराकरणस्यासंभवादित्यर्थः ।
2. **सिद्धसाध्यार्थभेदे**—सिद्धं परिनिष्पन्नं ब्रह्म अर्थः ज्ञानकाण्डस्य, साध्यः क्रियारूपोऽर्थः कर्मकाण्डस्य इत्येवं ज्ञानकर्मकाण्डयोरर्थभेदे ।
3. **कथमेकवाक्यत्वमिति** 'अर्थैकत्वादेकं वाक्यम्' इति वाक्यविदां सूत्रादिति भावः ।
4. **यस्मिन्नविद्ययेत्यादिभाष्यं**—"यस्मिन्नविद्यया स्वाभाविक्या कर्तृक्रियाफलाध्यारोपणा कृता ।" इति भाष्यवाक्यम् ।

ननु सामान्यविज्ञानविशेषाज्ञानसंश्रयात् ।
जातरूप्यस्मृतेर्लोके मिथ्याज्ञानं प्रसिद्ध्यति ॥ (415)

यत्राध्यासो यदध्यस्तं भेदसिद्धौ तयोर्मृषा ।
ज्ञानं जगति संसिद्धं सा चैकात्म्येऽतिदुर्लभा ॥ (416)

समस्तव्यस्तमैकात्म्यं येषाञ्चापास्तभेदकम् ।
चोद्यमेतत्समानं स्यादुभयोरपि पक्षयोः ॥ (417)

न नः परिहृतेनार्थश्चोद्येनानेन कश्चन ।

भाष्यतात्पर्यमाह—**यस्मिंश्चेति** । मिथ्याज्ञानतत्संस्काररूपां विद्यां व्यावर्तयति—**स्वाभाविक्येति** ।

कारणासंभवेन आत्मनि अनात्माध्यासाक्षेपः

प्रत्यागात्मनि अनात्माध्यासं कारणासंभवादाक्षिपति—**नन्विति** । सामान्यविशेषभावहीनत्वात् नि(च्छा)[त्या]परोक्षत्वाच्चात्मनः न सामान्यग्रहणादि [1]कारणत्रयमस्तीत्यर्थः । (415) [2]सतो(वे)[भे]दस्याग्रहोऽध्यासव्यापकः, तदभावाच्च नाध्यासः, इत्याह—**यत्रेति** । (416) द्वैताद्वैतात्मवादे मिथ्याधीसिद्धिः [3]भेदाग्रहसंभवात्, अत्राह—**समस्तेति** । भेदांशस्याभेदांशादत्यन्तभेदाभावात् तद्ग्रहे ग्रहप्रसङ्गादित्यर्थः । (417)

निरुक्ताक्षेपपरिहारः

[4]सामान्यादावपोहत्वाद्यारोपदर्शनात् न सामान्यग्रहादिकं भ्रमप्रयोजकमि-

---

1. **कारणत्रयमिति** सामान्यांशग्रहणं, विशेषांशाग्रहणं, आरोपितार्थस्मृतिश्चेति अध्यासकारणत्रयमित्यर्थः ।
2. **सतो भेदस्याग्रह इति** अधिष्ठानशुक्तेः आरोप्यरजतस्य च भेदः वस्तुतोऽस्ति, परन्तु दोषवशान्न गृह्यते भ्रमस्थले । ऐकात्म्यवादे भेदासिद्धेः, वास्तविकभेदस्याग्रहरूपमध्यासव्यापकं नास्तीति भावः ।
3. **भेदाग्रहसंभवादिति** वस्तुसतो भेदस्य स्वीकारादिति भावः । भेदाभेदवादे, सत्यपि भेदे तदग्रहो न संभवति वस्तुग्रहे वस्तुमात्रस्य भेदस्यापि ग्रहप्रसङ्गात् । न च भेदाभेदौ वस्तुधर्मौ । धर्मधर्मिभावस्य दुर्भगत्वादिति, चोद्यसाम्यमुपपादयन्ति **शास्त्रप्रकाशिकाकाराः** ।
4. **सामान्यादाविति** घटत्वादि सामान्यं भावरूपम् । तत् न भावरूपं, किन्तु अघटव्यावृत्तिरूपमिति सौगता वदन्ति । तथा च तेषां सामान्ये घटत्वादौ अघट-

प्रत्यक्षोहैकहेतुत्वात्सर्वानर्थमृषामतेः ॥ (418)

अज्ञानमेव बाध्यं नो मानस्येह यतस्ततः ।
तच्चोद्यपरिहारोऽतः क्रियते नाफलत्वतः ॥ (419)

मिथ्याज्ञानातिरेकेण नान्यदज्ञानमिष्यते ।
येषां तान्प्रति चोद्यं स्यान्न त्वज्ञातात्मवादिनाम् ॥ (420)

नन्वज्ञानमवस्तुत्वात् कथं संसारकारणम् ।
मिथ्याज्ञानस्य वस्तुत्वात्तदेवास्त्विह कारणम् ॥ (421)

तथा च युक्तिमद्यत्तान्महद्भिरपि भाषितम् ।
अप्रामाण्यं पुनस्त्रेधेत्यत एतत्सुसंस्थितम् ॥ (422)

त्यस्माभिरभ्युपगमात् न चोद्यावकाशः, इति परिहरति—**न न इति**। (418) भ्रमस्य अज्ञानमात्रकार्यत्वं साधयति—**अज्ञानमिति**। भ्रमस्य ज्ञानबाध्यत्वमज्ञानमात्रकार्यतया [1]तदात्मत्वे सत्येव स्यात् नान्यथेत्यर्थः। (419) कैस्तर्हीदं चोद्यं परिहर्तव्यम्, अत्राह—**मिथ्येति**। (420)

मिथ्याज्ञानमेवाविद्येति एकदेशिनः चोद्यम्

भ्रान्तिज्ञानमेवाविद्येति वदन् एकदेशी चोदयति—**नन्विति**। भ्रान्तिज्ञा(त)[न][2]स्याप्येतत् समम्, इत्यत आह—**मिथ्याज्ञानस्येति**। (421) अज्ञानादन्यत् मिथ्याज्ञानं वस्तुभूतमसिद्धं, यत्कारणम्, इत्याशङ्क्याह—**तथा-चेति**। अज्ञानं न कारणं [3]अवस्तुत्वात्, मिथ्याज्ञानं तु कारणं वस्तुत्वात्, इत्येतदनुरोधेन अस्माभिरिव **वार्त्तिककारैरुक्तम्**,

"अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः ।
वस्तुत्वात् द्विविधस्येह संभवो दुष्टकारणात् ॥

व्यावृत्तिरूपान्यापोहत्वारोपो वर्तते । न च तत्र अधिष्ठाने सामान्यग्रहः संभवति। अनवस्थापत्त्या सामान्ये सामान्यानङ्गीकारात् । तस्मात् अधिष्ठानगतसामान्यज्ञानादिकं न भ्रमकारणमिति समुदायार्थः।

1. **तदात्मत्वे सत्येव**—अज्ञानात्मत्वे सत्येव। अज्ञानस्यैव ज्ञानबाध्यत्वादिति भावः।

2. **एतत् समं**—अवस्तुत्वं समम्।

3. **अवस्तुत्वादिति** अज्ञानस्य ज्ञानाभावरूपस्य वस्तुत्वाभावादित्यर्थः।

किं भोः सदपि मानेन वस्तु साक्षान्निरस्यते ।
तस्मिन्निरस्ते किं शेषं यस्मिन् मानस्य मानता ॥ (423)

* व्यञ्जकत्वात्प्रमाणानां मेयाभिव्यक्तितोऽपरम् ।
कार्यान्तरं न संभाव्यं नितरां वस्त्वपाक्रिया ॥ (424)

मिथ्याज्ञानं कथं वस्तु न हि मिथ्येति वस्तु सत् ।
मिथ्या तद्वस्तु चेत्युक्तिर्महतामेव शोभते ॥ (425)

स्वतोऽपि यदि सा वस्तु रज्ज्वां सर्पादिका मतिः ।
रज्ज्वात्मना तथापीयमवस्त्वेवात्र बाध्यते ॥ (426)

विज्ञाने तु दोषाणां व्यापारो नैव विद्यते ।
कारणाभावतस्त्वेवं तत्सिद्धं नस्त्वदुक्तिवत् ॥" इति ।

एतदर्थत उदाहरति—**अप्रामाण्यमिति** । अज्ञानस्य ज्ञानानुत्पादनस्य न हेतुत्वमवस्तुत्वात्, मिथ्याज्ञानस्यानर्थहेतुत्वं रूप्यभ्रमादौ दृष्टत्वात्, इति निगमयति—**अत एतदिति** । (4 2)

निरुक्तचोद्यपरिहारः

मिथ्याज्ञानं माननिवर्त्यं न वेति विकल्पयति—**किमिति** । आद्यमनुवदति—**सदपीति** । दूषयति—**तस्मिन्निति** । ज्ञानस्य वस्तुनिवर्तकत्वे सर्वस्य ज्ञाननिवर्त्यत्वप्रसङ्गे निर्विषयं मानमेव न स्यादित्यर्थः । (423) [1]पक्ष एवायमसंभवी, इत्याह—**व्यञ्जकत्वादिति** । (424) मिथ्याज्ञानस्य वस्तुत्वमेवासिद्धम्, इत्याह—**मिथ्येति** । भ्रान्तिज्ञानस्य स्वरूपबाधाभावात् विषयमात्रबाधात् [2]तस्य वस्तुत्वमुक्तं **भट्टपादैः**, अत्राह—**मिथ्या तदिति** । ज्ञानस्याबाध्यत्वे तद्विषयस्यापि बाधायोगादित्यर्थः । (425) रज्जुसर्पज्ञानादेः वस्तुत्वेऽपि ज्ञाननिवर्त्यत्वं दृष्टम्, अत्राह—**स्वतोऽपीति** । यद्यपि सर्पादिमतिः

---

1. **पक्ष एवायमसंभवी**—ज्ञानस्य वस्तुनिवर्तकत्वमिति पक्ष एव न संभवति ।

* 'मेयाभिव्यक्तितोऽपरम्' इत्यत्र, "अपरं—निकृष्टमुत्कृष्टं वेत्यर्थः । न त्वपरशब्दः अन्यविषयः, अन्तरशब्देन पुनरुक्तेरिति द्रष्टव्यम् ।" इति **शास्त्रप्रकाशिका** ।

2. **तस्य**—भ्रान्तिज्ञानस्य ।

मिथ्याज्ञानस्य कार्यत्वात् किं तत्कारणमुच्यताम् ।
अकारणं सत्कार्यं चेत् डिम्भकैरपि हस्यते ॥ (427)

* **रोगादि कारणं चेत्स्यात् कार्यं सत्कारणं कथम् ।**
अवस्त्वपि च वस्त्वेव वस्तुरूपात्तदन्यतः ॥ (428)

* **उपात्तमेयरूपत्वं मानानां सत्यतोच्यते ।**
तद्बलेनैव मेयस्थं घ्नन्ति मोहादि नान्यतः (429)

सर्पादिश्च रज्ज्वां दृश्यमानः स्वतो वस्तु, [1]तथापि रज्ज्वात्मना **अनिर्वाच्यमेव** बाध्यमित्यर्थः । (426) मिथ्याज्ञानमभ्युपगच्छद्भिः अनाद्यज्ञानं तत्कारणमभ्युपगन्तव्यम्, इत्यभिसन्धायाह—**मिथ्याज्ञानस्येति ।** ध्वंसवत् निमित्तमात्रात् मिथ्याज्ञानसिद्धिः, अत्राह—**अकारणमिति ।** अभावेतरकार्यं निरुपादानमिति डिम्भकैः—बालकैरपि हस्यते इत्यर्थः । (427) मिथ्याबुद्धेः(तत्)[सत्]कार्यत्वात् सोपादानत्वेऽपि, नाज्ञानसिद्धिः कारणदोषस्य तद्धेतुत्वात्, इति शङ्कते—**रोगेति ।** [2]कार्यस्यानन्वयादनवस्थानाच्च अनुपादानत्वात्, अनाद्यज्ञानं तदुपादानम्, इति परिहरति—**कार्यमिति ।** अज्ञानं नोपादानं भावविलक्षणत्वात् नृशृङ्गवत्, अत्राह—**अवस्त्वपीति ।** तत्—अज्ञानं वस्तुरूपात्—भावात्, अन्यतः—अन्यत्वात्, अवस्त्वपि वस्त्वेव, तुच्छव्यावृत्तत्वात् । अज्ञानमुपादानं अभावेतरानादित्वात् ब्रह्मवदित्यर्थः । (428) अज्ञानादि सत्यं, अभावविलक्षणत्वात् ब्रह्मवदिति चेत् । किं मानवत् सत्यत्वं मेयवद्वा । नाद्यः,

---

1. **तथापि रज्ज्वात्मनेति** सर्पस्य हि रज्ज्वात्मनैव बाध्यता, न स्वतः । रज्ज्वात्मता च सर्पस्य न वस्तुसती, अपि त्वनिर्वाच्या । तथा च वस्तुनः ज्ञानबाध्यत्वे दृष्टान्तो नास्त्येवेति भावः ।

2. **कार्यस्येति** कार्यस्य भ्रान्तिज्ञानं प्रत्युपादानत्वाभावे, अनन्वयः, अनवस्था चेति हेतुद्वयम् । मृदादेरुपादानस्य घटादावन्वय इव रोगादेः मिथ्याज्ञाने अन्वयो नास्ति । भ्रान्तिज्ञानोपादानस्य कार्यत्वे तदुपादानेनान्येन भाव्यम् । तस्यापि कार्यत्वे, अन्येन तदुपादानेन भाव्यमित्यनवस्था च भवति । अतः अनाद्यज्ञानमेव भ्रान्तिज्ञानोपादानमित्यर्थः ।

* 'रागादि कारणं चेत्' इति मु. पु. पाठः ।

* **उपात्तमेयरूपत्वं**—विषयाकारभजनमिति यावत् ।

* तद्विपर्ययतो मिथ्या सर्वं मोहादि भण्यते ।
वस्त्वसाधारणं रूपं मोहादेर्न प्रमीयते ॥ (430)

न च वस्तुसतत्त्वं तद्बाधात्तस्य प्रमाणतः ।
मेयप्रबोधनं मुक्त्वा न मितेः सत्यताऽन्यतः ॥ (431)

कारकाणां हि सत्यत्वं स्वकार्यापेक्षयेष्यते ।
* इतोऽन्यथा तत्सत्यत्वं निष्फलं न च लभ्यते ॥ (432)

यद्वस्तु स्वात्मनैवास्ति तत्परार्थं न बोधवत् ।
पारार्थ्येनैव सद्यच्च तत्परस्माद्धिरुङ् न सत् ॥ (433)

इत्याह—**उपात्तेति** । विषयाकारभजनस्य तदीयसत्यत्वे हेतुमाह—**तद्बले-नेति** । (429) विषयाकारभजनं सत्यत्वं मोहादेरपीत्याशङ्क्य, अनुपलम्भ-विरोधेन दूषयति—**तद्विपर्ययत इति** । (430) द्वितीयं दूषयति—**न चेति** । वस्तुसतत्त्वं—मेयवत् सत्यत्वमित्यर्थः । मानस्य मेयबोधनव्यतिरेकेण स्वरूपेण सत्यत्ववत् मोहादेरपि सत्यत्वम्, अत्राह—**मेयेति** । (431) जडानामर्थ क्रियाकारित्वस्यैव सत्य(त्वा)[त्वमि](त्या)[त्यत्रा]ह— **कारकाणां हीति** । तादृश-सत्यत्वमज्ञानादेरपीष्टमिति भावः । पारमार्थिकत्वं (न) [च] सत्यत्वमन्यदस्ति, इत्यत्राह—**इत इति** । प्रमाणप्रयोजनशून्यमित्यर्थः । (432)

मोहादेर्मिथ्यात्वे अनुमानं प्रमाणम्

[1]मोहादेः मिथ्यात्वेऽपि मानाभावः, इत्याशङ्क्य, अनुमानं दर्शयितुं व्यति-रेकव्याप्तिमाह—**यदिति** । यत् स्वात्मनैवास्ति परमार्थसत्, तत् प(दा)[रा]र्थ-परतन्त्रं न भवति चैतन्यवदिति व्यतिरेकमुक्त्वा, अन्वयमाह—**पारार्थ्येनेति** । परस्मात् हिरुक्—चैतन्याद्भेदेन नास्तीति यावत् । विमतं मिथ्या जडत्वात् शुक्ति-

---

* **तद्विपर्ययतः**—मानविपर्ययतः । मोहस्य मिथ्याज्ञानस्य मानस्येव वस्त्वसाधारण-रूपाकारभजनं नास्तीत्यर्थः ।

* **इतोऽन्यथेति** अर्थक्रियाकारित्वादन्यत् पारमार्थिकत्वमिति यावत् ।

1. **मोहादेः**—मिथ्याज्ञानादेः ।

* सर्वमनन्यापेक्षं सदीक्ष्यमाणं स्वमात्रया ।
स्वात्मरूपात्पृथग्रूपं न वस्तूत्प्रेक्ष्यतेऽण्वपि ॥ (434)

आत्मनैव स्वभावेन वस्त्वात्मानं बिभर्ति हि ।
नात्मनो विद्यतेऽपेक्षा वस्तुनोऽन्यसमाश्रया ॥ (435)

तस्मादविद्यासंभूतं नानात्वं प्रत्यगात्मनि ।
ब्रह्मास्मीति हि तद्ध्वंसात् न क्वचिद्भेदधीर्यतः ॥ (436)

मित्युत्पत्तावनुत्पत्तिः विरोधाद्बाध्यते यतः ।
तद्बाधे नाप्यपेक्षास्ति मिथ्याधीबाधनं प्रति ॥ (437)

रूप्यवदित्यर्थः । (433) जडस्य कल्पितत्वे हेत्वन्तरमाह—**सर्वमिति** । सकलं घटादि, स्वमात्रया—स्वात्मभूतसन्मात्रत्वेन, सन् घटः, सन् पटः इतीक्ष्यमाणं अनन्यापेक्षं–सत्ताप्रतीत्योरनन्यापेक्षं सत् ब्रह्मैव भवति । स्वात्मरूपात्—समस्तस्य प्रत्यग्भूतात् सद्रूपात्, पृथक्—भिन्नं अण्वपि न लभ्यम्, सतोऽन्यस्यासत्त्वात् । तस्मात् सर्वं कल्पितमित्यर्थः । (434) सापेक्षस्य कल्पितत्वे प्रतीचोऽपि कल्पितत्वम्, [1]श्रुत्याद्यपेक्षत्वात्, अत्राह—**आत्मनैवेति** । अज्ञाननिवृत्तेरन्यापेक्षत्वेऽपि [2]आत्मनो वस्तुनो नापेक्षेत्यर्थः । (435) जडस्यैव सापेक्षत्वप्रतिपादनफलमाह—**तस्मादिति** । ब्रह्मास्मीति ज्ञानादविद्याध्वस्तौ न क्वचित् भेदधीः–सर्वप्रकारोऽपि भेदो बाध्यते यस्मात्, तस्मादित्यर्थः । (436)

मिथ्याज्ञानस्य ज्ञानबाध्यत्वम्

अज्ञानमात्रस्य ज्ञानबाध्यत्वात् न मिथ्याज्ञानस्य बाध्यत्वम्, अत्राह—**मित्युत्पत्ताविति** । अनुत्पत्तिशब्देन अनाद्यज्ञानं विवक्षितं, न ज्ञानप्रागभावमात्रम् । तन्निवृत्तेः मिथ्याज्ञानबाधप्रयोजकत्वाभावादिति द्रष्टव्यम् । (437)

---

* 'सर्वमन्यानपेक्षम्' इति मु. पु. पाठः ।

1. श्रुत्याद्यपेक्षत्वादिति स्वाज्ञाननिवृत्तये इत्यादिः ।

2. आत्मनः वस्तुनो नापेक्षेति तस्य स्वमहिमप्रतिष्ठत्वादिति भावः ।

* मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् ।
मूलध्वस्तौ हतं तच्चेत् मिथ्याधीः किं करोति नः ॥ (438)

मेयरूपानुरोधित्वं मिथ्यासंशययोर्यदि ।
सम्यग्ज्ञानात्तयोर्भेदो गम्यतां केन हेतुना ॥ (439)

अज्ञानं संशयत्वान्नो मिथ्याज्ञानात्तथैव च ।
तयोस्तत्त्वविवक्षायामज्ञानं तत्त्वमुच्यते ॥ (440)

अज्ञात एव यद्यत्र ज्ञाते तस्मिन्न तद्भवेत् ।
सर्वत्रासिद्धिरूपत्वान्मिथ्याज्ञानमिदं मतम् ॥ (441)

अज्ञानात् मिथ्याज्ञानस्यान्यत्वात् [1]अस्त्यपेक्ष्यान्तरम्, अत्राह—**मिथ्येति**। अज्ञानकार्यत्वादित्यर्थः। मिथ्याज्ञानस्य स्वरूपसत्त्वं निरस्य, संसारहेतुत्वं निरस्यति—**मूलेति**। (438) विगीतप्रत्यया यथार्थाः प्रत्ययत्वात् घटप्रत्ययवदिति मिथ्याज्ञानादेरपि मानवत् सत्यत्वानुमानात् नाज्ञानमूलत्वम्, अत्राह—**मेयेति**। याथार्थ्ये भ्रान्त्या(द्य)[द्यु]च्छेदो बाध इत्यर्थः। (439) मिथ्याज्ञानादेः अज्ञानात्मत्वं साधयति—**अज्ञानमिति**। अस्मिन् विषये ममाज्ञानमस्ति संशयसत्त्वात्, विषयान्तरेऽप्यस्ति, मिथ्याज्ञानसत्वात्। एवं लोकव्यवहारात् [2]तयोरज्ञानमेव तत्त्वं निश्चितम्। अतः तत्स्वरूपविवक्षायामज्ञानमेव विवेकिभिस्तदुच्यते इत्यर्थः। [440] अन्वयव्यतिरेकाभ्यामपि मिथ्याज्ञानादेरज्ञानशरीरत्वम्, इत्याह—**अज्ञात इति**। यस्मिन्नज्ञाते सत्येव यत्–मिथ्याज्ञानादि भवति, तस्मिन् ज्ञाते तन्न स्यात्। तस्मात् अज्ञाते वस्तुनि मिथ्याज्ञानादिसत्त्वात्, ज्ञाते च तदसत्त्वात् सर्वत्र—सर्वप्रकारेण भेदेनाभेदेन चासत्त्वादनिर्वचनीयाज्ञानमतमभिप्रेतमित्यर्थः। (441)

---

1. **अस्त्यपेक्ष्यान्तरमिति** अज्ञानबाधातिरिक्तं मिथ्याज्ञानबाधायापेक्षणीयमस्ति इत्यर्थः।

* "मिथ्याधियो बाधो नापेक्षितश्चेत्, अबाधितैव सा स्यादित्याशङ्क्याह—**मिथ्येति**" इति **शास्त्रप्रकाशिका**।

मूलध्वस्तौ हतं तच्चेदिति मूलस्य उपादानस्याज्ञानस्य ध्वंसे सति, तत्—भ्रान्तिज्ञानं हतं चेदित्यर्थः।

2. **तयोः**—संशयमिथ्याज्ञानयोः।

मिथ्याज्ञानस्य वस्तुत्वं येनैव स्यात्सदात्मना ।
अज्ञानस्यापि तेनैव सत्यत्वं केन वार्यते ॥ (442)

रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः ।
अवस्तु सन्नपि ह्येषः इति पूज्यैरपीरितम् ॥ (443)

स्वतस्तु सत्यता साक्षान्नोभयोरपि विद्यते ।
अविचारितसिद्धित्वान्न स्वतः परतोऽपि ते ॥ (444)

तदेवानुप्रविश्येति तत्त्वं यत्पारमार्थिकम् ।
* सच्च त्यच्चादिकां भित्तिं मोहात्प्रापदिति श्रुतिः ॥ (445)

किञ्च, मिथ्याज्ञानस्य प्रत्यग्रूपेण सत्त्वादज्ञानकार्यत्वाभाव उच्यते, स्वरूपेण सत्त्वाद्वा । प्रथमं प्रत्याह—**मिथ्याज्ञानस्येति** । (442) सर्वस्याधिष्ठानरूपेण सत्त्वे भाष्यकारवचनं प्रमाणयति—**रज्जुसर्प इति** । (443) द्वितीयं दूषयति—**स्वतस्त्विति** । अविचारितसिद्धत्वं साधयति—**न स्वत इति** । स्वतो न सिद्ध्यति जडत्वात्, न परतः [1]संबन्धासिद्धेरित्यर्थः । (444) आत्मनः स्वरूपसत्त्वा[2]त्तयोर्भेदः स्यात्, अत्राह—**तदेवेति** । 'तत्सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य सच्च त्यच्चाभवत्' (तै. 2-6) इति श्रुतिः भेदं कल्पितमाहेत्यर्थः । (445)

सामान्यज्ञानादित्रयस्य सर्वत्र भ्रमे कारणत्वाभावनिरूपणम्

जगद्भ्रमस्याज्ञानप्रयुक्तत्वेऽपि रजतादिभ्रमस्य सामान्यग्रहणादिप्रयुक्तत्वादननुगमोऽध्यासप्रयोजकस्य, इत्यत आह—**न चेति** । संप्रतिपन्नाज्ञानमात्रकारणे संभवति, न [3]विप्रतिपन्नकारणान्तरं कल्पनीयं गौरवादित्यर्थः । (446)

---

1. **संबन्धासिद्धेरिति** दृशा जडस्य संयोगादिप्रामाणिकसंबन्धस्यासिद्धेरित्यर्थः तथा च दृशि तादात्म्येनाध्यस्तत्वमेवेति भावः ।

2. **तयोः**—अज्ञानमिथ्याज्ञानयोः ।

* **भित्तिम्** —भेदम् ।

3. **विप्रतिपन्नकारणान्तरं**—सामान्यग्रहणादित्रयम् ।

न चापि त्रयसद्भावे मिथ्याज्ञानं जगत्यपि ।
* मोहमात्रप्रयुक्तत्वान्न सामान्यात् स्मृतेश्च तत् ॥ (446)

सामान्यान्तरनिर्मुक्तं तथाऽसाधारणैरपि ।
असामान्यत्वमेवैति शौक्ल्यमन्यानपेक्षतः ॥ (447)

न चेदं स्मरणाज्जातं नापि सामान्यहेतुजम् ।
शुक्लस्य गृह्यमाणत्वात्पुरोदेशावलम्बिनः ॥ (448)

एवं प्रत्यक्ष एतस्मिन् शुक्तिकोदरवर्तिनि ।
तद्विरुद्धमभूत् ज्ञानं रजताभमबोधजम् ॥ (449)

---

[1]अन्वयव्यतिरेकसिद्धत्वान्न कल्पनागौरवम्, इत्यत्राह—**सामान्यान्तरेति** । शौक्ल्यं—पुरोवर्तिशुक्लद्रव्यम् । शुक्तित्वमपेक्ष्य सामान्यान्तरैः—[2]परसामान्यैः सत्त्वद्रव्यत्वजडत्वादिभिः [3]कलधौतभ्रान्तिप्रयोजकैः निर्मुक्तम् । [4]सत्वादीनां [5]बाधकेऽपि प्रतीयमानानां भ्रान्तिहेतुत्वायोगात् यथा, तथा असाधारणैरपि शुक्तित्वत्रिकोणादिभिः प्रतीयमानतया [6]भ्रान्तिप्रयोजकरहितैः निर्मुक्तं प्रतीयते । तस्मात् परसामान्यज्ञानमपरसामान्यज्ञानं वा न भ्रमप्रयोजकं । स्वयमसामान्यत्वमेति—सामान्यरूपं न भवत्येव, व्यक्त्यन्तरानपेक्षत्वेनैव प्रतीतेरित्यर्थः । सादृश्यं न भ्रमप्रयोजकं, विसदृशपीतशङ्खादिभ्रमोपलम्भात् । (447) नापि स्मरणम्, इत्याह —**नचेति** । पुरोवर्तिनो रूप्यतादात्म्यस्यापरोक्षत्वादित्यर्थः । (448) फलितं निगमयति–**एवमिति** । इदमंशावच्छिन्नचैतन्याज्ञाने अनुभवसिद्धे इत्यर्थः । (449)

---

* **तत्**—मिथ्याज्ञानम् ।
1. **अन्वयव्यतिरेकसिद्धत्वादिति** सामान्यग्रहादिकारणतायाः इति शेषः ।
2. **परसामान्यैः**—व्यापकसामान्यधर्मैः ।
3. **भ्रान्तिप्रयोजकैः**—भ्रान्तिप्रयोजकत्वविशिष्टैः ।
4. शुक्लद्रव्यस्य भ्रान्तिप्रयोजकत्वविशिष्टसत्त्वादिशून्यत्वं, तद्गतसत्त्वादौ भ्रान्तिप्रयोजकत्वाभावे पर्यवस्यति । तदुपपादयति—**सत्त्वादीनामिति** ।
5. **बाधकेऽपीति** बाधके प्रत्यये सत्यपीत्यर्थः ।
6. **भ्रान्तिप्रयोजकरहितैः**—भ्रान्तिप्रयोजकत्वशून्यैः ।

अप्रत्यक्षं मतं येषां ज्ञानं तान्प्रति भण्यते ।
इदं रजतमित्येतज्ज्ञानं शुक्तौ कुतोऽन्वभूत् ॥ (450)
विशिष्टाकृतिदेशेहाकालधर्मं प्रतीयते ।
शुक्तिकाऽज्ञानतो नर्ते वस्त्वीदृक् साध्यतेऽन्यतः ॥ (451)
असाधारणधर्मोत्थो न साधारणकारणः ।
रजतं शुक्तिकेत्यादिव्यपदेशोऽप्रसिद्धितः ॥ (452)*

* न चेह राजता धर्माः कुतो ज्ञानं तदाकृति ।
नह्याकारमनालिङ्ग्य ज्ञानमाकारवत् क्वचित् ॥ (453)

अनिर्वचनीयख्यातिदृढीकरणाय ख्यात्यन्तरे अनुपपत्तिनिरूपणम्

अनिर्वचनीयख्यातिं द्रढयितुं ख्यात्यन्तरेऽनुपपत्तिमाह—**अप्रत्यक्षमिति** । प्रत्यक्षमज्ञानं कारणं न विद्यते यस्य तत्, अप्रत्यक्षं—भ्रान्तिज्ञानमित्यर्थः । सामान्याद्वा, रजताद्वा, द्वाभ्यां वेति विकल्पयति—**कुत इति** । (450) आद्यं दूषयति—**विशिष्टेति** । रूप्यत्वसामान्यमाकृतिः । देशः—पुरोवर्तिभूभागः । ईहा—रूप्ययोग्यचेष्टा । कालः—वर्तमानः । धर्मः—त्रिकोणादिः । एतैरुपेतं भ्रान्तौ भातं सत्यरजतसदृशं शुक्त्यज्ञानादन्यतः सामान्यमात्रात् न सिद्ध्यतीत्यज्ञानमेव हेतुरित्यर्थः । (451) असाधारणरूप्यधियः सामान्यं विषयत्वेन हेतुः, अन्यथा वा । नाद्यः, इत्याह—**असाधारणेति** । विशेषाकारेण जनितो मिथ्याप्रत्ययः न साधारणकारणः—सामान्यं विषयतया कारणं न भ[व]ति यस्य स तथा । विशेषज्ञानस्य सामान्यं विषय इति प्रसिद्ध्यभावात् । न हि रजतं शुक्तिका, सर्पो रज्जुरिति वा व्यपदेशोऽस्ति । नापि प्रका[1]रान्तरेण, तत्रापि प्रसिद्ध्यभावादित्यर्थः । (452) रजतात् मिथ्याधीः इति कल्पं

---

1. **प्रकारान्तरेण**—विषयत्वातिरिक्तेन रूपेण । सामान्यस्य असाधारणरूप्यधीहेतुत्वमिति शेषः ।

• 'रजतं शुक्तिकेत्यादिव्यपदेशः' इत्यत्र पूर्वार्धात् नञ अनुषङ्गो बोध्यः ।

* **न चेह राजता धर्मा इति** देशान्तरस्थस्य रूप्यस्य तद्धर्माणां च वलयकारणत्वयोग्यत्वादीनां पुरोदेशे असत्त्वात् न भ्रान्तिज्ञानस्य तदाकारत्वम् । अतः देशान्तरस्थरूप्यस्य न विषयत्वेन भ्रान्तिहेतुत्वं, नापि प्रकारान्तरेण अप्रसिद्धेरित्यर्थः । भ्रान्तिज्ञानं निराकारमेव इत्याशङ्क्याह—**न ह्याकारमिति** । निराकारं ज्ञानमेव न भवतीति भावः ।

शुक्तिकानुविधायित्वान्नेदं स्मर्तव्यसंश्रयम् । *
अनालिङ्गितबाह्यार्था बुद्धावेव स्मृतिर्यतः ॥ (454)

धर्मादिहेतुकं येऽपि परिणामं प्रचक्षते ।
सम्यग्ज्ञानेऽपि तुल्यत्वादनाश्वासस्तथा सति ॥ (455)

भूतकालोपलब्धोऽर्थः स्मृतेश्चेद्गोचरो मतः ।
नासौ भूतात्मनाज्ञायि भूतज्ञानमनाश्रयम् ॥ (456)

स्वोत्पत्तिव्यतिरेकेण ज्ञानकालोऽपि नेष्यते ।
अगत्वरं सद्विज्ञानं भूतार्थं ढौकते कथम् ॥ (457)

दूषयति—**न चेति** । अत एव [1]तृतीयोऽपि निरस्तः । (453) रजतज्ञानस्य स्मृतित्वात् नात्र रजतेन भवितव्यम्, अत्राह—**शुक्तिकेति ।** रूप्यस्येदमात्मना प्रतीतेः न तद्धियः स्मृतित्वमित्यर्थः । स्मृतेरर्थहीनत्वात् रूप्यबुद्धेर्बाह्यालम्बनत्वाच्च न स्मृतिता, इत्याह—**अनालिङ्गितेति** । (454) धर्मादि(निर्मुक्तं)[भिः] शुक्ते रूप्यरूपेण परिणामात् नाज्ञानापेक्षा, तत्राह – **धर्मादीति । परमार्थरूप्यज्ञानेऽपि** किमरूप्यं रूप्यरूपं परिणतं भाति, रूप्यमेव वा इत्यनिश्चयः स्यादित्यर्थः । (455) एवमपि पूर्वावगतगोचरत्वात् स्मृतेः 'अनालिङ्गितबाह्यार्था' इत्ययुक्तम्, इति शङ्कते—**भूतेति** । दूषयति—**नासाविति** । असावर्थो भूततया नाज्ञायि, किन्तु स्वानु[2]भवकाले अयमिति वर्तमानत्वेनैव । तस्मात् भूतत्वस्याननुभूतत्वात् [3]**कथं** स्मरणम् । अतो भूतज्ञानं स्मरणमिति अनाश्रयं—निर्युक्तिकमित्यर्थः । (456) ज्ञानस्य क्षणिकत्वाच्च न भूतार्थविषयत्वम्, इत्याह—**स्वोत्पत्तीति** । उत्पत्तिकाल एव ज्ञा(नां)[नं] गत्वा(त्) कालान्तरस्थमर्थं न स्पृशति, इत्याह—**अगत्वर-मिति** । (457)

---

1. **तृतीयोपि**—सामान्यं रजतश्चेति द्वाभ्यां मिथ्याज्ञानमिति कल्पः ।

* **नेदं स्मर्तव्यसंश्रयमिति** इदं भ्रान्तिज्ञानं न स्मर्यमाणविषयकमित्यर्थः ।

2. **स्वानुभवकाले**—भूतार्थस्य स्मरणप्रयोजकानुभवकाले ।

3. **कथं स्मरणमिति** भूतत्वविशिष्टस्याननुभवात् भूतत्वविशिष्टार्थविषयकं स्मरणं न संभवतीत्यर्थः ।

अविप्लुतार्थविज्ञानो यद्यात्माभ्युपगम्यते ।
सर्वेषां सर्वविज्ञानात् सर्ववित्त्वं भवेद् ध्रुवम् ॥ (458)

आश्रिताश्रयसंबन्धः कार्यकारणयोः स्मृतः ।
वर्तमानात्मगं ज्ञानमतीतार्थं स्पृशेत्कथम् ॥ (459)

* सम्यग्ज्ञानेऽपि चास्त्येतत् त्रयं यद्भवतेरितम् ।
प्रत्यभिज्ञाय तदिदमज्ञातं वस्त्ववैति हि ॥ (460)

तथा सति मृषाज्ञानं सर्वत्रैव प्रसज्यते ।
* मुक्त्वैकं प्रत्यगात्मानं न तत्रास्ति त्रयं यतः । (461)

ज्ञानं नित्यमेव, इत्यत आह—**अविप्लुतेति** । (458) ज्ञानस्य विषयाश्रयत्वात् नात्मनः [1]सर्वज्ञत्वप्रसक्तिः, अत्राह—**आश्रितेति** । विषयस्य जडत्वान्न[2] समवायिकारणत्वमित्यर्थः । किमतः, तत्राह—**वर्तमानेति** । (459) रूप्यधियः अस्मृतित्वेऽपि नाज्ञाननि(व)[र्वि]र्तकत्वं, कारणत्रयजन्यज्ञानत्वस्य [3]भ्रमलक्षणत्वात्, अत्राह—**सम्यगिति** । यत्राज्ञातं ज्ञायते तत्र ज्ञाताज्ञातयोः सामान्यरूपं ज्ञायते, विशेषाग्रहश्च संभाव्यते । सर्वात्मनार्थो ज्ञानेन केनचिन्न हि गृह्यते । स्मृतिश्च तत्रास्ति । अज्ञात एव मया ज्ञायत इति तज्ज्ञानस्य प्रत्यभिज्ञानत्वादिति [4]लक्षणमतिव्यापकमित्यर्थः । (460) उक्तलक्षणं यत्रास्ति (न) तत् मिथ्या[5]ज्ञानमेवेति

---

1. **सर्वज्ञत्वप्रसक्तिः**—सर्वज्ञानाश्रयत्वप्रसक्तिः ।
2. **न समवायिकारणत्वमिति** कार्यकारणयोरेवाश्रयाश्रयिभावात् विषयस्य ज्ञानाश्रयत्वे, ज्ञानसमवायिकारणत्वमावश्यकम् । तच्च न, जडत्वात् । अतः विषयः न ज्ञानाश्रय इति समुदायार्थः ।
3. **भ्रमलक्षणत्वादिति** तदाक्रान्तस्य नाज्ञाननिवर्तकत्वमिति भावः ।
4. **लक्षणमतिव्यापकमिति** कारणत्रयजन्यत्वरूपं भ्रमलक्षणं सम्यग्ज्ञाने अतिव्याप्तमित्यर्थः ।

* "सामान्यादित्रयजन्यं ज्ञानं भ्रान्तिरेव इति वा, सामान्यादित्रयजन्यैव इति वा विवक्षितमिति विकल्प्य आद्यं प्रत्याह—**सम्यगिति** ।" इति **शास्त्रप्रकाशिका** ।

5. **मिथ्याज्ञानमेवेति** आपणस्थरूप्यादिज्ञानमपि मिथ्याज्ञानमेवेत्यर्थः ।

* "ज्ञानमात्रस्य मिथ्यात्वमिष्टमेवेति शून्यवादी मन्यते । तं प्रत्याह—**मुक्त्वेति** । प्रत्यगात्मनः सामान्यविशेषभावनिर्मुक्तत्वात् नित्यापरोक्षत्वाच्च तस्मिन् कारणत्रयस्य निरवकाशत्वात्, इत्याह—**न तत्रेति** ।" इति **शास्त्रप्रकाशिका** ।

यस्मिन्सत्येव यत्कार्यं न भवेदेव चासति ।
* तत् स्वकार्ये स्वतन्त्रत्वादुच्यते कारणं बुधैः ॥ (462)
स्वत आकारवत्किञ्चित् परतश्चापि दृश्यते ।
शुक्तिमृत्स्फटिकाद्येवं ज्ञानं किं नाभ्युपेयते ॥ (463)
* नापि व्यभिचरेत् ज्ञानं यदि स्मर्तव्यपृष्ठगम् ।
साक्षाद्वस्त्वेकनिष्ठत्वात् यथेयं शुक्तिकामतिः ॥ (464)

नातिव्याप्तिः, अत्राह—**तथा सतीति** । एवञ्च जगन्मिथ्यात्वमद्वितीयत्वं च [1]त्वयैव साधितम्, इत्याह—**मुक्त्वेति** । (461) [2]अज्ञाने भ्रमदर्शनात् असति तद्[3]दर्शनात् [4]अज्ञानत्वं भ्रान्तेर्यत्पूर्वमुक्तम्, तन्निगमयति—**यस्मिन्निति** । (462) अज्ञानजमपि ज्ञानं घटवत् स्वत एव आकारवच्चेत्, न विषयाकारं भजेत । विषयाकारेणैवाकारवच्चेत्, विषयाकारस्य ज्ञानेनैवा(वि)[व]रुद्धत्वात् ज्ञानात् बहिर्विषयसद्भावे मानाभावात् क्षण[भङ्ग]वादप्रसङ्गः, अत्राह—**स्वत इति** । यथा शुक्तिः स्वतः आकारवती रजताकारं गृह्णाति, मृदपि स्वत आकारवती घटाद्याकारं भजते, स्फटिकोऽपि स्वत आकारवानेवालक्तकाद्याकारम् । एवं ज्ञानस्य स्वत आकारवतोऽपि विषयाकारभजनोपपत्तेः न क्षणभङ्गवादप्रसङ्ग इत्यर्थः । (463)

सिंहाव[5]लोकनन्यायेन पुनरपि स्मृतेरर्थवत्त्वं दूषयति—**नापीति** । स्मृतिः प्रमाणं स्यादित्यर्थः । (464) स्मृतेरर्थाव्यभिचारेऽपि न मानत्वम्, अनधिगतार्था-

---

1. **त्वयैव साधितमिति** व्यावहारिकपदार्थज्ञानानां भ्रान्तिज्ञानत्वस्य सिद्धान्तिसंमतत्वादिति भावः ।
2. **अज्ञाने इति** सतीति शेषः ।
3. **तद्दर्शनात्**—भ्रमादर्शनात् ।
4. **अज्ञानत्वं**—अज्ञानात्मत्वम् ।

* द्वितीयं भ्रान्तिः सामान्यादित्रयजन्यैव इति कल्पं दूषयति—**यस्मिन्निति** अन्वयव्यतिरेकवतः अज्ञानस्यैव भ्रान्तिकारणत्वमित्याशयः इति **शास्त्रप्रकाशिकाकाराः** ।

5. पूर्वं दूषितस्य स्मृतेरर्थवत्त्वस्य, विषयान्तरसञ्चारानन्तरं पुनः दूषणादाह—**सिंहावलोकनन्यायेनेति** 'नापि व्यभिचरेत् ज्ञानम्' इत्यस्य ज्ञानं, अर्थं न व्यभिचरेदित्यक्षरार्थः । अर्थाव्यभिचारित्वमेव प्रामाण्यमिति, 'प्रामाणं स्यादित्यर्थः' इति विवरणं कृतं बोध्यम् ।

* "तर्हि तस्याः सालम्बनत्वात् घटादिधीवत् याथार्थ्यादभ्रान्तता इत्याशङ्क्याह—

न च प्रत्यक्षविज्ञानात् स्मृतेर्भेदं लभेमहि ।
प्रध्वंसात्तस्य चार्थस्य नातोऽर्थस्पर्शिनी स्मृतिः ॥ (465)

किन्वेतदिति जिज्ञासोर्निषिद्धेऽप्यन्यथाग्रहे ।
तावतो व्यवधानत्वात् बुभुत्सा च न युज्यते ॥ (466)

शुक्तिकेयमिति ह्युक्ते यथार्थं प्रतिपद्यते ।
रजताद्यन्यथाज्ञानप्रतिषेधादृतेऽपि हि ॥ (467)

भावात् संस्कारमात्रजन्यत्वाच्च, अत आह—**न चेति** । स्मर्यमाणे स इत्याकारस्यान[1]वगतत्वात्, आत्मप्रत्यभिज्ञानतत्संस्कारसहकृतमनोजन्यत्वात् स्मृतेः संस्कारमात्रजत्व[म]सिद्धमित्यर्थः । नष्टार्थे स्मृतिदर्शनाच्च न सार्थत्वम्, इत्याह—**प्रध्वंसादिति** । अत इत्यस्य प्रध्वंसादित्यनेन संबन्धः । (465)

मिथ्याज्ञानातिरिक्तस्याज्ञानस्य साधनम्

मिथ्याज्ञानस्य स्मृतीतरत्वात् कारणान्तरानिरूपणात् अज्ञानं कारणमित्युक्तम् । ननु कथमज्ञानं कारणं, मिथ्याज्ञानव्यतिरेकेणाज्ञानाभावात्, अत्राह—**किंन्विति** । आप्तवचनादिना सर्पादिमिथ्याज्ञानापह्नवेऽपि, [2]प्रागधिष्ठानसाक्षात्कारात, किमिदमिति बुभुत्सोः या जिज्ञासा, सा वस्तुव्य[व]धिभूताज्ञानाभावे अनुपपन्ना, मिथ्याज्ञानस्य निरस्तत्वात् । अतोऽनाद्यज्ञानमुपेयमित्यर्थः । (466) अपरोक्षरूप्याद्यध्यासध्वंसमन्तरेणापि आप्तवाक्यादिजन्याधिष्ठानतत्त्वज्ञानादज्ञान-

---

नापीति स्मर्तव्यो रूप्यादिरर्थः, तं विषयीकृत्य सम्यग्रजतधीवत् भ्रान्तिज्ञानं स्थितं चेत्, तर्हि प्रामाण्यं न व्यभिचरेत् अबाधितासंदिग्धापरोक्षवस्तुविषयत्वात् शुक्तिज्ञानवत् । अतो भ्रान्तेरमानत्वात् याथार्थ्यायोगात् कल्पितविषयत्वेन सालम्बनतेत्यर्थः । भ्रान्तेरपि मानत्वाङ्गीकारादमानत्वासिद्धिमाशङ्क्याह—**न चेति** स्मृतिशब्दो भ्रान्तिविषयः । तस्या मानत्वे मानभ्रान्तिभेदासिद्धिरित्यर्थः । इतश्चायथार्था भ्रान्तिरित्याह—**प्रध्वंसादिति** भ्रान्त्यर्थस्य ज्ञानेन नाशात् न सा वस्तु विषयीकरोति । अतस्तस्या युक्तमयथार्थत्वमित्यर्थः ।'' इति **शास्त्रप्रकाशिका** प्रकारान्तरेण वार्त्तिकद्वयं योजयति ।

1. **अनवगतत्वादिति** स्मृतिः प्रमाणं स्यादिति शेषः । स घटः इति स्मृतेः पूर्वानुभवागोचरतत्तांशावगाहित्वात् प्रामाण्यं स्यादिति भावः ।

2. **प्रागधिष्ठानसाक्षात्कारादिति** अधिष्ठानरज्जुतत्त्वसाक्षात्कारोदयात्पूर्वमित्यर्थः ।

नीलोत्पलदलाभं खं सामान्येतरवर्जितम् ।
न पश्येयुस्त्रयासत्त्वात् न हि तच्चाक्षुषं यतः ॥ (468)

दिग्विभागादिमद्व्योम प्राग्यानं च रवौ तथा ।
स्वप्ने नानाप्रपञ्चाढ्यं मिथ्याज्ञानमृते त्रयात् ॥ (469)

यत एवमतो ग्राह्यं शुक्तिकाऽज्ञानमेव तु ।
रजताद्यन्यथाज्ञानकारणं युक्तिगौरवात् ॥ (470)

कर्मज्ञानादिहेतुत्वान्नियमस्य यथा तव ।
सामान्याद्यविशेषेऽपि नियमोऽप्येवमिष्यताम् ॥ (471)

निवृत्तिदर्शनाच्च मिथ्याधीव्यतिरिक्तं तदस्ति, इत्याह—**शुक्तिकेति** । (467) [1]साधिताज्ञानस्यैव मिथ्याज्ञा(ना)[न]हेतुत्वं, (दृष्टिस्ते) सामा[2]न्यादित्रयमन्तरेणापि भ्रमदर्शनात् न [3]तत् कारणम्, इत्याह—**नीलेति** । आकाशस्य सामान्यविशेषनिर्मुक्तत्वात् त्रयस्य मिथ्याधीहेतुत्वे बाला आकाशं कृष्णं न पश्येयुरित्यर्थः । नभसश्चाक्षुषत्वान्न तज्ज्ञानं भ्रान्तिः, अत्राह—**न हीति** । (468) [4]अन्यत्र मिथ्याज्ञानस्य कारणत्रयजन्यत्वनियमात् [5]आकाशनैल्यधीः प्रमैव, इत्यत आह—**दिग्विभागेति** । आदिपदेन छत्राकारादिसंग्रहः । (469) अतो न्यायगौरवा[6]दिदं सिद्धम्, इत्याह—**यत इति** । (470) अज्ञानस्यैव भ्रमहेतुत्वे शुक्तौ रूप्यभ्रम एव, न हस्त्यादिभ्रमः इति नियमो न स्यात्, अत्राह—**कर्मेति** । अदृष्टकृतो [7]ममापि नियम[8] इत्यर्थः । (471) [9]परमतेऽपि भ्रमनियमस्य अदृष्ट-

---

1. **साधिताज्ञानस्यैवेति** निरुक्तयुक्त्येत्यादिः ।
2. **सामान्यादित्रयं**—सामान्यग्रह विशेषाग्रहण स्मृतिरूपं त्रयम् ।
3. **न तत् कारणं**—सामान्यग्रहादित्रयं न भ्रमकारणम् ।
4. **अन्यत्र**—शुक्तिरजतादिभ्रमेषु ।
5. **आकाशनैल्यधीः प्रमैवेति** कारणत्रयाभावादिति शेषः ।
6. **इदं सिद्धम्**—अज्ञानमेव भ्रमकारणमित्येतत् सिद्धम् ।
7. **ममापि**—अज्ञानमात्रस्य भ्रमहेतुत्ववादिनोऽपीति यावत् ।
8. **नियमः**—भ्रमनियमः ।
9. **परमतेऽपि**—सामान्यग्रहादित्रयस्य भ्रमहेतुत्वमतेऽपि ।

भूरिसामान्यविज्ञानात् शौक्ल्यमेव करोति किम् ।
सदप्यन्यदुदास्ते किं स्वाश्रयग्रहणं प्रति ॥ (472)

अनेकार्थाभिसंबन्धात् शौक्ल्यस्य रजते च कः ।
पक्षपातो विना हेतुं, बलाकाज्ञानकृन्न किम् ॥ (473)

स्वाकारमात्रनिष्पत्तेर्नालं कार्यान्तराय हि ।
सामान्यं वा विशेषो वा नातः स्याद्राजती स्मृतिः ॥ (474)

न ह्यसंनिहितं बोद्धुर्वस्तु बुद्धौ करोति हि ।
ज्ञानमाकारवल्लोके सर्वाकारप्रसक्तितः ॥ (475)

पदार्थान्तरसद्भावमपेक्ष्यान्यस्य वस्तुनः ।
यस्य सिद्धिर्मृषा तत्स्यात् रज्जुसर्पद्विचन्द्रवत् ॥ (476)

कृतत्वं साधयति—**भूरीति** । बहु सामान्यं गृह्यते शुक्तिगतम् । तत्र शौ(क्त)-[क्ल्य]मेव रजतभ्रमकारणम् । वस्तुत्वादिसामान्यं स्वाश्रयहस्त्यादिभ्रमकारणं कस्मान्न भवति । तस्मात् धर्मादिकृत एव [1]तवापि नियम इत्यर्थः । (472) शौ(क्त्य)[क्ल्य]स्यैव स्वाश्रयव्यक्तिधीजनने व्यापारात् विनाप्यदृष्टं नियमोपपत्तिः, अत्राह—**अनेकेति** । शौ(क्त्य)[क्ल्य]स्य रजतबलाकादिभिरनेकैरर्थैरभिसंबन्धादि-त्यर्थः । (473) भ्रमस्य त्रयकार्यत्वाभावे हेत्वन्तरमाह—**स्वाकारेति** । सामा-न्यादेः स्वविषयज्ञानमात्रहेतुत्वात् रूप्यादिविशिष्टज्ञानार्थमसामर्थ्यान्न तद्वशात् रूप्य-भ्रान्तिरित्यर्थः । (474) एवमपि देशान्तरादिस्थस्य रूप्यस्य तद्भ्रमहेतुत्वात् नाज्ञानमात्रकार्यत्वसिद्धिः, अत्राह—**न हीति** । विप्रकृष्टस्यापरोक्षत्वे [2]दुष्टाक्षस्य सर्वज्ञत्वप्रसङ्ग इत्यर्थः । (475)

सापेक्षस्य जगतः कल्पितत्वम्

रूप्यं शुक्त्यज्ञानविलसितमिति दृष्टान्तं प्रसाध्य, जगदपि सापेक्षत्वात् कल्पितम्, इत्याह—**पदार्थेति** । (476) सापेक्षत्वहेतुं साधयति—**प्रमाता-**

---

1. **तवापि नियमः**—त्रयहेतुत्ववादिनोऽपि भ्रमनियमः ।
2. **दुष्टाक्षस्य**—दुष्टेन्द्रियवतः पुरुषस्य । एतेन भ्रमसामग्री प्रदर्शिता ।

प्रमात्रादीह यत्किञ्चित्प्रत्यगज्ञानहेतुजम् ।
अन्योन्यापेक्षसिद्धित्वात् मिथ्या तदपि पूर्ववत् ॥ (477)

आत्मन्यध्यासरूपोऽयं संसारः प्रतिपादितः ।
अध्यासश्च विना हेतुं न लोक उपपद्यते ॥ (478)

तस्माद्धेतूपदेशाय यः कारणमितीर्यते ।
यस्मिन्नविद्ययेत्येवं ननु कारणमीरितम् ॥ (479)

प्रधानवादमाशङ्क्य यस्माद्भूयोऽपि भण्यते ।
अज्ञात आत्मा जगतः कारणं न गुणत्रयम् ॥ (480)

श्रुतितो युक्तितश्चापि स्वयमेव प्रवक्ष्यति ।
उदर्के इममेवार्थं नातोऽन्यत्कारणं ततः ॥ (481)

दीति । इह—लोके, यत्किञ्चित्—प्रमात्रादि, अन्योन्यापेक्षसिद्धित्वात् प्रत्यगज्ञानजं, तदपि [1]पूर्वोक्तदृष्टान्तवन्मिथ्या इत्यन्वयः । (477)

'यः कारणं सर्वस्य जगतः' इति भाष्यावतारः

शुक्त्यज्ञानात् रूप्याध्यासवत् प्रत्यगज्ञानात् तत्रानात्माध्यासं प्रसाध्य, वृत्तसंकीर्तनपूर्वकं [2]भाष्यान्तरमवतारयति—**आत्मनीति** । [3]पुनरुक्तिं चोदयति—**यस्मिन्निति** । (478-479) निवर्त्यमतभेदान्न पुनरुक्तिः, इति परिहरति—**प्रधानेति** । निमित्तोपादानयोर्भेदपक्षप्रतिक्षेपाय [4]उक्तमेव पुन(रुक्ति)र्भण्यते यस्मादित्यर्थः । प्रधानवादनिराकरणहेतुमाह—**अज्ञात इति** । जडस्य नियतकालप्रवृत्त्यनुपपत्त्यादिका युक्तिः । उदर्के—**मधुब्राह्मणादौ** । (480-481)

---

1. **पूर्वोक्तदृष्टान्तवत्** शुक्तिरूप्यवत् ।
2. **भाष्यान्तरमिति** 'यः कारणं सर्वस्य जगतः' इति भाष्यवाक्यमित्यर्थः ।
3. **पुनरुक्तिमिति** 'यस्मिन्नविद्यया स्वाभाविक्या कर्तृक्रियाफलाध्यारोपणा कृता' इति भाष्यवाक्येन 'यः कारणं सर्वस्य जगतः' इति भाष्यवाक्यस्य पौनरुक्त्यमित्यर्थः ।
4. **उक्तमेवेति** कारणमिति शेषः ।

यदात्मके नामरूपे इत्यज्ञानात्मता तयोः ।
भण्यतेऽतोऽप्रमाणत्वं शुक्तिकारजतादिवत् ॥ (482)

न कारणातिवर्त्यस्ति कार्यं जगति कुत्रचित् ।
स्वकारणाविशिष्टत्वे सलिलादिति हेतुगीः ॥ (483)

वस्तुवृत्तं न पर्याप्तं तदज्ञानापनुत्तये ।
अनुपात्तप्रमाणं सदित्यर्थप्रतिपत्तये ॥ (484)

स्वतो बुद्धमिदं यस्मादतः शुद्धमसद्द्वयम् ।
द्वितीयसंगतिर्यस्माल्लोकेऽशुद्धेः प्रयोजिका ॥ (485)

यथोक्ततत्त्वे नाविद्यामृते स्यात् द्वयसंगतिः ।
अतोऽशुद्धिनिषेधोक्तिस्तदविद्यानिषेधतः ॥ (486)

'यदात्मके नामरूपे' इत्यादिभाष्यतात्पर्यवर्णनम्

[1] 'यदात्मके' इत्यादिभाष्यतात्पर्यमाह—**यदात्मके इति** । अविद्यात्मफलमाह—**अत इति** । अप्रमाणत्वं—प्रमाणहीनत्वम्, बाध्यत्वमित्यर्थः । (482) 'सलिलादिव' इत्यादिभाष्यतात्पर्यमाह—**नेति** । **हेतुगीरिति** । यथा फेनतरङ्गादि सलिलोत्थं सलिलमात्रम्, एवमज्ञातब्रह्मोत्थं जगत् तावन्मात्रमित्युदाहरणोक्तिरित्यर्थः । (483)

'यश्च नित्यशुद्धबुद्धमुक्तः' इत्यादिभाष्यतात्पर्यमाह—**वस्त्विति** । [2]बुद्धरूपमपि तद्वस्तु वाक्योत्थबुद्धिवृत्त्यारूढमेवाविद्यानिवर्तकं(त्वं) न [3]केवलमविद्याध्वस्तये समर्थम्, इत्येतत्प्रतिपत्तये [4]तद्भाष्यमित्यर्थः । (484) बोधैकरसत्वं शुद्धत्वे हेतुः, इत्याह—**स्वत इति** । (485) द्वितीयतत्संबन्धशून्यत्वं शुद्धत्वमित्ययुक्तम् । द्वैततत्संबन्धयोः प्रत्यक्षादिसिद्धयोः परमार्थत्वात्, अत्राह—

---

1. **यदात्मके इति** 'यदात्मके नामरूपे सलिलादिव स्वच्छात् मलमिव फेनमव्याकृते व्याक्रियेते ।' इति भाष्यवाक्यमनुसन्धेयम् ।
2. **बुद्धरूपमपि**—बोधैकरसमपि ।
3. **केवलं**—वाक्योत्थबुद्धिवृत्त्यनुपारूढमिति यावत् ।
4. **तत् भाष्यं**—'यश्च ताभ्यां नामरूपाभ्यां विलक्षणः स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः' इति भाष्यवाक्यम् ।

ईश्वराव्याकृतप्राणविराड्भूतेन्द्रियादिकम् ।
नाविद्योपाश्रयं मुक्त्वा संभाव्यं प्रत्यगात्मनि ॥ (487)

प्रत्यग्याथात्म्यदृष्ट्या तन्निपुणोऽपि न वीक्षते ।
न च प्रत्यग्धियं मुक्त्वा पराग्बुद्धिर्मितिर्भवेत् ॥ (488)

पराञ्चि खानीत्येतच्च साटोपमभिधीयते ।
प्रत्यग्ज्ञानैकमेयत्वं वेदान्तेष्वात्मवस्तुनः ॥ (489)

इतो विरुद्धमानत्वं स्वतोऽपास्तद्वयात्मनः ।
शक्यं वैश्वानरवरात् प्रवक्तुं न तु मानतः ॥ (490)

नित्यशुद्धश्च बुद्धश्च यस्मादात्मा परः स्वतः ।
मुक्तश्चातोऽवसेयोऽसौ सद्वेदान्तोक्तिमानिना ॥ (491)

यथोक्तेति । (486) [1]अष्टावस्थानां परमार्थत्वात् कथं द्वैतमिथ्यात्वम्, अत्राह—**ईश्वरेति** । जगन्मूलमव्याकृतम् । जगतोऽन्तः स्थित्वा नियन्ता ईश्वरः । आदिशब्दात् शरीरविषयसंग्रहः । (487) समाधिकाले अनुपलभ्यमानत्वादिति हेतुमाह—**प्रत्यगिति** । पराग्दृष्ट्यैव दृश्यत्वादस्ति प्रपञ्चः, अत्राह—**न चेति** । (488) पराग्दृष्टे[2]र्मिथ्यात्वे तद्गम्यत्वादात्मनोऽपि मिथ्यात्वं, तस्मा[दा]ह—**पराञ्चीति** । (489) पराग्ज्ञानगम्यत्वं प्रतीचो **भर्तृप्रपञ्चैरुक्तम्**, अत्राह—**इत इति** । प्रत्यग्रूपात् विरुद्धमानत्वं—पराग्दृष्टिगम्यत्वं, **भर्तृप्रपञ्चैः** वैश्वानरोपासकैः वैश्वानरप्रसादादेव वक्तुं शक्यमित्यर्थः । (490) नित्यत्वादिकं मुक्त[त्व]हेतुरिति, **भाष्यार्थमाह—नित्येति** । 'न लिप्यते लोकदुःखेन बाह्यः' (का. 2-2-11)

---

1. **अष्टावस्थानामिति** अष्टावस्थं जगत् पारमार्थिकमिति केचित् (भर्तृप्रपञ्चाः) मन्यन्ते । अष्टावस्थाश्च यथा, जगन्मूलमव्याकृतं, जगन्नियन्ता अन्तर्यामी ईश्वरः, प्राणः, विराट्, भूतानि, इन्द्रियाणि, शरीरं, विषयाश्चेति बोध्यम् ।

"**ईश्वरेति** अन्तर्यामिसाक्षिणावीश्वरशब्दितौ । भूतशब्देन भवनयोग्या व्यक्तयो गृह्यन्ते । इन्द्रियशब्देन देवतोच्यते । आदिशब्देन जातिरुक्ता ।" इति **शास्त्रप्रकाशिकालोचने** अन्तार्यामी, साक्षी, अव्याकृतं, प्राणः, विराट्, देवता, व्यक्तिः, जातिः इत्यष्टावस्थाः प्रतीयन्ते इति बोध्यम् ।

2. **मिथ्यात्वे**—मिथ्याज्ञानत्वे ।

एवंभूतोऽप्यसंबुद्धस्वात्मतत्त्वो महेश्वरः ।
आपेदे कारणात्मत्वं नामरूपादिसर्जने ॥ 492

स एष इत्यनेनापि सुविरुद्धात्मतां ब्रुवन् ।
विरुद्धवस्तुसंसृष्टिं ब्रूतेऽज्ञानैककारणम् ॥ (493)

व्याकुर्वन्निति वाक्येन स्वतो ज्ञोऽपि तमोऽन्वयात् ।
ब्रह्मादिस्तम्बपर्यन्तं कार्यं प्राविशदुच्यते ॥ (494)

स्वानुभूत्यनुरोधेन योऽज्ञातार्थः पुरोदितः ।
प्रकृतार्थावलेहित्वात् सर्वनाम्ना स उच्यते ॥ (495)

परामृश्य स इत्येवमव्याकृतसतत्त्वकम् ।
तथारूपः स्वकार्यस्थः प्रात्यक्ष्यादेष उच्यते ॥ (496)

इत्यादि[1]वाक्यमानिनेत्यर्थः । (491) एवंविधस्य कारणत्वानुपपत्तिः, अत्राह—**एवंभूतोऽपीति** । (492)

प्रवेशवाक्यार्थनिरूपणम्

नामरूपसृष्टेः कल्पितत्वे हेतुमाह—**स इति** । 'स एष इह प्रविष्टः' इत्यत्र स इति परः असंसारी परामृश्यते । एष इति संसारी जीवः । तयोः सामानाधिकरण्येनैकत्वं ब्रुवन् वेदो द्वैतस्य कल्पितत्वं दर्शयति । [2]अन्यथा तयोरेकत्वायोगादित्यर्थः । (493) 'अव्याकृते आत्मभूते नामरूपे व्याकुर्वन्' इत्यादिभाष्यतात्पर्यमाह—**व्याकुर्वन्निति** । (494) [3]प्रवेशवाक्यस्थ[स] शब्दार्थमाह—**स्वानुभूतीति** । 'तद्धेदम्' इत्यत्रोक्ताज्ञा(न)[त] प्रतीचः सशब्देन परामर्शे हेतुमाह—**प्रकृतेति** । (495) परो[4](क्ष्य)[क्ष]स्यापरोक्ष [5][त्व]मे(शे)षशब्देन

---

1. **वाक्यमानिनेति** वाक्यं मानत्वेन स्वीकुर्वता वादिनेति यावत् ।
2. **अन्यथा**—द्वैतस्याकल्पितत्वे ।
3. **प्रवेशवाक्यं**—'स एष इह प्रविष्टः' इति श्रुतिवाक्यम् ।
4. **परोक्षस्येति** सशब्देनोक्तस्येत्यादिः ।
5. **अपरोक्षत्वमेषशब्देनेति**—
'इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥' इत्यभियुक्तोक्तेरिति भावः ।

विरुद्धरूपयोरेवं निर्द्वयद्वयरूपतः ।
* स एष इति निर्देशः कथं स्यात्कृष्णसर्पवत् ॥ (497)

* कारणान्नान्यतः कार्यं तथा कार्याच्च कारणम् ।
इत्युक्तन्यायहेतुत्वात् न विरोधोऽत्र कश्चन ॥ (498)

अज्ञातवस्तुतत्त्वस्य दुष्करं नास्ति किञ्चन ।
नीलीकृतं नभः पश्येच्चक्षुषा नीलवस्त्रवत् ॥ (499)

योग्यायोग्यव्यपेक्षेयं मानव्यवहृतौ भवेत् ।
कल्पनामात्रनिष्पत्तेर्नापेक्षाऽज्ञानभूमिषु ॥ (500)

इत्युक्तप्रतिपत्त्यर्थं हेतुरेषोऽभिधीयते ।
प्रविष्ट इत्यनेनात्र स्वाभासैकतमोऽन्वयात् ॥ (501)

कथमुच्यते, तत्राह—परामृश्येति । स एवाज्ञातः परः बुद्धिस्थ एष उच्यते इत्यर्थः । (496) सामानाधिकरण्येनोक्तमेकत्वमाक्षिपति—विरुद्धेति । कृष्णसर्पवदिति । कृष्णसर्पः इति गुणगुणिनोर्यथैक्यमिति व्यतिरेकदृष्टान्तः । (497) कार्यकारणयोर्मिथः सापेक्षत्वेन कल्पितत्वान्न विरोधः, इति परिहरति—कारणादिति । बुद्धिस्थकार्यस्य ब्रह्म कारणम् । अतो न विरोध इत्यर्थः । (498) संसारित्वासंसारित्वेन विरोधस्तथापि दुष्परिहर एव, इत्यत्राह—अज्ञातेति । (499) अज्ञा[ना]धीनेऽपि भ्रमे कथं चक्षुरयोग्यस्य नभसः चक्षुषा दर्शनम्, अत आह—योग्येति । (500) प्रविष्ट[1]पदार्थमाह—इत्युक्तेति । स [2]एष शब्द(:) सामानाधिकरण्यप्रतिपादितैक्यप्रतिपत्त्यर्थमिति यावत् । अविकारस्य कथं प्रवेशः, अत्राह—स्वाभासेति । चैतन्यप्रतिबिम्बस्याज्ञानसंबन्धात् प्रवेश इत्यर्थः । (501)

---

* "न हि चैत्रस्य कृष्णसर्पेणैक्यव्यपदेशो युक्तः तथा परेण जीवस्याशक्यमैक्यं वक्तुं विरोधाविशेषात्, इत्याह—कृष्णेति । " इति शास्त्रप्रकाशिका ।

* कारणान्नान्यतः कार्यमिति कार्यं कारणादन्यन्नेत्यर्थः ।

1. प्रविष्टपदार्थम्—प्रविष्टपदस्यार्थम् ।

2. स एष शब्देत्यादि सः एषः इति शब्दयोः यत्, भिन्नप्रवृत्तिनिमित्तकानामेकार्थबोधकत्वलक्षणं सामानाधिकरण्यं, तेन गम्यं यत् प्रत्यग्ब्रह्मैक्यं, तत्प्रतिपत्त्यर्थमित्यर्थः ।

ब्रह्मादावित्यनेनापि जनिमत्सर्वमुच्यते ।
कृत्स्नसंसारधर्मार्थं देहेष्विति च भण्यते ॥ (502)

ब्रह्मादिस्तम्बपर्यन्तं देहेष्विति तथोच्यते ।
क्रियाफलाभिसंबन्धो देहेष्वेवेति नात्मनि ॥ (503)

* प्रत्यङ्मोहमरुद्बुद्धिचक्षुर्देहादिरूपिणाम् ।
प्रविष्टवचसैकात्म्यं गुणप्राधान्यमुच्यते ॥ (504)

न ढौकते पराचीनं प्रत्यक्त्वासङ्गतः परः ।
नेहाज्ञानमनादाय ह्यात्मानात्मानमीक्षते ॥ (505)

इहशब्दार्थं प्रकटयन् 'ब्रह्मादिस्तम्बपर्यन्तेषु' इत्यस्यार्थमाह—**ब्रह्मादाविति** । (520) [1]**भाष्यस्यावयवार्थमुक्त्वा** तात्पर्यमाह—**ब्रह्मादीति** । देहेष्वेव क्रियासंबन्धो नात्मनीति, 'ब्रह्मादिस्तम्बपर्यन्तेषु' इति भाष्ये कर्मफलेत्यादि उच्यते इत्यन्वयः । (503) इदानीं प्रविष्टशब्दस्यार्था[2]न्तरमाह—**प्रत्यगिति** । प्रत्यङ्मोहः-प्रत्यगविद्या । मरुत्–प्राणः । बुद्धिः–अन्तःकरणम् । चक्षुश्शब्देनेन्द्रियाणि सर्वाणि गृह्यन्ते । दे(हं)[हः]स्थूलशरीरम् । आदिशब्देन कर्मादिसंग्रहः । एतत् सर्वं रूपं येषां ते प्रत्यङ्मोहमरुद्बुद्धिचक्षुर्देहादिरूपिणः क्षेत्रज्ञाः । तेषां, प्रविष्टवचसा ब्रह्मणैकत्वमुच्यते । तत्रैक्यं शुक्तिरजतयोरिव गुणप्राधान्यरूपम् । अतः उपहितं सर्वं उपाधिहीनेऽध्यस्तत्वात् तन्मात्रमित्यर्थः । (504) चैतन्यस्योपाधिसंबन्धे असङ्गत्वविरोधः, अत्राह—**न ढौकत इति** । सर्वस्य प्रत्यक्त्वेन वास्तवभेदाभावात् न वास्तवः संबन्ध इत्यर्थः । परागर्थसंबन्धाभावे कथं साक्षित्वम्,

---

1. "ब्रह्मादिस्तम्बपर्यन्तेषु देहेष्विह कर्मफलाश्रयेषु अशनायादिमत्सु प्रविष्टः ।" इति भाष्यवाक्यमनुसन्धेयम् ।

2. अर्थान्तरमिति ऐक्यरूपमित्यादिः ।

* "प्रत्यङ्ङिति प्रत्यङ्मोहः परस्योपाधिः । मरुत् प्राणः सूत्रोपाधिः । बुद्धिः अन्तःकरणं हिरण्यगर्भोपाधिः । चक्षुःशब्देन सर्वाणीन्द्रियाणि लक्ष्यन्ते । स्थूलो देहः । स च सर्वो विराडुपाधिः । आदिशब्देन अस्मदादीनामुपाधयो व्यष्टयः कर्मादि चोच्यते । एतद्रूपिणामुपहितानामीशादीनां सर्वोपाधिविधुरेण ब्रह्मणैक्यं प्रविष्टशब्दार्थः ।" **इति शास्त्रप्रकाशिका** ।

स्थाण्वज्ञानमनादाय न चोरादीक्षणं यथा ।
आत्माज्ञानमनादाय तद्वन्नानात्मवीक्षणम् ॥ (506)

येनान्वितोऽयं संसारी सुषुप्ते कर्मणः क्षयात् ।
तत्स्वाभाव्यावशेषः स्यात् तत्कार्यत्वाद्घटादिवत् ॥ (507)

स्वात्माभासप्रवेशो यः प्रत्यङ्मोहनिबन्धनः ।
तज्जेष्वपि स एव स्यात् मरुद्बुद्ध्यादिरूपिषु ॥ (508)

* पयोऽम्भोवत्सूत्ररूपं क्रियाविज्ञानशक्तिमत् ।
कर्तृस्थभावकं स्थास्नु चलं कर्मस्थभावकम् ॥ (509)

अत्राह—नेहेति । (505) जगत्साक्षित्वस्याज्ञानकार्यत्वे दृष्टान्तमाह—[स्थाण्वि]ति । (506)

प्रत्यग्ब्रह्मणोरेकत्वं प्रविष्टशब्देनोच्यते इत्युक्तम् । तत्र युक्तिमाह—येनेति । स्वापे व्यक्तभोगहेतुकर्माभावात् येन ब्रह्मणा, अन्वितः—तदात्मतामापन्नः तत्स्वाभाव्यं–कार्यकारणविलक्षणं, तदवशेषः स्यात्–तन्मात्रो भवेदयं जीवः, तस्मिन्नध्यस्तत्वात् । यथा घटो मृद्विकारस्तन्मात्रः, तद्वदित्यर्थः । (507) प्रत्यग्ब्रह्मणोरैक्यं प्रविष्टपदार्थः इत्ययुक्तमुक्तम्, अप्राप्तिपूर्वप्राप्तेः प्रवेशत्वात्, अत्राह—स्वात्मेति । प्रत्यगज्ञाने यः प्रत्यगाभासाख्यप्रवेशः स एव [1]तत्कार्येष्वपि प्रवेश उच्यते । [2]प्रवेशान्तरस्य असङ्गाविक्रिये असंभवादित्यर्थः । (508)

सूत्रादीनां स्वरूपवर्णनम्

'मरुद्बुद्ध्यादिरूपिषु' इत्युक्तप्रवेशाश्रयाणां सूत्रादीनां तत्त्वमाह—पयोऽम्भोवदिति । क्रियाप्रधानज्ञानोपसर्जनशक्तियुक्तं सूत्रमित्यर्थः । [3]कुतस्तद्भवति, इत्यत आह – कर्तृस्थेति । कर्तृरूपेण स्थितं भावकं, भाव एव भावकम्, कर्तृस्थभावकं सूत्रकारणमज्ञातं ब्रह्म, स्थास्नु—नित्यम् । कर्मरूपेण स्थितं कर्म-

---

1. तत्कार्येष्वपि—प्रत्यगज्ञानकार्येष्वपि ।
2. प्रवेशान्तरस्य—अप्राप्तिपूर्वकप्राप्तेः ।
* पयोऽम्भोवदिति व्यतिकीर्णक्षीरनीरवदित्यर्थः ।
3. तत् भवति—सूत्रं जायते ।

बुद्ध्यात्मनोऽभिनिर्वृत्तिर्व्यवसायात्मनस्ततः ।
हिरण्यगर्भं यं प्राहुरुपादानं जगद्धियाम् ॥ (510)

वैराजं स्थानमासाद्य क्ष्मादिदेशविभागवान् ।
देवताकरणो देव एष एवोच्यते विराट् ॥ (511)

तथा च मन्त्रवर्णोऽत्र ह्यग्निर्मूर्धेति दृश्यते ।
तदुपादानमात्राः स्युर्देवताः स्वाभिमानजाः ॥ (512)

आधिभौतिकभूतानां तथैवाध्यात्मरूपिणाम् ।
पूर्वोक्तानां परिच्छेदो ह्यविद्याकामकर्मभिः ॥ (513)

सूत्रादिस्थाणुपर्यन्तं जगत्सृष्ट्वाऽऽत्ममायया ।
स्वाभासैकसहायात्मा तदेव प्राविशद्धरिः ॥ (514)

स्थभावकं सूत्रं चलं—अनित्यम्, कर्तृस्थभावकाद्भवतीत्यर्थः । (509) हिरण्यगर्भो न जन्मवान् स्थूलोपाधिहीनचैतन्यत्वात् ब्रह्मवत्, इत्याशङ्क्य, 'हिरण्यगर्भं पश्यत जायमानम्' (महाना. 8-12) इत्यादिवचनविरोधमाह—**बुद्ध्यात्मन इति** । तमेव विशिनष्टि—**व्यवसायात्मन इति** । ततः—अज्ञातप्रत्यगात्मन इत्यर्थः । [1]कार्यलिङ्गानुमानं ध्वनयति—**उपादानमिति** । (510) सूत्रात्मना स्थितः परमात्मा विराजं सृजति, इत्याह—**वैराजमिति** । सूत्रात्मना स्थितः परमात्मा पृथिव्यादिपञ्चकादेशविभागवान् वैराजं—स्थूलप्रपञ्चात्मकं स्थानं गत्वा विराडुच्यते । स च अग्निसूर्यादि(का)[क]रणवानित्यर्थः । (511) तत्र[2] प्रमाणमाह—**तथा चेति** । इन्द्रोऽहं वरुणोऽहमित्यभिज्ञानरूपेण स्थितदेवता विराजो विकाराः, इत्याह—**तदुपादानेति** । (512) प्रवेशाधाराणामेवंरूपत्वेऽपि प्रविष्टचैतन्यस्यैकत्वे कथं क्षेत्रज्ञभेदः, अत्राह—**आधिभौतिकेति** । **पूर्वोक्तानां** 'प्रत्यब्धोहमरुद्बु(द्धिरि)[द्धी]' इत्यादावुक्तानामित्यर्थः । (513) प्रवेशवाक्यार्थमुपसंहरति—**सूत्रादीति** । स्वस्याभासः—प्रतिबिम्बं यस्मिन्नज्ञाने तत् स्वाभासं, तदेकं सहकारि यस्य आत्मनः, सः स्वाभासैकसहायात्मा इति विग्रहः । (514)

---

1. **कार्यलिङ्गानुमानमिति** सूत्रात्मनीत्यादिः ।
2. **तत्र प्रमाणं**—स्थूलोपाधिके विराजि प्रमाणम् ।

ननु व्याक्रियतेत्युक्तं स्वयमेव जगत्पुरा ।
*कर्मकर्त्रुक्तितोऽकस्मात् कथं कर्ताऽभिधीयते ॥ (515)

परात्मनः प्रवेशोऽपि न्याय्यं संगच्छते न च ।
नेहासौ प्रकृतो यस्मादतो नासौ प्रवेशभाक् ॥ (516)

नैष दोषः परस्यापि ह्यव्यक्तजगदात्मना ।
विवक्षितत्वादाक्षिप्तनियन्त्राद्यभिधीयते ॥ (517)

इदंशब्दाभिधानेन ह्येकाधिकरणश्रवात् ।
अव्याकृतपदस्यातो यथोक्तोऽर्थोऽत्र युज्यते ॥ (518)

इदं जगन्नियन्त्रादिविभिन्नानेकरूपवत् ।
यथाऽधुना निश्चिनुमः प्रागप्येतदभूत्तथा ॥ (519)

स्रष्टुः प्रविष्टत्वे पूर्वापरविरोधशङ्का, तत्परिहारश्च

स्रष्टुः प्रविष्टत्वे पूर्वापरविरोधं चोदयति—**नन्विति** । पुरा—'तन्नामरूपाभ्याम्' इत्यत्रेत्यर्थः । न केवलं स्रष्टुरभावादप्रवेशः, किन्तु परस्याप्रकृतत्वाच्च 'सः' इति परामर्शानुपपत्तिः, इत्याह—**अकस्मादिति** । (515) अप्रकृतत्वं प्रकटयति—**परात्मन इति** । (516) परस्य प्रकृतत्वं दर्शयन् पूर्वापरविरोधं परिहरति—**नैष इति** । [1]व्याकृतेः अन्तरेण नियन्तारमनुपपत्तेः, कर्मकर्तरि लकारस्य [2]सौकर्यमात्रापेक्षत्वात् नियन्त्रादियुक्तं जगत् अव्याकृतशब्देनोच्यते इत्यर्थः । (517) [3]कुत एतत्, अत्राह—**इदंशब्देति** । अतःशब्दस्य पञ्चम्यन्तेनान्वयः । (518) इदंशब्दसामानाधिकरण्यं कथमव्याकृतजगतः नियन्त्रादियुक्तत्वगमकम्, अत्राह—**इदमिति** । (519) उत्पत्तेः प्राक् नाशादूर्ध्वं च

---

* "व्याक्रियत इति कर्मकर्तरि लकारदर्शनात् जगतः स्वयमेव व्याक्रिया इत्येवं सति स्रष्टुरभावान्न तस्य प्रवेष्टृत्वमित्याह—**अकस्मादिति**" इति **शास्त्रप्रकाशिका**।

1. **व्याकृतेः**—नामरूपव्याकरणस्य ।
2. **सौकर्यमात्रापेक्षत्वात्**—सुकरत्वमात्रापेक्षत्वात् ।
3. **कुत एतदिति** नियन्त्रादियुक्तजगतः अव्याकृतशब्दार्थत्व

नामरूपाद्यभिव्यक्तेः प्रागव्यक्तापह्नवेऽप्यभूत् ।
अव्यक्ताध्यक्ष एकाकी व्यक्तं यत्साक्षिकं जगत् ॥ (520)

जगज्जन्मस्थितिध्वंसनृत्तसाक्ष्यतिरेकतः ।
* शिष्टस्येह प्रवेश्यत्वात्पर एवाविशेदतः ॥ (521)

विवक्षातश्च शब्दानां प्रयोगो जगतीक्ष्यते ।
यथा ग्रामादिशब्दानां तथेहाप्यवसीयताम् ॥ (522)

निवासश्च निवासी च तथाचोभयमुच्यते ।
ग्रामशब्देन लोकेऽस्मिन् तथेहापि जगद्गिरा ॥ (523)

क्वचिदात्मैव निर्देश्योऽनात्मैव क्वचिदुच्यते ।
तथोभयविवक्षापि व्याकृताव्याकृतोक्तितः ॥ (524)

यत्र नाशादिमद्वस्तु प्राधान्येन विवक्ष्यते ।
तत्रानात्मैव वाच्योऽर्थः प्रत्यगात्मोपसर्जनः ॥ (525)

जगत् चेतनसाक्षिकं जडत्वात् वर्तमानप्रपञ्चवत्, इत्याह—(मान)[ना]मेति । (520) परस्यैव प्रवेशे हेत्वन्तरमाह—जगदिति । (521) अव्याकृतवाक्ये परस्य न प्रकृतत्वं, एकस्याव्याकृतशब्दस्यानेकार्थत्वायोगात्, अत्राह—विवक्षातश्चेति । आदिपदेन नगरादिसंग्रहः । (522) दृष्टान्तं स्पष्टयति—निवासश्चेति । [1]शून्यो ग्रामः, गतो ग्रामः, ग्रामं(नि) [न]विशेदित्यादावित्यर्थः । (523)[2]दार्ष्टान्तिकं विशदयति—क्वचिदिति । (524) कुत्र कस्य ग्रहणम्, अत्राह—यत्रेति । जगत् उत्पत्तिनाशादिमत् इत्यादिप्रयोगे अनात्मैव जगच्छब्देनोच्यते इत्यर्थः । (525) क्व तर्हि आत्मनः प्राधान्येनोपादानम्, अत्राह—अस्थूल इति । जगत् अविकारि ब्रह्मैव इति प्रयोगे पर एव तच्छब्दवाच्य

---

* शिष्टस्येह प्रवेश्यत्वादिति साक्षिभिन्नस्यावशिष्टस्य सर्वस्यापि प्रवेश्यविषयत्वात् प्रवेष्टा पर एवेत्यर्थः ।

1. शून्यो ग्रामः इत्यत्र ग्रामशब्दः निवासपरः । गतो ग्रामः इत्यत्र निवासिजनपरः । ग्रामं न विशेदित्यत्र निवास, निवासिजनोभयपरः इति विवेकः ।

2. दार्ष्टान्तिकं—जगत्पदस्य अनेकार्थत्वम् ।

* अस्थूलोऽजोऽजरः शुद्धो यत्र चाप्यभिधीयते ।
प्रत्यगात्मविवक्षैव तत्र ज्ञेयाभिधानतः ॥ (526)

अव्यक्तं व्याकृतं विश्वं यत्र चाप्यभिधीयते ।
आत्मानात्मद्वयार्थैव विवक्षा तत्र गम्यते ॥ (527)

यन्मदन्यदिति चोक्तेः परस्य प्रकृतत्वतः ।
सशब्देन परामर्शः परस्येह भवेदतः ॥ (528)

अव्यावृत्ताननुगतयाथात्म्यादात्मवस्तुनः ।
ननु प्रवेशस्तस्येह कथं श्रुत्योपदिश्यते ॥ (529)

अप्रविष्टं यतो वेश्म परिच्छिन्नेन शक्यते ।
प्रवेष्टुं पुरुषेणैवं न खेनैतद्विधर्मतः ॥ (530)

इत्यर्थः । (526) कुत्र उभयविवक्षया जगच्छब्दप्रयोगः इत्याशङ्क्य, 'तद्धेदम्' इत्यादौ, इत्याह—**अव्यक्तमिति** । (527) अव्याकृतवाक्ये परस्य प्रकृतत्वात् सः इति परामर्शोपपत्तिरित्युक्तम् । इदानीं तत्र प्रकृतत्वाभावेऽपि, ततः प्रागेव 'यन्मदन्यत्' (बृ. 3-4-2) इत्यत्र तस्य प्रकृतत्वात् परामर्शोपपत्तिः, इत्याह—**यदिति** । (528)

प्रवेशविचारः

परस्य प्रवेशायोगात् ततोऽन्यो जीवः प्रविष्टः इति पूर्वपक्षः

व्यावृत्तः—विशेषः । अनुगतं—सामान्यम् । तदुभयविलक्षणत्वात् परस्य प्रवेशानुपपत्तिः, इति चोदयति—**अव्यावृत्तेति** । इह—बुद्ध्यादावित्यर्थः । (529) अनुपपत्तिं प्रथयति—**अप्रविष्टमिति** । खेन—आकाशेन । प्रवेष्टुं न शक्यं तेन सदा प्रविष्टत्वादित्यर्थः । (530)

---

* "**अस्थूल इति** यत्र निषेध्यत्वेन स्थूलादि जगत् कथ्यते, तत्र प्रत्यगात्मैव निषेध्यार्पणद्वारा तच्छब्देन विवक्ष्यते, निषेधमात्रे तदपर्यवसानस्य वक्ष्यमाणत्वादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

सर्वगानामपि यथा भूतानां परिणामतः ।
सर्पादीनां प्रवेशः स्यादुपलादौ मतं यदि ॥ (531)

युतसिद्धनिवृत्त्यर्थं सहजोक्त्याभिधीयते ।
अश्मनः परिणामत्वात्सर्पादेः परिपाकतः ॥ (532)

दृश्यतेऽन्तःस्थतोयानां बहिष्ठः परिपाकतः ।
परिणामः पदार्थानां क्रिमिसर्पादिलक्षणः ॥ (533)

नैवं, यस्मादनापन्नधर्मान्तर इहोच्यते ।
कार्ये प्रविष्टः स्रष्टैव पुमान्वेश्मेव तत्कृतम् ॥ (534)

* यथा भुक्त्वैति नगरं भुज्येतिक्रिययोर्नरः ।
अविशिष्टो भवेत्कर्ता भिन्नकालस्थयोस्तथा ॥ (535)

पृथिव्यादिभूतानां सर्पकीटकादिरूपेण परिणतानां पाषाणे प्रवेशवत् परस्यापि परिणामद्वारा बुद्ध्यादौ प्रवेशः, इति शङ्कते—**सर्वगानामिति। सर्पादीनामिति।** सर्पादिरूपेणेत्यर्थः। (531) सर्पादेः तत्र प्रविष्टत्वे 'पाषाणे सहजोऽन्तःस्थः सर्पः' इति कथं भाष्ये सहजशब्दः, अत्राह—**यु(वे)[ते]ति।** पाषाणात् बहिः स्थितसर्पादिः तत्र न प्रविष्टः इति प्रतिपत्त्यर्थः सहजशब्दः इत्यर्थः। हेतुमाह—**अश्मन इति।** पाषाणरूपस्थितपञ्चभूतपरिणामत्वात् सर्पादेरित्यर्थः। परिणामे हेतुमाह—**परिपाकत इति।** (532) परिपाकस्य परिणामहेतुत्वे अनुभवं मानयति—**दृश्यत इति।** करकाद्यन्तःस्थतोय[1]सहचरितभूतानां बाह्यपरिपाकात् परिणामदर्शनात् पाषाणसर्पवत् परस्य स्वविकारजीवरूपेण बुद्ध्यादौ प्रवेश इत्यर्थः। (533) स्रष्टुः अविकृतस्यैव प्रवेशश्रुतेः पाषाण [सर्प] वत् प्रवे[2]शानुपपत्तिः, इति दूषयति—**नैवमिति।** (534) सशब्देन

---

1. **तोयसहचरितभूतानामिति** 'अन्तःस्थतोयानाम्' इत्यत्र तोयपदं भूतमात्रोपलक्षकमिति भावः।

2. **प्रवेशानुपपत्तिरिति** स्वविकारजीवरूपेणेत्यादिः।

* "ननु तक्ष्णा सृष्टे वेश्मनि ततोऽन्यस्यापि प्रवेशो दृश्यते। तथा परेण सृष्टे जगति अन्यस्य प्रवेशो भविष्यति, नेत्याह—**यथेति।**" इति **शास्त्रप्रकाशिका।**

सृष्ट्वेदं सकलं विश्वं पश्चात्तत्प्राविशद्विभुः ।
* अनुपात्तान्यधर्मः सन्न तु पाषाणसर्पवत् ॥ (536)

न चानवच्छिन्नतनोर्निर्विभागात्मवस्तुनः ।
पूर्वस्थानवियोगेन स्थानान्तरसमागमः ॥ (537)

मतं प्रवेशश्रवणादस्तु सावयवः परः ।
इति चेन्नैतदेवं स्यादागमोक्तिविरोधतः ॥ (538)

दिव्यो ह्यमूर्तः पुरुषो नेति नेतीति चासकृत् ।
गीर्मनोगम्यधर्माणां सर्वेषामात्मनि ह्नुतेः ॥ (539)

रविबिम्बादिवत्तर्हि प्रवेशोऽस्तु परात्मनः ।
नैतन्न्याय्यमसद्भावात्तत्संयोगवियोगयोः ॥ (540)

संयोगश्च वियोगश्च यस्य येनेह वीक्ष्यते ।
प्रतिबिम्बप्रवेशोऽयं तत्र, न त्विह युज्यते ॥ (541)

प्रकृतपरामर्शः सिद्धयति । तस्याविकृतत्वं कुतः इति । 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. 2-6) इति [1]श्रुत्यन्तरात्, इत्याशयेन दृष्टान्तमाह—**यथेति** । दार्ष्टान्तिकं दर्शयति—**तथेति** । (535-536) अविकृतस्यैव तर्हि प्रवेशोऽस्तु तत्राह—**न चेति** । (537) परः परिच्छिन्न[:]प्रवेष्टृत्वात् चैत्रवत्, इति शङ्कते—**मतमिति** । श्रुतिविरोधेन प्रत्याह—**नैतदिति** । श्रुतिमुदाहरति—**दिव्य इति** । (538-539) प्रतिबिम्बन्यायेन प्रवेशं शङ्कते—**रवीति** । [2]उपाधिसंयोगवियोगात् [3]मैवम्, इत्याह—**नैतदिति** । (540) व्यतिरेकद्वारा प्रपञ्चयति—**संयोगश्चेति** । (541) गुणस्य द्रव्ये प्रवेशवत्, परस्य कार्ये प्रवेशः, इति शङ्कते—**गुणेति** ।

---

1. **श्रुत्यन्तरादिति** अविकृतत्वं सिद्धयतीति शेषः ।

* **अनुपात्तान्यधर्मः**—रूपान्तरमनापन्नः ।

2. **उपाधिसंयोगवियोगायोगादिति** परस्येत्यादिः । अनवच्छिन्नासङ्गत्वादिति भावः

3. **मैवं**—प्रतिबिम्बन्यायेन न प्रवेशः ।

गुणप्रवेशवद्द्रव्ये इति चेन्नानपाश्रयात् ।
द्रव्यैकपरतन्त्राणां गुणानामेव युक्तिमान् ॥ (542)*

तादृक्प्रवेशो नेशस्य स्वातन्त्र्यादुपपद्यते ।
एष सर्वेश्वर इति स्वातन्त्र्यं श्रूयतेऽसकृत् ॥ (543)

बीजवत्स्यात्प्रवेशश्चेन्नैवमप्युपपद्यते ।
जन्मादिविक्रियाधर्मप्रसक्तेरात्मवस्तुनः ॥ (544)

*स्थूलादिविक्रियाषट्कप्रतिषेधश्रुतेर्न च ।
प्रवेशो ब्रह्मणो युक्तः फले बीजादिवत्सदा ॥ (545)

ननु पाषाणसर्पेण पुनरुक्तमिदं कथम् ।
फले बीजवदित्युक्तम्, नैष दोषो भवेत्, कुतः ॥ (546)

परस्य कार्यानाश्रितत्वात् नैत(द्य)[द्यु]क्तम्, इत्याह—**नेति** । एतत् स्फुटयति—**द्रव्येति** । [1]स्वातन्त्र्यमसिद्धम्, अत आह—**एष इति** । (542-543) [2]विध्यन्तरेण प्रवेशं शङ्कते—**बीजवदिति** । यथा फले बीजस्य प्रवेशः, एवं परस्य बुद्ध्यादावित्यर्थः । कार्यत्वादिप्रसङ्गान्नैवम्, इत्याह—**नैवमिति** । (544) प्रवेष्टुर्विका(रे)[र]संबन्धे को दोषः, तत्राह—(अ)**स्थूलेति** । स्थूलादे-[3]र्विक्रियाषट्कस्य प्रतिषेधश्रुतेरित्यर्थः । (545) [4]पाषाणसर्पदृष्टान्तेन फलबीजदृष्टान्तो गतार्थः, इति शङ्कते—**नन्विति** । फलबीजयोरवयवावयविभावः, पाषाणसर्पयोराधाराधेयभावः इत्यर्थविशेषान्न पुनरुक्तिः, इत्याशयेन परिहरति—**नैष इति** । अगृहीताभिसन्धिश्चोदयति—**कुत इति** । (546) अभिसन्धिं

---

* **गुणानामेव युक्तिमानिति** द्रव्ये प्रवेशः इति शेषः ।

1. **स्वातन्त्र्यमसिद्धमिति** परस्येत्यादिः ।
2. **विध्यन्तरेण**—विधान्तरेण—प्रकारान्तरेणेति यावत् ।
3. **विक्रियाषट्कस्य**—जायतेऽस्ति इत्यादिना यास्कोक्तभावविकारषट्कस्य । चकारः अत्राध्याहार्थः ।

* "स्थूलादिद्वैतजन्मादिविक्रियाषट्कस्य फले बीजवत् प्रवेशे ब्रह्मण्यपि प्रसक्तस्य श्रुतिस्मृत्योर्निषेधश्रुतेः सदा दर्शनात् नैव ब्रह्मणः तथा प्रवेशो युक्तः इति हेत्वन्तरमाह—**स्थूलादीति** ।" इत्यपि व्याचक्षते **शास्त्रप्रकाशिकाकाराः** ।

4. **पाषाणसर्पदृष्टान्तेनेति** परस्य बुद्ध्यादिप्रवेशे इत्यादिः ।

भागभाग्यभिसंबन्धः ख्यातो बीजफलात्मनोः ।
आधाराधेयसंबन्धस्तत्राश्मोरगयोः स्फुटः ॥ (547)

परस्मादन्य एवेह संसारी प्राविशज्जगत् ।
परिच्छिन्नस्य लोकेऽपि प्रवेश उपपद्यते ॥ (548)

स्रष्टृप्रवेष्ट्रोरेकत्वान्नैवमप्युपपद्यते ।
सृष्ट्वा जगत् सृष्टिमनु तदेव प्राविशच्छ्रुतेः (549)

पर एव प्रविष्टश्चेत् प्रविष्टानामनेकतः ।
तदनन्यत्वतः प्रापन्महेशस्याप्यनेकता ॥ (550)

* नैष दोषो यतो नेह भेदेनेशस्य संगतिः ।
आत्मस्वरूपतस्तस्य ह्यात्मा चाभेदसंगतेः ॥ (551)

अनन्यत्वं प्रविष्टैः स्यान्नानात्वमिति दुर्भणम् ।
* बहूनामेकयोगित्वादेकत्वं किं न चोद्यते ॥ (552)

प्रकटयन् परिहरति—**भागेति** । (547) एवं परस्य सर्वथा प्रवेशायोगात् ततोऽन्यो जीवः प्रविष्टः [इति] [1]परः स्वमतमुपसंहरति—**परस्मादिति** । (548)

सिद्धान्तनिरूपणम्

एवं पूर्वपक्षे सिद्धान्तयति—**स्रष्टृिति** । (549) परस्य प्रवेशे अनेकेश्वर-प्रसक्तिः स्यात्, इति शङ्कते—**पर एवेति** । (550) समाधत्ते—**नैष इति** । हेतुमाह—**आत्मत्वेति** । भेदभेदिनोरात्मा स्वरूपम् । अतो न भिद्यते । अन्यथा भेदभेदिनोः निःस्वरूपत्वप्रसङ्गादित्यर्थः । एतदेव व्यनक्ति—**आत्मा चेति** । अभेदसंगतेः—ऐक्यसंबन्धादित्यर्थः । (551) परस्य प्रविष्टैरभेदेऽपि नानात्व-

---

1. **परः**—पूर्वपक्षी ।

* "प्रविष्टेषु परस्य भेदेन न संयोगादिसंबन्धः, आत्मत्वेन तत्स्वरूपत्वात् । न चात्मत्वेऽपि भेदेन संगतिः अभेदेन ऐकात्म्यसंगतेरेवात्मत्वसंभवात् । अतो न परस्यानेकतेति परिहरति—**नेत्यादिना**" इति **शास्त्रप्रकाशिका** ।

* **बहूनामिति** परः स्वगतभेदवान्, अनेकाभिन्नत्वात् अनेकवत्, इत्यनुमानस्य, अनेके तत्त्वतः स्वगतभेदरहिताः एकाभिन्नत्वात् एकवदिति प्रत्यनुमानमुक्तं बोध्यम् ।

न च नानात्वकृल्लोके संयोगोऽभेदकारणात् ।
तथागमविरोधश्च बहुत्वं चेत्परात्मनः ॥ (553)

एको देवो बहुधेति मन्त्रब्राह्मणयुक्तितः ।
वियद्वदेकलस्तस्मादीश्वरोऽभ्युपगम्यताम् ॥ (554)

आस्तां तावत्प्रवेशोऽयं न्याय्योऽन्याय्यो यथा तथा ।
दोषान्तरमिह प्राप्तं तत्तावत्प्रविचार्यते ॥ (555)

संसारित्वात्प्रविष्टानां परस्य तदभेदतः ।
संसारित्वं प्रसक्तं चेन्न क्षुदाद्यत्ययश्रुतेः ॥ (556)

सुखिदुःखित्वमोहादिदर्शनान्नेति चेन्मतम् ।
नैवं, वेदान्तवाक्येषु न लिप्यत इति श्रुतेः ॥ (557)

मनेकधा भिन्नत्वम्, अत्राह—**अनन्यत्वमिति** । भिन्नैः [1]खण्डादिभिः अभिन्न गोत्वस्याभेददर्शनादित्यर्थः । किञ्च, भिन्नैरभेदादभिन्नस्य भेदश्चेत्, अभिन्नादभेदात् भिन्नानां जीवानां परस्परैक्यं किं न स्यात्, इत्याह—**बहूनामिति** (552) अभिन्नत्वस्य भेदसाधकत्वे लोकविरोधः, इत्याह—**न चेति** । संयोगशब्देन अभेदो लक्ष्यते । न केवलं लोकविरोधः, आगमविरोधोऽपि, इत्याह—**तथेति** । (553) भाष्योक्तमागममुदाहरति—**एक इति** । (554)

परस्य नानात्वप्रसङ्गं परिहृत्य, दोषान्तरं परिजिहीर्षुः चोद्यमुद्भावयति—**आस्तामिति** । (555) दोषान्तरं विशदयति—**संसारित्वादिति** । 'अशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' (बृ. 5 5-1) इति श्रुत्यवष्टम्भेन परिहरति—(556) अनुभवावष्टम्भेन शङ्कते—**सुखीति** । [2]उक्तमेव परिहारं स्मार-—**नैवमिति** । (557) उपजीव्यतया प्रथमप्रवृत्तनिरवकाशप्रत्यक्षविरोधे

---

1. **खण्डादिभिः अभिन्नगोत्वस्येत्यादि** गोत्वं सामान्यमनुगतमेकम् । खण्डमुण्डादयस्तु व्यक्तयो विशेषाः परस्परं विभिन्नाः । सामान्यस्य विशेषाभेदः संप्रतिपन्नः । तथा च विभिन्नव्यक्तिविशेषानन्यस्य सामान्यस्यैव, नानाभूतप्रविष्टानन्यस्य परस्य एकत्वमुपपद्यते इति समुदायार्थः ।
2. **उक्तमेव परिहारमिति** श्रुतिविरोधमिति यावत् ।

ननु प्रत्यक्षमानेन साक्षाद्दुःखादिदर्शने ।
प्रत्यक्षबाधसिद्ध्यर्थं न न्याय्योक्तिपरम्परा ॥ (558)

नोपाध्याश्रयजनितविशेषविषयत्वतः ।
* प्रत्यक्षाभासतासिद्धेस्तेन नोक्तिविरोधिता ॥ (559)

दुःखी यदि भवेदात्मा कः साक्षी दुःखिनो भवेत् ।
दुःखिनः साक्षिताऽयुक्ता साक्षिणो दुःखिता तथा ॥ (560)

* नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः ।
धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ॥ (561)

सुखदुःखादिसंबद्धां यथा दण्डेन दण्डिनम् ।
* राधको वीक्षते बुद्धिं साक्षी तद्वदसंहतः ॥ (562)

---

[1]श्रुतेरेव बाध्यत्वम्, इति चोदयति—नन्विति । (558) अहङ्कारोपाधौ प्रतिबिम्बितचैतन्यमुपाधिमाश्रित्य जनितो विशेषः । तद्गतदुःखादिग्राहिप्रत्यक्षस्य मिथ्याधीत्वात् शुद्धचैतन्यस्य ब्रह्मत्वगमकागमविरोधो नास्ति, इति परिहरति—नेति । (559)

चैतन्यस्य स्वतो न दुःखित्वमिति निरूपणम्

उपाधिसंपर्ककृतत्वात् दुःखित्वं मिथ्येति कस्मात् कल्प्यते, स्वत एव दुःखित्वं चैतन्यस्य किं न स्यात्, अत्राह—दुःखीति । (560) दुःखिनोऽसा-(क्ष)[क्षि]त्वे हेतुमाह—नेति । विकारिणो जडत्वादसाक्षित्वमित्यर्थः । (561) धीविक्रियासा(क्ष)[क्षि]त्वे स्यादात्मनो विकारित्वं, साक्षिणः सा(क्षे)[क्ष्ये]ण संबन्धात्, अत आह—सुखेति । यथा देवदत्तो दण्डेन युक्तं दण्डिनमी(क्ष्य)-[क्ष]माणः न स्वयं दण्डेन सं(भाव्य)[बध्य]ते, तथा सुखादिमतीं बुद्धिमी(क्ष्य)-

---

1. श्रुतेरेवेति उपजीवकतया चरमप्रवृत्तायाः विषयान्तरपरत्वेन सावकाशायाश्च श्रुतेरेवेत्यर्थः ।

* नोक्तिविरोधिता—नात्मनि असंसारित्वागमविरोधः ।

* नर्ते इति परिणामित्वं विना न दुःखितेत्यर्थः ।

* राधकः—साधकः, द्रष्टेति यावत् ।

शरीरेन्द्रियसंघात आत्मत्वेन गतां धियम् ।
नित्यात्मज्योतिषा दीप्तां विशिंषन्ति सुखादयः ।। (563)

पराञ्चयेव तु सर्वाणि प्रत्यक्षा दीनि नात्मनि ।
प्रतीच्येव प्रवृत्तं तत्सदसीति वचोऽञ्जसा ।। (564)

विज्ञातारमरे केन, न दृष्टेरिति च स्फुटम् ।
अन्यदेवेति वाक्याच्च प्रत्यक्षं नात्मगोचरम् ।। (565)

किन्तु बुद्ध्याद्युपाधौ तदात्मच्छायैककर्मकम् ।
तथा दुःख्यहमित्यादौ प्रत्यक्षमुपचारतः ।। (566)

सामानाधिकरण्यस्य तथैवेहोपचारतः ।
अयं दुःख्यहमस्मीति विषयेण तदीक्षणात् ।। (567)

[क्ष]माणो [1]न सुखादिना युज्यते इत्यर्थः । (562) बुद्धेरात्मत्वात् [2]नान्यः तद्द्रष्टा, अत्राह—**शरीरेति** । (563) प्रत्यक्षादीनामनात्मविषयत्वात् आगमस्यात्मविषयत्वात् भिन्नविषयत्वान्न विरोधः, इत्युक्तम् । [3]तत्र श्रुतिमुदाहरति—**पराञ्चीति** । (564-565) आत्मनो दुःखित्वप्रतीत्यभावे शास्त्रारम्भमुमुक्षुप्रवृत्त्योर्वैयर्थ्यम् । तस्मात् प्रत्यक्षस्यात्मविषयत्वादा[4]गमस्य [5]तद्विरोधः, अत्राह—**तथेति** । यथा ब्राह्मणोऽहं, स्थूलोऽहमित्यादि प्रत्य(क्षाद)[क्षम]भिमतं मिथ्या, तद्वत् दुःखादिधोरपि । उपचारतः—मिथ्यात्वादित्यर्थः । (566) हेतुमाह—**सामानाधिकरण्यस्येति** । ब्राह्मणोऽहमित्यादौ भासमानैक्यस्य मिथ्यात्वात् तद्धियो मिथ्यात्वं यथा, दुःख्यहमित्यादौ भासमानाभेदस्य कल्पितत्वात् तद्धीरपि मिथ्याधीरित्यर्थः । दुःखादेर्ग्रहणस्यात्मनि समवायकृतं सामानाधिकरण्यं न तत्संबन्धस्य कल्पितत्वम्, अत्राह—**अयमिति** । दृश्येन द्रष्टुरैक्यप्रतिभानात् तन्मिथ्या, दृश्यस्य द्रष्टुरात्मत्वतद्धर्मत्वयोरयोगादित्यर्थः । (567)

---

1. **न सुखादिना युज्यते इति** वस्तुतोऽसङ्गस्य कल्पितसंबन्धात् साक्षितेति भावः ।
2. **नान्यः तद्द्रष्टा**—बुद्धेरन्यः बुद्धेर्द्रष्टा नास्तीत्यर्थः ।
3. **तत्र श्रुतिमिति** प्रत्यक्षागमयोः विभिन्नविषयकत्वे प्रमाणभूतां श्रुतिमित्यर्थः ।
4. **आगमस्य**—आत्मनोऽसंसारित्वबोधकस्यागमस्य ।
5. **तद्विरोधः**—दुःखित्वादिप्रत्यक्षविरोधः ।

नासिकाग्रे महद्दुःखं पादाङ्गुष्ठाग्र एव च ।
देहावयवदुःखादेः प्रात्यक्ष्यान्नात्मदुःखिता ॥ (568)

* प्रतीचि चेद्भवेद्दुःखं व्यापि चैतन्यवद्भवेत् ।
द्रष्टृस्थत्वान्न कर्मस्थं द्रष्ट्रा दृश्येत बोधवत् ॥ (569)

स्वात्मनस्त्वेव कामाय ह्यात्मार्थत्वश्रुतेर्भवेत् ।
आत्मैकविषयं सौख्यमिति चेन्मन्यसे न हि ॥ (570)

यत्र वा अन्यदित्युक्तेरविद्याविषयं तु तत् ।
दुःखित्वं नात्मनि ज्ञेयं यत्र त्वस्येति निह्नुतेः ॥ (571)

दुःखादयो नात्मधर्माः देहविशेषणत्वेन भासमानत्वात् दण्डादिवत्, इत्याह—**नासिकाग्र इति** । (568) विपक्षबाधकाभावादप्रयोजकता, इत्यत्राह—**प्रतीचीति** । [1]सर्वगतत्वं स्वाभाविकत्वे चैतन्यवत् स्यादित्यर्थः । आत्मदृश्यत्वात् दुःखादेः [2]न घटादिवदपरिच्छिन्नत्वम्, इत्याशङ्क्य, आत्मगतत्वे तद्दृश्यतापि न स्यात्, इत्याह—**द्रष्टृस्थत्वादिति** । कर्मस्थं—कर्मत्वेन स्थितं जडरूपं सदित्यर्थः । (569) सुखस्यात्माश्रयत्वं [3]श्रुतेरवसीयते । [4]तेन समानाश्रयत्वात् दुःखादीनामपि [5]तदाश्रयता, इति शङ्कते—**स्वात्मनस्त्विति** । दूषयति—**न हीति** । (570) आत्मनि कल्पितसंसारानुवादेन आनन्दरूपत्वप्रतिपादनपरत्वा-

---

1. **सर्वगतत्वमिति** दुःखादेरित्यादिः ।

2. **न घटादिवदपरिच्छिन्नत्वमिति** आत्मदृश्यघटादयः यथा नापरिच्छिन्नाः, तथा आत्मदृश्या दुःखादयः नापरिच्छिन्ना इत्यर्थः ।

* "दुःखमात्मनि व्याप्यवृत्ति, प्रदेशवृत्ति वा । प्रथमे, देहाद्बहिरपि तद्धीः स्यात् । न च तद्धेत्वभावान्नेति वाच्यम् । तथा सति तद्व्याप्यवृत्तित्वस्याप्रामाणिकत्वात्, तस्य स्वसत्तायां प्रतीत्यव्यभिचारित्वात् । न द्वितीयः, सर्वगतस्य प्रतीचः वास्तवप्रदेशाभावात् कल्पितप्रदेशाश्रितं दुःखमपि तथेति मत्वाह—**प्रतीचीति** । दुःखादेरात्मधर्मत्वे दोषान्तरमाह—**द्रष्टृस्थत्वादिति** ।" इति **शास्त्रप्रकाशिका** ।

3. **श्रुतेः**—'आत्मनस्तु कामाय' इति श्रुतेः ।

4. **तेन**—सुखेन ।

5. **तदाश्रयता**—आत्माश्रयता ।

मम तावदिदं बुद्धौ भवद्भ्यो यन्न रोचते ।
प्रत्यक्प्रवणया दृष्ट्या संसारो नात्मनीक्ष्यते ॥ (572)

मतं तार्किकसमयविरोधश्चेत्प्रसज्यते ।
इच्छाद्वेषादिमानात्मा यतस्तैरभ्युपेयते ॥ (573)

नैवं, निश्शेषतर्कैश्चेदविरोधोऽभ्युपेयते ।
सिद्धान्तो दुःस्थितोऽत्यर्थं तदा वः प्राप्नुयाद्ध्रुवम् ॥ (574)

न च तार्किकयुक्त्यापि प्रतीचीहासुखात्मता ।
यतोऽवगम्यते तस्मान्निर्भीतिः सुखमास्यताम् ॥ (575)

पराक्प्रत्ययगम्येन दुःखेन स्याद्विशेषणम् ।
न प्रत्यङ्मात्ररूपस्य विरोधादुष्णशीतवत् ॥ (576)

दुदाहृतश्रुतेः, इत्याशयेन [1]तत्र लिङ्गमाह—यत्रेति । (571) विद्वदनुभवविरोधाच्च आत्मनो न दुःखादिसंबन्धः, इत्याह—ममेति । (572)

तार्किकमतेनात्मनः संसारित्वशङ्का, तन्निराकरणं च

आत्ममनःसंयोगादसमवायिकारणात् आत्मनि [2]बुद्ध्यादयो विशेषगुणाः जायन्ते, इत्यभ्युपगमबलेन शङ्कते—मतमिति । (573) श्रुतिमूलतर्कानुगुण्ये सति तर्कान्तरविरो(धाद)[धःअ]नादरणीयः । अन्यथा दिगम्बरादिविरोधात् नैयायिकशास्त्राप्रामाण्यात्, इत्याह—नैवमिति । (574) सद्वचनाभासलक्ष[ण]-योगित्वाभावात् तार्किकयुक्तीनां, ताभिरात्मनि संसारसिद्धिः, अत्राह—न चेति । विपर्ययापर्यवसानादिदोषग्रस्ता तार्किकयुक्तिरित्यर्थः । (575) तदा[1]भासत्वे हेत्व-न्तरमाह—परागिति । दुःखादेः पराक्त्वात् आत्मनः प्रत्यक्त्वात् मिथो

---

1. तत्र लिङ्गं—कल्पितसंसारानुवादकत्वे गमकम् ।
2. बुद्ध्यादयो विशेषगुणा इति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः नवात्मनो विशेषगुणाः ।
‘रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः ।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः ॥’ इति कारिकोक्ताः विशेषगुणाः इति तार्किकसमयः ।
विपर्ययापर्यवसानादयः तर्कदोषाः नैयायिकप्रबन्धेषु निरूपिताः ।

प्रत्यक्षाविषयत्वं च प्रतीचः प्रागवादिषम् ।
तच्छायापाश्रयाद्यस्मात्प्रत्यक्षस्यापि मानता ।। (577)

यो यतो लिप्सते नासावकिंचित्को ह्यनर्थिने ।
* भिक्षां दातुमलं तद्वज्ज्ञेयं स्वार्थपरार्थयोः ।। (578)

प्रत्यक्षमन्तरेणापि भवेद्दुःखविशेषणः ।
वियच्छब्दगुणं यद्वत् प्रत्यक्षेणैवमिष्यते ।। (579)

एकमानानधिगतेर्न सुखग्राहिणात्मनः ।
नित्यानुमितरूपस्य गृहीतिः स्यान्मनागपि ।। (580)

* एकत्वादात्मनश्चैवं विषयीकरणे सति ।
असंभवात्तदन्यस्य द्रष्टृभावः प्रसज्यते ।। (581)

विरोध इत्यर्थः । (576) दुःखादिवदात्मनोऽपि प्रत्यक्षत्वात् [2]तद्धर्मत्वम्, अत्राह —**प्रत्यक्षेति** । प्रत्यक्षादेर्जडस्यात्माभासायत्तसि(द्ध)[द्धि]त्वाच्च न तद्विषयत्वम्, इत्याह—**तच्छायेति** । (577) प्रत्यक्षादिसाधकस्य [3]तत्साध्यत्वाभावे दृष्टान्तमाह —**यो यत इति** । (578) [4]प्रत्यक्षाविषयत्वेऽपि दुःखाश्रयत्वं अप्रत्यक्षाकाशस्य प्रत्यक्षशब्दाश्रयत्ववत्, इति शङ्कते—(प्रत्यक्ष्यमिति) [**प्रत्यक्षमिति**] । गुणगुणिभावव्यापकैकधीगम्यत्वाभावात् शब्दाकाशयोः न गुणगुणित्वम्, इत्याह—**नैवमिति** । अस्तु तर्हि सुखादिग्राहिप्रत्यक्षेणात्मनो ग्रहणम्, अत्राह—**न सुखेति** । पृथिव्याद्यष्टद्रव्यव्यतिरिक्तस्यात्मनः इच्छादिलिङ्गेन नित्यानुमेयत्वोपगमादित्यर्थः । (579—580) प्रत्यक्षासिद्धस्यात्मनः स्पष्टीकरणमात्रार्थत्वादनुमानस्य नात्मनो

---

1. **तदाभासत्वे**—तार्किकयुक्तीनामाभासत्वे ।
2. **तद्धर्मत्वं**—प्रत्यक्षदुःखादिधर्मवत्त्वम् ।
3. **तत्साध्यत्वाभावे**—प्रत्यक्षाधीनसिद्धिकत्वाभावे ।
* **स्वार्थपरार्थयोः**—स्वतन्त्रपरतन्त्रयोः, चिज्जडयोरिति यावत् ।
4. **प्रत्यक्षाविषयत्वेऽपीति** आत्मनः इति शेषः ।
• "**एकत्वादिति** यथा सुखादि प्रत्यक्षं ते, तथा आत्मनोऽपि तेन विषयीकारे सति, एकस्मिन् देहे तदैक्यसंमतेः, आत्मान्तरस्य तत्रायोगात् एकत्र भोक्तृद्वयानिष्टेः पुरुषान्तरस्यान्यं प्रत्यप्रत्यक्षत्वात् द्रष्टृभावात् आत्मदृश्यत्वासिद्धिरित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

विषयित्वमथैकस्य विषयत्वं च दीपवत् ।
मतं चेन्नैतदेवं स्यात् युगपद्भूत्यसंभवात् ॥ (582)

* न वा व्यनक्ति दीपोऽपि स्वतो भास्वररूपतः ।
विषयत्वाच्च पुंबुद्धेः न दीपस्योभयात्मता ॥ (583)

प्रतीचश्च निरंशत्वान्न दीपेन सधर्मता ।
ग्राह्यग्राहकतैतेन विज्ञानस्याप्यपोदिता ॥ (584)

तथा गुणगुणित्वेन ह्यक्षलिङ्गाधिगम्ययोः ।
दुःखात्मनोर्मिथो योगे नानुमानप्रमाणता ॥ (585)

नित्यमक्षजगम्यत्वात् दुःखस्योत्पलनीलवत् ।
* रूपाद्यक्षजगम्यैश्च सामानाधिकरण्यतः ॥ (586)

नित्यानुमेयत्वम्, अत्राह—**एकत्वादिति** । (581) कुतो द्रष्टृभावः, एकस्यै-(वानु) [व] ग्राह्यग्राहकभावात्, इति शङ्कते—**विषयित्वमिति** । विषय-विषयिणोरन्योन्यापेक्षत्वात् क्रमानुपपत्तौ, कार्त्स्न्येनैव [1]तदुभयम्, अंशाभ्यां वा । नाद्यः इत्याह—**नैतदिति** । कर्तुः क्रियायां गुणत्वात् कर्मणः प्राधान्यात् एकस्य एकदैव एकत्रैव गुणप्रधानभावविरोधादित्यर्थः । (582) दृष्टान्तस्य या गतिः सैवात्रापि, इत्याशङ्क्य, [2]तं विघटयति—**न वा व्यनक्तीति** । प्रकाशैकरसे दीपे तमःप्राप्त्यभावात् न जडप्रकाशप्रकाश्यत्वमित्यर्थः । (583) [3]कल्पान्तरं प्रत्याह—**प्रतीचश्चेति** । एकस्य ग्राह्यग्राहकत्वनिरासेन **सौगत-मतमपि** निरस्तम्, इत्याह—**ग्राह्येति** । (584) प्रत्यक्षेण दुःखादेरात्म-गुणत्वासिद्धावपि, दुःखादयः साश्रयाः गुणत्वात् रूपवदिति परिशेषानुमानात् तत्सिद्धिः, अत्राह—**(य)[त]थेति** । दुःखादेरन्तःकरणधर्मत्वात् परिशेषासिद्धे-रित्यर्थः । (585) दुःखादयो नात्मधर्माः वेद्यत्वात् रूपवत्, इत्याह—**नित्य-**

---

1. **तदुभयं**—ग्राह्यत्वं ग्राहकत्वञ्चेत्युभयम् ।
2. **तं विघटयति**—दृष्टान्तं विघटयति ।

* 'न व्यनक्ति प्रदीपोऽपि' इति मु. पु. पाठः ।

3. **कल्पान्तरं**—अंशाभ्यां ग्राह्यत्वग्राहकत्वोभयमिति कल्पम् ।

* **रूपादीति** पादे मे वेदना इत्याद्यनुभवात् रूपादिसामानाधिकरण्येन दुःखादिकं सिद्ध्यतीति भावः ।

दुःखस्यात्मनि संयोगजत्वाभ्युपगमेऽपि च ।
सभागविक्रियानित्यत्वादिदोषः प्रसज्यते ॥ (587)

नाविकृत्य हि संयोगि गुणो द्रव्यं कदा चन ।
उपयन्नपयन्वेह लोके दृष्टः प्रमाणतः ॥ (588)

न चानवयवं वस्तु क्वचिदप्युपलभ्यते ।
विक्रियामाप्नुवन्नापि नित्यं ध्वंसिगुणाश्रयम् ॥ (589)

आकाशस्य च नित्यत्वं नेष्टमागमवादिभिः ।
* तत्कार्यश्रवणात् नापि दृष्टान्तोऽस्ति ततोऽपरः ॥ (590)

विक्रियावदपि द्रव्यं तत्प्रत्ययसमन्वयात् ।
नित्यमेवेति चेन्नैवमन्यथात्वातिरेकतः ॥ (591)*

मिति । देहावयवगतत्वेन प्रतीयमानत्वाच्च नात्मधर्मत्वम्, इत्याह—**रूपादीति** । (586) दुःखादीनामात्ममनःसंयोगजत्वे दोषमाह—**दुःखस्येति** । [1]संयोगित्वात्सावयवत्वं, अतश्च विकारित्वानित्यत्वानात्मत्वप्रसङ्ग इत्यर्थः । (587) संयोगित्वस्य विक्रियावत्त्वादिना व्याप्तिमुपपादयति—**नेति** । (588) आत्मनो ज्ञानसुखाद्याकारपरिणामित्वमिष्टं [2]**वार्त्तिककारीयैः**, अत्राह—**न चेति** । आत्मा न गुणी नित्यत्वात् समवायवत् । विपक्षे घटादिवदनित्यत्वं स्यात्, इत्याह—**नापीति** । (589) शब्दगुणे नभसि व्यभिचारः, अत आह—**आकाशस्येति** । परमाण्वादौ व्यभिचारः, अत आह—**नापीति** । भूतत्वेन परमाणूनामपि कार्यत्वानुमानात्, [3]कालादीनां कार्यत्वश्रवणाच्चेत्यर्थः । (590) यस्मिन्विक्रियमाणे तदेवेदमिति बुद्धिर्न विहन्यते तत् परिणामिनित्यमिति स्वीकारात्, विक्रियावतोऽपि नित्यत्वम्,

---

1. **संयोगित्वात्सावयवत्वमिति** आत्मनः इत्यादिः ।
2. **वार्त्तिककारीयैः** — मीमांसावार्त्तिककारकुमारिलभट्टानुयायिभिः ।
* **तत्कार्यश्रवणादिति** आकाशस्य, 'आत्मन आकाशः संभूतः' इति श्रुतौ कार्यत्वश्रवणादित्यर्थः ।
3. **कालादीनां कार्यत्वश्रवणाच्चेति** 'सर्वे निमेषा जज्ञिरे' इति श्रुतौ इत्यादिः । तथाच कालेऽपि न व्यभिचार इति भावः ।
* **अन्येषां प्रवादिनां**—शून्यवादिनां यथा अनित्यत्वं अत्यन्ताभावरूपं इष्यते तत् नास्ति । अन्यथात्वातिरिक्तं अनित्यत्वं नास्ति इति वार्त्तिकार्थः ।

अनित्यत्वं क्वचिन्नास्ति यथान्येषां प्रवादिनाम् ।
सन्नेवाभावरूपोऽपि त्विष्टः शून्यत्ववादिनाम् ॥ (592)

संवित्प्रमाणसत्त्वेन विना वस्तु न लौकिकम् ।
प्रमाणवादिभिर्दृष्टमनन्यायत्तसिद्धिकम् ॥ (593)

भागान्यथात्वाद्द्रव्यस्य नानित्यत्वं क्वचिन्मितम् ।
निर्भागत्वात्प्रतीचस्तत्कथा युक्त्योपपद्यते ॥ (594)

अथ सावयवत्वेऽपि नित्यं स्यात्कुलिशादिवत् ।
संयोगपूर्वतो नैवं तद्विभागावसानतः ॥ (595)

वज्रादेरविभागश्चेत्तस्यासंयोगपूर्वतः ।
नानुमेयत्वतोऽस्त्येव तस्यावयवसंयुतिः ॥ (596)

इति शङ्कते—**विक्रियावदिति** । दूषयति—**नैवमिति** । विकारिणोऽन्यथाभावस्यावश्यंभावात् [1]तस्यैवानित्यत्वरूपत्वात् अत्यन्ताभावस्य [2]पुरस्तान्निरस्तत्वादित्यर्थः । अत्यन्ताभावस्य **माध्यमिकै**रिष्टत्वात् कथमसंभवः, इत्याशङ्क्य, स मानसिद्धः, स्वप्रकाशो वेति विकल्प्य, आद्यं प्रत्याह—**सन्नेवेति** । मेयत्वात् घटवदित्यर्थः । (591-592) द्वितीयं दूषयति—**संविदिति** । संविदेव प्रमाणं संवित्प्रमाणं चैतन्यं तदेव सद्रूप आत्मा, तेन विनेति यावत् । स्वप्रभत्वे [3]भाषान्तरेणात्मैवाभिहितो भवेदिति भावः । (593) अत्यन्ताभावस्य दुर्निरूपत्वात् अन्यथात्वमेवानित्यता, इत्युपसंहरति—**भागेति** । स्यादात्मनोऽपि [4]तथाविधानित्यत्वम्, अत्राह—**निर्भागत्वादिति** । (594)

देहप[5]रिमाणात्मवादी शङ्कते—**अथेति** । [6]वज्रादिः संयोगपूर्वकः सावयवत्वात् घटवत्, वज्रावयवसंयोगः विभागावसानः संयोगत्वात् घटसंयोगवत्,

---

1. **तस्यैव**—अवयवान्यथाभावस्यैव ।
2. **पुरस्तात्**—घटविचारे ।
3. **भाषान्तरेण**—अत्यन्ताभावशब्देन ।
4. **तथाविधानित्यत्वं**—अन्यथात्वरूपमनित्यत्वम् ।
5. **देहपरिमाणात्मवादी**—स्याद्वादी जैनः ।
6. कुलिशदृष्टान्तासिद्धया परिहरति—**वज्रादिरिति** ।

न हि सावयवं किञ्चिद्दतेऽवयवसंयुतिम् ।
घटादिवद्यतो दृष्टमतोऽदुःखित्वमात्मनः ॥ (597)*

निर्दुःखित्वे परस्येष्टे तदन्यस्याप्यभावतः ।
कस्य दुःखनिवृत्त्यर्थं प्रारब्धोपनिषत्त्वया ॥ (598)

प्रत्यगज्ञानहेतूत्थदुःखित्वमतिविभ्रम-
ध्वंसमात्रस्य सिद्ध्यर्थमारब्धोपनिषन्मया ॥ (599)

नवसंख्येयमात्रेक्षी दशमो विभ्रमाद्यथा ।
न वेत्ति दशमोऽस्मीति स्वीक्षमाणोऽपि तान्नव ॥ (600)

निःशेषानात्मदृक् तद्वदनिर्ज्ञातात्मतत्त्वकः ।
न वेत्त्यैकात्म्यमस्मीति वीक्षमाणोऽप्यनात्मनः ॥ (601)

दशमोऽसीति वाक्योत्थसम्यग्ज्ञानानलार्चिषा ।
प्लुष्ट्वाऽऽत्मदशमाज्ञानं दशमोऽस्मीति वीक्षते ॥ (602)

इति परिहरति—**संयोगेति** । (595) अनित्यानामेवावयवसंयोगपूर्वत्वात् नित्यस्य कुलिशादेः संयोगपूर्वत्वमसिद्धम्, इति शङ्कते—**वज्रादेरिति** । आदिपदेन तत्तुल्यशिलान्तरपरिग्रहः । (596) वज्रादि संयोगारब्धं सावयवत्वात् घटवत्, इत्याह—**नेति** । फलितमाह—**अत इति** ।

शास्त्रारम्भानुपपत्त्या आत्मनः संसारित्वशङ्का, तत्परिहारश्च

शास्त्रारम्भानुपपत्त्या आत्मनः संसारित्वं शङ्कते—**निर्दुःखित्व इति** (598) स्वतो मुक्ते अविद्याध्यस्तबन्धध्वस्त्यर्थं शास्त्रारम्भः, इति परिहरति—**प्रत्यगिति** । (599) विद्यारूपे परमात्मनि कथमविद्येति तत्प्रतिपादनाय दृष्टान्तमाह—**नवेति** । (600) दार्ष्टान्तिकं दर्शयति—**निःशेषेति** । (601) दृष्टान्तेन प्रतिपादिताज्ञानस्य ज्ञानान्निवृत्तौ दृष्टान्तमाह—**दशमोऽसीतीति** । (602) दार्ष्टान्तिक-

---

* **अत इति** आत्मनि दुःखस्य मनःसंयोगजत्वाभ्युपगमे आत्मनः सावयवत्व-विकारित्वानित्यत्वादिदोषप्रसङ्गादित्यर्थः ।

यथा, तत्त्वमसीत्यादिवाक्योत्थज्ञानवह्निना ।
प्लुष्टदेहात्मतमस्तज्जं तथैकात्म्यं प्रपद्यते ॥ (603)

प्रत्यगज्ञानहेतूत्थशास्त्राचार्यादिसाधनः ।
तद्विरुद्धमथैकात्म्यं प्रत्यपद्यत मायया ॥ (604)

शास्त्राचार्यादयो यद्वत् मोहोत्थत्वान्न वस्तुतः ।
प्रवेशोऽप्यस्य तादृक् स्यादैकात्म्यप्रतिपत्तये ॥ (605)

व्याकृताव्याकृतावस्थे जगतोऽस्य स्वभावतः ।
* अनूद्य लोकतो दृष्टे तद्याथात्म्यं प्रबोध्यते ॥ (606)

यत एवमतोऽपास्तरागद्वेषादिधीमलः ।
उदारधिषणः प्राह भाष्यकृन्न्यायवद्वचः ॥ (607)

अप्रविष्टस्वभावस्य दिग्देशाद्यनभिप्लुतेः ।
प्रवेशो व्याकृते क्लृप्तो जलपात्रार्कबिम्बवत् ॥ (608)

माह—**तत्त्वमसीति** । (603) मुक्तिसाधनं तत् ज्ञानं कुतो भवतीति, [1]तद्दर्शयन् निगमयति—**प्रत्यगिति । मायया**—शास्त्रादेरुत्पन्नब्रह्मधिया । **तद्विरुद्धं**—शास्त्राचार्यादिभेदविरुद्धं प्रतिपन्नवानित्यर्थः । (604)

शास्त्रादिवत् प्रवेशस्यापि कल्पितत्वम्

परस्य प्रवेशे संसारित्वं परिहृत्य, तत्प्रवेशं 'स्रष्टृप्रवेष्ट्रोरेकत्वात्' वा.(549) इत्यादौ शास्त्रबलेनोक्तं युक्त्यापि स्थापयितुमाह—**शास्त्रेति** । शास्त्रादिवत् प्रवेशस्यापि कल्पितत्वात् न किञ्चिदयुक्तमित्यर्थः । (605) ऐकात्म्यस्याप्रतिपाद्यत्वात् तच्छेषत्वं प्रवेशस्य न युक्तम्, अत्राह—**व्याकृतेति** । स्वभावतः—विना शास्त्रोपदेशम् । लोकतः—घटादिदृष्टान्तादित्यर्थः । (607) द्वैतानुवादेन अद्वैत-

---

1. **तद्दर्शयन्**—मुक्तिसाधनज्ञानसाधनं दर्शयन् ।

* **तद्याथात्म्यमिति** तस्य जगतः याथात्म्यं-तत्त्वं प्रत्यक्चैतन्यमित्यर्थः । "लोकतः—लोकैः, दृष्टे इत्यन्वयः" इति **शास्त्रप्रकाशिकाकाराः** ।

बिम्बात्मना प्रवेशस्य ननु दूषणमीरितम् ।
विप्रकृष्ट्याद्यभावोक्त्या भूयः कस्मात्स आश्रितः ।। (609)
संभवाद्विप्रकृष्ट्यादेरदुष्टो दूषितः पुरा ।
कथं तदिति चेदत्र युक्तिलेशोऽभिधीयते ।। (610)
निर्धूताशेषनानात्वतद्धेतुरविभागवान् ।
अनन्यसाक्षिकः प्रत्यङ्ङासीन्नामादिजन्मतः ।। (611)
द्रष्ट्रादिरूपतस्तावद्व्यतिरेकोऽभवत्पुरा ।
नामादिजन्मनि द्रष्टेत्यादिरूपान्वयोऽप्यभूत् ।। (612)

प्रतिपादनात् [1]तादर्थ्येन प्रवेशकल्पनं युक्तमिति [2]भाष्यमवतारयति—**यत इति**। (607-608)

बिम्बात्मना प्रवेशे युक्तिनिरूपणम्

प्रतिबिम्बवत्प्रवेशस्य [3]निरस्तत्वात् कथं तत्स्वीकारः, इति शङ्कते—**बिम्बात्मनेति** । (609) परिहरति—**संभवादिति** । अनवच्छिन्नचैतन्यस्य केनापि विप्रकर्षाद्ययोगात् कथं दुष्टत्वाभावः, इत्याह—**कथमिति**। [4]कल्पित-वस्त्वन्तरेण [5]विप्रकर्षादि स्वीकृत्य परिहरति—**अत्रेति**। (610) [6]युक्तिं प्रकटयितुं प्रथमं प्रतिबिम्बस्थानीयाज्जीवात् ब्रह्मणो बिम्बस्थानीयस्याभेदं साधयति—**निर्धूतेति** । भेदाभेदं व्यावर्तयति—**अविभागवानिति** । [7]तर्हि साधकाभावादसिद्धिः, अत्राह—**अनन्येति** । नामादिजन्मतः **पुरा**—प्राक् जगत्सर्गात्। तस्य द्रष्ट्रादिरूपतो व्यतिरेकोऽभवत्—व(स)[स्तु]तो निष्प्रपञ्चं

---

1. **तादर्थ्येन**—अद्वैतधीशेषत्वेन ।
2. **भाष्य**—'जलसूर्यादिप्रतिबिम्बवदात्मप्रवेशश्च प्रतिबिम्बवत् व्याकृते कार्ये उपलभ्यत्वम्' इति भाष्यम् ।
3. **निरस्तत्वात्**—विप्रकर्षाद्ययोगेन पूर्वपक्षवर्णनावसरे दूषितत्वात् ।
4. **कल्पितवस्त्वन्तरेण**—कल्पितं यत् आत्मातिरिक्तं वस्तु तेन ।
5. **विप्रकर्षादीति** कल्पितमिति शेषः ।
6. **युक्तिं**—प्रतिबिम्बवत्प्रवेशपक्षसाधकयुक्तिम् ।
7. **तर्हि**—भेदस्याभावे ।

* अप्पात्रोत्थापिताद्भानोर्दिवि भानुर्यथेक्ष्यते ।
सुषुप्तस्थस्तथा धीस्थात् कर्तृभोक्तृत्वलक्षणात् ॥ (613)

द्रष्टृश्रोत्रादिरूपश्च यश्च द्रष्ट्रादिसाक्ष्यपि ।
बुद्धितत्कारणोपाधी क्षेत्रज्ञेश्वरसंज्ञकौ ॥ (614)

'स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।'
इत्यादिस्थानभेदोऽपि वेदान्तोक्तौ विनिश्चितः ॥ (615)

जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ।
तद्भावाभावसाक्ष्यात्मा ह्येतच्च श्रुतिमस्तके ॥ (616)

वस्तु । 'नान्योऽतोऽस्ति द्रष्टा' (बृ. 5-7-23) इत्यादिश्रुतिविरोधः, अत्राह—**नामादीति**। सर्गादूर्ध्वं बुद्धिस्थप्रतिबिम्बरूपेण स एव द्रष्ट्रादिरूप इत्यर्थः। (611-612) जीवपरयोरेकत्वे कथं भेदधीरिति चेत्, स्थानभेदादिति सदृष्टान्तमाह—**अप्पात्रेति**। (613) स्थानभेदात् संज्ञाभेदाच्च परमार्थ एव [1]तयोर्भेदः स्यात् हिमवद्विन्ध्यवत्, अत्राह—**द्रष्ट्रिति**। औपाधिकभेदादेव संज्ञादिभेद इत्यर्थः। (614) स्थानभेदे [2]**माण्डूक्योपनिषदमुदाहरति—स्वप्नेति**। आद्यौ—[3]**विश्वतैजसौ,** मिथ्याज्ञानतत्कारणाज्ञानबद्धौ। प्राज्ञः—स्वापाभिमानी मिथ्याज्ञानहीनः केवलाज्ञानबद्धः। आदिपदेन हृदयादिस्थानसंग्रहः। (615) जीवातिरिक्तः परमात्मा नास्तीति **मीमांसकाः**। तान्प्रत्याह—**जिघ्राणीति**। मं गन्धमहं जिघ्राणीति गन्धादिज्ञानकर्तृत्वेन स्थितं प्रमातारं यः पश्यति, स त्मा। प्रमातृभावाभावयोः साक्षी वेदान्तप्रामाण्यादस्तीत्यर्थः। (616) प्रति-

---

प्पात्रोत्थापिताद्भानोः' इत्यनन्तरं भिन्नः इति शेषोऽनुसन्धेयः। "प्रतिबिम्बस्य ाविनाभूतत्वेन तल्लिङ्गत्वात् उदकपात्रप्रतिबिम्बितात् आदित्यादाकाशस्थः ता यथा गम्यते। तथा बुद्धिप्रतिबिम्बितात् अवस्थाद्वयगतात् कर्त्रादिरूपात् पाधेः आत्मनः सुषुप्तस्थः कारणोपाधिः परोऽधिगम्यते, तस्य तदपेक्षत्वादिः।" इत्यपि व्याचक्षते—**शास्त्रप्रकाशिकाकाराः**।

योः—जीवपरयोः।

माण्डूक्योपनिषदमिति तत्कारिकामित्यर्थः।

विश्वतैजसौ—जाग्रदभिमानी विश्वः। स्वप्नाभिमानी तैजसः।

अर्थान्तरनिरासार्थं दूषणं चोदितं पुरा ।
तदभावाददुष्टत्वात् प्रवेशो मुखबिम्बवत् ॥ (617)

दर्पणाभिहता दृष्टिः परावृत्त्य स्वमाननम् ।
व्याप्नुवन्त्यविभागेन भ्रान्तिं नो जनयेद्यथा ॥ (618)

इहापि कारणोपाधिः केवलोऽप्यविवेकतः ।
* बुद्ध्यादिकार्यगैर्धर्मैः प्रतिबिम्बवदीक्ष्यते ॥ (619)

यथोक्तार्थप्रसिद्ध्यर्थं वचांसि सुबहून्यपि ।
त्रय्यन्तेषूपपद्यन्ते तत्सृष्ट्वेत्यादिकानि च ॥ (620)

दिग्देशकालशून्यस्य प्रवेशो बिलसर्पवत् ।
न त्वाञ्जसः परस्यास्ति तेनाविद्याप्रकल्पितः ॥ (621)

बिम्बवत् प्रवेश(स्य)[स्या]दुष्टत्वे, कथं तत्र दूषणमुदितम्, अत्राह—**अर्थान्तरेति** । ब्रह्मातिरिक्तप्रतिबिम्बाधारस्यार्थान्तरस्याभावेन प्रतिबिम्बवत् प्रवेशे दूषणमुक्तम् । तदभावात्—अर्थान्तरनिरासाभावात्, [1]ब्रह्मातिरिक्तप्रतिबिम्बाधारभावात् प्रतिबिम्बवत् प्रवेश इत्यर्थः । (617) प्रतिबिम्बस्य आदर्शादौ कीदृशः प्रवेश इति, [2]तत्स्थत्वेन मिथ्याज्ञानोत्पत्तिः, इत्याह—**दर्पणेति** । (618) प्रकृते तत्साम्यमाह—**इ(दा)[हा]पीति** । (619) एवंप्रकारप्रवेशप्रतिपादकानि भाष्यकारैः उदाहृतानि, इत्याह—**यथोक्तेति** । (620) [3]उक्तविधप्रवेशद्रढिम्ने [4]तस्य प्रकारान्तरं परास्यति—**दिग्देशेति** । (621) 'सुबहूनि' (वा. 620) इति सुशब्दद्योति-[5]तवाक्यान्तराणि उदाहरति—**अग्निरिति** । 'अग्निर्यथैको भुवनं प्रविष्टः

---

1. **ब्रह्मातिरिक्तप्रतिबिम्बाधारभावादिति** कल्पितेत्यादिः ।
2. **तत्स्थत्वेन**—आदर्शादिगतत्वेन रूपेण ।
* **प्रतिबिम्बवदीक्ष्यते** इति यथा मुखं स्वतः श्यामतादिहीनमुपाधियोगात् प्रतिबिम्बद्वारा श्यामतादिशालीव दृश्यते, तथा बुद्ध्यादिकार्यगैः धर्मैः कर्तृत्वादिभिः उपेतः ईक्ष्यते इत्यर्थः ।
3. **उक्तविधप्रवेशेति** प्रतिबिम्बवत्प्रवेशेत्यर्थः ।
4. **तस्य**—प्रवेशस्य ।
5. **वाक्यान्तराणि**—भाष्यकारोक्तवाक्यातिरिक्तानि श्रुतिवाक्यानि ।

अग्निः सूर्यो मरुद् यद्वत् प्रविष्टो भुवनं तथा ।
अप्रविष्टस्वभावोऽपि कार्यमात्माविशज्जगत् ॥ (622)

प्रत्यग्याथात्म्यदृक्सिद्धिहेतुत्वाच्च भवेदिदम् ।
जगज्जनिस्थितिध्वंसप्रवेशानां प्रयोजनम् ॥ (623)

* तद्दृष्टेः पुरुषार्थत्वश्रवणादसकृच्छ्रुतौ ।
ब्रह्म वेदेत्येवमादौ क्लृप्ताः सृष्ट्यादयस्ततः ॥ (624)

* युक्त्या नैवोपपद्यन्ते जगत्सृष्ट्यादयो यतः ।
प्रत्यगज्ञानमात्रोत्था जगत्सृष्ट्यादयस्ततः ॥ (625)

(का. 2-2-9) 'सूर्यो यथा सर्वलोकस्य चक्षुः' (का. 12-2-11) 'वायुर्यथैको भुवनं प्रविष्टः रूपं रूपं प्रतिरूपो बभूव' (का. 2-2-10) इति श्रुतय उदाहार्याः । (622)

जगज्जन्मादेः कल्पितता

जगज्जन्मादेरैकात्म्यप्रतिपत्त्यर्थत्वाच्च कल्पितता, इत्याह—**प्रत्यगिति** । (623) ज्ञानार्थत्वमेव कुतः, अत्राह — **तद्दृष्टेरिति** । (624) [1]**देवताधिकरणन्यायेन** सृष्ट्यादिश्रुतेः स्वार्थेऽपि प्रमाणत्वात् जन्मादेः **परमार्थत्वम्**, अत्राह—**युक्त्येति** । (625) युक्तिं प्रथयति—**नासत इति** । (626) सृष्ट्यादेः फल-

---

* **तद्दृष्टेरिति** ऐकात्म्यदृष्टेः ब्रह्मभावरूपफलश्रवणात् सृष्ट्यादिश्रुतेः स्वार्थे फलवत्त्वाभावात्, फलवत्संनिधावफलं तदङ्गमिति न्यायात्, सृष्ट्यादीनामैकात्म्यप्रतिपत्त्यर्थत्वमेवेति भावः ।

1. **देवताधिकरणन्यायेनेति** प्रमाणान्तरविरोधाभावे, अर्थवादानामपि स्वार्थे प्रामाण्यमिति तन्न्यायः ।

* "तेषां कल्पित्वे हेत्वन्तरमाह—**युक्त्येति** सृष्ट्यादयो हि सक्रियस्य अविक्रियस्य वा । नाद्यः, अनवस्थानात् । नेतरः, सदा प्रसङ्गात् । न च ते स्वतः, हेत्वन्वेषणवैयर्थ्यप्रसङ्गात् । नापि परतः, तस्य तत्कारणस्वाभाव्ये च प्राचीनदोषात्, तदस्वाभाव्ये कदाचिदपि तदभावापातात् । हेत्वन्तरापेक्षया तस्य तत्कर्तृत्वे च अनवस्थानात्, इत्यादिन्यायासहिष्णवः । अतः स्वाज्ञानकल्पिता एवेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

नासतो जन्मना योगः सतः सत्त्वान्न चेष्यते ।
कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनिः ॥ (626)

तथा रूपं रूपमिति मन्त्रवर्णोऽपि चात्मनः ।
याथात्म्यदर्शनायैव सृष्ट्यादि प्रत्यपीपदत् ॥ (627)

व्याप्तिः प्रवेशशब्देन भण्यते कारणात्मनः ।
* **बुद्ध्यादिकार्यविषया व्याप्यव्याप्यत्वमेतयोः ॥** (628)

असाधारणतो न स्यात् कालदिग्देशभिन्नयोः ।
मिथोऽसंगतितो व्याप्तिर्हिमवद्विन्ध्ययोरिव ॥ (629)

वत्संनिधावफलं तदङ्गमिति युक्त्या धीशेषत्वमुक्तम् । इदानीं [1]तत्र श्रुतिमुदाहरति —**तथेति** । 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय' (बृ. 4-5-19) इति श्रुतिः । तस्मात् तत्त्वप्रतिपत्त्यर्थं प्रवेशादिरारोप्यते, इत्याह—**आत्मन इति** । (627) प्रवेशस्य मिथ्यात्वे भ्रान्तेः कर्तृनियमाभावात् यस्य कस्यापि प्रवेशः स्यात् न ब्रह्मण एव, इत्यत्राह—**व्याप्तिरिति** । (628) कार्यविषय-व्याप्तिः प्रवेशपदवाच्या ब्रह्मकर्तृका चेत्, भिन्नयोरेव सा[2], इत्यद्वयविरोधः, अत्राह—**असाधारणत इति** । [3]इतरेतरव्यावृत्तरूपत्वादित्यर्थः । (629) एवं तर्हि अभिन्नस्य

---

1. **तत्र**—सृष्ट्यादेः धीशेषत्वे ।
2. **सा**—व्याप्तिः ।
3. **इतरेतरव्यावृत्तरूपत्वादिति** न हि परस्परं व्यावृत्तयोः हिमवद्विन्ध्ययोः व्याप्तिरस्ति इति भावः ।

* " 'व्याप्यव्याप्यत्वमेतयोः' इत्यत्र आविद्य तादात्म्यमभिसंहितम् । किञ्च अन्यत्रापि व्याप्तिः भिन्नयोरभिन्नयोर्वा भिन्नाभिन्नयोर्वा । नाद्यः, इत्याह—**असाधारणत इति** । अत्यन्तभेदे न व्याप्तिः इत्युक्त्वा कल्पान्तरं निरस्यति—**मिथ इति** यथा मिथः अत्यन्तं भिन्नयोः हिमवद्विन्ध्ययोर्न व्याप्तिः, तथा अत्यन्तमभिन्नयोरपि न सा युक्ता । न चेष्टा । नह्येकस्मिन्नेव धूमे अग्नौ वा व्याप्तिरित्यर्थः । अपिना तृतीयं प्रत्याह । न हि भिन्नाभिन्नयोर्व्याप्तिः, एकत्र तदयोगादिति भावः । किञ्च सा जातिव्यक्त्योर्वा कार्यकारणयोर्वा, तद्विलक्षणयोर्वा । नाद्यः, इत्याह—**भिन्नेति** । भिन्नशब्दो व्यक्तिविषयः । **तद्वदिति** हिमवद्विन्ध्ययोरिव न व्याप्तिरित्यर्थः । तत्र हेतुः—**तदसाधारणेति** तयोर्जातिव्यक्त्योः अत्यन्तभिन्नयोः असाधारणात्मना स्थितेर्न व्याप्तिरित्यर्थः ।" इति **शास्त्रप्रकाशिकाकाराः** वर्णयन्ति ।

मिथो विभिन्नयोर्नासौ नापि सैकात्म्य इष्यते ।
भिन्नसामान्ययोस्तद्वत्तदसाधारणात्मतः ॥ (630)

कार्यकारणयोरेवं भिन्नाभिन्नविकल्पतः ।
वस्तुवृत्तेन संव्याप्तिर्न युक्त्येहोपपद्यते ॥ (631)

*यत्र कात्स्न्येंन वृत्तिः स्याद्रज्जुसर्पादिवद्द्वयोः ।
व्याप्तिर्मुख्यास्तु तत्रैव तथात्मानात्मनोरपि ॥ (632)

तमसैव यथा सर्पं स्रक् प्रविष्टा न तु स्वतः ।
प्रत्यगज्ञानहेतूत्थमात्मैवं मायया जगत् ॥ (633)

कया मर्यादया कार्यं मायावी माययाविशत् ।
आनखाग्रेभ्य इत्युक्त्या मर्यादाऽतोऽस्य भण्यते ॥ (634)

नखाग्रावधिका यस्मात्संवित्पुंसोऽभिजायते ।
अतः सामान्यवृत्त्यात्मा प्राविशद्देहमीश्वरः ॥ (635)

भिन्नाभिन्नयोर्वा व्याप्तिः पारमार्थिकी स्यात्, अत्राह— **मिथ इति** । '**विभिन्नयोर्नासौ**' इति दृष्टान्तत्वेनानुवादः भिन्नसामान्ययोः—भिन्नाभिन्नयोरिति यावत् । **असाधारणात्मत इति** । रूपाभेदादित्यर्थः । (630) फलितं निगमयति— **कार्येति** । (631) क्व तर्हि मुख्यव्याप्तिरिति चेत्, अधिष्ठानाध्यस्यमानयोः, इत्याह—**यत्रेति** । (632) सोदाहरणं प्रवेशविचारमुपसंहरति—**तमसेति** । (633)

'आनखाग्रेभ्यः यथा क्षुरः' इत्याद्युत्तरवाक्यार्थनिरूपणम्

[1]आकांक्षापूरणपूर्वकमुत्तरवाक्यमवतारयति—**कयेति** । **अत इति** । **आकांक्षितत्वादित्यर्थः** । (934) उक्तमर्यादायां युक्तिमाह—**नखेति** । **सामान्यवृत्त्या**—चैतन्यव्या(से)[प्त्ये]त्यर्थः । (635) '**यथा**' [2]इत्यादिदृष्टान्तद्वयतात्पर्यमाह—

---

* **यत्र कात्स्न्येनेति** अधिष्ठानाध्यस्यमानयोः कल्पितं तादात्म्यमेव व्याप्तिपदमुख्यार्थः इति भावः । **तमसा**—स्वाज्ञानेन ।

1. **उत्तरवाक्यमिति** "आनखाग्रेभ्यः, यथा क्षुरः क्षुरधानेऽवहितः स्यात् विश्वम्भरो वा विश्वम्भरकुलाये ।" इति वाक्यम् ।

2. **दृष्टान्तद्वयेति** क्षुरः, विश्वम्भरश्चेति दृष्टान्तद्वयेत्यर्थः ।

दृष्टान्ताभ्यामिमां वृत्तिं व्याचष्टे प्रत्यगात्मनः ।
कृत्स्नकारणतत्कार्यवृत्त्युपाधिसमाश्रयात् ॥ (636)

मिथो विभक्ता एकत्र क्षुरधाने यथा क्षुराः ।
क्षुरधानाद्विभज्यन्ते तथात्मा नाडिभेदतः ॥ (637)

* ओतप्रोतात्मना तस्थुरर्वाग्या भूमयोऽक्षरात् ।
तत्तद्भूमिपरिच्छेदात् क्षेत्रज्ञः पर एव सन् ॥ (638)

सूक्ष्मताव्यापिते ज्ञेये भूम्यादेर्यावदक्षरम् ।
पूर्वपूर्वप्रहाणेन तन्निष्ठा वियदात्मना ॥ (639)

दृष्टान्ताभ्यामिति । कृत्स्नकारणं–विश्वमूलमज्ञानम् । तत्कार्यं–महदादि । तत्रोभयत्र चैतन्याभासोपगमेन सामान्यविशेषव्याप्तिद्वयं दृष्टान्तद्वयेन दर्शयतीत्यर्थः । (636) विशेषव्याप्तिं विशदयति—**मिथ इति** । क्षुरो धीयते यस्मिन् तत् क्षुरधानं, तदीयावान्तरच्छिद्रसंबन्धात् क्षुराणां परस्परमसंबन्धवत्, आत्मनो [1]नाडीभेदसंबन्धात् [2]विशेषव्याप्तिरित्यर्थः । (637) विशेषव्याप्तेरौपाधिकत्वे तत्तुल्यन्यायतया सामान्यव्याप्तिर(थौ)[प्यौ]पाधिकीति व्याप्तिद्वयस्यैवौपाधिकत्वात् क्षेत्रज्ञत्वं न स्वाभाविकमित्यैक्यसिद्धिः, (अत्र)[इत्या]ह—(उ)[**ओ**]**तेति** । (638) उपाधीनां परमार्थत्वादद्वैतहानिरित्यावस्थ्यम्, अत्राह—**सूक्ष्मतेति** । गन्धादेः भूम्यादेः । पूर्वपूर्वप्रहाणेन दशगुणाधिके परस्परस्य ज्ञेये ? तन्निष्ठा–सूक्ष्मत्वव्यापित्वयोः समाप्तिः । (व्य)[वि]यदात्मना(यत्रारोपि)ब्रह्मरूपेणेत्यर्थः । (639)

---

1. **नाडीभेदसंबन्धात्** विभिन्नानां चक्षुरादिनाडीविशेषाणां संबन्धात् ।

2. **विशेषव्याप्तिः**—द्रष्टा, श्रोता इत्यादिविशेषव्याप्तिः ।

* **ओतेति** अक्षरात्—अज्ञातात् ब्रह्मणः अर्वाक्—अधस्तात् या पृथिव्याद्याः विकारभूमयः दीर्घतन्तुवदोतात्मना तिर्यक्तन्तुवत् प्रोतात्मना च तस्मिन्नेवाक्षरे तस्थुः । अनवच्छिन्नः सन् पर एवात्मा, तत्तद्भूमिपरिच्छेदात्—ताभिः ताभिः समष्टिव्यष्टिभूताभिः भूमिभिः परिच्छेदात् क्षेत्रज्ञो भवतीति वार्त्तिकार्थो बोध्यः । कार्यापेक्षया कारणस्य सूक्ष्मत्वं व्यापित्वञ्च बोध्यम् ।

विश्वंभरोऽग्निर्विज्ञेयो विश्वस्य भरणादिह ।
दारु कृत्स्नमभिव्याप्य यथाग्निर्दारुणि स्थितः ॥ (640)

संव्याप्य तद्वदखिलं देहमात्मा व्यवस्थितः ।
तस्थावसंव्याप्य यथा क्षुरधाने क्षुरस्तथा ॥ (641)

श्रोत्रादिनाडीमध्यस्थ आत्माऽव्याप्य तनुं स्थितः ।
वृत्ती द्वे प्राप्नुतेऽतद्वान् स्वप्नजाग्रदवस्थयोः ॥ (642)

सामान्यमात्रवृत्तिं स सुषुप्ते प्रतिपद्यते ।
प्रत्यग्याथात्म्यसंमोहान्न त्वसौ परमार्थतः ॥* (643)

महासत्ता वियज्ज्ञेयं कृत्स्नावाग्भूमिसंप्लुतेः ।
व्यक्तयोऽन्त्या विशेषाः स्युस्तदसाधारणत्वतः ॥ (644)

सामान्यानि विशेषाश्च तन्मध्यपतितानि च ।
सामान्यात्मविशेषत्वं तदुपाधिरगात्परः ॥ (645)

---

[1]द्वितीयदृष्टान्तवाक्यगतविश्वंभरपदार्थमाह—**विश्वंभर इति** (640) दार्ष्टान्तिकमाह—**संव्याप्येति** । [2]तत्र व्यतिरेक[3]मुखेन विशेषव्याप्तिमुदाहरति—**तस्थाविति** । (641) कस्यामवस्थायां कीदृशी वृत्तिः, अत्राह—**वृत्ती इति** । अतद्वान् इति पदम् । अतद्वतः तद्वत्त्वं [4]व्या(द)[ह]तम्, अत्राह—**प्रत्यगिति** । (642 - 643)

एवं भौतिकदेहे व्याप्तिद्वयमुक्त्वा, ततोऽन्यत्र दर्शयितुं पदार्थान् विभजते **महासत्तेति** । वियत् - ब्रह्म । महासत्ता—सामान्यमात्रम् । अन्त्या विशेषाः- अन्त्यकार्याणि । व्यक्तयः—विशेषा एव । (644) महदादीनां सामान्यविशेषत्व(मत्रा)[मा]ह—**सामान्यानीति** । विभागफलमाह—**सामान्यात्मेति** । कारणे

---

1. **द्वितीयदृष्टान्तवाक्येति** 'विश्वंभरो वा विश्वंभरकुलाये' इति वाक्येत्यर्थः ।
2. **तत्र**—देहे सामान्यव्याप्तौ ।
3. **व्यतिरेकमुखेनेति** विशेषव्याप्तेः सामान्यव्याप्तिसादृश्यस्यान्वयरूपेणाभावादिति भावः ।
4. **व्याहतम्**—विरुद्धम् ।
* **न त्वसौ परमार्थत इति** आत्मनोऽसङ्गत्वादिति भावः ।

श्रोत्रत्वगादिनाडीस्थं शब्दाद्यालोचनादिभिः ।
* वेष्टितं नामरूपाभ्यां देहेऽमुष्योपलभ्यते ॥ (646)

असाधारणसामान्यरूपाभ्यामीक्ष्यमीक्षते ।
सर्वमानैः प्रसिद्धत्वादतो व्युत्थाप्यते ततः ॥ (647)

अयं मेयः प्रमाताहं मानमेतदितीक्षणे ।
मिथ्याज्ञाने जनस्तुष्टः स्वप्नमायेन्द्रजालवत् ॥ (648)

यतो मिथ्यावबोधोऽयं मतस्तदपनुत्तये ।
न पश्यन्ति तमित्याह ये पश्यन्ति यथोदितम् ॥ (649)

सामान्यव्याप्तिः, अन्त्यविशेषे विशेषव्याप्तिः, मध्यवर्तिषूभयव्याप्तिरित्यर्थः । (645) एवं सर्वत्र [1]व्याप्तिद्वयमुक्त्वा देहे विशेषव्याप्तौ अनुभवं मानयति—**श्रोत्रेति** । नामरूपाभ्यां हेतुभ्यां शब्दादिज्ञानलक्षणक्रियया च वेष्टितं—आपादितं श्रोत्रादीन्द्रियस्थ श्रोतृद्रष्टादिरूपम्, अमुष्य—देवदत्तस्य उपलभ्यते । अतो विशेषव्याप्तिरनुभवसिद्धेत्यर्थः । (646) बहिरपि व्याप्तिद्वयमुक्तं स्पष्टयितुं जगतः सामान्यविशेषत्वे मानमाह—**असाधारणेति** । अत्र गमकमाह—**सर्वेति** । ततः सर्वमानैः प्रसिद्धत्वात् सामान्यादेरवैदिकत्वात्, अतः - सामान्यविशेषरूपत्वात्, आत्मानं न पश्यतीति [2]श्रुत्या व्युत्थाप्यते इत्यर्थः । (647)

'तं न पश्यन्ति' इति वाक्यार्थनिरूपणम्

तर्हि जगतो मानसिद्धस्य वस्तुत्वात् न [3]ततो व्युत्थापनम्, अत्राह—**अयमिति** । जाग्र[4]त्प्रमेयादि मिथ्या, मेयादित्वात् स्वप्नमेयादिवदित्यर्थः । (648) तन्मिथ्यात्वफलमाह—**यत इति** । सामा[5]न्यविशेषरूपं पश्यन्नज्ञ एव, आत्मनो-

---

1. **व्याप्तिद्वयमिति** क्षुरवत् विशेषव्याप्तिं अग्निवत् सामान्यव्याप्तिं चेत्यर्थः ।
* चेष्टितं नामरूपाभ्याम् इति मु. पु. पाठः ।
2. **श्रुत्या**—'तं न पश्यन्ति' इति श्रुत्या ।
3. **ततः**—सामान्यविशेषरूपात् ।
4. **जाग्रत्प्रमेयादि**—जाग्रदवस्थाकालीनप्रमेयादि । एवं स्वप्नप्रयेयेत्यत्रापि ।
5. **सामान्यविशेषरूपमिति** आत्मानमिति शेषः ।

वस्त्वज्ञानैकनिष्ठत्वान्मिथ्याधीर्न हि वस्तुनि ।
न पश्यन्तीत्यतो युक्तं नेक्षन्ते वस्तु तत्परम् ॥ (650)

यद्यप्यत्राभिमानोऽस्ति निष्क्रियाकारकात्मनि ।
पश्यामीत्ययथार्थत्वात् मिथ्याधीरेव सा मता ॥ (651)

नन्वप्राप्तनिषेधोऽयं न पश्यन्तीति भण्यते ।
नैवं, सृष्ट्यादिवाक्यानां प्रत्यग्बोधैकहेतुतः ॥ (652)

मन्त्रोऽप्याहेममेवार्थं रूपं रूपमिति स्फुटम् ।
तद्दर्शनात्समस्तस्य पुरुषार्थस्य सिद्धितः ॥ (653)

पश्यन्तोऽपि न पश्यन्ति विरुद्धं कथमुच्यते ।
मेयासंस्पर्शिदृष्टित्वात् न पश्यन्तीति भण्यते ॥ (654)

ऽसामान्यविशेषत्वादित्यर्थः । (649) विश्वस्यात्मत्वात् तद्धीरप्यात्मधीरेव, इत्यत्राह—**वस्त्विति** । (650) अहं पश्यामि शृणोमि इत्यादि कार[1]करूपाभिमानस्याबाधि[त]त्वात् कथं तन्निषेधः, अत्राह—**यद्यपीति** । (651) आत्मदर्शनस्याप्राप्तत्वात् तन्निषेधो न युक्तः दैवनिषिद्धे कः प्रतिषेधः इति न्यायात्, इत्याह—**नन्विति** । 'तन्नामरूपाभ्याम्' 'स एष इह प्रविष्टः' इति च प्रकृतसर्गादेरात्मज्ञानार्थत्वात् प्रकृतमेव [2]तत्, इति परिहरति—**नैवमिति** (652) सर्गा[3]दिज्ञानार्थत्वे प्रागुक्तं मन्त्रं [4]न्यायञ्च स्मारयति—**मन्त्रोऽपीति** । (653) दर्शनस्य प्रकृतत्वेऽपि व्याघातादयमयुक्तः प्रतिषेधः, इत्याह—**पश्यन्तोऽपीति** । सामान्याद्यात्मना दर्शनस्य भ्रान्तित्वात् तत्त्वज्ञानाभावाभिप्रायेण प्रतिषेधात् न व्याघातः, इति परिहरति—**मेयेति** । (654) माना[5]न्तरानपहृतविषयत्वात् कथं भ्रान्तित्वम्, अत्राह—

---

1. **कारकरूपाभिमानस्य**—दृष्ट्यादिक्रियाकर्तृत्वाभिमानस्य ।
2. **तत्**—आत्मदर्शनम् ।
3. **सर्गादिज्ञानार्थत्वे**—सर्गादेः आत्मयाथात्म्यज्ञानार्थत्वे ।
4. **न्यायञ्च**—फलवत्संनिधावफलं तदङ्गमिति न्यायञ्च ।
5. **मानान्तरानपहृतविषयत्वात्**—मानान्तराबाधितविषयत्वात् ।

सदेवेत्यादिवाक्येभ्यः कृत्स्नं वस्तु यतोऽद्वयम् ।
संभवस्तद्विरुद्धस्य कुतोऽकृत्स्नस्य वस्तुनः ॥ (655)

अव्यावृत्ताननुगतं प्रत्यग्वस्तु स्वतोमितेः ।
तद्विरुद्धेह या दृष्टिर्मिथ्यारूपा न साऽन्यथा ॥ (656)

आत्मानात्मानमाप्नोति यतः प्रत्यक्तयाखिलम् ।
तदन्यानवशिष्टत्वादकृत्स्नः स्यादतोऽन्यथा ॥ (657)

अनात्मा नात्मरूपेण प्रत्यक्त्वात्सिद्धिमर्हति ।
* प्रत्यङ्मात्रैकयाथात्म्यात्कुतस्तद्व्यतिरेकतः ॥ (658)

देशतः कालतो रूपाद्वस्त्ववस्थादितोऽपि च ।
व्यभिचारोऽस्य संसिद्धः तद्विरुद्धात्मसाक्षिकः (659)

सदेवेति । कृत्स्नमित्यस्यार्थः अद्वयमिति । (655) आत्मस्वरूपपर्यालोचनयापि द्वैतबुद्धेः मिथ्यात्वं साधयति—अव्यावृत्तेति । (656)

आत्मनोऽपरिच्छिन्नत्वे हेत्वन्तरमाह—आत्मेति । शुक्तिरिव आरोपितरूप्यम्, आत्मा अनात्मानं अनवशेषेण व्याप्नोति यतः, तस्मात् तदन्यस्यानवशेषादपरिच्छिन्नः । अतोऽन्यथा—निरवशेषेण व्यापकत्वाभावे, परिच्छिन्नः कल्पितः स्यादिति भावः । (657) अनात्मापि प्रतीचोऽभेदेन सिद्ध्यति, भेदेन वा । नाद्यः, इत्याह—अनात्मेति । आत्मनः प्रत्यक्त्वादनात्मनः पराक्त्वादित्यर्थः । द्वितीयं दूषयति—प्रत्यगिति । (658) जगतः कल्पितत्वे हेत्वन्तरमाह—देशत इति । जन्याद्यवस्थां हित्वा वृद्ध्यादिप्राप्तिः अवस्थितौ व्यभिचारः । [1]गुणव्यभिचार आदिपदार्थः । मूर्तत्वात् अनित्यत्वात् भिन्नत्वात् विकारित्वात् गु(ण)[णि]त्वाच्च कल्पितमित्यर्थः । (659)

---

* प्रत्यङ्मात्रैकयाथात्म्यादिति प्रत्यगतिरिक्तस्वरूपस्याभावात् प्रतीचि कल्पितत्वेन अनात्मनः सिद्धिरित्यर्थः ।

1. गुणव्यभिचारः—प्राक्तनं नीलरूपादिकं विहाय रक्तादिरूपान्तरप्राप्त्यादिः ।

* प्रतिज्ञातार्थसिद्ध्यर्थं न पश्यन्तीति भण्यते ।
अकृत्स्नो हीति हेतूक्तिः सापि चैवं समर्थ्यते ॥ (660)

तदकृत्स्नत्वसंसिद्ध्यै प्राणन्नेवेत्युदीरणम् ।
अन्योन्यव्यभिचारित्वं प्राणादेरीक्ष्यते यतः ॥ (661)

यस्मिन् दृष्टेऽप्यदृष्टोऽर्थः स तदन्यश्च शिष्यते ।
तथाऽदृष्टेऽपि दृष्टः स्यादकृत्स्नस्तादृगुच्यते ॥ (662)

आविष्करिष्यन् हेत्वर्थमकृत्स्नत्वप्रसिद्धये ।
न ह्यसौ कृत्स्नतामेति चक्षुःश्रोत्रादिसंहतः ॥ (663)

परस्परानभिव्याप्तेर्नामरूपक्रियात्मनाम् ।
व्यभिचारादकृत्स्नत्वं स्यादनात्मैकरूपिणाम् ॥ (664)

'अकृत्स्नो हि सः प्राणन्नेव प्राणो नाम भवति' इत्यादिश्रुत्यर्थः

'[1]अकृत्स्नो हि' इत्यस्य तात्पर्यमाह—**प्रतिज्ञातेति**। [2]हेतुवाक्यं '**प्राणन्नेव**' इत्यादिना समर्थ्यते, इत्याह—**सापीति** । (660) '**न** पश्यन्ति' इति प्रतिज्ञा, '**अकृत्स्नो** हि' इति हेतुः, तत्समर्थनं '**प्राणन्**' इत्यादि, इति विभज्य, समर्थनं स्फोरयति—**तदिति** । (661) अकृत्स्नपदार्थमाह—**यस्मिन्निति**। यत्र घटादौ दृष्टेऽपि तदेवादृष्टं स्यात् अनेकांशत्वात् । तदन्यत् पटादिकमप्यदृष्टमवशिष्यते । तथा पटादावदृष्टेऽपि दृष्टः स्यात्, सोऽकृत्स्न इत्यर्थः । (662) द्रष्टुरात्मनः सर्वात्मत्वात् कथमकृत्स्नत्वम्, अत्राह—**आविष्करिष्यन्निति**। द्रष्ट्रादिरूपस्याकृत्स्नत्वसिद्ध्यर्थं '**अकृत्स्नो** हि' इति हेतुवाक्यार्थः '**प्राणन्नेव**' इत्यादिना समर्थ्यते इत्यर्थः । दर्शनादिकर्ता कृत्स्नः, आत्मत्वात् केवलात्मवत्, अत्राह—**न हीति** । (663) [3]तदुपपादयति—**परस्परेति** । (664)

---

1. **अकृत्स्नो हीति** "अकृत्स्नो हि सः, प्राणन्नेव प्राणो नाम भवति। वदन् वाक्पश्यंश्चक्षुः, शृण्वन् श्रोत्रम्, मन्वानो मनः।" इति श्रुतिरनुसन्धेया।

* प्रतिज्ञार्थस्य सिद्ध्यर्थम् इति मु. पु. पाठः।

2. **हेतुवाक्यं**—'अकृत्स्नो हि सः' इति वाक्यम्।

3. **तदुपपादयति**—दर्शनादिकर्तुः संहतस्य अकृत्स्नत्वमुपपादयति।

असंहतः संहतः सन् प्रत्यङ्मोहैकहेतुतः ।
प्राणनादिक्रियाः कुर्वन् प्राण इत्यभिधीयते ॥ (665)

तस्मिंश्च प्राणने वायोर्व्यापारः करणात्मना ।
उत्सृज्यमानः कर्मत्वं विज्ञानात्मन एति सः ॥ (666)

साक्षादात्मोत्सृजन्वायुं तस्मिन् प्राणनकर्मणि ।
अपेतकारकग्रामः प्रतीचैवानुभूयते ॥ (667)

कर्त्रादिकारकाण्यस्मिन्नसाधारणरूपतः ।
* अतद्धर्मक आभान्ति ह्यागमापायसाक्षिणि ॥ (668)

साक्षिरूपं स्वतःसिद्धं तेनैष्वव्यभिचारतः ।
कर्त्रादि तु तमोऽन्तस्य रूपं धर्माद्यपेक्षया ॥ (669)

अनित्यहेतुतोऽनित्यं तेन कर्त्रादि लक्ष्यते ।
निर्हेतु प्रत्यगज्ञानं लक्ष्यते तेन नित्यवत् ॥ (670)

परस्य निर्विकारस्य कथं प्राणनादिक्रियाकर्तृत्वेन प्राणादिशब्दवाच्यत्वम्, अत्राह—**असंहत इति** । (665) अज्ञानात्कर्तृत्वेऽपि किं तत्र करणं कर्म वा स्यात्, अत्राह—**तस्मिंश्चेति** । प्राणनक्रियायां वायोः साधकतमत्वात् करणत्वं, क्रियाव्याप्यत्वात्कर्मत्वमित्यर्थः । [1]तर्हि कर्तृत्वमपि [2]तस्यैव स्यात्, अत्राह—**साक्षादिति** । (667) तर्हि कर्तृकरणकर्मणां परमार्थत्वादद्वैतहानिः, अत्राह—**कर्त्रादीति** । (668) साक्षिणोऽपि व्यभिचारित्वेन कल्पितत्वात् कथं तत्र प्राणाद्यध्यासः, अत्राह—**साक्षिरूपमिति** । चिन्मात्रस्य निर्विकारत्वात् न तस्य कर्तृत्वादि रूपमित्यर्थः । कस्य तर्हि तत् रूपम्, अत आह—**कर्त्रादीति** । अज्ञानतत्कार्यबुद्ध्युपहितचैतन्यस्य धर्मादिकृतं कर्तृत्वादि रूपमित्यर्थः । (669) [3]तमोऽन्तस्य नित्यत्वात् तद्गतकर्तृत्वाद्यपि नित्यं

---

1. **तर्हि**—वायोरेव करणत्वे कर्मत्वे च ।
2. **तस्यैव**—वायोरेव ।
* **अतद्धर्मके**—कर्त्रादिकारकभेदशून्ये ।
3. **तमोऽन्तस्य**—अज्ञानतत्कार्यबुद्ध्युपहितचैतन्यस्य ।

प्रत्यगज्ञानमात्रैकनीडत्वान्नान्यरूपता ।
क्रियाकारकरूपाणां नित्यानित्यमतिः कुतः ॥ (671)

अतस्तद्व्यभिचारेण नामरूपक्रियात्मनाम् ।
अकृत्स्नव्यपदेशेन मिथ्याज्ञानत्वमुच्यते ॥ (672)

अज्ञातायां यथा रज्ज्वां तदध्यस्तैकरूपिणाम् ।
व्यभिचारः स्रगादीनां प्रतीच्येवमनात्मनाम् ॥ (673)

प्राणाग्नयः पुरा बुद्धेः सुप्तेष्वन्येषु जाग्रति ।
अतस्तद्विषया तावत्कर्तृतेहोच्यते प्रभोः ॥ (674)

स्यात्, अत्राह—अनित्येति । [1]धर्मादिनिमित्तस्यानित्यत्वादनित्यं (त्व) कर्त्रादि तेन—प्रतीचा ल(क्ष)[क्ष्य]ते इत्यर्थः । तर्हि अज्ञानमपि दृश्यत्वात् कर्त्रादिवदनित्यम्, अत्राह—निर्हेत्विति । तत्त्वज्ञाननिवर्त्यत्वात् निर्हेतु-प्रयोगः । (670) कर्तृत्वाद्येवानित्यं, आकाशादि नित्यम्, इत्यत आह—प्रत्यगिति । (671) हेतुवाक्यार्थ(मा)[मुप]पादितमुपसंहरति—अत इति । यतः परिच्छिन्नस्य नित्यत्वादि न युक्तम्, अतः प्रतीचि व्यभिचारात् कर्तृत्वादेः [2]अकृत्स्नवाक्येन मिथ्यात्वमुच्यते इत्यर्थः । (672) [3]व्यभिचारं सोदाहरणमाह—अज्ञातायामिति । (673) 'प्राणन्नेव' इत्यादिना [4]प्रथमं प्राणव्यापारकर्तृत्वाभिधाने हेतुमाह—प्राणाग्नय इति । पुरा बुद्धेः—प्रबोधात्प्रागित्यर्थः । (674) प्राणनादिकर्तृत्वं श्रुतत्वात् पारमार्थिकमिति

---

1. **धर्मादिनिमित्तस्य**—धर्मादिजन्यस्य । अज्ञानस्य ध्वंसाप्रतियोगित्वलक्षणनित्यत्वं न संभवतीति अनादित्वरूपं तद्विवक्षितमित्याशयेन निर्हेतु इति पदोपादानमिति समुदायार्थः ।
2. **अकृत्स्नवाक्येन**—'अकृत्स्नो हि सः' इत्यादिवाक्येन ।
3. **व्यभिचारं**—प्रतीचि कर्तृत्वादीनां व्यभिचारम् ।
4. **प्रथमम्मिति** 'वदन् वाक्', इत्यादिना वदनादिकर्तृत्वाभिधानात्पूर्वमेवेति यावत् । प्राणानामग्नित्वं 'प्राणाग्नय एव एतस्मिन् पुरे जाग्रति' इति श्रुति-प्रसिद्धम् । अवस्थात्रयव्यापित्वात् प्राणव्यापारस्य तत्कर्तृत्वं प्रथमं दर्शितमिति भावः ।

नामतो रूपतश्चैवं प्राणनादिषु कर्मसु ।
लक्ष्यतेऽविद्यया तद्वान् रज्जुः सर्पादिभिर्यथा ॥ (675)

प्राणन्नेवेत्यवधृतेस्तदर्थान्तररूपतः ।
प्राणाद्यकृत्स्नतासिद्ध्यै व्यभिचारः प्रदर्श्यते ॥ (676)

कर्मैतदेव कुर्वाणः काले चात्रैव भण्यते ।
अत्रैव च क्रियायोगे तद्रूपाह्वः स इष्यते ॥ (677)

तद्वानसमकालं तु प्राणनादिक्रियोत्थितेः ।
प्रागूर्ध्वं च तदन्येषु प्राणासंभवहेतुतः ।
न तन्नामा न तद्रूपस्तदन्यत्र च कर्मणि ॥ (678)

प्राणनानन्तरं यस्मात् क्रियाशक्तेः समुद्भवः ।
वदन्वागित्यतः प्राह क्रमयोगानुरोधतः ॥ (679)

नेत्याह—**नामत इति** । (675) एवशब्दार्थमाह—**प्राणन्नेवेति** । तदर्थान्तररूपतः—आत्मीयवदनकर्त्रादिरूपात्, [1]अभिमतरूपस्याकृत्स्नत्वसिद्ध्यर्थं व्यभिचारः प्रदर्श्यते इत्यर्थः । (676) रूपान्तरात् व्यभिचारं साधयति—**कर्मेति** । प्राणनादिव्यापारं कुर्वन्नेवात्मा तद्व्यापारोत्पत्तिकाल एव प्राणनादिसंबन्धे च निमित्ते सत्येव [2]तन्ना(म)[मा]तद्रूपश्च भवति । असमकालं—वदनादिव्यापारान्तरसमकालं प्राण इति नोच्यते । एवं सर्वत्र । अतो व्यभिचार इत्यर्थः । 'असमकालम्' इत्येतत् स्पष्टयति—**प्राणनादीति** । (677-678) प्राणव्यापारकर्तृत्वानन्तरं धीन्द्रियव्यापारकर्तृत्वं हित्वा [3]कर्मेन्द्रियव्यापारकर्तृत्वाभिधाने हेतुमाह—**प्राणनेति** । प्राह कर्मेन्द्रियव्यापारकर्तृत्वम् इत्यध्याहारः । (679) आत्मनः

---

1. **अभिमतरूपस्य**—प्राणनादिक्रियाकर्तृरूपस्य । 'प्राणन्नेव प्राणो नाम भवति' इत्यस्य प्राणनक्रियां कुर्वन्नेव प्राणशब्दवाच्यो भवति इत्यर्थः । एवकारेण न तु वदनादिक्रियां कुर्वन्नित्यर्थो लभ्यते । ततः तत्तत्क्रियाकर्तृरूपस्य व्यभिचारः प्रदर्शितो भवति ।
2. **तन्नामा**—प्राणनामधेयवान् ।
3. **कर्मेन्द्रियव्यापारकर्तृत्वाभिधाने**—'वदन्वाक्' इत्यभिधाने ।

वक्तीति वाग्भवेदात्मा ह्युच्यते वाग्भवेद्ध्वनिः ।
तथोच्यतेऽनयेत्यस्मात्करणं वागुदाहृता ॥ (680)

पश्यंश्चक्षुः तथा द्रष्टा शृण्वञ्श्रोत्रं तथैव च ।
त्रिधा त्रिधा व्यवच्छिन्न एवं सर्वत्र लक्षयेत् ॥ (681)

चक्षुरालोचनायैव संशयं कुरुते मनः ।
बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते ॥ (682)

*यैव ज्ञानविकासेषु साक्षिता सैव नान्यथा ।
क्रियाशक्तिविकासेषु ह्यन्योन्यव्यभिचारिषु ॥ (683)

निरस्तावयवे व्योम्नि मिथो भिन्नप्रदेशिनाम् ।
* न संभाव्या यथा सिद्धिः प्रतीच्येवं तमोवताम् ॥ (684)

प्राणत्वेन व्यवच्छेदो द्रष्टव्यः, इत्याह—**वक्तीति** । (680) उक्त[1]न्यायम[2]न्यत्रातिदिशति—**पश्यन्निति** । (681)

यत्संबन्धादात्मनोऽनेकत्वं तस्येन्द्रियादेरसाधारणव्यापारमाह—**चक्षुरिति** । चक्षुःशब्देन सर्वेन्द्रियग्रहणम् । आलोचनशब्देन [3]**सर्वेन्द्रियव्यापारग्रहणम्** । क्षेत्रज्ञस्य असाधारणव्यापारमाह—**साक्षीति** । आत्मनो वस्तुतो न कर्तृत्वादीत्यर्थः । (682) प्रतीन्द्रियव्यापारं साक्षिभेदमाशङ्क्याह—**यैवेति** । (683) प्राणनादिकर्तॄणामितरेतरव्यभिचारेऽपि न तेषामात्मनि व्यभिचारः, तत्राह—**निरस्तेति** । आकाशस्य निरंशत्वात् भिन्नाधिकरणानां विहगोरगादीनां न तत्र वास्तवी सिद्धिर्यथेत्यर्थः । (684)

---

1. **उक्तन्यायं**—कर्तृकर्मकरणे वाक्शब्दप्रवृत्तिम् ।
2. **अन्यत्र**—चक्षुरादिषु । चष्टे इति चक्षुः द्रष्टा । दृश्यते इति कर्म । दृश्यते अनेनेति करणमिति विभागः ।
3. **सर्वेन्द्रियव्यापारेति** वदनदर्शनादिसर्वव्यापारेत्यर्थः ।

* **ज्ञानविकासेषु**—ज्ञानशक्तिविकारेषु । **नान्यथेति** प्रकारभेदवती न भवति साक्षितेत्यर्थः ।

* **तमोवतां**—अज्ञानवतानाम् ।

प्राणन्वदन्नित्युक्तानि नामरूपाणि यानि तु ।
कर्मजान्येव तान्यस्य न तु चैतन्यवत् स्वतः ॥ (685)

अन्योन्यापेक्षसंसिद्धेरन्योन्यव्यभिचारतः ।
अपराधीनसंसिद्धौ भानाविव तमो भवेत् ॥ (686)

यत एवमविद्योत्थं प्राणाद्यस्यातदात्मनः ।
नामरूपमतस्ताभ्यां पश्यन्नपि न पश्यति ॥ (687)

तत्रैवं सति यो द्रष्टा प्राणनादिक्रियं परम् ।
उपास्त इति जानाति न स्वभावादुपासनम् ॥ (688)

न यतो युगपत्कृत्स्नवस्तुज्ञानं क्रमेण वा ।
अस्त्येकैकमतोऽनूक्तिः प्राप्ता दृष्टिरनूद्यते ॥ (689)

---

[1]'तान्यस्यैतानि' इत्यादेरर्थमाह—प्राणन्निति । (685) 'न स्वतः' इति कल्पितत्वमुक्तम् । [2]तत्र हेतुमाह—अन्योन्येति । नाम्नो वाचकस्य वाच्यापेक्षत्वात्, रूपस्य वाच्यस्य वाचक (ताम)[नामा]पेक्षत्वात्, अन्योन्यानात्मत्वेन अन्योन्यरूपव्यभिचाराच्च कल्पितत्वमित्यर्थः । (686) कल्पितत्वफलमाह—यत इति । ताभ्यामिति [3]इत्थंभावतृतीया । (687) [4]"स योऽतः' इत्यादेरर्थमाह—तत्रेति । यः प्राणनादिक्रियं (ते) द्रष्टा, न स वेदेति संबन्धः । 'उपास्ते' इत्येतद् व्याचष्टे—इति जानातीति । 'उपास्ते' इत्यनेन स्वभावा-[त्] जानातीत्येतदुच्यते । न विहितमुपासनम् । [5]उत्तरत्र निन्द्यमानत्वाविरुद्धः । (688) स्यात्तर्हि स्वाभाविकज्ञानस्य विधायकम्, अत्राह—नेति । युगपत् न सर्वविषयं ज्ञानमसर्वज्ञस्यास्ति । नापि क्रमेण । परिशेषात् कति_

---

1. तान्यस्येति 'तान्यस्यैतानि कर्मनामान्येव ।' इति श्रुतिः ।
2. तत्र हेतुं—नामरूपाणां कल्पितत्वे हेतुम् ।
3. इत्थंभावतृतीयेति नात्र करणतृतीया । ततश्च नामरूपवत्त्वेन आत्मानं पश्यन्नपि नात्मतत्त्वदर्शीत्यर्थः ।
4. स योऽत इति । "स योऽत एकैकमुपास्ते न स वेद । अकृत्स्नो ह्येषः, अत एकैकेन भवति, आत्मेत्येवोपासीत । अत्र ह्येते सर्व एकं भवन्ति ।" इति श्रुतिवाक्यमनुसन्धेयम् ।
5. उत्तरत्र—'न स वेद' इति वाक्ये ।

नानेकदृष्टिविध्यर्थमेकैकोपास्तिकुत्सनम् ।
मृत्योः स मृत्युमित्येवं तद्दृष्टिरपि कुत्स्यते ॥ (690)*

सर्व एकमिति ह्युक्तरिहाप्यैकात्म्यदर्शनम् ।
विधीयते यतो नातः समस्तव्यस्तदर्शनम् ॥ (691)

समस्तव्यस्ततां तस्मान्मानान्तरमितत्वतः ।
अनूद्यापूर्वमैकात्म्यं विधेयमुपपत्तिमत् ॥ (692)

समुद्रतरुगोपिण्डदृष्टान्तैः परमात्मनः ।
व्याचक्षते बलात् केचित् समस्तव्यस्तदर्शनम् ॥ (693)

पयार्थज्ञानमस्ति । तच्च प्राप्तत्वादनूद्यते, न विधीयते इत्यर्थः । अनूक्तिः—अनुवादः । तद्विवरणं प्राप्तति । (689) 'न स वेद' इत्येकैकोपासननिन्दया अनेकोपासनविधिः, अत्राह—नानेकेति । (690) 'अत्र ह्येते सर्वे एकं भवन्ति' इति निर्विशेषज्ञानस्योच्यमानत्वाच्च न समस्तव्यस्तदर्शनम्, इत्याह—सर्व इति (691) [1]एतदपि वाक्यं समस्तव्यस्तदर्शनपरम्, इत्यत्राह—समस्तेति । सन् घटः इत्यादौ लोकसंव्याप्तसमस्तव्यस्तज्ञानानुवादेन निष्प्रपञ्चमीरुच्यते इत्यर्थः । (692)

'अत्र ह्येते सर्वे एकं भवन्ति' इति श्रुतेः
भर्तृप्रपञ्चव्याख्यानं, तन्निरासश्च

भर्तृप्रपञ्चमतमुत्थापयति—समुद्रेति । तरङ्गशा(खाणां)[खण्[2]डानां] समुद्रतरुगोषु एकताव(द)त्, प्राणादेः सर्वस्य परस्मिन्नेकत्वात् [3]तस्यापि समुद्रादिवत् नानात्वं विवक्षितमिति दृष्टान्तबलात् व्याचक्षते इत्यर्थः । (693) [4]तादृशं

---

* तद्दृष्टिरपि कुत्स्यते—अनेकदर्शनमपि निन्द्यते ।
1. एतदपि वाक्यं—'अत्र ह्येते सर्वे एकं भवन्ति' इति वाक्यमपि ।
2. खण्डानां—खण्डमुण्डादीनां गोविशेषाणाम् ।
3. तस्यापि—परस्यापि ।
4. तादृशं वस्तु—समस्तव्यस्तात्मकं भिन्नाभिन्नं वस्तु ।

नानावयवसंभेदभिन्नार्थश्चेन्नगादिवत् ।
सिद्धः कुतश्चिन्मानात् स्यादनुवादस्तथा सति ॥ (694)

निःशेषभेदसामान्यदृष्ट्यावृत्तिरुपासनम् ।
विधित्सितं चेत्तादृक्षं कल्पकोट्यापि दुःशकम् ॥ (695)

प्रत्यग्दृष्टेर्हि विषयः स्यादात्मेत्यनुभूतितः ।
तद्बोधमृते तत्र कुतः पिण्डादिदर्शनम् ॥ (696)

* तं परादादिति तथा प्रतीच्यज्ञानकल्पितम् ।
मिथ्याज्ञानापनुत्त्यर्थमात्मैवेत्यब्रवीच्छ्रुतिः ॥ (697)

पराञ्चीत्यपवादाच्च न पिण्डादीक्षणं श्रुतेः ।

वस्तु प्रतिपाद्यते, तदुपासनं वा विधीयते इति विकल्प्य, आद्यं दूषयति—**नानेति** । ब्रह्म भिन्नाभिन्नं, उपादानत्वात् समुद्रवत् इत्यनुमानात् [1]सिद्धश्चेत् तथा सति वाक्यमनुवादोऽप्रमाणमित्यर्थः । (694) द्वितीयमुत्थापयति—**निःशेषेति** । दूषयति—**तादृक्षमिति** । भेदानामानन्त्यात् निरवशेषतद्दर्शनासिद्धेरित्यर्थः । (695) द्वैतस्य मिथ्यात्वाच्च न समस्तव्यस्तदर्शनं विवक्षितम्, इत्याह—**प्रत्यगिति** । अहंप्रत्ययस्य स्वरूपबोधस्य वा आत्मेत्ययमर्थो विषयत्वादनुभूतितः सिद्ध इत्यर्थः । (696) इतश्च [2]एतदेवम्, इत्याह—**तमिति** । 'ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद' (बृ. 4-4-6) इत्याद्या श्रुतिर्भेदबुद्धिमपवदति । तथा 'आत्मैवेदमग्र आसीत्' (बृ. 3-4-17) इति च मिथ्याज्ञाननिवृत्त्यर्थमैकात्म्यं वक्ति । तस्मात् न भेदाभेददर्शनमित्यर्थः । (697) [3]तदविवक्षायां हेत्वन्तरमाह—**पराञ्चीति** ।

---

1. **सिद्धश्चेदिति** नानावयवसंभेदभिन्नार्थः इत्यादिः ।
2. **एतदेवम्**—समस्तव्यस्तदर्शनं न विधित्सितम् ।

* "अथवा 'ब्रह्म तं परादात्' इति प्रक्रम्य, प्रत्यगात्मनि कल्पितब्रह्मक्षत्रादिभेददर्शनापवादार्थं 'इदं सर्वं यदयमात्मा' इति श्रुतिरुक्तवती । तथा च समस्तव्यस्तदृष्टिरयुक्तैवेत्यर्थः ।" इत्यपि तं परादादिति वार्त्तिकं व्याचक्षते **शास्त्रप्रकाशिकाकाराः** ।

3. **तदविवक्षायां**—भेदाभेददर्शनस्याविवक्षायाम् ।

प्रत्यग्दृष्ट्या विरुद्धत्वान्न परागर्थदर्शनम् ॥ (698)

*** अनन्यमेयतन्मानमातृ वस्त्वविभागवत् ।**
अमेयमानमात्रेकं तदात्मेति प्रचक्षते ॥ 699 ॥

संसारदर्शनाभ्यासात् तन्मुक्तिं ये प्रचक्षते ।
नाकार्यं विद्यते तेषां वैश्वानरवराश्रयात् ॥ (700)

वयं तु वरहीनत्वात् चर्मवद्वेष्टितुं वियत् ।
न शक्नुमो विना युक्तीरतो न श्रद्दधामहे ॥ (701)

उक्तं च वक्ष्यमाणं च समस्तव्यस्ततां प्रति ।
श्रुत्यक्षरानुरोधेन दूषणं दूषितात्मनाम् ॥ (702)

आत्मानात्मदृष्ट्योरितरेतरविरोधाच्च न समस्तव्यस्तदर्शनं विधित्सितम्, इत्याह—**प्रत्यगिति** । (698) आत्मनोऽसमस्तव्यस्तत्वे किं [1]तस्य तत्त्वं स्यात्, अत्राह—**अनन्येति** । अन्येन[न]मीयते इत्यनन्यमेयम्, यद्रूपं, तदेव मानम्, अनन्यमेयतन्मानमातृ । स्वयं मेयं मानं माता चेति स्वप्रकाश इति यावत् । हेतुमाह—**अविभागवदिति** । तथापि अन्यस्य मेयस्य मानं वा माता वा स्यात्, अत्राह—**अमेयमानमात्रिति** । हेतुमाह—**एकमिति** । क्रियाकारकभेदहीनत्वादित्यर्थः । (699) आत्मनस्तत्त्वमुक्त्वा, समस्तव्यस्तदर्शनमेव दूषयति—**संसारेति** । द्वैतदर्शना(त्रनि)[त्तन्नि]वृत्तिलक्षणो मोक्षोऽनुपपन्न इत्यर्थः । (700) 'तमेव विदित्वातिमृत्युमेति' (श्वे-3-8) 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः' (श्वे-6-10) इति शास्त्रविरोधमभिप्रेत्याह—**वयं त्विति** । (701) [2]तद्दूषणमुप-

---

1. **तस्य तत्त्वं**—आत्मनः तत्त्वम् ।

* "**अनन्येति** अन्यत् मेयमस्य नास्तीति अनन्यमेयं, तदेव **स्वरूपं मानं** मातृ चेति तन्मानमातृ । अनन्यमेयं च तत् तन्मानमातृ चेति विग्रहः । तस्य कल्पनामात्राधिष्ठानत्वेन सत्यतामाह—**वस्त्विति** । तस्य चैकरस्यं श्रुत्यधिगतमित्याह—**अविभागवदिति** । उक्तानुवादेन तत्र विद्वत्प्रसिद्धिं प्रमाणयति—**अमेयेति** । तथा च कथं तस्य समस्तव्यस्तत्वम्, विद्वत्प्रसिद्धिविरोधादिति शेषः ।" इति **शास्त्रप्रकाशिका** ।

2. **तद्दूषणं**—भर्तृप्रपञ्चाभिमतसमस्तव्यस्तदर्शनदूषणम् ।

नादूषितात्मभिर्यस्मात् प्रतीचोऽन्यन्मनागपि ।
प्रत्यग्दृष्ट्येक्षितुं शक्यं वस्तु स्वप्नदृशा यथा ॥ 703 ॥

प्राणन्वदन्निति द्वाभ्यां क्रियाशक्तिसमुद्भवः ।
पश्यन् शृण्वन्निति तथा ज्ञानशक्त्युद्भवः कृतः ॥ (704)

नामरूपातिरेकेण न ज्ञेयं वस्तु विद्यते ।
उपलब्धौ तयोरुक्ते कारणे श्रोत्रचक्षुषी ॥ (705)

नामरूपप्रकाश्या च क्रिया प्राणात्मिका तथा ।
नामाभिव्यक्तिकृद्वाक् स्यादेवं सर्वत्र योजना ॥ (706)

संहरति—**उक्तश्चेति** । दूषितात्मनां—अशुद्धबुद्धीनाम्, इत्युक्तम्, तत्र हेतुमाह—**नादूषितेति** । (702–703)

'प्राणन्नेव' इत्यादिश्रुत्यर्थविवरणम्

प्रासङ्गिकं परिसमाप्य श्रुतिव्याख्यानमनुवर्तयन्, प्राणनादि अनुक्तेन्द्रियव्यापारोपलक्षणार्थम्, इत्याह—**प्राणन्निति** । क्रियाशक्तिसमुद्भवः—कर्मेन्द्रियव्यापारः । **कृतः**—लक्षित इत्यर्थः । (704) त्वगादीन्द्रियव्यापारमुपल(क्षित्र)[क्ष्य, त]न्निमित्तः आत्मनः [1]स्प्रष्टृत्वादिपरिच्छेदो विवक्षितः, इत्ययुक्तम्, संबन्धं विना लक्षणायोगात्, अत्राह—**नामेति** । प्रकाश्यप्रकाशकव्यतिरेकेण ज्ञेयं नास्ति । ते च [2]चक्षुःश्रोत्राभ्यां प्रकाश्येते । तथा इन्द्रियान्तरैश्च । तेनैकविषयत्वं ल(क्ष)[क्ष्य]लक्षणयोः संबन्ध इत्यर्थः । (705) [3]गन्तृत्वादिपरिच्छेदार्थमनुक्तकर्मेन्द्रियव्यापारो(व्य)[प]लक्षणेऽपि संबन्धमाह—**नामेति** । सर्वा क्रिया नामरूपव्यङ्ग्या प्राणाश्रया च । तत्र प्राणाश्रयनामविषयोच्चारणक्रियाव्यञ्जकत्वं वाचः ।

---

1. **स्प्रष्टृत्वादिपरिच्छेदः**—स्पर्शनक्रियाकर्तृत्वादिपरिच्छेदः ।
2. **चक्षुःश्रोत्राभ्यामिति**—प्रकाश्यं रूपं चक्षुषा, प्रकाश्यकं नाम श्रोत्रेण च प्रकाश्यते इत्यर्थः ।
3. **गन्तृत्वादिपरिच्छेदार्थमिति** आत्मनः इत्यादिः ।

श्रोत्रादिकरणैर्यद्यत् प्रथते तत्तदुच्यते ।
रूपं व्याक्रियते यत्तु तन्नामेत्युपदिश्यते ॥ (707)

ज्ञानशक्तिविकासानां मनः साधारणं मतम् ।
क्रियाशक्त्युद्भवानां च करणं तत् त्रिकालदृक् ॥ (708)

प्राणनादिकृतां मध्ये एकैकं यः समीक्षते ।
न स जानात्यकृत्स्नत्वात्पूर्णं वस्तु यतः स्वतः ॥ (709)

* यावदेवमयं वेद प्राणितीत्यादिकर्तृकम् ।
अक्रियाकारकं वस्तु न तावद्वेद तत्त्वतः ॥ (710)

* अव्याकृतेऽनभिव्यक्तेर्न चेत्तत्त्वमीक्ष्यते ।

हस्तादीनामपि आदानादिप्राणाश्रयक्रियाव्यञ्जकत्वादेक(त्वा)विषयत्वमेव संबन्ध इत्यर्थः । वाचि प्राणाश्रयक्रियाव्यञ्जकत्ववत् (पा)[पा]ण्यादावपि आदानादिव्यञ्जकत्वं योजनीयम्, इत्याह—एवं सर्वत्रेति । (706) नामरूपशब्दाभ्यां प्रसिद्धनामरूपग्रहणात् न [1]प्रकाश्यप्रकाशकमात्रग्रहणम् । अतो नैकविषयत्वेन चक्षुःश्रोत्रव्यापारस्य त्वगादिव्यापारलक्षकत्वम्, अत्राह—श्रोत्रेति । (707) 'मन्वानो मनः' इत्यत्र मनःशब्दार्थमाह—ज्ञानेति । सर्वेन्द्रियव्यापाराणां साधारणमन्तःकरणं मन इत्यर्थः । (708) [2]एकैकक्रिया(व)[वि]शिष्टं विद्वान[3]-विद्वान्, इत्यत्र हेतुमाह—प्राणनादीति । (709) यः समीक्षते, न स जानाति इति प्राप्तं [4]व्याघातं परिहरति—यावदिति । (710)

---

1. प्रकाश्यप्रकाशकमात्रग्रहणं—प्रकाश्यप्रकाशकसामान्यग्रहणम् ।
2. एकैकक्रियाविशिष्टमिति आत्मानमिति शेषः ।
3. अविद्वान्—आत्मतत्त्ववेदनरहितः ।
4. व्याघातं—विरोधम् ।

* प्राणितीत्यादिकर्तृकं—प्राणनादिक्रियाकर्तारम् ।

* अव्याकृते—स्वापे ।

व्यक्तौ च हेतुकार्याभ्यां कथं तर्हीक्ष्यतां परम् ॥ (711)

'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
* प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिद्ध्यतः ॥' (712)

विस्फारिताक्षो जानाति शब्दाद्यत्र न तत्परम् ।
अपीतकरणग्रामः शब्दाद्यपि न वेत्ति हि ॥ (713)

कथं पश्यंस्तमात्मानं साक्षाद्वेदेति चोदिते ।
आत्मेत्येवेति नो वक्ति चोद्यहेतुनिवृत्तये ॥ (714)

अतिरोहितरूपं यज्जागत्यव्याकृते तथा ।
तत्साक्षित्वाच्च तद्व्यक्तौ यदक्षैर्व्यज्यते न च ॥ (715)

'आत्मेत्येवोपासीत' इति वाक्यावतारः

[1]विशिष्टद्रष्टुरज्ञ[2]त्ववचनात् कूटस्थचैतन्यैकरसं वस्तु, इत्युक्तम् । तस्य सिद्धिः किं स्वापे, जाग्रदादौ वा । नाद्यः, इत्याह—**अव्याकृत इति ।** अनभिव्यक्तेः—[3]अज्ञानप्रतिबन्धादित्यर्थः । द्वितीयं दूषयति—**व्यक्तौ चेति ।** अज्ञानतत्कार्यप्रतिबन्धादित्यर्थः । (711) स्वापे तत्त्वमज्ञानप्रतिबद्धम् । इतरत्र अज्ञानतत्कार्यप्रतिबद्धम्, इत्यत्र [4]मानमाह—**कार्येति ।** (712) किञ्च, निमीलितकरणो जानाति, उन्मीलितकरणो वा । द्वितीयं प्रत्याह—**विस्फारितेति ।** आद्यमपवदति—**अपीतेति** । (713) एतदुत्तरत्वेनोत्तरवाक्यमवतारयति—**कथमिति ।** चोद्यहेतुः—अज्ञानं, तन्निवृत्त्यर्थमिति यावत् । (714)

'आत्मेत्येवोपासीत' इति श्रुत्यर्थवर्णनम्

चोद्यनिरासार्थमा(त्य)[त्म]पदार्थमाह—**अतिरोहितेति** । अवस्थात्रयसाक्षित्वात् इन्द्रियागोचरत्वाच्च आत्मा सदा स्वत एव स्फुरतीत्यर्थः । यदेवंरूपं

---

1. **विशिष्टद्रष्टुः**—तत्तक्रियाविशिष्टात्मदर्शनवतः ।
2. **अज्ञत्ववचनात्**—'न स वेद' इति उक्तत्वात् ।
3. **अज्ञानप्रतिबन्धात्**—अज्ञानेन प्रतिबन्धात् ।
4. **मानमाह**—गौडपादाचार्यकारिकामाह ।

* **द्वौ तु तुर्ये न सिद्ध्यतः इति** कार्यकारणरूपावुपाधी तुर्ये न स्तः । कार्यकारणान्यतरसंबन्धं विना न तत्त्वधीः संभवतीत्यर्थः ।

* प्रत्यक्तया यः प्रथते स्वयंज्योतिःस्वभावकः ।
मातृमानक्रियामेयविभागैर्न विभज्यते ॥ (716)

जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ।
* स आत्मा तत्परं ज्योतिः शिरसीदं वचः श्रुतेः ॥ (717)

* अभिधाज्ञानगम्यत्वनिषेधायेतिशब्दनम् ।
यतो वाचो निवर्तन्ते इति च श्रुतिशासनम् ॥ (718)

* व्याकृताव्याकृतात्मत्वनिराकरणसिद्धये ।
एवेत्याह अन्यदेवेति तथाचोच्चैः श्रुतीरणम् ॥ (719)

उपेति सामीप्यवचः तन्निष्ठा प्रत्यगात्मनि ।
कार्यकारणभूताभ्यां प्रत्यङ्नेदीय ईक्ष्यते ॥ (720)

वस्तु स आत्मेति संबन्धः । (715) आत्मनः स्वतः स्फुरणे वाक्यश्रवणानर्थक्यम् इत्याशङ्क्य, तदाकारबुद्धिवृत्तौ वाक्यजायां स्फुरति, इत्याह—**प्रत्यक्तयेति**। (716) आत्मनः अद्वितीयानुभवत्वे मानमाह—**जिघ्राणीति**। (717) इति-शब्दार्थमाह—**अभिधेति** । (718) एवकारार्थमाह—(अ) **व्याकृतेति** । कार्यकारणविलक्षण(त्व)मात्मानं प्रतिपादयितुमेवकार इत्यर्थः । (719) उपो-पसर्गार्थमाह—**उपेति** । तन्निष्ठा—तत्समाप्तिरिति यावत् । हेतुमाह—**कार्येति** । (720) कार्यकारणाभ्यां प्रतीचः पृथक्करणात् अद्वैतहानिः, अत्राह—**व्याकृतेति** ।

---

* "तर्हि जगदात्मनोर्भेदादद्वैतहानिः, नेत्याह—**प्रत्यक्तयेति** ।" इति **शास्त्र-प्रकाशिका** ।

* **शिरसीदं वचः** श्रुतेरिति 'अथ यो वेदेदं जिघ्राणीति स आत्मा' इति छान्दोग्योपनिषदि श्रूयते इत्यर्थः ।

* **अभिधाज्ञानगम्यत्वनिषेधाय**—शब्दगोचरत्वस्य ज्ञानगोचरत्वस्य च निषेधाय ।

* **व्याकृताव्याकृतात्मत्वनिराकरणसिद्धये इति** व्याकृतं-कार्यं, अव्याकृतं कारणं, तत्स्वरूपत्वाभावसिद्धये इत्यर्थः । **अन्यदेवेति** 'अन्यदेव तद्विदिता-दथो अविदितादधि ।' इति वाक्यमपि कार्यकारणविलक्षणत्वमाहेत्यर्थः ।

व्याकृताव्याकृतात्मभ्यां यो भिन्नोऽज्ञानहेतुतः ।
*प्रत्यक्तत्त्वधिया हत्वा तावुपैत्यात्ममात्रताम् ॥ (721)

व्युत्थाय कारणात्कार्यात् तत्तत्त्वज्ञानवर्त्मना ।
उपेत्य कूटस्थमजमासीतापरिणामवान् ॥ (722)

व्यक्ताव्यक्तविभागोऽयं सिद्ध्येद्दात्मन्यतद्वति ।
अहोरात्रविभागोऽयं भानौ तद्रहिते तथा ॥ (723)

आत्मानात्मविभागोऽपि नायमात्मस्पृगीक्ष्यते ।
अज्ञातात्मैकसाक्षित्वादज्ञानोत्थं न वस्तुगम् ॥ (724)

अनात्मसिद्धिवन्न स्यादात्मसिद्धिरनात्मनः ।
आत्मनोऽनात्मसिद्धिश्च नैव स्यादात्मसिद्धिवत् ॥ (725)

---

(721) आसीतपदार्थमाह—**व्युत्थायेति** । दृश्याधिष्ठानत(त्वा)[त्त्व]ज्ञानात् दृश्यादुत्थाय कूटस्थचैतन्यरूपेण व्यतिष्ठतेत्यर्थः । (722) अव्यावृत्ताननुगतचैतन्यैकरसस्य वस्तुत्वे कथं तद्विरुद्धद्वैतप्रतिभानम्, अत्राह—**व्यक्तेति** । दर्शनादर्शनयोः उदयास्तमयत्वात् भानोस्तद्राहित्यम् । (723) 'अतद्वति' इत्युक्तत्वात् [1]व्याघातः, इत्याशङ्क्याह—**आत्मेति** । (724) अनात्मनः कल्पितत्वे प्रतीचोऽपि कल्पितत्वं स्यात्, श्रुत्याचार्याद्यनात्माधीनसिद्धिकत्वात्, अत्राह—**अनात्मेति** । व्यवहारदशायामात्मप्रसादादनात्मसिद्धिः । नैवमनात्मप्रसादादात्मसिद्धिः, तस्य [2]स्वप्रकाशत्वादित्यर्थः । अनात्मसाधकश्चेदात्मा, कूटस्थत्वमसङ्गत्वं च व्याहतं स्यात्, अत्राह—**आत्मन इति** । अनात्मसिद्धेः कल्पितत्वान्न विरोध इत्यर्थः । (725)

---

* **तौ हत्वा**—व्याकृताव्याकृतात्मानौ कार्यकारणोपाधी निरस्य ।

1. **व्याघात इति** अतद्वति—व्यक्ताव्यक्तविभागरहिते आत्मनि व्यक्ताव्यक्तविभागसिद्धिः विरुद्धेत्यर्थः ।

2. **स्वप्रकाशत्वादिति** अज्ञाननिवर्तकवृत्तिविशेषजनन एव अनात्मनां श्रुत्यादीनामुपयोग इति भावः ।

आत्मनो व्यतिरेकेण नैःस्वाभाव्यादनात्मनः ।
तथैवाव्यतिरेकेण रज्जुसर्पखपुष्पवत् ॥ (726)

* तस्मान्नानात्मनोऽस्त्यात्मा नाप्यनात्माऽऽत्मनः स्वतः ।
आत्मनस्तु स्वतः सिद्धिरात्मसिद्धेरनन्यतः ॥ (727)

यावानात्मनि वेदात्मा प्रतीच्यात्मानमात्मना ।
निरस्ताज्ञानतत्कार्यं पश्येत्तद्वदनात्मसु ॥ (728)

बुद्ध्यादेर्विषयान्तस्य निरस्तस्यात्मनो बहिः ।
अनात्मवस्तुनः प्रत्यङ्ङात्मा ह्यात्मीयतो भवेत् ॥ (729)

विमतमकल्पितं व्यवहारावस्थायामबाधितत्वात् आत्मवदिति चेत् । तर्हि किमात्मनो भेदेन [1]तत्सिद्धिः, अभेदेन वा । (भे)[ना]द्यः, इत्याह—**आत्मन इति** । आत्मशब्दस्य [2]स्वरूपवचनत्वात् ततो [3]व्यावृत्तौ[ख]पुष्पवत् नैःस्वाभाव्यात् असिद्धिरित्यर्थः । द्वितीयं प्रत्याह—**तथैवेति** । द्वयोरसाधारणरूपेण स्थितयोरेकत्वविरोधात्, आत्ममात्रत्वे अनात्मनो नैःस्वाभाव्यादसिद्धिः । तस्मात् रज्जुसर्पवत् कल्पित इत्यर्थः । (726) अनात्मनः कल्पितत्वे [4]तत्संबन्धो मिथ्या, इत्याह—**तस्मादिति** । कल्पितसंबन्धादाचार्यादेरात्मनः कथं सिद्धिः, अत्राह—**आत्मनस्त्विति** । (727) बन्धमोक्षयोरात्मनः सविशेषत्वात् घटादिवत् न स्वतः सिद्धिः, अत्राह—**यावानिति** । निर्विशेषस्वभाव इति यावत् । तद्वत्—तथा संसारेऽपि । देहादिषु अनात्मसु आत्मानं 'नेति' (बृ.4-3-6) इत्यादिश्रुतेरविशेषं पश्येदित्यर्थः । (728) आ(त्मानम)[त्मनाऽ][5]नात्मस्थितिभेदाभिधानात् अद्वैतविरोधः, अत्राह—**बुद्ध्यादेरिति** । प्रत्यङ्(नामे)[ङात्मे]त्यत्र हेतुमाह—**आत्मी-**

---

1. **तत्सिद्धिः**—अनात्मनो द्वैतस्य सिद्धिः ।
2. **स्वरूपवचनत्वादिति** उच्यते अनेनेति वचनं, स्वरूपस्य वचनं, तत्त्वात् । स्वरूपबोधकत्वादित्यर्थः ।
3. **ततो व्यावृत्तौ**—स्वरूपात् व्यावृत्तौ सत्याम् ।
4. **तत्संबन्धः**—अनात्मसंबन्धः ।

* **तस्मात्**—अनात्मनः कल्पितत्वात् । अनात्मनः आत्मा नास्ति आत्मनः अनात्मा स्वतो नास्ति इत्युक्त्या तयोः संबन्धस्य कल्पितत्वमभिप्रेतम् ।

5. **अनात्मस्थितिभेदाभिधानादिति** अनात्मसु आत्मानं पश्येदिति, अनात्मसु स्थित्या भेदस्याभिधानादित्यर्थः ।

तद्याथात्म्यात्महेतुभ्यामनात्मार्थसमागमे ।
अव्यावृत्तानुगतसंगती रज्जुसर्पवत् ॥ (730)

* प्रतीचोऽव्यतिरेकेण तदन्यद्वस्तु सिद्ध्यति ।
प्रतीचा तस्य जग्धत्वात् क्वानात्मा सिद्ध्यतामयम् ॥ (731)

सहतेऽनात्मतां नात्माऽनात्मा तद्विरहे कुतः ।
वस्त्वात्मना न चेत् सिद्ध्येत् कुतः सिद्ध्येदनात्मना ॥ (732)

स्वात्मन्येव सदन्यत्र सर्ववस्तु प्रसिद्ध्यति ।
तत्र चेत्तदसत् सत्स्यात्कथमन्यत्र निष्प्रभम् ॥ (733)

मातृत्वकञ्चुको यद्वदात्माऽनात्मानमीक्षते ।
दृष्टिमात्रैकरूपत्वान्न तथात्मानमीक्षते ॥ (734)

यत इति । अनात्मनः आत्मीयत्वात् आत्मा तत्स्वरूपम्, रज्ज्वादिरिव सर्पादेरित्यर्थः । (729) आत्मानात्मनोः नात्मीयभावः संबन्धः, अपि तु स्वस्वाम्यादिलक्षणः, इत्याशङ्क्य, सोऽपि कल्पितः, इत्याह—**त(द्यथात्मेति)द्याथात्म्येति ।** तस्या(मा)त्मनो बोधरूपत्वादनात्माधिष्ठानत्वाच्च तस्यानात्मना समागमे न स्वस्वाम्यादिभावसंबन्धः । किन्तु रज्जुसर्पयोरिव आरोपितरूपत्वमित्यर्थः । (730)

संब[1]न्ध एव कल्पितः, नानात्मनः स्वरूपं दूरस्थवनस्पत्योरिव, **अत्राह—प्रतीच इति ।** (731) संबन्धवदनात्मनोऽपि कल्पितत्वे हेत्वन्तरमाह—**(अ)[स]हत इति ।** प्रत्यक्त्वपराक्त्वविरोधादित्यर्थः । सिद्धं तर्हि अनात्मनः सत्त्वम्, अत्राह—**अनात्मेति ।** तदेव स्पष्टयति—**वस्त्विति ।** (732) बुद्धिसाम्यार्थं दृष्टान्तमाह—**स्वात्मनीति ।** यथा घटादि मृत्स्वरूपं [2]तत्र सदेव अन्यत्र **देशादौ** सिद्ध्यति । मृद्यसत्त्वे(ना)[त्वा]न्यत्र सिद्ध्यति । तथा ब्रह्मकार्यं जगत् ब्रह्मणि तद[3]न्यत्र चाभावात् कल्पितमित्यर्थः । (733) आत्मा कल्पितः ज्ञेयत्वात् घटवत्,

---

1. **संबन्ध एव**—अनात्मसंबन्ध एव ।

* **प्रतीचोऽव्यतिरेकेणेति** तद्व्यतिरेके निःस्वरूपत्वप्रसङ्गादिति भावः ।

2. **तत्र सदेव**—मृद्रूपे सदेव ।

3. **तदन्यत्र च**—ब्रह्मणोऽन्यत्र च ।

कर्तृत्वप्रतिषेधार्थं द्रष्टुर्दृष्टेरिति श्रुतिः ।
दृष्टिरेव तु यो द्रष्टेत्याह दृष्टिविशेषणम् ॥ (735)

प्रतीचो वस्तुनस्तावद्वस्तुवृत्तं यथोदितम् ।
शब्दवृत्तमथेदानीं यथावदभिधीयते ॥ (736)

'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यते' ॥ (737)

यस्मादर्थे तु विज्ञेया यच्छब्दाः सर्व एव तु ।
समुच्चये चशब्दाश्च तथा सर्वत्र योजयेत् ॥ (738)

व्याप्नोत्यनवशेषेण सर्पादीन् स्रगिवाखिलान् ।
प्रत्यक्तयाऽनात्मनोऽतः प्रत्यगात्मेति भण्यते ॥ (739)

इत्यत्राह—**मातृत्वेति** । (734) मातृत्वोपहित इति कथम्, आत्मनः स्वयमेव द्रष्टृत्वात्, अत्राह—**कर्तृत्वेति** । 'न हि द्रष्टुर्दृष्टेः' (बृ. 6 - 3 - 23) इत्यादि-श्रुतिः यो द्रष्टा स एव दृष्टिः, तस्य विपरिलोपो नेति, समा[1]नाधिकरणषष्ठ्या दृष्टिं द्रष्टृविशेषणं [2]कर्तृत्वप्रतिषेधार्थमाहेत्यर्थः । (735)

'व्यक्ताव्यक्तविभागोऽयम्' (वा· 723) इत्यारभ्योक्तमनुवदति—**प्रतीच इति** । वस्तुवृत्तं—परमार्थरूपमिति यावत् । [3]उत्तरसन्दर्भतात्पर्यमाह—**शब्देति** । आत्मपदपर्यालोचनया वस्तुनः अद्वितीयकूटस्थसंविन्मात्र[त्व]मुच्यते इत्यर्थः । (736) तत् प्रकटयितुं पुराणवाक्यमुदाहरति—**यच्चेति** । (737)

[4]तत् व्याकर्तुं [5]यच्छब्दचतुष्टयं व्याचष्टे—**यस्मादिति** । (738) आप्नोतीत्यात्मा इत्यस्य [6]तावदर्थमाह—**व्याप्नोतीति** । (739) आत्मानात्मनोः

---

1. **समानाधिकरणषष्ठ्येति** तथा च द्रष्टृरूपा या दृष्टिः तस्या इत्यर्थः । न तु द्रष्टृसंबन्धिनी या दृष्टिः तस्या इत्यर्थः ।
2. **कर्तृत्वप्रतिषेधार्थम्**—आत्मनः दृष्टिकर्तृत्वप्रतिषेधार्थम् ।
3. **उत्तरसन्दर्भेति** उत्तरवार्त्तिकसन्दर्भेत्यर्थः ।
4. **तत् व्याकर्तुं**—'यच्चाप्नोति' इत्यादि पुराणवाक्यं व्याख्यातुम् ।
5. **यच्छब्दचतुष्टयमिति** पुराणवाक्यघटकमित्यादिः ।
6. **तावत्**—आदौ ।

सावशेषात्मनोऽकृत्स्नान्निःशेषात्मतया यतः ।
आत्माऽनात्मन आप्नोति तेनात्मेत्यभिधीयते ॥ (740)

* स्वचिदाभासमोहेन तदुत्थानखिलान् यतः ।
आदत्तेऽनात्मनः प्राज्ञे ततश्चात्मेति तं विदुः ॥ (741)

पर आत्मनि सर्वेऽपि संप्रतिष्ठन्त एकले ।
पृथिव्याद्या अनात्मानः इति चाथर्वणे वचः ॥ (742)

स्वात्माभासाः पराचीना धीवृत्तीर्विषयोन्मुखाः ।
* प्रत्यगत्ति यतोऽतोऽसावात्मेत्युक्तो मनीषिभिः ॥ (743)

'विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक् तथा प्राज्ञः' इति चागमशासनम् ॥ (744)

अव्यावृत्ताननुगतः पूर्णः स्वात्मन्यवस्थितः ।
यतोऽस्य सन्ततो भावः तस्माच्चात्मेति शब्द्यते ॥ (745)

तद्विष्णोरिति मन्त्रोऽपि विष्णोस्तत्परमं पदम् ।
चक्षुर्वदाततं व्योम्नि व्याचष्टे प्रत्यगात्मनि ॥ (746)

समव्याप्तित्वादात्मनो नानात्मव्यापकत्वम्, अत्राह—सावशेषेति । (740) 'यदादत्ते' इत्यस्यार्थमाह—स्वचिदाभासेति । (741) [1]अत्र श्रुत्यन्तरमाह—पर इति । संप्रतिष्ठ[न्ते]—संह्रियन्ते इत्यर्थः । (742) 'यच्चात्ति' इत्येतदर्थमाह—स्वात्मेति । (743) [2]अत्रापि [3]आगमं मानमाह—विश्वो(दी)[ही]ति । (744) 'यच्चास्य सन्ततो भावः' इत्येतत् व्याचष्टे—अव्यावृत्तेति[6] । अत्र पूर्वपूर्वस्य उत्तरोत्तरहेतुत्वम् । (745) 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः

---

* स्वचिदाभासमोहेन—स्वस्य चिदाभासः यत्र, तादृशेन मोहेन—अज्ञानेनेत्यर्थः । प्राज्ञे—स्वापे । आदत्ते—संहरति ।

1. अत्र श्रुत्यन्तरमिति आत्मनि अनात्मसंहारबोधिकां आथर्वणश्रुतिमित्यर्थः ।

* प्रत्यक् अत्ति—प्रत्यक् साक्षात्करोतीत्यर्थः ।

2. अत्रापि—अत्तृत्वेऽपि ।

3. आगममिति गौडपादाचार्यकारिका आगमप्रकरणस्था आगमपदेन व्यवह्रियते ।

नानुत्पन्नमतो ज्ञानं नानपास्तं तथा तमः ।
यथोक्तैकात्म्यसंदृष्टावतः कार्त्स्न्यं ममात्मनः ॥ (747)

द्रष्टृदर्शनदृश्यानां प्रत्यक् तत्त्वं यतस्ततः ।
तद्दृष्टावखिलं दृष्टं रज्जुसर्पादिवद्भवेत् ॥ (748)

स्रगज्ञानैकहेतूनां स्रग्धिया ज्ञातता यथा ।
प्रत्यङ्मोहजवस्तूनां प्रतीच्यवगते तथा ॥ (749)

अत्र ज्ञाते यतः सर्वे ऐकात्म्यं यान्त्यशेषतः ।
प्राणादयोऽत आत्मैव द्रष्टव्यः सर्वदर्शनात् ॥ (750)

केचिद् व्याचक्षतेऽपूर्वं विधिमेतं महाधियः ।
नियमं त्वपरे धीराः परिसंख्यामथापरे ॥ (751)

दिवीव चक्षुराततम्' (सुबा. 6-1, आरु. 5) इति मन्त्रमत्रोदाहरति—**तदिति** । चक्षुर्वदाततं—[1]आदित्यवद् व्याप्तमित्यर्थः । (746) इत्थमात्मनः अद्वितीयकूटस्थत्वे फलितमाह—**नानुत्पन्नमिति** । (747) उक्तमर्थं सोदाहरणमाह—**द्रष्टृदर्शनेति** । (748) दृष्टान्तं स्पष्टयति—**स्रगिति** । (749) सर्वस्यात्ममात्रत्वात् आत्मज्ञानात् ज्ञेयत्वे, प्रस्तुते किं स्यात्, अत आह—**अत्रेति** । सर्वदर्शनात्—आत्मनि दृष्टे सर्वस्य दृष्टत्वादित्यर्थः । (750)

'आत्मेत्येवोपासीत' इति वाक्यस्य विधिपरत्वनिराकरणम्

एवं विवक्षितार्थपरत्वेनेह [2]वाक्यं व्याख्याय, [3]विधिनिराकरणार्थं [4]तन्मत-

---

1. **आदित्यवत् व्याप्तमिति** चक्षुः इति श्रुतिस्थपदस्य चक्षुरभिमानिदेवता आदित्योऽर्थ इति भावः ।
आकाशे यथा चक्षुः सर्वतो विप्रसृतं, तथा परस्य रूपं प्रतीच्येव व्याप्तं अप्रत्यगर्थाभावात् इति 'दिवीव चक्षुराततम्' इति मन्त्रार्थं वर्णयति **शास्त्रप्रकाशिका** ।
2. **वाक्यं**—'आत्मेत्येवोपासीत' इति वाक्यम् ।
3. **विधिनिराकरणार्थं**—आत्मोपासने विधिनिरासाय ।
4. **तन्मतं**—अत्र वाक्ये विधिवादिनां मतम् ।

नापूर्वविधिरित्येष कदा चिदपि गृह्यते ।
सर्वदैव तु तत्प्राप्तेस्तथा नान्योऽपि कश्चन ॥ (752)

पुंव्यापारानधीनत्वान्नेह संभाव्यते विधिः ।
स्वव्यापारैकविषयः सर्व एव यतो विधिः ॥ (753)

संस्थेम्नेऽस्यैव चार्थस्य पूर्वपक्षोक्तिपूर्वकः ।
भाष्यकृद्भिः कृतो यत्नः स आविष्क्रियतेऽधुना ॥ (754)

यथा कार्यानपेक्षस्य प्रामाण्यं वचसः स्फुटम् ।
ऐकात्म्यवस्तुनिष्ठस्य तथा पूर्वमवादिषम् ॥ (755)

लिङ्प्रत्ययश्रुतेरत्र भ्रान्तिः समुपजायते ।
यजेतेत्यादिसामान्यात् विध्यर्थोऽतो विचार्यते ॥ (756)

माह—**के चिदिति** । [751] आत्मधियः सदा सिद्धत्वात् न [1]विधित्रयं संभवति, इति दूषयति—**नेति** । [752] ब्रह्मणि तज्ज्ञाने वा न विधिरस्ति, ब्रह्मणः स्वतः सिद्धत्वात्, तज्ज्ञानस्य [2]मानवस्तुतन्त्रत्वात्, इत्याह—**पुंव्यापारेति** । [753] ब्रह्मतज्ज्ञानयोः विध्यसंभवयुक्तेः उक्तत्वात्, उत्तरसन्दर्भानर्थक्यमाशङ्क्य, [3]तद्-दृढीकरणं प्रयोजनम्, इत्याह—**सं(च्छन्न)[स्थेम्न]इति** । [754] वस्तुतज्ज्ञानयोः सर्वप्रकारविधिनिरासस्य **संबन्धग्रन्थे** सिद्धत्वात्, अत्रापि तस्यैवोक्तौ पुनरुक्तिः इत्याशङ्क्य, [4]**संबन्धोक्त**मनुवदति—**यथेति** । [755] [5]परस्यापुनरुक्तार्थमाह—**लि(ट्)[ङ्]प्रत्ययेति** । 'आत्मेत्येवोपासीत' इति विधायकशब्दश्रुतेः आत्मनि तज्ज्ञाने वा विधिशङ्कानिरासाय तदर्थो विचार्यते इत्यर्थः । [756] पूर्वपक्षत्वादेव

---

1. **विधित्रयं**—अपूर्वविधिः नियमविधिः परिसंख्याविधिरिति त्रयम् ।
2. **मानवस्तुतन्त्रत्वादिति** मानतन्त्रत्वात् वस्तुतन्त्रत्वाच्चेत्यर्थः ।
3. **तद्दृढीकरणं**—विध्यसंभवदृढीकरणम् ।
4. **संबन्धोक्तं**—संबन्धग्रन्थोक्तम् ।
5. **परस्य**—उत्तरग्रन्थस्य ।

सिद्धान्तोपक्रमः पूर्वं पूर्वपक्षः प्रदर्श्यते ।
सम्यङ्निर्ज्ञातसिद्धान्तो यतो वेत्ति बलाबलम् ॥ (757)

नापूर्वविधिरेष स्यात् पक्षे प्राप्तत्वकारणात् ।
पक्षे प्राप्तिर्विचारान्ते वक्ष्यते कारणाश्रयात् ॥ (758)

नित्यप्राप्तिमिहाचष्टे विध्यर्थापत्तुनुत्सया ।
अप्राप्तांशानुपात्येव सर्व एव विधिर्यतः ॥ (759)

पाक्षिक्युपासनप्राप्तिर्नित्या वेति च लिङ्गतः ।
विवक्षिता भाष्यकृतो नित्यप्राप्तिरितीक्ष्यते ॥ (760)

निरस्यपक्षे पूर्वमुपन्यसनीये, **भाष्यकारैः** सिद्धान्तमुपन्यस्य पूर्वपक्ष उपक्षिप्यते । तत्र को हेतुः, अत्राह—**सिद्धान्तेति** । **प्रदर्श्यते** पश्चादिति शेषः । [757]

भाष्यकारीयोत्तरपक्षप्रदर्शनम्

एवं क्रमातिक्रमे कारणमुक्त्वा **भाष्यकारीय**मुत्तरपक्षं दर्शयति—**नापूर्वेति** । कथं पक्षे प्राप्तिरात्मधियः, अत्राह—**पक्ष इति** । प्रारब्धादृष्टवशात् क्षुधादिदोषोद्भवादात्मनो विस्मरणं अनात्मस्मरणञ्च संभवतीति वक्ष्यते इत्यर्थः । [758]

यत्सा[1]**क्षादित्यादि प्राप्तत्वादित्यन्तस्य** तात्पर्यमाह—**नित्येति** । [759] तस्मिन् **भाष्ये** ज्ञानस्य नित्यप्राप्तिर्विवक्षितेति कुतोऽवगतम्, अत्राह—**पाक्षिकीति** । 'तिष्ठ[2]तु तावत्' इत्यादौ **भाष्ये** 'नित्या वा' इति प्रयोगवशादेव [3]**पूर्वभा(ष्य)**[ष्ये]नित्यप्राप्तिविवक्षाप्रतीतिरित्यर्थः । [760]

---

1. **यत्साक्षादित्यादि प्राप्तत्वादित्यन्तस्येति** भाष्यस्येति शेषः ।
"'यत्साक्षादपरोक्षाद्ब्रह्म,' 'कतम आत्मेति' 'योऽयं विज्ञानमयः' इत्येवमाद्यात्मप्रतिपादनपराभिः श्रुतिभिः आत्मविषयं विज्ञानमुत्पादितम् । तत्र आत्मस्वरूपविज्ञानेनैव तद्विषयानात्माभिमानबुद्धिः कारकादिक्रियाफलाध्यारोपणात्मिका अविद्या निवर्तिता । तस्यां निवर्तितायां कामादिदोषानुपपत्तेः अनात्मचिन्तानुपपत्तिः । पारिशेष्यादात्मचिन्तैव । तस्मात् तदुपासनमस्मिन् पक्षे न विधातव्यं प्राप्तत्वात् ॥" इति भाष्यमनुसन्धेयम् ।
2. **तिष्ठतु तावदित्यादाविति** 'तिष्ठतु तावत् पाक्षिकी आत्मोपासनप्राप्तिः नित्या वेति ।' इति भाष्ये इत्यर्थः ।
3. **पूर्वभाष्ये**—प्राप्तत्वादित्यन्ते अव्यवहितपूर्वभाष्ये ।

यत्साक्षादिति वाक्योत्थप्रत्यग्याथाम्यलेहिना ।
ज्ञानेन तमसो दाहात् कुतो विध्यर्थसंभवः ॥ (761)

कारकाण्युपमृद्नाति विद्या बुद्धिमिवोषरे ।
कारकत्वमविद्योत्थं स्वतश्चाकारकात्मता ॥ (762)

यदज्ञानात्प्रवृत्तिर्या तज्ज्ञाने सति सा कुतः ।
न हीहापास्तनिद्रोऽपि सुप्तवत्स्वप्नमीक्षते ॥ (763)

यद्धि यस्य स्वतो रूपं न तत्प्राप्तावपेक्षते ।
क्रियां मोहनिमित्तत्वादपेक्षा कर्त्रपह्नवे ॥ (764)

न च संमोहविध्वस्तौ यथावस्त्ववबोधतः ।
समर्थमन्यत्पश्यामः क्रियाकारकरूपकम् ॥ (765)

स्वाध्यायाधीतिविधिना ज्योतिष्टोमादिबोधवत् ।
सदा प्राप्ताऽऽत्मविद्यापि नातो विधिरिहेष्यते ॥ (766)

वाक्यात् ज्ञाने जाते विधिः अजाते वा, नाद्यः, इत्याह—**यदिति** । [761] नष्टेऽप्यज्ञाने विधिः स्यात् विदुषोऽपि व्यवहारे प(श्व)[श्वा]दिसाम्यात्, अत्राह—**कारकाणीति** । कारकत्वस्याविद्याकृतत्वे हेतुमाह—**स्वतश्चेति** [762] ज्ञानिनोऽभ्यशनादिप्रवृत्तिदर्शनात् कथं कारकाभावः, अत्राह—**यदज्ञानादिति** । [763] ज्ञानस्याविधेयत्वेऽपि तत्सन्ताने विधिरिति चेत्, किमर्थं तद्विधानं, ब्रह्मभावार्थं अविद्याध्वस्त्यर्थं वा नाद्यः, इत्याह—**यद्धीति** । **मोहनिमित्तत्वात्** अप्राप्तेरिति शेषः । किमर्थं तर्हि तत्रापि निदिध्यासनादिक्रियापेक्षा, तत्राह—**अपेक्षेति** । संसारकारणमज्ञानं कर्तृ । तदपह्नू[य]ते येन ज्ञानेन तत् **कर्त्रपह्नवम्** । तत्र शुद्धिद्वारेणोत्पत्तौ क्रियापेक्षेत्यर्थः [764] द्वितीय[1]कल्पमपवदति—**न चेति** । [765] शाब्दज्ञाने विधिः, [2]ज्ञानान्तरे वा, आद्यं प्रत्याह—**स्वाध्या-**

---

1. द्वितीयकल्पं—अविद्याध्वंसार्थं ज्ञानसन्ताने विधिरिति कल्पम् ।
2. ज्ञानान्तरे—प्रत्यक्षे ।

देहेन्द्रियमनोबुद्धिसर्वव्यापारभासिनः ।
लिङ्गतश्चावसेयत्वात् न संभाव्यो विधिस्ततः ॥ (767)

तथाहंप्रत्ययात्साक्षादात्मयाथात्म्यनिश्चितेः ।
असंभवादसंप्राप्तेः कुतो विधिरिहेष्यते ॥ (768)

नन्विहात्मार्थसंदृष्टावहंप्रत्ययगम्यता ।
पाक्षिकीति ततोऽप्राप्तेर्भवेन्नैयमिको विधिः ॥ (769)

पाक्षिकी तावदत्रास्तामैकात्म्यार्थावलेहिनः ।
ज्ञानस्य प्राप्तिर्नित्या वेत्यस्त्वपूर्वो विधिः स्फुटः ॥ (770)

* एकार्थोल्लेखिवृत्तीनामातादात्म्याभिमानतः ।
आम्रेडनं हि शब्दार्थः सर्वत्रोपासनश्रुतेः ॥ (771)

येति । [766] संसारिणो ज्ञानं विधेयं, असंसारिणो वा । नाद्यः, इत्याह—**देहेति** । [767] शरीरादि स्वव्यतिरिक्तदृश्यं दृश्यत्वात् घटवत् इति [1]परोक्षावगतेऽप्यपरोक्षज्ञानं विधेयम्, अत्राह—**तथेति** । इह–संसार्यात्मज्ञाने इत्यर्थः । [768] असंसार्यात्मधीः विधेयेति कल्पान्तरं शङ्कते—**नन्विति** । अहंप्रत्ययस्य सदातनत्वेऽपि तेन प्रत्यक्तया अवगते अपहतपाप्मादिगुणस्य ब्रह्मणो ग्रहणं पाक्षिकं क्षुधाद्युद्भवकालानियमात् । [2]तस्मात् विस्मरणोपपत्तेः उपासीतेति असंसार्यात्मज्ञाने नियमविधिरित्यर्थः । [769]

मुक्तिफलमात्मोपासनं विधेयमिति पक्षनिरूपणम्

अपूर्वविधिवादी चोदयति—**पाक्षिकीति** । [770] अपूर्वविधिसाधनाय उपासनशब्दार्थमाह—**एकार्थेति** । [771] प्रकृतत्वात् ज्ञानमेव विधेयं, नोपास-

---

1. **परोक्षावगतेऽपीति** संसार्यात्मनीति शेषः ।

2. **तस्मात्**—क्षुधाद्युद्भवात् ।

* **आतादात्म्याभिमानतः**—उपास्यतादात्म्यसाक्षात्कारपर्यन्तम् । **आम्रेडनं**—आवर्तनम् । उपासनश्रुतेः **शब्दार्थः**—वाच्यार्थः ।

न पश्यन्तीत्यतो लिङ्गात् ज्ञानमेव विधित्सितम् ।
न तूपासनमिति चेन्मैवमैकार्थ्यकारणात् ॥ (772)

सर्वत्रैकार्थता दृष्टा वेदोपासनशब्दयोः ।
यथान्यत्र तथेहापि कस्मान्नाध्यवसीयते ॥ (773)

रश्मींस्त्वं पर्यावर्तयादिति चावर्तनात्मकः ।
विधिः श्रुतः श्रुतौ स्पष्टस्ततश्च फलसंगतिः ॥ (774)

* देवो भूत्वेति देवांश्च सदा तद्भावभावितः ।
देवप्राप्तिं श्रुतिः प्राह भावनाबलसंश्रयात् ॥ (775)

स योऽत इत्युपक्रम्य ह्युपासनगिरैव तु ।
अन्त आत्मेत्युपासीत तथैवोपासनश्रुतेः ॥ (776)

नम् । अतः [1]तत्स्वरूपकथनं प्रकृतानुपयुक्तम्, इति शङ्कते—नेति । ज्ञानोपासनशब्दयोरेकार्थत्वात्, इत्याह—मैवमिति । (772) [2]ऐकार्थ्यं प्रथयति—सर्वत्रेति । 'दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद'[बृ. 3-3-9] इत्यादौ ज्ञानार्थवेदशब्दस्य [3]तदभ्यासवाचित्वदर्शनात्, इहापि ज्ञानोपासनयोरैकार्थ्यं उपासनाप्रकरणादित्यर्थः । (773) एतत् द्रढयितुं अन्यत्राप्युपासने विधिर्दृश्यते, इत्याह—रश्मीनिति । एकपुत्रत्वदोषेणादित्योपासननिन्दया रश्म्युपासनं बहुपुत्रफलं विहितमित्यर्थः । (774) उपासनस्य फलसाधनत्वे मानमाह—देव इति । (775)

'एकैकमुपास्ते' इत्युपासनेनोपक्रमात् 'आत्मेत्येवोपासीत' इति [4]तेनोपसंहारात् मध्ये 'न स वेद' इति प्रयुक्तवेदशब्दस्याप्युपासनार्थत्वनिश्चयः, इत्याह

---

1. तत्स्वरूपकथनं—उपासनस्वरूपकथनम् ।
2. ऐकार्थ्यमिति ज्ञानोपासनशब्दयोरित्यादिः ।
3. तदभ्यासवाचित्वेति ज्ञानाभ्यासवाचित्वेत्यर्थः ।
* देवो भूत्वेति 'देवो भूत्वा देवानप्येति' इति श्रुतिः, 'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेबरम्। तं तमेवेति कौन्तेय सदा तद्भावभावितः' ॥ इति स्मृतिश्च उपासनात् फलमित्यत्र प्रमाणत्वेनात्र वार्तिके उपन्यस्ते। 'श्रुतिः प्राह' इति स्मृतेरुपलक्षणम्। स्मृतेरन्त्यः पादः 'सदा तद्भावभावितः' इत्युद्धृतः वार्तिके इति बोध्यम् ।
4. तेनोपसंहारात्—उपासनेनोपसंहारात् ।

* प्रवृत्तौ चोपसंहारे तथैवोपासनश्रुतेः ।
वेदेत्युपासनार्थत्वमस्याप्यभ्युपगम्यते ॥ (777)

तथैतत्सर्वं वेदेति यत्र यत्र श्रुतिर्भवेत् ।
अभ्यासस्य तदाऽप्राप्तेरपूर्वविधिरिष्यते ॥ (778)

वस्तुस्वरूपान्वाख्याने न च कश्चित्प्रवर्तते ।
* तज्ज्ञानजन्ममात्राच्च पुरुषार्थोऽपि नेष्यते ॥ (779)

यादृक्कर्मविधे रूपमात्मध्यानविधेरपि ।
तादृगेव, विशेषोऽत्र न मनागपि गम्यते ॥ (780)

कुतोऽविशेष इति चेदत आह यथा तथा ।
मानस्येव क्रिया यस्मादविशिष्टोभयोरपि ॥ (781)

—स य इति । (776) उपक्रमादिवशादर्थनिश्चयो युक्तः इति मत्वा एतदेव स्पष्टयति—प्रवृत्तौ चेति । (777) 'अनेन हि' इत्यादौ वेदशब्दस्यार्थान्तरवत् इहापि स्यादर्थान्तरम्, इत्यत्राह—तथेति । वेदशब्दस्योपासनार्थत्वे फलमाह—अभ्यासस्येति । (778) विधिं विना प्रवृ(त्त)[त्त्य]योगाच्च प्रवर्तको विधिरेष्टव्यः, इत्याह—वस्त्विति । फलरागादेव प्रवृत्तिसिद्धेः व्यर्थो ज्ञाने विधिः, अत्राह—तज्ज्ञानेति । (779) कर्मविधिसाम्याच्चोपासनविधिरेष्टव्यः, इत्याह—यादृगिति । (780) 'यथा' इत्यादि भाष्यमवतारयितुं पृच्छति—कुत इति । कर्मात्मज्ञानविध्योः शब्दतोऽविशे(ष्या)[षो] यथा, त[था व] [1]थेत्यादि भाष्येणाह भाष्यकृदित्यर्थः । अर्थतोऽप्यविशेषं दर्शयति—मानसीति । [2]उभयोरपि विध्योः मानसी क्रिया विषयत्वेनाविशिष्टा यस्मात्, तस्मात् वषट्करिष्यन्नि-

---

* प्रवृत्तौ—प्रक्रमे ।

* तज्ज्ञानजन्ममात्राच्च—विध्यस्पृष्टवस्तुज्ञानोत्पत्तिमात्राच्च ।

1. यथेत्यादि भाष्येण—"यथा यजेत जुहुयात् इत्यादयः कर्मविषयः, न तैरस्य 'आत्मेत्येवोपासीत' 'आत्मा वा अरे द्रष्टव्यः' इत्याद्यात्मोपासनविधेः विशेषोऽवगम्यते ।" इति भाष्येण ।

2. उभयोरपि विध्योः — कर्मविधौ आत्मज्ञानविधौ च ।

* वषट्करिष्यंस्तां ध्यायेदिति यद्वद्विधीयते ।
मानस्येव क्रिया तद्वदात्मार्थोपासनेष्वपि ॥ (782)

भावनांशत्रयं यस्मादुपासनविधावपि ।
संभाव्यतेऽतो विज्ञेयो यजेतेत्यादिवद्विधिः ॥ (783)

स्वाध्यायस्य विधिर्ब्रूते लिङाद्यात्मानमेव च ।
विधिप्रशस्तज्ञानाभ्यां कुरुध्वं पुंस्प्रवर्तनम् ॥ (784)

करणांशो विधिज्ञानं किमंशः पुंस्प्रवर्तनम् । *
इतिकर्तव्यता चात्र ह्यर्थवादप्रशंसनम् ॥ (785)

त्यादौ यथा मानसी क्रिया विधीयते, तथोपासनवाक्येषु [1]सैव विधीयते इत्यन्वयः । (781-782) उपासनविधौ हेत्वन्तरमाह—**भावनेति** । [2]भाव्यनिष्ठो भावकव्यापारो भावना । सा द्वेधा, शब्दभावनार्थभावना भेदात् । (783) त(त्)[त्र]शाब्दभावनामाह—**स्वाध्यायस्येति** । स्वाध्यायोऽध्येतव्यः इति विधिः स्वविषयस्वाध्यायात्मकं लिङादिशब्दं वदति । [3]प्रेरणाव्यापारवल्लिङादि(स्व)स्वरूपज्ञानादर्थवादज्ञानाच्च अधिकारिणां प्रयत्नरूपां प्रवृत्तिं कुरुध्वमिति । (यथा)[तथा च] लिङादिपदं श्रुतवतः व्युत्पन्नस्याधिकारिणः स्वास्थ्यात् प्रच्युतिः पुंस्प्रवृत्तिः । तद्धेतुः प्रेरणाख्यो लिङादिव्यापारः शब्दभावनेत्यर्थः । (784) सामान्येनोक्तां[4]शत्रय विशदयति—**करणेति** । प्रेरणाधर्मको लिङादिशब्दो विधिः । तज्ज्ञानं शब्दभावनायाः करणांश इत्यर्थः । भाव्यमाह—**किमंश इति** । पुंस्प्रवृत्तिरूपं

---

* **वषट्करिष्यन्**—होता ।

1. **सैव**—मानसी क्रियैव ।

2. **भाव्यनिष्ठः**—भाव्योद्देश्यक इति यावत् ।

3. **प्रेरणाव्यापारवल्लिङादीति** प्रवृत्त्यनुकूलव्यापारः प्रेरणा । सा चापौरुषेये वेदे लिङादिशब्दगता अलौकिकी । सैव शब्दभावना लिङ्त्वेन लिङ्पदबोध्या चेति मीमांसकमर्यादा ।

4. **अंशत्रयं**—साध्यसाधनेतिकर्तव्यतारूपांशत्रयम् ।

* **किमंश इति** किं भावयेत् इति शब्दाभिलप्याकांक्षाविषयः साध्यांशः भाव्यांशः किमंशपदेन व्यवहृतः ।

* प्रवृत्तस्य ततः पुंसः करणं याग इष्यते ।
स्वर्गादिश्च किमंशः स्यात् प्रयाजादिस्तथा परः ॥ (786)

यथा तत्र, तथेहापि शास्त्रेणैव समर्प्यते ।
अंशत्रयमतो युक्तमपूर्वविधिरेव तु ॥ (787)

किमंश आत्मा विज्ञेयः करणांशस्तथा मनः ।
इतिकर्तव्यता त्यागब्रह्मचर्यादिसाधनम् ॥ (788)

कृत्स्नप्रकरणार्थस्य ज्योतिष्टोमादिगामिनः ।
विध्युद्देशतया यद्वदुपयोगस्तथैव च ॥ (789)

शब्दभावनाया भाव्यांश इत्यर्थः । अंशान्तरमाह—**इतिकर्तव्यतेति** । शब्द-भावनायामितिकर्तव्यतांशः, पूर्णाहुत्या सर्वान्कामानवाप्नोति [1]इत्याद्यर्थवादज्ञान-मित्यर्थः । (785) पुंप्रवृत्तिरूपार्थ[2]भावनांशत्रयमाह—**प्रवृत्तस्येति** । ततः—शब्दभावनात इति । (786) [3]दृष्टान्ते [4]प्रतिपादितमर्थं दार्ष्टान्तिके समर्पयन्नाह—**यथेति** । इह—आत्मज्ञानेऽपीत्यर्थः । (787) अंशत्रयं विभजते—**किमंश इति** । [5]मु(क्त)[क्ति]रूपेण साध्यत्वादात्मा भाव्यांश इत्यर्थः । (788) [6]तत्परतत्त्वमादिवाक्यविरोधात् न ज्ञानविधिः, इत्याशङ्क्य, [7]तस्य विधिशेषत्वान्न वस्तुपरत्वम्, इत्याशयेन दृष्टान्तमाह — **कृत्स्नेति** । प्रकरणरूप-स्यार्थस्य । विध्युद्देशतया—ज्योतिष्टोमादिविधिशेषतयेत्यर्थः । दार्ष्टान्तिकमाह—

---

1. **अर्थवादज्ञानमिति** अर्थवादजन्यप्राशस्त्यज्ञानमिति यावत् ।
2. **अर्थभावनांशत्रयं**—अर्थभावनायाः भाव्यकरणेतिकर्तव्यरूपांशत्रयम् ।

* **प्रवृत्तस्येति** प्रवृत्तस्य या प्रवृत्तिः अर्थभावनारूपा तस्याः इति यावत् । **परः**—इतिकर्तव्यांशः ।

3. **दृष्टान्ते**—यागादिविधौ ।
4. **प्रतिपादितमर्थं**—भावनांशत्रयवत्त्वम् ।
5. **मुक्तिरूपेणेति** अविद्यानिवृत्तेः मुक्तात्मस्वरूपत्वादिति भावः ।
6. **तत्परतत्त्वमादिवाक्यविरोधादिति** ऐकात्म्यवस्तुनि तात्पर्योपेततत्त्वमस्यादि-वाक्येन विरोधादित्यर्थः ।
7. **तस्य**—तत्त्वमादिवाक्यस्य ।

उपासाविध्यपेक्षस्य प्रक्रियापतितस्य च ।
आत्मार्थोपासनविधिदेशे तद्विनियोज्यते ॥ (790)

अत्रास्थूलादिवाक्यानामुपास्यार्थसमर्पणे ।
उपयोगः, फलं मोक्षस्तमसो वाऽस्त्वपद्धतिः ॥ (791)

संप्रदायविदस्त्वन्ये यथावच्छास्त्रचक्षुषा ।
व्याचक्षते महात्मानो यथा तदभिधीयते ॥ (792)

विधिशून्यस्य वाक्यस्य न प्रामाण्यं किलेष्यते ।
नियोगानुप्रवेशेन यतो वस्त्ववबोध्यते ॥ (793)

नानुवादस्वरूपस्य निरस्तविधिकस्य हि ।
सापेक्षस्येह वचसः प्रामाण्यमुपपद्यते ॥ (794)

तथेति । उपासाविधिप्रकरणस्थवाक्यजातस्य, उपास्तिविधिशेषत्वेनोपयोग इति शेषः । एतत् विशदयति—**आत्मार्थेति** । विधिविकलं वेदान्तजातमात्मोपास्तिविधिशेषतया विनियुज्यते इत्यर्थः । (789-790) अस्थूलादिवाक्यानां विषयसमर्पणेन विधिशेषत्वमाह—**अत्रेति** । '[1]ब्रह्मविद्ब्रह्मैव भवति' [मु. 3-2-7] 'तरति शोकमात्मवित्' [छा. 7-1-3] इत्यादीनां फलसमर्पकत्वेनोपयोगं मत्वा, फलं ब्रह्मभावः, सनिदानबन्धध्वंसो वा, इत्याह—**फलमिति** । (791)

मुक्तिफलं विशिष्टं ज्ञानान्तरं विधेयमिति मतनिरूपणम्

वेदान्तेषु मुक्तिफलमात्मोपासनं विधेयमित्युक्तम् । इदानीं मुक्तिफल[2]ज्ञानान्तरं विधेयमिति मतान्तरमाह—**संप्रदायेति** । महात्मानः, संप्रदायविदः इति च [3]क्षेपः । (792) वेदान्तानां विधिपरत्वे युक्तिमाह—**विधीति** । (793)

---

1. ब्रह्मविद्ब्रह्मैव भवतीति 'ब्रह्म वेद ब्रह्मैव भवति' (मु. 3-2-9) इति मुण्डकश्रुतेरर्थानुवादः इति बोध्यम् ।
2. ज्ञानान्तरं—शब्दजन्यातिरिक्तम् ।
3. क्षेप इति न स्तुतिरिति शेषः ।

क्रियैव ननु सर्वत्र तत्र तत्र विधीयते ।
स्वव्यापारे हि विधिना नियोक्तुं शक्यते यतः ॥ (795)

द्रव्यस्वरूपेऽसाध्यत्वाद्विधिः कथमिहेष्यते ।
न हि सिद्धस्य साध्यत्वं निपुणेनापि गम्यते ॥ (796)

न चात्मविषयं ज्ञानं वेदान्तेषु विधीयते ।
तस्य विध्यन्तरात्सिद्धेर्वेदान्तस्यानुवादता ॥ (797)

स्वाध्यायाधीतिविधिना ज्योतिष्टोमादिबोधवत् ।
वेदान्तार्थावबोधोऽपि तेनैवेह समर्पितः ॥ (798)

स्यादेतत् फलसंबन्धो नियोगविरहाद्यदि ।
प्रत्यग्ज्ञानस्य लभ्येत न त्वसौ लभ्यते तथा ॥ (799)

अज्ञातज्ञापकत्वेनैव वाक्यप्रामाण्यं[न]नि[1]योगानुप्रवेशेन, अत्राह—**नानुवादेति** । सिद्धस्य मानान्तरयोग्यत्वादित्यर्थः । (794) विधेयाभावान्न वेदान्तानां [2]तत्परत्वमिति शङ्कते—**क्रियैवेति** । (795) क्रियायामपि विधिप्रत्ययसामर्थ्यात् नियोगाङ्गीकरणम्, एवं 'आत्मा द्रष्टव्यः' [बृ. 4-4-5] इति श्रवणात् वेदा[न्ता]र्थेऽपि विधिरित्याशङ्क्य, किमात्मा विधेयः, तज्ज्ञानं वा, नाद्यः, इत्याह—**द्रव्येति** । (796) द्वितीयं दूषयति—**न चेति** । (797) किं तद्विध्यन्तरम्, तदाह—**स्वाध्यायेति** । इह—मुमुक्षौ । समर्पितः—समर्थित इत्यर्थः । (798)

आत्मतज्ज्ञानयोरविधेयत्वात् अविधिपरत्वेऽभिहिते, पूर्ववादी आह—**स्यादेतदिति** । [3]अध्ययनविधिप्रापिताद[4]न्यदेव विधेयमित्यर्थः । (799) प्रत्यक्षादि-

---

1. **नियोगेति** कार्यादिपदव्यपदेश्यः लिङर्थः नियोगः । तच्छेषतयैव सिद्धं वस्तु मानं वेदवाक्यं बोधयतीति प्राभाकरसंप्रदायः ।
2. **तत्परत्वं**—विधिपरत्वम् ।
3. **अध्ययनविधिप्रापितादिति** शाब्दज्ञानादिति शेषः ।
4. **अन्यदेवेति** ज्ञानमिति शेषः ।

* पुमर्थकारिता बुद्धेः नियोगादेव लभ्यते ।
नातस्तन्निरपेक्षस्य प्रामाण्यं वचसो भवेत् ॥ (800)

नैकात्म्यवस्तुसंव्याप्तिव्यतिरेकेण किञ्चन ।
फलं स्यादात्मबोधस्य यथा कर्मफलं तथा ॥ (801)

* अत्रोच्यतेऽन्यदेवेदं विज्ञानान्तरमात्मगम् ।
विधीयते सहोपायं वेदान्तोक्तिप्रबोधतः ॥ (802)

* न हि वाक्यसमुत्थेन ब्रह्मावाक्यार्थरूपकम् ।
विज्ञानेन परिच्छेत्तुं शक्यते कर्मवत् क्वचित् ॥ (803)
नानापदार्थसंसृष्टरूपं शब्दात्प्रजायते ।
विज्ञानं तेनावाक्यार्थरूपं नैव च गम्यते ॥ (804)

प्रमाणवत् नियोगनिरपेक्षं वेदान्तवाक्यं फलवदर्थसमर्पकं किं न स्यात्, अत्राह—**पुमर्थेति** । **बुद्धेः** वाक्यजाया इति शेषः । (800) आत्मज्ञानस्य नैयोगिकफलाभावेऽपि [1]विषयज्ञाततारूपफलसत्त्वात् स्यादात्मनि वेदान्तप्रामाण्यमिति, अनवगतपराभिसन्धिः सिद्धान्ती शङ्कते—**नैकात्म्येति** । (801) परः स्वाभिप्रायं प्रकटयन्नाह—**अत्रेति** । (सर्व)[विषय]गतप्राकट्ये मानाभावात् मोक्षफलं ज्ञानं मननादिसाधनसहितं विधेयमित्यर्थः । (802) शाब्दज्ञानेनैव ब्रह्मणः सिद्धत्वात् किं ज्ञानान्तरविधिना, अत्राह—**न हीति** । कर्मवदिति व्यतिरेकोदाहरणम् । क्वचित्—देशे काले (पदेषु)[पुरुषे]वेत्यर्थः । (803) हेतुमाह—**नानेति** । (804)

---

* "नियोगं विना फलसंबन्धो ज्ञानस्य किं न स्यात्, नायं सर्पो रज्जुः इत्यत्र तथा दृष्टेरित्याशङ्क्याह—**पुमर्थेति** । राजा गच्छतीत्यादौ वस्तुधीमात्रात् पुमर्थादृष्टेः, न सर्पो रज्जुः इत्यत्रापि मा भैषीः इति नियोगाङ्गीकारादिति भावः ।" इति **शास्त्रप्रकाशिका** ।

1. **विषयज्ञाततारूपफलेति** ज्ञानेन स्वविषये प्राकट्यापरपर्यायज्ञातता जन्यते । तादृशफलाश्रयत्वादेव विषयस्य ज्ञानकर्मत्वमिति मीमांसकाः ।

* **वेदान्तोक्तिप्रबोधतः विज्ञानान्तरमिति** वेदान्तवाक्यजन्यशाब्दज्ञानातिरिक्तं ज्ञानमित्यर्थः ।

* **अवाक्यार्थरूपकं**—असंसृष्टापरोक्षमिति यावत् ।

शब्दस्वभाव एवैषः संसृष्टार्थावबोधनम् ।
ब्रह्मासंसृष्टरूपत्वात् तेनातो नावगम्यते ॥ (805)

वाक्यं चातीन्द्रियार्थेषु प्रमाणमिति निश्चितम् ।
तस्याप्यविषयत्वात्तद्विज्ञानान्तरगोचरः ॥ (806)

न चेद्वाक्योत्थविज्ञानपरिच्छेद्यं तदिष्यते ।
नाम्नायार्थो भवेत्तर्हि, नैवं वेदार्थ एव हि ॥ (807)

अपि चाधीयतेऽत्रार्थे वेदवाक्यान्यनेकशः ।
प्रज्ञां कुर्वीत विज्ञायेत्येवमादीनि यत्नतः ॥ (808)

* मुमुक्षोः पुरुषार्थस्य मोहमात्रान्तरायतः ।
ज्ञानात्कार्यान्तराभावान्नैतत्साध्वभिधीयते ॥ (809)

असंसृष्टापरोक्षार्थे [1]तद्विपरीतज्ञानं प्रमाणभू(तं)[त]शब्दः कथं कुर्यात्, अत्राह— **शब्देति** । विषयानुरोधात् बहिरङ्गात् स्वभावानुरोधोऽन्तरङ्गो बलीयानित्यर्थः । [805] ब्रह्मणोऽतीन्द्रियत्वात् शाब्दज्ञानगोचरत्वं धर्मादिवत्, अत्राह—**वाक्यं चेति** । यद्यपि अतीन्द्रियार्थे शब्दो मानं, अतीन्द्रियं च ब्रह्म । तथापि तस्य [2]शाब्दज्ञानाविषयत्वात् ज्ञानान्तरगोचरतेत्यर्थः । (806) आत्मनो वेदगम्यत्वाभावे [3]वेदार्थता न स्यात्, इति शङ्कते—**न चेदिति** । वेदविहितोपायजन्यज्ञानविषयत्वात् वेदार्थता, इति परिहरति—**नैवमिति** । (807) [4]ज्ञानान्तरस्य वेदान्तैर्विधेयत्वे मानमाह—**अपि चेति**। अनेकशः(ब्द) इति अभ्यासं तात्पर्यलिङ्गमाह ।(808)

मोक्षाय शाब्दज्ञानं ज्ञानान्तरं वा न विधेयमिति सिद्धान्तनिरूपणम्

वेदान्तेषु शाब्दज्ञानं ज्ञानान्तरं वा मोक्षाय विधेयमिति प्राप्ते, सिद्धान्तयति—**मुमुक्षोरिति** । पुमर्थस्य ब्रह्मणः मुमुक्षुस्वरूपत्वात् अज्ञानमात्रव्यवधानात्

---

1. **तद्विपरीतज्ञानं**—संसृष्टपरोक्षविषयकज्ञानम् ।
2. **शाब्दज्ञानाविषयत्वादिति** असंसृष्टत्वादपरोक्षत्वाच्चेति भावः ।
3. **वेदार्थता न स्यादिति** तथा च औपनिषदत्वविशेषणमात्मनः श्रुतावभिहितं न संगच्छेतेति भावः ।
4. **ज्ञानान्तरस्य**—शाब्दज्ञानातिरिक्तज्ञानस्य ।

* 'मुमुक्षुपुरुषार्थस्य' इति मु. पु.पाठः ।

विधेर्हि तत्र साफल्यं यत्र वाक्योत्थबोधतः ।
व्यतिरेकादनुष्ठेयः पदार्थः कश्चिदिष्यते ॥ (810)

यथाग्निहोत्रयाथात्म्यविज्ञानव्यतिरेकतः ।
प्रयोगात्मा पृथक् तादृक् नेह कश्चिदपीक्ष्यते ॥ (811)

उत्पत्त्यादौ हि साध्येऽर्थे पुंव्यापृतिरपेक्ष्यते ।
* उत्पत्त्यादिविरुद्धत्वान्मुक्तेर्नान्यव्यपेक्षिता ॥ (812)

उत्पत्त्यादि स्वतो नो चेत् किं मुक्तौ कर्मणः फलम् ।
उत्पत्त्यादि स्वतश्चेत्स्यात् किं मुक्तौ कर्मणा वद ॥ (813)

उत्पत्त्यादौ तु यच्छक्तं हेतुमात्रमपेक्षते ।
तस्य कर्मव्यपेक्षा स्यात् नान्यथा तदपेक्षते ॥ (814)

अज्ञानस्य ज्ञानान्निवृत्तेः तस्य च वाक्यमात्रजन्यत्वात् अनुष्ठेयाभावात् विधिरनर्थक इत्यर्थः । (809) ज्ञानादन्यत् न विधेयमस्ति चेत्, ज्ञानमेव विधीयताम्, अत्राह—**विधेर्हीति** । (810) वाक्यबोध्यो धात्वर्थो विधेयो न ज्ञानमित्यत्र दृष्टान्तमाह—**यथेति** । इह—आत्मज्ञाने, तादृक्·विधेयो नास्तीत्यर्थः । (811) [1]अभ्यासादिक्रिया अत्र विधीयताम्, अत्राह—**उत्पत्त्यादाविति** । (812) मुक्तेरपि फल(व)त्वात् स्वर्गादिवत् साध्यत्वात् क्रियापेक्षा स्यादिति चेत् । **किं** तस्याः स्वतो नोत्पत्त्यादिकमस्ति, किं वा स्वत एव तदस्ति, इति विकल्प्य, क्रमेण दूषयति—**उत्पत्त्यादीति** । (813) अभ्युदयस्याप्येवं[2] कर्मापेक्षा न स्यात्, अत्राह—**उत्पत्त्यादाविति** । [3]त(द)[दश]क्तस्य कर्मापेक्षा न स्यात् गगनवत्,

---

1. **अभ्यासादिक्रिया**—आत्मज्ञानाभ्यासादिक्रिया ।

* **उत्पत्त्यादीति** उत्पत्त्याप्तिविकृतिसंस्कृतिरूपचतुर्विधकर्मफलविलक्षणमुक्तौ पुरुषव्यापारापेक्षा नास्तीत्यर्थः ।

2. **एवं कर्मापेक्षा न स्यादिति** अभ्युदयस्य स्वर्गस्य स्वतः यदि नोत्पत्तिः, तदा कर्मणा किं फलम् । यदि स्वतः उत्पत्तिः, तदापि कर्मणा किं फलमिति रीत्येत्यर्थः ।

3. **तदशक्तस्य**—उत्पत्तावशक्तस्य (नित्यस्य) मोक्षस्य ।

प्रवृत्त्या स्वात्मसिध्यर्थं कारकं सदपेक्षते ।
कारकाणां क्रियापेक्षा नोभयापेक्षितात्मनि ॥ (815)

संभावितात्मकर्तृत्वो ब्राह्मण्याद्यधिकारवान् ।
विधिश्रुतेः प्रवर्तेत न तु प्लुष्टतदन्वयः ॥ (816)

* अपूर्वानपराबाह्यं ब्रह्मास्मीति विजानतः ।
कारकत्वं न संभाव्यं तन्मोहविरहात् क्वचित् (817)

आत्मनो ब्रह्मता यत्र ब्रह्मणोऽप्यात्मता स्वतः ।
तत्त्वमस्यादिवाक्योत्थबोधाच्चेत् किमितीहते ॥ (818)

अब्रह्मानात्मविज्ञानमोहोत्थध्वंसहेतुतः ।
प्रत्यग्याथात्म्यबोधस्य कुतोऽमूढः प्रवर्तते ॥ (819)

तत्र को मोह इत्येवं मन्त्रवर्णोऽपि नो जगौ ।
संसारासंभवं साक्षादेकत्वमनुपश्यतः ॥ (820)

बाध्यबाधकभावाच्च प्रत्यङ्मोहप्रबोधयोः ।
सहावस्थानताभावात् प्रवृत्तेः स्याद्संभवः ॥ (821)

इत्याह—**नान्यथेति** । (814) क्रियाकारकयोरेवान्योन्यापेक्षत्वात्, आत्मनः [1]तद्विलक्षणत्वात् नो [2]भयापेक्षापि, इत्याह—**प्रवृत्त्येति** । (815) अधिकार्यभावाच्च नात्र विधिः, (अत्रा)[इत्या]ह—**संभावितेति** । (816) विदुषोऽपि कर्तृत्वाभिमानात् भिक्षाटनादिप्रवृत्तिदर्शनात् विधिः, अत्राह—**अपूर्वेति** । (817) ब्रह्मात्मनोरैक्यस्य स्वाभाविकत्वाच्च विदुषो न नियोगः, इत्याह—**आत्मन इति** । यत्र—विद्यावस्थायाम् । चेत् —निश्चितमित्यर्थः । (818) [3]प्रवृत्तिहेतुदोषाभावाच्च नाधिकारः, इत्याह—**अब्रह्मेति** । अमूढः इति पदम् । (819) ज्ञानस्याज्ञाननिवर्तकत्वे मानमाह—**तत्रेति** । (820) इतश्च विदुषो नाधिकारः, इत्याह—**बाध्येति** । (821)

---

1. **तद्विलक्षणत्वात्**—क्रियाकारकविलक्षणत्वात् ।
2. **नोभयापेक्षा**—न क्रियाकारकोभयापेक्षा ।

* **अपूर्वेति** विदुषः भिक्षाटनादिप्रवृत्तिः बाधितानुवृत्तिरिति भावः ।

3. **प्रवृत्तिहेतुदोषाभावाच्चेति** 'प्रवर्तनालक्षणा दोषाः' इति न्यायसूत्रे रागद्वेषमोहानां दोषाणां प्रवृत्तिजनकत्वमुक्तम् ।

मतं वाक्योत्थविज्ञानमात्राच्चेन्न निराकृतिः ।
अब्रह्मानात्मविषयमोहस्येति, न तत्तथा ॥ (822)

तत्त्वमस्यादिवाक्यानां तावन्मात्रावबोधनात् ।
अर्थान्तरं न संभाव्यं वाक्यवाक्यार्थवेदिना ॥ (823)

अस्थूलाद्यर्थशंसीनि द्रष्टव्यादिविधेर्यदि ।
समर्पयेयुर्विषयमित्येतदपि नेष्यते ॥ (824)

मुक्त्यन्तरायसंमोहविध्वंस्यैकात्म्यबोधतः ।
न तदर्थान्तराभावादिति पूर्वमवादिषम् ॥ (825)

प्रत्यग्याथात्म्यव्याख्यानमात्रेणैव विना विधिम् ।
न प्रवर्तेत वाक्यार्थसंबोधायेति चेन्मतम् ॥ (826)

नात्मयाथात्म्यसंबोधिवाक्यश्रवणमात्रतः ।
प्रत्यक्तत्त्वधियः सूतेः किमन्यद्विधिनेष्यते ॥ (827)

---

[1]'वाक्यजनित' इत्यादिभाष्यस्थं चोद्यमुद्भावयति—**मतमिति** । परिहरति—**न तदिति** । ज्ञानस्य भ्रान्तिनिवर्तकत्वात् वि(धा)[धि]ना भाव्यमिति यत्, तत् तथा नेत्यर्थः । (822) ऐकात्म्यपरवाक्योत्थज्ञानस्य अज्ञानतज्ज-निवर्तकत्वादिति हेतुमाह—**तत्त्वमसीति** । (823) [2]चोद्यान्तरमनुवदति—**अस्थूलेति** । दूषयति—**इत्येतदिति** । (824) हेतुमाह—**मुक्तीति** । तत्—विधिशेषत्वम्, नेति यावत् । (825)

ज्ञानोत्पत्त्यर्थं विधिरेष्टव्यः इति विधिवादी शङ्कते—**प्रत्यगिति** । (826) इह जन्मनि जन्मान्तरे वा अनुष्ठितपुण्यनिर्बर्हितकल्मषस्य श्रवणमात्रात् धीसिद्धेः [3]**न विधिफलम्**, इत्याह—**नेति** । (827) धीसाधनश्रवणे विधिः, इत्याशङ्क्याह

---

1. **वाक्यजनितेति** "वाक्यजनितविज्ञानमात्रात् नाब्रह्मानात्मविज्ञाननिवृत्तिरिति चेत् ।" इति भाष्यप्रतिपादितं चोद्यमित्यर्थः ।
2. **चोद्यान्तरमनुवदति**—"द्रष्टव्यविधेः विषयसमर्पकाण्येतानीति चेत् ।" इति भाष्योक्तं चोद्यान्तरमनुवदति ।
3. **न विधिफलमिति** धीरिति शेषः ।

अन्तरेण विधिं वाक्य श्रवणायापि नेहते ।
इति ब्रुवाणं प्रब्रूयादनिष्टं श्रूयते कुतः ॥ (828)

अनवस्थाप्रसक्तिश्च तत्र तत्र प्रसङ्गतः ।
विध्यन्तरस्येति ततो यथोक्तोऽर्थोऽवसीयताम् ॥ (829)

यथात्मवादिवाक्यार्थश्रुतये न प्रवर्तते ।
विधिवाक्यमृते तद्वद्विध्यर्थश्रवणेऽपि न ॥ (830)

मतं, वाक्योत्थविज्ञानस्मृतिसंतानता यदि ।
केवलोक्तिश्रवोद्भूतज्ञानादर्थान्तरं स्फुटम् ॥ (831)

—**अन्तरेणेति** । [1]अनिष्टार्थो(अभ्यासा)[सत्या]दिरूपवाक्यस्य विधिं विना श्रवणवत् वेदान्तानामपि विनैव विधिं श्रवणमविरुद्धमित्यर्थः । (828) वाक्यमात्र-श्रवणस्य विध्यधीनत्वे भङ्गान्तरमाह—**अनवस्थेति** । विधिवाक्यश्रवणे विध्यन्तरं, तच्छ्रवणेऽपि विध्यन्तरमिति प्रसङ्गादित्यर्थः । यतो न विध्यायत्तं श्रवणं अतो वाक्यश्रवणमात्रादात्मधीः, इत्याह —**तत इति** । (829) अनवस्थां स्पष्टयति—**यथेति** । उभ[2]यत्र अर्थशब्देन वाक्यमेवोच्यते । (830) शाब्दज्ञानाभ्यासस्तर्हि विधीयताम्, इति शङ्कते—**मतमिति** । वाक्योत्थज्ञानात् तदभ्यासस्य [3]अर्थान्त-रत्वात् विधेयत्वमित्यर्थः । (831) [4]आक्षिपति—**नैवमिति** । तस्मिन्—आत्मनि

---

1. **अनिष्टार्थेति** अनिष्टार्थबोधकस्य असत्यादिलक्षणवाक्यस्य श्रवणं न विध्यायत्तमिति भावः ।

2. वाक्यश्रवणस्य विध्यधीनत्वे अनवस्थाप्रतिपादनाय प्रवृत्ते 'यथात्मवादिवाक्यार्थश्रुतये न प्रवर्तते' इति वार्त्तिके वाक्यस्य योऽर्थः तच्छ्रवणे विधिं विना प्रवृत्त्यभावकथनं न संगच्छते । अतः अत्र वाक्यार्थपदेन वाक्यरूपोऽर्थ एव विवक्षितः, इत्याह—**उभयत्रेति** । पूर्वार्धे 'वाक्यार्थश्रुतये' इत्यत्र, उत्तरार्धे 'विध्यर्थश्रवणे' इत्यत्र चेत्यर्थः ।

3. **अर्थान्तरत्वादिति** तथा च 'अर्थान्तराभावात्' इति पूर्वं भाष्योक्तं न युक्त-मिति आक्षेपभावः ।

4. **आक्षिपति**—दूषयति ।

नैवं साक्षाद्यथा वस्तुबोधस्यैवेह संभवात् ।
नित्यं संनिहिते तस्मिन् तत्स्मृत्या किं प्रयोजनम् । (832)

* अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः ।
निष्फलेषुवितुन्नाङ्गः नङ्क्ष्यतीत्यतिदुष्करम् ॥ (833)

अपि प्रत्यक्तमो नित्यं भास्वच्चैतन्यबिम्बितम् ।
बुद्धितद्वृत्तयश्चैवं तप्तायोविस्फुलिङ्गवत् ॥ (834)

प्रागप्यनात्मसंपातात् प्रतीचैवाप्रमेयकम् ।
जन्मनैवाखिलं ज्ञानं फलवत् किमपेक्षते ॥ (835)

मात्रादिव्यवधानेन यथान्यत्र मितेः फलम् ।
फलतोऽवगतेरेव न तथेहात्मदर्शने ॥ (836)

संनिहिते - प्रत्यक्तमे वस्तु[नि]बोधस्य - प्रमाणज्ञानस्य साक्षादपरोक्षानुभवरूपस्य संभवादित्यर्थः । (832) वाक्योत्थज्ञानात् सकारणसंसारनिवृत्त्ययोगात् सन्तानो विधेयः, इत्याशङ्क्याह—अपीति । विद्धश्चेत्—विद्ध एवेत्यर्थः । प्रमाणमनिवर्तकं तदभ्यासो निवर्तक इति दुःसंपादमित्यर्थः । (833) अशनायाद्यतीतब्रह्मज्ञाने विध्यसंभवात् संसार्यात्मधीसन्तानो विधेयः । तत्रानुपपत्तिं दर्शयितुं सर्वस्य चैतन्यव्याप्तिमाह—अपीति । प्रत्यगज्ञानं प्रत्यक्तमः । तदपि सदा चैतन्यव्याप्तम् । एवं तत्कार्यबुद्धितद्वृत्तयोऽपि चैतन्यव्याप्ता इत्यर्थः । [1]द्वयोश्चैतन्यव्याप्तौ क्रमेणोदाहरति—तप्तेति । (834) बुद्धितद्वृत्तीनामनुभवव्याप्तौ को लाभः, अत्राह—प्रागिति । विधेयनैरपेक्ष्यसिद्धिरित्यर्थः । (835) अनात्मनि पटादौ मानफलं स्फुरणं यथा मातृमेयसंबन्धव्यवधानेन भवति, एवमात्मधीफलस्य [2]तद्व्यवधानात् अस्ति विधेयापेक्षा, अत्राह—मात्रादीति । अवगते-

---

* 'विद्धश्चेत्' इत्यत्र अवधारणार्थकः चेच्छब्दः क्रियापदादुपरि संबध्यते, विद्धोऽपि नैव ममार इत्यर्थः । इति शास्त्रप्रकाशिकाकाराः ।

1. द्वयोः—अज्ञानतत्कार्ययोः ।

2. तद्व्यवधानात्—मातृमेयव्यवधानात् ।

* खपूर्ण एव सन् कुम्भो द्रव्यैर्नानाविधैर्युतिम् ।
वियोगं वा यथा गच्छेत् चैतन्येद्धास्तथा धियः ॥ (837)

तस्मादावृत्तिपक्षेऽपि स्वतस्तत्सिद्धितो विधिः ।
नापूर्वः कश्चिदत्र स्यादत एवापरोऽपि न ॥ (838)

* अशब्दाद्यात्मकं साक्षान्निचाय्यात्मानमेकलम् ।
मुच्यते मृत्युतो विद्वानिति नैगमिकं वचः ॥ (839)

आत्मन्यवगते साक्षात् प्रमाणार्थसमाप्तितः ।
किमन्यत् स्मृतिसन्तानात् प्रार्थ्यते निष्प्रमाणकम् ॥ (840)

भविष्यत्कालसंबन्धि फलं चेह न नाकवत् ।
तज्ज्ञानजन्मकालत्वादग्निजन्मोत्थकार्यवत् ॥ (841)

रेव फलतः—स्वरूपचैतन्यस्यैव फलत्वादित्यर्थः । (836) चैतन्यव्याप्तिपूर्विका विषयव्याप्तिः, इत्यत्रोदाहरति—**खेति** । (837) [1]फलितं निगमयति—**तस्मादिति** । (838) शब्दज्ञानसन्तानस्य अविधेयत्वे हेत्वन्तरमाह—**अशब्देति** । (839) 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' (का 1-3-15) इति अर्थवादमात्रम् । श्रुत-ब्रह्मणामपि [2]पूर्ववत् संसारदर्शनात्, अत्राह—**आत्मनीति** । विद्वदनुभवविरोध इत्यर्थः । (840) ज्ञानस्या[3]दृष्टफलत्वात् [4]तत्सन्तानविधौ न विरोधः, अत्राह—**भविष्यदिति** । अग्निजन्मकार्यं प्रकाशादि प्रसिद्धम् । (841)

---

* "विषयसंबन्धात् पूर्वं बुद्धितद्वृत्तीनां चैतन्यव्याप्तावपि, नोर्ध्वं तद्व्याप्तिः विषयसंबन्धेनैवानाकांक्षत्वात् इत्याशङ्क्याह—खेति" इति **शास्त्रप्रकाशिका** ।

* **अशब्दाद्यात्मकमिति** 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्' इत्युक्तस्वरूपमित्यर्थः ।

1. **फलितमिति** विध्यसंभवमित्यर्थः ।
2. **पूर्ववत्**—श्रवणात् पूर्वमिव ।
3. **अदृष्टफलत्वादिति** तादृशादृष्टफलायेति शेषः ।
4. **तत्सन्तानविधौ**—ज्ञानसन्तानविधौ ।

अविधिश्चार्थतः प्राप्तेस्तज्ज्ञानस्मृतिसन्ततेः ।
* बोधश्च ध्वस्तसंमोहः स्मृतिं नैव व्यपेक्षते ॥ (842)

सम्यग्ज्ञानाग्निनिर्दग्धे प्रत्यङ्मोहे सबान्धवे ।
यथावस्तु स्मृतिं मुक्त्वा स्मृतिर्नान्याऽवशिष्यते ॥ (843)

* अप्रमानुविधानाच्च न स्मृतिर्बाधिकाऽपरा ।
बाध्यत्वेनैव मानुद्धेर्निष्ठिताभूदनात्मधीः ॥ (844)

बाध्यं तमो मितेः कृत्स्नं तज्जं चाप्यतिदुर्बलम् ।
मानं बाधकमेवासीत् स्मृतिरप्यनयोस्तथा ॥ (845)

ब्रह्मविदो [1]विषयान्तराभावात् आत्मधीस्मृतिसन्त(ति)[ते]रर्थसिद्धत्वात् [न] विधिः, इत्याह—**अविधिश्चेति** । हेत्वन्तरमाह—**बोधश्चेति** । (842) ब्रह्मविदो विषयाभावोऽसिद्धः अशनायादिदर्शनात्, अत्राह—**सम्यगिति** । (843) अनात्मस्मृत्यङ्गीकारेऽपि न तया आत्मस्मृतिर्बाध्या, इत्याह—**अप्रमेति** । अनात्मस्मृतेरप्रमानुविधाने हेतुमाह—**बाध्यत्वेनेति** । द्वैतधि(या)[योऽ]द्वैतधीबाध्यत्वादप्रमात्वात् तत्संस्कारजस्मृतेः प्रमाननुविधायित्वमित्यर्थः । (844) ज्ञानस्याज्ञानमेव बाध्यं(त)[न]द्वैतधीः, अत्राह—**बाध्यमिति** । आत्मानुभवस्य अज्ञाननिवृत्तिद्वारा द्वैतधीबाधकत्वेऽपि [2]तत्स्मृत्योः विपरीतो[3] बाध्यबाधकभावः, अत्राह—**स्मृतिरपीति** । (845) आत्मस्मृतिमभ्युपगम्योक्तम् । सापि न संभवति, इत्याह—**न**

---

1. **विषयान्तराभावात्**—ज्ञेयस्य आत्मभिन्नविषयस्याभावात् ।

* 'बोधाच्च' इति मु. पु. पाठः ।

* **अपरा स्मृतिः** — अनात्मस्मृतिः ।
'प्रमाननुविधानाच्च' इति मु. पु. पाठः ।

2. **तत्स्मृत्योरिति** आत्मस्मृतेः द्वैतस्मृतेश्चेत्यर्थः ।

3. **विपरीतो बाध्यबाधकभावः** — आत्मस्मृतिर्बाध्या, द्वैतस्मृतिर्बाधिकेति बाध्यबाधकभावः ।

न स्मृतिर्विस्मृतिर्वेह संभाव्येतापि केनचित् ।
सकृद्विभातो ह्येवैष रवौ रात्र्यहनी यथा ॥ (846)

अनर्थहेतुदाहित्वाद्यथोक्तात्मस्मृतेरतः ।
आत्मस्मृतेः स्वतः प्राप्तिरितरस्यास्तु बाध्यता ॥ (847)

निरोधस्तर्हि पूर्वोक्तान्मतमर्थान्तरं यदि ।
तन्त्रान्तरेषु तस्यापि कार्यत्वेन श्रुतत्वतः ॥ (848)

न मुक्तिसाधनत्वेन तस्यानधिगमाच्छ्रुतेः ।
प्रत्यग्बोधात्परं नान्यन्मुक्तेरस्तीह साधनम् ॥ (849)

अननुष्ठेयरूपत्वात्तत्सिद्धिश्चात्मबोधतः ।
प्रत्यग्ज्ञाने निरुध्यन्ते चित्ततद्वृत्तयो यतः ॥ (850)

स्मृतिरिति । **सकृद्विभातेति** । अपरोक्ष इत्यर्थः । (846) आत्मनि स्मृतिमभ्युपेत्यैव दोषान्तरमाह—**अनर्थेति** । (847)

चित्तनिरोधस्य विधेयत्वशङ्का तन्निरासश्च

आत्मधीतत्सन्तत्योरविधेयत्वे चित्तनिरोधो मुक्तिसाधनत्वे[न] विधीयताम्, इति शङ्कते—**निरोध इति** । निरोधस्य मुक्तिहेतोर्विधेयत्वे **योगशास्त्रं** मानम्, इत्याह—**तन्त्रेति** । 'अथ योगानुशासनम्' (यो. 1-1) इति निःश्रेयसहेतुः समाधिः सूत्रितः । अस्य च लक्षणं 'योगश्चित्तवृत्तिनिरोधः' (यो. 1-2) इति । तन्निरोधावस्थायां चात्मनः स्वरूपप्रतिष्ठत्वं कैवल्यमाख्यातं 'तदा द्रष्टुः स्वरूपेऽवस्थानम्' (यो. 1-3) इति, इत्यर्थः । (848) श्रुतिविरोधेन दूषयति—**नेति** । 'नान्यः पन्थाः' (तै. आ. 3-1-2-7) 'ज्ञानादेव तु कैवल्यम्' इत्यादिस्मरणाच्चेत्यर्थः । (849) निरो[1]धस्य मुक्तिहेतुत्वेऽपि न विधेयत्वम्, इत्याह—**अननुष्ठेयेति** । ज्ञानोदये निर्विषयत्वादेव चित्तवृत्तिनिरोधसिद्धेः विधितो नानुष्ठेय-

---

1. **निरोधस्य**—चित्तवृत्तिनिरोधस्य ।

अभ्युपेत्यैतदस्माभिरुच्यते संभवादिति ।
सम्यग्ज्ञानातिरेकेण नत्वन्यन्मुक्तिसाधनम् ॥ (851)

* श्रुतौ स्मृतौ वा संभाव्यं ताभ्यां नान्यस्य मानता ।
प्रत्यग्याथात्म्यनिर्णीतौ तार्किकोक्तात्मवस्तुवत् ॥ (852)

* सर्वाकाङ्क्षैकहेतोश्च प्रत्यग्विज्ञानहानतः ।
न भावनेह संभाव्या मोहे सत्येव सा यतः ॥ (853)

मानान्तरानधिगतोक्त्यर्थाधिगम एव नः ।
विधिर्यतो नियोगोऽपि नैव स्यादनृतन्त्रतः ॥ (854)

नियोज्यतद्विषययोर्यत्र भेदोऽवसीयते ।
विषयः स नियोगस्य नात्मज्ञाने त्वभेदतः ॥ (855)

त्वमित्यर्थः । (850) [1]अभ्युपगमं परित्यजति—**अभ्युपेत्येति** । निरोधस्य मुक्तिसाधनत्वं सिद्धान्त एव किं न स्यात्, अत्राह—**सम्यगिति** । योगशास्त्रप्रामाण्यात् निरोधस्यापि मुक्तिसाधनत्वम्, अत्राह—**ताभ्यामिति** । अनुमानादिकं **तार्किकैरिव** [2]स्वतन्त्रमानमस्माभिः [3]नाभ्युपेतमिति भावः । (851—852)

वेदान्तेषु भावनायाः नियोगस्य चाभावः

यत् पुनरुक्तम्, अंशत्रयविशिष्टभावना वेदान्तेऽपि, इति । तत् दूषयति —**सर्वेति** । (853) भावनाऽसंभवेऽपि, नियोगोऽङ्गीकार्यः, अन्यथा मुक्त्यनुपपत्तेः, अत्राह—**मानान्तरेति** । अज्ञातज्ञापनस्यैव विधित्वात्, अप्रवृत्तप्रवर्तको विधिरिति अस्माभिरनङ्गीकारात्, ज्ञानस्य नृतन्त्रत्वाभावेन विधेयत्वायोगाच्चेत्यर्थः (854) ज्ञानस्याविधेयत्वे हेत्वन्तरमाह—**नियोज्येति** । (855) अबुद्ध-

---

* **ताभ्यां**—श्रुतिस्मृतिभ्याम् ।

1. **अभ्युपगमं परित्यजति**—चित्तवृत्तिनिरोधस्य मुक्तिहेतुत्वाभ्युपगमं परित्यजति ।
2. **स्वतन्त्रमानं**—श्रुत्याद्यनपेक्षमर्थसाधकं मानम् ।
3. **नाभ्युपेतमिति** तथा च श्रुतिविरोधे योगशास्त्रमपि अप्रमाणमेवेति भावः ।

* **सर्वाकांक्षैकहेतोः** रिति सर्वासामाकांक्षाणां एकहेतुः - अज्ञानं, तस्येत्यर्थः ।

शब्दो लिङादिशून्योऽपि ह्यविज्ञातार्थबोधकः ।
विधिर्भवति सामर्थ्यात् ज्ञाते ह्यर्थेऽनुवादता ॥ (856)

यतो वाचोऽभिधानानि प्रयुक्तान्युपलब्धये ।
सर्वाण्यनभिधायैव निवर्तन्तेऽवबोध्य च ॥ (857)

उदपादि च यच्छब्दैर्ज्ञानमाकारवद्धियः ।
स्वतो बुद्धं तदप्राप्य नाम्ना सह निवर्तते ॥ (858)

बोधकत्वेन [1]विधिरपि लिङादिसहितवाक्यम् । अतः अनधिगतबोधकवेदान्तानां भवितव्यं लिङादिप्रवेशनम्, अत्राह—**शब्द इति** । (856)

ब्रह्मणि वेदान्तवाक्यप्रामाण्यम्

एवमपि ब्रह्मणः [2]शब्दतदुत्थज्ञानाविषयत्वात् न [3]तत्र वाक्यप्रामाण्यम्, इत्याशङ्क्य, [4]अविषयतयैव बोधकत्वादविरोधः, इत्याह—**यत इति** (857) 'अनभिधाय', 'अवबोध्य', इति [5]व्याहतमुक्तम्, अत्राह—**उदपादीति** । [6]लक्षणयेत्यर्थः । (858) ब्रह्मणोऽविषयत्वे तत्र [7]पदसंगत्ययोगात् [8]ज्ञानाभावाद-ज्ञाननिवृत्त्यनुपपत्तिः, अत्राह—**माहात्म्यमिति** । दृष्टान्तमाह—**सुषुप्त इति** ।

---

1. **विधिरपि लिङादिसहितवाक्यमिति** पदानां कार्यान्वितार्थानुभावकत्वात् तदर्थे कार्यत्वे स्मारकशक्तिमल्लिङादिपदापेक्षणात्, लिङादिपदसाहित्याभावे वेदान्त-वाक्यस्य अबुद्धबोधकत्वलक्षणविधित्वमपि न संभवतीति आक्षेपभावः ।
2. **शब्दतदुत्थज्ञानाविषयत्वादिति** 'यतो वाचो निवर्तन्ते' इति ब्रह्मणो वाग-विषयत्वश्रुतेरिति भावः ।
3. **तत्र**—ब्रह्मणि ।
4. **अविषयतयैव बोधकत्वादिति** ब्रह्माविद्यानिवर्तकत्वेन प्रामाण्यं सुस्थं बोध्यम् ।
5. **व्याहतमुक्तमिति** अनभिधायकस्य अवबोधकत्वायोगादिति भावः ।
6. **लक्षणयेत्यर्थ इति** तथा च शक्त्या अनभिधायकत्वं, लक्षणया अवबोधकत्व-मिति न व्याहतिरिति भावः ।
7. **पदसंगत्ययोगात्**—पदसंगतिग्रहायोगात् ।
8. **ज्ञानाभावात्**—वाक्यजन्यब्रह्मज्ञानाभावात् ।

माहात्म्यमेतच्छब्दस्य यदविद्यां निरस्यति ।
* सुषुप्त इव निद्राया दुर्बलत्वाच्च बाध्यते ॥ (859)

दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः ।
* शब्दशक्तेरचिन्त्यत्वात् विद्मस्तं मोहहानतः ॥ (860)

अगृहीत्वैव संबन्धमभिधानाभिधेययोः ।
हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः ॥ (861)

जाग्रद्वन्न यतः शब्दं सुषुप्ते वेत्ति कश्चन ।
ध्वस्तेऽतो ज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत् फलम् ॥ (862)

अवाचकमेर्यादिनादश्रवणेऽपि निद्रानिवृत्तिदर्शनादित्यर्थः । अगृहीतसंगतिपदस्य बोधकत्वे अव्युत्पन्न(प्रत्यक्षादि)[स्यापि बोध] प्रसङ्गः, अत्राह—**दुर्बलत्वाच्चेति** । विशिष्टे ज्ञातसंगति पदं केवले लक्षणया ज्ञानं जनयति । ततो दुर्बलत्वादविद्या बाध्यते इत्यर्थः । (859) अनादिभावरूपाज्ञानं [1]ज्ञानात् बलवदिति किं न स्यात्, अत्राह—**दुर्बलत्वादिति** । अध्यासकारणमज्ञानं अधिष्ठानतत्त्वज्ञानात् दुर्बलं लोके प्रसिद्धमित्यर्थः । अगृहीतसंगतिकस्य बोधकत्वे हेत्वन्तरमाह—**शब्देति** । विष(य)मन्त्रादिषु शब्दसामर्थ्यमचिन्त्यं दृष्टमित्यर्थः । (860) [2]दृष्टान्तं स्पष्टयति—**अगृहीत्वेति** । उत्तिष्ठ देवदत्तेति बोधित इत्यर्थः । (861) सुप्तौ संबन्धग्रहण-स्मरणयोरभावे हेतुमाह—**जाग्रद्वदिति** । दार्ष्टान्तिकं निगमयति—**ध्वस्त इति** । सुप्तप्रतिबोधन्यायेन शब्दात् लक्षणयोत्पन्नज्ञानादज्ञाननिवृत्तौ ब्रह्मभावः फलं स्यादित्यर्थः । (862)

---

* 'दुर्बलत्वाच्च बाधते' इति मु. पु. पाठः ।

1. **ज्ञानादिति** सादेरित्यादिः ।

* 'विद्मस्तं मोहहानतः' इति वार्त्तिकमार्गं, "तं-परं प्रत्यञ्चं मोहशब्दितविरुद्धांश-निरासद्वारा लक्षणया शब्दात् जानीमः । अतो ब्रह्म शास्त्रप्रमाणकमित्यर्थः" इति विवृणोति **शास्त्रप्रकाशिका** ।

2. **दृष्टान्तं**—सुषुप्त इव निद्रायाः इत्युक्तं दृष्टान्तम् ।

अविद्याघातिनः शब्दाद्याऽहं ब्रह्मेति धीर्भवेत् ।
* नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधम् ॥ (863)

अवशिष्टं स्वतो बुद्धं शुद्धं मुक्तमतो भवेत् ।
नातः स्याद्भावनापेक्षा नापि मानान्तरं प्रति ॥ (864)

क्रियाप्रभेदविरहात् ज्ञानं वा निखिलं तमः ।
हन्त्यात्मलाभमात्रेण न तदन्या तमोहुतिः ॥ (865)

क्रियातत्फलयोर्भेदान्न भेदः क्रिययोरतः ।
प्रत्यग्ध्वान्तमतो ज्ञानं स्वात्मलब्ध्यैव हन्ति तत् ॥ (866)

निष्पन्नोऽपि कुठारादिः प्रयोगविरहाद्यथा ।
द्वैधीभावाय नैवालं तथा नैव प्रमाणधीः ॥ (867)

ज्ञानादज्ञाननिवृत्तावपि न ज्ञाननिवृत्तिः, निवर्तकाभावात् । [1]अतोऽद्वैतहानिः, अत्राह—अविद्येति । (863) अज्ञानतत्कार्यनिवृत्तौ शून्यशेषः स्यात्, वस्तुग्राहिमानाभावात्, अत्राह—अवशिष्टमिति । मुक्तत्वफलमाह—नात इति । बुद्धत्वफलमाह—नापीति । (864) [2]ज्ञानस्य भावनादिक्रियापेक्षस्यैव अज्ञाननिवर्तकत्वं, नोत्पत्तिमात्रेण, अत्राह—क्रियेति । वाशब्दः एवकारार्थे । ज्ञानोत्पत्तौ क्रियाविशेषाभावात् ज्ञानमेवाज्ञाननिवर्तकमित्यर्थः । अज्ञाननिवृत्त्यैवात्मनः सद्वितीयत्वम्, अत्राह—न तदिति । वृत्तिव्यक्तचैतन्याद(ज्ञा)[न्या]अज्ञानहानिर्नेत्यर्थः । (865) 'क्रियाप्रभेदविरहात्' इत्ययुक्तम् । ज्ञानक्रियाऽज्ञाननिवृत्तिक्रिययोर्भेदात्, अत्राह—क्रियेति । ज्ञानं क्रिया । तत्फलमज्ञाननिवृत्तिः न क्रियेत्यर्थः । फलितमाह—प्रत्यगिति । (866) ज्ञानस्योत्पत्तिमात्रेण फलहेतुत्वं वैधर्म्यदृष्टान्तेनाह—निष्पन्नोऽपीति । (867)

---

1. अतोऽद्वैतहानिरिति ब्रह्मातिरिक्तस्य ब्रह्मज्ञानस्य द्वैतस्य सत्त्वादित्यर्थः ।

* अविद्ययेति औषधस्येव ज्ञानस्य स्वपरनिवर्तकत्वमित्यर्थः ।

2. ज्ञानस्येति उक्तवस्तुनः भावनादिक्रियानपेक्षत्वेऽपि इत्यादिः ।

अलौकिकत्वाद्बोध्यस्य स्वतश्चावगमात्मनः ।
बोध्ये हि लौकिकेऽपेक्षा परतोऽवगतौ तथा ॥ (868)

नद्यास्तीरे फलानीव प्रत्यक्षाद्यनपेक्षतः ।
* किमिवेहान्यमानेषु तवापेक्षाभिधाश्रुतेः ॥ (869)

* प्रमाता च प्रमाणं च प्रमेयो निश्चितिस्तथा ।
यस्मांनिश्च्यात् प्रसिद्ध्यन्ति तत्सिद्धौ किमपेक्षते ॥ (870)

जाग्रत्स्वप्नसुषुप्तेषु घटोऽयमिति संविदः ।
व्यवधानं न चेहास्ति तद्भावाभावसाक्षितः ॥ (871)

प्रत्यगात्मनः मानान्तरानपेक्षत्वनिरूपणम्

'नातः स्याद्भावनापेक्षा नापि मानान्तरं प्रति' (वा. 864) इत्युक्तम् । तत्र भावनानपेक्षमपि ज्ञानं मानान्तरापेक्षं, सिद्धस्य [1]तद्योग्यत्वात्, अत्राह— **अलौकिकत्वादिति ।** स्वप्रकाशत्वात् न मानान्तरयोग्यतेत्यर्थः । किं तर्हि तद्योग्यत्वप्रयोजकम्, अत्राह—**बोध्ये हीति ।** जडत्वं मान्तरयोग्यत्वप्रयोजकमित्यर्थः । तर्हि धर्मादेरपि मान्तरापेक्षा स्यात्, अत्राह—**परत इति ।** रूपादिमतो मान्तरयोग्यस्य तदपेक्षा । अतो जडत्वेऽपि नादृष्टादेर्मान्तरापेक्षेत्यर्थः । (868) आत्मनो मान्तरायोग्यत्वं व्यतिरेकदृष्टान्तेन स्पष्टयति—**नद्या इति ।** (869) [2]**सर्वसाधकत्वाच्च** न मान्तरयोग्यः, इत्याह—**प्रमातेति ।** (870) देशकालादिव्यवहितत्वात् मान्तरयोग्यः परमात्मा अनुमीयते, इत्यत्राह—**जाग्रदिति ।** यथा घटादिविशेषितधियः देशादिव्यवधानं तद्व्यावर्तकघटादेः देशादिव्यवधानात्, नैवमात्मनः अवस्थात्रये व्यवधानमित्यर्थः । (871) सविशेषज्ञानस्य स्वरूप-

---

1. **तद्योग्यत्वात्**—मानान्तरयोग्यत्वात् ।

* **अभिधाश्रुतेः**—तत्त्वमादिश्रुतेः ।

2. **सर्वसाधकत्वाच्च**—मानादिसर्वसाधकत्वाच्च ।

* **प्रमातेति** विमतं मानाद्यनपेक्षं तत्साधकत्वात् । यत् यत्साधकं तत् तदनपेक्षं यथा घटसाधको दीपः तदपेक्षो न भवति इति प्रमाणार्थोऽवसेयः ।

इदमेवमिदं नैवमिति बुद्धिर्विभागभाक् ।
अनात्मिकाऽत्मवत्यत्र येनासौ किमपेक्षते ॥ (872)

* कर्त्रादिव्यापृतेः पूर्वमसंकीर्णमुपाधिभिः ।
अविक्षिप्तमसंसुप्तं ह्यनुभवन् किमपेक्षते ॥ (873)

प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ।
कुर्वन्त्येव प्रमां यत्र तदसंभावना कुतः ॥ (874)

प्रामाण्यमेतत्पृष्ठेन कस्मान्नास्त्यभिधाश्रुतेः ।
नियोगस्यापि मानत्वं नानपेक्ष्य प्रमामिमाम् ॥ (875)

पश्येदात्मानमित्यादि वाक्यं यत्स्याद्विधायकम् ।
ज्ञानकर्तव्यतायां तन्नियोज्य पुरुषं प्रति ॥ (876)

त्वाच्च आत्मा [1]न तद्योग्यः, इत्याह—इदमिति । (872) आत्मनो मानव्यापार-मन्तरेण स्फुरणाच्च न तदपेक्षा, इत्याह—कर्त्रादीति । असंकीर्णत्वं स्पष्टयति—अविक्षिप्तमिति । विक्षेपतत्कारणाज्ञानसाक्षिरूपमनुभवन्नित्यर्थः । (873) एवंविधं वस्त्वेव नास्ति मानाभावात्, अत्राह—प्रमाणमिति । प्रमाणादीनि जडत्वात् (स)[स्व] साधके प्रमां कुर्वन्तीत्यर्थः । (874) तर्हि मान्तरवत् तत्प्रमादेरपि [2]न तत्र मात्वं, [3]अविशेषात्, अत्राह—प्रामाण्यमिति । स्वतःसिद्धानुभवा-कारवृत्तिद्वारेण अज्ञाननिवर्तकत्वात् प्रामाण्यमित्यर्थः । नियोगस्यापि जडस्य अजडबोधं विना संसर्गादिबोधकत्वायोगात् विधिवाक्यप्रामाण्यवादिनापि अनुभवो-ऽभ्युपगन्तव्यः, इत्याह— नियोगस्येति । (875)

'पश्येत्' इति ज्ञानविधिरिति शङ्का तत्परिहारश्च

अनुभवात्मनः मान्तरायोग्यस्य सत्त्वेऽपि ज्ञानं विधीयते, 'पश्येत्'

---

1. **न तद्योग्यः**—न सविशेषज्ञानयोग्यः ।

* **कर्त्रादिव्यापृतेः पूर्वं**—सुषुप्ते इति यावत् । **अनुभवन्निति** तादृशानुभवश्च सुप्तोत्थितस्य परामर्शसिद्धः ।

2. **न तत्र मात्वं**—न आत्मनि प्रमाणत्वम् ।

3. **अविशेषात्**—आत्माधीनसिद्धिकत्व, आद्यस्वरूपकत्वादिना मानान्तरतुल्यत्वात् ।

* स्वव्यापारेऽनपेक्ष्यैव वस्तुवृत्तं वचो यतः ।
नियुङ्क्ते पुरुषं तस्मात् वस्तुवृत्तं सुदुर्लभम् ॥ 877

स्वशक्त्यननुरूपं चेत्कार्यं वाक्यशतैरपि ।
नियुक्तोऽपि न तत्कर्तुमलं शक्ये स हीश्वरः ॥* (878)

अभिधाश्रुतिश्चेत्तत्सिद्धौ व्यायच्छेत प्रयत्नतः ।
विधित्वर्मानुगामित्वान्नार्थस्पृक् साऽस्वतन्त्रतः ॥ (879)

(बृ. 6-4-23) इति श्रुतेः, अत्राह—पश्येदिति । ज्ञाननियोगे पुरुषं नियोज्य (कृति) चरितार्थमिति वस्त्ववबोधकत्वात् अभिप्रेतवस्त्वसिद्धिरित्यर्थः । (876) विधेयज्ञानविषयत्वेन [1]तत्सिद्धिः, अत्राह—स्वव्यापार इति । आरोपितविषयमपि विधेयज्ञानं स्यात् [2]योषिदग्निज्ञानवदित्यर्थः । (877)

ज्ञाने विधिमभ्युपगम्योक्त्वा, स एव नास्ति, इत्याह—स्वशक्तीति । ज्ञानस्यापुंतन्त्रत्वात् न तत्र विधिरित्यर्थः । (878) वाक्यस्य ज्ञाननियोगपरत्वे वस्त्वसिद्धिः, ज्ञाननियोगश्च नास्तीत्युक्तम् । तत्र [3]वस्त्वसिद्धिं परिहरति—अभिधेति । [4]धीविधायकवाक्यातिरिक्तं तत्त्वमादिवाक्यं वस्तुसिद्धौ तात्पर्यतो व्या(पि)[प्रि]येतेत्यर्थः । [5]अन्यपरस्य [6]मान्तरविरोधे [7]न स्वार्थे मात्वम्, इति [8]परिहरति—विधीति । (879) ज्ञाननियोगासंभवं सोदाहरणं प्रपञ्चयति—

---

1. तत्सिद्धिः—वस्तुसिद्धिः ।

* स्वव्यापारे—पुरुषप्रयत्नेर्हे भावार्थे इति यावत् ।

2. योषिदग्निज्ञानवदिति 'योषा वाव गौतमाग्निः' इत्यादिवाक्यं योषिति अग्निज्ञानं विधत्ते । योषितः अग्नित्वं न वस्तुभूतमपितु आरोपितमित्यर्थः ।

* ईश्वरः—समर्थः ।

3. वस्त्वसिद्धिं परिहरतीति चोदक इति शेषः ।

4. धीविधायकवाक्येति 'आत्मानं पश्येत्' इति वाक्येत्यर्थः ।

5. अन्यपरस्य—विधिपरस्य तत्त्वमादिश्रुतिवाक्यस्य ।

6. मान्तरविरोधे—नाहं ब्रह्मेति प्रत्यक्षादिप्रमाणविरोधे सति ।

7. न स्वार्थे मात्वं—न ब्रह्मात्मैक्ये प्रामाण्यम् ।

8. परिहरतीति सिद्धान्तीति शेषः ।

स्वमांसान्यपि खादन्ति नियोगानतिलङ्घिनः ।
जहत्यपि प्रियान् प्राणान् शक्यत्वादेव नान्यतः ॥ (880)

अशक्ये विनियुक्तोऽपि कृष्णलान् श्रपयेदिति ।
* सर्वात्मनाप्यसौ कुर्वन् कुर्यात् तस्करकण्डुवत् ॥ (881)

ज्ञानस्य वस्तुतन्त्रत्वात् नोपासनसमुत्थितिः ।
न चावृत्त्या प्रमोत्पत्तिं प्रमाणानि प्रकुर्वते ॥ (882)

स्वमांसानीति । नियोगवशात् प्राणत्यागादौ शक्ये प्रवृत्तिः स्यात् नान्यतः—अन्यत्राशक्ये न नियोगात् प्रवृत्तिरित्यर्थः । (880) अशक्ये नियोगादनुष्ठानानुपपत्तौ वैधर्म्यदृष्टान्तमुक्त्वा, साधर्म्यदृष्टान्तमाह—**अशक्य इति** । माषपरिमाणस्य हेम्नः पञ्चमोऽशंः कृष्णलः । 'पञ्चकृष्णलिको माषः' इत्युक्तत्वात् ।

'प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्कामः ।' इत्यत्र कृष्णलेषु [1]पाककार्यत्वाकार्यत्वसंशये, विक्लेदनार्थस्य पचते[:] प्रयोगात् न कार्यः पाकः इति प्राप्ते, मैत्रः पचतीति हेतुव्यापारे प्रयोगात् पचतेस्तदर्थत्वात् कृष्णलेष्वपि तद्योगात् कर्तृव्यापारद्वारा तद्विषयत्वात् प्रथमप्रतीतव्यापारवाचिताया युक्तत्वात् वचनात् अदृष्टार्थतया पाकः कार्यः, इति दशमे राद्धान्तितं यद्यपि, तथापि [2]विक्लत्तिप्रधानः सन्तापः पचतेरर्थः इति न्यायात् विक्लत्तिं तेषु कुर्वन् श्रममात्रमाप्नुयादित्यर्थः । अत्र दृष्टान्तमाह—**तस्करकण्डुवदिति** । कण्डुर्नाम कश्चित्तस्करः राजमन्दिरात् द्रविणापहा(र)[री] भटैरन्विष्यमाणः आत्मप्रच्छादनार्थं पाकशालायामपूपकारिषु मध्ये प्रविश्य, स्वयमपूपं कर्तुमजानन् तत्करणे प्रवृत्तः, तद्-पाटवलिङ्गेन अयमसौ तस्कर इति ज्ञात्वा तैर्गृहीतो यथेत्यर्थः । (881)

ज्ञानस्याविधेयत्वेऽपि तत्साधनत्वेनोपा[3]सनं विधीयताम्, अत्राह—

---

1. **पाककार्यत्वाकार्यत्वसंशये**—कृष्णलेषु पाकः कार्यो न वेति संशये ।
2. **विक्लत्तिः**—अवयवविश्लेषः ।

* 'तस्करकन्दुवत्' इति मु॰ पु॰ पाठः ।

3. **उपासनं**—ज्ञानावृत्त्यात्मकम् ।

* नार्थस्पृग्भावना चेत् स्यात् ब्रह्मधीजन्मने न सा ।
शुक्तिकाज्ञानसंभूतौ न स्वभ्यस्तापि रूप्यधीः ॥ (883)

द्रष्टव्यश्चेद्भवेदात्मा स्यान्नियोगस्तथात्मनि ।
निषेधाद्दर्शनस्येह न नियोगोऽस्त्यतः परे ॥ (884)

मनुते यन्न मनसा मतं येन मनः सदा ।
ब्रह्म विद्धि तदेव त्वं न त्विदं यदुपासते ॥ (885)

शृङ्गग्राहिकया श्रुत्या ब्रह्मताऽपोदिता स्फुटम् ।
उपास्यत्वैकदोषेण नियोगोऽतोऽत्र नेष्यते ॥ (886)

* ज्ञाताज्ञातापनिह्नुत्या ज्ञातृभावादिसाक्षिणः ।
ब्रह्म विद्धि तदेवेति ब्रह्मता च समर्पिता ॥ (887)

ज्ञानस्येति । (882) किञ्च, उपासना [1]अर्थस्पर्शिनी न वा । आद्ये, [2]वस्तुतन्त्रत्वान्न विधेयत्वम् । द्वितीये दोषमाह—**नार्थस्पृगिति** । (883) तर्हि दर्शनविषयत्वरूपेणात्मनः साध्यत्वात् तत्र नियोगो भवेत्, अत आह—**द्रष्टव्यश्चेदिति** । (884) [3]निषेधं दर्शयति—**मनुत इति** । (885) [4]वाक्यतात्पर्यमाह—**शृङ्गेति** । काऽत्र[5]संपन्नक्षीरा गौरिति पृष्टः, शृङ्गं गृहीत्वा गोयूथगतां यथा तां दर्शयति, तद्वदाचरन्त्या श्रुत्येत्यर्थः (886) न केवलं ज्ञानोपासनविषयस्याब्रह्मत्वं, तद्विपरीतस्य ब्रह्मत्वं चोक्तम्, इत्याह—**ज्ञातेति** । (887) ज्ञानज्ञेययोरविधेयत्वे कस्य विधेय-

---

1. **अर्थस्पर्शिनी**—यथाभूतवस्तुविषयिणी ।
2. **वस्तुतन्त्रत्वादिति** उपासनायाः इत्यादिः ।

* **भावना**—उपासना । **शुक्तिकाज्ञानेति** अयथाभूतार्थविषयकप्रत्ययाभ्यासः न प्रमाहेतुरिति भावः ।

3. **निषेधं**—आत्मनः दर्शनोपासनादिनिषेधम् ।
4. **वाक्यतात्पर्यं**—'मनुते यन्न मनसा' इति वार्त्तिकविवक्षितस्य' यन्मनसा न मनुते येनाहुर्मनो मतम् ।' इत्यादिश्रुतिवाक्यस्य तात्पर्यम् ।
5. **अत्र**—गोयूथे ।

* **ज्ञातेति** 'अन्यदेव तद्विदितादथो अविदितादधि' इति ज्ञाताज्ञातात्मकं कार्यकारणरूपमारोपितं जगदपाकृत्य, ज्ञातृभावाभावसाक्षिणः त्वंपदलक्ष्यस्य 'तदेव ब्रह्म त्वं विद्धि' इति ब्रह्मता दर्शिता यतः, अतः निरवकाशो विधिरित्यर्थः ।

वाक्यार्थज्ञानकाले यः पदार्थो नैव विद्यते ।
कर्तव्यः कारकापेक्षः विधेयः स न संशयः ॥ (888)

विपरीतस्ततो यस्तु वाक्यादेव च गम्यते ।
नित्योऽकर्मप्रयुक्तः स न विधेयः कथञ्चन ॥ (889)

यथावस्तु हि या बुद्धिः सम्यग्ज्ञानं तदेव नः ।
* पौरुषायासमात्रोत्थमज्ञानं रजतादिवत् ॥ (890)

वस्तुमात्रानुरोधित्वात् सम्यग्ज्ञानस्य दुष्करम् ।
नियोगानुप्रवेशेन वस्तुतत्त्वावबोधनम् ॥ (891)

अभिधेयं न यद्वस्तु प्रत्ययश्च न ढौकते ।
नियुक्तोऽपि नियोगेन तादृङ्नैवेक्षितुं क्षमः ॥ (892)

अपि मानान्तरप्राप्तं वस्तुबोधं निवर्तयेत् ।
नियोगार्थानुरोधेन यदि वस्त्ववबोध्यते ॥ (893)

त्वम् , अत्राह—**वाक्येति** । (888) किमतः, तत्राह—**विपरीत इति** । (889) ज्ञानस्याविधेयत्वे हेत्वन्तरमाह—**यथावस्त्विति** । विधेयत्वे प्रमात्वं न स्यादित्यर्थः । पौरुषायासः—पुंव्यापारः इति यावत् । (890) विधेयज्ञानस्य अप्रमात्वोपपादनफलमाह—**वस्तुमात्रेति** । (891) शब्दप्रत्ययाविषयत्वाच्च ब्रह्मणः न तज्ज्ञानं विधेयम्, इत्याह—**अभिधेयमिति** । (892) विध्यधीनज्ञानाधीने [1]वस्तुबोधे दोषान्तरमाह—**अपीति** । मानान्तरप्राप्तं—[2]अभिधाश्रुतिसमर्पितं; वस्तुबोधं लिङादिर्विधत्ते । इमं स्वपक्षं सः नियोगवादी निवर्तयेदित्यर्थः । (893)

---

* अज्ञानं रजतादिवदिति पुरुषप्रयत्नजन्यं ज्ञानं शुक्तौ रजतादिज्ञानवत् मिथ्याज्ञानमित्यर्थः ।

1. **वस्तुबोधे इति** स्वीकृते इति शेषः ।

2. **अभिधाश्रुतीति** तत्त्वमादिश्रुतीत्यर्थः ।

मानान्तरोत्थविज्ञानप्राप्तावेव नियुज्यते ।
नियोगादेव तद्बुद्धौ नियोगत्वं भवेद्यतः ॥ (894)

भाव्यतेऽसन्नपीहार्थः तस्यान्यत्र प्रसिद्धितः ।
ब्रह्मणस्त्वप्रसिद्धत्वात् क्रियतेऽसूत्रकः पटः ॥ (895)

क्रियतेऽलौकिकोऽप्यर्थः पदार्थान्वयरूपतः ।
अवाक्यार्थात्मकं ब्रह्म तेनादो दुष्करं मतम् ॥ (896)

अवाक्यार्थात्मकं ब्रह्म कुतोऽज्ञायीति कथ्यताम् ।
वाक्यातिरेकि तन्मानं नान्यत्किञ्चित्त्वयेष्यते ॥ (897)

कथं निवर्तयेत्, अत्राह—**मानान्तरेति** । विधीतरमानोत्थज्ञानप्राप्ते विधेये पुमान् नियुज्यते इति मर्यादा । तदतिक्रमेण नियोगादेव तस्य-ब्रह्मात्मनो [1]बुद्धौ, नियोगत्वं-सविषयनियोगसिद्धिः, सिद्धाच्च नियोगात् [2]तत्सिद्धिरिति इतरेतराश्रय इत्यर्थः । (894)

वेदान्तेषु ब्रह्मध्यानविधिरिति शङ्का तत्परिहारश्च

शाब्दज्ञानस्य प्रमाणत्वादविधेयत्वेऽपि असंसृष्टापरोक्षब्रह्मध्यानविधाना[त्] नियोगानुप्रवेशिनो वेदान्ताः, तत्राह—**भाव्यत इति** । 'असौ वाव लोको गौतमाग्निः' [छा. 5-4-1] इत्यादौ लोकाग्निपदार्थयोः प्रसिद्धत्वात् असदपि तादात्म्यं भाव्यते । ब्रह्मणः प्रमाणान्तरैः श्रुत्या वा अप्रसिद्धत्वात् कथं तद्ध्यानविधिरित्यर्थः । (895) उक्तरूपब्रह्मणः अलौकिकत्वेऽपि वैदिकत्वात् ध्यानविधिः, अत्राह—**क्रियत इति** । अलौकिकोऽपि नियोगादिः कर्तुं ज्ञातुं च शक्यते । तस्य पदार्थसंसृष्टरूपत्वात् । ब्रह्म न संसृष्टरूपमखण्डत्वात् । तेनास्य शास्त्राददृष्टत्वात् अदः—ध्यानं, दुरनुष्ठेयत्वादविधेयमित्यर्थः । (896) किं(वा)[च अ[3]] वाक्यार्थभूतं ब्रह्म वाक्यादवगतं, मानान्तराद्वा, इति विकल्पयति—**अवाक्यार्थेति** ।

---

1. **बुद्धौ**—ज्ञाने सति ।
2. **तत्सिद्धिः**—ब्रह्मात्मनः सिद्धिः ।
3. **अवाक्यार्थभूतं**—असंसृष्टमिति यावत् । वाक्यार्थस्य संसृष्टरूपत्वादिति भावः ।

अथान्यदपि तन्मानं भवताभ्युपगम्यते ।
* तावतैव कृतार्थत्वात् व्यर्थं ध्यानादिचेष्टितम् ॥ (898)

निदिध्यासनशब्देन सम्यग्ज्ञानं विवक्षितम् ।
उक्तानुवचने तस्य विज्ञानेनेति निर्णयात् ॥ (899)

ब्रह्म संसर्गरूपं चेद् वाक्यादध्यवसीयते ।
* तावन्मात्रप्रमाणत्वात्तादृगेवास्तु तन्मितेः ॥ (900)

नाद्यः, [1]व्याघातात् । द्वितीयमनङ्गीकारेण निराकरोति—**वाक्येति** । (897) [2]अनभ्युपगमोऽसिद्धः, इति शङ्कते—**अथेति** । दूषयति—**तावतेति** । विधितः श्रवणमनननिदिध्यासनानुष्ठानानर्थक्यमित्यर्थः । (898)

'द्रष्टव्यः' इति साक्षात्करणानुवादेन 'निदिध्यासितव्यः' इति तत्साधनध्यानविधानात् कथं ध्यानानुष्ठानवैयर्थ्यम्, अत आह—**निदिध्यासनेति** । [3]द्रष्टव्यादिवाक्योक्तदर्शनाद्यनुवादे वाक्ये 'दर्शनेन' इत्यादौ 'विज्ञानेन' इति निदिध्यासनस्य स्थानप्रमाणादनुवादात् तस्य सम्यग्ज्ञानत्वनिश्चयादित्यर्थः । (899) किञ्च, संसृष्टरूपं ब्रह्म वाक्यादवगम्यते, न वा । प्रथमं प्रत्याह—**ब्रह्मेति** । ब्रह्मणो मानान्तरागोचरत्वात् संसृष्टरूपमेव भवेदित्यर्थः । (900) संसृष्ट[स्य]वाक्यमेयत्वेऽपि

---

1. **व्याघातात्**—अवाक्यार्थस्य वाक्यावगतत्वे वाक्यार्थत्वेन विरोधात् ।
2. **अनभ्युपगमोऽसिद्धः**— अवाक्यार्थे ब्रह्मणि वाक्यातिरिक्तमानानभ्युपगमः असिद्धः ।

* **कृतार्थत्वात्**—ब्रह्मधीसिद्धेः ।

3. **द्रष्टव्यादिवाक्योक्तदर्शनाद्यनुवादे वाक्ये इति** मैत्रेयीब्राह्मणे "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" इति वाक्यानन्तरं, "मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ।" इति द्रष्टव्यादिवाक्योक्तदर्शनाद्यनुवादकं वाक्यमस्ति । तत्र द्रष्टव्यपदोक्तस्य दर्शनपदेनेव स्थानप्रमाणात् (क्रमप्रमाणात्) 'विज्ञानेन' इति पदेन पूर्ववाक्योक्तं निदिध्यासितव्यः इति पदोक्तं निदिध्यासनमनूदितम् । ततः अनूद्यमानस्य निदिध्यासनस्य सम्यग्ज्ञानत्वं निश्चीयते इति समुदायार्थः ।

* **तावन्मात्रप्रमाणत्वात्**—वाक्यमात्रप्रमाणकत्वात् ।

याद्दक्तद् गम्यते मानात् तत्ताद्दङ् नेति गीः कुतः ।
* अमानात्कल्प्यते याद्दक् तत्तथैवेति साहसम् ।। (901)

घटाकाशो महाकाशः एवमाद्युक्तितोऽपि नः ।
असंसृष्टार्थबोधः स्यात् यथैवं सदसीत्यतः ।। (902)

विज्ञाय प्रज्ञामित्यस्य न चार्थोऽयं विवक्षितः ।
यथा, तथाऽतियत्नेन तत्रैवैतत् प्रवक्ष्यते ।। (903)

स्वरूपानूक्तिमात्रत्वादप्रामाण्यं मतं यदि ।
तत्त्वमस्यादिवाक्यानां सोऽरोदीदिति वाक्यवत् ।। (904)

प्रामाण्यहेतुसद्भावान्नाप्रामाण्यमिहेष्यते ।
* फलवन्निश्चितज्ञानजन्म प्रामाण्यकारणम् ।। (905)

ध्यानगम्यमसंसृष्टं सिद्ध्यति, इत्यत्राह—**याद्दगिति** । (901) [1]द्वितीये, वाक्याद-संसृष्टसिद्धिः स्यात्, इति दृष्टान्तेनाह—**घटेति** । (902) 'विज्ञाय प्रज्ञाम्' इति वाक्यसिद्धत्वाद(र्थ)[त्र][2]वा(क्य)[क्ये]बोधविधिरभ्युपगन्तव्यः, अत्राह—**विज्ञायेति** । तद्वाक्य[3]व्याख्यानावसरे वक्ष्यामः इत्यर्थः । (903)

सिद्धार्थवाक्यत्वात् तत्त्वमादेः न स्वार्थे मानतेत्याक्षेपः तत्परिहारश्च

एवं वेदान्तेषु विध्यसंभवात् तत्त्वमादेः वस्तुपरत्वमुक्तम् । विमतं न स्वार्थे मानम्, सिद्धार्थवाक्यत्वात् सोऽरोदीदित्यादिवाक्यवत्, इति शङ्कते—**स्वरूपेति** । (904) फलवन्नि[4]श्चयाजनकत्वमुपाधिः, इति परिहरति—**प्रामाण्येति** । (905)

---

* **अमानादिति** ध्यानस्यामानत्वात् तद्गम्यस्य वस्तुत्वं न सिद्ध्यतीत्यर्थः ।

1. **द्वितीये**—संसृष्टं ब्रह्म वाक्यात् नावगम्यते इति द्वितीयकल्पे ।
2. **अत्र वाक्ये**—'निदिध्यासितव्यः' इति वाक्ये ।
3. **व्याख्यानावसरे इति** षष्ठे इति शेषः ।
4. **फलवन्निश्चयाजनकत्वमिति** सोऽरोदीत् इत्याद्यर्थवादजन्यस्य स्वार्थबोधस्य फलवत्त्वाभावात् उक्तोपाधेः साध्यव्यापकता बोध्या ।

* 'फलवन्निश्चितज्ञानजन्म' इत्यत्र निश्चितं—निश्चितिः, निश्चय इति यावत् ।

तादृग्यत्रास्ति तन्मानं नास्ति यत्र न तन्मितिः ।
तत्त्वमस्यादिवाक्यार्थश्रवणानन्तरं न किम् ॥ (906)

फलवन्निश्चितज्ञानजन्म साक्षात्समीक्ष्यते ।
तस्मिन् सत्यप्रमाणत्वं किमिवेहोच्यते त्वया ॥ (907)

सोऽरोदीदिति वाक्येभ्यो निश्चितं फलवच्च किम् ।
जायते यदि विज्ञानं प्रामाण्यं केन वार्यते ॥ (908)

अथ नैतदमानत्वं काममस्तु न वार्यते ।
फलवन्निश्चितज्ञानजनकस्य किमागतम् ॥ (909)

अथैतस्याप्रमाणत्वं मानत्वं क्वेति भण्यताम् ।
यत्राप्यभीष्टं मानत्वं तत्राप्येत्यप्रमाणता ॥ (910)

फलवन्निश्चितिजनकत्वस्य वाक्यप्रामाण्यप्रयोजकत्वमन्वयव्यतिरेकाभ्यां प्रतिपादयति—**तादृगिति**। [1]नैतत् प्रयोजकं तत्त्वमादौ विद्यते, इ(त्या)[त्यत्रा]ह—**तत्त्वमसीति**। 'तरति शोकमात्मवित्' (छा. 7-1-3) इति श्रुत्यनुगृहीतवि[2]द्वदनुभवविरोधः इत्यर्थः। स्यात्तर्हि प्रकृ(त)[ते] प्रयोजकम्, [3]किमतः, अत्राह—**तस्मिन्निति**। (906-907)

परेण दृष्टान्तत्वेनोक्ते सोऽरोदीदित्यादौ, फलवत् ज्ञानमस्ति, न वेति विकल्प्य, आद्ये दृष्टान्ते [4]साध्यवैकल्यमाह—**सोऽरोदीदिति**। (908) द्वितीयानुवादेन [5]प्रागुक्तोपा(धीन्)[धिं] द्रढयन्नाह—**अथेति**। (909) तत्त्वमादिवाक्यं स्वार्थे मानं फलवन्निश्चयजनकवाक्यत्वात् ज्योतिष्टोमादिवाक्यवत्। विपक्षे विधिवाक्यमप्यमानं स्यात्, इत्याह—**अथैतस्येति**। विपक्षबाधकं स्फुटयति—

---

1. **एतत् प्रयोजकं**—फलवन्निश्चयजनकत्वं प्रामाण्यप्रयोजकम्।
2. **विद्वदनुभवविरोध इति** तत्त्वमसिवाक्यार्थश्रवणानन्तरं फलवन्निश्चयज्ञानजन्माभावे इत्यादिः।
3. **किमत इति** प्रामाण्यप्रयोजकसत्त्वेन किं फलमित्यर्थः।
4. **साध्यवैकल्यं**—अप्रमाणत्वरूपसाध्याभावः।
5. **प्रागुक्तोपाधिं**—फलवन्निश्चयाजनकत्वमुपाधिम्।

नरप्रवृत्तिसद्भावान्नतु तस्य प्रमाणता ।
ज्योतिष्टोमादिवाक्यस्य ब्रह्मास्मीत्यत्र तन्न तु ॥ (911)

* प्रामाण्यहेतुसद्भावान्नैतत्साध्वभिधीयते ।
हेतुश्चाभिहितोऽस्माभिः प्रवृत्तिर्न तु कारणम् ॥ (912)

अलंकारोऽयमस्माकं यदशेषप्रवर्तन—
बीजप्रध्वंसकृज्ज्ञानफलवज्जन्मकारिता ॥ (913)

यथोक्तेन विचारेण विधित्रयनिषेधनम् ।
कृतं तन्नित्यसंप्राप्तिहेतूक्त्याऽनवशेषतः ॥ (914)

तमेवेति च वाक्यस्य विध्यसंभवमब्रुवम् ।
स्वरसेनैव संप्राप्तेः तथात्मोपासनस्य च ॥ (915)

यत्रेति । (910) वाक्यप्रामाण्ये [1]प्रवृत्तिहेतुत्वमुपाधिः, इति शङ्कते—**नरेति** । (911) प्रवर्तकबौद्धाद्यागमवाक्येऽतिव्यापकत्वेन दूषयति—**प्रामाण्येति** । (912) यदुक्तं, ब्रह्मास्मीत्यत्र न प्रवर्तकधीजनकतेति, तत्राह—**अलंकार इति** । तत्त्वमादेरिति शेषः । (913)

पूर्वोक्तानुवादपूर्वकं विध्यभावे युक्त्यन्तरनिरूपणम्

विधिविचारे वृत्तमधि[2]कविवक्षया अनुवदति—**यथोक्तेनेति** । (914) '**विज्ञाय प्रज्ञाम्**' (बृ. 6-4-21) इत्यस्य 'न च' (वा. 903) इत्यत्रोक्तमनुवदति—**तमिति** । ज्ञानान्तरविधायकत्वं यथा न संभवति, तथा तद्वाक्यव्याख्यानावसरे

---

1. **उपाधिः**—प्रयोजक इति यावत् ।

* प्रवर्तकधीजनकत्वस्य प्रामाण्यप्रयोजकत्वे, निषेधवाक्येषु अप्रामाण्यप्रसङ्गः । न च निवर्तकधीजनकत्वमपि प्रयोजकं, एकैकत्रोभयकारणत्त्वाभावेनाप्रामाण्यात् । न च प्रयोजकप्रतिनियमः, तदनुगमाभावे प्रयोज्याननुगमादिति वर्णयन्ति **शास्त्रप्रकाशिकाकाराः** ।

2. **अधिकविवक्षया**—आत्मज्ञाने विध्यसंभवे **पूर्वोक्तातिरिक्तयुक्तिविवक्षया** ।

आत्मानमनुपास्येह नानात्मानं जनोऽपि हि ।
उपास्ते तेन तत्प्राप्तिर्नित्यैवेत्यभिधीयते ॥ (916)

अहंप्रत्ययगम्यत्वे ह्यभ्युपेतेऽपि चात्मनः ।
अनात्मप्रत्ययोत्पत्तिरहंप्रत्ययपूर्विका ॥ (917)

आत्मात्मानं सदोपास्ते तत्प्रत्ययसमन्वयात् ।
निःशेषानात्मबुद्धीनां नित्यप्राप्तमुपासनम् ॥ (918)

विज्ञानकारणत्वेऽपि ह्यभ्युपेतेऽन्तरात्मनः ।
नित्योपासनसंप्राप्तिस्तज्ज्ञानानां तदन्वयात् ॥ (919)

अभ्युपेतेऽपि च विधौ न प्रवृत्तिरिहेष्यते ।
सर्वमात्मेति संदृष्टे न प्रवृत्तिरहेतुतः ॥ (920)

वक्ष्यामि इत्युक्तमित्यर्थः । शाब्दज्ञानतत्सन्तानयोरपि विध्यसंभवमब्रुवम्, इत्याह—**स्वरसेनेति** । (915) विवक्षितमधिकं दर्शयति—**आत्मानमिति** । अहमिति आत्मानुसन्धानपूर्वकमेव लौकिकैः वादिभिश्च अनात्मव्यवहारात् [1]लौकिकसिद्धात्मवादिकल्पितात्मज्ञानावृत्ति[:] प्राप्तत्वात् न विधेयेत्यर्थः । (916) **किञ्च, अहं**-प्रत्ययविषयस्यात्मनो ज्ञानावृत्तिर्विधेया, अनुभवाश्रयतया परोक्षस्य वा । नाद्यः, इत्याह—**अहंप्रत्ययेति** । (917) अनात्मप्रत्ययस्य अहंप्रत्ययपूर्वकत्वेऽपि [2]तदभ्यासः किं न विधीयते, तत्राह—**आत्मेति** । (918) द्वितीयं प्रत्याह—**विज्ञानेति** । हेतुमाह—**तज्ज्ञानानामिति** । अनात्मधियामात्माश्रितत्वादात्मनस्ता.....................वाक्यार्थज्ञाने इति यावत् । (919-920)

---

1. **लौकिकसिद्धात्मेति** लौकिकसिद्धात्मज्ञानावृत्तिः वादिसिद्धात्मज्ञानावृत्तिश्चेत्यर्थः ।
2. **तदभ्यासः**—अहंप्रत्ययाभ्यासः ।

नियमार्थो विधिरयमिति भाष्यकृतो वचः ।
अभ्युपेत्यापि वक्ष्यामीत्येवमेतत्समञ्जसम् ॥ (921)

* न कश्चिदपि संभाव्यो यथोक्तन्यायगौरवात् ।
विधिर्यतोऽभ्युपगमान्नियमोक्तिरियं ततः ॥ (922)

* दर्शनं क्रियमाणं हि कर्माश्रित्य प्रसिद्ध्यति ।
आत्मानात्मा च तत्कर्म तदन्यस्याप्रसिद्धितः ॥ (923)

यथा तण्डुलनिष्पत्तिरवघाताद्यपेक्षया ।
सिद्ध्येत्, दर्शननिष्पत्तिस्तद्वदात्माद्यपेक्षया ॥ (924)

अवघातस्य पाक्षिक्यां प्राप्तौ यद्वन्नियम्यते ।
अवहन्यादिति, तथा ह्यात्मोपास्तिर्नियम्यते ॥ (925)

'विज्ञाय' इत्यत्र नियमविधिरिति भाष्यमभ्युपगमवादः

[1]सर्वप्रकारविध्यसंभवे कथं [2]भाष्यकृतः 'विज्ञाय' इत्यत्र नियमविध्यङ्गीकारः, अत्राह—**नियमेति** । (921) सिद्धान्त एव किं न स्यात्, अत्राह—**न कश्चिदिति** । (922)

भाष्योक्तनियमविधिप्रकारप्रदर्शनम्

नियमविधिप्रकारं दर्शयितुं प्रक्रमते—**दर्शनमिति** । [923] एतमर्थं दृष्टान्तेनाह—**यथेति** । [924] इदानीं सदृष्टान्तं प्रकृते नियममाह—**अवघातस्येति** । नखविदलनादिनापि तण्डुलनिष्पत्तिसंभवात् अवघातस्य पाक्षिक्यां प्राप्तौ,

---

1. **सर्वप्रकारविध्यसंभवे**—अपूर्वनियमपरिसंख्याविधीनामसंभवे ।
2. **भाष्यकृतः विज्ञायेत्यत्र नियमविध्यङ्गीकार इति**
"यत्तूक्तं 'विज्ञाय प्रज्ञां कुर्वीत' इत्यादिवचनानां वाक्यार्थविज्ञानव्यतिरेकेण उपासनार्थत्वमिति, सत्यमेतत् । किन्तु नापूर्वविध्यर्थता । पक्षे प्राप्तस्य नियमार्थतैव ।" इत्यादि भाष्यवाक्यमत्रानुसन्धेयम् ।

* **न कश्चिदिति** आत्मज्ञानस्य नित्यप्राप्तत्वमापकन्यायस्य बलीयस्त्वात्, नियमविधिरित्यभ्युपगमवाद एवेत्यर्थः ।

* **कर्म**—दर्शनविषयम् ।

अनात्मोपासनप्राप्तौ ध्यायेदात्मानमित्यतः ।
अनात्मोपास्तेः सामर्थ्यान्निवृत्तिर्न तु शब्दतः ।। (926)

यद्यात्मोपासनाप्राप्तिः क्वचित्संभाव्यतेऽञ्जसा ।
अवघातादिवत्कामं नियमोऽस्तु तथा सति ।। (927)

प्रत्यगर्थमनालिङ्ग्य न पराग्वर्ति किञ्चन ।
विज्ञानं जायते यस्मादात्मोपास्तिः सदा ततः ।। (928)

प्रागप्यनात्मसंबन्धाज्जन्म नैवात्मकर्मकम् ।
विज्ञानं निखिलं यस्मान्नित्यप्राप्तिरतो भवेत् ।। (929)

उपास्यार्थातिरेकेण न चोपासनकृद्विरुक् ।
संभाव्यो नियमविधिरतो नात्मन्यभेदतः ।। (930)

उक्तं च न्यायमापेक्ष्य नियमोऽस्त्यन्तदुर्लभः ।
विधेर्दौर्बल्यसिद्ध्यर्थमतो भाष्यकृदुक्तवान् ।। (931)

यथा अवहन्यादिति [1]अवघातो नियम्यते इत्यर्थः । दार्ष्टान्तिकमाह—**तथेति** । [925] नियमफलमाह—**अनात्मोपास्तेरिति** । [926]

आत्मोपास्तेः पाक्षिकप्राप्तिदूषणं, भाष्यस्याभ्युपगमवादतानिरूपणं च

नियमविधेरङ्गीकरणवादत्वद्योतनाय आत्मोपास्तेः नित्यप्राप्तिं दर्शयन् पाक्षिकीं प्राप्तिं दूषयति—**यदीति** । क्वचित्—देशादावित्यर्थः । [927] [2]**अस्त्यप्राप्तिरिति**, नेत्याह—**प्रत्यगिति** । [928] [3]तत्रापि हेतुमाह—**प्रागिति** । [929] उपास्योपासकभेदाभावाच्च नात्र नियमविधिः, इत्याह—**उपास्येति** । [930] न केवलं भेदाभावान्नियमासंभवः, 'अपि प्रत्यक्तमो नित्यम्' इत्याद्युक्तन्यायादपि, इत्याह—**उक्तं चेति** । अतोऽङ्गीकरणवादोऽयं नियमविधिः, इत्युपसंहरति—

---

1. **अवघातो नियम्यते इति** अवहन्यादेवेत्यर्थः । अनात्मोपासननिवृत्तिः अर्थाल्लभ्यते । न सा शाब्दीति भावः ।
2. **अस्त्यप्राप्तिरिति** आत्मोपास्तेरिति शेषः ।
3. **तत्रापि हेतु**—प्रत्यगर्थाविषयकपरागर्थज्ञानानुत्पादेऽपि हेतुम् ।

मुक्तेष्वादिवदित्यादि यच्च किञ्चित्समीरितम् ।
तस्याप्यसंभवः स्पष्टः उपरिष्टात्प्रवक्ष्यते ॥ (932)
अनात्मोपासनमिदमितिशब्दप्रयोगतः ।
प्रियमित्यादौ दृष्टत्वादप्रियोपासनं गुणात् ॥ (933)
* आत्मैकगुणवत्त्वेन न त्वत्रात्मैव चिन्त्यते ।
आत्मोपास्यत्ववाक्याच्च वैलक्षण्यं श्रुतेर्भवेत् ॥ (934)

विधेरिति। भाष्यकारो हि नियमविधिमपूर्वविधेर्दौ[1]र्बल्यार्थमुक्तवान्, उक्त-न्यायेन नियमविधेरप्ययोगादित्यर्थः । [931]

मुक्तेषुवत् प्रवृत्तफलं कर्म अवश्यं रागादि आक्षिपति, तस्य ज्ञानेनाविरोधात् । अन्यथा सद्योमुक्तौ जीवन्मुक्तिशास्त्रविरोधात् । अतो विदुषोऽपि आत्म-विस्मरणसंभवात् नियमविधिः, इति भाष्यकारेण साधितत्वात् [2]कथमुपेत्यवादः, अत्राह—**मुक्तेष्विति** । यथा ब्रह्मविदो रागाद्यसंभवः, तथा—

आगमाद्वेद चेद्ब्रह्म ब्रह्मैव भवतीति हि ।
(क)[फ]लावस्थस्य च सतः कुतो रागादिसंभवः ॥ (वा. 1540)

इत्यत्र वक्ष्यते इत्यर्थः । (932)

'आत्मेत्येवोपासीत' इत्यत्रेतिशब्दस्य विवक्षितार्थ-निरूपणम्

विधिनिरासेन वस्तुपरा वेदान्ताः इत्युक्तम् । इदानीं 'आत्मेत्येव' इत्यत्र इतिशब्दस्य विवक्षितार्थं दर्शयितुं चोदयति—**अनात्मेति** । 'प्रियमित्येत-दुपासीत' इत्यादौ प्रियादिगुणकस्य प्राणादेरुपास्यत्ववत् आत्मगुणकानात्मनो व्याकृतत्वेन प्रकृतप्रधानादेरुपासनमित्यर्थः । (933) आत्मगुणारोपेणात्मैवोपा-स्यताम्, अत्राह—**आत्मेति** । हेत्वन्तरमाह—**आ(त्मनो)[त्मो]पास्यत्वेति** ।

---

1. **दौर्बल्यार्थमुक्तवानिति** नापूर्वविधिः इत्युपक्रमादिति भावः ।
2. **कथमुपेत्यवाद इति** भाष्यकारीयः नियमविधिरिति वादः इति शेषः ।
* **आत्मैकगुणवत्त्वेनेति** एकत्र गुणगुणिभावासंभवात् आत्मगुणकमनात्मवस्त्वे-वोपास्यमित्यर्थः । **आत्मोपास्यत्ववाक्याच्चेति** आत्मनः उपास्यत्वं येन वाक्ये-नोच्यते तद्वाक्याच्चेत्यर्थः ।

आत्मानमिति कर्मोक्तेर्वैलक्षण्यमिति स्फुटम् ।
*आत्मोपास्तिनिषेधाच्च न पश्यन्तीति वाक्यतः ॥ (935)

नात्मोपास्यत्वावगमाद्वाक्यशेषे भवेदिदम् ।
पदनीयान्तरतरं प्रियमित्यादिशेषतः ॥ (936)

आत्मानं प्रियमित्येतद्वाक्यशेषेऽवगम्यते ।
तस्मादात्मैवोपास्यः स्यान्नानात्मोपास्य इष्यते ॥ (937)

अकृत्स्नत्वान्निषेधश्च न त्वात्मोपासनस्य सः ।
शब्दज्ञानातिवर्तित्वख्यापनायेतिशब्दनम् ॥ (938)

यतो वाचो निवर्तन्ते नेति नेत्यादिकं तथा ।
एवं सत्यर्थवत्सर्वमन्यथा तदनर्थकम् ॥ (939)

---

(934) वैलक्षण्यमेवाह—**आत्मानमितीति** । 'आत्मानमेव लोकमुपासीत' (बृ. 3-4-15) इत्यादौ द्वितीयाश्रवणात्, [1]इह तदभावात्, आत्मशब्दस्य इतिपरत्वाच्च वैलक्षण्यमित्यर्थः । इतश्चानात्मोपासनम्; इत्याह—**आत्मोपास्तीति** । (935)

नेदमनात्मोपासनं भवेत्, वाक्यशेषे तत्र आत्मोपास्यत्वावगमात्, इति परिहरति—**नात्मेति** । वाक्यशेषं विशदयति—**पदनीयेति** । 'तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा' 'सर्वस्मादन्तरतरं यदयमात्मा' 'आत्मानमेव प्रियमुपासीत' 'तदात्मानमेवावेत्' इति वाक्यशेषादात्मनः उपासनसिद्धिरित्यर्थः । (936) प्रियमित्येतत् स्पष्टयति—**आत्मानमिति** । फलितमुपसंहरति—**तस्मादिति** । (937) 'तं न पश्यन्ति' इति निषेधविरोधः, अत्राह—**अकृत्स्नत्वादिति** । कस्तर्हि इतिशब्दार्थः, अत्राह—**शब्देति** । (938) [2]अत्र मानमाह

---

1. **इह तदभावात्**—'आत्मेत्येवोपासीत' इति वाक्ये आत्मपदोत्तरं द्वितीयाश्रवणाभावात् ।

* **आत्मोपास्तीति** 'तं न पश्यन्ति' इति आत्मोपास्तेः निषेधात्, 'आत्मेत्येवोपासीत' इत्यत्र आत्मोपासाविधौ पूर्वापरविरोध इत्यर्थः ।

2. **अत्र मानं**—आत्मनः शब्दज्ञानातिवर्तित्वे प्रमाणम् ।

अनात्मार्थापनुत्त्यर्थमात्मानमिति शब्द्यते ।
*नातो वाक्यान्तरं तत् स्यात् यथोक्तार्थानुवादतः ॥ (940)

आत्मेत्येवोपासीतेति हेतुरत्रोपदिश्यते ।
अकात्स्न्र्यदोषहानाय प्रतीचः कृत्स्नतोच्यते ॥ (941)

आत्मनोऽनवशेषेण संबन्धोऽनात्मवस्तुना ।
रज्जुसर्पादिवन्नातः प्रतीचः शिष्यते पराक् ॥ (942)

सर्वमज्ञातमेव स्यात् यस्मिन्नज्ञात आत्मनि ।
ज्ञाते ज्ञातं च कृत्स्नोऽसौ तावत्त्वात्सर्ववस्तुनः ॥ (943)

—**यत इति** । (939) यदुक्तम् आत्मोपास्यत्ववैलक्षण्यादिति, तत् प्रत्याह— **अनात्मेति** । 'आत्मानमेवावेत्' इत्येतत् 'आत्मेत्येवोपासीत' इत्यस्माद्वा-[1]क्यान्तरम्, इत्यत्राह—**नात इति** । (940)

'अत्र ह्येते सर्वे एकं भवन्ति' इतिश्रुत्यर्थनिरूपणम्

'अत्र ह्येते सर्वे एकं भवन्ति' इत्यस्य तात्पर्यमाह—**आत्मेति** । तदर्थमाह—**अकात्स्न्र्येति** । [2]अद्वितीयत्व[3]मनेनोच्यते इत्यर्थः । (941) अद्वयत्वं साधयति—**आत्मन इति** । अवशेषः—व्यतिरिक्तांशः न विद्यते यस्य तत् अनवशेषम् । तेन अनवशेषेण—तादात्म्येनेत्यर्थः । (942) 'येनाश्रुतम्' (छा. 6-1-3) इत्यादि वाक्यमपि [4]अत्र प्रमाणमिति, अत्रोपपत्त्यन्तरमाह—**सर्वमिति** । (943)

---

1. **वाक्यान्तरमिति** अर्थैकत्वादेकं वाक्यम् । अर्थभेदे न एकवाक्यत्वमित्यर्थः ।

* **यथोक्तार्थानुवादतः**—आत्मानमेवावेत् इति वाक्यार्थानुवादि आत्मेत्येवोपासीत इति वाक्यं न वाक्यान्तरमित्यर्थः ।

2. **अद्वितीयत्वमिति** आत्मन इति शेषः ।

3. **अनेन**—'अत्र ह्येते' इत्यादिवाक्येन ।

4. **अत्र प्रमाणं**—आत्मनः अद्वयत्वे प्रमाणम् ।

युक्त्या निरूप्यमाणस्य ह्यात्मा तत्त्वमनात्मनः ।
प्रत्याख्यातः स चेत्तेन क्वानात्मा सिद्ध्यतामयम् ॥ (944)

अनात्मतत्त्वमन्वेति ह्यात्माऽसङ्गोऽगुणोऽद्वयः ।
स्वतः सिद्धौ न चेत् सिद्ध्येत् किमन्यद्भेषजं ततः ॥ (945)

***ज्ञातायां स्रजि तन्मोहकल्पितानां यथैकता ।**
प्रतीच्येवं तदज्ञानक्लृप्तानामेकतेष्यते ॥ (946)

आत्मशब्दाभिधेयेऽर्थे प्रत्यक्सामान्यरूपके ।
अन्तर्भवन्ति निखिला विशेषा इति के चन ॥ (947)

आद्यन्तवत्त्वादिभिर्हेतुभिश्चानात्मा कल्पितः, इत्याह—**युक्त्येति** । (944) आत्मा(वे)[चे]दनात्मनस्तत्त्वं, अनेकरसत्वप्रसक्तिः, अत्राह—**अनात्मतत्त्वमिति** । कल्पितस्य न वस्तुतो भेदादिहेतुत्वमित्यर्थः । आत्मनोऽसङ्गत्वे तत्र अनात्मनः सिद्ध्ययोगात् [1]अन्यत्रानात्मसिद्धौ अद्वैतविरोधः, अत्राह—**स्वत इति** । साधकान्तरं नास्तीत्यर्थः । (945) अनुभवे सर्वस्याध्यस्तत्वे फलितमाह—**ज्ञातायामिति** । (946)

'अत्र ह्येते सर्वे एकं भवन्ति' इत्यस्य भर्तृप्रपञ्चव्याख्यानम्

'अत्र ह्येते सर्वे एकं भवन्ति' इत्येतत् स्वमतेन व्याख्याय, [2]**भर्तृप्रपञ्चव्याख्यानमनुवदति—आत्मेति** । विशेषाः—प्राणनादिव्यापारविशिष्टा इत्यर्थः ।

---

1. **अन्यत्र**—आत्मनोऽन्यत्र ।

* "श्रुतियुक्तिभ्यामद्वयत्वमात्मनोऽभिधाय, 'अत्र हि' इत्यादिवाक्यार्थं सदृष्टान्तमुपसंहरति—**ज्ञातायामिति** ।" इत्यप्यवतारयति **शास्त्रप्रकाशिका** ।

2. **भर्तृप्रपञ्चव्याख्यानमनुवदतीति** यद्यपि 'अत्र हि' इति वाक्यार्थविषये भर्तृप्रपञ्चमतं पूर्वं,

समुद्रतरुगोपिण्डदृष्टान्तैः परमात्मनः ।
व्याचक्षते बलात् केचित् समस्तव्यस्तदर्शनम् ॥ (वा. 693)

इति वार्त्तिकेनानूद्य निरस्तम् । तथापि विस्तरेण तन्निरासाय पुनरत्र तन्मतानुवाद इति बोध्यम् ।

सामान्येन समस्तं तद्विशेषैर्व्यस्तमेव च ।
कृत्स्नमेवं परं ब्रह्म सदोपासीत यत्नतः ॥ (948)

अवस्थावदवस्थाभिः क्वचित् कार्त्स्न्यं प्रचक्षते ।
कार्यकारणरूपेण क्वचित् व्याचक्षते तथा ॥ (949)

भागभागिविभागेन नाभिनेम्यरवत्तथा ।
व्याचक्षते महात्मानः संप्रदायबलात् किल ॥ (950)

अक्षराणामतात्पर्यात् युक्तितश्चाप्यसंभवात् ।
प्रतिपत्तुं वयं तादृक् शक्नुमो नाञ्जसा परम् ॥ (951)

अज्ञातं जगदज्ञाते ज्ञाते ज्ञातं च यत्र तत् ।
तद्ब्रह्मैवंविधं कृत्स्नं न गोवृक्षादिवन्मतम् ॥ (952)

सामान्यानि विशेषाश्च व्यावर्तन्ते परस्परम् ।
* प्राणादिवदतः कार्त्स्न्यं न तेषां युक्तिमद्भवेत् ॥ (953)

---

(947) सामान्यविशेषरूपस्य(परस्परं)[परस्य]कृत्स्नत्वानुपपत्तिः, अत्राह—**सामान्येनेति**। (948) प्रकारान्तरेण ब्रह्मणः कृत्स्नत्वमाह—**अवस्थावदिति**। ब्रह्म अवस्थावत् जगत् अवस्थेत्यर्थः। कार्यकारणभावेन अंशांशिभावेन च [1]तदाह—**कार्येति**। [2]अंशांशिभावे(न) दृष्टान्तमाह—**नाभीति**। यथा रथचक्रस्यावयविनो नाभिः नेमिः अराश्चावयवा इत्यर्थः। (949–950)

भर्तृप्रपञ्चव्याख्यानदूषणम्

दूषयति—**अक्षराणामिति**। (951) कीदृशं तर्हि कृत्स्नत्वमभिप्रेतम्, इत्यत आह—**अज्ञात(इ)[मि]ति**। जगत्कल्पनाधिष्ठानत्वेनेत्यर्थः। (952) सामान्यविशेषात्मना कृत्स्नत्वं तावन्निराचष्टे—**सामान्यानीति**। प्रा(णत्वदनित्य)[णादिवत्—प्राणन्नित्यादि]व्यापारविशिष्टवदित्यर्थः। [953] ब्रह्मणो नाना-

---

1. **तदाह**—ब्रह्मणः कृत्स्नत्वमाह।
2. **अंशांशिभावे इति** ब्रह्मजगतोरित्यादिः।

* '**अतः कार्त्स्न्यं न तेषां युक्तिमद्भवेदिति** सामान्यानां विशेषाणाञ्च मिथो व्यावृत्तत्वात् तेषामेकब्रह्मतया कार्त्स्न्यं न युक्तिमद्भवेदित्यर्थः।

तदानन्त्याच्च तद्बोधो नेश्वरेणापि कार्त्स्न्यतः ।
क्रमशोऽक्रमशो वापि शक्यः कर्तुं कदा चन ॥ (954)

तादात्म्यभावनायां तु पुंसां संभावनापि न ।
शक्या सुनिपुणेनापि कर्तुं तद्व्यापृतिः कुतः ॥ (955)

गङ्गावतारवन्नापि बहूपासितृकर्मता ।
भावनोपचयाभावादेकैकस्मिंस्तथा सति ॥ (956)

देवो भूत्वैति विबुधान् भावनोपचयान्नरः ।
इति सर्वपदार्थेषु पुंसोऽशक्यं विधित्सितम् ॥ (957)

यज्ज्ञातमपि कार्त्स्न्येन तत्तदन्यश्च नाञ्जसा ।
ज्ञानेन ज्ञायते तादृक् कृत्स्नं कथमिहोच्यते ॥ (958)

पराग्वस्तु विरोधित्वात् प्रत्यग्बुद्ध्या न गम्यते ।
पराञ्चीत्यपि हेतूक्तेः नातः पिण्डादिकृत्स्नधीः ॥ (959)

त्वमपि दर्शनार्थमुपासनार्थं वा । नाद्यः, इत्याह—**तदानन्त्यादिति** । [954] द्वितीयं दूषयति—**तादात्म्येति** । स्वरूपेणावगतानामुपासनीयत्वादनन्तानामवगमायोगादित्यर्थः । [955] एकेन ब्रह्मोपासनं कर्तुमशक्यमपि बहुभिः तत् शक्यानुष्ठानं, पृथिव्यां बहुभिः भगीरथादिभिः गङ्गावतरणवत्, अत्राह—**गङ्गेति** । एकैकस्मिन्नधिकारिणि [1]उपास्यसाक्षात्करणं सर्वात्मना न स्यादित्यर्थः । [956] माभूत् साक्षात्करणम्, अत्राह—**देव इति** । तस्या उपास्तेरेककर्तृकत्वे वाच्ये फलितमाह—**इति सर्वेति** । एकैकस्य पुंसः सर्वपदार्थेषु ध्यानमशक्यं [2]विधित्सितमित्यर्थः । [957] यस्मिन् दृष्टे तत्स्वरूपमन्यच्च सर्वात्मना न गम्यते तस्य कृत्स्नत्वं व्याहतम्, इत्याह—**यज्ज्ञातमिति** । [958] आत्मनि ज्ञाते तदभिन्नत्वादनात्मापि ज्ञात एव स्यात्, अत्राह—**परागिति** । पराग्दृष्ट्या

---

1. **साक्षात्करणं न स्यादिति** साक्षात्करणसाधनताहशोपासनाया अभावादिति भावः ।

2. **विधित्सितमिति** त्वयेति शेषः

तथात्मनि च विज्ञाते सर्वं ज्ञातं भवेदिति ।
येनाश्रुतं श्रुतमिति कस्मिन्न्विति तथा परम् ॥ (960)

* आत्मसाम्यग्रहेऽप्यात्मभेदमात्रगृहीतितः ।
नैवानात्मार्थसामान्यविशेषाणां ग्रहो भवेत् ॥ (961)

* समस्तव्यस्ततादृष्टावेवमादि सुदुर्घटम् ।
अपूर्वानपरानन्तराबाह्योक्तिश्च दुःस्थिता ॥ (962)

प्रत्यगवगमवत् प्रत्यग्दृष्ट्या पराग्दृष्टिरपि स्यात्, अत्राह—**पराश्चीति** । [959] आत्मनोऽनेकरसत्वं श्रुतिविरोधाच्चायुक्तम्, इत्याह— **तथेति** । आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति 'येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति' (छा. 6-1-3) 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मु. 1-1-3) इति श्रुतिविरोध इत्यर्थः । (960) सामान्यग्रहे विशेषा गृहीताः स्युः [1]तेषां [2]तत्रान्तर्भावात् । अतो नैकज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधः, अत्राह—**आत्मेति** । (961) भेदाभेदयोः [3]भेदाभे[दवद्-]वस्तुमात्रत्वात्, [4]भेदे [5]तत्रापि भेदान्तरप्रसक्त्या अनवस्थानादयुक्तो[6]ऽयं पक्षः, इत्याह—**समस्तेति** । अस्थूलादिवाक्यविरोधश्च, इत्याह—

---

1. **तेषां**—विशेषाणाम् ।
2. **तत्र**—सामान्ये ।

* **आत्मसाम्यग्रहेऽपि**—आत्मसामान्यग्रहेऽपि । **आत्मभेदमात्रगृहीतितः**—आत्मविशेषमात्रग्रहणात् ।

3. **भेदाभेदवद्वस्तुमात्रत्वात्**—भेदाभेदाश्रयत्वेनाभिमतवस्तुस्वरूपत्वात् ।
4. **भेदे**—स्वाश्रयवस्तुनः सकाशात् भेदस्य भेदस्वीकारे ।
5. **तत्रापि**—वस्तुभेदयोः भेदेऽपि ।
6. **अयं पक्षः**—ब्रह्मणः समस्तव्यस्ततापक्षः ।

* "किञ्च, सामान्यादेः विशेषादेश्च अत्यन्तभेदे तद्भावासंभवः, अत्यन्ताभेदेऽपि अन्यतरपरिशेषात् तद्भावानुपपत्तिस्तुल्या । भेदाभेदौ च विरुद्धौ । अविरोधे सर्वत्र विरोधोच्छित्तिः, इति मत्वाऽह—**समस्तेति** एवंशब्देन भेदाभेदादिविकल्पोक्तं दोषं परामृशति । सामान्यादेः विशेषादेश्च प्रातिस्विकाकारस्थितौ तद्विरोधान्नैकस्मिन्नन्तर्भावः । तदस्थितौ स्वयमभावात् कस्य एकस्मिन्नन्तर्भावः । न च तं विना एकविज्ञानेन सर्वविज्ञानसिद्धिः इत्यादिशब्दार्थः ।" इति **शास्त्रप्रकाशिका** ।

पराक्प्रमेयमानानां प्रत्यगर्थधियोदितः ।
बाधोऽतोऽसाध्वभिहितं समस्तव्यस्ततां प्रति ॥ (963)

तथोपास्यस्य ब्रह्मत्वे श्रुत्या साक्षान्निराकृते ।
नेदं यदिदमित्येवं समस्तव्यस्तता कुतः ॥ (964)

स्थूलाद्यशेषापह्नुत्या चाक्षरे प्रत्यगात्मनि ।
कारणान्तस्य जगतः ओतप्रोतोक्तितस्तथा ॥ (965)

* न च प्रत्यग्धिया द्रष्टुं पराग्वस्त्विह शक्यते ।
समस्तव्यस्ततैवं च न मानादुपपद्यते ॥ (966)

मानभूमेश्च व्युत्थाप्य तथाऽविदितभूमितः ।
प्रत्यङ्मात्रस्य ब्रह्मोक्तेः समस्तव्यस्तता कुतः ॥ (967)

न समस्तं न च व्यस्तं नोभयं प्रत्यगात्मनि ।
प्रत्यक्प्रवणया बुद्ध्या वीक्ष्यतां यदि शक्यते ॥ (968)

अपूर्वेति । (962) आत्मधिया अनात्मनां बाधाच्च न युक्ता [1]सा, इत्याह—**परागिति** । समस्तव्यस्ततां प्रति त्वयोक्तं वचनमयुक्तमित्यर्थः । (963) इतश्च न युक्तम्, इत्याह—**तथेति** । (964) हेत्वन्तरमाह—**स्थूलादीति** । अशेषविशेषनिषेधेन अक्षरस्य निर्विशेषोक्तेः न समस्तादिरूपं ब्रह्मेत्यर्थः । (965) मानाभावाच्च न समस्तव्यस्तम्, इत्याह—**न चेति** । (966) न केवलं मानाभावः, मानविरोधोऽपि, इत्याह—**मानेति** । 'अन्यदेव तद्विदितादथो अविदितादधि' (केन. 1-4) इति श्रुतेरित्यर्थः । (967) विद्वदनुभवविरोधाच्च न समस्तादिरूप आत्मा, इत्याह—**नेति** । प्रत्यक्प्रवणया बुद्ध्या वीक्षितुं न शक्यते इति शेषः । (968)

---

1. **सा**—समस्तव्यस्तता ।

* **न चेति** 'पराञ्चि खानि' इति श्रुतेः प्रतीचः पराचश्चैकमानस्पर्शाभावेन समस्तव्यस्तता न मानसिद्धेति भावः ।

कस्मात्पुनरिदं त्यक्त्वा दृष्टादृष्टार्थसाधनम् ।
आत्मेत्येवोपासीतेति महान् यत्नः श्रुतेरिह ॥ (969)

पदनीयमिदं यस्मादनात्मभ्यः परं पदम् ।
सर्वज्ञेयपुमर्थानां प्रत्यग्ज्ञाने समाप्तितः ॥ (970)

न हि प्रतीचि विज्ञाते कश्चिदप्यवशिष्यते ।
ज्ञेयोऽर्थः पुरुषार्थो वा पदनीयमतो भवेत् ॥ (971)

अनात्मार्थे तु विज्ञाते स्वाध्यस्ताहिप्रबोधवत् ।*
न किञ्चित्स्यात् परिज्ञातं नानात्माऽतः प्रमित्सितः ॥ (972)

अस्येति शैषिकी षष्ठी कृत्स्नसंगत्यपेक्षया ।
प्रतीचाऽव्यतिरेकी सन्नानात्मा ह्येति संगतिम् ॥ (973)

'तदेतत्पदनीयमस्य सर्वस्य' इत्यादिश्रुत्यर्थनिरूपणम्

'अत्र ह्येते सर्व[एक]म्' इत्यात्मनो निर्विशेषत्वं विवक्षितमित्युक्त्वा, '[1]तदेतत्पदनीयम्' इत्येतद्व्यावर्त्यशङ्कामाह—**कस्मादिति** । अग्निहोत्रादिकं कर्म हित्वा आत्मज्ञाने कस्मादादर इत्यर्थः । (969) एतदुत्तरत्वेन उत्तरवाक्यमवतारयति—**पदनीयमिति** । (970) [2]हेतुं स्पष्टयति—**न हीति** । (971) हिरण्य[3]गर्भादिज्ञानेऽपि [4]एतत् सिद्ध्येत्, अत्राह—**अनात्मेति** । (972) 'अस्य' इति षष्ठ्यर्थमाह—**अस्येति** । अनात्मजातस्य आत्म(मात्र साधनार्थे)[संबन्धार्थे]ऽयं

---

1. **तदेतत्पदनीयमित्यादि** 'तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा अनेन ह्येतत्सर्वं वेद ।' इति वाक्येन निवर्तनीयां शङ्कामित्यर्थः ।

2. **हेतुं**—आत्मतत्त्वस्यैव पदनीयत्वे हेतुं - आत्मज्ञाने सति सर्वज्ञेयानां पुरुषार्थानाञ्च परिसमाप्तिम् ।

3. **हिरण्यगर्भादिज्ञानेऽपीति** विश्वात्मकेत्यादिः ।

4. **एतत्**—एवंज्ञेयपुरुषार्थसमाप्तिः ।

* **स्वाध्यस्ताहिप्रबोधवदिति** रज्जावारोपिताहेर्ज्ञाने, अहिस्वरूपं वा रज्जुर्वा न ज्ञायते । एवं चिदात्मन्यध्यस्तसूत्रादिज्ञाने सूत्रस्वरूपमन्यद्वा न ज्ञातं स्यादिति अनात्मा न प्रमित्सितः इत्यर्थः ।

नेदं विभागं संबन्धः प्रतीचाऽनात्मनोऽस्ति हि ।
प्रत्यगर्थोऽविभागात्मा नातः संगच्छते द्वयम् ॥ (974)

* अतो दुःस्थितसिद्ध्येतत् पराग्वस्त्वन्तरात्मनि ।
तावन्मात्रैकयाथात्म्यात् बुद्ध्यादे रज्जुसर्पवत् ॥ (975)

पराक्तयैष ज्ञातोऽपि प्रत्यग्याथात्म्यहेतुतः ।
अनात्माऽज्ञात एव स्यात् शुक्तिकारूप्यबोधवत् ॥ (976)

निर्धारणे वा षष्ठीयं ज्ञेयार्थस्यावधारणात् ।
प्रतीचो ह्यनधिगतान्नान्योऽनधिगतो यतः ॥ (977)

ज्ञातोऽपि तद्वदेवास्मात् नात्मनो विद्यते परः ।
प्रत्यगज्ञानहेतुत्वात्तदन्यस्येह वस्तुनः ॥ (978)

अनात्मनोऽस्य सर्वस्य व्याकृताव्याकृतात्मनः ।
यस्मादात्मा परं तत्त्वं पदनीयमतो भवेत् ॥ (979)

षष्ठी, न कर्त्रर्थेत्यर्थः । शेषषष्ठीत्वे [1]संबन्धस्य भेदापेक्षत्वात् आत्मानात्मभेदः स्यात्, अत्राह—**प्रतीचेति** । भेदस्याप्रामाणिकत्वादित्यर्थः । (973) विभागव्यतिरेकेण संबन्धो भवेत् [2]भेदभेदिवत्, अत्राह—**नेदं इति** । फलितमाह—**प्रत्यगिति** । (974) कथं [3]तर्हि शैषिकी षष्ठी इत्युक्तम्, अत्राह—**अत इति** । (975) प्रतीचो भेदेन प्रत्यक्षादिसिद्ध(:)प्रपञ्चस्य कथं रज्जुसर्पसाम्यम्, अत्राह—**पराक्तयेति** । ज्ञातस्याज्ञातत्वं व्याहतम्, अत्राह—**शुक्तिकेति** । (976) प्रत्यगात्मैव मेयः नान्यः इति प्रतिपादनार्था वेयं षष्ठी, इत्याह—**निर्धारणे वेति** । हेतुमाह—**प्रतीचो हीति** । (977) अन्यस्य ज्ञातत्ववदज्ञातत्वमपि स्यात्, अत्राह—**ज्ञातोऽपीति** । (978) ‘यदयमात्मा’ इत्यस्यार्थमाह—**अनात्मनो**-

---

1. **संबन्धस्य भेदापेक्षत्वादिति** द्विनिष्ठत्वादिति भावः ।
2 **भेदभेदिवत्**—भेदिस्वरूपेण भेदेन भेदिनः संबन्धो यथेति यावत् ।
3. **तर्हि**—आत्मानात्मनोः संगत्यभावे ।
* **अत इति** कल्पितं तादात्म्यं संबन्ध इति भावः ।

खण्डादौ गोत्ववद्यस्मात् प्रत्यग्दृष्ट्यान्तरात्मनि ।
* समीक्ष्यते हिरुङ्नापि तेनासावात्मतत्त्वकः ॥ (980)

ज्ञेय आत्मैव नानात्माऽपदनीयत्वकारणात् ।
नन्वन्यज्ञाने नान्यस्य क्वचिदस्त्यवबुद्धता ॥ (981)

सत्यमेवं भवेदेतद्यद्यात्माप्यन्य इष्यते ।
आत्मासावन्य इति च नानुन्मत्तस्य गीरियम् ॥ (982)

* अनेनेति तृतीयेयमित्थंभूतार्थलक्षणा ।
इदंधीशब्दगम्यस्य प्रत्यङ्मात्रसतत्त्वतः ॥ (983)

घटो नास्तीति को न्वस्मान्मानादर्थः प्रतीयते ।
संवित्तावदशेषेभ्यः प्रमाणेभ्योऽवसीयते ॥ (984)

ऽस्येति । (979) सर्वस्यात्मत्वं दृष्टान्तेनाह—खण्डादाविति । यथा विशेषे सामान्यं भेदेन दृश्यते, नैवमनात्मा हिरुक् समीक्ष्यते इत्यर्थः । (980) फलितमाह—ज्ञेय इति । अपदनीयत्वकारणात्—अप्रतिपाद्यत्वात् अज्ञातत्वाभावादित्यर्थः । आत्मा ज्ञेयः, नानात्मा इत्युक्तत्वात् [1]तयोर्भेदात् आत्मनः सर्वात्मत्वविरोधः, इति चोदयति—नन्विति । ततश्च 'अनेन ह्येतत्सर्वं वेद' इति वाक्यशेषविरोधः इत्यर्थः । (981) भेदस्याध्यस्तत्वान्न विरोधः इत्याह—सत्यमिति । (982) तृतीयार्थमाह—अनेनेति । [2]हेतुमाह—इदमिति । (983)

सर्वस्य अनुभवमात्रत्वनिरूपणम्

[3]सर्वस्य अनुभवमात्रत्वं साधयति—घट इति । घटो नास्तीति सर्वप्रमाणोपलक्षणम् । सर्वप्रमाणेभ्यः फलत्वेनानुभवो भातीत्यर्थः । (984) तथापि

* हिरुक्—पार्थक्येन ।
1. तयोः—आत्मानात्मनोः ।
* इत्थंभूतार्थलक्षणा —इत्थंभूतमर्थं लक्षयति गमयतीति तथा ।
2. हेतुं—तृतीयाया इत्थंभूतार्थकत्वे हेतुम् ।
3. सर्वस्यानुभवमात्रत्वमिति निरुक्तहेतुमित्यादिः ।

न संविदः पृथक्त्वेन नापि संविदि तद्धिया ।
अनात्मवस्तूत्प्रेक्ष्यं स्याद्यथा संविदियं स्वतः ॥ (985)

उपलब्धोऽस्ति सन्कुम्भः लम्बोष्ठो देशकालवान् ।
पूर्वपूर्वातिरेकेण नोत्तरार्थोऽनुभूयते ॥ (986)

कर्त्रादिव्यापृतेः पूर्वं संवित्स्वात्मन्यवस्थितेः ।
* अविभागानुपाख्येयं तदुद्भूत्या फलायते ॥ (987)

अक्रियेऽपि यथा व्योम्नि ह्युत्पत्तिस्थितिहानिभिः ।
जगन्नर्ति मय्येवं सदसद्विश्वरूपभृत् ॥ (988)

नन्वघटार्थावपह्नुत्य संवित्सद्रूपमात्रया ।
अवगत्यात्मना सत्त्वं सर्वदृक् स्यादविक्रियः ॥ (989)

कथं तत्र जगदध्यस्तम्, [1]तस्यापि भासमानत्वात्, अत्राह—**नेति** । संविदो भेदे संसर्गायोगान्नानात्मसिद्धिः, जडाजडयोरेकत्वविरोधात्, जडत्वादेव स्वतोऽप्यसिद्धेः अनुभवेऽध्यस्तं जगदित्यर्थः । (985) निर्विकल्पकानुभवानुविद्धतया भासमानानात्मार्थस्य तद्व्यतिरेकेणाभावात् अनुभवमात्रत्वं सर्वस्य, इति हेत्वन्तरमाह—**उपलब्धोऽस्तीति** । [2]सन्निति सत्तासामान्ययोगः, अस्तीति स्वरूपसत्त्वमिति भेदः । (986) अनुभवस्यापि कार्यत्वेन कल्पितत्वात् न सर्वाधिष्ठानत्वम्, अत्राह—**कर्त्रादीति** । मात्रादिव्यापारात् प्राक् स्वापादौ, स्वात्मन्यवस्थितत्वात् इयं-संवित् अविभागात्—कार्यकारणभेदाभावात् अनुपाख्या — कार्यकारणशब्दहीना, प्रमातृव्यापारोत्पत्त्या फलवदाचरतीति स्वतः कूटस्थेत्यर्थः । (987) स्वगतविकारमन्तरेण कथमधिष्ठानत्वं संविदः, अत्राह—**अक्रियेऽपीति** । (988) संवित् सक्रिया अधिष्ठानत्वात् शुक्तिवत् । न (वा) [चा] काशे व्यभिचारः, [3]तस्यापि जडस्य विकारित्वेन सपक्षत्वात्, अत्राह—**नन्वघटेति** । यतो विश्वस्य अनुभवसत्तयैव सत्त्वं, अतो नन्वघटार्थौ-भावाभावौ, संविद्रूपमात्रत्वेन अपह्नुत्य

---

1. **तस्यापि**—अनुभवस्यापि ।
2. अस्ति, सन् इत्यनयोः पौनरुक्त्यं परिहरति—**सन्नितीत्यादिना** ।
* **तदुद्भूत्या**—कर्त्रादिव्यापारोद्भवेन । 'अविभागादनाख्येया' इति मु. पु. पाठः ।
3. **तस्यापि जडस्य विकारित्वेनेति** जडस्याकाशस्य सिद्धान्ते उत्पत्तिनाशरूपक्रियावत्त्वस्वीकारादिति भावः ।

* दिग्विभागोऽविभागेऽपि व्योम्नि यद्वत्प्रकल्पितः ।
प्रध्वस्ताशेषभेदेऽपि मयि भिन्नधियस्तथा ॥ (990)

कथं पुनरबोधोत्थक्लृप्तोपायेन तत्परम् ।
गम्यते सत्यमित्यस्य परिहृत्यै परं वचः ॥ (991)

परमार्थात्मना सत्यं पदं तदपि बोधकम् ।
स्वार्थस्यैवमुपायत्वमसत्यस्यात्मनीक्ष्यताम् ॥ (992)

तत्तद्रूपः प्रत्यगात्मा सर्वं पश्यति । तस्मात् [1]साक्षित्वादविक्रिय इत्यर्थः । (989) विकारस्य जाड्यप्रयुक्तत्वात् अनुभवस्याविक्रियत्वेऽपि, प्रतिदेहं भेदात् सर्वात्मत्वं नानुभवस्य, अत्राह—**दिग्विभाग इति** । (990)

'यथा ह वै पदेनानुविन्देत्' इति श्रुतेः सावतरणं व्याख्याभेदाः

[2]'यथा ह' इत्यादिवाक्यं शङ्कापूर्वकमवतारयति—**कथमिति** । (991) [3]तत् व्याचष्टे - **परमार्थेति** । यथा गवाश्वादिवर्णात्मकं पदं नित्यसर्वगतवर्णेषु [4]भाविकक्रमासंभवात् स्वरूपेणासत्यमपि परमार्थात्मना—ब्रह्मरूपेण सत्यं स्वार्थस्य बोधकम्, एवं [5]जगत् कल्पितमपि ब्रह्मात्मना सत्त्वात् ब्रह्मणो बोधकमित्यर्थः ।

---

1. **साक्षित्वादिति** साक्षिणः साक्ष्यानाश्रयत्वादिति भावः ।

* "तर्हि दृष्टिकर्तृत्वात्तदवस्थमस्य सक्रियत्वम् । न हि तत्कर्तृत्वं विना सर्वदृक्त्वम् । नापि क्रियां हित्वा कर्तृत्वम् । मैवं, स्वरूपदृष्टिं मुक्त्वा तद्भेदस्य तत्कर्तृत्वस्य चात्मनि कल्पितत्वादिति, दृष्टान्तेनाह—**दिग्विभाग इति** ।" इति **शास्त्रप्रकाशिका** ।

2. **यथा हेत्यादि** 'यथा ह वै पदेनानुविन्देत्' इति वाक्यमित्यर्थः ।

3. **तत्**—निरुक्तवाक्यम् ।

4. **भाविकक्रमासंभवात्**—स्वाभाविकक्रमासंभवात् ।

5. **जगदिति** ब्रह्मज्ञानोपायश्रुत्याचार्याद्यभिप्रायकं बोध्यम् । 'परमार्थात्मनाऽसत्यम्' इति पदच्छेदमनुमन्यन्ते **शास्त्रप्रकाशिकाकाराः** ।

उपायसत्यतां मुक्त्वा नान्यादृश्युपयुज्यते ।
सत्यताऽत्र ह्युपायानामुपेये किं तयेष्यते ॥ (993)

* गवादिखुरबिम्बो वा पदमित्युपदिश्यते ।
अनन्वितार्थसिद्ध्यर्थं दृष्टान्तोऽयं तथा सति ॥ (994)

गवादिबोधनिर्वृत्तिः पदतज्ज्ञानहेतुतः ।
अनन्वितपदज्ञानगोपिण्डैकावसायिनी ॥ (995)

यथैवं नामरूपादिप्रपञ्चोपायहेतुतः ।
अप्रपञ्चात्मके भूम्नि प्रत्यग्बोधः प्रजायते ॥ (996)

प्रमाणभूमावैकात्म्यं विरोधान्न प्रतीयते ।
* तमोऽन्वयाप्रमेयत्वात् तदभावेऽपि नेक्ष्यते ॥ (997)

---

(992) अर्थक्रियाकारित्वसत्यत्वव्यतिरेकेण स्वरूपसत्यत्वस्य कार्योत्पत्तावनुपयोगित्वाच्च [1]कल्पितस्य धीसाधनता, इत्याह—**उपायेति** । (993) पदशब्दस्यार्थान्तरमाह—**गवादीति** । अस्मिन् पक्षे ब्रह्मणः उपायेना[2]सङ्गसिद्धिः फलम्, इत्याह—**अनन्वितेति** । (994)

एवं [3]फलमुक्त्वा, विवक्षितार्थं स्फुटयितुं दृष्टान्तं स्पष्टयति—**गवादीति** । प्रतीतखुरादिबिम्ब(मिति)[तन्मितिहेतुकः] बोधः गवादिगोचरः [4]खुरतज्ज्ञानाभ्यामसंसृष्टगवादिविषयो यथेत्यर्थः । दार्ष्टान्तिकमाह—**एवमिति** । आदिपदेन क्रियाग्रहः । (995-996)

कल्पितस्य धीसाधनत्वसिद्धये 'यथा ह' इत्यादिवाक्यं व्याख्याय आत्मनोऽ[5]सङ्गत्वसिद्ध्यर्थमपि व्याख्यातुं चोदयथि—**प्रमाणेति** । जाग्रत्स्वप्नयोरद्वैता-

---

1. **कल्पितस्य**—श्रुत्याचार्यादिः ।
* **गवादिखुरबिम्बो वा**—खुरबिम्बाङ्कितदेशो वेति यावत्
2. **असङ्गसिद्धिः**—असङ्गत्वसिद्धिः ।
3. **फलं**—पदशब्दस्य व्याख्यानान्तरफलम् ।
4. **खुरतज्ज्ञानाभ्यामिति** उपायभूतेत्यादिः ।
5. **असङ्गत्वसिद्ध्यर्थं**—सामान्यतोऽसङ्गत्वसिद्ध्यर्थम् ।
* **तदभावेऽपि**—स्वापेऽपि ।

न हि वस्त्वात्मनैवात्ममोहाद्युच्छित्तये क्वचित् ।
प्रमाणनिरपेक्षं सद्वस्त्वलं स्वप्रसिद्धये ॥ (998)

संसारानवतारः स्यात् मानवैफल्यमेव च ।
इत्येतस्येह चोद्यस्य परिहाराय चोत्तरम् ॥ (999)

यथा गवात्मना साक्षात् गां विन्देद्गोपदानुगः ।
* प्रत्यक्चैतन्यसृत्यैवं विन्देत्तत्परमं पदम् ॥ (1000)

प्रत्यक्तया यदाभाति ह्यागमापायिसाक्षितः ।
देहेन्द्रियमनोधीषु चैतन्याभासरूपकम् ॥ (1001)

जडेष्वेकमनेकेषु कूटस्थं क्षणभङ्गिषु ।
अनात्मसु तथा चात्मा संहतेष्वप्यसंहतः ॥ (1002)

सिद्धिः, द्वैतान्वयात्, स्वापेऽविद्यान्वयात्तदसिद्धिरिति मोक्षानुपपत्तिरित्यर्थः । [997] बोधरूपत्वादात्मा स्वाविद्यातत्कार्यं निवर्तयेत्, अत्राह—**न हीति** । शुक्तिकादि वस्तु स्वरूपेणैव अविद्यादि न निवर्तयतीति दृष्टत्वात् आत्मवस्त्वपि वस्तुत्वात् [1]तथेत्यर्थः । (998) स्वरूपबोधस्याव[2]बोधकत्वे दोषान्तरमाह—**संसारेति** । चोद्योत्तरत्वेन [3]वाक्यमवतारयति—**इत्येतस्येति** । (999) परिहारं स्पष्टयितुं वाक्यं व्याचष्टे—**यथेति** । गवादिखुराङ्कितं देशं दृष्ट्वा गतः गामन्विष्यमाणां प्रत्यक्षेणोपलभते यथा, तथा प्रत्यक्चैतन्यसृत्या—वाक्योत्थबुद्धिवृत्त्या, द्वैतावस्थायामेव अद्वैतबोधेन अखण्डाकारं परमं पदं जानातीत्यर्थः । (1000) पदार्थधीकार्यत्वाद्वाक्यार्थधियः त्वंपदार्थं विविच्य दर्शयति—**प्रत्यक्तयेति** । देहेन्द्रियमनोधीषु प्रत्यक्तया यदाभाति तत् पदमिति संबन्धः । साक्षित्वद्वारमाह—**चैतन्येति** । (1001) [4]तेषां दृश्यत्वे हेतुमाह—**जडेष्विति** । अजडमिति भिन्नत्वात् घटादि-

---

1. **तथा**—स्वरूपेण अविद्यादि न निवर्तयति ।
2. **अवबोधकत्वे**—अज्ञाननिवर्तकत्वे इति यावत् ।
3. **वाक्यं**—‘ यथा ह ’ इति वाक्यम् ।
* **प्रत्यक्चैतन्यसृत्या** इत्यस्य, प्रत्यक्चैतन्यस्य—त्वमर्थस्य सृत्या—शोधनया, इत्यर्थं वर्णयति **शास्त्रप्रकाशिका** ।
4. **तेषां**—देहादीनाम् ।

तस्यावाक्यार्थरूपस्य पदमेतत्प्रचक्षते ।
पद्यतेऽनेन तद्यस्मात्तेनेदं पदमुच्यते ॥ (1003)

* स्वमहिम्नैव चेत् सिद्ध्येदुपायः परमार्थवत् ।
स्वतः सिद्धेर्न मिथ्यात्वं तस्य स्यात्परमार्थवत् ॥ (1004)

परमार्थादभिन्नश्चेन्नितरामममृषात्मता ।
इत्यादि पूर्वमुक्तं यदनुसन्धेयमत्र तत् ॥ (1005)

न सामान्यं विशेषो वा यथैकात्म्येऽवगम्यते ।
उक्तमप्युत्तरत्रैतदसन्तोषात्प्रवक्ष्यते ॥ (1006)

वदसाक्षित्वम्, अत्राह—**एकमिति** । साक्षित्वादेवाविकारित्वम्, इत्याह—**कूटस्थमिति** । देहादेः क्षणभङ्गित्वेन तदभेदादात्मनोऽपि तथात्वम्, अत्राह—**अनात्मस्विति** । देहपरिमाणस्यात्मनः सावयवत्वान्नाखण्डत्वम्, अत्राह—**संहतेष्विति** । (1002) अवगतत्वंपदार्थः ब्रह्मात्मैकत्वस्य पदम्, इत्याह—**तस्येति** । (1003) पूर्वं मिथ्याभूतस्यैवाचार्यादेः उपायत्वमुक्तम् । ननु उपायो मिथ्याभूतोऽपि स्वतःसिद्धः, उपायत्वात् शुद्धत्वंपदार्थवत् । अतो [1]न तत्साक्षित्वमात्मनः, अत्राह—**स्वमहिम्नेति** । (1004) प्रत्यक्चैतन्यादभिन्नोऽसौ, भिन्नः, भिन्नाभिन्नो वा । आद्यं प्रत्याह—**परमार्थादिति** । भेदेन भेदाभेदेन चासंभवः **अव्याकृतविचारादा(यु)[वु]क्तोऽनुसन्धेयः**, इत्याह—**इत्यादीति** । (1005) ब्रह्मणः सामान्यविशेषात्मकत्वात् कथं जगतः कल्पितत्वम्, अत्राह—**नेति** । असन्तोषात्

---

1. **न तत्साक्षित्वं**— न उपायभूतश्रुत्याचार्यादिसाक्षित्वम् ।

* "प्रत्यक्चितः ब्रह्मधीहेतोः याथार्थ्यवत् आचार्यादेरपि तद्धीहेतोः तद्भावात् न तन्मिथ्यात्वं युक्तमित्याशङ्क्य, आचार्यादि स्वतः, अन्यतो वा सिद्ध्यतीति विकल्प्य, आद्यमनुवदति -**स्वमहिम्नेति**। सदा स्वतः सिद्धेः स चैतन्यवत् न जडः स्यादिति दूषयति—**परमार्थवदिति** । परतःसिद्धौ तस्य मिथ्यात्वं स्यात् आध्यासिकसंबन्धादृते दृशा तदसिद्धेः इति द्वितीयं प्रत्याह—**मिथ्यात्वमिति** । स्वरूपेणोपायस्य त्वया सत्यत्वेनेष्टेः तदभिन्नत्वोपगमाच्चेत्यतिशयः, तन्मृषार्थाभावात् वस्त्वन्तराभावाच्च तदद्वयमिति भावः । न द्वितीयः, भेदस्याप्रामाणिकत्वात् । न च कुर्वतः अकुर्वतश्चोपायत्वम् । अतः सर्वस्योपायस्य अद्वये चिदात्मनि कल्पितत्वं अव्याकृतविचारादावुक्तमत्रोपायासत्यत्वे हेतुत्वेन ज्ञेयमित्याह-**इत्यादीति** ।" इति **शास्त्रप्रकाशिका** ।

प्रत्यगात्मनि विज्ञाते नाज्ञातमवशिष्यते ।
अनेन ह्येतदित्युक्त्या तत्पूर्वमुपवर्णितम् ।। (1007)

निःशेषपुरुषार्थाप्तिर्दुःखहानिस्तु तत्फलम् ।
यथा ह्येत्युच्यते श्रुत्या साधनाभिन्नमात्मनः ।। (1008)

* ननु प्रतीचि विदिते तदन्यद्विदितं भवेत् ।
ज्ञानार्थे प्रकृते कस्माल्लाभार्थेनोपसंहृतिः ।। (1009)

ज्ञानलाभार्थयोर्यस्मादेकार्थत्वं विवक्षितम् ।
अविद्याध्वंसमात्रत्वात्तेनास्त्वत्राविरुद्धता ।। (1010)

सविशेषे ब्रह्मणि श्रुतिन्यायविरोधात् सविशेषत्वं निरस्तमपि 'तदेतत्त्रयम्' (बृ. 3-6-3) इत्यादौ निरसितव्यः इत्यर्थः । (1006)

'यथा ह' इत्यादेरर्थान्तरं वक्तुं 'अनेन ह्येतत्सर्वम्' इत्यत्रोक्तमनुवदति—**प्रत्यगिति** । (1007) उक्तज्ञानफलकथनाय इदं वचनम्, इत्याह—**निःशेषेति** । तस्य–ज्ञानस्य फलं साधनाभिन्नं, स्वरूपज्ञानस्यैव वाक्योत्थबुद्धिवृत्त्युपेतस्य [1]साधनत्वादित्यर्थः । (1008)

'अनेन ह्येतत्सर्वं वेद' इति ज्ञानार्थेनोपक्रम्य, 'अनुविन्देत्' इति लाभार्थेनोपसंहारोऽनुचितः, इति चोदयति—**नन्विति** । (1009) परिहरति—**ज्ञानेति** । [2]एकार्थत्वे हेतुमाह—**अविद्येति** । हस्तगतविस्मृतहाटकवत् ब्रह्मलाभस्याविद्याकृतत्वात् तज्ज्ञानमेव तल्लाभ इत्यर्थः । अतो नोपक्रमोपसंहारविरोधः,

---

1. **साधनत्वात्**—मुक्तिसाधनत्वात् ।

* "अनेनेत्यत्र 'वेद' इति ज्ञानेनोपक्रम्य, 'अनुविन्देत्' इति लाभमुक्त्वा, पुनर्ज्ञानार्थेन विदिना 'कीर्तिं श्लोकं विन्दते य एवं वेद' इति श्रुतिरुपसंहरति । अतः 'अनुविन्देत्' इति श्रुतेरुपक्रमोपसंहारविरोधः इति शङ्कते—**नन्विति** ।" इति **शास्त्रप्रकाशिका** ।

2. **एकार्थत्वे** इति 'वेद' 'अनुविन्देत्' इत्यनयोरित्यादिः ।

नित्यलब्धैकरूपस्य नालाभोऽज्ञानतोऽन्यतः ।
यथैवं तस्य लाभोऽपि तज्ज्ञानान्नान्यतो भवेत् ॥ (1011)

आत्मता ब्रह्मणो लाभः ब्रह्मताप्यात्मनः फलम् ।
* व्यावर्त्यभेदात्तद्भित्तेरेकं वस्तु द्विरुच्यते ॥ (1012)

ब्रह्मता नात्मनोऽन्यत्र नात्मता ब्रह्मणोऽन्यतः ।
यत एवमतोऽभेदो ज्ञानलाभार्थयोरिह ॥ (1013)

लब्धृलब्धव्ययोर्भेदो यत्राविद्योत्थभूमिषु ।
फलभेदः क्रियाभेदात् तत्र भिन्नार्थता तयोः ॥ (1014)

आप्ताशेषपुमर्थोऽपि प्रत्यग्याथात्म्यमोहतः ।
असर्वज्ञो भवेदात्मा तथानाप्तार्थ एव च ॥ (1015)

तत्रात्मा लब्धाऽविद्वान् स्याल्लब्धव्यं च क्रियाफलम् ।
उत्पत्त्याद्यन्तरायं सत्कारकोपात्तिपूर्वकम् ॥ (1016)

इत्याह—**तेनेति**। (1010) लाभस्य ज्ञानमात्रत्वं दृष्टान्तेनाह—**नित्येति**। (1011) तदुपपादनाय लाभशब्दस्य प्रत्यग्ब्रह्मणोरेकत्वमित्यर्थः, इत्याह—**आत्मेति**। फलं—लाभः। आत्मनो लाभः ब्रह्मतेत्यर्थः। [1]तयोरभेदे कथमपर्यायपदवाच्यत्वम्, अत्राह—**व्यावर्त्येति**। (1012) फलितं निगमयति—**ब्रह्मतेति**। (1013) इहेति विशेषणात् अन्यत्र ज्ञानलाभशब्दयोरर्थभेदोऽङ्गीकृतः। तं दर्शयति—**लब्ध्रिति**। देवदत्तो लब्धा, ग्रामादि लभ्यम्, देवदत्तो ज्ञाता, घटादि ज्ञेयं, यत्र, तत्र ज्ञानलाभार्थक्रिययोर्भेदात् फलयोर्भेद इत्यर्थः। (1014) सुखैकतानचैतन्यस्य न लब्धव्यादि संभवति, इत्यत्राह—**आप्तेति**। (1015) [2]ततश्च लब्धव्यादि संभवति, इत्याह—**तत्रेति**। (1016) तर्हि क्रियानुष्ठानप्राप्त-

---

1. **तयोः**—आत्मब्रह्मणोः ।

* **व्यावर्त्येति** संसारित्वपारोक्ष्यादिव्यावर्त्यभेदात् विशिष्टभेदेऽपि वस्तुतः एकमेव वस्तु द्विवारं व्यपदिश्यते । व्यावर्त्यभेदेन विशिष्टवाच्यार्थभेदात् न पुनरुक्तिरित्यर्थः ।

2. **ततश्च**—मोहतः असर्वज्ञत्वात् अनाप्तपुरुषार्थत्वाच्च ।

तादृग्लब्धोऽप्यलब्धः स्यादविद्यामात्रहेतुतः ।
आद्यन्तयोरभावाच्च स्वप्नपुत्रादिलाभवत् ॥ (1017)

विपरीतस्वभावोऽत आत्मलाभः स्वतः सदा ।
अज्ञानहेतोरन्यादृक् स च ज्ञानान्निवर्तते ॥ (1018)

* आरभ्य सर्वं वेदेति ज्ञानार्थेनोपसंहृतिम् ।
अतोऽनुविन्देदित्याह लाभार्थेनैव तत्फले ॥ (1019)

अप्रख्यातो यथैवात्मा व्याकृते ख्यातिमेयिवान् ।
एवं तदवबोधान्ना ख्यातिमेत्यविनश्वरीम् ॥ (1020)

संहतिश्चक्षुरादीनां श्लोकशब्देन भण्यते ।
यथात्मा संहतिं प्रापत् व्याकृतः करणादिभिः ॥ (1021)

एवं विद्वानवाप्नोति पुत्रामात्यादिसंहतिम् ।
उक्तज्ञानप्रवृत्त्यर्थमर्थवादोऽयमिष्यते ॥ (1022)

स्वर्गादेरेव पुरुषरागगोचरत्वात् न कश्चित् मोक्षायोत्तिष्ठेत्, अत्राह—**तादृगिति** । (1017) तर्हि आत्म(ना)[नो]लाभोऽपि लाभत्वान्मिथ्या, इत्यत्राह—**विपरीतेति** । अतः—अनात्मलाभादिति यावत् । स्वाभाविकत्वे श्रवणाद्यनुष्ठानवैयर्थ्यम्, अत्राह—**अज्ञानेति** । (1018) सिद्धमर्थं निगमयति—**आरभ्येति** । (1019)

'एवं कीर्तिं श्लोकं विन्दते' इति वाक्यार्थनिरूपणम्

कीर्तिशब्दार्थमाह—**अप्रख्यात इति** । (1020) '**श्लोकं विन्दते**' इत्येतत् व्याचष्टे—**संहतिरिति** । मुमुक्षोरनिष्टत्वात् [1]कथमेतत् ज्ञानफलं स्यात्,

---

* "अविरोधमुपसंहरति—**आरभ्येति** यतो दर्शितनीत्या ज्ञानलाभयोरैक्यम्, अतः 'अनेन हि' इति ज्ञानार्थेन विदिना आरभ्य, 'अनुविन्देत्' इति लाभार्थेन विदिना मध्ये लाभमुक्त्वा, भूयो ज्ञानफले वाच्ये ज्ञानार्थेनैव विदिशब्देनोपसंहृतिमाह श्रुतिरिति योजना ।" इति **शास्त्रप्रकाशिका** ।

1. **कथमेतत् ज्ञानफलमिति** ख्यातिपुत्रामात्यादिसंगत्यादिकं ज्ञानफलं न संभवति मुमुक्षोरनिष्टत्वादित्यर्थः ।

निरेषणानां नेदग्धि संसारं प्रजिहासताम् ।
फलं युक्तं प्रवृत्त्यङ्गमर्थवादो भवेदतः ।। (1023)

कीर्तिं चैकात्म्यविज्ञानं श्लोकं चैकात्म्यसंगतिम् ।
यथोक्तवस्तुवेद्येतत्फलमाप्नोत्यभीप्सितम् ।। (1024)

अव्याकृतव्याकरणं प्रत्यग्दर्शनसिद्धये ।
तदन्तरायस्तत्सक्तिः तन्निवृत्तौ परा श्रुतिः ।। (1025)

शब्दादिबडिशाकृष्टचेतसः प्रत्यगीक्षणे ।
न सामर्थ्यं यतस्तेभ्यो व्यावृत्त्यर्थं परा श्रुतिः ।। (1026)

हेत्वन्तरोपदेशो वा पदनीयत्व आत्मनः ।
तदेतदिति शास्त्रेण भण्यते तद्बुभुत्सवे ।। (1027)

अत्राह—**उक्तेति** । (1021-1022-1023) इदानीं कीर्तिश्लोकशब्दयोः साक्षादभिमतमर्थमाह—**कीर्तिं चेति** । ज्ञानलाभयोरत्वार्थभेदो नास्ति आत्मब्रह्मणोरभेदादित्येवं विद्वान् आत्मज्ञानं तत्फलं च प्राप्नोतीत्यर्थः । (1024)

अष्टमकण्डिकार्थनिरूपणम्

'तदेतत्प्रेयः' इत्यादिश्रुतितात्पर्यवर्णनम्

[1]'तदेतत्प्रेयः' इत्यादेस्तात्पर्यमाह—**अव्याकृतेति** । सृष्टिसंकीर्तनमात्मज्ञानार्थं कृतम् । सृष्टे च जगति सक्तिः आत्मज्ञानप्रतिबन्धः इति तन्निवृत्त्यर्थमुत्तरं वाक्यमित्यर्थः । (1025) विषयासक्तेः ज्ञानप्रतिबन्धत्वे **हेतुमाह—शब्दादीति** । (1026) [2]तात्पर्यान्तरमाह—**हेत्वन्तरेति** । आत्मनः पदनीयत्वे तस्यैवाज्ञातत्वं हेतुरुक्तः । तत्रैव प्रियत्वाख्यो हेतुरनेनोच्यते इत्यर्थः । (1027)

---

1. **तदेतत्प्रेय इति** "तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मात् अन्तरतरं यदयमात्मा ।" इतिश्रुतिरनुसन्धेया ।

2. **तात्पर्यान्तरमिति** 'तदेतत्' इत्युत्तरवाक्यस्येत्यादिः ।

सांख्यमुक्तिनिवृत्त्यर्थमथवास्तूत्तरा श्रुतिः ।
प्रेयोगिराऽऽत्मनो यस्मान्निष्ठाऽऽनन्दस्य भण्यते ॥ (1028)

पुत्रात्प्रेय इदं तत्त्वं वित्तात्प्रियतरं तथा ।
पुत्रो वित्तं च लोकेऽपि प्रसिद्धं प्रियरूपतः ॥ (1029)

ईयसुंस्तमबर्थे स्यात्पुत्रादीनां बहुत्वतः ।
छान्दसत्वात्, प्रियतमस्तथाऽऽत्मा संभवत्यपि ॥ (1030)

वित्तात्पुत्रः प्रियः पुत्रात् पिण्डः पिण्डात्तथेन्द्रियम् ।
इन्द्रियेभ्यः प्रियः प्राणः आत्मा प्रियतमस्ततः ॥ (1031)

आत्मनोऽसुखरूपत्वादविवेकनिबन्धनबन्धध्वस्तिमात्रं मुक्तिरिति मतनिरासाय (स्व)[वे]दं वाक्यम्, इत्याह—सांख्येति । (1028)

निरुक्तश्रुत्यर्थवर्णनम्

तात्पर्यमुक्त्वा पदशो विभजते—पुत्रा(दी)[दि]ति । आत्मनः प्रियतरत्वार्थं पुत्रादेः प्रियत्वमाह—पुत्र इति । प्रियरूपतः—प्रियरूपत्वेनेत्यर्थः । (1029)

प्रत्यगात्मनः प्रियतमत्वोपपादनम्

[1]प्रत्ययार्थं दर्शयति—ईयसुनिति । बहूनामेकस्यातिशयप्रतीतौ तमपो विधानात् अत्रापि [2]तत्प्रतीतेः, इति हेतुमाह—पुत्रादीनामिति । 'द्विवचनविभज्योपपदे तरबीयसुनौ' (पा. 5-3-57) इति तरपा समानार्थस्येयसुनः कथं [3]तमबर्थत्वम्, अत्राह—छान्दसत्वादिति । 'व्यत्ययो बहुलम्' (पा. 3-1-85) इति न्यायसिद्धमित्यर्थः । तरबर्थत्वमेव किं न भवेत्, अत्राह—प्रियतम इति । (1030) [4]संभवं प्रकटयति—वित्तादिति । (1031) वित्तशब्दस्यार्थमाह—

---

1. प्रत्ययार्थं—ईयसुन्प्रत्ययार्थम् ।
2. तत्प्रतीतेः—तस्य—पुत्रादिभ्यो बहुभ्यः अतिशयस्य तमबर्थस्य प्रतीतेः ।
3. तमबर्थत्वं—तमपा समानार्थत्वमिति यावत् । एवमेव तरबर्थत्वमित्यत्रापि ।
4. संभवं—आत्मनः प्रियतमत्वसंभवम् ।

वित्तं द्विविधमप्यत्र वित्तशब्देन गृह्यते ।
देवलोकः फलं यस्माद्दैवस्यापि न तत्पदम् ॥ (1032)

प्रीतिसाधनहेतुत्वात् प्राणादौ प्रीतिरिष्यते ।
बन्धकीप्रीतिवन्मुख्या नैवानात्मसु युज्यते ॥ (1033)

व्याध्याद्युपप्लुतो यस्माद्वक्ति निर्विण्णमानसः ।
अद्यैव मरणं श्रेयो मम दुःखार्दितात्मनः ॥ (1034)

प्रतीचि निर्निमित्तैव सर्वावस्थास्वपीष्यते ।
प्रीतिरग्न्युष्णवत्तस्मादात्मा प्रेयाननात्मनः ॥ (1035)

त्रैगुण्यात्सर्वभावानां मोहदुःखसुखात्मता ।
स्वत एव त्वनध्यस्ता ह्येवं केचित् प्रचक्षते ॥ (1036)

वित्तमिति । मानुषं—कर्मसाधनं गोहिरण्यादि, दैवं—[1]उपासनाज्ञानमिति द्विप्रकारमित्यर्थः । दैवं वित्तं मुक्तिफलत्वात् नात्र ग्राह्यम्, अत्राह—**दैवेति** । 'विद्यया देवलोकः' (बृ. 3-5-16) इति श्रुतेरित्यर्थः । (1032) आत्मानात्मनोः [2]प्रीतिभावात् आत्मनः कथमतिशयः, अत्राह—**प्रीतिसाधनहेतुत्वादिति** । प्रीतिसाधनत्वात् हेतोरित्यर्थः । सुखसाधनत्वेन प्रियत्वे दृष्टान्तमाह—**बन्धकीति** । वेश्याप्रीतिवदित्यर्थः । (1033) [3]अमुख्यत्वे लिङ्गमाह—**व्याधीति** । (1034) आत्मापि सुखहेतुत्वात् प्रियः, न सुखत्वात्, इत्यत्राह—**प्रतीचीति** । (1035) आत्मनो निर्गुणस्य स्वतो दुःखात्मत्वं सुखात्मत्वं वा नास्ति । गुणत्रयात्मकानां बाह्यपदार्थानामेव [4]तत् स्वाभाविकम्, इति सांख्यमतमनुवदति—**त्रैगुण्यादिति** । (1036) भा(वना)[वानां]मोहाद्यात्मत्वं दूषयति—**तत्त्विति** । केवल-

---

1. **उपासनाज्ञानमिति** उपासनात्मकं ज्ञानं, नतु ऐकात्म्यज्ञानमित्यर्थः ।
2. **प्रीतिभावात्**—प्रीतिभावाविशेषादिति यावत् ।
3. **अमुख्यत्वे इति** प्राणादौ प्रीतेरित्यादिः ।
4. **तत्**—सुखाद्यात्मत्वम्

तत्तु नैवं यतः सत्त्वं मोहादित्रयकृद्धियः ।
भानूदयं प्रपश्यामः चोरद्रोगिदिग्दृशाम् ॥ (1037)

समं त्रयं त्रिषु भवेत् त्रैगुण्यं चेद्भवौ मतम् ।
गुणान्तराधिकारोऽपि न च भानूदये मतः ॥ (1038)

प्रमाणैर्गृह्यते प्रीतिर्व्यभिचारिण्यनात्मसु ।
रज्ज्वां सर्पादिवन्नैवं प्रत्यगात्मनि सेक्ष्यते ॥ (1039)

आत्मैव प्रिय इत्यत्र हेतुः स्पष्टोऽभिधीयते ।
श्रुत्यान्तरतरोक्त्येह तद्धेतुश्चात्मतोच्यते ॥ (1040)

यथान्तरतमः प्रत्यक् तथोदर्के प्रवक्ष्यते ।
वाचक्नव्यक्षरान्तेन ग्रन्थेन प्रत्यगात्मनः ॥ (1041)

सत्त्वात्मको भास्करोदयः चोरस्य मोहकरः, दृग्रोगिणो दुःखकरः, दिग्दृशः सुखकरो दृश्यते । तस्मात् दुःखादीनां रजआदिगुणकार्यत्वमयुक्तमित्यर्थः । (1037) [1]सोऽपि गुणत्रयात्मकः अनात्मत्वात् संमतवत्, अत्राह—**समर्मिति** । एवमुपगमे [2]सिद्धान्तविरोधः, इत्याह—**गुणेति** । 'सत्त्वं लघु प्रकाशकम्' इत्यङ्गीकारात् तस्य प्रकाशैकरसस्य सत्त्वैकरसत्वादित्यर्थः । (1038) एवं [3]परदर्शनमुपसंहरति—**प्रमाणैरिति** । (1039) प्रियतरत्वे अन्तरतरत्वं हेतुः श्रुत्योच्यते, इत्याह—**आत्मैवेति** । अन्तरतरत्वसाधनायोत्त[4]रवाक्यम्, इत्याह—**तद्धेतु(रिथ)[श्चे]ति** । (1040) न केवल (मा)[मत्रैवा]त्मनोऽन्तरतरत्वमुच्यते, किन्तु [5]उत्तरत्रापीति तात्पर्यलिङ्गमभ्यासमाह—**यथेति** । (1041) अन्तरतमत्वे

---

1. **सोऽपि**—भास्करोदयोऽपि ।
2. **सिद्धान्तविरोधः**—सांख्यस्य स्वसिद्धान्तविरोधः ।
3. **परदर्शनं**—सांख्यदर्शनम् ।
4. **उत्तरवाक्यं**—'यदयमात्मा' इति वाक्यम् ।
5. **उत्तरत्रापि**—पञ्चमाध्यायेऽपि ।

प्रत्यक्तान्यानपेक्षा हि तदन्यत्तदपेक्षया ।
यतोऽन्तरतमः प्रत्यक् तस्मादेवात्रगम्यते ॥ (1042)

यस्य त्वष्टास्ववस्थासु प्रत्यक्त्वं सममिष्यते ।
तस्यान्तरतम इति दुर्घटं वचनं भवेत् ॥ (1043)

अन्यूनाधिकरूपासु त्वष्टावस्थास्विहात्मनः ।
कं विशेषं समाश्रित्य ह्यात्माऽऽन्तरतमो मतः ॥ (1044)

* भाक्तैवानात्मसु प्रीतिर्यस्मात्तस्मादनात्मनः ।
व्युत्थाप्य निखिलां प्रीतिं प्रतीच्येव निवेशयेत् ॥ (1045)

एवं व्यवस्थितौ सत्यां युक्तिलेशोऽभिधीयते ।
पुत्रादि प्रियमात्मेति द्वयोर्विवदमानयोः ॥ (1046)

हेत्वन्तरमाह — प्रत्यक्तेति । आत्मत्वस्यानन्यापेक्षत्वात् अनात्मनस्तु आत्मापेक्षत्वात् आत्मा अन्तरतम इत्यर्थः । (1042)

एवं स्वमते तरतमवचनमुपपाद्य भर्तृप्रपञ्चमते तदनुपपत्तिमाह— यस्येति । [1]अव्याकृतान्तर्यामिसूत्रविरा(ड्जि)[ड्]देहेन्द्रियान्तःकरणविषयाख्यावस्थानां बाह्यान्तरभावो नास्ति । यथा घटशरावादीनां मृद्विकाराणां मृदेव तत्त्वं, तथा अवस्थानामात्मैव तत्त्वमिति मते अन्तरतमत्वमात्मनोऽयुक्तमित्यर्थः । (1043) न प्रतिज्ञामात्रेण पराभ्युपगमभङ्गः । अन्यथा त्वदभ्युपगमस्यापि भङ्गप्रसङ्गात्, अत्राह—अन्यूनेति । तस्मादनात्मनां बाह्यान्तरभावो वाच्य इति भावः । (1044) एवं परमतं निरस्य स्वमतं निगमयति—भाक्तेवेति । (1045)

' स योऽन्यमात्मनः प्रियम् ' इत्यादिश्रुतिवाक्यार्थवर्णनम्

आत्मनः प्रियत्वे अनात्मनोऽप्रियत्वे च स्थिते, तत्रैव हेतुरुत्तरवाक्येनोच्यते, इत्याह—एवमिति । [2]' स योऽन्यम् ' इत्यादि वाक्यं व्याकुरुते—

---

1. अव्याकृतान्तर्यामीत्यादि पिण्डः, जातिः, विराट्, सूत्रं, दैवं, अव्याकृतं, अन्तर्यामी, साक्षी, इत्यष्टावस्था निरूपयति शास्त्रप्रकाशिका ।

* भाक्तैव—अमुख्यैव ।

2. स योऽन्यमित्यादि ' स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात् ' इति वाक्यम् ।

आत्मनोऽन्यत्प्रियमिति यो ब्रूते मोहसंप्लुतः ।
ब्रुवाणं तं प्रति ब्रूयादिति श्रुत्यनुशासनम् ॥ (1047)

यस्ते प्रियतयाऽभीष्टः सोऽचिराद्दुःखकृद्भवेत् ।
यतो नङ्क्ष्यति स क्षिप्रं नश्यंश्चासुखकृत् प्रियः ॥ (1048)

यथोक्तस्याविसंवादं तत्तथैवेति च श्रुतिः ।
आत्मैव प्रिय इत्येवं प्रतिज्ञां प्रत्यभाषत ॥ (1049)

यस्मादेवमतो हित्वा प्राणादीनप्रियात्मनः ।
* सर्वान्तरतमात्मानमुपासीत प्रियं सदा ॥ (1050)

स य आत्मानमित्युक्त्या प्राप्तदोषनिराक्रिया ।
प्रमायुकत्वं मर्त्यत्वात्प्राणादेर्न तु वार्यते ॥ (1051)

पुत्रादीति । (1046-1047)[1] 'प्रियं रोत्स्यति' इत्यादिप्रतिवादिवाक्यार्थमाह—**यस्त इति** । (1048) 'तथैव स्यात्' इत्येत(म)[द]र्थमाह—**यथोक्तस्येति** । आत्मैव प्रियतमः इति प्रतिज्ञामुद्दिश्य 'तथैव स्यात्' इति श्रुतिः प्रतिवाद्युक्तार्थस्य संवादमाह इत्यन्वयः । (1049) 'आत्मानमेव प्रियमुपासीत' इत्येतत् व्याकरोति —**यस्मादिति** । [1050] 'स यः' इत्यादिफलवचनतात्पर्यमाह—**स य इति** । आत्मसुखस्यापि सुखत्वात् इतरसुखवत् प्रासनाशनिवृत्त्यर्थमिदं वाक्यमित्यर्थः । प्राणादिप्रियमुपासीनस्य विद्यामाहात्म्यात् न [2]नश्यति इत्येवंपरमिदं[3] कस्मान्न स्यात्, अत्राह—**प्रमायुकत्वमिति** । मूर्तस्य [4]मर्त्यत्वादित्यर्थः । (1051)

---

1. "प्रियं रोत्स्यतीति, ईश्वरो ह वा तथैव स्यात् । आत्मानमेव प्रियमुपासीत, स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ।" इति श्रुतिरनुसन्धेया ।

* **सर्वान्तरतमात्मानमिति** सर्वान्तरतमश्चासावात्मा च तमित्यर्थः ।

2. **न नश्यतीति** प्राणादिप्रियमित्यध्याहारः कार्यः ।

3. **इदं**—'न हास्य प्रमायुकं भवति' इति वाक्यम् ।

4. **मर्त्यत्वात्**—विनाशित्वात् ।

* व्यावृत्तसर्वबाह्यार्थप्रीतेस्तन्मुक्तिकामिनः ।
न ह्यस्येति गिरा नातो मुमुक्षोः फलकीर्तनम् ॥ (1052)

आविरिश्चाद्विरक्तश्चेत् कुम्भीपाकादिवेह यः ।
* आप्ताशेषक्रियाकार्यो मुक्तौ स विनियुज्यते ॥ (1053)

परीक्ष्य लोकानित्यादि तथा नैगमिकं वचः ।
त्यज धर्ममधर्मं चेत्येवमादिस्मृतेरपि ॥ (1054)

आत्माविद्यापनुत्त्यर्थं प्रारब्धोपनिषत् परा ।
आत्मेत्युपक्रमं यच्च तत्सूत्रं प्रागुदाहृतम् ॥ (1055)

अधिकारिस्वरूपपर्यालोचनयापि धीफलत्वेन प्राणादेरविनाशो नोच्यते, इत्याह—**व्यावृत्तेति** । अतो मुमुक्षोः—संसारात् मोक्तुमिच्छत इत्यर्थः । (1052) मुमुक्षोरपि मुक्तिसंनिकृष्टहिरण्यगर्भप्रेप्सोपपत्तेः तदनाशकीर्तनं युक्तम्, अत्राह—**आविरिश्चादिति** । चेदिति वैराग्यदौर्लभ्यं प्रकटयति । [1053] अत्र[1] प्रमाणमाह—**परीक्ष्येति** । स्मृतेरपि (मो. ध. 167-40) वच इति संबन्धः । (1054)

नवमकण्डिकार्थनिरूपणम्

'तदाहुर्यद् ब्रह्मविद्यया' इत्यादेः पूर्वेण संगतिप्रदर्शनम्

वृत्तवर्तनीययोः संगतिप्रतिपादनाय वृत्तमनुद्रवति—**आत्मेति** । 'उषा वा अश्वस्य' इत्या (दाविस्यर्था)[द्या उ]पनिषदारब्धा । परविषयत्वात् परेत्यर्थः । विद्यायाः सूत्रं 'आत्मेत्येवोपासीत' इति वाक्यम्, इत्याह—**आत्मेति** । (1055) [अव्याकृतवाक्योक्तमनुवदति—**तद्धेदमिति** ।] 'तद्धेदं तर्ह्यव्याकृतम्'

---

* "व्यावृत्तेति बाह्यप्रीतिनिबन्धनो बन्धः तच्छब्दार्थः । प्राणादेरनात्मनो नाशस्यावश्यंभावित्वमतःशब्दार्थः । विरक्तस्य संसारं जिहासतः मुमुक्षोर्ज्ञानिनः ज्ञानफलं प्राणाद्यनाशित्वं नानेनोच्यते । न हि नाशिनः अनाशित्वोक्तिः विद्याफलं, मिथ्याज्ञानमूलत्वादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

* **अशेषक्रियाकार्यं** चित्तशुद्धिः । तामापन्न इत्यर्थः ।

1. **अत्र प्रमाणं**—विरक्तस्य मुक्त्यधिकारित्वे प्रमाणम् ।

तद्धेदमित्यनेनास्याः प्रमेयोऽर्थो निरूपितः ।
अकृत्स्नवचसा तद्वत्प्रमाभासोऽप्यपोदितः ॥ (1056)

आत्मैवैकोऽत्र द्रष्टव्यः कृत्स्नत्वान्नात्मनोऽपरः ।
अकृत्स्न एव तावत्स्यात् तदन्यो यावदीक्ष्यते ॥ (1057)

कोऽहं कस्य कुतो वेति कः कथं वा भवेदिति ।
प्रयोजकमतेरेष विध्यर्थोऽत्रावगम्यते ॥ (1058)

उत्पत्तिस्थितिविध्वंसाः कार्याणां स्युः कुतो न्विति ।
अन्वयव्यतिरेकाख्यो व्यापारोऽत्र विधीयते ॥ (1059)

इत्यत्र आत्मैवानवगतो मेयो निरूपित इत्यर्थः । 'अकृत्स्नो हि' इत्यादावुक्तमनुवदति—अकृत्स्नेति । जडस्य मेयत्वं अकृत्स्नवाक्येन निरस्तमित्यर्थः । [1056] 'आत्मेत्येवोपासीत' इति वाक्यमबुद्धबोधकमेव, नाप्रवृत्तप्रवर्तकं विधि[1]त्रयासंभवात् इत्युक्तम् । तदयुक्तम्, वा(क्यस्थ) [क्यार्थ] प्रत्य(य)[या] संभवात्, इत्याशङ्कामुपेत्यापि विद्यासाधने विधिं वक्तुं विद्यामनुवदति—आत्मेति । (1057) संप्रति अन्वय[2]व्यतिरेकाख्यव्यापारे विधिमाह—कोऽहमिति । देहादिषु चेतनत्वेन लोकवादिगृहीतेषु मध्ये अहं कः, देहादेरेवैकस्य, मिलितस्य, ततोऽन्यस्य वा कस्याहं, कुतः भूतपञ्चकात्, अन्यस्माद्वा अहमागतः, यदि देहादिद्रष्टा अहं ततोऽन्यः, तर्हि कः—संसार्येव, असंसारी परो वा, अहं कथं वा-स्वतन्त्र एव वा, अविद्याकामकर्मपरतन्त्रो वा (नाये) [इ]ति प्रयोजकमतेः—विचारप्रवर्तकबुद्धि युक्तस्येत्यर्थः । (1058) मुमुक्षोः [3]त्वंपदार्थः शोधनीयः इत्युक्तम् । तर्हि तावतैव वाक्यार्थधीसिद्धेः तत्पदार्थज्ञानवैयर्थ्यम्, अत्राह—उत्पत्तीति । (1059) धीसाधनत्वेन अन्वयव्यतिरेक-

---

1. विधित्रयासंभवात्—अपूर्वादिविधित्रयासंभवात् ।
2. अन्वयव्यतिरेकाख्यव्यापारे—त्वंपदार्थशोधनात्मके तर्के ।
3. त्वंपदार्थं इति 'तत्त्वमसि' इति महावाक्यघटकतत्त्वंपदयोरर्थौ तत्पदार्थः, त्वंपदार्थः इति च व्यवह्रियेते इति बोध्यम् ।

तपसा तत्परं ब्रह्म विद्धीति वचनादतः ।
अन्वयव्यतिरेकाख्यो व्यापारोऽत्र तपो मतम् ॥ (1060)

यतो वा इत्यतो वाक्यात् न तदन्यत्तपो भवेत् ।
लक्षणोक्तेर्य आत्मेति सोऽन्वेष्टव्य इति श्रुतेः ॥ (1061)

त्यक्ताप्रियपरागर्थो ह्यमानित्वादिसाधनः ।
प्रियात्मानमुपासीत शक्रवद्ब्रह्मचर्यवान् ॥ (1062)

व्यापारः श्रुत्यन्तरेऽपि विहितः, इत्याह—**तपसेति**। 'तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति' (तै॰ 3-2) इति वचनात् धीसाधनत्वेन [1]प्रसिद्धं तपो विधीयते, अत्राह—**अन्वयेति**। (1060) कुत एतत्, अत्राह—**यत इति** । 'यतो वा इमानि भूतानि जायन्ते' (तै॰ 3-1) इतीरितब्रह्मलक्षणज्ञानाय तपोविधानात् अन्वयव्यतिरेका (ह्च्य)[ख्य] [2]व्यापार एव तप इत्यर्थः। 'य आत्माऽपहतपाप्मा' इत्युपक्रम्य, 'सोऽन्वेष्टव्यः' (छा॰ 8-7-1) इति वाक्याच्च अन्वयादिव्यापारः धीहेतुत्वेन विधेयः, इत्याह—**य इति**। (1061) प्रसङ्गात् [3]उदाहृतप्रजापतिवाक्यतात्पर्यमाह—**त्यक्तेति**। 'एकशतं ह वै वर्षाणि' (छा. 8-11-3) इति श्रुतेः ब्रह्मचर्यवानिन्द्रः यथा अन्वयव्यतिरेकाभ्यामप्रियमसुखरूपमनात्मानं हित्वा सुखरूपमात्मानमनुसंहितवान्, तथा अन्योऽपि 'अमानित्वमदम्भित्वम्' (भ॰ गी. 13-7) इत्यादिशास्त्रीयसाधनविशिष्टः अन्वयादिना आत्मानं जानीयादित्यर्थः। (1062) एवम[4]नुवाददशायां प्रसङ्गात् अन्वया[5]देर्विधेयत्वमुक्त्वा, यदर्थोऽनुवादः,

---

1. **प्रसिद्धं तपः**—कृच्छ्रचान्द्रायणादिकम्।
2. **व्यापार एवेति** कृच्छ्रादेः तपसः ब्रह्मलक्षणज्ञानसाधनत्वाभावादिति भावः।
3. **उदाहृतप्रजापतिवाक्यतात्पर्येति** 'इति प्रजापतिरुवाच' इति छान्दोग्ये उदाहृतस्य 'य आत्माऽपहतपाप्मा' इत्यादिकस्य 'सोऽन्वेष्टव्यः' इति वाक्यस्य तात्पर्यमित्यर्थः।
4. **अनुवाददशायां**—पूर्ववृत्तानुवाददशायाम्।
5. **अन्वयादेः**—अन्वयव्यतिरेकाख्यस्य शोधनरूपव्यापारस्य।

आत्मेत्यनेन वाक्येन ब्रह्मविद्योपसूत्रिता ।
यदर्थोपनिषत्कृत्स्ना वृत्तिस्तस्या भविष्यति ॥ (1063)

आत्मेत्येकमिदं सूत्रं कण्डिकाद्वयमेव वा ।
अध्यायो वा समस्तोऽयमध्यायद्वयमेव वा ॥ (1064)

अव्याकृतव्याकरणप्रभृतीन्यपरे विदुः ।
पञ्चैव किल सूत्राणि तथापीष्टं न बाध्यते ॥ (1065)

* अव्याकृतं स एषेह तथात्मैवेति चापरः ।
पदनीयं तथा प्रेयः पदार्थाः पञ्च सूत्रिताः ॥ (1066)

तदाह—आत्मेति । आत्मधीहेतुत्वेन तच्छेषतामाह—यदर्थेति । तर्हि सूत्र[1]व्याख्यानादेव समस्तवेदान्तार्थसिद्धेः 'तदाहुः' इत्यादि व्यर्थम्, अत्राह—वृत्तिरिति । सूत्रितब्रह्मविद्यायाः 'तदाहुः' इत्यादिग्रन्थः वृत्तिरूपत्वात् फलवान् भविष्यतीत्यर्थः । (1063) 'आत्मेत्येवोपासीत' इत्येकमेव सूत्रं, उत्तरमस्य विवरणमि[2]त्युक्तम् । इदानीं अव्याकृतकण्डिका 'तदेतत्प्रेयः' इति कण्डिका च सूत्रं, [उत्तर] मेतद्विवरणम् । तृतीयोऽध्यायः समस्तो वा सूत्रं, उत्तरं विवरणम् । अथवा च[3]तुर्थोध्यायश्च सूत्रं, उत्तरं विवरणम्, इति कल्पनामाह—आत्मेत्येकमिति । (1064)

संप्रति भर्तृप्रपञ्चकल्पनां दर्शयति—अव्याकृतेति । अङ्गीकरोति—तथापीति । (1065) [4]तानि सूत्राणि विभजते—अव्याकृतमिति । (1066)

---

1. सूत्रव्याख्यानादेव—'आत्मेत्येवोपासीत' इति विद्यासूत्रभूतवाक्यस्य व्याख्यानादेव ।
2. इत्युक्तमिति इयं कल्पना भाष्यकारोक्ता । कण्डिकाद्वयं सूत्रमित्यादिका तु वार्त्तिककारीया इति बोध्यम् ।
3. चतुर्थोऽध्यायश्चेति चकारेण तृतीयाध्यायस्य संग्रहः ।
4. तानि सूत्राणि—भर्तृप्रपञ्चाभिमतानि पञ्च सूत्राणि ।

* अव्याकृतमिति अज्ञातमात्मतत्त्वं जगतो निदानं, तदेव सृष्टे जगति प्रविष्टं, तदेव चानात्मनो हित्वा ज्ञातव्यं, तस्यैवाज्ञातत्वेन पदनीयत्वं, तदेव च प्रियतममिति पदार्थपञ्चकमत्र सूत्रितमित्यर्थः ।

यथोक्तानां च सूत्राणामा शास्त्रस्य समापनात् ।
वृत्तिः स्यादुत्तरो ग्रन्थस्तत्र तेषां समन्वयात् ॥ (1067)

व्याचिख्यासुरथेदानीं सूत्रार्थान् श्रुतिरञ्जसा ।
प्रयोजनाभिधित्साया उपोद्घाते प्रवर्तते ॥ (1068)

वक्ष्यमाणवचोवस्तु तच्छब्देनाभिधीयते ।
ब्रह्मजिज्ञासवो विप्रा आहुर्यद्गुरुसंनिधौ ॥ (1069)

विज्ञाताशेषवेदान्तसर्वस्वं ब्रह्मणि स्थितम् ।
उपसद्य गुरुं न्यायादाहुः केचिन्मुमुक्षवः ॥ (1070)

एतेषां यथोपन्यस्तानां वृत्तिस्थानीय उत्तरो ग्रन्थ आरभ्यते आ परिसमाप्तेः शास्त्रस्य, इत्याह—**यथोक्तानामिति** । (1067) एवं विभज्य 'त[1]दाहुः' इत्यादेस्तात्पर्यमाह—**व्याचिख्यासुरिति** । सूत्रितज्ञानं व्याख्यातुमिच्छन् वेदः ज्ञानफलकथनार्थं उपोद्घातं—'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते' इत्युक्तलक्षणमाक्षेपं करोतीत्यर्थः । (1068)

पदार्थकथनपूर्वकं 'तदाहुः' इत्यादिवाक्यार्थनिरूपणम्

तात्पर्यमुक्त्वा [2]व्याख्येयवाक्यस्थतत्पदार्थमाह—**वक्ष्यमाणेति** । 'यद्ब्रह्मविद्यया सर्वम्' इत्यादिवाक्यप्रतिपाद्यं वस्तु तच्छब्देन परामृश्यते इत्यर्थः । किं तत् प्रतिपाद्यमिति, तदाह—**ब्रह्मेति** । ब्रह्मज्ञानं सर्वभावसाधनमित्यत्र मुमुक्षवो जिज्ञासवः गुरुसंनिधौ यच्चोद्यमाहुः, तदुत्तरवाक्यप्रतिपाद्यं तदर्थ इत्यर्थः । (1069) गुरुं विशिनष्टि—**विज्ञातेति** । [3]अपरोक्षज्ञानमाह—**ब्रह्मणीति** [4]समित्पाणि-

---

1. **तदाहुरित्यादेरिति** "तदाहुः यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेत्, यस्मात्तत्सर्वमभवदिति" इति श्रुतिः ।
2. **व्याख्येयवाक्यस्थतत्पदार्थमिति** 'तदाहुः' इति श्रुतिगततत्पदस्यार्थमित्यर्थः ।
3. **अपरोक्षज्ञानमिति** गुरोरित्यादिः ।
4. **समित्पाणित्वादिकमिति** शिष्याणामित्यादिः ।

यज्ञाद्याहितसंस्कारा अपास्ताशेषसाधनाः ।
सांसारिकपुमर्थेभ्यो विरक्ताः शुद्धबुद्धयः ॥ (1071)

त्यक्त्वा कर्माणि निःसङ्गाः कर्मणां चरितार्थतः ।
ब्रह्मविद्याप्लवेनेमं संसाराब्धिं तितीर्षवः ॥ (1072)

आविरिञ्चात्पुमर्थानामकृत्स्नत्वादिदोषतः ।
वितृषोऽशेषतद्दोषध्वस्तिश्रेयः परीप्सवः ॥ (1073)

साक्षेपमाहुः श्रेयांसं गुरुं प्राप्य निरेषणाः ।
गुरुद्वारैव विद्येह श्रेयःप्राप्तौ क्षमा यतः ॥ (1074)

किमाहुरित्यपेक्षायामिदं तदभिधीयते ।
मन्यन्त इत्यनेनैव यच्छब्दो याति संगतिम् ॥ (1075)

त्वादिकमाह—**न्यायादिति** । (1070) अधिकारिणि धीहेतुत्वाद्वेदस्य, [1]तद्वि-शेषणमाह—**यज्ञादीति** । शुद्धबुद्धयः—क्षालितरागादिमला इति यावत् । (1071) काम्यप्रतिषिद्धत्यागेऽपि न नित्यकर्मणां पावनानां त्यागः, अत्राह—**त्यक्त्वेति** । (1072) हिरण्यगर्भाद्युपासनं तत्सहितं च कर्म न त्याज्यं [2]विशिष्ट-फलत्वात्, अत्राह—**आविरिञ्चादिति** । (1073) विशिष्टाधिकारिणः गुरुं प्राप्य अनुपपत्तिगर्भं वाक्यमाहुः, इत्याह—**साक्षेपमिति** । (याजा) [जया]दिफललिप्स-वस्तर्हि, इत्यत्राह—**निरेषणा इति** । शु(द्धि)[द्ध] बुद्धीनां श्रूयमाणवाक्यादेव विद्योत्पत्तेः, किमर्थं गुरुगमनम्, अत्राह—**गुरुद्वारेति** । 'आचार्यवान् पुरुषो वेद' (छा. 6-14-2) इति श्रुतेरित्यर्थः । (1074) 'तदाहुः' इति व्याख्यातम् । [3]'यत्' इत्यादि अवतारयति—**किमिति** । (नै)[तै] रुक्तमिदं तदिति वक्तुमन्वयमाह—**मन्यन्त इति** । (1075) ब्रह्मपदार्थमाह—**अव्यावृत्तेति** । (1076) विद्यापदं

---

1. **तद्विशेषणं**—अधिकारिविशेषणम् ।
2. **विशिष्टफलत्वात्**—हिरण्यगर्भप्राप्तिरूपोत्कृष्टफलकत्वात् ।
3. **यदित्यादीति** 'यद् ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते' इति वाक्यम् ।

* अव्यावृत्ताननुगतं वस्तु ब्रह्मगिरोच्यते ।
मुख्यार्थो ब्रह्मशब्दोऽयमेवं सत्युपपद्यते ॥ (1076)

* तद्यया वेद्यते बुद्ध्या तदसाधारणात्मना ।
ब्रह्मविद्येति तां साक्षात् शेमुषीं प्रतिजानते ॥ (1077)

सर्वं कृत्स्नं भविष्यामो मन्यन्ते ब्रह्मविद्यया ।
यन्मनुष्या वयं तत्र विरोधमनुयुञ्ज्महे ॥ (1078)

कृत्स्नमेव यतः प्रोक्तं वस्तु यत्पारमार्थिकम् ।
तत्प्रमाणविशुद्ध्यर्थं चोदयन्ति मुमुक्षवः ॥ (1079)

ब्रह्मविद्यैव कृत्स्नाप्तौ यस्मात्साधनमुच्यते ।
* तत्प्राप्तौ तत्तमोमात्रं व्यवधानमतो भवेत् ॥ (1080)

द्योतिकैव यतो विद्या न त्वसौ कारकं ततः ।
उत्पत्त्यादि क्रियाकार्यं तस्माच्चेह न शङ्कयते ॥ (1081)

व्याचष्टे—तद्य(थे)[येति] । (1077) पदार्थमभिधाय वाक्यार्थमाह—**सर्वमिति** । (1078) पर्यनुयोगे [1]**कोऽभिप्रायः**, तमाह—**कृत्स्नमेवेति** । यत् पारमार्थिकं वस्तु तत् पूर्णमेव पूर्वं '[2]अत्र हि' इत्यादा (वक्तुं)[वुक्तम्] यतः, अतः तस्मिन्नद्वये यत् प्रमाणं तच्छोधनार्थं चोद्यमित्यर्थः । (1079) 'कृत्स्नमेव'- इत्ययुक्तम् । प्रतीचोऽप्रा(से)[स] ब्रह्मभावस्य परिच्छिन्नत्वात्, अत्राह—**ब्रह्मविद्येति** । (1080) विद्याया मोक्षसाधनत्वेन कथमविद्यामात्रव्यवहितत्वसिद्धिः, अत्राह—**द्योति-**

---

* **अव्यावृत्ताननुगतमिति** व्यावृत्तं—विशेषः । अनुगतं—सामान्यम् । सामान्यविशेषभावहीनमित्यर्थः ।

* **तदसाधारणात्मना**—सच्चिदानन्दप्रत्यगभिन्नरूपेण । तत् - ब्रह्म ।

1. **कोऽभिप्राय इति** आक्षेप्तॄणां शिष्याणामिति शेषः ।

2. **अत्र हि इत्यादौ**—'अत्र ह्येते सर्वे एकं भवन्ति' इति वाक्ये ।

* **तत्प्राप्तौ**—तस्य-कृत्स्नस्य-अपरिच्छिन्नस्य प्राप्तौ ।

सिद्धेऽर्थे द्योतको दीपो न तु कार्ये यतस्ततः ।
सर्वात्मभावः सर्वेषां सिद्धः, प्रागपि बोधतः ॥ (1082)

अतोऽकृत्स्ना वयं मोहात् कृत्स्नात्मानोऽपि वस्तुतः ।
निहत्य विद्ययाऽविद्यां यामः कार्त्स्न्यं स्वतो गतम् ॥ (1083)

अधिकारविनिश्चित्यै मनुष्या इति गीरियम् ।
मनुष्याणां हि निःशेषत्रय्यर्थेऽधिकृतिर्यतः ॥ (1084)

दृष्टार्थतो वा विद्याया मनुष्यग्रहणं कृतम् ।
तावन्मात्रोऽधिकार्यत्र नाग्निहोत्राधिकारिवत् ॥ (1085)

प्रत्यबुध्यत यो यस्तदिति चोर्ध्वं प्रवक्ष्यति ।
नातः कर्माधिकार्यत्र दृष्टार्थत्वादपेक्ष्यते ॥ (1086)

केति । कर्मसमुच्चितधीफलत्वं मुक्तेर[1]र्थान्निरस्तम्, इत्याह—उत्पत्त्यादीति । (1081) मोक्षस्य साध्यत्वेऽपि विद्याया द्योतकत्वमविरुद्धम्, अत्राह—सिद्ध इति । (1082) सर्वात्मभावस्य स्वाभाविकत्वे फलितं निगमयति—अत इति । (1083) [2]मनुष्यग्रहणाभिप्रायमाह—अधिकारेति । विद्यासाधनश्रवणादौ विधितः संबन्धः अधिकारः । (1084) मनुष्यग्रहणस्यार्थान्तरमाह—दृष्टार्थत इति । संसारनिवृत्तिफलस्य दृष्टत्वात् तत्कामी सर्वोऽपि विद्यायामधिकारी, न(न्व)(त्व)ग्निहोत्राद्यधिकारनियमवदत्र नियमोऽस्तीति वक्तुमिह मनुष्यग्रहणमित्यर्थः । (1085)[3]तत्र लिङ्गमाह—प्रत्यबुध्यतेति । 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' (बृ. 3-4-10) इति देवादीनामपि विद्यया फलप्राप्तेः वक्ष्यमाणत्वादित्यर्थः । (1086) विद्याया मोक्षहेतुत्वं कुतो निश्चितं

---

1. अर्थादिति मुक्तेः तमोमात्रव्यवहिततत्वेन स्थितत्वात् उत्पाद्यत्वाभावान्नोत्पादककर्मापेक्षेति ज्ञानकर्मसमुच्चयनिरासः ।

2. मनुष्यग्रहणाभिप्रायमिति 'मनुष्या मन्यन्ते' इत्यत्र मनुष्यपदोक्तेरभिप्रायमित्यर्थः ।

3. तत्र लिङ्गं—संसारनिवृत्तिरूपफलकामस्य सर्वस्य ज्ञानाधिकारित्वे गमकम् ।

कर्मभ्य इव च ज्ञानात्फलप्राप्तिं सुनिश्चिताम् ।
मन्यन्त उभयत्रापि श्रुतिमानाविशेषतः ॥ (1087)

यन्मन्यन्ते नरास्तत्र विरुद्धमिव लक्ष्यते ।
यतोऽतश्चोदयामोऽत्र यथा विप्रतिषिद्धता ॥ (1088)

किमु तद्ब्रह्म यद्वेद्यं यज्ज्ञानात्सर्वताऽऽप्यते ।
किं चापि तद्वेदन्यद्यज्ज्ञानात् कृत्स्नतामगात् ॥ (1089)

ब्रह्माकृत्स्नं मतं तच्चेदुक्तदोषानिराकृतेः ।
अनुपास्यं भवेत्तादृक् प्राणादिवदसंशयम् ॥ (1090)

कल्पना नापि गौण्यत्र मुख्यार्थे सति युज्यते ।
न ह्यालभन्ते बाहीकं मुख्ये गवि सति क्वचित् ॥ (1091)

* मुख्यं ब्रह्म न चेदस्ति गौणं स्यात्तद्विना कुतः ।
मुख्यमग्निं विना गौणं न लोकोऽप्यवगच्छति ॥ (1092)

मानवैः, अत्राह—**कर्मभ्य इति** । (1087) उत्तरवाक्यमवतारयितुं उक्तं निगमयति —**यन्मन्यन्त इति** । (1088) [1]चोद्यवाक्यं व्याचष्टे—**किमिति** । परिच्छिन्नमपरिच्छिन्नं वेत्यर्थः । [2]विध्यन्तरेण चोदयति—**किञ्चापीति** । आत्मानमेव विदित्वा सर्वमभवत्, उतान्यदित्यर्थः । (1089) [3]परिच्छिन्नत्वे दोषमाह—**ब्रह्मेति** । प्राणादेः परिच्छिन्नत्वात् अप्रतिपाद्यत्वदोष उक्तः । तस्या[4]त्रापि प्रसक्तेरित्यर्थः । (1090) अपरिच्छिन्ने ब्रह्मणि संभवति, परिच्छिन्नग्रहणं(वा)[चा]युक्तम्, इत्याह—**कल्पनेति** । दृष्टान्तमाह—**न हीति** । (1091) मुख्यस्याभावादमुख्यग्रहणं, [5]मुख्याभावे

---

1. **चोद्यवाक्यं**—'किमु तद् ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति' इति वाक्यम् ।
2. **विध्यन्तरेण**—विधान्तरेण—प्रकारान्तरेण ।
3. **परिच्छिन्नत्वे इति** ब्रह्मण इत्यादिः ।
4. **अत्रापि**—ब्रह्मण्यपि ।
5. **मुख्याभावे**—सोमपदमुख्यार्थलताया अभावे ।

* **मुख्य ब्रह्मेति** मुख्यस्यैवाभावे गौणार्थ एव न प्रसिद्ध्यति मुख्यापेक्षत्वात् गौणस्येति भावः ।

अकृत्स्नज्ञानतो नापि पुरुषार्थोऽवगम्यते ।
* ब्रह्माज्ञानसमुत्थत्वात् मिथ्याज्ञानत्वकारणात् ॥ (1093)

मेयमानादिसंभित्तिर्यदि नामेह लभ्यते ।
अयथावस्तुरूपत्वात् स्वप्नमेयादिवत्तु सा ॥ (1094)

अकृत्स्नस्य च ब्रह्मत्वं विरुद्धं भानुशैत्यवत् ।
तस्मादकृत्स्नं ब्रह्मेति न मानेनोपपद्यते ॥ (1095)

ब्रह्मास्तु तर्हि तत् कृत्स्नमुक्तदोषासमन्वयात् ।
मुख्यार्थलाभतश्चापि तस्य च प्रकृतत्वतः ॥ (1096)

न कृत्स्नमिति तद् ग्राह्यं तत्प्रमाणाद्यसंभवात् ।
* तदन्यवस्तुसद्भावे तद्ब्रह्मत्वं विहन्यते ॥ (1097)

प्रतिनि[1]ध्यादानवत्, अत्राह—मुख्यमिति । (1092) ब्रह्मधियो मुक्तिसाधनत्वश्रुतिविरोधोऽपि, इत्याह—अकृत्स्नेति । (1093) प्रमात्रादिविभागसिद्ध्यर्थं परिच्छिन्नत्वं ब्रह्मणः स्वीकार्यम्, अत्राह —मेयेति । [2]संभित्तिः मिथ्या, भेदत्वात् स्वप्नभेदवदित्यर्थः । (1094) [3]अकृत्स्नकल्पदूषणं निगमयति—अकृत्स्नस्येति । (1095) अपरिच्छिन्नकल्पमालम्बते—ब्रह्मास्त्विति । परिच्छिन्नत्वकल्पदोषाभावात् ब्रह्मपदस्य मुख्यार्थलाभात् 'अत्र ह्येते सर्व एकं भवन्ति' इत्यत्र ब्रह्मणः अपरिच्छिन्नस्य प्रकृतत्वाच्चेत्यर्थः । (1096) पूर्णे ब्रह्मणि, मानं फलं मातापि नास्ति, किमस्ति इति विकल्प्य, आद्यं प्रत्याह—नेति । द्वितीयं दूषयति—तदन्येति । (1097)

---

1. प्रतिनिध्यादानवत्—पूतीकलतादानवत् ।

* ब्रह्माज्ञानसमुत्थत्वात् मिथ्याज्ञानत्वकारणादिति परिच्छिन्नस्य सर्वस्य ब्रह्माज्ञानजन्यत्वात् तद्धियो मिथ्याधीत्वात् पुरुषार्थहेतुत्वं नेति भावः ।

2. संभित्तिः—मेयमानादिविभेदः ।

3. अकृत्स्नकल्पदूषणं—ब्रह्मणः परिच्छिन्नत्वकल्पे दूषणम् ।

* तदन्येति—अन्यमानादिवस्तुसद्भावे परिच्छिन्नमेव स्यादिति उभयथापि अपरिच्छिन्नासिद्धिरिति भावः ।

न च मानानपेक्षस्य सिद्धिरभ्युपगम्यते ।
मानादियत्नानर्थक्यप्रसक्तिः स्यात्तथा सति ॥ (1098)

* सदानुदितालुप्तैकज्ञप्तिमात्रसतत्त्वकम् ।
यद्यपीष्टं तथापीदं नात्ममोहापनोदकृत् ॥ (1099)

न हि मानमनाश्रित्य वस्त्वात्माज्ञानहानिकृत् ।
स्रक्स्थाण्वादावदृष्टत्वात् उक्तदोषोऽपि चापतेत् ॥ (1100)*

मानाद्यनभ्युपेतौ हि न किञ्चिद्वस्तु सिद्ध्यति ।
तदभ्युपेतौ ब्रह्मत्वं व्यावृत्तेर्न प्रसिद्ध्यति ॥ (1101)

---

[1]मात्रादिव्यतिरेकेण स्वप्रभत्वात् ब्रह्म सिद्ध्येत्, अत्राह—**न चेति** । (1098) [2]स्वप्रति(षि)[ब]द्धव्यवहारहेतुप्रकाशभेदाभावोपलक्षितस्वरूपत्वात् ब्रह्मणः न स्वव्यवहारे परापेक्षा; अत्राह—**सदेति** । (1099) स्वरूपज्ञानं अज्ञाननिवर्तकं ज्ञानत्वात् प्रमाणज्ञानवत्, अत्राह—**न हीति** । विमतं(मान)[3]मानापेक्षमज्ञाननिवर्तकं वस्तुत्वात्(स्वर्गा)[स्रगा]दिवदित्यर्थः । जडत्वमत्रोपाधिः, अत आह—**उक्तदोषोऽपीति** । मानादियत्नानर्थक्यप्रसङ्गश्चेत्यर्थः । (1100) कुम्भादौ च मानमनुपेतं, उपेतं वा । प्रथमं प्रत्याह—**मानादीति** । द्वितीयमपवदति—**तदिति** । व्यावृत्तेः—मानाद्यपेक्षया [4]परिच्छेदादित्यर्थः । [1101] परिच्छिन्नत्वे

---

1. **मात्राद्व्यतिरेकेण**—मातृमानादिकं विनैव ।

2. **स्वप्रतिबद्धव्यवहारेति** स्वं—ब्रह्म तत्संबद्धव्यवहारेत्यर्थः ।

* 'न च मानानपेक्षस्य सिद्धिरभ्युपगम्यते' इत्यनेन विमतं न मानाद्यनपेक्षसिद्धिकं वस्तुत्वात् घटवत् इत्यनुमानमभिसंहितम् । तत्र जडत्वमुपाधिः इत्याशङ्क्याह—**सदेति** इति **शास्त्रप्रकाशिकाकारा** वर्णयन्ति ।

3. **मानापेक्षमज्ञाननिवर्तकं**—मानापेक्षं सत् अज्ञाननिवर्तकम् ।

* "विमतं स्वतो न स्वाज्ञानध्वंसि अधिष्ठानत्वात् स्रगादिवत् इत्यत्र विपक्षे मानादियत्नानर्थक्यप्रसक्तिमाह—**उक्तेति** न च कदाचिदपि संसारेऽवतरेदिति चकारार्थः ।" इति **शास्त्रप्रकाशिकाकारा** वर्णयन्ति ।

4. **परिच्छेदादिति** ब्रह्मण इत्यादिः ।

* यथा कथंचिच्छब्दार्थो यदि नामाभ्युपेयते ।
तथापि दोषवद् ब्रह्म यथा तदधुनोच्यते ॥ (1102)

कृत्स्नं वा यदि वाऽकृत्स्नं यथेच्छसि तथास्तु तत् ।
ब्रह्मत्वं किं स्वतस्तस्य किंवा तत्परतो मतम् ॥ (1103)

यदि तावत् स्वतस्तत्स्यात् ब्रह्मविद्या निरर्थिका ।
नह्युष्णत्वं हुताशस्य परतः कुर्वते बुधाः ॥ (1104)

ज्ञानमूर्तेन चाज्ञानमागन्तु सहजं तथा ।
भानौ तमोवत् तेनेदग्ब्रह्म नैवोपपद्यते ॥ (1105)

शास्त्राद्यारम्भानर्थक्यदोषश्चापि प्रसज्यते ।
स्वानुभूतिविरोधोऽपि ब्रह्मत्वं चेद्भवेत् स्वतः ॥ (1106)

योषाग्निवच्चेच्छास्त्रं स्यात् दृष्टिमात्रविधायकम् ।
तथा सत्यविरोधः स्यात् भिन्नाधिकरणत्वतः ॥ (1107)

अपरिच्छिन्नत्वे च प्रत्येकं दोषमुक्त्वा, साधा[1]रणं वक्तुमुत्तरो ग्रन्थः, इत्याह—**यथाकथञ्चिदिति** । [1102] [2]एतदेव प्रकटयति—**कृत्स्नं वेति** । ब्रह्मपदार्थस्य कृत्स्नत्वे दोषं वक्तुं विकल्पयति—**ब्रह्मत्वमिति** । कृत्स्नत्वमित्यर्थः । [1103] स्वतस्त्वे दोषमाह—**यदीति** । [1104] स्वतः पूर्णस्य अपूर्णत्वनिमित्ताज्ञाननिरासार्थं ज्ञानमर्थवत्, अत्राह—**ज्ञानेति** । [1105] शास्त्रारम्भपुंवृत्त्यानर्थक्याच्च[3]न स्वतः, इत्याह—**शास्त्रादीति** । अहमद्वयः इत्यननुभवादनुपलम्भ[4]बाधोऽपि, इत्याह—**स्वानुभूतीति** । [1106] अनुभवविरोधपरिहारं(स)[स्व]यूथ्यः शङ्कते—**योषेति** । 'योषा वाव गौतमाग्निः'

---

1. साधारणं—परिच्छिन्नत्वापरिच्छिन्नत्वोभयपक्षसाधारणं दोषम् ।

* शब्दार्थः—ब्रह्मशब्दार्थः ।

2. एतदेव—यथा कथञ्चिदित्येतदेव ।

3. न स्वत इति ब्रह्मत्वमिति शेषः ।

4. बाधोऽपीति स्वतो ब्रह्मताया इति शेषः ।

*** सदसीति क्रियानिष्ठं प्रत्यक्षाद्यर्थनिष्ठितम् ।**
विरोधः कोऽनयोरत्र मिथोऽर्थासंस्पृशोः सतोः ॥ (1108)

नैतदेवं यतो वाक्यं वस्तुनिष्ठं पुरोदितम् ।
विरोध एव तेन स्यादेकाधिकरणत्वतः ॥ (1109)

अशक्या ब्रह्मदृष्टिश्च कर्तुं ब्रह्माप्रसिद्धितः ।
लौकसिद्धौ तु योषाग्नी तद्दृष्टिः सुकरेष्यते ॥ (1110)

अथाग्निवच्चेत्तद्ब्रह्म सिद्धं मानान्तरान्मतम् ।
तावतैव कृतार्थत्वात् किमन्यत् प्रार्थ्यते श्रुतेः ॥ (1111)

तद्दृष्टावेव निःशेषपुरुषार्थसमाप्तितः ।
*** फलान्तराय तद्दृष्टिर्न च स्यादग्निदृष्टिवत् ॥ (1112)**

(छा. 5-8-1) इतिवत् [1]शास्त्रस्योपास्तिपरत्वेन [2]मानान्तरस्य वस्तुपरत्वेन भिन्नाधिकरणत्वतः—भिन्नविषयत्वादित्यर्थः । (1107) भिन्नविषयत्वं विशदयति —**सदसीति** । (1108) '[3]सर्वोऽप्ययं वेदः' इत्यत्र वस्तुपरत्वं शास्त्रस्योक्तम् । इह क्रियापरत्वोक्तौ[4]पूर्वापरविरोधात्, अनुभवविरोधः स्यादेव, इति चोदक एव दूषयति—**नैतदिति** । (1109) असंभवश्चास्य[5] पक्षस्य, इत्याह—**अशक्येति** । (1110) परस्यापि मानान्तरसिद्धत्वात् नायं दोषः, इति शङ्कते—**अथेति** । दूषयति—**तावतेति** । (1111) ब्रह्मधीमात्रात् पुमर्थमात्रसिद्धावपि निखिलपुमर्थसिद्ध्यर्थं ब्रह्मोपासनविधिः, अत्राह—**तद्दृष्टाविति** । (1112)

---

1. **शास्त्रस्य**—तत्त्वमसीत्यादिशास्त्रस्य ।
2. **मानान्तरस्य**—प्रत्यक्षादेः ।

* **सदसीति** । तत्त्वमसि इत्यत्र 'सदेव' इति प्रकृतसद्रूपब्रह्मार्थकत्वं तत्पदस्येति भावः । **क्रियानिष्ठं**—उपासनाक्रियातात्पर्यकम् । **मिथोऽर्थासंस्पृशोः**—परस्परं विभिन्नविषययोः ।

3. **सर्वोऽप्ययमिति** संबन्धग्रन्थे इत्यादिः ।
4. **पूर्वापरविरोधादिति** वस्तुपरशास्त्रप्रत्यक्षयोः विभिन्नविषयत्वाभावादिति शेषः ।
5. **अस्य पक्षस्य**—ब्रह्मदृष्टिविधानपक्षस्य ।

* **अग्निदृष्टिवदिति** यथा मानान्तराधीनाग्निदृष्टावनिर्वृत्तफलनिर्वृत्तये योषिति अग्निदृष्टिः शास्त्रात् क्रियते, तथेति वैधर्म्यदृष्टान्तोऽयमिति बोध्यम् ।

परतोऽपि च कृत्स्नत्वे ब्रह्मत्वं दुस्थसिद्धिकम् ।
क्रियातो ज्ञानतो वा तद्यदि वोभयसंश्रयात् ॥ (1113)

न ब्रह्मता क्रियातः स्यादुत्पत्त्यादिसमन्वयात् ।
न स्यादाद्यन्तवद्ब्रह्म ह्यपूर्वाजादिशास्त्रतः ॥ (1114)

अपवादश्च बहुशः कर्मकार्यस्य दृश्यते ।
मुमुक्षुत्वस्य तद्धेतोः कर्मकार्यं न तत्ततः ॥ (1115)

अथ ज्ञानात्तदभवत्कृत्स्नं ब्रह्मेति चेन्मतम् ।
अन्यानन्यप्रमेयत्वे तथापीष्टं न सिद्ध्यति ॥ (1116)

* क्रियाविरोधः प्राप्नोति यद्यनन्यस्य मेयता ।
श्रुत्यन्तरविरोधश्च प्रत्यग्दृष्टौ प्रसज्यते ॥ (1117)

एवं पूर्णत्वस्य स्वतस्त्वं प्रतिक्षिप्य, पर[त]स्त्वं प्रत्याचष्टे—**परतोऽपीति**। यतः तत्कृत्स्नत्वं, तत्, कर्म वा, ज्ञानं वा, उभयं वेति विकल्पयति—**क्रियात इति**। (1113) आद्यमपवदति—**नेति**। उत्पत्त्यादिमदेव ब्रह्म स्यात् को दोषः, अत्राह–**न स्यादिति**। कालापरिच्छेदात् शास्त्रविरोधाच्चेत्यर्थः। (1114) हेत्वन्तरमाह—**अपवादश्चेति**। 'नास्त्यकृतः कृतेन' (मु. 1·2-12) 'किं प्रजया करिष्यामः' (बृ. 6-4-22) इत्यादिनिषेधश्चेत्यर्थः। कर्मकार्यस्य—[कर्मकार्यत्वस्य,] मुमुक्षुत्व[स्य]—[1]मुमुक्षुप्राप्यमोक्षस्येति यावत्। तस्मात् अपवादाद्धेतोः ब्रह्मत्वं न कर्मकार्यम्, इत्याह—**तद्धेतोरिति**। (1115) द्वितीयमनुवदति–**अथेति**। स्वस्मादनन्यत् विदित्वा कृत्स्नमभवत्, उतान्यानन्यत्, अन्यदेव वा। सर्वथा ब्रह्मासिद्धिः, इत्याह—**अन्येति**। (1116) अनन्यमेयत्वे कथमिष्टासिद्धिः, अत्राह—**क्रियेति**। 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. 5-4-2) इत्यादिश्रुत्यन्तरविरोधोऽपि, इत्याह—**श्रुत्यन्तरेति**। (1117) ब्रह्मणोऽनन्यस्य ज्ञानफलत्वे

---

1. **मुमुक्षुप्राप्यमोक्षस्येति** मोक्षश्च ब्रह्मभावः ब्रह्मत्वपर्यवसित इति बोध्यम्।

* **क्रियाविरोधः**—एकस्यां क्रियायामेकस्यैव कर्तृत्वकर्मत्वविरोधः।

तथा च ज्ञानसाध्यत्वं ब्रह्मणः संप्रसज्यते ।
अन्यानन्यप्रमेयेऽपि दोषोऽयं दुर्निवारणः ॥ (1118)

बुद्ध्वाऽथान्यत्तदभवत् तदन्यत्किमबुध्यत ।
तदप्यन्यत्पुराऽज्ञासीदनवस्था प्रसज्यते ॥ (1119)

निर्निमित्तस्य कृत्स्नत्वेऽप्यस्मदादेस्तथा न किम् ।
पक्षपातः श्रुतेर्नापि प्रामाण्यादुपपद्यते ॥ (1120)

समुच्चयनिषेधश्च युक्तिभिर्वक्ष्यते स्फुटम् ।
प्रधानगुणभावोऽपि विरोधान्न तयोर्भवेत् ॥ (1121)

इत्यादिबहुदोषत्वात् दुःसंभाव्यं प्रमाणतः ।
विघ्नयैत्राप्नुमः कात्स्र्न्यमित्यादि यदुदीरितम् ॥ (1122)

ब्रह्मैव ज्ञानकार्यं स्यात्, इत्याह—तथा चेति । [1]प्रथमकल्पदोषातिदेशेन [2]द्वितीयमपवदति—अ(न)न्येति । (1118) [3]तृतीये अनवस्थामाह—बुध्वेति । [4]यदन्यज्ञानात् तदभवत् तत् किमन्यदबुध्यत, तथाभूतमन्यन्न संभवतीत्यर्थः । विपक्षे दोषमाह—तदपीति । (1119) तस्यान्यस्य ब्रह्मत्वं स्वाभाविकमिति नानवस्था, इत्यत्राह—निर्निमित्तस्येति । श्रुतेः पक्षपातात् नास्मदादेः तथात्वम्, अत्राह—पक्षपात इति । (1120) कृत्स्नत्वस्य [5]समुच्चयफलत्वं प्रत्याह—समुच्चयेति । [6]त्रिविधः समुच्चयः भुज्युब्राह्मणे निरसिष्यते, निरस्त(स्य)[श्च] संबन्धग्रन्थे इत्यर्थः (1121) उपोद्घातमुपसंहरति—इत्यादीति । तत् कात्स्र्न्यं सच्चेत् चैतन्यवत् सदा स्यात्, असच्चेत् शशशृङ्गवन्न कदाचिदपि, इत्यादि-

---

1. प्रथमकल्पेति अनन्यद्विदित्वेति कल्पेत्यर्थः ।
2. द्वितीयं—अन्यानन्यद्विदित्वेति कल्पम् ।
3. तृतीये—अन्यद्विदित्वेति कल्पे ।
4. यदन्यज्ञानात्—यस्य अन्यस्य ज्ञानात् ।
5. समुच्चयफलत्वं—ज्ञानकर्मसमुच्चयफलत्वम् ।
6. त्रिविधः समुच्चय इति ज्ञानकर्मणोः समसमुच्चयः एकः, विषमसमुच्चयः अपरः । तत्रापि ज्ञानस्य प्राधान्यं कर्मणो गुणत्वमिति, कर्मणः प्राधान्यं ज्ञानस्योपसर्जनत्वमिति द्वैविध्यमिति आहत्य त्रिविधः समुच्चयो बोध्यः ।

न कश्चिदपि दोषोऽत्र यथैतदुपपत्स्यते ।
अन्यथा कल्प्यमानेऽस्मिन्नुक्तदोषपरम्परा ॥ (1123)

एवं तावदुपोद्घातः व्याख्यातोऽत्र समासतः ।
भगवत्पादभाष्येऽस्मिन्, अन्यदीयोऽपि वर्ण्यते ॥ (1124)

तदेतद्ब्रह्मविद्याया आरम्भे फलमुच्यते ।
तत्प्रवृत्त्यङ्गतायै च तत्फलस्य प्रकीर्तनम् ॥ (1125)

वक्ष्यमाण उपोद्घातो ब्रह्मविद्या ततः परम् ।
ततोऽप्यूर्ध्वं फलोक्तिश्चेत् तच्छब्देनोच्यते कथम् ॥ (1126)

पदार्थः। (1122) सिद्धान्तयति—न कश्चिदिति । अत्र—विवर्तवादे । ब्रह्मज्ञानात् मोक्षोपपत्तिरुपरिष्टाद्वर्ण्यते इत्यर्थः। अत्रेति विशेषणकृत्यमाह—**अन्यथेति** । परिणामित्वादिकल्पनायामित्यर्थः । (1123)

'तदाहुः' इत्यादिनवमकण्डिकायाः विवर्तमतानुसारेण वृत्तिकारव्याख्यानविरूपणम्

[1]उपोद्घातवाक्यं भगवत्पादीयमतेन व्याख्याय, [2]वृत्तिकारमतेन व्याख्यातुमाह—**एवं**(त)[ता]**वदिति** । (1124) 'तदाहुः' इति तत्पदेन धीफलमुच्यते, इत्याह—**तदेतदिति** । फलकीर्तनमनर्थम्, तत्राह—**तत्प्रवृत्तीति** । (1125) चोदयति—**वक्ष्यमाण इति** । ततः—तच्छब्दादुपरि(ष्य)[ष्टात्] [3]उपोद्घातः कीर्त्यते । ततःपरेण 'तदात्मानमेवावेत्' इति [4]ब्रह्मविद्या । तस्मात् पर(स्मात्)[स्तात्] 'तत्सर्वमभवत्' इति फलोक्तिः । अतो वक्ष्यमाणत्वात् व्यवहितत्वाच्च कथं [5]तत्पदेन फलोक्तिरित्यर्थः। (1126) समाधत्ते—**अनन्तरेणेति** ।

1. **उपोद्घातवाक्यं**—'तदाहुः' इत्यादि श्रुतिवाक्यम् ।
2. **वृत्तिकारमतेनेति** वृत्तिकारः—भर्तृप्रपञ्चः ।
3. **उपोद्घातः कीर्त्यते** इति 'यद्ब्रह्मविद्यया सर्वं भविष्यन्तः' इत्यादिना कीर्त्यते ।
4. **ब्रह्मविद्येति** कीर्त्यते इत्यनुवर्तते ।
5. **तत्पदेन**—'तदाहुः' इत्यत्रत्यतच्छब्देन ।

अनन्तरेण संबन्धसामर्थ्ये सत्यमानतः ।
दवीयसाऽभिसंबन्धस्तच्छब्दस्योच्यते कुतः ॥ (1127)

द्वैतैकत्वात्मकं साक्षात् ब्रह्मविद्योदयात्पुरा ।
समाप्य तत्फलं कृत्स्नं जातकौतूहलाः परे ॥ (1128)

आहुरेवं द्विजाः केचित् विरक्ताः पूर्वभूमितः ।
संभाव्यते ब्रह्मविद्भिर्यत्तदर्थबुभुत्सवः ॥ (1129)

द्वैतैकत्वधिया नैव पूर्वया फल्गुकार्यया ।
संभाव्यते सर्वभूतिर्यतः सा ब्रह्मविद्यया ॥ (1130)

* द्वैतैकत्वमतिर्यद्वत् स्वानुरूपफलाप्तये ।
अलं सर्वमतिस्तद्वत् सर्वभावफलाप्तये ॥ (1131)

ब्रह्मबुद्ध्या भविष्यामः कृत्स्नं ब्रह्मेति तद्विदः ।
यन्मन्यन्तेऽथ तद्ब्रह्म किमवेदिति पृच्छ्यते ॥ (1132)

'न हास्य प्रियं प्रमायुकं भवति' [1]इत्यनेन संबन्ध(:)सामर्थ्ये(अ)सति, विप्रकृष्टेन सर्वात्मभावफलेन तच्छब्दस्य अमानतः संबन्धः कुत उच्यते, अप्रामाणिक एवेत्यर्थः । [1127] 'आहुः' इत्येतदर्थमाह—**द्वैतेति** । तत्फलं कृत्स्नं समाप्य—वर्तमानदेहे भावनाप्रकर्षादनुभूय, तस्मादुत्कृष्टफले कैवल्ये जातश्रद्धाः वक्ष्यमाणप्रकारेणाहुरित्यर्थः । श्रद्धालुत्वं विशदयति—**संभाव्यत इति** । [1128-1129) द्वैतैकत्वज्ञानादेव कैवल्यसिद्धेः किं ब्रह्मधिया, अत्राह—**द्वैतैकत्वेति** । [1130] ब्रह्मधीः न मोक्षकरी धीत्वात् संमतवत्, अत्राह—**द्वैतेति** । [1131] मुमुक्षवः किमाहुः, इत्यत आह—**ब्रह्मेति** । यस्य ब्रह्मणो ज्ञानात् सर्वभा(वा)[वमा]पन्नाः मनुष्याः, तद्ब्रह्म किमवेत्, अथ नावेदिति मुमुक्षुभिः

---

1. इत्यनेन संबन्धसामर्थ्ये सति—संनिकृष्टेन 'न हास्य प्रियं प्रमायुकम्' इति वाक्येन प्रतिपादितविद्याफलेन तच्छब्दस्य बोधकत्वलक्षणसंबन्धसामर्थ्ये सतीति यावत् ।

* द्वैतैकत्वेति सूत्रोपात्त्या तत्क्रतुन्यायेन सूत्राप्तिवत् ब्रह्मविद्यया ब्रह्मप्राप्तिरित्यर्थः ।

किमवेदिति यः प्रश्नः स किं स्यात् कर्तृकर्मणोः ।
विद्यायाः पृच्छयते कर्ता कर्म वेह विवक्षितम् ॥ (1133)

ब्रह्मणा चेत्कृता विद्या निष्फलेयं प्रसज्यते ।
ब्रह्मविद्योदयादस्माद्भूद्ब्रह्म पुरापि तत् ॥ (1134)

तस्मात्कर्मैव विद्यायाः पिपृच्छिषितमत्र तु ।
प्रमेयोपाश्रयादेव यतः प्रामाण्यमुच्यते ॥ (1135)

वस्तुनिष्ठत्वतोऽदोषः कर्तर्यपि विवक्षिते ॥ (1136)
सर्वं ब्रह्माभवद्यस्माद्विज्ञानात्तदिहोच्यते ।

ब्रह्मविद्येति सर्वासामसाधारणकारणम् ॥ (1137)

सर्वैकत्वावबोधोऽयं ब्रह्मविद्यागिरोच्यते ।
द्वैतस्याद्वैतयाथात्म्यात् क्लृप्तसर्पादितत्त्ववत् ॥ (1138)

आचार्यः पृच्छय(तद्)[ति इत्य]र्थः । [1132] [1]अयं प्रश्नः [2]कर्तृविषयः, कर्मविषयो वेति विकल्पयति—**किमवेदिति** । विकल्पं विशदयति—**विद्याया इति** । [1133] कर्मप्रश्नप्रतिपादनाय कर्तृप्रश्ने दोषमाह—**ब्रह्मणेति** । [1134] [3]परिशिष्टमाह—**तस्मादिति** । [1135] कर्तृप्रश्नेऽपि न दोषः, इति समाधत्ते—**वस्त्विति** । अदोषः इति पदच्छेदः । कर्तरि प्रश्ने विवक्षितेऽपि कर्म अर्थात् सिद्ध्येदेव । विद्याया वस्तुनिष्ठत्वात्—वस्तुविषयत्वात् । तस्मात् कर्तरि कर्मणि वा अयं प्रश्नः इत्यङ्गीकारेऽपि [4]अदोष इत्यर्थः । [1136] एवं तात्पर्यमुक्त्वा ब्रह्मविद्यापदार्थमाह—**सर्वमिति** । [1137] हेतुमाह—

---

1. **अयं प्रश्नः**—‘ किमु तद्ब्रह्मावेत् ’ इति प्रश्नः ।

2. **कर्तृविषयः कर्मविषयो वा**—विद्याकर्तृविषयः विद्याकर्मविषयो वा । उत्तरत्रापि कर्तृकर्मपदाभ्यां विद्याकर्तृकर्मणी विवक्षिते इति बोध्यम् ।

3. **परिशिष्टं**—विद्याकर्मप्रश्नमिति यावत् ।

4. **अदोष इति** न च कर्तृप्रश्ने विद्यावैफल्यं, स्वतः सदा ब्रह्मत्वेऽपि ब्रह्मणः अविद्याध्वंसित्वेन तत्साफल्यादिति भावः ।

सर्वैकत्वं परं ब्रह्म परमात्मेति यं विदुः ।
तन्मोहजानां सर्वेषां स तत्त्वं परमार्थतः ॥ (1139)

तदज्ञानैकहेतुत्वात् तेनैव परमात्मना ।
तदन्यान्यात्मवन्ति स्युः सर्पादीनि स्रजा यथा ॥ (1140)

उक्तात्मच्युतदृष्टीनां तदबोधैकहेतुतः ।
आब्रह्मस्थाणुभेदोऽयं नामरूपक्रियात्मकः ।
अविद्याकृत एवायं न यथावस्तुधीकृतः ॥ (1141)

तमोघ्न्यैव ततो ब्रह्म प्राप्यते ब्रह्मविद्यया ॥ (1142)

यथोक्ततत्त्वकान्येव रज्ज्वां तत्क्लृप्तवस्तुवत् ।
सूत्रं विराड्देवता च यावत्किंचिच्च वस्त्विह ॥ (1143)

ब्रह्मैवेदं यथा सर्वं विद्यया तदबोधजम् ।
अविद्यया तथाऽकृत्स्नं ब्रह्म सूत्रादिरूपकम् ॥ (1144)

सर्वैकत्वेति । [1138] किं तत् सर्वैकत्वमिति, तदाह—**सर्वैकत्वमिति** । स तत्त्वमिति [1]**पदद्वयम्** । [1139] सर्वस्य ब्रह्म तत्त्वमित्येतत् दृष्टान्तेनाह—**तदज्ञानेति** । [1140] कथं तर्हि द्वैतप्रतीतिः, अत्राह—**उक्तेति** । [1141] द्वैतप्रतिभानस्याविद्याधीनत्वे फलितमाह—**तमोघ्न्येति** । (1142) कथं द्वैतस्यात्ममात्रत्वं सूत्राद्यष्टा[2]वस्थजगतः पारमार्थिकत्वेन **भर्तृप्रपञ्चैः** अङ्गीकारात्, अत्राह—**यथोक्तेति** । सूत्रादिभेदभानमविद्याधीनमित्यर्थः । (1143) निर्विशेषस्य सविशेषभाने दृष्टान्तान्तरमाह—**ब्रह्मैवेति** । श्रुतिबलात् कृत्स्नस्य आत्ममात्रत्वमिव तदज्ञानकारणवशात् [3]तस्य द्वैतरूपेण भानमित्यर्थः । (1144) उपासनादीनां

---

1. सतत्त्वम् इति एकपदत्वभ्रमनिरासायाह—**पदद्वयमिति** तथाच सः—परमात्मा तत्त्वमित्यर्थः ।
2. **अष्टावस्थेति** ईश्वरः अव्याकृतं सूत्रं विराट् भूतानि इन्द्रियाणि शरीरं विषयः इत्येवमष्टावस्थं जगत् ।
3. **तस्य**—निर्विशेषस्यात्मनः ।

भावनाज्ञानकर्माणि साधनानीति यद्यपि ।
* तत्सतत्त्वमविद्यैव यतोऽतः सैव कारणम् ॥ (1145)

* न हि साधनसापेक्षं वस्तु स्यात्पारमार्थिकम् ।
परमार्थं न वस्त्वस्ति यत्परायत्तसिद्धिकम् ॥ (1146)

मोहोत्थाः पृथगात्मानः साधनायत्तसिद्धिकाः ।
सूत्राद्यस्तृणान्ताः स्युरन्योन्यव्यभिचारिणः ॥ (1147)

सर्वेऽप्येते यथादृष्टि ह्येकैकस्य तमस्विनः ।
सूत्रादयोऽनुभूयन्ते यथाकर्म यथाश्रुतम् ॥ (1148)

अविद्यैव यतोऽमीषां प्रागभावो न तत्परम् ।
भावनाज्ञानकर्मभ्यो जन्मैषां तेन नान्यतः ॥ (1149)

विश्वहेतुत्वात् नाविद्या तद्धेतुः, अत्राह—**भावनेति** । (1145) सूत्रादिकं नाविद्याकार्यं सत्त्वात् चैतन्यवत् , इत्यत्राह—**न हीति** । विमतं मिथ्या सापेक्षत्वात् स्फटिकलौहित्यवदित्यर्थः । (1146) विमतमविद्याकार्यं अविद्यान्यत्वे सति विभक्तत्वात् चन्द्रभेदवत् , इत्याह—**मोहेति** । (1147) विमतं मिथ्या दृश्यत्वात् शुक्तिरूप्यवत् , इत्याह—**सर्वेऽपीति** । (1148) प्रधानपरिणामः ब्रह्मपरिणामो वा जगत् , नाविद्या [1]तदुपादानम् , इति मतं निरस्यति—**अविद्यैवेति** । अमीषां—सूत्रादीनाम् । प्रागभावः — उपादानमिति यावत् । उपासनादिकं निमित्तमित्यर्थः । (1149) उपासनाज्ञानफलं विशदयति—**यथेति** ।

---

* **तत्सतत्त्वमविद्यैवेति** भावनाज्ञानकर्मणां तत्त्वमविद्यैव । अविद्यात्मकानि भावनादीनीति यावत् ।

* "सूत्रादि नाविद्याकार्यमबाध्यत्वात् आत्मवत् इत्याशङ्क्य हेत्वसिद्धिं मत्वा प्रत्यनुमानमाह—**न हीति** । विमतं न वास्तवं कार्यत्वात् संमतवत् इत्यनुमानान्तरमाह—**परमार्थमिति** । विमतं कल्पितं भिन्नत्वात् संमतवदित्याह—**मोहेति** । कार्यत्वहेतुनोक्तमनुमानमनूद्य, अनुमानान्तरमाह—**साधनेति** । विमतं कल्पितं व्यभिचारित्वात् सर्पादिवदित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

1. तदुपादानं—जगदुपादानम् ।

* यथैता दर्शनावस्थाः कार्यमासां तथाविधम् ।
उत्पाद्यमाप्यं संस्कार्यं विकार्यं च क्रियावशात् ॥ (1150)

* पिण्डात्माहमितीक्षाणः पिण्डमेव प्रपद्यते ।
दैवं विराजं सूत्रं च मृतः सन्प्रतिपद्यते ॥ (1151)

संस्कारोपचयाद्यद्वद्देवो भूत्वैति देवताम् ।
* संस्कारापचयाद्ध्वंसस्तथा तासां न संशयः ॥ (1152)

* ब्रह्मणोऽन्यद्यतो वस्तु ब्रह्मैव परमार्थतः ।
तद्बोधात्तदन्यत्तद्बोधाद्ब्रह्मैव तत्त्वतः ॥ (1153)

सूत्रादिदर्शनानां स्यात्सूत्राद्येव यथा फलम् ।
परात्मदर्शनस्यापि तद्भावः स्यात्तथा फलम् ॥ (1154)

यादृक् सूत्राद्युपासनं तादृक् तत्फलम्, इत्येतत् स्पष्टयति—**उत्पाद्यमिति** । (1150)

'पिण्डात्मदर्शी पिण्डात्मानमेवाभिसंपद्यते प्रेत्य' इत्यादि[1] **भाष्यं** व्याचष्टे—**पिण्डेति** । [1151] सूत्राद्युपासनाफलमपि नित्यं तत्, इत्यत्राह—**संस्कारेति** । [1152] तर्हि सूत्रादेः ब्रह्मणोऽन्यत्वं जन्मादिमत्त्वात्, अत्राह—**ब्रह्मणोऽन्यदिति** । यदन्यदिव दृश्यते तत् परमार्थतो ब्रह्मैव सत् तदबोधात् तदन्यत् यतः इति योजना । [1153] 'बोधात् ब्रह्मैव' इत्ययुक्तम् । ब्रह्मज्ञानस्य तद्भावादन्यफलत्वात्, अत्राह—**सूत्रादीति** । [1154] ज्ञानकार्यत्वे ब्रह्मभावस्या-

---

* **दर्शनावस्थाः**—भावनाः, उपासनानीति यावत् ।

1. **भाष्यं**—भर्तृप्रपञ्चभाष्यम् ।

* **ईक्षाणः** — ईक्षमाणः ।

* **संस्कारापचयात् ध्वंसः इति** भोगहेतुवासनावसानात् तत्पदात् प्रच्यवते इति यावत् ।

* "**ब्रह्मण इति** यद्ब्रह्मणोऽन्यद्वस्तु शङ्क्यते तत् वस्तुतो ब्रह्मैव, ब्रह्माबोधात् ब्रह्मणोऽन्यत् तद्भाति । ततो ब्रह्मबोधात् ब्रह्मैव सूत्रादीति तत्र जन्मादिधीः भ्रान्तिः, धर्मिण्यसति धर्मायोगादित्यर्थः । यतःशब्दो यदित्यर्थे व्याख्येयः ।" इति **शास्त्रप्रकाशिका** ।

ब्रह्मभावोऽत्र नित्यः स्यात्कारणाद्यनपेक्षतः ।
* अनित्यमितरत्सर्वं यदविद्याविजृम्भितम् ॥ (1155)

अनित्यं दर्शनं ज्ञेयं नित्यस्यापि परात्मनः ।
मोहमात्रान्तरायत्वात् कादाचित्कं हि दर्शनम् ॥ (1156)

* अहमेव परं ब्रह्मेत्यस्यार्थस्याप्रबुद्धता ।
अविद्येति वयं ब्रूमः येह नास्ति सदाऽऽत्मनि ॥ (1157)

परात्मनि तु संबोधो नित्यः स्याच्छशिशीतवत् ।
तदन्यात्मस्वनित्योऽसौ मोहसंवीतबुद्धिषु ॥ (1158)

तत्रैवं सति योऽकार्त्स्न्यमित्वा ब्रह्माप्रबोधतः ।
सर्वात्मविद्ययाऽविद्यां हत्वा ब्रह्माभवत्पुमान् ॥ (1159)

नित्यत्वप्रसक्तिः, अत्राह—ब्रह्मेति । कर्मानपेक्षप्रमाणमात्रप्रकाश्यत्वादित्यर्थः । ब्रह्मभावः अनित्यः फलत्वात् कर्मफलवत्, अत्राह—अनित्यमिति । जडत्वमुपाधिरित्यर्थः । [1155] असदुत्पत्त्यनङ्गीकारात् अविद्यानिवर्तकज्ञानस्य नित्यत्वात् सदा संसारानुदयः स्यात्, अत्राह—अनित्यमिति । स्वप्रकाशावरणस्यानादित्वात् तन्निवर्तकज्ञानं कादाचित्कमित्यर्थः । [1156] तदावरणं कीदृशमिति दर्शयति—अहमिति । नास्ति परमार्थतः इति शेषः । [1157] [1]अविद्यानिवर्तकज्ञानवत् स्वरूपज्ञानमप्यनित्यं ज्ञानत्वाविशेषात्; अत्राह—परात्मनीति । [2]ज्ञानानन्तश्रुतिविरोध इत्यर्थः । तर्हि अज्ञाननिवर्तकज्ञानं नित्यं ज्ञानत्वात् स्वरूपवत्, अत्राह—तदन्येति । वाक्यजन्यत्वादनित्यमित्यर्थः । [1158] अहं ब्रह्मेत्यपरिज्ञानमविद्येत्युक्तम् । तत्र किं फलति, इत्यत्राह—तत्रेति ।

---

* "ब्रह्मभाववत् विद्याफलत्वात् सूत्रादिभावस्यापि नित्यत्वमाशङ्क्याह—अनित्यमिति ।" इत्यवतारयन्ति शास्त्रप्रकाशिकाकाराः ।

* अहमेवेति "सा अविद्या अहमेवेदं सर्वमित्येतस्यार्थस्यासंबोध इति ।" इति भर्तृप्रपञ्चभाष्यं शास्त्रप्रकाशिकोद्धृतं बोध्यम् ।

1. निवर्तकज्ञानवत्—वाक्यजन्यज्ञानवत् ।
2. ज्ञानानन्तश्रुतिविरोध इति अनन्तज्ञानरूपत्वबोधकश्रुतिविरोधः इत्यर्थः ।

पुरापि चात्मसंबोधात् ब्रह्मैवायं स्वतो ह्यभूत् ।
यतोऽतस्तत्त्वसंबोधात् ब्रह्म ब्रह्म प्रपद्यते ॥ (1160)

प्रत्यग्याथात्म्यसंबोधात्तदन्यत्रैव या मतिः ।
परार्था सा मतिर्ज्ञेया बाह्यकर्मव्यपाश्रया ॥ (1161)

अहं ब्रह्मेति यज्ज्ञानं स्वार्थमेव तदिष्यते ।
* सर्वप्रयोगबीजात्मभ्रान्तोच्छेदित्वहेतुतः ॥ (1162)

निःशेषपुरुषार्थानां ज्ञेयानां चापि कृत्स्नतः ।
प्रत्यक्तत्त्वपरिज्ञानसमुत्पत्तौ समाप्तितः ॥ (1163)

भर्तृप्रपञ्चप्रस्थानमेवमेतद्यथोदितम् ।
इतोऽन्यत्रापि तद्भाष्यं गमयेदेवमेव तु ॥ (1164)

तस्मिन्नर्थे एवं निश्चिते, यो ब्रह्मप्रबोधतः [1]अकात्स्न्र्यमित्वा—गत्वा स्थितः, सः अविद्यां हत्वा ब्रह्माभवत् इत्यन्वयः । [1159] परिच्छेदस्य अविद्याकार्यत्वात् ज्ञानात् तन्निवृत्तौ(शु)[मु]क्तिः, इत्येतदयुक्तम् । ज्ञानात् प्राग[2]स्य ब्रह्मभावस्यासिद्ध-त्वात्, अत्राह—**पुरापीति** । [1160] आत्मज्ञानस्य [3]कर्तृसंस्कारत्वात् कथं मुक्तिफलत्वम्, अत्राह—**प्रत्यगिति** । [1161] तर्हि [4]ज्ञानत्वात् ब्रह्मज्ञानमपि परार्थमित्यनुमीयताम्, अत्राह—**अहं ब्रह्मेति** । [1162] आत्मज्ञानस्य स्वातन्त्र्ये हेत्वन्तरमाह—**निःशेषेति** । [1163] उपोद्घातमुपसंहरति—**भर्तृप्रपञ्चेति** । यस्य ज्ञानं मुक्तिहेतुरिति मनुष्या मन्यन्ते, तद्ब्रह्म स्वात्मानमेव विदित्वा सर्वमभवत्, उत अविदित्वा, अन्यद्विदित्वा वा । आद्ये, जीवानामपि स्वज्ञानादेव

---

1. **अकात्स्न्र्य**—परिच्छेदम् ।
2. **अस्य**—साधकस्य ।
3. **कर्तृसंस्कारत्वात्**—यज्ञादिकर्मकर्तुः संस्कारत्वात्, आज्यावेक्षणवदित्यर्थः । तथाच परार्थत्वात् तत्र ज्ञाने फलश्रुतिः अर्थवाद इति भावः ।
4. **ज्ञानत्वादिति** आज्यावेक्षणादिवदिति शेषः ।

* **सर्वप्रयोगबीजेति** सर्वानुष्ठानकारणेत्यर्थः । तथाच कर्मानुष्ठानविरोधित्वान्नास्य ज्ञानस्य कर्मकर्तृसंस्कारतया परार्थत्वमिति भावः ।

ब्रह्मभाविरवं श्रुत्वा ये तु व्याचक्षतेऽन्यथा ।
तानुद्दिश्य विचारोऽयं प्रारब्धो गुरुभिः स्फुटः ॥ (1165)

यथोक्तसूत्रव्याख्यायां प्रयोजनविवक्षया ।
उपोद्घातोक्तदोषाणां परिहाराय यत्यते ॥ (1166)

तत्फललाभात् किं धिया । [1]द्वितीयेऽपि तथा । तृतीये, अनवस्था । ज्ञानकर्तृत्वे परस्याब्रह्मत्वं संसारिवत् । ज्ञानकर्मत्वे घटादिवदब्रह्मत्वम् । तस्मात् न ज्ञानं मुक्तिहेतुः, इतीदमुपोद्घातभाष्यं विवर्त(माना) [मता]नुसारेण व्याख्यातम् । तथा [2]अन्यदप्येतस्य भाष्यं विवर्तमतानुसारेण नेतव्यमित्यर्थः । [1164] कथं तर्हि [3]तन्मतं [4]भाष्यकृद्भिः निरस्यते, अत्राह—ब्रह्मेति । 'ब्रह्म वा इदम्' इत्यत्र "ब्रह्मशब्देन ब्रह्मभावी जीवोऽभिधीयते" इति तद्वचः श्रुत्वा, विवर्तो न भर्तृप्रपञ्चसिद्धान्तः इति ये भ्रान्ताः, तद्भ्रमनिरासार्थः भाष्यकारीयो विचारः इत्यर्थः । [1165]

दशमकण्डिकार्थनिरूपणम्
'ब्रह्म वा इदम्' इत्यादिपरिहारवाक्यस्य वृत्तिकारभाष्यकार-मतयोरनुरूपतात्पर्यवर्णनम्

[5]उपोद्घातवाक्यं [6]मतद्वये व्याख्याय, [7]परिहारवाक्यस्य मतद्वयानुरूपं तात्पर्यमाह—यथोक्तेति । 'आत्मे(त्येवे)त्येक[मिदं] सूत्रं कण्डिकाद्वय(त्रे)मेव वा' (वा. 1064) इत्याद्युक्त [8]सूत्रार्थप्रयोजनाभिविवित्सयेत्यर्थः । (1166) विद्या-

---

1. द्वितीयेऽपि तथेति अविदित्वैव सर्वभावे धीवैयर्थ्यमित्यर्थः ।
2. अन्यदप्येतस्य भाष्यं—उपोद्घातभाष्यातिरिक्तं परिणामवादानुसारितया प्रतिभासमानं भर्तृप्रपञ्चस्य भाष्यमपि ।
3. तन्मतं—भर्तृप्रपञ्चमतम् ।
4. भाष्यकृद्भिरिति भगवत्पादैरित्यर्थः ।
5. उपोद्घातवाक्यं—'तदाहुः' इत्यादि श्रुतिवाक्यम् ।
6. मतद्वये—भाष्यमते, भर्तृप्रपञ्चमते च । एवमुत्तरत्रापि ।
7. परिहारवाक्यस्य—"ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेत् अहं ब्रह्मास्मीति । तस्मात् तत्सर्वमभवदिति" इति श्रुतिवाक्यस्य ।
8. सूत्रार्थप्रयोजनेति सूत्रार्थभूतब्रह्मविद्यायाः प्रयोजनेत्यर्थः ।

ब्रह्मविद्योपदेशस्य विषयश्चावधार्यते ।
साक्षाद्ब्रह्माथवाऽब्रह्म यदि वोभयरूपकम् ॥ (1167)

समाशङ्कितनिःशेषदोषानागन्धितं स्फुटम् ।
श्रुतिः प्रतिवचः प्राह दोषमूलनिरासकृत् ॥ (1168)

ब्रह्मेति ब्रह्मशब्दोऽयं मुख्यब्रह्मार्थवाचकः ।
अपूर्वादिश्रुतेर्ज्ञेयः ब्रह्मत्वं न ततोऽन्यथा ॥ (1169)

* अविचारितसंसिद्धप्रत्यगज्ञानकारणात् ।
अब्रह्मेव तदाभाति मोहसंवीतचेतसः ॥ (1170)

प्रत्यक्संबोधविध्वस्तप्रत्यङ्मोहः परात्मनः ।
* संभावयति संबोधान्नान्यद्वस्त्वन्तरं यथा ॥ (1171)

फलसिद्ध्यर्थं उपोद्घातोक्तदोषः परिहार्यः, न च ब्रह्मविद्याफलं संभवति, तदर्हस्याधिकारिणोऽनभिधानात्, अत्राह—ब्रह्मेति । विषयः—अधिकारी, ब्रह्मैव वा, ततोऽन्यो वा, अन्यानन्यो वेति उत्तरवाक्येन निरूप्यते इत्यर्थः । (1167–1168)

भर्तृप्रपञ्चमतेन 'ब्रह्म वा इदम्' इत्यादिवाक्यार्थनिरूपणम्

एवं समुदायार्थमुक्त्वा भर्तृप्रपञ्च मतेन [1]उत्तरवाक्यस्थब्रह्मपदार्थमाह—ब्रह्मेति । [2]सर्वप्रकारपरिच्छेदरहितं वस्तु ब्रह्मपदेनोच्यते इत्यर्थः । [1169] कथं तर्हि परिच्छेदप्रतीतिः, अत्राह—अविचारितेति । [1170] अपरिच्छिन्ने परिच्छिन्नतया भानमविद्ययापि कथम्, अत्राह—प्रत्यगिति । बोधात् प्राक्सजातीयं विजातीयं च भासमानमपि निरस्तमोहो न संभावयति यथेत्यर्थः । [1171]

---

1. उत्तरवाक्यस्थेति 'ब्रह्म वा इदमग्र आसीत्' इति वाक्यस्थेत्यर्थः ।
2. सर्वप्रकारपरिच्छेदरहितमिति देशतः कालतः वस्तुतश्च परिच्छेदरहितमित्यर्थः ।

* अविचारितेति अनिर्वचनीयात् प्रत्यगज्ञानात् अज्ञस्य परिच्छेदधीरित्यर्थः ।

* वस्त्वन्तरं—स्वतन्त्रं अकल्पितं वस्त्विति यावत् ।

एवमेव महामोहसंवीतधिषणः पुमान् ।
ब्रह्मत्रापि स्वतो मोहान्न तत्संभावयत्यपि ॥ (1172)

'बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशाचवत् ।
बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवत् ॥' (1173)

यदि नामास्ति संभेदः साक्षात्कल्पितसर्पयोः ।
भीतं प्रत्यविशिष्टोऽसौ वास्तवत्वादनादृतः ॥ (1174)

प्रत्यक्तत्त्वं तमोमात्रव्यवधानादिहोच्यते ।
ब्रह्मभावीति, न पुनर्वस्तुतत्त्वव्यपेक्षया ॥ (1175)

दार्ष्टान्तिकमाह—**एवमेवेति** । [1172] उक्तार्थे **पुराणवाक्यमुदाहरति—बुद्धेति** । तत्त्वधीराहित्ये मिथ्याधीसद्भावे निष्प्रयोजनचेष्टावत्त्वे च क्रमेणोदाहरणत्रयम्[1] । [2]विदुषो द्वैतभानमसत्कल्पं, [3]अविदुषो ब्रह्म असत्कल्पम्, अपरिस्फूर्तेरित्यर्थः । [1173] द्वैतस्य मिथ्यात्वे व्यवहारहेतुत्वं न स्यात्, नियतप्राक्सतः कारणत्वात्, अत्राह—**यदीति** । यद्यपि आरोपितानारोपितसर्पयोः स्वरूपवैलक्षण्यमस्ति । तथापि कल्पितोऽसौ सर्पः भीतं प्रति [4]इतरसर्पेण [5]तुल्यः, वास्तवत्वात्—परमार्थसत्त्वात् व्यवहारो नादृतः, [6]तस्य व्यवहारदर्शनादित्यर्थः । [1174] 'ब्रह्म वा इदमग्र आसीत्' इत्यत्र जीवो ब्रह्मशब्देनोच्यते इति [7]तैरङ्गीकारात् कथं ब्रह्मशब्देन [8]मुख्यस्य ग्रहणम्, अत्राह—**प्रत्यगिति** । [1175]

---

1. **उदाहरणत्रयमिति** लोकस्येति शेषः ।
2. **विदुषो द्वैतभानमसत्कल्पमिति** 'बुद्धतत्त्वस्य' इति पूर्वार्धतात्पर्यार्थः । तत्र द्वैतभानशब्देन भासमानं द्वैतं विवक्षितमिति ज्ञेयम् ।
3. **अविदुषो ब्रह्मासत्कल्पमिति** उत्तरार्धतात्पर्यार्थः । बुद्धतत्त्वस्यापि, लोकात् व्युत्थितत्वे उपेक्षणीयत्वे लोकविपरीतचेष्टावत्त्वं चोदाहरणत्रयं बोध्यम् ।
4. **इतरसर्पेण**—अकल्पितसर्पेण ।
5. **तुल्य इति** भयजनकत्वेनेत्यादिः ।
6. **तस्य**—कल्पितसर्पस्य ।
7. **तैरङ्गीकारात्**—भर्तृप्रपञ्चैरङ्गीकारात् ।
8. **मुख्यस्य**—ब्रह्मशब्दमुख्यार्थस्यापरिच्छिन्नवस्तुनः ।

इदंधीशब्दगम्यं यद्ब्रह्मरूपाद्विशिष्यते ।
ब्रह्मैव तदुपाधीहेदंशब्देनाभिधीयते ॥ (1176)

योऽसावविद्योत्सङ्गस्थः प्राक्प्रविष्ट इतीरितः ।
* आभासान्तः स संमोहान्नामरूपात्मकोऽभवत् ॥ (1177)

अव्याकृतादि पिण्डान्तं पर एव त्वविद्यया ।
तदात्मत्वं समापेदे न त्वसौ परमार्थतः ॥ (1178)

प्रागात्मबोधात् पिण्डादौ याऽऽत्मेत्यासीन्मतिर्दृढा ।
सा तत्त्वमसंप्राप्य सिद्धा स्रगहिबोधवत् ॥ (1179)

अविद्याकल्पितांस्तस्मादन्वयव्यतिरेकतः ।
विधूयानात्मनोऽशेषांस्तत्प्रत्यग्रूपमैक्षत ॥ (1180)

* प्रत्यग्याथात्म्यविद्याग्निसंप्लुष्टाशेषतत्तमः ।
ब्रह्मैवात्मानमेवेति प्रत्यबुध्यत वाक्यतः ॥ (1181)

इदंशब्दार्थमाह—इदमिति । ब्रह्मैव कार्यावच्छिन्नमिदंशब्दवाच्यमित्यर्थः । [1176] नामरूपरहितस्य कथमिदमादिशब्दवाच्यत्वम्, अत्राह—**योऽसाविति** । अविद्योत्सङ्गस्थः—अज्ञानाङ्कसमारूढः । आभासान्तः—संमोहप्रतिबिम्बविशिष्टः साक्षीत्यर्थः । [1177] तर्हि कूटस्था(त्स)[स]ङ्गत्वादिविरोधः, अत्राह—**अव्याकृतादीति** । [1178] मिथ्यात्वं दृष्टान्तेन स्पष्टयति—**प्रागिति** । [1179] 'तदात्मा[न]मेवावेत्' इत्येतदर्थमाह—**अविद्येति** । यतः उक्तनीत्या प्रत्यग्भूतब्रह्मातिरिक्तं अविद्यात्मकं, तस्मात् [1]तन्निरस्य स्वात्मानमेव ब्रह्मावेदित्यर्थः । (1180) कर्तृकर्मभावेन [2]भेदात् 'स्वात्मानमेव इत्ययुक्तम्, अत्राह—**प्रत्यगिति** ।

---

* 'स्वाभासान्तः' इति मु. पु. पाठः ।

1. **तन्निरस्य**—प्रत्यग्ब्रह्मातिरिक्तं अन्वयव्यतिरेकाख्यतर्केण निरस्य ।

2. **भेदात्**—वेद्यवेदित्रोर्भेदात् ।

* "यत्तु तद्ब्रह्म विदित्वा सर्वमभवत्, अविदित्वा चेत्यादि, तत्राह—**प्रत्यगिति** । फलावस्थं ब्रह्म पूर्वार्धार्थः । तत् प्रत्यबुध्यतैवेति नावेदनप्रयुक्तदोषः । तच्चात्मानमेवाबुध्यतेति नानवस्था । ब्रह्मैव बुध्वा सर्वमभवत् तदात्मानमेव इत्यादिश्रुतेः । अतो

न हि प्लुष्टाखिलाविद्यः प्रतीच्यन्यन्मनागपि ।
प्रत्यग्दृष्ट्येक्षतेऽन्यस्य तदविद्यैकहेतुतः ॥ (1182)

अद्वैतविषयं चैतदेकं ब्रह्मेति भण्यते ।
समस्तव्यस्तता यस्मान्नेह प्रत्यग्धियेष्यते ॥ (1183)

मिथ्याभिमानात्संपत्तिरविद्योत्थासु भूमिषु ।
यत्र वा अन्यदित्येवं श्रुतिश्चापि जगौ तथा ॥ (1184)

निरविद्य इहाद्वैते भेदहेतोरसंभवात् ।
स्वत एवाभिसंपत्तिः यत्र त्वस्येति शास्त्रतः ॥ (1185)

तस्मात्तदिति विद्यायाः पूर्णता फलमुच्यते ।
तदन्यस्य त्वकृत्स्नत्वाज्जिहासाविषयत्वतः ॥ (1186)

(1181) एवमपि ब्रह्मात्मैक्यधीमात्रात् न संसारनिवृत्तिः, विदुषोऽपि तत्प्रतिभानात् । अतः अभ्यासादिना भवितव्यम्, इत्यत आह—न हीति । (1182) [1]तदविद्यैकहेतुत्वमसिद्धं, ब्रह्मणः समस्तव्यस्तरूपत्वात्, अत्राह—अद्वैतेति । सर्वप्रकारभेदाभावोपलक्षितमखण्डं वस्तु वेदान्तवेद्यं नानेकरसमित्यर्थः । (1183) समस्तादिरूपत्वाभावे परस्याकाशाद्यात्मत्वानुपपत्तिः, अत्राह—मिथ्येति । (1184) आकाशादिसंपत्तिवत् ब्रह्मसंपत्तिरपि अविद्याकृता स्यादात्मनः, अत्राह—निर(व)[वि]द्य इति । (1185) 'तस्मात्तत्सर्वमभवत्' इत्यस्यार्थमाह—तस्मादिति । (1886) ब्रह्मैव पूर्णं चेत्, न तस्य विद्यया पूर्णत्वम् । (चेन्)

न जीवानामविद्याकल्पितानां विशिष्टरूपज्ञानात् सर्वभावः इति भावः । यत्तु कर्तृत्वे संसारिवत्, कर्मत्वे घटवत् अब्रह्मतेति, तत्राह—न हीति । अविद्यादशायामेव तावत् क्रियाकारकादिव्यवहारः । आत्मदृष्ट्या प्लुष्टाविद्यस्तु आत्मा आत्मनि कर्तृत्वादिलेशमपि न पश्यति । तस्य आविद्यत्वात् । अतः कल्पितं कर्तृत्वाद्याश्रित्य आत्मानमेव बुध्यमानं ब्रह्म विद्यापास्ताविद्यातज्जं पूर्णं तिष्ठतीत्यर्थः ।' इति शास्त्रप्रकाशिका ।

1. तदविद्यैकहेतुत्वमिति प्रतीचोऽन्यस्येत्यादिः ।

यदिदंशब्दनिर्दिष्टं पूर्णाविद्यैकहेतुजम् ।
अहं ब्रह्मेति तद्ध्वंसात्पूर्णमेवाभवत्स्वतः ॥ (1187)

* भर्तृप्रपञ्चभाष्यस्य प्रचारोऽयं प्रदर्शितः ।
श्रुत्यक्षरानुसारेण तथानुभववर्त्मना ॥ (1188)

ब्रह्मेति ब्रह्मशब्देन द्वैतैकत्वात्मकं किल ।
भण्यते न परं ब्रह्म तस्य विद्यानपेक्षतः ॥ (1189)

परस्य ब्रह्मता यस्मादनन्यायत्तसिद्धिका ।
स्वत एव तु तत्सिद्धेर्नातस्तदभिधीयते ॥ (1190)

तथा कालानवच्छिन्नेरासीदिति न तत्प्रति ।
* घटते कालसंबन्धः, विरिञ्चेरुपपद्यते ॥ (1191)

अपूर्णं चेत्, कथमन्यस्यान्यभावः स्यात्, अत्राह—यदिदमिति । (1187) उपसंहरति—भर्तृप्रपञ्चेति । (1188)

भाष्यकारीयविचारः

परमतेन 'ब्रह्म वा' इत्यत्र ब्रह्मपदार्थनिरूपणम्

'ब्रह्मभाविनं श्रुत्वा' (वा. 1165) इत्यत्र [1]तद्भाष्यव्याख्यातृणां भ्रान्तिनिरासार्थो [2]भाष्यकारीयो विचारः इत्युक्तविचारं दर्शयितुं [3]तन्मतेन ब्रह्मपदार्थमाह—ब्रह्मेति । सूत्रात्मा उच्यते इत्यर्थः । (1189) [4]विद्यानपेक्षत्वे हेतुमाह—परस्येति । (1190) 'न परम्' इत्यत्र हेत्वन्तरमाह—तथेति ।

---

* भर्तृप्रपञ्चभाष्यस्य प्रचारः—तद्भाष्यस्य विवर्तवादानुसारेण प्रवृत्तिप्रकारः । भर्तृप्रपञ्चेषु बहुमानातिशयात् तदीयभाष्यं विवर्तवादानुसारितया योजितं वार्त्तिककारैरिति बोध्यम् ।

1. तद्भाष्यव्याख्यातृणां—भर्तृप्रपञ्चभाष्यव्याख्यानं कुर्वताम् ।
2. भाष्यकारीयः—भगवत्पादकृतः ।
3. तन्मतेन—परमतेन ।
4. विद्यानपेक्षत्वे इति परस्येत्यादिः ।

* 'विरिञ्चे तूपपद्यते' इति मु. पु. पाठः ।

नतु तस्यापि विज्ञानं नोपदेशव्यपेक्षया ।
जन्मनैवास्य तत्सिद्धेर्न युक्ता ब्रह्मगीरियम् ॥ (1192)

आसीदिति च निर्देशस्तस्मिन्नपि न युज्यते ।
विरिञ्चस्य त्रिकालत्वादासीदस्ति भविष्यति ॥ (1193)

यत एवमसन्तोषात्पक्षान्तरसमाश्रयः ।
मनुष्याधिकृतेर्वेति क्रियते पूर्वपक्षिणा ॥ (1194)

मनुष्याः प्रकृताः पूर्वं ते च निःश्रेयसार्थिनः ।
ब्रह्मणो न त्वनर्थित्वात् तथाचाप्रकृतत्वतः ॥ (1195)

ऋष्यादिवचसा चापि ब्रह्मविद्याऽविशेषतः ।
सर्वार्थैव समुद्दिष्टा नाग्रजन्मैकगोचरा ॥ (1196) *

(1191) अत्र ब्रह्मपदवाच्यत्वं हिरण्यगर्भस्याप्ययुक्तम्, इति शङ्कते—नन्विति । (1192) यत्तूक्तम्, 'विरिञ्चेरुपपद्यते' इति, तत्राह—आसीदिति चेति । अतीतकालमात्रसंबन्धिनि आसीत् इति प्रयुज्यते, नैव सूत्रात्म[नि, त्रि]कालत्वादित्यर्थः । (1193) '[1]मनुष्याधिकाराद्वा' इत्यादि भाष्यमुत्तरत्वेनावतारयति—यत इति । (1194) [2]मनुष्याधिकारं स्पष्टयति—मनुष्या इति । तस्मात् ब्रह्मभावी पुरुषो ब्रह्मशब्देनोच्यते इत्यर्थः । ब्रह्मशब्दस्य परस्मिन् मुख्यत्वात् [3]तस्यैव ग्रहणं किं न स्यात्, अत्राह—ब्रह्मण इति । (1195) तर्हि [4]एकत्वोपपत्तेः हिरण्यगर्भो गृह्यताम्, अत्राह—(तृ)[ऋ]ष्यादीति । 'तद्यो यो देवानाम्' इत्यादिना [5]सर्वेषां अविशेषेण ब्रह्मज्ञानं मोक्षहेतुरुच्यते, न हिरण्यगर्भमात्रस्ये-

---

1. मनुष्याधिकाराद्वेति "मनुष्याधिकाराद्वा तद्भावी ब्राह्मणः स्यात् ।" इति मतान्तरनिरूपकं भगवत्पादभाष्यमित्यर्थः ।
2. मनुष्याधिकारमिति ब्रह्मविद्यायामित्यादिः ।
3. तस्यैव—परस्यैव ब्रह्मणः ।
4. एकत्वोपपत्तेरिति 'ब्रह्म' इत्यत्रैकवचनार्थस्यैकत्वस्य सूत्रात्मनि आञ्जस्येनोपपत्तेरित्यर्थः ।
5. सर्वेषां—देवर्षिमनुष्याणाम् ।

* अग्रजन्मा—हिरण्यगर्भः ।

जन्मनैव तु तत्सिद्धेः नोपदेशव्यपेक्षता ।
'ज्ञानमप्रतिघं यस्य वैराग्यं चेति' च स्मृतेः ॥ (1197)

* द्वितैकत्वात्मकब्रह्मविद्याकर्मैकसाधनः ॥ (1198)

अपरब्रह्मतापन्नो भोज्याद्व्यावृत्तमानसः ।
निःशेषप्राप्त्या चोच्छिन्नकामकर्मादिबन्धनः ॥ (1199)

परब्रह्मपरिज्ञानभावनोपचयात् परः ।
ब्रह्मभावी परोऽतोऽत्र ब्रह्मशब्देन भण्यते ॥ (1200)

भविष्यद्वृत्त्या लोकेऽपि प्रयोगो दृश्यते यथा ।
ओदनं पचतीत्यादिः तथेहापि भविष्यति ॥ (1201)

गृहस्थो भार्यां विन्देत शास्त्रे चापि समीक्ष्यते ।
एवं व्याचक्षते केचित् गम्भीरन्यायवादिनः ॥ (1202)

त्यर्थः । (1196) [1]अयोगव्यवच्छेदमात्रस्य विवक्षितत्वात् हिरण्यगर्भग्रहे न विरोधः, अत्राह—**जन्मनेति** । (1197) तस्मात् जीवो ब्रह्मपदार्थः, इत्युपसंहरति—**द्वितेति** । [2]समुच्चयानुष्ठानात् प्राप्तसूत्रभावोऽपि विषयवितृष्णो नरः ब्रह्मशब्देनोच्यते इत्यर्थः । [3]सूत्रप्राप्तावपि कथं निरङ्कुशं वैराग्यम्, अत्राह—**निःशेषेति** । तदधिकफ(ल)[ला]भावात् सर्वतो विरक्तः शब्दात् परं ब्रह्म ज्ञात्वा भावयन् तदुपचयात् तद्भावीत्यर्थः । (1198-1199-1200) यो ब्रह्म भविष्यति स ब्रह्मेति भविष्यद्वृत्त्या प्रयोगे लौकिकोदाहरणमाह —**भविष्यदिति** । आदिपदेन घटं करोति इत्यादिसंग्रहः । (1201) 'शास्त्रे च' इत्यादिभाष्यस्थमादिपदं व्याचष्टे—**गृहस्थ इति** । 'गृहस्थः

---

1. **अयोगव्यवच्छेदमात्रस्येति** 'स एव तदभवत्' इत्यत्रेत्यादिः ।
2. **समुच्चयानुष्ठानात्**—हिरण्यगर्भोपासनकर्मसमुच्चयात् ।
3. **प्राप्तसूत्रभावः**—भावनोपचयात् सूत्रतादात्म्यमापन्नः । **तदुपचयात्**—परब्रह्म-भावनोपचयात् । **तद्भावी**—परब्रह्मभावी ।

* 'द्वैतैकत्वात्मक' इति मु. पु. पाठः ।

सर्वापत्तेरनित्यत्वदोषासक्तेर्न तत्तथा ।
साधनायत्तलब्धात्मा न लोकेऽस्त्यविनश्वरः ॥ (1203)

अथाविद्योत्थाकृत्स्नत्वनिवृत्तिं चेदिहेच्छसि ।
कल्पनेयं वृथैव स्यात् ब्रह्मभावीति या कृता ॥ (1204)

यतः प्रागपि तद्बोधात् सर्वो जन्तुः स्वभावतः ।
ब्रह्मत्वादाप्तत‌द्भावो नित्यमेव न साधनात् ॥ (1205)

केवलं तत्तमोमात्रव्यवधानैकहेतुतः ।
संभावयत्यकृत्स्नत्वं प्रत्यगात्मनि मूढधीः ॥ (1206)

यदविद्यैकहेतु स्यादब्रह्मत्वं न तु स्वतः ।
तद्यथावस्तुसंबोधात् मूलनाशात्प्रणश्यति ॥ (1207)

एवं चेत्स्यादभिप्रायः किमर्थं निष्प्रयोजनम् ।
मुख्यार्थं संपरित्यज्य पुंसि ब्रह्मेति कल्पनम् ॥ (1208)

सदृशीं भार्यां विन्देत' (गौ. ध-1-4-1) इति [1]**गौतमसूत्रम्** । पूर्वपक्षमुपसंहरति—**एवमिति** । (1202)

परकीयब्रह्मपदार्थदूषणम्

ब्रह्मपदेन परस्याग्रहणे मुक्तिरनित्या स्यात्, इति दूषयति—**सर्वेति** । साध्यस्यापि मोक्षस्य नित्यत्वं किं न स्यात्, अत्राह—**साधनेति** । [1203] आत्मनः अकृत्स्नत्वं, कल्पितं, अकल्पितं वेति विकल्प्य, आद्यमादत्ते—**अथेति** । तर्हि परमेव ब्रह्मपदार्थः स्यात्, इति परिहरति—**कल्पनेति** । (1204) **हेतुमाह—यत इति** । (1205) स्वतः पूर्णस्य अकृत्स्नत्वं कथम्, अत्राह—**केवलमिति** । (1206) अकृत्स्नत्वस्य कल्पितत्वे को लाभः, अत्राह—**यदिति** । (1207) 'कल्पनेयं वृथा' [वा. 12. 4] इत्येतदुपपादितमुपसंहरति—**एवं चेदिति** ।

---

1. **गौतमसूत्रमिति** "शास्त्रे च 'परिव्राजकः सर्वभूताभयदक्षिणाम्' इत्यादि" इति भाष्ये आदिशब्देन 'गृहस्थः सदृशीं भार्याम्' इति गौतमधर्मसूत्रं विवक्षितमिति समुदायार्थः ।

श्रुतार्थहानिरेवं स्यादश्रुतस्य च कल्पना ।
अपन्यायो वृथा च स्यात्पुमर्थासंभवादिह ॥ (1209)

अविद्योत्थातिरेकेण स्वत एवेति चेन्मतम् ।
अब्रह्मत्वं, न तद्धानिरुपायासंभवात् क्वचित् ॥ (1210)

अभिव्यञ्जकमेवेष्टं प्रमाणं न तु कारकम् ।
नापोढ्री नापि कर्त्रीयं विद्याऽतो वस्तुनः क्वचित् ॥ (1211)

स्वप्रमेयाखिलाज्ञानध्वंसिनीति समीक्ष्यते ।
विद्या लोके तथेहापि तद्ध्वंसिन्येव गृह्यताम् ॥ (1212)

सदानुदितानस्तमितभास्वद्विज्ञानमात्रतः ।
तद्विरुद्धतनुर्मोहः कुतो ब्रह्मणि चेन्मतम् ॥ (1213)

नानुभूत्यैव तत्सिद्धेः ज्ञातकुम्भानुभूतिवत् ।
न वेद्मीत्यनुभूतिर्हि सर्वेषामात्मसाक्षिका ॥ (1214)

[1208] कल्प[1]नानुपपत्तौ हेत्वन्तरमाह—**श्रुतार्थेति** । [1209] अकृत्स्नत्वं पारमार्थिकमिति कल्पान्तरमुत्थापयति—**अविद्योत्थेति** । दूषयति–**नेति** । [1210] उपायासंभवः असिद्धः, ब्रह्मज्ञानस्योपा[2]यत्वात्, अत्राह—**अभिव्यञ्जकमिति** । सामान्योक्तं न्यायं प्रकृते योजयति—**नापोढ्रीति** । पारमार्थिकं(वे)[चे]दकृत्स्नत्वं धीबाध्यं न स्यादित्यर्थः । [1211] [3]तर्हि प्रमाणज्ञानं कमतिशयं कुर्वत् फलवत् स्यात्, अत्राह—**स्वप्रमेयेति** । [1212] ब्रह्मज्ञानं नाज्ञाननिवृत्तिफलं ब्रह्मणि अज्ञानानुपपत्तेः, इति शङ्कते—**सदेति** । [1213] किं साधकाभावादज्ञानस्यानुपपत्तिः, उत स्वरूपज्ञानविरोधात् इति[वि]कल्प्य, आद्यं प्रत्याह–**नेति** ।

---

1. कल्पनानुपपत्तौ—ब्रह्मभाविपुरुषस्य ब्रह्मपदार्थत्वकल्पनानुपपत्तौ ।
2. उपायत्वात्—अकृत्स्नत्वहानेरुपायत्वात् ।
3. तर्हि—प्रमाणज्ञानस्य वस्तुजनकत्वनिवर्तकत्वयोरभावे ।

* अव्याकृताधिकारे च यदुक्तं प्राक् समासतः ।
ब्रह्मण्यविद्यासंसिद्ध्यै स्मर्तव्यं तदिहाखिलम् ॥ (1215)

विद्याविधानाच्चाविद्या ब्रह्मण्यस्तीति गम्यताम् ।
विद्याविधानं विज्ञाते पिष्टपेषणवद्यतः ॥ (1216)

अज्ञानमेव मिथ्याधीः प्रमेयानभिसंगते ।
रूप्याध्यारोपणं तस्मादुदाहारि गरीयसा ॥ (1217)*

अस्त्वविद्या परे भूम्नि यथोक्तन्यायगौरवात् ।
न तु ब्रह्मैव तां कुर्यात् सर्वज्ञं प्रत्यगात्मनि ॥ (1218)

* न हि धीपूर्वकारी सन्निःशेषानर्थदायिनीम् ।
प्रतीच्यविद्यां विसृजेद्याऽन्यत्रापि न काम्यते ॥ (1219)

[1214] । द्वितीयं दूषयति—**अव्याकृतेति** । [1215] 'तत्त्वमसि' [छा.6-8-7] इति विद्याविधानाच्च ब्रह्मणि अविद्या सिद्धा, इत्याह—**विद्येति** । [1216] ब्रह्मणि अविद्या त्व[1]या साध्यते । भाष्यकारैस्तु '[2]न हि शुक्तिकायाम्' इत्यादिना मिथ्याज्ञानं साधितम् । अतो विरो[3]धः, अत्राह—**अज्ञानमेवेति** । [1217] परस्याविद्याविषयत्वं स्वीकृत्य, तदाश्रयत्वं न युक्तम्, इति शङ्कते—**अस्त्विति** । (1218) अज्ञातत्ववदज्ञत्वमपि तस्यैव स्यात्, अत्राह—**न हीति** ।

---

* "ब्रह्मणि अज्ञातत्वमज्ञत्वं वा आक्षिप्यते । नाद्यः, 'अज्ञातार्थाधिगन्तृणि प्रमाणानि' इत्यादावुक्तन्यायविरोधात्, इत्याह—**अव्याकृतेति** चकारः संबन्धाधिकारसमुच्चयार्थः" इति **शास्त्रप्रकाशिका** ।

1. **त्वया**—वार्तिककृता ।

2. **न हि शुक्तिकायामिति** 'ब्रह्मणि विद्याविधानात्' इति संग्रहवाक्यानन्तरं प्रवृत्तेन "न हि शुक्तिकायां रजताध्यारोपणे असति शुक्तिकात्वं शाप्यते चक्षुर्गोचरापन्नायां इयं शुक्तिका न रजतमिति ।" इति भाष्यवाक्येनेत्यर्थः ।

3. **विरोधः**—व्याख्येयभाष्येण वार्तिकस्य विरोधः ।

* **गरीयसा**—भाष्यकृतेति यावत् ।

* "सर्वकर्तृत्वात् तत् अविद्यामपि करिष्यति, अन्यथा तदयोगादित्याशङ्क्याह—**न हीति**" इति **शास्त्रप्रकाशिका** ।

यद्यविद्या भवेत्कार्यमस्त्वेतद्यदिहोदितम् ।
अकार्यत्वात्त्वविद्यायास्त्वदुक्तं तुषकण्डनम् ॥ (1220)

अथोपचारात्कार्यत्वमविद्याविषयत्वतः ।
* **तथापि नापराधो नस्तदन्यासंभवादिह ॥** (1221)

न हि ब्रह्मातिरेकेण ब्रह्माविद्याकृदिष्यते ।
न ह्यन्योऽतोऽस्ति द्रष्टेति तथाच श्रुतिशासनम् ॥ (1222)

क्रिया वा कारकं वेह सदसद्वेह यन्मतम् ।
अप्रज्ञातात्मयाथात्म्यं ब्रह्मैव तदितीक्ष्यताम् ॥ (1223)

पुरुष एवेदं सर्वमात्मैवेदमिति श्रुतिः ।
नानुभूतेः प्रमाणाद्वा तदन्यद्वस्तु लभ्यते ॥ (1224)

(1219) सर्वज्ञत्वादविद्याश्रयत्वं विरुद्धमिति विवक्षितम्, उत अविकारित्वात् [1]तत्कर्तृत्वमिति । नाद्यः, अहं न वेद्मीति अविद्याश्रयत्वेन स्फुरणात् । द्वितीयं प्रत्याह—**यद्यविद्येति** । (1220) अविद्या[याः] कार्यत्वमनित्य[2]त्वात् दृश्यत्वाच्च घटवत्, इति शङ्कते—**अथेति** । उपचारशब्देन निवृत्तिरुच्यते । परिहरति—**तथापीति** । अस्तु अविद्यायाः कार्यत्वं, तथापि ब्रह्मैवात्मनि तां कुर्यादित्यर्थः । (1221) [3]अन्यासंभवं स्पष्टयति—**न हीति** । (1222) यद्यपि ब्रह्मणोऽन्यो द्रष्टा नास्ति, तथापि अनात्मास्ति, इत्याशङ्क्याह—**क्रियेति** । (1223) प्रमाणमाह—**पुरुष इति** । (1224) ब्रह्मणोऽन्यस्याज्ञस्याभावे शास्त्रारम्भानर्थक्यम्,

---

1. **तत्कर्तृत्वमिति** विरुद्धमित्यनुषज्यते ।
2. **अनित्यत्वादिति** निवृत्तिमत्त्वादित्यर्थः । ध्वंसप्रतियोगित्वादिति यावत् ।

* **नापराधो न इति** अविद्याकर्तृ ब्रह्मैव इति वदतामस्माकं न दोषः इत्यर्थः ।

3. **अन्यासंभवं**—ब्रह्मान्यस्यासंभवम् ।

ननु शास्त्रोपदेशोऽयमेवं सत्यफलो भवेत् ।
नासौ ब्रह्मणि साफल्यं नाप्यन्यस्मिन् समश्नुते ॥ (1225)

उपदेशानपेक्षत्वाद्ब्रह्मत्वस्य परात्मनः ।
असंभवात्ततोऽन्यस्य ह्युपदेशोऽफलो भवेत् ॥ (1226)

ब्रह्माकर्त्रपि संबोधात् प्रागभूत्तदसंसृति ।
अविद्यातज्जसंबन्धात् कर्तृत्वेऽपि न दोषभाक् ॥ (1227)

* प्रागज्ञातं तदैकात्म्यं यथैवानुभवान्मतम् ।
ब्रह्मास्मीत्यपि संबोधस्तथैवानुभवाश्रयात् ॥ (1228)

* प्रमेयाधिगमं कुर्वत्प्रमाणमफलं यदि ।
क्वान्यत्र फलवत्तत्स्यात् नातोऽन्यत् स्यान्मितेः फलम् ॥ (1229)

इति शङ्कते—**नन्विति** । (1225) ब्रह्मणः, अन्यस्य वोपदेशः । प्रथमं प्रत्याह—**उपदेशेति** । ब्रह्मत्वस्य स्वारसिकत्वादसंसारित्वाच्चेत्यर्थः । द्वितीयं दूषयति—**असंभवादिति** । (1226) ब्रह्मण्येवोपदेशसाफल्यं साधयन् परिहरति—**ब्रह्मेति** । स्वतो मुक्तमपि ब्रह्म प्राक् ज्ञानात् संसार्यासीदित्यर्थः । अविद्ययापि संसारित्वं चेत्, [1]इदमेव ब्रह्मशास्त्रानर्थक्यम्, अत्राह—**अविद्येति** । अविद्याकृतबन्धस्य [2]मिथ्यात्वात् तद्व्युदासेन शास्त्रमर्थवदित्यर्थः । (1227) स्वप्रकाशे अविद्या चेदस्ति, न निवर्तेत । स्वरूपज्ञानस्यानिवर्तकत्वात् अन्यस्य निवर्तकस्याभावात्, अत्राह—**प्रागिति** । स्वप्रभेऽप्यज्ञानमनुभवसिद्धं यथा, तथा तन्निवर्तकज्ञानमपि वाक्यजमनुभवादेव स्वीकार्यमित्यर्थः । (1228) अनुभवसिद्धमपि ज्ञानं निष्फलं ज्ञानिनोऽपि संसारदर्शनादज्ञा(ने)न नि[वृ]त्त्ययोगात्, अत्राह—**प्रमेयेति** ।

---

1. **इदमेवेति** स्थितस्य संसारित्वस्य निवृत्त्ययोगादिति भावः ।
2. **मिथ्यात्वादिति** तथा च ज्ञानात् संसारित्वनिवृत्तिः संभवतीति भावः
* **प्रागिति** वाक्यप्रवृत्तेः पूर्वमित्यर्थः ।
* "वाक्योत्थज्ञानमनुभवसिद्धमपि स्वप्रकाशे अतिशयाहेतुत्वात् अफलमित्याशङ्क्याह—**प्रमेयेति** । प्रमेयं-ऐकात्म्यं, तस्याधिगमः—तद्गताज्ञानतज्जध्वंसः । तत् कुर्वदपि मानमफलं चेत्, न क्वचित् तत् फलवत् स्यात् सकार्याज्ञानध्वंसान्यतत्फलाभावादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

सोत्प्रासमिव चाहातो बाढमित्येवमादिना ।
अस्त्वेषोऽवगते दोषः इतोऽन्यः कीदृशो गुणः ॥ (1230)

अथावगमवैयर्थ्यं भवता परिचोद्यते ।
तत्रापि चानवगमध्वस्तिः प्रतिवचो भवेत् ॥ (1231)

ऐकात्म्ये तन्निवृत्तिश्चेदसंभाव्येति चोद्यते ।
लब्धैकात्म्येन नैवेयं निवृत्तिः काम्यते श्रुतेः ॥ (1232)

अप्रसिद्धे त्वथैकात्म्ये निवृत्तिरिह चोद्यते ।
तथा दृष्टविरोधो वः प्राप्नुवन्न निवार्यते ॥ (1233)

विदुषोऽ[1]विद्यादर्शनं बाधितानुवृत्त्येत्यर्थः । (1229) ज्ञानस्यार्थवत्त्वमुक्त्वा, आनर्थक्यमवगते चोद्यते, [2]अन्यत्र वा, इति विकल्प्य, आद्यमङ्गीकुर्वन् [3]**भाष्यमवतारयति—सोत्प्रासमिति** । 'स्यादाच्छुरितकं हासः सोत्प्रासः सुमनाक्स्मितम्' इति निघण्टुः । (1230) अवगतिरेव स्व[प्र]काशे न युक्ता, [4]कृत्याभावात्, इति शङ्कते—**अथेति** । स्वप्रभेऽनवगमः तन्निवृत्तिश्चानुभूय[ते] इति परिहरति—**तत्रापीति** । (1231) नाज्ञाननिवृत्तेरद्वैतमते संभवः, [5]अद्वैतव्याघातात्, इत्याह—**ऐकात्म्य इति** । ज्ञाते वस्तुनि अज्ञाननिवृत्तेरनुपपत्तिः, अज्ञाते वा । आद्यं इत्याह—**लब्धेति** । ऐकात्म्यलाभस्य फलत्वात् [6]तदतिरिक्ताज्ञाननिवृत्त्यनुपपत्तिर्न दोष इत्यर्थः । (1232) द्वितीयं शङ्कते—**अप्रसिद्ध इति** । स्वरूपप्रकाशस्य अज्ञानानिवर्तकत्वात् अन्यस्य जडस्य तन्निवर्तकत्वायोगादिति [7]**अथशब्दार्थः** ।

---

1. **अविद्यादर्शनं**—आविद्यसंसारदर्शनमिति यावत् ।
2. **अन्यत्र वा**—अनवगते वा ।
3. **भाष्यमिति** 'बाढमेवम्, अवगतेऽस्त्वेवानर्थक्यम् ।' इति भाष्यमित्यर्थः ।
4. **कृत्याभावादिति** अवगतिकार्यस्य अनवगमनिवृत्तेः असंभवादित्यर्थः ।
5. **अद्वैतव्याघातादिति** अज्ञाननिवृत्त्या सद्वितीयत्वादिति भावः ।
6. **तदतिरिक्तेति** अज्ञाननिवृत्तेः श तत्त्वोपलक्षितात्मस्वरूपत्वात् नाद्वैतहानिरिति भावः ।
7. **अथशब्दार्थः** — वार्त्तिकस्याथशब्दस्यार्थः ।

सर्वस्यानुपपन्नत्वं सिद्धं दृष्टबलाश्रयात् ।
दृष्टस्यानुपपन्नत्वं किमाश्रित्याभिधीयते ॥ (1234)

उक्तानि तावद्भूयांसि दूषणानि विभागशः ।
अब्रह्मविषये क्लृप्ते ब्रह्मभावी पुमानिति ॥ (1235)

भूयोऽप्यस्यैव दार्ढ्यार्थं पूर्वपक्षाय यत्यते ।
वाक्यार्थाभाससंजातभ्रान्त्युच्छित्त्यै प्रयत्नतः ॥ (1236)

पुण्यः पुण्येन भवति पापः पापेन कर्मणा ।
संसारिणं समुद्दिश्य श्रुतिरेतदुदाहरत् ॥ (1237)

बोधेद्धा [1]बुद्धिस्तन्निवर्तिकेति मत्वा, दृष्टविरोधेन परिहरति—**तथेति** । (1233) दृष्टोऽप्यज्ञाननाशोऽनुपपन्नः, इत्यत्राह—**सर्वस्येति** । (1234)

'पुण्यो वै पुण्येन' इत्यादिभाष्यतात्पर्यनिरूपणम्

ब्रह्मभाविपुरुषकल्पनां निरस्य, स्वमते शास्त्रार्थवत्त्वमुक्त्वा, वृत्तं संकीर्तयति—**उक्तानीति** । (1235) 'पुण्यो वै पुण्येन' इत्यादि [2]भाष्यतात्पर्यमाह—**भूयोऽपीति** । जीवपरयोरेकत्वादेव [3]पूर्वपक्षनिरासस्य दृढत्वात् निरस्तमतोपन्यासोऽनर्थकः, अत्राह—**वाक्यार्थेति** । जीवपरयोरापातेन भेदप्रतिपादकवाक्य[ज]-भ्रमनिवृत्त्यर्थमित्यर्थः । (1236)

ब्रह्मेति ब्रह्मभावी पुरुष उच्यते इति युक्तमिति पूर्वपक्षः

भाष्योक्तश्रुतिमनूद्य तदर्थमाह—**पुण्य इति** । एतत्—कर्मतत्फलयोगित्वमित्यर्थः । (1237) वाक्यान्तरमपि संसारिविषयमस्ति, इत्याह—**तथेति** । '**एष**

---

1. **बुद्धिः** — अन्तःकरणवृत्तिः ।
2. **भाष्यतात्पर्यमिति** 'पुण्यो वै पुण्येन कर्मणा भवति' इत्यादिकस्य 'तस्माद्युक्तं ब्रह्मेति ब्रह्मभावी पुरुष उच्यते इति चेत् ।' इत्यन्तस्य भाष्यवाक्यजातस्य तात्पर्यमित्यर्थः ।
3. **पूर्वपक्षनिरासस्य**—ब्रह्मेति ब्रह्मभावी पुरुष उच्यते इति पक्षनिरासस्य ।

तथैष हीति विस्पष्टं संसार्येवाभिधीयते ।
तस्माद्विलक्षणस्तद्वदीश्वरोऽप्यभिधीयते ।
स एष नेति नेतीति य आत्मेत्यादिना तथा ॥ (1238)

तथाक्षपादकाणादतर्कशास्त्रेषु यत्नतः ।
उपपत्तिशतैरीशः साध्यते वादिभिः पृथक् ॥ (1239)

दुःखापनयनार्थित्वप्रवृत्तेर्दर्शनादपि ।
अत्यन्तभेदो विज्ञेयः संसारीश्वरयोरतः ॥ (1240)

तं विदित्वैतमेवेति कर्मकर्तृविभागतः ।
क्षेत्रज्ञेश्वरयोरुक्तेर्मृगव्याधादिभेदवत् ॥ (1241)

हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा' (प्र. 4-9) इत्यादिश्रुतेरपि परस्मादन्यः संसारीत्यर्थः । जीवस्य परस्माद्वैलक्षण्येऽपि, न [1]तस्य [2]ततो वैलक्षण्यम्, अत्राह—तस्मादिति । (1238) न केवलं परस्य वैल[3]क्षण्यं श्रौतम्, उपपन्नं च, इत्याह—तथेति । विमते क्षितिसलिले, प्रयत्नवद्धृते, गुरुत्वे सत्यपातित्वात् वियति विहङ्गमाङ्गव[त्] [4]इत्यादिन्यायै रित्यर्थः । (1239) जीवपरयोर्भेदे हेत्वन्तरमाह—दुःखेति । (1240) [5]मि(थेर)[थो]भेदे युक्तिमुक्त्वा, श्रौतं, लिङ्गमाह—तमिति । 'तं विदित्वा न (वि)[लि]प्यते' (बृ. 6-4-23) 'एतमेव प्रव्राजिनो लोकमिच्छन्तः' (बृ. 6-4-22) 'ए(वं)[तं] वै तमात्मानं विदित्वा' (बृ. 5-5-1) 'एतमितःप्रेत्याभिसंभवितास्मि'

---

1. तस्य—परस्य ।
2. ततः—जीवात् ।
3. वैलक्षण्यं—जीववैलक्षण्यम् ।
4. इत्यादिन्यायैरिति अत्रादिपदेन,

कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥
इति न्यायाचार्योक्तानि ग्राह्याणि ।

5. मिथो भेदे—जीवेश्वरयोः परस्परं भेदे ।

* मुमुक्षोर्गतिमार्गस्य देशभेदोपदेशतः ।
भेदेऽसति गतिः केयं गन्तृगन्तव्ययोर्भवेत् ॥ (1242)

दक्षिणोत्तरमार्गोक्तिस्तथा सति विरुध्यते ।
गन्तव्यदेशाभावाच्च गतिर्नैवोपपद्यते ॥ (1243)

तथाभ्युदयकैवल्यसाधनानां विधानतः ।
न हीश्वरस्य कैवल्यं साधनायत्तमिष्यते ॥ (1244)

ब्रह्मभावी ततो नेशः किन्तु तद्व्यतिरेकभाक् ।
संसार्येवाभिधीयेत यथोक्तन्यायगौरवात् ॥ (1245)

(छा. 3-14-4) इति [1]कर्मकर्तृभेदेन जीवपरयोरुक्तेः, [2]तयोरत्यन्तभेदो [3]मृगव्याधयोरिव, एकस्मिन् कर्मकर्तृत्वायोगादित्यर्थः । (1241) लिङ्गान्तरमाह—**मुमुक्षोरिति** । अग्न्यादिदेशभेदनिर्देशादित्यर्थः । गन्तृगन्तव्यभेदव्यतिरेकेणायं निर्देशः स्यात्, अत्राह—**भेद इति** । असति इति पदम् । (1242) तर्हि [4]मा भूत् गतिः, अत्राह—**दक्षिणेति** । [5]उत्तरमार्गोपदेशानर्थक्यमित्यर्थः । अभेदे गमनानुपपत्तौ कारणान्तरमाह—**गन्तव्येति** । (1243) जीवपरभेदे लिङ्गान्तरमाह—**तथेति** । परस्यैव साधनाधीना मुक्तिः स्यात्, अत्राह—**न हीति** । (1244) पूर्वपक्षमुपसंहरति—**ब्रह्मभावीति** । ब्रह्मशब्देन ईशो नोच्यते, किन्तु ब्रह्मभावी जीवोऽभिधीयते इत्यर्थः । (1245)

---

1. **कर्मकर्तृभेदेन**—कर्मत्वेन कर्तृत्वेन चेति यावत् ।
2. **तयोः** — जीवपरयोः ।
3. **मृगव्याधयोरिवेति** एकस्मिन् वेधनरूपधात्वर्थे कर्मणः मृगस्य कर्तुः व्याधस्य च अत्यन्तं भेदो दृश्यते, नैकता । तथा उदाहृतश्रुतिषु वेदनादिधात्वर्थे एकस्मिन् कर्तृत्वेन कर्मत्वेन च निर्दिष्टयोः जीवपरयोः अत्यन्तभेद एव नैकतेति समुदायार्थः ।

* **गतिमार्गस्य**—देवयानस्य पथः ।

4. **माभूत् गतिरिति** ज्ञानिन इति शेषः ।
5. ज्ञानिनं प्रति दक्षिणमार्गस्यानुपदिष्टत्वात्, तस्य गत्यभावे 'दक्षिणोत्तरमार्गोक्तिस्तथा सति विरुध्यते' इत्युक्तिः न संगच्छते । अतः, इष्टादिकारिणं प्रति दक्षिणमार्गोक्तिवत् ज्ञानिनं प्रति उत्तरमार्गोक्तिः न संगच्छते इति तदर्थमभिसन्धाय, विवक्षितं सारार्थमाह—**उत्तरमार्गोपदेशानर्थक्यमित्यर्थ इति** ।

नैवं ब्रह्मोपदेशार्थशास्त्रानर्थक्यसक्तितः ।
संसारिविद्ययैवास्य पुरुषार्थसमाप्तितः ॥ (1246)
न च ब्रह्मोपदेशस्य सर्वभावातिरेकतः ।
शक्यं फलान्तरं वक्तुं येनासावर्थवान् भवेत् ॥ (1247)
पुमर्थसाधनेऽन्यस्मिन् न चासौ विनियुज्यते ।
मन्त्रवत्तेन तच्छास्त्रं स्यादनर्थकमेव तु ॥ (1248)
मतं दुःखिन एवासौ संपदर्थं विधीयते ।
ब्रह्मास्मीत्यविनिर्ज्ञाते कथं ब्रह्मणि सा भवेत् ॥ (1249)
तस्मिंस्तु शास्त्राद्विज्ञाते शक्यते कर्तुमञ्जसा ।
ब्रह्मसंपदतः शास्त्रं तादर्थ्यादर्थवद्भवेत् ॥ (1250)
ननु ब्रह्म यदि ज्ञातं तावतैव कृतार्थता ।
न चेत् तत्संपदा किं स्यात् येन तामनुरुध्यते ॥ (1251)

उक्तपूर्वपक्षदूषणम्

सिद्धान्तयति—**नैवमिति** । हेतुमाह—**संसारीति** । यदत्र [1]ब्रह्मशब्दं तज्ज्ञानादेव मुक्तिश्रुतेः जीवस्य ब्रह्मशब्दत्वे तज्ज्ञानात् कैवल्याप्तेः 'तत्सत्यम्' इत्यादिब्रह्मोपदेशानर्थक्यमित्यर्थः । (1246) ब्रह्मोपदेशस्य मुक्तेरन्यत् फलमिति, नेत्याह—**न चेति** । (1247) कर्मविधिशेषत्वेनार्थ[2]वत्त्वं स्यात्, अत्राह—**पुमर्थेति** । (1248) ब्रह्मोपदेशस्य तदुपासनार्थत्वेनार्थवत्त्वं शङ्कते—**मतमिति** । ब्रह्मधियः तदुपासाङ्गत्वं व्यतिरेकद्वारोपपादयति—**अविनिर्ज्ञात इति** । (1249) व्यतिरेकमुखेनोक्तमन्वयमुखेनाह—**तस्मिंस्त्विति** । (1250) ब्रह्मविदः कृतार्थत्वात् किमुपासनेन, इति [3]चोदयति—**नन्विति** । (1251) ब्रह्मधीः न स्वतन्त्रा,

---

1. ब्रह्मशब्दं—ब्रह्मशब्दबोध्यम् । एवमुत्तरत्रापि ।
2. अर्थवत्त्वमिति ब्रह्मोपदेशस्येति शेषः ।
3. चोदयतीति चोद्यमिदं सिद्धान्तिनो बोध्यम् ।

नैव ब्रह्मावबोधस्य पाराार्थ्येन फलत्वतः ।
सर्वमेव यतो ज्ञानं परार्थं फलवन्मतम् ।। (1252)

उक्तत्वात्परिहारस्य नैवमेतद्भवेदिह ।
ब्रह्मज्ञानात्तदन्यत्र परार्थं ज्ञानमिष्यते ॥ (1253)

'सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते ।
पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधारणात् ।।' (1254)

सामानाधिकरण्यस्य तथा ब्रह्मात्मशब्दयोः ।
* श्रुतौ श्रुतेर्न संपत् स्यात् संपद्येष न हि क्रमः ।। (1255)

फलहेतुज्ञानत्वात् आज्यावेक्षणवत्; इति [1]पूर्ववादी परिहरति—नैवमिति। (1252) [2]शुक्तिज्ञाने व्यभिचारं मत्वा, संबन्धग्रन्थादौ प्रोक्तं स्मारयन् [3]परिहरति—उक्तत्वादिति। (1253) शब्दसाधुताज्ञानस्य शब्दे पुंसि वा संस्कारकारित्वेन प्रयोगाङ्गत्वं प्रकृत्य, व्याकरणाधिकरणे [4]वार्त्तिककारोक्तिमत्र मानत्वेनोदाहरति—सर्वत्रेति । [ननु] ज्ञानस्य विनियुक्तसंस्कारत्वं विनियोक्ष्यमाणसंस्कारत्वं वा न प्रतीयते । मैवं, उपांशुयाजाङ्गभूताज्यावेक्षणवदस्य विनियोक्ष्यमाणसंस्कारत्वोपपत्तिः, इत्याह—पराङ्गं चेति । तर्हि ज्ञानत्वादात्मज्ञानस्यापि कर्माङ्गता, तत्राह—आत्मेति। अपहतपाप्मादिशास्त्रेण ज्ञानं मोक्षहेतुमाचक्षाणेन तद्वर्जयित्वा ज्ञानान्तरं परार्थमित्यवधारणात् तत् स्वतन्त्रमेव मुक्तिफलमित्यर्थः । (1254) [5]इतिपदव्यतिरेकेण ब्रह्म(न्य)[त्म]पदयोः सामानाधिकरण्येन [6]तयो-

---

1. पूर्ववादी—ब्रह्मोपासनार्थत्वेन ब्रह्मोपदेशसार्थक्यवादी ।
2. शुक्तिज्ञाने व्यभिचारमिति ब्रह्मधीः न स्वतन्त्रा फलहेतुज्ञानत्वादित्यनुमानस्येत्यादिः ।
3. परिहरतीति सिद्धान्तीति शेषः।
4. वार्त्तिककारेति कुमारिलभट्टपादेत्यर्थः ।
5. इतिपदव्यतिरेकेण—इतिपदं विना ।
6. तयोः—ब्रह्मात्मनोः ।

* "संपत्पक्षेऽपि सामानाधिकरण्यं मनो ब्रह्मेति वत् स्यात् इत्याशङ्क्य विधायकपदातिरेकेण ब्रह्मात्मपदयोः सामानाधिकरण्यं तत्र न युक्तमित्याह—संपदीति" इति शा. प्रकाशिका ।
'सामानाधिकरण्येन' इति मु. पु. पाठः ।

आत्मा ब्रह्मेत्येवमादौ सामानाधिकरण्यगीः ।
अन्यस्यान्यत्र संपत् स्याद्द्वये सा कथं भवेत् ॥ (1256)

द्रष्टव्यस्यात्मनस्तद्वदैकात्म्यं श्रुतिरब्रवीत् ।
ब्रह्मादि सर्वमात्मेति संपन्नातोऽत्र युज्यते ॥ (1257)

तदापत्तिश्रुतेश्चेयं संपन्नेहोपपद्यते ।
ब्रह्मैव भवतीत्यादितदापत्तिवचांस्यपि ॥ (1258)

वचनात्स्यात्तदापत्तिः संपत्तेरिति चेन्मतम् ।
नैवं प्रत्ययमात्रत्वात् संपत्तेर्न तदिष्यते ॥ (1259)

तमोमात्रान्तरायत्वात् आप्तमप्याप्यते न तत् ।
न च संपत् तमोहन्त्री मिथ्याज्ञानात्मकत्वतः ॥ (1260)

रैक्यावगमाच्च [1]न संप(द)[त्पर]मित्याह—सामानाधिकरण्यस्येति । [1255] [2]तत् दर्शयति—आत्मेति । अद्वयत्वाच्चात्मनो न संपत्, इत्याह—अन्यस्येति । [1256] [3]अद्वयत्वमसिद्धम्, अत्राह—द्रष्टव्यस्येति । वेदान्तेषु प्रतिपिपादयिषितस्यात्मनो [4]ब्रह्मवत्, 'इदं सर्वं यदयमात्मा' (बृ. 4-4-6) इति [5]अद्वयमब्रवीदित्यर्थः । [1257] इतश्च न संपत्, इत्याह—तदापत्तीति [1258] सूत्राद्युपासनात् तद्भाववत् ब्रह्मोपासनादपि तद्भावः स्यात्, इति शङ्कते—वचनादिति । प्रत्ययप्रवाहस्य व्यञ्जकस्याकारकत्वात् अन्यभावसाधकत्वायोगात् । हिरण्यगर्भाद्युपासनादपि न [6]भाविकोऽन्यस्यान्यभावः, स्थितस्य नष्टस्य वा(त्व)[त]दयोगात्, इति परिहरति—नैवमिति । (1259) [7]तद्भावः स्वाभाविकश्चेत्, कुतो नानुभूयते, अत्राह—तमोमात्रेति । नाप्यते—नानुभूयते इत्यर्थः । तमोनिवृत्तिरेवोपासनाफलं, न ज्ञानफलम्, अत्राह—न चेति । (1260) सम्यग्ज्ञान(फल)स्य

---

1. न संपत्परमिति ब्रह्मोपदेशशास्त्रमिति शेषः ।
2. तत् दर्शयति—ब्रह्मात्मपदयोः सामानाधिकरण्यं दर्शयति ।
3. अद्वयत्वमिति आत्मनः इत्यादिः ।
4. ब्रह्मवत्—ब्रह्मत्ववत् ।
5. अद्वयं—अद्वयत्वम् ।
6. भाविकः—स्वाभाविकः, पारमार्थिक इति यावत् ।
7. तद्भावः—ब्रह्मभावः ।

तमोध्वंसातिरेकेण सम्यग्ज्ञानस्य नापरम् ।
फलमण्वपि संभाव्यं ज्ञानस्याकारकत्वतः ॥ (1261)

वस्तुनः शक्तिकृन्नापि वचनं ज्ञापकत्वतः ।
ज्ञापकानि हि शास्त्राणि कारकाणि न कुत्र चित् ॥ (1262)

अभीष्टपुरुषार्थस्य बाधश्चैवं प्रसज्यते ।
निःशेषपुरुषार्थाप्तिकारि ब्रह्मावबोधनम् ॥ (1263)

तादृक्षं संपदो न स्यात् न च दुःख्यात्मबोधतः ।
निःशेषपुरुषार्थाप्तिस्तद्बुद्धेरनृतन्त्रतः ॥ (1264)

अपूर्वाद्यर्थ एवैकः प्राधान्येन विवक्षितः ।
काण्डद्वयेऽपि नैतस्मादन्योऽर्थः कश्चिदीक्ष्यते ॥ (1265)

मुक्तिफलत्वात् नाज्ञा[न] निवृत्तिफलत्वम्, अत्राह—**तमोध्वंसेति** । (1261) स्थितस्य नष्टस्य वा अन्यात्मतानुपपत्तिरिति तर्कमात्रेण कथं तद्भावनिरासः, 'ब्रह्मविद्ब्रह्मैव भवति (मु. 3-2-9) इत्यादिवचनसिद्धत्वा[1]त्तस्य, इत्यत्राह—**वस्तुन इति** । (1262) ब्रह्मप्रतिपादनस्य उपासनाशेषत्वाभावे हेत्वन्तरमाह—**अभीष्टेति** । ब्रह्मात्मनोरैक्यज्ञानं प्रामाणिकं मुक्तिसाधनं [2]भवदिष्टं भज्येतेत्यर्थः । संसारिधियो मुक्तिहेतुत्वात् [3]स एव ब्रह्म[4]शब्दवाच्यः, अत्राह—**न चेति** । संसारिधियः अपुंतन्त्रत्वेन सदा सिद्धत्वात् न मुक्तिहेतुत्वम्, अन्यथा नित्यमुक्ति[5]पातादित्यर्थः । [1263-1264] जीवपरयोर्भेदे **बृहदारण्यकप्रतिपाद्यार्थभङ्गः**

---

1. **तस्य**—उपासनया ब्रह्मभावस्य ।
'ब्रह्म वेद ब्रह्मैव भवति' इति मुण्डके श्रूयते । न्यायकल्पलतिकाकाराः 'ब्रह्मविद्ब्रह्मैव भवति' इत्येव तद्वचनमुदाहरन्ति ।
2. **भवदिष्टं**—वृत्तिकारेष्टमिति यावत् ।
3. **स एव**—संसार्येव ।
4. **ब्रह्मशब्दवाच्य इति** ब्रह्म वा इदमित्यत्रेत्यादिः ।
5. **नित्यमुक्तिपातादिति** नित्यमुक्तिप्रसङ्गादिति यावत् ।

एतावदर इत्यन्त उपसंहारदर्शनात् ।
न चोपक्रमसंहारविरुद्धोक्तिः प्रशस्यते ॥ (1266)

तत्रैवं सति संसारी यद्यन्यो ब्रह्मणो भवेत् ।
इष्टस्यार्थस्य बाधः स्यान्न च ध्वान्तनिराकृतिः ॥ (1267)

आरम्भेऽवसितौ शास्त्रं परस्परविरोधतः ।
समञ्जसं न क्लृप्तं स्यात्संभवेऽप्यविरोधिनः ॥ (1268)

समाख्यानुपपत्तिश्च ब्रह्मणोऽन्यस्य वेदनात् ।
नापि रूढिस्तदन्यस्मिन्नश्वकर्णादिवद्भवेत् ॥ (1269)

आत्मेति वेत्तुरन्यश्चेत्, न ब्रह्माहमिति श्रुतेः ।
प्रतीचो ब्रह्मवत् प्रत्यग्ब्रह्मणोऽपि विशेषणम् ॥ (1270)

ब्रह्मतां न मदन्यत्र कौटस्थ्यान्मम नाशिषु ।
ब्रह्मणो नान्यतः प्रत्यक् साक्षात्त्वाद्ब्रह्मवस्तुनः ॥ (1271)

स्यात्, इत्याह—**अपूर्वादीति**। [1265] **मधुकाण्डे याज्ञवल्कयीयकाण्डे च** तस्यैव प्रतिपाद्यत्वे हेतुमाह—**एतावदिति** । अभेदेनोपसंहारेऽपि 'ब्रह्म वा इदम्' इत्यादौ भेदेनोपक्रमः स्यात्, अत्राह—**न चेति**। [1266] फलितं निगमयति—**तत्रैवमिति** । उपक्रमोपसंहारयोरिष्टस्याभेदस्य बाधः स्यादित्यर्थः । [1267] **ओमिति चेत्**, अत्राह—**आरम्भ इति** । [1268] 'ब्रह्म वा इदम्' इत्यत्र **ब्रह्मशब्देन** परस्याग्रहणे ब्रह्मविद्येति संज्ञाविरोधः, इत्याह—**समाख्येति** । **जीवज्ञाने** ब्रह्मविद्याशब्दो रूढः वृक्षविशेषे अश्वकर्णादिशब्दवत्, अत्राह—**नापीति** । आदिपदेन कर्णादिसंग्रहः । [1269] **अत्रोक्तब्रह्मशब्दार्थो** जीवादन्यः 'तदात्मानमे[वा] वेत्' इत्यत्रात्मपदेनोच्यते । तद्विद्या च ब्रह्मविद्या इति **संज्ञासिद्धिः**, इत्याह—**आत्मेतीति** । वाक्यशेषविरोधेन प्रत्याह–**नेति** । परस्य प्रत्यक्त्वेऽपि, प्रत्यक् परस्मादन्यः, घटाकाशस्य महाकाशाभेदेऽपि घटाकाशादिव महाकाशः, इत्यत्राह—**प्रतीच इति** । [1270] [1]अन्योन्याभेदं **विशदयति**—**ब्र(ह्मे)[ह्मते]ति** । ब्रह्मधर्मस्य कूटस्थत्वस्यात्मनि श्रुतत्वात्, **आत्मधर्मस्य**

---

1. **अन्योन्याभेदमिति** ब्रह्मात्मनोरित्यादिः ।

अव्यावृत्ताननुगतेर्मुख्यार्थश्च तथा सति ।
ब्रह्मविद्येति सिद्धः स्यात् व्यपदेशो न चान्यथा ॥ (1272)

भिन्नाभिन्नत्वगीर्यापि सापि दुःस्थितसिद्धिका ।
विरुद्धधर्मसंबन्धो न प्रतीच्यस्त्यधर्मिणि ॥ (1273)

धर्मधर्म्यभिसंबन्धा गृह्यन्तेऽनात्मवस्तुषु ।
* प्रत्यक्षादिप्रमाणेन नामीषामात्मनि ग्रहः ॥ (1274)

आत्मानात्मनिमित्तेऽपि व्यपदेशोऽपि दुर्घटः ।
विकल्पतो वा तत्सिद्धिः ब्रह्मसंसारिणोर्भवेत् ॥ (1275)

नचार्धवैशसं युक्तं तत्त्वज्ञाने विवक्षिते ।
संशयो हि तथा श्रोतुः स्यादनिश्चितवाक्यतः ॥ (1276)

साक्षात्त्वस्य ब्रह्मणि श्रवणात् तयोरैक्यमेवेत्यर्थः । [1271] तयोरभेदे ब्रह्मविद्येति व्यपदेशो मुख्यः स्यात्, इत्याह—अव्यावृत्तेति । [1272] प्रत्यग्ब्रह्मणोर्नाभेद एव भेदस्यापि स्वीकारात्, अत्राह—भिन्नेति । प्रतीचो निर्धर्मकत्वात् तत्र कथं भेदाभेदाख्यवि[1]रुद्धधर्मसंबन्ध इत्यर्थः । [1273] (ब्रह्म)[2][धर्म शून्यत्वं साधयति—धर्मेति । [1274] प्रत्यग्ब्रह्मणोर्भेदाभेदेऽङ्गीकृतेऽपि तद्विद्या ब्रह्मविद्या स्यात् ब्रह्मगोचरत्वात्, अत्राह—आत्मेति । निमित्तं—विषय[:] । [3]द्वयोः विषयत्वे ब्रह्मणैव विद्याया विशेष्यत्वं न स्यादित्यर्थः । कथं तर्हि स्यात्, अत्राह—विकल्पतो वेति । कदाचित् ब्रह्मविद्येति, कदाचित् संसा(रा)[रि]-विद्येति व्यपदेशः स्यात्, द्वयोस्त[4]द्विषयत्वादित्यर्थः । [1275] वस्तुनो [5]द्व्यात्मत्वात्

---

1. विरुद्धधर्मेति अस्थूलादिवाक्येन धर्मसामान्यस्य निरस्तत्वात् भेदाभेदरूपविरुद्ध-धर्मसंबन्धः सुतरां निरस्त इति भावः ।
2. धर्मशून्यत्वमिति आत्मन इत्यादिः ।
* नामीषामात्मनि ग्रह इति आत्मनः ।
प्रत्यक्षप्रमाणागोचरत्वात् तेनात्मनि धर्मधर्म्यभिसंबन्धानां ग्रहणं नेत्यर्थः ।
3. द्वयोर्विषयत्वे—ब्रह्मसंसारिणोः विद्याविषयत्वे ।
4. तद्विषयत्वात्—विद्याविषयत्वात् ।
5. द्व्यात्मत्वात्—भिन्नाभिन्नत्वादिति यावत् ।

निश्चितं फलवत् ज्ञानं यस्य स्यादिति शास्त्रतः ।
न तु संशयितं यस्मात् संशयात्मा विनश्यति ॥ (1277)

परमात्मन्ययुक्ता चेत् साधकत्वादिकल्पना ।
शास्त्रोपालम्भतो नैवं शास्त्रीयेयं प्रकल्पना ॥ (1278)

अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥ (1279)

* अनात्मवस्तु यत्किञ्चित् तद्ब्रह्मानवबोधतः ।
ब्रह्मण्येव समध्यस्तं शुक्तिकारजतादिवत् ॥ (1280)

विद्यापि द्विरूपा, इत्यत्राह—**न चेति** । [1276] संशयोऽपि स्यात् को दोषः, अत्राह—**निश्चितमिति** । 'यस्य स्यादद्धा न विचिकित्सास्ति' [छा. 3-14-4] इति श्रुतेरित्यर्थः । [1277]

चोद्यपरिहारपूर्वकं मुख्यब्रह्मण एव ब्रह्मपदार्थत्वनिरूपणम्

प्रत्यग्ब्रह्मणोर्भेदस्य भेदाभेदयोश्चासिद्धेः ब्रह्मैव ब्रह्मशब्देनोच्यते, न तद्भावी-(त)[ति]स्थितम् । अत्र चोदयति—**परमात्मनीति** । 'तदात्मानमेवावेत्' इति ब्रह्मणो ज्ञातृत्वोक्तिः स्वकर्तृकज्ञानात् मोक्षः इत्याद्य[1]युक्तमित्यर्थः । परिहरति—[2]**शास्त्रेति** । [1278] किञ्च, अल्पं त्वयोच्यते साधकत्वं तत्रायुक्तमिति, सकलसंसारस्य तत्रैवारोपितत्वात्, इत्याह—**अक्षमेति** । (1279) चिदेकरसे वस्तुनि तद्विपरीतस्यारोपितत्वं दृष्टान्तेनाह—**अनात्मेति** । (1280) सकलकल्पनामूलं

---

1. **अयुक्तमिति** क्रियाकारकफलविलक्षणे ब्रह्मणि ज्ञातृत्वादीनामयोग इत्यर्थः ।
2. **शास्त्रेति** तथाचाविद्य साधकत्वं स्वीकार्यमिति भावः ।

* " न संसारो ब्रह्मण्यध्यस्तः, तस्य नित्यमुक्तत्वात् ,जीवे त्वारोपितः तत्र तद्दृष्टेरित्याशङ्कयाह—**अनात्मेति** न तावत् जीवशब्दवाच्यः संसारी संसारान्तर्भावात् । तच्छब्दलक्ष्यार्थः ब्रह्मणो नातिरिच्यते । तत् ब्रह्मण्येव स्वाज्ञानात् अनात्मवस्तु अध्यस्तमनात्मत्वात् संमतवदित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

यस्मादेवमतोऽशेषसंसारानर्थकल्पना-
निदानबहुलाज्ञानसमुच्छित्त्यै परा श्रुतिः ॥ (1281)

ब्रह्मेति ब्रह्मशब्देन कृत्स्नं वस्त्वभिधीयते ।
प्रकृतस्यात्मकार्त्स्न्यस्य वैशब्दः स्मृतये मतः ॥ (1282)

प्रकृतार्थोपरोधाच्च मुख्यब्रह्मार्थलाभतः ।
यथोक्तदोषाभावाच्च ब्रह्म कृत्स्नमिहास्त्वतः ॥ (1283)

ननु मानादिविरहादकृत्स्नमपि नेष्यते ।
कुतः कार्त्स्न्यं यतः सर्वं मानादेव प्रसिद्ध्यति ॥ (1284)

अभ्युपेतौ च मानादेः तस्य कार्त्स्न्यं विहन्यते ।
न हि ब्रह्मातिरिक्तेऽर्थे सति संभाव्यतेऽजडैः ॥ (1285)

परं वस्तु ब्रह्मपदाभिधेयं यस्मात्, तस्मात् निःशेषानर्थनिदानाविद्यानिरासार्था 'ब्रह्म वा इदम्' इत्याद्या श्रुतिरारब्धा, इत्याह—**यस्मादिति** । (1281) स्वेष्टं ब्रह्मपदार्थमाचष्टे–**ब्रह्मेति** । 'अत्र ह्येते सर्वे एकं भवन्ति' (बृ. 3-4-7) इत्यात्मनः पूर्णत्वं प्रकृतम् । तत्स्मरणार्थो वैशब्द इत्यर्थः । (1282) ब्रह्मशब्देन अखण्डवस्तुग्रहे हेत्वन्तरमाह—**प्रकृतार्थेति** । आत्म[1]शब्देन अद्वयब्रह्मणः प्रकृतत्वात् भगवत्पादभाष्यप्रस्थाने[2]उपोद्घातोक्तदोषाभावाच्चेत्यर्थः । (1283)

ब्रह्मणः कृत्स्नत्वाक्षेपः तत्परिहारश्च

'यथोक्तदोषाभावात्' इत्युक्तमसहमानः चोदयति—**नन्विति** । (1284) अभ्युपेयतां तर्हि [3]तत्सिद्ध्यर्थं मातृमानादिकम्, अत्राह—**अभ्युपेतौ चेति** । (1285)

---

1. आत्मशब्देनेति 'आत्मेत्येवोपासीत' इति वाक्ये इत्यादिः ।
2. उपोद्घातेति 'तदाहुः' इत्यादिवाक्यविवक्षितदोषाभावाच्चेत्यर्थः ।
3. तत्सिद्ध्यर्थं—कृत्स्नवस्तुसिद्ध्यर्थम् ।

भिन्नाभिन्नत्ववादेऽपि ब्रह्माभिन्नात्मना भवेत् ।
* व्यावृत्तेन तु भिन्नेषु ब्रह्मता स्याद्घटादिवत् ॥ (1286)

वस्त्वन्तराभ्युपगमः प्रत्यक्कात्स्न्र्यविघातकृत् ।
न तु मानाभ्युपगमो मितेस्तदवज्ञानतः ॥ (1287)

* वस्त्वन्तरस्य सद्भावः सिद्धे कात्स्न्र्ये विरुद्ध्यते ।
मानाद्यपेक्षा सिद्धस्य नानुन्मत्तेन चोद्यते ॥ (1288)

* न चापि वास्तवी सिद्धिः प्रमात्रादिविरोधिनी ।
सत्यामेव यतस्तस्यां संसारानर्थविभ्रमः ॥ (1289)

* वास्तव्या अपि संसिद्धेः स्वमहिम्नैव नेष्यते ।
प्रमाणविरहात् सिद्धिरेतच्च स्वानुभूतितः ॥ (1290)

भेदाभेदवादे भेदांशेन मानादेरुपपत्तिः, अभेदांशेन ब्रह्मत्वस्य, इत्यत्राह—**भिन्नेति**। [1286] मानादेः कल्पितत्वात् नाद्वैतविरोधः, इति परिहरति—**वस्त्वन्तरेति**। [1287] किञ्च, प्रतिपन्ने अद्वैते मानादि विरुद्ध्यते, अप्रतिपन्ने वा। नाप्रतिपन्ने, इत्याह—**वस्त्वन्तरस्येति**। न प्रथमः, इत्याह—**मानादीति**। अवगते अद्वैते [1]मानादेरनपेक्षितत्वात् न विरोधशङ्केत्यर्थः। [1288] प्रतीचः स्वप्रकाशत्वात् स्वत एवाद्वितीयत्वेनापरोक्षत्वात् प्रमात्रादिविघातः; अत्राह—**न चेति**। [1289] स्वरूपप्रकाशस्याध्यस्तबोधकत्वमनुभवेन साधयति—

---

* **घटादिवदिति** घटादिवत् व्याकृतत्वात् भिन्नेषु सत्सु कृत्स्नता न स्यादिति भावः।

* **वस्त्वन्तरेति** आत्मभिन्नस्य पारमार्थिकस्य वस्तुन अभ्युपगम एव अद्वैतविरोधीत्यर्थः।

1. **मानादेरिति** विफलत्वेनेति शेषः।

* **वास्तवी सिद्धिः**—वस्तुस्वरूपस्फूर्तिः। स्वरूपानुभूतेः संसारभ्रमसाधकत्वात् न सा प्रमात्रादिसंसारविरोधिनीत्यर्थः।

* "वस्तुनः स्वरूपेण मानाद्यविरोधित्वे हेत्वन्तरमाह—**वास्तव्या इति** न हि वस्तु स्वरूपज्ञप्तेऽपि मानं विना स्वशक्त्यैव ज्ञप्तिरिष्टा। अज्ञानावृतायास्तस्याः मानादेवावरणवारणात्। अतो मानादिसापेक्षं वस्तु न तद्विरोधीत्यर्थः। अज्ञानध्वस्तिद्वारा मानापेक्षया वस्तुनः सिद्धिः इत्येतत् कुतः सिद्धम्, तत्राह—**एतच्चेति**।" इति शास्त्रप्रकाशिका।

* मेयकार्त्स्न्याविरोधित्वान्न मितेः शङ्क्यते भिदा ।
मेयस्वरूपावसितेर्नान्या मानस्य मानता ॥ (1291)

* न हि मेयप्रतिस्पर्धि तन्मानं मेयबोधितः ।
मानप्रसादात् सिद्धं सत् स्पर्धते मितिबाधितैः ॥ (1292)

न हि वस्त्वनपाश्रित्य मानत्वं लभ्यते मितेः ।
वास्तव्या अपि संसिद्धेः न सिद्धिः स्यात्प्रमां विना ॥ (1293)

स्वप्रमेयार्पणं मुक्त्वा मानत्वेऽन्यन्न कारणम् ।
अर्पितेन विरोधश्चेद्स्तु कामं न दुष्यति ॥ (1294)

वास्तव्या इति । [1290] मानापेक्षया वस्तुसिद्धौ मानात् भेदादद्वैतव्याघातः; इत्याशङ्क्य 'मितेस्तदवसान[तः]'(वा. 1287)इत्येतत् प्रपञ्चयति—**मेयेति** । [1291] उक्तमर्थं व्यतिरेकद्वारा उपपादयति—**न हीति** । मानस्य मेयानुसारित्वे मेयमप्यद्वयाख्यं मानाद्यविरोधीति द्वैतं तदवस्थमेव अत्राह—**मानेति** । [1292] तर्हि मेय[1]वत् मानस्या[पि]मेयविरोधिता स्यात्, अत्राह—**न हीति** । स्यादनात्मबोधकत्वेन मानस्य मानत्वं, स्वप्रकाशे [2]कृत्याभावात् न सदाश्रयं मानत्वम्, अत्राह— **वास्तव्या इति** । [1293] मानस्य मात्वसिद्ध्यर्थं स्वरूपसत्त्वस्योपेयत्वात् अद्वैतहानिः, अत्राह—**स्वप्रमेयेति** । स्वरूपसत्त्वं[न]मानत्वप्रयोजकं [3]प्रतिबिम्बादावव्याप्तेरित्यर्थः । मानं मेयविरोधि न भवतीत्युक्तम् । मितेनाद्वयेन विरोधात् मानस्य तत्र न मानता, इति शङ्कते—**अर्पितेनेति** । मितस्य मानानपेक्षणात्

---

* **मेयकार्त्स्न्याविरोधित्वादिति** मितेः—तत्त्वमादिवाक्यरूपमानस्य यत् मेयं कार्त्स्न्यं ऐक्यं तदविरोधित्वात् तद्भेदो न शङ्क्यते इत्यर्थः ।

* "अद्वैतमानं द्वैतात् भिन्नं, अभिन्नं वा । भिन्नं चेत्, तद्विरोधि स्यात् । अभिन्नं चेत्, न मानमेयभावः, एकत्र तदयोगादित्याशङ्क्य, आविद्यं भेदं मत्वाह—**न हीति**" इत्यप्यवतारयति **शास्त्रप्रकाशिका** ।

1. **मेयवत्**—मेयस्यैक्यस्य मानादिविरोधित्ववदिति यावत् ।
2. **कृत्याभावात्**—मानकार्यस्य आवरणध्वंसस्यायोगादिति यावत् ।
3. **प्रतिबिम्बादावव्याप्तेरिति** बिम्बानुमापके मिथ्याभूते प्रतिबिम्बे मानत्वसत्त्वेन तत्र सत्त्वाभावात् स्वरूपसत्त्वं न मानत्वे प्रयोजकमित्यर्थः ।

प्राग्ज्ञानात् ज्ञानकाले च मानं मेयोऽप्यपेक्षते ।
प्रमाणकार्ये निर्वृत्ते नान्यत्किञ्चिदपेक्षते ॥ (1295)

अज्ञातोऽर्थः प्रमेयः स्यात् ज्ञाते कोऽतिशयो मितेः ।
अज्ञाते न विरोधोऽस्ति ज्ञाते चान्यानपेक्षतः ॥ (1296)

मेयासाधारणात्मोत्थज्ञानस्यैवं प्रमाणतः ।
तस्य वस्त्वनुरोधित्वादभेदादविरोधिता ॥ (1297)

पश्येदात्मानमित्यत्र नियोज्यो विषयाद्धिरुक् । *
न लभ्यते यतो नात ऐकात्म्ये स्याद्विरुद्धता ॥ (1298)

ब्रह्मश्रुतेश्च मुख्योऽर्थः प्रतीचोऽन्यत्र दुर्लभः ।
यथा कथञ्चिदित्येतदतो नैवाभ्युपेयते ॥ (1299)

तद्विरोधो न दोषः, इत्याह—**अस्त्विति** । [1294] तर्हि विरोधिनो मेयस्य मानापेक्षानुपपत्तेः मेयार्पकत्वेन मानस्य मानता न स्यात्, अत्राह—**प्रागिति** । [1295] अद्वैते मानाविरोधं वक्तुं मेयं तावदाह—**अज्ञात इति** । तत्र अज्ञाते अद्वैतमानस्य विरोधः, ज्ञाते वा । नाद्यः, इत्याह—**अज्ञात इति** । न द्वितीयः इत्याह—**ज्ञाते चेति** । (1296) ज्ञाते विरोधाभावे हेत्वन्तरमाह—**मेयेति** । मेयतत्त्वबोधकज्ञानस्यैव प्रमाणत्वात् अद्वैतमानस्यापि अद्वैतानुगुणत्वात् स्वमेयाद्भेदाभावान्न विरोध इत्यर्थः । (1297) घटद्रष्टुः घटाद्भेद[वत्] ब्रह्मद्रष्टुः ब्रह्मणो भेदादद्वैतविरोधः, अत्राह—**पश्येदिति** । (1298) ब्रह्मविदो ब्रह्माभेदेऽपि ब्रह्म [1]ततो भिन्नम्, तत्राह—**ब्रह्मेति** । व्यावृत्तस्य ब्रह्मत्वायोगादेव [2]यथाकथञ्चित्पक्षोऽपि निरस्तः, इत्याह—**यथेति** । कृत्स्नस्यैव ब्रह्मत्वादङ्गीकरणवादो न

---

* **विषयात् हिरुक्**—दर्शनविषयाद्भेदेन । ब्रह्मद्रष्टुः विषयात् ब्रह्मणः वस्तुतो भेदो नास्तीत्यर्थः ।

1. **ततः**—ब्रह्मविदः ।

2. **यथाकथञ्चित्पक्षः**—'यथाकथञ्चिच्छब्दार्थो यदि नामाभ्युपेयते' (वा. 1102) इति वार्तिके उक्तः पक्षः ।

स्वत एवात्मनः कात्स्न्यान्न कात्स्न्यं साधनाश्रयम् ।
साधनायासतः प्राक् च ब्रह्मैवासीदितीरितम् ॥ (1300)

* आसीदित्यपि यः शब्दः स तन्मोहाद्यपेक्षया ।
वस्तुवृत्तमपेक्ष्यैतन्नासीदस्ति भविष्यति ॥ (1301)

सदानुदितालुप्तैकज्ञानमूर्तिरिति त्वया ।
कुतोऽज्ञायि विना मानात् मानं नाज्ञाततां विना ॥ (1302)

एकं ब्रह्म सदा बुद्धं यथा मानानुभूतितः ।
व्युत्पत्तेः प्रागविज्ञातं तथैवानुभवाश्रयात् ॥ (1303)

युक्त इत्यर्थः । (1299) ब्रह्मणः परतः कृत्स्नत्वे, किं क्रियातः, ज्ञानतः, उभयतो वेति यदुक्तम्, तत् कात्स्न्यस्य स्वतस्त्वस्वीकारात् निरस्तम्, इत्याह—**स्वत इति**। [1]स्वाभाविकत्वे मानमाह—**साधनेति**। साधनव्यापारादूर्ध्वं [प्राक् च] प्रत्य(कृत्व)[गा]त्मा ब्रह्मैवेति श्रुत्योक्तमित्यर्थः । (1300) 'आसीत्' इति [2]प्रागेव ब्रह्मत्वावधारणान्नो[3]र्ध्व[मि]ति, तत्राह—**आसीदिति**। आसीच्छब्दो नोत्पत्त्यपेक्षः, अपि तु अज्ञानहान्यपेक्ष इत्यर्थः । (1301) स्वप्रकाशे अज्ञा(न)[ना]योगात् तन्निवृत्त्यपेक्षोऽपि कथमासीच्छब्दः, अत्राह—**सदेति** । (1302) [4]न्यायसिद्धमज्ञातत्वमनुभवेन साधयति—**एकमिति** । ज्ञातत्ववदज्ञातत्वमनुभवसिद्धमित्यर्थः । (1303) 'ब्रह्मद्वारा त्वविद्येयं न कथञ्चन' [सं. वा. 176]

---

1. **स्वाभाविकत्वे इति** ब्रह्मणि कृत्स्नत्वस्येत्यादिः ।
2. **प्रागेव**—साधनव्यापारात् प्रागेव ।
3. **नोर्ध्वमिति** साधनव्यापारादित्यादिः ।

* "यत् ब्रह्मशब्देन परपरिग्रहे तस्य कालानवच्छिन्नेः, आसीदिति कालसंबन्धो न युक्त इति, तत्राह—**आसीदित्यपीति**। अज्ञानतत्कार्यापेक्षया वस्तुनि कालसंबन्धवाची शब्दः, न स्वरूपापेक्षया । 'अन्यत्र भूताच्च भव्याच्च ।' इति श्रुतेरित्यर्थः। एतदिति प्रत्यग्ब्रह्मोच्यते ।" इति **शास्त्रप्रकाशिका** ।

4. **न्यायसिद्धं**—मेयत्वानुपपत्त्या सिद्धम् ।

* व्युत्पत्तिफलमाश्रित्य तमोऽसंभव उच्यते ।
व्युत्पत्तेः प्राक् तमस्त्वित्वं तत्साक्षित्वेऽपि गम्यते ॥ (1304)

स्वसत्तयात्मनो मोहं न यतो वस्तु हन्त्यतः ।
शास्त्रानारम्भदोषोऽपि नैवास्मान्प्रति ढौकते ॥ (1305)

अनादेरपि बाधश्चेत्तमसो नाभ्युपेयते ।
* प्रमाणानां प्रमाणत्वं न क्वचिद्वः प्रसिद्ध्यति ॥ (1306)

अनुभूतेस्तदज्ञातं सिद्धं ब्रह्म पुरा मितेः ।
अपास्ताज्ञानतत्कार्यं तत्तु मानात्प्रसिद्ध्यति ॥ (1307)

पूर्वोक्त्यैवोत्तरेषाञ्च दोषाणां परिहारतः ।
परिहारान्तरं तस्मान्न वाच्यं तत्प्रसिद्धितः ॥ (1308)

इति पूर्वं ब्रह्मणि अज्ञानासंभव उक्तः । कथमिदानीं तद्विरुद्धं त(त्र)[त्रा]ज्ञानमुच्यते, अत्राह—**व्युत्पत्तीति** । (1304) शास्त्रानारम्भचोद्यं परिहरति—**स्वसत्तयेति** । (1305) अज्ञानस्यानादित्वादात्मवदनिवृत्तिः, अत्राह—**अनादेरिति** । (1306) मानानपेक्षस्यानुभवस्य अज्ञातत्वसाधकत्वे स्वात्मसाधकत्वमपि [1]तथैवास्तु, किं मानेन, अत्राह—**अनुभूतेरिति** । (1307) 'किमु तद्ब्रह्म यद्वेद्यम्' (वा. 1089) इत्येतच्चोद्यपरिहारेणैव 'किं वापि तद्वेत्' (वा. 1089) इत्येतच्चोद्यमपि परिहृतम्, इत्याह—**पूर्वेति** । तत्प्रसिद्धिः पूर्वचोद्यपरिहृत्यैव उत्तरचोद्यपरिहृतत्वसिद्धेरित्यर्थः । (1308) [2]एतदेव व्यनक्ति—**प्रतीच इति** ।

---

* **व्युत्पत्तीति** ज्ञानफलमज्ञानध्वंसोपलक्षितं स्फुरणमपेक्ष्य तद्रूपे ब्रह्मणि अज्ञानायोगः पूर्वमुक्तः । अत्र तु ज्ञानात्पूर्वं तस्मिन्नज्ञानं तद्ग्राह्युपेयमित्युच्यते इति न विरोध इत्यर्थः ।

* **प्रमाणानां प्रमाणत्वं न क्वचिद्वः प्रसिद्ध्यतीति** अज्ञाननिवर्तकत्वेनैव प्रामाण्यसिद्धिसंभवादिति भावः ।

1. **तथैवास्तु**—मानमनपेक्ष्यैवास्तु ।

2. **एतदेव**—पूर्वचोद्यपरिहारेण उत्तरचोद्यस्य परिहृतत्वमेव ।

प्रतीचोऽर्थस्य ज्ञेयत्वादनवस्था च नेष्यते ।
अकारकस्य कौटस्थ्याद्विरोधो नात्मदर्शने ॥ 1309)

घटादिमेयसाधर्म्ये निषेधोऽपि श्रुतीरितः ।
* यथोक्तावगमत्वं तु न कथं चिन्निवार्यते ॥ (1310)

तस्मान्न कश्चिद्प्यत्र कात्स्न्यत्मावगमे भवेत् ।
दोषोऽतः सांप्रतं भाष्यग्रन्थं व्याचक्ष्महे स्फुटम् ॥ (1311)

यत् स्रष्टृ ब्रह्म पूर्वोक्तं स्वात्ममोहैकवर्त्मना ।
कार्यं चैतन्यबिम्बेन प्रविष्टं जलचन्द्रवत् ॥ (1312)

---

[1]अन्यवेद्यत्वाभावान्ना[न]वस्था । [2]स्वप्रकाशत्वान्न [3]स्वात्मनि क्रियाविरोधः इत्यर्थः । (1309) श्रुतिप्रतिपाद्यस्य ब्रह्मणो विषयत्वात् घटतुल्यत्वम्, अत्राह—घटादीति । 'अन्यदेव तद्विदितात्' (केन. 1-4) [4]इत्यादिविषयत्वनिषेधात् शास्त्रस्य प्रमाण(क)त्वं न स्यात्, अत्राह—यथोक्तेति । (1310) अतः अखण्डैकरसे ब्रह्मणि वेदान्तप्रतिपाद्ये न कश्चिद्दोषः, इत्युपसंहरति—तस्मादिति । अज्ञाते मानप्रवृत्तिः, अज्ञानध्वस्तिश्च मानफलं संभवति यस्मादित्यर्थः । (1311)

'यत् प्रविष्टं स्रष्टृ ब्रह्म' इत्यादिभाष्यग्रन्थव्याख्यानम्

'स एष इह प्रविष्टः' (बृ. 3-4-7) इति यत् जगत्कारणमुक्तम्, तदे-

---

1. अन्यवेद्यत्वाभावात्—स्वात्मनोऽन्यस्य वेद्यत्वाभावात् ।
2. स्वप्रकाशत्वादिति आत्मनः इत्यादिः ।
3. न स्वात्मनि क्रियाविरोध इति विदिक्रियाकर्मत्वाभावादिति भावः ।

* यथोक्तेति अज्ञाननिवर्तकत्वेन ब्रह्मात्मनि शास्त्रस्य प्रामाण्यमिति भावः । "यत्तु श्रुत्यन्तरविरोधश्चेत्यादि, तत्राह—घटादीति । योऽर्थः, 'सत्यं ज्ञानं' 'विज्ञातारमरे केन' इत्यादिश्रुत्युक्तः, सोऽपि घटादेरिव ब्रह्मणः स्फूर्तिव्याप्यत्वनिषेधः, न वृत्तिव्याप्यत्वनिषेधः, अन्यथा औपनिषदत्वव्याकोपात् । अतो ब्रह्मविषयवृत्त्युपगमे न श्रुतिविरोध इत्यर्थः । तर्हि वृत्तिव्याप्यत्वात् घटवत् ब्रह्मणः स्फूर्तिव्याप्यता स्यादित्याशङ्क्य, कूटस्थस्फूर्तित्वं शास्त्रानुभवसिद्धं दुर्वारमिति नास्य तद्व्याप्यतेत्याह—यथोक्तेति ।" इति शास्त्रप्रकाशिका ।

4. इत्यादिविषयत्वनिषेधादिति इत्यादिना वाक्येन आत्मनि विदिक्रियाविषयत्वस्य निषेधादित्यर्थः ।

ब्रह्मेति ब्रह्मशब्देन तदेवात्राभिधीयते ।
तस्य योऽतिशयः प्रोक्तः व्याकृताव्याकृतात्मकः ।
इदमित्युच्यते ब्रह्म तदुपाधिस्वभावकम् ॥ (1313)

वैशब्दोऽवधृतौ ज्ञेयो ब्रह्मैव न तदन्यथा ।
अनिर्ज्ञातात्मतत्त्वं सद्ब्रह्मैवावभाति तत् ॥ (1314)

यदिदंशब्दधीगम्यं सम्यग्ज्ञानोदयात्पुरा ।
अपि ब्रह्मैव तत्कृत्स्नं तन्मोहादतथेक्ष्यते ॥ (1315)

रज्जुवत्तदविज्ञानात्सर्पदण्डादि नेक्ष्यते ।
ब्रह्मेदंमात्रश्रवणात् कुतोऽग्र इति भण्यते ॥ (1316)

वात्र ब्रह्मशब्दम्, इत्याह—यदिति । '[1]इदं शरीरस्थम्' इत्यादिभाष्यतात्पर्यमाह—तस्येति । [2]देहद्वयावच्छिन्नं ब्रह्म इदंपदप्रतिपाद्यमित्यर्थः । [1312-1313] आत्मकार्त्स्न्यस्मृत्यर्थो वैशब्दः इत्युक्तम् । इदानीं [3]भाष्यानुसारेणार्थान्तरमाह— वैशब्द इति । ब्रह्ममात्रत्वे कथं भेदधीः, अत्राह—अनिर्ज्ञातेति । [1314] तर्हि ज्ञानोदयादूर्ध्वमपि भेदधीः स्यात्, अत्राह—यदिदमिति । [1315] उदाहरणेनैतत् स्पष्टयति—रज्जुवदिति । अग्रेशब्दस्य [4]सप्रतियोगिकार्थस्य [5]प्रतियोग्यनिर्देशादनुपपत्तिः, इति शङ्कते—ब्रह्मेति । [1316] [6]जगदु-

---

1. इदमिति 'इदं शरीरस्थं यत् गृह्यते' इति भाष्यवाक्यम् ।
2. देहद्वयेति स्थूलसूक्ष्मदेहद्वयेत्यर्थः ।
3. भाष्यानुसारेण—'वैशब्दोऽवधारणार्थः' इति भाष्यानुसारेण ।
4. सप्रतियोगिकार्थस्य—नियमेन प्रतियोगिसाकाङ्क्षपूर्वकालार्थकस्य ।
5. प्रतियोग्यनिर्देशात्—पूर्वत्वप्रतियोगिनोऽर्थस्यानुक्तेः ।
6. जगदुत्पत्तेः पूर्वमिति अभेदेन अग्रेपदार्थमित्यनेनान्वेति । अग्रे इति पदस्य जगदुत्पत्तेः पूर्वमित्यर्थं प्रदर्श्य इति फलितार्थः ।

सूत्रान्तजगतो व्यक्तेः प्राक्तनः काल उच्यते ।
यद्वै तदिति तच्चापि स्पष्टमूर्ध्वं प्रवक्ष्यते ॥ (1317)

नाविद्यासंगतिस्तत्र तदकार्यत्वहेतुतः ।
तमोजस्यापि कार्यस्य न प्रतीच्यस्त्यकारणात् ॥ (1318)

* प्रत्यक्तयात्मसंबन्धान्मोहादेश्चिन्निभात्मता ।
आचिच्छेषादतो नासौ मृषा स्याद्धर्मकार्यवत् ॥ (1319)

प्रत्यग्याथात्म्यसंबोधान्नान्यो हेतुः समीक्ष्यते ।
निरन्वयविनाशाय योऽलं संसाररूपिणः ॥ (1320)

त्पत्तेः पूर्वं अग्रेपदार्थं [प्रदर्श्य] परिहरति—**सूत्रेति** । इदंशब्दवाच्यचैतन्यस सोपाधिकस्य [1]जगत्प्रागवस्थायां ब्रह्ममात्रत्वं 'यद्वै तन्न पश्यति' (बृ. 6-3-26) इत्यादिनापि व(क्ष)[क्ष्य]ते, इत्याह—**यद्वै तदिति** । [1317] जगतोऽज्ञान-कार्यस्य ब्रह्मत्वे, ब्रह्मणोऽज्ञानकार्यत्वात् अज्ञानस्य तत्र कारणत्वेनान्वयः स्यात्, अत्राह—**नाविद्येति** । ब्रह्मणोऽकार्यत्वात् न तत्राज्ञानस्य कारणत्वेन संगतिरित्यर्थः । तर्हि अज्ञानकार्यसंबन्धात् असङ्गत्वविरोधः अत्राह—**तमोजस्येति** । अकारणात्—ब्रह्मणः [2]तदकारणत्वादित्यर्थः । [1318] कार्यकारणप्रपञ्चस्य जडस्य ब्रह्मसंबन्धाभावे कथं सिद्धिः, अत्राह—**प्रत्यक्तयेति** । स्वरूपप्रक्षेप(णा)[णे]नात्मनो ब्रह्मसंबन्धे फलितमाह—[आ] **चिच्छेषादिति** । सर्वस्य आभिमुख्येन चिच्छेषात्—चिन्मात्रत्वात् अद्वैतसिद्धि-रित्यर्थः । कल्पितस्य चिन्मात्रत्वे चितोऽपि कल्पितत्वं स्यात्, अत्राह—**अत इति** । निरधिष्ठानकल्पनायोगात् [3]अधिष्ठानशेषात् [4]नासौ कल्पितः धर्मकार्यवत्—द्वैतवदित्यर्थः । (1319) द्वैतकल्पनामूलमज्ञान न केवलज्ञानेन निरस्यं, किन्तु

---

1. **जगत्प्रागवस्थायामिति** स्वापे इति यावत् ।
2. **तदकारणत्वादिति** अपूर्वानपरादिश्रुतेः ब्रह्मणः कार्यकारणान्यत्वादिति भावः ।
* 'तर्हि कथमिदमों मोहादेः ब्रह्ममात्रत्वम्, तत्राह—**प्रत्यक्तयेति**' इत्यवतारयति **शास्त्रप्रकाशिका** ।
3. **अधिष्ठानशेषात्**—अधिष्ठानस्य अवशिष्टत्वात् ।
4. **असौ**—चित् ।

कौटस्थ्यासङ्गतो नास्य मोहतत्कार्यसंगतिः ।
स्वतः सेद्धुमशक्तत्वात् मोहादेरात्मसंगतिः ॥ (1321)

कार्ण्येनेव वियद्योगः स्ववृत्तापेक्षया त्वसन् ।
आत्मनैवं तमोयोगो नात्मवृत्तानुरोधतः ॥ (1322)

अन्यतः सिद्धिः सेयमविचारितसिद्धिका ।
अविज्ञातचिदुत्सङ्गसंस्थैवेयं न वस्तुनि ॥ (1323)

अविद्याद्वारिकाप्यस्य संगतिर्नाञ्जसेष्यते ।
निरात्मकपरार्थत्वहेतुभ्यां शुक्तिरूप्यवत् ॥ (1324)

प्रत्यग्रूपातिरेकेण नान्यद्रूपमनात्मनः ।
वादिभिर्युक्तिभिः शक्यं क्वचित् साधयितुं सदा ॥ (1325)

* कूटस्थादितमोऽन्तेन नित्यमव्यतिरेकतः ।
बुद्ध्यादेर्विषयान्तस्य नित्यमेतदतो जगत् ॥ (1326)

कर्मसमुच्चितज्ञानेन, केवलकर्मणा वा निरस्यम्, अत्राह—**प्रत्यगिति** । [1320] आत्मसंबन्धितया प्रतीतमोहादेः कथं धीमात्रबाध्यत्वम्, अत्राह—**कौटस्थ्येति** । [1]तर्हि अज्ञानादेः स्वातन्त्र्यप्रसक्तिः, अत्राह—**स्वत इति** । [1321) अज्ञान-संबन्धस्य कल्पितत्वं दृष्टान्तेनाह—**कार्ण्येनेति** । [1322] [2]उपसंहरति—**अन्यत इति** । [1323] आत्मवृत्तापेक्षया अनात्मनः संगत्यभावेऽपि अविद्या-वृत्तापेक्षया आत्मसंगतिः पारमार्थिकी स्यात् आत्मतन्त्रत्वादविद्यायाः, इत्यत आह—**अविद्येति** । [1324] निरात्मत्वं जगतोऽसिद्धं, आत्मव्यतिरेकेण वादिभिः [3]तस्य सत्त्वसमर्थनात्, अत्राह—**प्रत्यगिति** । [1325] अनित्यस्य जगतः कथं नित्यात्ममात्रत्वम्, अत्राह—**कूटस्थेति** । कूटस्थश्चासावादिश्च

---

1. **तर्हि**—आत्मनः कूटस्थासङ्गस्य अज्ञानसंबन्धाभावे ।
2. **उपसंहरति**—आत्मानात्मसंबन्धस्य कल्पितत्वमुपसंहरति ।
3. **तस्य**—जगतः ।

* "विमतं ब्रह्मणोऽन्यत् अनिर्वाच्यत्वात् तद्वत् इति व्यतिरेकिणा जगतोऽर्थान्तरत्व-माशङ्क्य, हेतुप्रतिज्ञयोर्मिथो व्याहतिमभिप्रेत्याह—**कूटस्थादीति** कूटस्थश्च सर्वस्य

अतोऽविद्यामहानिद्रासंवीतमनसामसौ ।
जन्मादिविक्रियाषट्कं स्वप्नदर्शनविभ्रमः ॥ (1327)

यथाव्याख्यातबाह्यार्थप्रधानोऽसंहतोऽप्रमः ।
सर्वप्रमाणभाक् तद्वत्प्रमाणाभासभागपि ॥ (1328)

* अविचारितसंसिद्धि तमोवत्स्यात्तदुद्भवम् ।
कृत्स्नं जगदतो मोहध्वस्तौ ध्वस्तं भवेच्चितिः ॥ (1329)

* भिन्नमातृप्रमाणादौ कार्यकारणवस्तुनि ।
अभिन्नमातृमानादिरात्मैवैकोऽद्वयः स्वतः ॥ (1330)

कूटस्थादिः, स एव तमोऽन्तः । तेन अज्ञातप्रत्यगात्माभेदेनासत्त्वनिरासात् तद्रूपेण जगन्नित्यमित्यर्थः । अतः इत्यस्य अव्यतिरेकतः इत्यनेन संबन्धः । [1326] जगन्नित्यं चेत् कथं जन्मादिप्रतीतिः, अत्राह—अतोऽविद्येति । (1327) द्वैतस्याविद्यामात्रत्वे प्रत्यक्षादेर्निर्विषयत्वादमात्वम्, अत्राह—यथाव्याख्यातेति । प्रपञ्चोपाधिरात्मैव मानतदाभासानामाश्रयो विषयश्चेत्यर्थः । (1328) असंहतस्य [1]द्वैतोपाधित्वं विरुद्धमिति चेन्न, उपाधेः कल्पितत्वात्, इत्याह—अविचारितेति । अज्ञान(त)[व]त्तत्कार्यमिथ्यात्वफलमाह—अत इति । (1329) ध्वस्तस्य [2]चितित्वे ध्वंसात् प्रागात्मा नाद्वयः, अत्राह—भिन्नेति । जडप्रपञ्चे

मूलत्वेनादिश्च अज्ञानाविष्टतया तमोऽन्तश्च तेनात्मना सदा सर्वस्य अव्यतिरेकात् असत्त्वनिरासात् नित्यं जगत् । सदेव सौम्येति श्रुतेः । अतो बहिरवगतस्य जगतः अनिर्वाच्यतया ब्रह्मणोऽन्यत्वव्याघातात् आगमविरोधाच्च नोक्तानुमेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

1. द्वैतोपाधित्वं—द्वैतरूपोपाधिमत्त्वम् ।

* **ध्वस्तं भवेच्चितिरिति** ज्ञानादज्ञानध्वंसे, तज्जत्वात् जगत् ध्वस्तं चितिमात्रं स्यादित्यर्थः ।

2. चितित्वे—चैतन्यमात्रत्वे ।

* "प्रतीचोऽसंहतस्य संहतत्वमापाद्य मानतदाभासविषयत्वे मेयत्वापत्तिरित्याशङ्क्य, अप्रमेयत्वं प्रतिपादयन्नाह—**भिन्नेति** प्रपञ्चे प्रमात्रादिभेदमाजि प्रमेये सति, आत्मैव तद्भेदरहितः सन् अद्वयत्वादनपेक्षः स्वतः स्फुरति । अतो नास्य प्रमेयतेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

न देशकालावस्थादावपेक्षाऽस्त्यात्मनः स्वतः ।
अनन्यापेक्षसंसिद्धेः देशादेस्तदपेक्षतः ॥ (1331)

देशकालनिमित्तादिव्यपेक्षं वस्तु यद्भवेत् ।
तदेव तदपेक्षं स्यान्न तु देशादिसिद्धिदम् ॥ (1332)

प्रमात्राद्युत्थितेरग्रे ब्रह्मैवासीद्यथोदितम् ।
यतस्ततो न साध्यं तत् ज्ञानकर्मादिसाधनैः ॥ (1333)

ब्रह्मापि तत्स्वतः साक्षात् तद्बोधैकहेतुतः ।
इदं रूपं समापेदे रशनेवाहिरूपताम् ॥ (1334)

अविद्याफलकारूढं तदेवंरूपकं परम् ।
ब्रह्म विद्याधिकारित्वं द्वैविध्यात्प्रतिपद्यते ॥ (1335)

स्वतो मुक्तं यतस्तस्मात् ब्रह्म विद्यां तदर्हति ।
संसारित्वमविद्यातो मुमुक्षुत्वं ततो भवेत् ॥ (1336)

सत्यपि अजड आत्मा अद्वय इत्यर्थः । (1330) आत्मा नाद्वयः देशाद्यपेक्षत्वात् घटवत्, इत्यत्राह—**नेति** । आदिपदेन उत्पत्तिज्ञप्तिहेतुसंग्रहः । देशादेरात्मापेक्षत्वाच्च आत्मा तदनपेक्षः, इत्याह—**देशादेरिति** । (1331) अनात्मत्वस्य सापेक्षत्वप्रयोजकत्वाच्च, आत्मा निरपेक्षः, इत्याह—**देशेति** । (1332) 'इदं ब्रह्म' इति सामानाधिकरण्यलब्धमर्थमुपपाद्य, [1]वाक्यार्थमुपसंहरति—**[प्र]मात्रादीति** । सप्रपञ्चस्य चैतन्यस्य सदा ब्रह्मत्वात् तस्य न ब्रह्मता साधनाधीनेत्यर्थः । (1333) जीवस्य ब्रह्मत्वे कथं तद्विपरीतभावः, अत्राह—**ब्रह्मापीति** । (1334) ब्रह्मणोऽन्यस्य(चैतन्यस्य)[चेतनस्य] अभावे कस्य विद्याधिकारः, अत्राह—**अविद्येति** । [2]अन्तःकरणाद्युपहितमित्यर्थः । (1335) [3]द्वैविध्यमाह—**स्वत**

---

1. **वाक्यार्थं**—'ब्रह्मैवेदमग्र आसीत्' इति वाक्यार्थम् ।
2. **अन्तःकरणाद्युपहितमिति** एवंरूपकम् इत्यस्य विवरणं बोध्यम् ।
3. **द्वैविध्यमिति** परस्येत्यादिः ।

अध्यात्ममधिभूतं च तथा चैवाधिदैवतम् ।
* परं तदभिमानेद्धं तच्छब्देनाभिधीयते ।। (1337)

हिरण्यगर्भतां नीत्वा कृत्स्नमध्यात्मरूपकम् ।
तस्मै हिरण्यगर्भाय ब्रूयाद्विद्यां तमस्विने ।। (1338)

एवं निःशेषसंसारप्रत्याख्यानेन निर्वृतिम् ।
सर्वाविद्यापनिह्नुत्या विद्यया प्रतिपद्यते ।। (1339)

आत्मानात्मात्मकं विश्वं प्रत्यक्षादिप्रमाणकम् ।
आत्मानमेव तद्वेत् निष्ठां कार्त्स्न्यात्मनः पराम् ।। (1340)

* अविचारितसंसिद्धि सर्वानर्थैककारणम् ।
प्रत्यङ्मात्रैकसाक्षित्वात्तमस्तत्प्रत्यगात्मनि ।। (1341)

इति । (1336) संसारित्वं प्रकटयति—अध्यात्ममिति । [1]तत् [2]तच्छब्देनाभिधीयते इत्यर्थः । (1337) मुमुक्षुत्ववत् पदार्थधीरपि [3]वाक्यार्थधीहेतुः, इत्याह—हिरण्यगर्भतामिति । अन्वयव्यतिरेकाभ्यामपरिच्छिन्नत्वेन त्वंपदार्थज्ञस्य वाक्यार्थधीरित्यर्थः । (1338) विद्याफलं दर्शयन् निगमयति—एवमिति । (1339) 'तदात्मानमेवावेत्' इत्येतदर्थमाह—आत्मेति । चराचरविभक्तं जगत् [4]अन्वयव्यतिरेकाभावपरिहारेण आत्ममात्रत्वेन तत् ब्रह्मावेदित्यर्थः । (1340) संविद्रूपस्य ब्रह्मणोऽन(य)[व]गतत्वायोगात् 'आत्मानमेवावेत्' इत्ययुक्तम्,

---

1. तत्—परम् ।
2. तच्छब्देनेति 'तदात्मानमेवावेत्' इति वाक्यघटकतच्छब्देनेत्यर्थः ।
* अभिमानेद्धमिति—तत्र तत्र अहमभिमानेन आविद्येन ग्रस्तमित्यर्थः ।
3. वाक्यार्थधीः—तत्त्वमसीति महावाक्यार्थधीः ।
4. अन्वयव्यतिरेकाभावेति अन्वयः—अभेदः । व्यतिरेकः—भेदः । अभावः—शून्यता ।

* "ब्रह्मणः स्वात्मनि स्वरूपज्ञानस्य सदा भावात् किमौपदेशिकज्ञानेन इत्याशङ्क्य, तदर्थवत्त्वार्थमात्मन्यज्ञानं साधयति—अविचारितेति" इत्यवतारयति शास्त्रप्रकाशिका ।

प्रतीच्येव यतोऽज्ञानमतस्तत्तत्त्वविद्यया ।
सकार्ये तमसि ध्वस्ते आत्मैवैकोऽवशिष्यते ।। (1342)

विरक्तः सर्वसंसारान्निविवृत्सुः स्वतस्ततः ।
* संसारानलसंतप्तस्तद्विरुद्धं परीप्सति ।। (1343)

तस्याकृत्स्नापवादेन कृत्स्नैकात्म्यावबुद्धये ।। (1344)

अन्वयव्यतिरेकाख्यो व्यापारो विहितः पुरा ।
आत्मेत्येवेति विधिना पराक्प्रत्यग्विवेककृत् ।। (1345)

ऐकात्म्यं वीक्ष्यते तेन त्यक्त्वा सर्वाननात्मनः ।
कृत्स्नमेव यतो वस्तु तदन्यत्तदबोधजम् ।। (1346)

* कृत्स्नं पश्येदिति ततो वाक्यं वस्तुनि वर्तते ।

अत्राह—**अविचारितेति** । (1341) आत्म[न्य]ज्ञानसाधनफलमाह—**प्रतीचीति** । (1342) ब्रह्मलोकादिनिखिलपुमर्थनिवर्तके ब्रह्मज्ञाने कस्याप्यर्थित्वायोगात् अधिकार्यभावात् कथं ज्ञानादज्ञानतत्कार्यनिवृत्तिः, अत्राह—**विरक्त इति** । (1343) विरक्तस्य ज्ञानार्थित्वेऽपि धीसाधनं किम्, अत्राह—**तस्येति** । धीसाधनत्वेन विहितान्वयव्यतिरेकफलमाह—**परागिति** । (1344 - 1345) [1]विवेकफलमाह—**ऐकात्म्यमिति** । (1346) 'त्यक्त्वानात्मनः' इत्युक्तत्वात् आत्मानात्मभेदात् नैकात्म्यसिद्धिः, अत्राह—**कृत्स्नमिति** । वस्तुनोऽद्वितीयत्वात् अध्यस्त(बो)[बा]धेनाधिष्ठानतत्त्वपर्यवसितं वाक्यमुक्तमित्यर्थः । वस्तुनोऽद्वितीयत्वे ज्ञेयादन्यस्य ज्ञानाधिकारित्वात् तदभा(व)[वा]न्निरधिकारं ज्ञानं प्राप्तम्, अत्राह—**प्रविष्ट इति** । बुद्ध्यनुप्रविष्टः परिच्छेदाभिमानित्वादधिक्रिय[ते] इत्यर्थः ।

---

* **तद्विरुद्धं परीप्सति**—बन्धविरुद्धं मुक्तिहेतुज्ञानं आप्तुमिच्छति ।
1. **विवेकफलं**—पराक्प्रत्यग्विवेकफलम् ।
* " 'आत्मेत्येव' इति विधिना विहितः अन्वयादिव्यापारः इति ब्रुवता वाक्यस्य विधिनिष्ठत्वमिष्टमित्याशङ्क्याह—**कृत्स्नमिति** । विहितान्वयादिव्यापारस्य ऐक्यज्ञानावसानत्वात् वाक्यं साधनविधिद्वारा वस्तुनिष्ठमित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

प्रविष्टोऽकृत्स्नरूपत्वात्संसारानर्थचोदितः ।
आत्मेत्यनेन कृत्स्नात्मदर्शनाय नियुज्यते ॥ (1347)

कृत्स्न आत्मेत्यतो वाक्यात्तथारूपं दिदृक्षति ।
अन्योन्यार्थसमाप्तित्वात् न भेदोऽत्र पदार्थयोः ॥ (1348)

अकृत्स्नानात्मनः सर्वान् कृत्स्नांश्चानात्मनस्तथा ।
अन्वयव्यतिरेकाभ्यां तथा कृत्स्नाननात्मनः ॥ (1349)

निर्माल्यवत्परित्यज्य चैतन्याभासवर्त्मना ।
अनुनीयात्मनात्मानं कृत्स्नात्मानं प्रपश्यति ॥ (1350)

उक्तदोषापनुत्त्यर्थं प्रत्युक्तिर्गौरवी त्रियम् । *
ब्रह्म वा इदमित्यादिः नातो दोषोऽत्र कश्चन ॥ (1351)

(1347) अधिकृतस्यान्वयादिव्यापारेण [1]वाक्यार्थधीसिद्धेः वाक्यानर्थक्यम्. अत्राह—कृत्स्न इति । दिदृक्षति—पश्यतीत्यर्थः । कथमहं ब्रह्मेति धीः, [2]ब्रह्माहमर्थयोर्भेदात्, अत्राह—अन्योन्येति । (1348) अन्वयादिव्यापारस्य केन द्वारेण पदार्थधीसाधनत्वम्, अत्राह—अकृत्स्नानिति । प्रत्यन्तःकरणप्रविभक्तचैतन्याभा(स)[सा]नकृत्स्नात्मनः, कृत्स्नानात्मनः—विराड्हिरण्यगर्भाव्याकृताख्या(न)[न्], कृत्स्ना[ना]त्मनः—तद्(व्यक्ति) [व्यष्टि]शरीरलिङ्गसुप्त्याख्यान्, अन्वयादिना त्यक्त्वा, चैतन्याभासवर्त्मना—परित्यागोत्पन्नविवेकज्ञानेन, अनुनीयात्मनात्मानं—आत्मरूपेण त्वमर्थं ज्ञात्वा, कृत्स्नात्मानं प्रपश्यति—वाक्यादहं ब्रह्मास्मीत्यनुभवतीत्यर्थः । (1349-1350)

'तदात्मानमेवावेत्' इति वाक्यार्थप्रपञ्चनम्

'तदात्मानम्' इत्यादेरर्थं संक्षिप्तं प्रपञ्चयितुं [3]प्रतिवचनवाक्यं प्रस्तौति—

---

1. **वाक्यार्थधीसिद्धेः**—ऐकात्म्यधीसिद्धेः ।
2. **ब्रह्माहमर्थयोरिति** ब्रह्मपदार्थस्य अहंपदार्थस्य चेत्यर्थः ।
3. **प्रतिवचनवाक्यं**—'ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदिति ।' इति वाक्यम् ।

* **गौरवी**—गुरोरियं गौरवी, गुरुणोक्तेति यावत् ।

प्रमेयं यत्पुरा पृष्टं तद्ब्रह्म किमवेदिति ।
सर्वं चाप्यभवद्यस्मात् ज्ञानं ज्ञेयं च भण्यते ॥ (1352)

* तद्ब्रह्मात्मानमेवावेन्मेयं मानं च भण्यते ।
आत्मा मेयस्तथा मानमात्मप्रत्यय एव तु ॥ (1353)

नात्माज्ञानाद्यतोऽज्ञानं विद्यतेऽनात्मनस्ततः ।
नात्मयाथात्म्यविज्ञानात् ज्ञानमन्यदनात्मनः ॥ (1354)

प्रमात्रादिविभागेन यज्ज्ञानं प्रथते क्वचित् ।
तज्जन्मनः पुरेवार्थो न तेन ज्ञायतेऽञ्जसा ॥ (1355)

तमोमात्रावसायित्वान्न यथावस्तु तत्ततः ।
प्रत्यग्वस्त्वात्मकत्वेऽपि चित्रमज्ञानचेष्टितम् ॥ (1356)

उक्तेति । उक्तदोषः—[1]उपोद्घातोक्तदोषः । अत्र—ज्ञानान्मुक्तिरित्यत्र, न दोष इत्यर्थः । (1351) 'तदात्मानम्' इत्यादेस्तात्पर्यमाह–**प्रमेयमिति ।** किमवेदिति यन्मेयं, यस्मात् ज्ञानात् सर्वमभवदिति यन्मानं च पृष्टं, तदुभयमनेन वाक्येनोच्यते इत्यर्थः । (1352) कथमत्र [2]मानमेयोक्तिरिति, तत् स्पष्टयति—**तद्ब्रह्मेति ।** एवकारार्थमाह—**आत्मेति ।** (1353) [3]कथमुभयावधारणं, [4]अनात्मतज्ज्ञानयोर्भावात्, अत्राह—**नात्मेति ।** (1354) आत्मज्ञानमेव अनात्मज्ञानमित्ययुक्तम् । घटाद्याकारेण अनात्मनः स्फुरणात्, अत्राह—**प्रमात्रादीति ।** घटोऽयमिति ज्ञानोत्पादात् प्राक् यथा न तेन घटो ज्ञायते, तथा उत्पन्नेन तेन [5]घटो न ज्ञायते इत्यर्थः (1355) हेतुमाह—**तमोमात्रेति ।** मिथ्याधीत्वादित्यर्थः । जगतः

---

1. **उपोद्घातोक्तदोषः**—'तदाहुः' इत्यादिवाक्यविवक्षितो दोषः ।
2. **मानमेयोक्तिः**—मानमेययोरुक्तिः ।
* **तद्ब्रह्मेति** आत्मानमिति मेयोक्तिः, अवेदिति मानोक्तिरिति भावः ।
3. **उभयावधारणं**—मेयमानयोः, आत्मैव मेयः आत्मज्ञानमेव मानमित्येवंरूपमवधारणम् ।
4. **अनात्मतज्ज्ञानयोरिति** अपीति शेषः । अनात्मनोऽपि मेयत्वात् अनात्मज्ञानस्यापि मानत्वादिति भावः ।
5. **घटो न ज्ञायते इति** याथात्म्येन न घटो ज्ञायते इत्यर्थः ।

यत्प्रसादात्तमःसिद्धिः तत्स्वसाक्ष्यप्यपह्नुते ।
तमोऽप्यनुभवादेव प्राक् तद्व्युत्पत्तिजन्मनः ॥ (1357)

प्राक् प्रवृत्तेः प्रमाणानामज्ञातं यदिहोदितम् ।
* अक्षादि तत्तमोऽबाधान्न मानं रज्जुसर्पवत् ॥ (1358)

न पश्यन्तीत्यतः प्राह बोद्धृत्वादिसमन्वयम् । *
न हि मोहैकनिष्ठेन तद्धीनं वस्तु मीयते ॥ (1359)

आत्मानं विरहय्यान्यो नालमात्मावबुद्धये ।
असाधारणतन्मातृमानमेयात्मकत्वतः ॥ (1360)

प्रत्यङ्मात्रत्वे वैचित्र्यं न स्यात्, अत्राह—**प्रत्यगिति**। (1356) अज्ञानस्य कथमीदृशं सामर्थ्यम्, अत्राह—**यदिति**। अघटमानविधानपटीयसी मायेत्यर्थः। नानुभवात् तमःसिद्धिः, किन्तु प्रमाणात्, इत्यत्राह—**तमोऽपीति**। [1]मानव्यापारात्प्रागेव तमोऽनुभवादित्यर्थः। (1357) अक्षादेर्मात्वमुपेत्योक्तम्। तदेवासिद्धम्, इत्याह—**प्रागिति**। मानोदयात् प्राक् अज्ञातं यदात्म[त]त्त्वं 'तद्धेदम्' (बृ. 3-4-7) इत्यत्रोक्तं, तदज्ञाननिवर्तकत्वेन मानस्य मानत्वम्। जडस्याज्ञानाभावादक्षादेरात्माज्ञाननिवर्तकत्वाभावादमात्वमित्यर्थः। (1358) 'तं न पश्यन्ति' (बृ. 3-4-7) इति वाक्यादपि अक्षादेरमात्वं गम्यते, इत्याह—**नेति**। शब्दादिज्ञातृत्वविशिष्टमक्षादिभिः पश्यन्तोऽपि आत्मानं न पश्यन्तीत्यर्थः। हेतुमाह—**न हीति**। विशिष्टविषयाक्षादिना निर्विशेषं(नि)[न]मीयते इत्यर्थः। (1359) यद्यात्मनोऽक्षादिगम्यत्वं, तर्हि अनात्मा तन्माता, उतात्मैव वा। नाद्यः, इत्याह—**आत्मानमिति**। जडत्वादित्यर्थः। द्वितीयं दूषयति—**असाधारणेति**। प्रत्यगभिन्नोऽसाधारणः। तन्माता, मानं, मेयं, तद्रूपत्वात्, आत्मनि मात्रादिवि-

---

1. **मानव्यापारात्प्रागेव**—मानाधीनज्ञानात्पूर्वमेव। मानव्यापारपदेन वार्तिकस्थं व्युत्पत्तिपदं विवृतमिति बोध्यम्।

* **तत्तमोऽबाधात्**—अज्ञातप्रत्यगात्माज्ञाननिवर्तकत्वाभावात्।

* **बोद्धृत्वादिसमन्वयं**—बोद्धृत्वादिभिः संबन्धः यस्य तं, बोद्धृत्वादिसमन्वितमिति यावत्।

असाधारणमात्रादि प्रत्यग्वस्तु यतस्ततः ।
नियोगोऽपीह नायाति भिन्नकर्त्रादिगो ह्यसौ ॥ (1361)

सर्वमज्ञातमेव स्याद्यस्मिन्नज्ञात आत्मनि ।
ज्ञाते ज्ञातं च तत्कात्स्न्यात् तावत्त्वात्सर्ववस्तुनः ॥ (1362)

युक्त्या निरूप्यमाणस्य ह्यात्मा तत्त्वमनात्मनः ।
प्रत्याख्यातः स चेत्तेन क्वानात्मा सिद्ध्यतां ततः ॥ (1363)

अनात्मतत्त्वमन्वेति ह्यात्माऽसङ्गोऽगुणोऽद्वयः ।
असिद्ध्यन् स स्वतःसिद्धौ सिद्धिं क्वान्यत्र लप्स्यते ॥ (1364)

सर्वत्रादिविरोधेऽपि संवादोऽनुभवे यथा ।
वादिनामविसंवादः तथाऽज्ञानेऽप्यसंशयः ॥ (1365)

भागाभावात् नाक्षादिगम्यत्वमित्यर्थः । (1360) तर्हि [1]आगमगम्यत्वमपि न स्यात् तस्य [2]नियोगगोचरत्वात्, अत्राह—असाधारणेति । आत्मनि तज्ज्ञाने वा न नियोग इत्यर्थः । (1361) आत्मनः प्रमात्रादिविभागहीनत्वे किं मानम्, अत्राह—सर्वमिति । एकज्ञानेन सर्वज्ञानानुपपत्तिर्मानमित्यर्थः । (1362) तद[3]नुग्राहकतर्कमाह—युक्त्येति । (1363) आत्मनः अनात्मरूपत्वेनान्वये असङ्गत्वविरोधः अत्राह—अनात्मेति । आत्म[4]सत्ताप्रतीतिव्यतिरेकेण अनात्मसत्ताप्रतीत्योरनिरूपणाच्च अनात्मा तत्र कल्पितः, इत्याह—असिद्ध्यन्निति । (1364)

अनुभवोऽद्वितीयः, अनादि अज्ञानं बोधनिवर्त्यं इति सर्वाविसंवादी सिद्धान्तः निरसितुमशक्यः

एवमज्ञानतत्कार्यसाधकः अनुभवः अद्वयः कूटस्थः इत्युक्तम् । तदयुक्तम्, तत्र वादिवि(चार)[वाद]दर्शनात्, अत्राह—सर्वेति । अनुभवस्तावत् सर्वैः

---

1. आगमगम्यत्वमपीति आत्मन इत्यादिः ।
2. तस्य नियोगगोचरत्वात्—आगमस्य नियोगनिष्ठत्वात् ।
3. तदनुग्राहकेति मानानुग्राहकेत्यर्थः ।
4. आत्मसत्ताप्रतीतिव्यतिरेकेण—आत्मसत्तायाः आत्मप्रतीतेश्च भिन्नत्वेन

तद्वद्बाधोऽप्यबोधस्य बोधेनाभ्युपगम्यते ।
एतावतैव पर्याप्तमस्मद्राद्धान्तसिद्धये ॥ (1366)

अस्मद्राद्धान्तसंसिद्धौ नान्यराद्धान्तसिद्धता ।
* तत्सिद्धावस्य संसिद्धिर्न कथं चिन्निवार्यते ॥ (1367)

अज्ञानं संशयज्ञानं मिथ्याज्ञानमिति त्रिकम् ।
अज्ञानं कारणं तत्र कार्यत्वं परिशिष्टयोः ॥ (1368)

स्वीकार्यः अन्यथा व्यवहारायोगात् । तस्य स्वप्रकाशस्य भेदाद्यसिद्धे[र]द्वयत्वादि-सिद्धिरित्यर्थः । एवमपि अनाद्यज्ञानं वादिभिर्नोपगतम्, अत्राह—अविसंवाद इति । माना[1]र्थवत्त्वायाज्ञानमुपगतं, [2]तस्य कार्यत्वेऽनवस्थानादनादित्वमित्यर्थः । (1365) अनादित्वे तस्य चैतन्यवत् बाधो न स्यात्, अत्राह—तद्वदिति । सद्विलक्षणत्वात्तस्य निवृत्तिरिष्टा । अन्यथा व्यवहारभङ्गादित्यर्थः । किमतः, अत्राह—एतावतेति । अनुभवस्याद्वयत्वादज्ञानादेरनिर्वाच्यत्वादित्यर्थः । (1366) [3]त्वद्दृष्ट्या [4]त्वत्सिद्धान्तवत् [5]इतरदृष्ट्या इतरसिद्धान्तानामपि सिद्धिः, अत्राह—अस्मदिति । भेददृष्टेरज्ञानमूलत्वादित्यर्थः । भेददर्शनस्य प्रामाणिकत्वात् अभेददर्शनमज्ञानमूलमिति किं न स्यात्, अत्राह—तत्सिद्धाविति । भेदवादिभिरपि अनुभव[6]तत्स्वप्रकाशादेरवश्याभ्युपेयत्वादिति भावः । (1367) सिद्धान्तान्तराणामविद्यामूलत्वं विशदयति—अज्ञानमिति । सर्वे राद्धान्ताः प्रत्यगविद्याविलसिताः [7]तन्मूलभेदालम्बनत्वादित्यर्थः । (1368) अज्ञानस्य

---

1. मानार्थवत्त्वायेति अज्ञाननिवृत्तेरेव मानफलत्वादिति भावः ।
2. तस्य— अज्ञानस्य ।
3. त्वद्दृष्ट्या—अद्वैतिदृष्ट्या ।
4. त्वत्सिद्धान्तवत्—अद्वैतसिद्धान्तस्येव ।
5. इतरदृष्ट्या—वाद्यन्तरदृष्ट्या ।
6. तत्स्वप्रकाशादेः—अनुभवस्वप्रकाशत्वादेः । आदिना अनाद्यज्ञानस्य मानाधीनतन्निवृत्तेश्च परिग्रहः ।
* अस्य संसिद्धिः—अस्मद्राद्धान्तसिद्धिः ।
7. तन्मूलभेदेति अविद्यामूलकभेदेत्यर्थः ।

कूटस्थज्ञानमात्रत्वान्न तमोऽस्य स्वभावतः ।
नाप्यागन्तु तथाज्ञानं हिरुक् सिद्धेरसंभवात् ॥ (1369)

अविद्यातज्जकार्याणामात्मना संगतिस्ततः ।
आत्मात्मवत्स्वरूपा स्यान्न तु सोभयकर्मजा ॥ (1370)

एकमेव हि सद्वस्तु यद्वेदान्तप्रमाणकम् ।
तावन्मात्रैकनिष्ठत्वादात्मज्ञानं सदास्पदम् ॥ (1371)

* सर्ववादिविरोधेऽपि यत्सिद्धान्तबलाश्रयम् ।
साधनं दूषणं सर्वं न तन्निह्नुतिरिष्यते ॥ (1372)

साधनं दूषणं सर्वं यस्य पादव्यपाश्रयात् ।
सिद्ध्यते तीर्थदृशां कुतः स्यात्तस्य निह्नुतिः ॥ (1373)

(प्रीतिवा)[प्रतीचा]कः संबन्ध इति । [1]तत्र ऐक्याध्यासः, इत्याह—कूटस्थेति । उभयकर्मजेति । [2]संयोगलक्षणेत्यर्थः । (1369-1370) 'एकमेवाद्वितीयम्' (छा. 6-2-1) इत्यादिवाक्यैरात्मनोऽद्वितीयत्वावगमाच्च एवंविध एव संबन्धः, इत्याह—एकमिति । वाक्यजज्ञानस्य संसृष्टानेकाकारगोचरत्वात् कथं द्वैतमविद्याविलसितम्, अत्राह—तावन्मात्रेति । कार्यकारणप्रपञ्चस्य सन्मात्रत्वात् आत्मज्ञानं सन्मात्रनिष्ठं नानेकाकारमित्यर्थः । (1371) अनुभवः सर्ववाद्यभ्युपगतः इत्युक्तम् । शून्यवादिना तद[3]भावोपगमात्, अत्राह—सर्वेति । (1372) हेतुतदाभासलक्षणाधीनं दूषणादिकं, नानुभवबलाश्रयम्, अत्राह—साधनमिति ।

1. तत्र ऐक्याध्यासः — प्रतीचि तादात्म्याध्यासः अध्यस्यमानं तादात्म्यमिति यावत् ।
2. संयोगलक्षणेत्यर्थ इति अविद्यायाः तज्जकार्याणाञ्च आत्मना सह संगतिः—संबन्धः, आत्मात्मवत्स्वरूपा—अध्यस्ततादात्म्यरूपा, न संयोगरूपा इति अविद्यातज्जेति (वा. 1370)वार्तिकार्थः ।
3. तदभावोपगमात्—अनुभवाभावोपगमात् ।

* "स्वसिद्धान्तोक्त्या परसिद्धान्तानां भ्रान्तिमूलत्वमापाद्य स्वसिद्धान्तस्य अनिरस्यत्वमुपसंहरति—सर्वेति" इत्यवतारयति शास्त्रप्रकाशिका ।

अभावो येन भावेन भाव्यतेऽस्ति न नास्ति सः ।
तस्य भावस्य सद्भावो वद केन निवार्यते ॥ (1374)

व्यभिचारि न यत्रास्ति प्रमाणं सर्ववादिनाम् ।
स्वमहिम्ना च यत्सिद्धं तदपह्नूयते कथम् ॥ (1375)*

तस्यैवाव्यभिचारित्वात् सर्वेषु व्यभिचारिषु ।
तदेवैकं प्रमाणं नः सर्ववाद्यविरोधि यत् ॥ (1376)

लक्ष(णा)[णवा]दिनाप्यनुभवः[स्वी]कार्य इत्यर्थः । (1373) अनुभवाभावसाधकत्वेनापि अनुभवस्य स्वीकार्यत्वात् नासौ शक्यापह्नवः, इत्याह—**अभाव इति**। तदभावसाधकाभावाच्च न [1]तन्निह्नवः, इत्याह—**तस्येति** । (1374) स्वापे अनु[2]भवव्यभिचारात् [3]तस्य शून्यत्वम्, अत्राह--**व्यभिचारीति** । अवस्थात्रयसाधकत्वेन अनुभवः सदा स्फुरतीत्यर्थः । साध[4]कान्तरस्वीकारे अनवस्था, तदस्वीकारे साधकाभावादसिद्धिः, अत्राह—**स्वमहिम्नेति** । (1375) यत् सिद्धयति तत् मानादेवेति नियमात् मान्तरगम्यत्वे अनुभवस्य घटतुल्यत्वम्, अत्राह—**तस्येति** । अनुभव एव स्वात्मनि अन्यत्र च मानं, जडस्य(म)[मा]त्वायोगात् लोष्ठवदित्यर्थः । (1376) प्रतीचोऽव्यभिचारात् व्यभिचारिदेहा[5]दावा-

---

1. **तन्निह्नवः**—अनुभवनिह्नवः ।
2. **अनुभवव्यभिचारात्**—अनुभवविरहादिति यावत् ।
3. **तस्य**—अनुभवस्य ।
4. **साधकान्तरस्वीकारे इति** अनुभवस्येत्यादिः ।

* "सर्वपक्षेषु सर्वमानस्यानुभवाव्यभिचाराच्च न ह्नुतिरित्याह—**व्यभिचारीति** । तर्हि मेयतया घटादितुल्यतेत्याशङ्क्य, मानमेयादिसत्तास्फूर्तिप्रदत्वान्नैवमित्याह—**स्वमहिम्नेति** । अनुभवतत्त्वस्य निरासासंभवं निगमयति **तदिति** ।" इति **शास्त्रप्रकाशिका** ।

5. **देहादावात्मबुद्धययोगादिति** व्यभिचारित्वाव्यभिचारित्वाभ्यां देहादावात्मभेदमानादिति भावः ।

देहादावात्मबुद्धिर्नो न कदाचिद्विहन्यते।
जाग्रत्स्वप्नसुषुप्तेषु शुक्तिकारजतादिवत् ॥ (1377)

देहान्तात्कर्तुरन्यो यो बुद्ध्यन्तात् बोद्धुरेव च।
प्राणान्तात्करणाच्चान्यः प्रत्यग्दृष्ट्या य ईक्ष्यते ॥ (1378)

अदेहतोऽजरोऽमृत्युरस्वान्तोऽमोहशोकवान्।
अबुभुक्षोऽपिपासश्च प्राणकारणवर्जनात् ॥ (1379)

* अहीनो हीयते योऽसौ तथानागत एति यः।
जानीयात्तमनात्मानं जाग्रत्स्वप्नसुषुप्तिषु ॥ (1380)

न हीयते हीयमान आगच्छति न चैति यः।
आगमापायसाक्षित्वात् आत्मा सोऽनुभवाश्रयात् ॥ (1381)

त्मबुद्ध्ययोगात् सर्वव्यवहारलोपः, अत्राह—देहादाविति। [1]स्वापेऽपि देहादिसंस्काराद्दित्यर्थः। (1377) शुक्तिकारजतवदित्य(र्थःमु)[यु]क्तं, देहादावहंबुद्धेरबाधात् देहादेरेवात्मत्वात्, अत्राह–देहान्तादिति। [2]एको यःशब्दः सइत्यर्थः। चार्वाकाभिमतात्मनो देहादि[3]त्रितयात्, मीमांसकाद्यभिमतात्मनः अहंकर्तुः, गार्ग्याद्यभिमतात्मनः प्राणात्, अन्यो यः, सः आत्मबुद्ध्याऽवगम्यते इत्यर्थः। (1378) अत एव [4]देहादिधर्माः नात्मानं स्पृशन्ति, इत्याह—अदेह इति। (1379) अनात्मतद्धर्मास्पृष्टः प्रत्यक् इत्युक्तत्वात् अना[त्म]लक्षणमाह—अहीन इति। मत्-मत्त इति यावत्। (1380) आत्मलक्षणमाह—न हीयत इति।

---

1. स्वापे देहादावात्मबुद्ध्यभावमाशङ्क्याह—**स्वापेऽपीति**।
2. देहान्तात् इति वार्त्तिके यच्छब्दप्रतिसंबन्धितच्छब्दस्यानिर्देशमाशङ्क्याह—**एको यःशब्दः स इत्यर्थ इति** सः इत्यस्य योऽर्थः तदर्थकः इत्यर्थः। एको यः इति शब्दः तच्छब्दार्थे प्रयुक्त इति यावत्।
3. **देहादित्रितयात्**—देहः इन्द्रियं मनश्चेति त्रितयात्।
4. **देहादिधर्माः** — जरामरणशोकमोहाशनायापिपासाः षडूर्मिपदव्यपदेश्याः।

* '**मत्-मत्त इति यावत्**' इति न्यायकल्पलतिकया, '**मत्**' इति पदघटितः 'अहीनो हीयते' इति वार्त्तिकपाठः अनुमीयते। परन्तु मुद्रितपुस्तकेषु तथानुपलम्भात्, यथोपलब्ध एव वार्त्तिकपाठः स्थापितोऽस्माभिरिति बोध्यम्।

नाविद्यामनुपादाय प्रत्यक् कारकतां व्रजेत् ।
नाकारकः क्रियां कर्तुमलं जगति वीक्ष्यते ॥ (1382)

द्रष्टुर्दृष्ट्या न चानाप्तोऽनात्मा कश्चित्प्रसिद्ध्यति ।
* मिथ्याज्ञानमतोऽनात्मा ह्यात्माज्ञानसमुत्थितेः ॥ (1383)

नाविद्यामनुपादाय जाग्रत्स्वप्नसुषुप्तिषु ।
अनात्मानं विजानाति तज्ज्ञात्राद्यनन्वयात् ॥ (1384)

* न च ज्ञात्रनुरोधिन्या दृष्ट्याऽज्ञानासमन्वितम् ।
आत्माऽऽत्मानमलं द्रष्टुं रूपं श्रोत्रधिया यथा ॥ (1385)

उत्सार्यानात्मनः सर्वानन्वयव्यतिरेकतः ।
* प्रत्यक्प्रधानया दृष्ट्या पश्येदात्मानमद्वयम् ॥ (1386)

(1381) आत्मानात्मनोर्भिन्नलक्षणत्वे, भेदादद्वैतहानिः, अत्राह—नाविद्यामिति । क्रियाकारकादिभेदोऽविद्याविलसित इत्यर्थः । (1382) अनात्मा कल्पितः दृश्यत्वात् स्वप्नदृश्यवत्, इत्याह—द्रष्टुरिति । अज्ञानोत्थत्वाच्च मिथ्या, इत्याह—आत्माज्ञानेति । [1383] अज्ञानसमुत्थत्वं साधयति —नेत्यादिना । तज्ज्ञात्राद्यनन्वयादिति । अविद्यामन्तरेण तत्कार्यमात्रादेरात्मसंबन्धाभावादित्यर्थः । [1384] आत्मनोऽपि तर्हि ज्ञा(तत्वा)[तृ]ज्ञानगम्यत्वात् मिथ्यात्वापत्तिः, अत्राह—न चेति । [1385] कथं तर्हि [1]तद्दर्शनम्, अत्राह—उत्सार्येति । [1386] एवमा(त्मीयमेव)[त्मैव मेयः] तद्धीरेव

---

* मिथ्याज्ञानं—मिथ्याज्ञानविषय इति यावत् ।

* ज्ञात्रनुरोधिन्या दृष्ट्या—प्रमातृपरिणामरूपया दृश्यया दृष्ट्या । श्रोत्रधिया—श्रोत्रेन्द्रियजन्यवृत्त्या ।

1. तद्दर्शनं—शुद्धात्मदर्शनम् ।

* प्रत्यक्प्रधानया दृष्ट्या—प्रत्यङ्मात्राकारया वाक्योत्थया दृष्ट्या ।

त्वं ब्रह्मेति गुरोर्वाक्यात्सन्निविष्टपदार्थयोः ।
उक्तान्वयादिनोत्पन्नविवेकः सन्नबुध्यत ॥ (1387)

तद्ब्रह्मात्मानमेवावेदनात्मेत्यभूत्पुरा ।
अविद्यया, विद्यया तु ब्रह्मात्मैवाभवत्स्वतः ॥ (1388)

एवेत्यवधृतौ ज्ञेयं ब्रह्मात्मार्थविशेषणम् ।
आत्मैव ब्रह्म विज्ञेयं ब्रह्मैवात्मेति संभवात् ॥ (1389)

ब्रह्मता नात्मनोऽन्यत्र नात्मता ब्रह्मणोऽन्यतः ।
तद्याथात्म्याप्रबोधात्तु तयोरेष विपर्ययः ॥ (1390)

आत्मापि साक्षात् तद्ब्रह्म परोक्षं तदबोधतः ।
ब्रह्मैव तद्वदात्मापि सद्वितीयवदीक्ष्यते ॥ (1391)

वाक्योत्थसम्यग्विज्ञानप्रध्वस्ततमसो यतेः ।
विभागहेतोरुच्छित्तेः सर्वमात्मैव शिष्यते ॥ (1392)

विज्ञातारमरे केन विजानीयादिति श्रुतेः ।
ननु विप्रतिषिद्धार्थं तदात्मानमितीर्यते ॥ (1393)

मानम्, इत्युक्तम् । इदानीं तज्ज्ञानार्थं गुरुपादोपसर्पणं कार्यम्, इत्याह—त्वमिति । [1387] तद्ब्रह्म(श)[शि]ष्यभूतं गुरोर्वाक्यात् किमबुद्ध्यत, [त] दाह—तद्ब्रह्मेति । [1388] [1]एवकारार्थमाह—एवेति । तदवधारणप्रकारमाह—आत्मैवेति । [1389] [2]संभवमुपपादयति—ब्रह्मतेति । तर्हि [3]तयोः भेदधीः कथम्, अत्राह—तद्याथात्म्येति । [1390] विपर्ययप्रकारमीरयति—आत्मापीति । [1391] विपर्ययस्याज्ञानकार्यत्वफलमाह—वाक्येति । [1392] 'आत्मानमेवावेत्' इत्येतत् कर्मकर्तृविरोधाद युक्तम्, इति शङ्कते—विज्ञातारमिति । [1393] अविषयत्वेनात्मनो ज्ञानात् कर्म-

---

1. एवकारार्थमिति 'आत्मानमेवावेत्' इति वाक्ये इत्यादिः ।
2. संभवं—आत्मनि ब्रह्मत्वस्य, ब्रह्मणि आत्मत्वस्य च संभवम् ।
3. तयोः — ब्रह्मात्मनोः ।

दृष्टेर्द्रष्टेति विज्ञानान्नात्र विप्रतिषिद्धता ।
* प्रत्यग्बुद्धिः प्रमात्रादौ सर्वत्रैवोपजायते ॥ (1394)

युष्मदस्मद्विभागाभ्यां यावद्वस्त्विह मीयते ।
तेन तेन विशेषेण प्रत्यगर्थः प्रतीयते ॥ (1395)

प्रत्यगर्थमनालिङ्ग्य न पराग्वर्ति जायते ।
विज्ञानं तेन तत्पूर्वं सर्वमन्यत्प्रतीयते ॥ (1396)

आब्रह्मास्थाणु चान्वक्षं सर्वेषु व्यभिचारिषु ।
प्रत्ययोऽव्यभिचार्येकश्चैतन्यप्रतिबिम्बितः ॥ (1397)

न च विप्रतिपद्यन्ते वादिनोऽनुभवात्मनि ।
तत्र चेत्स्याद्विसंवादः केनान्येन चिकित्स्यते ॥ (1398)

अन्योऽपि योऽत्र कल्प्यः स्यात् सोऽप्यस्मान्नैव भिद्यते ।
सर्वभेदात्मरूपत्वात् कः सन्स्यादात्मना विना ॥ (1399)

कर्तृविरोधो नास्ति, इति परिहरति—**दृष्टेरिति** । दृष्टिद्रष्टृत्वं साधयति—**प्रत्यगिति** । प्रत्यगेव बुद्धिः—प्रत्यग्बुद्धिः चैतन्यम् । सा प्रमात्रादौ साक्षित्वेन भाति । इतरथा जडसिद्ध्ययोगादित्यर्थः । [1394] तर्हि साक्षिसाक्ष्यभेदः स्यात्, अत्राह—**युष्मदिति** । (1395) न तर्हि साक्षित्वं [1]भेदाभावात् इत्याशङ्क्य कल्पितभेदात्तदुपपत्तिः, इत्याह—**प्रत्यगर्थमिति** । (1396) कथं सर्वस्य [2]तत्पूर्वत्वं, अनुभवस्य क्षणिकत्वात्, अत्राह—**आब्रह्मेति** । चैतन्यरूपेण प्रतिबिम्बितोऽनुभवः विषयज्ञानादिसाधकत्वेन भासमानत्वादव्यभिचारीत्यर्थः । (1397) अनुभवात्मनः क्षणिकत्वं निरस्य, शून्यत्वं निराचष्टे—**न चेति** । अनुभवाभावे न किञ्चित् सिद्ध्येदित्यर्थः । (1398) विनैवानुभवं प्रमाता सर्वं साधयतीति चेत्, अत्राह—**अन्योऽपीति** । जडः, अजडो वा ।

---

* **उपजायते इति** भासते इत्यर्थः । चैतन्यरूपबुद्धेः जननायोगादिति बोध्यम् ।

1. **भेदाभावात्**—साक्ष्यभेदाभावात् ।

2. **तत्पूर्वत्वं**—प्रत्यक्चैतन्यपूर्वकत्वम् ।

* प्रत्यगात्मनि विश्वस्य ततोऽनात्मनि तद्वशात् ।
आविद्वदङ्गनाबालं विश्वसित्यनपेक्षतः ॥ (1400)

आत्मनैवात्मविज्ञानं ज्ञेयज्ञात्रादिवर्जितम् ।
स्वयमेव फलात्मत्वात् फलं चास्मान्न भिद्यते ॥ (1401)

प्रमाणव्यवहारोऽयं सर्वेषामपि वादिनाम् ।
स्वतोऽनुभवनिष्ठः स्यान्न चेत् षष्ठेन्द्रियार्थवत् ॥ (1402)

चैतन्यमात्ररूपोऽयं सदानस्तमितोदितः ।
अविद्यामस्पृशन्नास्ते निष्क्रियोऽकारकोऽफलः ॥ (1403)

भाद्ये, अनुभवे कल्पि(तं)[तः] स्यात्, सर्वभेदानामनुभवमात्रत्वात्। अजडश्चानुभवान्न भिद्यते । अनुभवे भेदाभावस्योक्तत्वात् । स चानुभवः स्वप्रकाश इत्यर्थः। (1399) विषयानुभवाश्रयत्वेन सिद्ध्यन्नात्मा कथं स्वप्रकाशानुभवो भवेत्, अत्राह—**प्रत्यगिति** । आत्मप्रकाशपूर्वत्वादनात्मप्रकाशस्य विषयानुभवनिरपेक्षं प्रत्यगनुभव इत्यर्थः। (1400) आत्मविश्वा(सात्)[सः तत्] संवेदनं, तस्य प्रमात्रादिविभागा(द्धी)[धी]नत्वात् कथमात्मा स्वप्रकाशः, अत्राह—**आत्मनेति** । [1]आत्मैव आत्मज्ञानमित्यर्थः। मानफलस्य ततो भेदवत् ज्ञानस्यापि भेदः स्यात्, अत्राह—**स्वयमिति** । स्वप्रकाश(क)त्वेन आत्मफलयोरेकरूपत्वादित्यर्थः । (1401) तथापि विषयतदाकारवृत्त्योरनुभवान्यत्वादद्वैतहानिः अत्राह—**प्रमाणेति**। अनुभव एव विषयाद्याकारेण व्यवह्रियते । अन्यथा अनात्मनस्तुच्छत्वापातादित्यर्थः। (1402) जगतो व्याकृताव्याकृतात्मकस्य आत्ममात्रत्वे [2]तद्गुणदोषसंबन्धः स्यादात्मनः, अत्राह—**चैतन्येति** । (1403) आत्मनोऽवि-

---

* प्रत्यगात्मनि विश्वस्य इत्यत्र विश्वासपदेन संवेदनं—प्रकाशो विवक्षितः ।

1. **आत्मैवेति** 'आत्मनैव' इति वार्त्तिके तृतीया अभेदार्थिकेति भावः।

2. **तद्गुणदोषसंबन्धः**—जगन्निष्ठाभ्यां गुणदोषाभ्यां संबन्धः।

* स्वतोऽसङ्गस्वभावत्वात् खचरादि वियद्यथा ।
नाविद्या नापि तत्कार्यं प्रत्यक्स्थमपि ढौकते ॥ (1404)

स्वतः सेद्धुमशक्तत्वात् खमृते वायुवत्सदा ।
* प्रत्याख्यातस्वभावोऽपि सिद्धयतीवाग्रहो दृशौ ॥ (1405)

युतिं साधारणात्मा हि यात्यसाधारणात्मभिः ।
अनन्यवृत्तितो नात्मा संसर्गं प्रैत्यनात्मभिः ॥ (1406)

* विभज्यमानोऽन्येभ्यो हि विशेषोऽपि प्रसिद्धयति ।
एकत्वादात्मनो भेदः द्वयाभावान्न चेष्यते ॥ (1407)

द्यातत्कार्यासंबन्धेऽपि अविद्यातत्कार्ययोः [1]आत्मसंबन्धादसङ्गत्व[2]विरोधः, अत्राह —**स्वत इति** । (1404) परस्परासं[3]बन्धे साविद्यस्य ज[4]गतोऽसिद्धिः, अत्राह —**स्वतःसेद्धुमिति** । **प्रत्याख्यातस्वभावोऽपि** आत्मनेति शेषः । (1405) इतश्चात्मनो न संबन्धः, इत्याह—**युतिमिति** । सामान्यस्य विशेषैः संबन्धो भवति । प्रतीचः असामान्यत्वात् न केनापि संबन्ध इत्यर्थः । (1406) तर्हि विशेषत्वात् सामान्येन संबन्धः स्यात्, अत्राह —**विभज्यमान इति** । एकत्वं

---

1. **आत्मसंबन्धादिति** आत्मन्येवाधिष्ठाने स्थितत्वादिति भावः ।
2. **असङ्गत्वविरोध इति** आत्मन इत्यनुवर्तते ।
* **खचरादि**—विहगादि ।
3. **परस्परासंबन्धे इति** जगदात्मनोरित्यादिः ।
4. **जगतोऽसिद्धिरिति** जडत्वेन स्वतः सिद्धेरसंभवात्, साक्षिणा संबन्धाभावेन ततोऽपि सिद्धेरसंभवादिति भावः ।

* **अग्रहः** — स्वकार्यमज्ञानं, **दृशौ** —चैतन्ये, **सिद्ध्यतीव**—आत्मनि अविद्यासंगतिः अविद्यानिमित्तेति यावत् ।

* **द्वयाभावादिति**—धर्मिप्रतियोगिनोः भेदापेक्षत्वात् तस्य चेतरापेक्षया सिद्धेः अन्योन्याश्रयात् भेदो दुर्निरूप इति भावः ।
"तत्र तत्र प्रत्यक्त्वेन आत्मनः स्वरूपत्वात् न कुतश्चिदपि भेदोऽस्ति इत्याह—**एकत्वादिति** । तस्मिन् धर्मिप्रतियोगिविभागायोगाच्च भेदासिद्धिरित्याह—**द्वयेति** ।" इत्यपि व्याचक्षते **शास्त्रप्रकाशिकाकाराः** ।

भेदसंसर्गहीनत्वात् पदवाक्यार्थतात्मनः ।
दुःसंभाव्याऽत आत्मायमात्मनैवानुभूयते ॥ (1408)

यादृगस्य द्वये तत्त्वमात्मनैवानुभूयते ।
निषिद्धाशेषभेदस्य तावदेवात्मसाक्षिकम् ॥ (1409)

अपास्ताशेषतमसो यत्तत्त्वं प्रत्यगात्मनः ।
* तदवच्छित्तये नालं प्रत्यग्बोधादृतेऽन्यधीः ॥ (1410)

प्रत्यङ्मात्रेक्षणादात्ममोहतज्जनिराकृतेः ।
असंभवात् द्वितीयस्य स्यामपूर्वादिमानहम् ॥ (1411)

व्यपेततमसस्तत्त्वमागमापायसाक्षिणः ।
ज्ञानेन गम्यते साक्षात् तावन्मात्रानुरोधिना ॥ (1412)

कालादिप्रविभक्तं सद्यद्ब्रह्माभूदविद्यया ।
तत्प्रत्यक्तत्त्वसंबोधाद् ध्वस्ते ध्वान्तेऽन्तरात्मनि ।
आत्मानमेव तद्ब्रह्म ब्रह्मैवात्मेत्यवेच्छ्रुतेः ॥ (1413)

साधयति—द्वयाभावादिति । (1407) शब्दार्थत्वादात्मनः गवादिवत् सामान्यत्वं (ग)[च], तत्राह—भेदेति । आत्मनस्तर्हि मानादसिद्धेः कथं सिद्धिः, अत्राह—अत इति । (1408) कथमसामान्यविशेषरूपत्वं, बन्धमोक्षयोरात्म[1]रूपभेदात् [2]उभयत्र गोत्ववत् ब्रह्मानुसन्धानात्, अत्राह—यादृगिति । कूटस्थचैतन्यमेवात्मनो रूपमित्यर्थः । (1409) चैतन्यमेव(वे)[चे]दात्मनो रूपं तत् अविद्यावस्थायामपि प्रत्यक्षादिसिद्धं, किं वाक्योत्थज्ञानेन, अत्राह—(आप)[अपा]स्तेति । (1410) वाक्योत्थधीफलमाह—प्रत्यगिति । अपूर्वादिमान्—कार्यकारणविनिर्मुक्तः अहं स्यामित्यर्थः । (1411) आत्मनः अपूर्वादिरूपत्वे अनुभवं प्रमाणयति—व्यपेतेति । (1412) 'तदात्मानमेवावेत्' इत्यस्यार्थमुपसंहरति—

---

1. आत्मरूपभेदात्—आत्मस्वरूपभेदात् ।
2. उभयत्र—बन्धमोक्षयोः ।
* तदवच्छित्तये—निर्विशेषात्मतत्त्वपरिच्छेदाय।

अब्रह्मानात्मताहेतौ प्रत्यग्ध्वान्ते निवर्तिते ।
व्यावृत्त्यनुगमाभावात् सर्वं तदभवत्ततः ॥ (1414)

व्यावृत्त्यनुगमौ यस्मात् द्वितीये सति वस्तुनि ।
दृष्टिमात्रात्मवस्तुत्वात् कार्यकारणवस्तुनः ॥ (1415)

नाज्ञातं किञ्चिदप्यस्ति नानपास्तं तमोऽप्यतः ।
सामानाधिकरण्यार्थमस्मीत्येतत्पदं भवेत् ॥ (1416)

ब्रह्माहंपदयोरर्थौ यौ तयोः संगतिर्मिथः ।
अहमर्थो विशेष्योऽत्र तत्प्राधान्यप्रसिद्धितः ॥ (1417)

तद्याथात्म्यप्रसिद्ध्यर्थं ब्रह्मार्थस्तु विशेषणम् ॥ (1418)

कालादीति । (1413) 'तस्मात्तत्सर्वमभवत्' इत्येतदर्थमाह—**अब्रह्मेति** । (1414) व्यावृत्त्यनुगमाभावे हेतुमाह—**व्यावृत्तीति** । द्वितीयाभावं साधयति—**दृष्टीति** । (1415) अद्वितीयत्वे प्रा[1]गुक्तं लिङ्गं स्मारयति—**नाज्ञानमिति** ।

'अहं ब्रह्मास्मि' इति श्रुतिव्याख्यानम्

'अहं ब्रह्मास्मि' इत्येतत् व्याख्यातुं अस्मीति पदार्थमाह—**सामानाधिकरण्येति** । अस्मीति वर्तमानापदेशात् ऐक्यस्य सत्त्वावगमात् नाभूतभवनमित्यर्थः । (1416) [2]पदयोः सामानाधिकर(ण्या.नै)[ण्येनै]कस्मिन्नर्थे वृत्तिमुक्त्वा तदर्थयोः विशेषणविशेष्यभावसंगतिमाह—**ब्रह्मेति** । कस्य विशेष्यत्वं विशेषणत्वं वा, अत्राह—(इद)[अह]मर्थ इति । [3]त्वंपदार्थस्य प्रसिद्धत्वेन उद्देश्यत्वसंभवात् विशेष्यत्वम् । अहमर्थस्वरूपनिश्चायकत्वात् ब्रह्मपदार्थस्य विशेषणत्वमित्यर्थः । (1417-1418) त्वमर्थस्य व्यवच्छेद्यत्वेन प्राधान्येऽपि विशेष्यत्वमेव कुतः, विशेषणत्वं किं

---

1. **प्रागुक्तं लिङ्गं**— एकविज्ञानेन सर्वविज्ञानान्यथानुपपत्तिरूपं गमकम् ।
2. **पदयोः** — अहंपदब्रह्मपदयोः ।
3. **त्वंपदार्थस्येति** तत्त्वमसि इति महावाक्यघटकत्वंपदार्थस्येत्यर्थः । इयं रीतिः सर्वत्रानुसन्धेया ।

विशेषणानां संबन्धो विशेष्येण विशेषणैः ।
विशेष्यस्यापि संबन्धः स्वातन्त्र्यपारतन्त्र्यतः ॥ (1419)

विशेषणविशेष्याणां साकल्येनैव संगतिः ।
उपात्तान्योन्यरूपाणां विशेषणविशेष्यता ॥ (1420)

* उपात्तद्रव्यकाण्येव विशिंषन्त्युत्पलादिकम् ।
द्रव्यं विशेषणान्येति तथोपात्तविशेषणम् ॥ (1421)

* नायःशलाकाकल्पानां विशेषणविशेष्यता ।
परस्परानपेक्षत्वात् हिमवद्विन्ध्ययोरिव ॥ (1422)

न स्यात्, अत्राह–**विशेषणानामिति** । स्वतन्त्रं विशेष्यं, परतन्त्रं विशे(ष्य)[षणं] इति [1]दण्डदेवदत्तादौ प्रसिद्धमित्यर्थः । (1419) तर्हि विशेषणविशेष्ययोः वैलक्षण्ये भेदादभि[2]मतसंबन्धासिद्धिः, अत्राह—**विशेषणेति**। [3]अभेदलक्षणसंगतिरित्यर्थः । तत् स्पष्टयति—**उपात्तेति** । (1420) संबन्धमुदाहरति—**उपात्तद्रव्येति** । (1421) विशेषणविशेष्यभावो भिन्नयोरेव दृष्टो दण्डदेवदत्तादौ, अत्राह—**नेति** । समानाधिकृतपदवाच्यत्वे सति विशेषणविशेष्यता न [4]दण्डादावित्यर्थः ।

---

1. **दण्डदेवदत्तादाविति** दण्डी देवदत्तः इत्यादौ स्वतन्त्रस्य देवदत्तस्य विशेष्यत्वं, परतन्त्रस्य दण्डस्य विशेषणत्वञ्च प्रसिद्धमित्यर्थः ।
2. **अभिमतसंबन्धासिद्धिः** — तादात्म्यासिद्धिः ।
3. **अभेदलक्षणसंगतिरिति** अभेदात्मकः संबन्ध इत्यर्थः । इदञ्च 'साकल्येनैव संगतिः इत्यस्यार्थकथनम् । साकल्यं-परस्परतादात्म्यम् । संगतिः संबन्धः । साकल्येनेति तृतीया अभेदे इति बोध्यम् ।
4. **न दण्डादाविति** दण्डीदेवदत्तः इति प्रयुञ्जते, न तु दण्डो देवदत्तः इति । अत्र देवदत्तपदसमानाधिकृतपदवाच्यत्वाभावात् न दण्डादौ अभेद इति भावः ।

* **उपात्तद्रव्येति** नीलं सुगन्धि उत्पलम् इत्यादौ नीलादीनि विशेषणानि द्रव्येणोत्पलादिना तादात्म्यभाञ्जि सन्ति तत् व्यावर्तयन्ति । तदपि द्रव्यं विशेषणैस्तादात्म्यमुपेत्य तैः संगतिमनुभवतीत्यर्थः ।

* "ब्रह्माहमर्थयोः तादात्म्येन विशेषणविशेष्यत्वं, दण्डादिवत् तद्भावस्य भेदापेक्षत्वात् इत्याशङ्क्याह—**नेत्यादिना** । दण्डादावपि नात्यन्तभिन्ने तद्भावः, तस्य तत्र कल्पितत्वात् तादात्म्यानपायात् विशेषणविशेष्यत्वस्य दण्डदेवदत्ताभ्यामभेदे तद्द्वारा तयोरपि मिथोऽभेदसंभवादिति भावः ।" इति **शास्त्रप्रकाशिका** ।

एकदा निर्विभागेन कात्स्न्यंसंगतिकारणात् ।
सामर्थ्यात् स्वविरुद्धानां न विशेष्येऽस्ति संभवः ॥ (1423)

परस्पराविरोधेन विशिंषन्त्यात्मसंश्रयम् ।
विशेषणानि येनातः तद्विरुद्धं न ढौकते ॥ (1424)

विशेषणयुतिः शाब्दी, तद्विरुद्धनिशकृतिः ।
* मोहमात्रेण तत्प्राप्तेः सामर्थ्यात्स्यान्न शब्दतः ॥ (1425)

एकैकरूपासंसर्गबोधमात्रस्वभावतः ।
विशेषणानां संप्राप्तिर्नाञ्जसी प्रत्यगात्मनि ॥ (1426)

(1422) विरुद्धयोः ब्रह्माहंपदार्थयोः कथम[1]भेदसंगतिः, अत्राह— **एकदेति** । तयोरंशांशित्वाद्यभावादैक्या[त्]तद्ब(लो)[लात्]ब्रह्मविरुद्धानां बद्धत्वादीनां अहमर्थे, [2]तद्विरुद्धपारोक्ष्यादीनां [3]तदर्थे न संभवोऽस्तीत्यर्थः । (1423) स्वविरुद्धानामिति विशेषणकृत्यमाह—**परस्परेति** । दीर्घः शुक्लो मैत्रः इत्यत्र दीर्घत्वं ह्रस्वत्वमेव स्वविरुद्धं तत्र निवर्तयति, न शुक्लत्वम् । शुक्लत्वमपि र(त्य)क्तत्वादिकं व्यवच्छिनत्ति, न दीर्घत्वम् । अतः सर्वत्र विशेषणानां व्यवच्छेदकत्वात्, ब्रह्मविरुद्धानामहमर्थे, अहमर्थविरुद्धानां ब्रह्मणि न संभव इत्यर्थः । (1424) विरुद्धांशनिवृत्तिः विशेषणविशेष्ययोरभेदसंगतिश्चेति अनेकार्थता स्याद्वा[4]क्यस्य, अत्राह— **विशेषणेति** । (1425) विशेष्यत्वे प्रतीचो नैकरसत्वं उत्पलादिवत्, अत्राह— **एकेति** । [5]सजातीयविजातीयस्वगतभेदहीनचिन्मात्रत्वादात्मनः विशेषणविशेष्यभावो न विवक्षित इत्यर्थः । (1426) विशेषणविशेष्यत्वाभावे वाक्यस्य कथं

---

1. **अभेदसंगतिः**—अभेदः संबन्धः । संबन्धार्थे संगतिशब्दः प्रयुज्यते प्रघट्टकेऽस्मिन्निति बोध्यम् ।
2. **तद्विरुद्धेति** अहमर्थविरुद्धेत्यर्थः ।
3. **तदर्थे** — तत्पदार्थे ब्रह्मणि ।
4. **वाक्यस्य**—अहं ब्रह्मास्मीति वाक्यस्य ।

* **तत्प्राप्तेः**—अभेदविरुद्धबद्धत्वादिप्राप्तेः ।

5. **सजातीयेत्यादि** 'एकैकरूपासंसर्गबोधमात्रस्वभावतः' इत्यत्र एकपदेन सजातीयभेदहीनत्वं, एकरूपपदेन विजातीयभेदहीनत्वं, असंसर्गपदेन स्वगतभेदहीनत्वञ्च बोध्यते इति भावः ।

विशेषणानां संबन्धो यतो न प्रत्यगात्मनि ।
लक्ष्यलक्षणता तस्मात् प्रतीच्यप्यवसीयते ॥ (1427)

अनन्यापेक्षि प्रत्यक्त्वमहंरूपेण लक्ष्यते ।
तथैव ब्रह्मरूपेण प्रतीचोऽप्यद्वयात्मता ॥ (1428)

निवर्त्यभेदाद्भिन्नोऽर्थोऽमानित्वादेर्यथा तथा ।
ब्रह्माहमर्थयोर्ज्ञेयस्तयोरैकार्थ्यहेतुतः ॥ (1429)

बोधकता, अत्राह— **विशेषणानामिति** । विशिष्टे गृहीतसंगतिकेन [1]**पदद्वयेनाद्वयं** वस्तु लक्ष्यमित्यर्थः । (1427) [2]वाच्यार्थयोः [3]**केवलेन वाक्यार्थेन संबन्धाभावात्** [4]लक्षणा न संभवतीत्याशङ्क्य, केवले विशिष्टयोस्ता[5]दात्म्याध्यासोऽस्तीति मत्वा, आह— **अनन्येति** । [6]ब्रह्मसंसृष्टत्वमर्थेन ब्रह्मणो निरुप(थ)[च]रितप्र(त्युक्तं)[त्यक्त्वं] लक्ष्यते । [7]प्रत्यक्संसृष्टतत्पदार्थेन [8]त्वमर्थस्य पूर्णता लक्ष्यते इत्यर्थः । (1428) प्रत्यग्ब्रह्मणोरेकत्वात् एकेनैव पदेन तत्सिद्धेः पदान्तरं व्यर्थम्, अत्राह— **निवर्त्येति** । यथा अमानित्वं, अदम्भित्वं, अहिंसा, इत्यादिपदस्य निवृत्त्युपलक्षितस्वरूपमात्रनिष्ठत्वेऽपि निव(र्त)[र्त्य]मानदम्भादिभेदात् भिन्नार्थता, तथा ब्रह्मार्थे परोक्षत्वं, अहमर्थे सद्वितीयत्वमिति निवर्त्यभेदात् तत्त्वंपदार्थयोरर्थभेदात् न

---

1. **पदद्वयेन**—अहंपदेन ब्रह्मपदेन च ।
2. **वाच्यार्थयोः** — विशिष्टयोः ।
3. **केवलेन वाक्यार्थेन**—वाक्यतात्पर्यविषयीभूतेन अद्वयेन वस्तुना ।
4. **लक्षणा न संभवतीति** शक्यसंबन्धस्य लक्षणात्वादित्यर्थः ।
5. **तादात्म्याध्यासोऽस्तीति** तथाच आध्यासिकं तादात्म्यमेव संबन्ध इति भावः ।
6. **ब्रह्मसंसृष्टत्वमर्थेन**—ब्रह्मपदसमानाधिकृताहंपदस्यार्थेनेति यावत् ।
7. **प्रत्यक्संसृष्टतत्पदार्थेन**—अहंपदसमानाधिकृतब्रह्मपदस्यार्थेनेति यावत् ।
8. **त्वमर्थस्य**—प्रकृतवाक्यघटकाहंपदार्थस्य ।
गङ्गायां घोषः इत्यादौ गङ्गाशब्दः प्रवाहं बोधयति । गङ्गापदार्थः स्वसंबन्धितीरं लक्षयति । लक्षणा पदार्थव्यापारः शब्दे आरोप्यते ‘ लक्षणाऽरोपिता क्रिया ’ इत्युक्तेः इति मतविशेषमवलम्ब्य अत्र अर्थेन लक्ष्यते इत्युक्तिरिति बोध्यम् ।
‘ तत्त्वमसि ’ इति महावाक्यं मनसि कृत्वा, जीवः पदान्तरैरभिधीयमानोऽपि त्वंपदार्थ इति, ब्रह्म पदान्तरैरभिधीयमानमपि तत्पदार्थः इति च ग्रन्थकाराणां लेखनशैली बोद्धव्या ।

* अनात्माब्रह्मताहेतौ प्रत्यग्ध्वान्ते निवर्तिते ।
पदार्थ एक एव स्यात् ब्रह्माहंपदयोः परः ॥ (1430)

भेदसंसर्गनाशार्थो नात उक्तेरिहेष्यते ।
अहंब्रह्मश्रुतेः साक्षात्तादात्म्यमिह गम्यते ॥ (1431)

* कर्तुर्ज्ञातुर्हि या दृष्टिः साऽविद्योत्थार्थलेहिनी ।
तत्प्रत्यगात्मदृष्ट्या तां प्रत्याख्यायाश्नुतेऽद्वयम् ॥ (1432)

अस्मीतीहत्यनिर्देशात् विद्याकालैव मुक्तता ।
सिद्धाऽतोऽसौ न साध्या स्यादग्निहोत्रादिकार्यवत् ॥ (1433)

वैयर्थ्यमित्यर्थः । (1429) तत्त्वंशब्दौ भिन्नार्थौ, अपुनरुक्तानेकशब्दत्वात् घटपट-शब्दवत्, अत्राह—**अनात्मेति** । प्रत्यग्ब्रह्मविभेदस्य अज्ञानकृतस्योपगमात् सिद्ध-साधनमित्यर्थः । (1430) भेदो वा पदार्थसंसर्गो वा अन्यापोहो वा वाक्यार्थः प्रसिद्ध्यति । स [1]एवात्रापि स्यात्, इत्यत आह—**भेदेति** । (1431) वाक्यजन्यज्ञानेन जडेनात्मा गम्यते चेत्, [2]अक्षादिजन्येनापि किं न गम्यते, तत्राह—**कर्तुरिति** । 'पराञ्चि खानि' (का. 2-1-1) इति श्रुतेः अक्षादिजन्यज्ञानं शब्दादिविषयमित्यर्थः । शब्दादिदृष्ट्या [3]सद्वितीयत्वप्राप्तिः, अत्राह–**तदिति** । (1432) अद्वयप्राप्तिः कैवल्यं न ज्ञानकालभावि श्रौतफलत्वात् कर्मफलवत्, अत्राह—**अस्मीति** । (1433) अनुमानस्य [4]श्रुतिविरोधमुक्त्वा, 'तस्मात्सर्वम्' इत्यादि-

---

* "निवर्त्यभेदस्तर्हि किंकृतः इत्याशङ्क्य, तस्याज्ञानकृतत्वोक्त्या लक्ष्यैक्यं साधयति—अनात्मेति ।" इत्यवतारयति **शास्त्रप्रकाशिका** ।

1. **अत्रापि**—'अहं ब्रह्मास्मि' इत्यत्रापि ।

2. **अक्षादिजन्येनापि**—इन्द्रियादिजन्यज्ञानेनापि ।

3. **सद्वितीयत्वप्राप्तिरिति** आत्मनः इत्यादिः ।

* "तर्हि श्रौती दृष्टिरपि दृष्टित्वादितरवत् न ब्रह्म स्पृशेत् इत्याशङ्क्य, श्रौताद्वयप्रत्यक्मात्रदृष्ट्या इतरदृष्टिं तद्विषयं चाविद्यातत्कार्यं निरस्य तद्ब्रह्मात्मानमद्वयं प्रत्यङ्मात्रं व्याप्नोतीत्याह—**तदिति** । वाक्योत्थदृष्टिर्हि ब्रह्म स्पृशति, तदौपनिषदत्व-श्रुतेः, दृष्ट्यन्तरं तु नैवम्, पराञ्चि खानि इति श्रुतेरिति भावः ।" इति **शास्त्र-प्रकाशिका** ।

4. **श्रुतिविरोधं**—अस्मीति श्रुतिविरोधम् ।

प्रत्यग्याथात्म्यविज्ञानमात्रव्युत्पत्तिसिद्धये ।
तस्मादिति श्रुतिर्वक्ति ह्युत्पत्त्यादिनिवृत्तये ॥ (1434)

अविद्यातज्जनिर्मुक्तौ ब्रह्म ब्रह्माभवत्स्वतः ।
सर्वः कृत्स्नः तथा पूर्णः शब्दाः पर्यायवाचकाः ॥ (1435)

* आत्माविद्यासमुत्थानामात्मयाथात्म्यमात्रतः ।
कर्मवत् काङ्क्षते ज्ञानं विशिष्टं नाधिकारिणम् ॥ (1436)

* देवादीनामतो यो यो यथोक्तेनैव वर्त्मना ।
प्रत्यबुध्यत तद्ब्रह्म स स तदभवत्परम् ॥ (1437)

प्रत्यग्बोधातिरेकेण साधनान्तरनिह्नुतौ ।
एवेत्यवधृतिर्ज्ञेया ज्ञानादेव ततो भवेत् ॥ (1438)

---

[1]वाक्यविरोधमाह—**प्रत्यगिति** । [2]ज्ञानमेव व्युत्पत्तिः, त(त्रै)[यै]व **कैवल्य-सिद्ध्यर्थं**, 'तस्मात्' इति वाक्यमित्यर्थः । (1434) **ज्ञानस्य सर्वभावः** फलं श्रुतं, न ब्रह्मभावः इत्याशङ्क्य, सर्वशब्दस्य ब्रह्मपर्यायत्वात् ब्रह्मभाव एव, इत्याह—**अविद्येति** । (1435) सर्वशब्दस्य ब्रह्मपर्यायत्वे हेतुमाह—**आत्मेति** । '[3]तद्यो यो देवानाम्' इत्यादेस्तात्पर्यमाह—**कर्मवदिति** । (1436)

'तद्यो यो देवानाम्' इति श्रुत्यर्थवर्णनम्

तदक्षरार्थमाह—(वेदा)[देवा]**दीनामिति** । (1437) **एवशब्दार्थमाह—प्रत्यगिति** । (1438) कर्मादेरपि मोक्षहेतुत्वात् **'ज्ञानादेव'** इत्युक्तम्,

---

1. **वाक्येति** 'तस्मात्तत्सर्वमभवत्' इति वाक्येत्यर्थः ।
2. **ज्ञानमेव व्युत्पत्तिरित्यादि** प्रत्यग्याथात्म्येति वार्तिके, प्रत्यग्याथात्म्यविज्ञानमात्रमेव व्युत्पत्तिः, तया सिद्धिः (मुक्तिसिद्धिः), तस्यै इति विग्रहवाक्यमनुसन्धेयम् ।

* **आत्मेति** आत्माविद्याप्रसूतस्य प्रपञ्चस्य सर्वस्यापि तत्त्वं **ब्रह्मैवेति** प्रपञ्चविषयः सर्वशब्दः ब्रह्मशब्दस्य पर्यायो युक्त इत्यर्थः ।

3. **तद्यो य इति** "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, तथर्षीणां तथा मनुष्याणाम् ।" इति श्रुतिः ।

* **देवादीनामिति** अतः—अधिकारिनियमाभावात् । **यथोक्तेन वर्त्मना**—अन्वयादिकृतपदार्थशोधनादिना ।

आत्मयाथात्म्यविज्ञानाद्यदन्यत्साधनान्तरम् ।
ज्ञानाभावोऽथवा सर्वमविद्यैवेति निश्चितिः ॥ (1439)

मनुष्या यदमन्यन्त साध्वेवातस्तदीरितम् ।
न कश्चिदपि दोषोऽत्र पूर्वोक्तोऽतः प्रसज्यते ॥ (1440)

प्रत्यक्तयैव संबन्धादात्मनोऽनात्मवस्तुना ।
विशिष्टेनाविशिष्टस्य क्लृप्तेनाकल्पितात्मनः ॥ (1441)

यतोऽतो लोकबुद्ध्यैव देवादीनामितीर्यते ।
* तुल्यो देवादिसंबन्धो ब्रह्मणो मशकादिभिः ॥ (1442)

अत्राह—आत्मेति । ज्ञानस्याभावो यस्मिन्निति ज्ञानाभावः कर्म[1]भावनादिकम्, सर्वं तमोरूपत्वात् न मुक्तिहेतुरित्यर्थः । (1439) ज्ञानस्यैव मुक्तिहेतुत्वात् विद्यया सर्वं भविष्यामः इति [2]मनुष्याणां वचनं युक्तम्, इत्याह—मनुष्या इति । [3]उपोद्घातोक्तदोषभावात् कथं साधुत्वम्, अत्राह— न कश्चिदिति । (1440) ब्रह्मैव अविद्यया संसरति, विद्यया मुच्यते इत्युक्तत्वात्, तद्विरुद्धं देवादीनामविद्याविद्याभ्यां बद्धत्वं मुक्तत्वं(वो)[चो]च्यमानम्, इत्यत्राह—प्रत्यक्तयेति । यतः सर्वस्यानात्मनस्तत्त्वमा(त्वै)[त्मै]व ते(स्त)[न त]त्र तत्र प्रत्यक्त्वेन तस्य संबन्धात् औपाधिकलोकदृष्टभेदबुद्ध्या देवादीनामित्या(दि)दिविद्यभेदमनूद्य, तद्रूपेण स्थितब्रह्म[ण]एव अविद्याविद्याभ्यां बन्धमोक्षाभिधानात् न विरोध इत्यर्थः । देवादिनोत्कृष्टेन प्रत्यक्तया संब(न्ध)[द्ध]स्य न निकृष्टमशकादिना प्रत्यक्त्वेन संबन्धः, अत्राह—तुल्य इति । (1441-1442)

---

1. भावना—अभ्यासः
2. मनुष्याणां वचनं—'यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते' इति श्रुत्युक्तं वचनम् ।
3. उपोद्घातोक्तेति 'तदाहुः' इत्यादिवाक्यविवक्षितेत्यर्थः ।

* तुल्य इति औपाधिकावेवोत्कर्षनिकर्षौ न वास्तवाविति भावः ।

अन्तरेणाधिकारं चेन्नात्मबोधस्य संभवः ।
न जन्मान्तरसंस्कारात् वामदेवस्य तद्भवेत् ॥ (1443)

श्रुत्युक्तार्थस्य वा स्थेम्ने मन्त्रोदाहृतिरिष्यते ।
प्रमाणान्तरसंवादात् पुंसां विश्वासधीर्यतः ॥ (1444)

अव्यावृत्ताननुगतं तद्धैतत्प्रत्यगात्मनि ।
तद्दर्शनादृषिः साक्षात्पश्यन् सर्वं प्रपन्नवान् ॥ (1445)

सूक्तादिज्ञापनार्थाय ह्यहं मनुरितीरणम् ।
ऐकात्म्यं सर्वभूतेषु प्रतीचोऽसौ ददर्श ह ॥ (1446)

तत्पश्यन्नित्यनेनात्र ब्रह्मविद्या प्रदर्श्यते ।
अहमासं मनुरिति विद्यायाः फलमुच्यते ॥ (1447)

'तद्धैतत्' इत्यादिमन्त्रव्याख्यानम्

'[1]तद्धैतत्' इति मन्त्रव्यावर्त्यशङ्कामाह—**अन्तरेणेति** । ब्रह्मज्ञानं विशिष्टाधिकार्यपेक्षं, विशिष्टपुमर्थसाधनत्वात् कर्मवदित्यर्थः । अस्योत्तरत्वेन मन्त्रमवतारयति—**नेति** । (1443) न केवलम[2]नुमानस्य मन्त्रविरोधः, [3]ब्राह्मणविरोधोऽपि इति मत्वा, मन्त्रस्यार्थान्तरमाह—**श्रुतीति** । (1444) [4]अक्षरार्थमाह—**अव्यावृत्तेति** । (1445) 'अहं मनुः' इत्यादिवाक्यं वामदेवसूक्तस्य आदिज्ञापनार्थम्, इत्याह—**सूक्तेति** । [5]सूक्तस्य तात्पर्यमाह—**ऐकात्म्यमिति** । (1446) ज्ञानान्मुक्तिरस्मिन्[6] म(न्त्र)[न्त्रे]विवक्षितेति वक्तुं मन्त्रपदानि विभज्य व्याचष्टे—**तदिति** । (1447) 'पश्यन् प्रतिपेदे' इति [7]लट्प्रयोगतात्पर्यमाह—**पश्यन्निति** ।

---

1. **तद्धैतदिति** "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे, अहं मनुरभवं सूर्यश्चेति । इति श्रुतिः ।
2. **अनुमानस्य**—ब्रह्मज्ञानं विशिष्टाधिकार्यपेक्षमित्यनुमानस्य ।
3. **ब्राह्मणविरोधोऽपि**—'तद्यो यो देवानाम्' इत्यादिब्राह्मणविरोधोऽपि ।
4. **अक्षरार्थमिति** तद्धैतदिति वाक्यघटकपदार्थमित्यर्थः ।
5. **सूक्तस्य**—वामदेवसूक्तस्य । वामदेवसूक्तं ऋग्वेदिनां प्रसिद्धम् ।
6. **अस्मिन् मन्त्रे**—तद्धैतदित्यादिमन्त्रे ।
7. **लट्प्रयोगेति** लट्स्थानिकशतृप्रत्ययप्रयोगेत्यर्थः ।

पश्यन्प्रतिपेद इति प्रयोगादवसीयते ।
विद्याकालैव कृत्स्नाप्तिरिति तन्मोहहानतः ॥ (1448)

ब्रह्मप्राप्त्यन्तरायस्य प्रत्यक्संमोहमालतः ।
प्रत्यग्विज्ञानतो ध्वस्तेस्तत्प्राप्तिर्नान्यसाधना ॥ (1449)

अविद्याध्वंसमात्रेण पुमर्थस्य समाप्तितः ।
तावतावसितेर्विद्या स्वार्थैवेति विनिश्चयः ॥ (1450)

सकृदात्मप्रसूत्यैव निरुणद्ध्यखिलं भवम् ।
ध्वान्तमात्रनिरासेन न ततोऽन्यान्यथा मतिः ॥ (1451)

देशकालाद्यसंबन्धाद्देशादेर्मोहकार्यतः ।
नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्त्यतः ॥ (1452)

नाबाधित्वेह बाध्यार्थं बाधको बाधकात्मताम् ।
लभते मेययाथात्म्यहेतुमात्रव्यपेक्षतः ॥ (1453)

(1448) देशादिव्यवहितब्रह्मप्राप्तिः कथं ज्ञानकाले स्यात्, अत्राह—ब्रह्मेति। (1449) ज्ञानस्य [1]परार्थत्वात् कथं स्वातन्त्र्येण पुमर्थसाधनत्वम्, अत्राह—अविद्येति। [1450] कथमविद्याध्वस्तौ पुमर्थप्राप्तिः, तद्ध्वस्तावपि अविद्याकार्यरागादिदर्शनात्। अतोऽभ्यासापेक्षा, इत्यत्राह—सकृदिति। [1451] घटादिवदात्मनो देशकालादिविशिष्टत्वात् आत्मज्ञानं घटादिविज्ञानवत् न[2] सर्वात्मना तमोनिवर्तकम्, अत्राह—देशेति। (1452) कृत्स्नाज्ञाननिवृत्तौ हेत्वन्तरमाह—नेति। आत्मतत्त्वानुसारि(त्वा)[मा]योगादित्यर्थः। (1453) फलितं निगमयति—

---

1. परार्थत्वात्—आज्यावेक्षणवत् क्रत्वर्थत्वात् कर्माङ्गकर्तुः संस्कारकत्वादिति यावत्।

2. न सर्वात्मना तमोनिवर्तकमिति ततश्च अवशिष्टाज्ञानध्वंसार्थमन्यापेक्षेति भावः।

यतोऽतोऽविद्यातज्जानां बाधितत्वात्प्रबोधतः ।
* सकृदेव च मायोगान्नोर्ध्वं तच्चोदनेष्यते ॥ (1454)

सम्यग्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः ।
सकृन्निवृत्तेर्बाध्यस्य किं कार्यमवशिष्यते ॥ (1455)

ध्वान्तादिघस्मरे प्रत्यक्चैतन्यात्मैकनिष्ठिते ।
प्रत्यर्थिनि स्थितेऽनात्मधियां स्यात्सत्यता कुतः ॥ (1456)

अज्ञातमिथ्याविज्ञाततत्त्वमात्रावलम्बिना ।
ज्ञानेन किं न विज्ञातं वद किं वा न बाधितम् ॥ (1457)

सर्वापत्तिरियं युक्ता देवादीनां महात्मनाम् ।
अस्मदादेस्तमस्वित्वान्न संभाव्येति चेन्न तत् ॥ (1458)

एतर्ह्यपि तु तद्ब्रह्म यो यः साक्षादबुध्यत ।
स एव तदभूद्यस्मात् नातोऽभिजनकारणम् ॥ (1459)

यत इति । (1454) ऊर्ध्वं मानानपेक्षत्वे(न)[ऽपि]कैवल्यार्थमन्यत् कर्तव्यम्, इत्यत्राह—**सम्यगिति** । (1455) ज्ञानिनोऽपि अज्ञानतत्कार्यमनुवर्तते, जीवन्मुक्तिदर्शनात्, इत्याशङ्क्य, बाधिता तदनुवृत्तिः, इत्याह—**ध्वान्तेति** । **प्रत्यर्थिनि** । ज्ञाने इति शेषः । (1456) ज्ञानस्य प्रत्यर्थित्वमसिद्धं, अबाधकत्वात्, अत्राह—**अज्ञातेति** । (1457)

'तदिदमप्येतर्हि' इत्यादिवाक्यार्थनिरूपणम्

'[1]तदिदमप्येतर्हि' इत्यादिवाक्यमवतारयितुं चोदयति—**सर्वापत्तिरिति** । परिहरति—**न तदिति** । (1458) विशिष्टयोनिप्राप्तेः विशिष्टब्रह्मप्राप्तिहेतुत्वात् नास्मदादेः [2]तत्प्राप्तिः, अत्राह—**ए[3]तर्हीति** । (1459) अक्षराणि योजयन् हेतुमाह—

---

* **नोर्ध्वं तच्चोदनेष्यते इति** ज्ञानादूर्ध्वं मानं नापेक्ष्यते इत्यर्थः । "ज्ञानादज्ञानतत्कार्यनिवृत्तावपि न पुरुषार्थपरिसमाप्तिः, विहितादेव ज्ञानात् तद्भावादित्याशङ्क्याह-नोर्ध्वमिति तत्र हेतुमाह—सम्यगिति" इत्यपि विवृणोति **शास्त्रप्रकाशिका** ।

1. **तदिदमिति** "तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति ।" इति श्रुतिः ।

2. **तत्प्राप्तिः**—ब्रह्मप्राप्तिः ।

* अप्येतर्हि यथान्यायं यो वेदात्मानमद्वयम् ।
स इदं सर्वमात्मैव भवत्यज्ञानहानतः ॥ (1460)

न हीहोत्कृष्टसत्त्वेषु देवादिषु परात्मनः ।
नापि चात्यन्तमूढेषु विशेषः कश्चिदीक्ष्यते ॥ (1461)

प्रत्यक्तत्त्वधियो वास्ति स्वतो बुद्धैकतात्मनः ।
श्रेयांसि बहुविघ्नानीत्याशङ्क्यैतदथोच्यते ॥ (1462)

तस्य ज्ञातात्मतत्त्वस्य प्रध्वस्ततमसो यतेः ।
इन्द्रादयोऽपि नैवालं कैवल्याप्तिनिवारणे ॥ (1463)

देवाद्यैश्वर्यविषयव्यतिक्रान्तत्वहेतुतः ।
कैवल्याभूत्या उद्युक्ता ईश्वरा अपि नेशते ॥ (1464)

ईशेशितव्यसंबन्धः प्रत्यगज्ञानहेतुजः ।
सम्यग्ज्ञानात्तमोध्वस्तावीश्वराणामपीश्वरः ॥ (1465)

अपीति । [1460] आभिजात्यं न[1] कारणमित्युक्तम् । [2]तत्र हेतुमाह—**न हीति** । (1461)

'तस्य ह देवाश्च' इत्यादिवाक्यस्य भाष्यकारमतेन भर्तृप्रपञ्चमतेन च व्याख्यानम्

'[3]तस्य ह' इत्यादेस्तात्पर्यमाह—**श्रेयांसीति** । विद्याफले विघ्नमाशङ्क्य, तन्निरासार्थमुत्तरं वाक्यमित्यर्थः । (1462) तत् व्याचष्टे—**तस्येति** । (1463) हेतुमाह—**देवादीति** । विदुष इति शेषः । (1464) देवादीनामीश्वरत्वमाश्रित्योक्तम् । तदेव विद्वद्विषये नास्ति, इत्याह—**ईशेति** । बाधितानुवृत्त्येत्यर्थः । (1465)

---

* **एतर्हि**—एतत्काले ।

1. **न कारणं**—न मुक्तिकारणम् ।
2. **तत्र हेतुं**—आभिजात्यस्य मुक्तिहेतुत्वाभावे हेतुम् ।
3. **तस्य हेत्यादेरिति** "तस्य ह देवाश्च नाभूत्या ईशते । आत्मा ह्येषां स भवति ।" इति श्रुतिः ।

* ईश्वराणामनैश्वर्यं कस्माद्ब्रह्मविदीति चेत् ।
आत्मा ह्येषामितीत्याह तद्धेतुप्रतिपत्तये ॥ (1466)

भोज्यत्वेन जगत्कृत्स्नं कर्मविद्यादिसाधनैः ।
* उपात्तं तदभुक्त्वा नुः कैवल्यं लभ्यते न चेत् ॥ (1467)

इत्याशङ्कापनुत्त्यथ परो ग्रन्थोऽवतार्यते ।
कैवल्यावाप्तिविघ्नाय नालं देवा अपीश्वराः ॥ (1468)

अविद्याविषये यस्मात्तेषामधिकृतिः स्मृता ।
न तु प्लुष्टात्मयाथात्म्यविज्ञानतमसामसौ ॥ (1469)

ब्रह्मविद्याफलप्राप्तौ विघ्नं कुर्वन्ति देवताः ।
इत्यत्र किंनिमित्तोऽयमाशङ्केत्यभिधीयते ॥ (1470)

'आत्मा ह्येषाम्' इत्येतद्व्यावर्त्यमाह—**ईश्वराणामिति** । [1]उत्तरत्वेन वाक्यमवतारयति—**आत्मेति** । (1466)

'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि' इति कैवल्यप्राप्तिविघ्नशङ्कापरिहारत्वेन 'तस्य ह' इत्यादिवाक्यं व्याख्याय, **भर्तृप्रपञ्चमतेनावतारयति—भोज्यत्वेनेति** । नुः—नरस्य । कर्मफलस्य विनोपभोगमनिवृत्तेः ज्ञानिनोऽपि न कैवल्यम्, इति शङ्कानिरासायेदमवतारितमित्यर्थः । [2]तन्मतेन [3]वाक्यं योजयति—**कैवल्येति** । (1467-1468-1469)

'तस्य ह देवाश्च नाभूत्या ईशते' इति अप्राप्तप्रतिषेधः इति शङ्का, तत्परिहारश्च

[4]मतद्वयानुरोधेन [5]वाक्यं व्याख्यातम् । तत्र चोदयति—**ब्रह्मेति** ।

---

* **ईश्वराणां**—देवादीनामिति यावत् ।
1. **उत्तरत्वेन**—उक्तशङ्कोत्तरत्वेन ।
2. **तन्मतेन**—भर्तृप्रपञ्चमतेन ।
3. **वाक्यं**—'तस्य ह न देवाश्च' इति वाक्यम् ।
* 'उपात्तं तदभुक्त्वा तु कैवल्यं लभते न चेत्' इति मु. पु. पाठः ।
4. **मतद्वयानुरोधेन**—भाष्यकारमतस्य भर्तृप्रपञ्चमतस्य चानुरोधेन ।
5. **वाक्यं**—'तस्य ह' इत्यादिवाक्यम् ।

युक्ताऽऽशङ्का यतो मर्त्या देवान् प्रत्यृणिनः श्रुतेः ।
पशुलोकत्ववाक्याच्च पारतन्त्र्याच्च कर्मिणः ॥ (1471)

* ब्रह्मवित्त्वे च पारार्थ्यं देवादीन्प्रति हीयते ।
तस्य ब्रह्मतमोहेतोः तन्निवृत्तौ निवर्तते ॥ (1472)

अप्रियारिष्टिवाक्याभ्यामयमर्थोऽवसीयते ।
तस्माद्विद्याफलावाप्तौ विघ्नं कुर्वन्ति देवताः ॥ (1473)

नन्वेवं तर्ह्यविश्रम्भो ह्यदृष्टफलसंपदि ।
प्राप्तोऽभ्युदयमोक्षार्थसाधनव्यापृताविह ॥ (1474)

तथेश्वरोऽपि नो विघ्नं कुर्वन् केन निषिद्ध्यते ।
कालमन्त्रौषधादीनामचिन्त्या शक्तिरिष्यते ॥ (1475)

धीफलाप्तौ विघ्नकरणशङ्काया निर्निमित्ताया अभावात् अप्राप्तप्रतिषेधोऽयमित्यर्थः । परिहरति—**अभिधीयते** इति । [1470] परिहारं स्पष्टयति—**युक्तेति** । 'जायमानो वै ब्राह्मणः त्रिभिर्ऋणवा जायते' इति देवादीन् प्रति मनुष्याणामधमर्णत्वात्, 'एवं स देवानां पशुः,' (बृ. 3-4-10) इति पशुत्वात्, तथा 'अयं वा आत्मा सर्वेषां भूतानां लोकः' (बृ. 3-4-16) इति सर्व(प्रमा)[प्रा]णिभोग्यत्वश्रुतेः कर्मिणां पारतन्त्र्यात् देवादयः तद्विघ्नकृतो भवन्तीत्यर्थः । [1471] ज्ञाने सत्यपि देवादिपारतन्त्र्यात् ते विघ्नकारिणः स्युरेव, इत्यत्राह—**ब्रह्म[वि]त्त्वे चेति** । [1472] ज्ञाने सति पारतन्त्र्यनिवृत्तौ मानमाह—**अप्रियेति** । 'तस्मादेषां तन्न प्रियम्' (बृ. 3-4-10) 'सर्वाणि भूतान्यरि(ष्ट)[ष्टि]मिच्छन्ति' (बृ. 3-4-16) इति ब्रह्मज्ञानात् पारतन्त्र्यनिवृत्तिः सू[चि]तेत्यर्थः । फलितमाह—**तस्मादिति** । उक्तहेतुबलात् सामर्थ्याच्चेत्यर्थः । [1473]

सामर्थ्यात् देवानां विघ्नकरत्वे कर्मफलेऽप्यनाश्वासः इति शङ्का तन्निरासश्च

समर्थत्वात् धीफलविघ्नकारित्वे कर्मफलविघ्नकारित्वमपि स्यात् , इत्यना[1]श्वासं

---

* **ब्रह्मवित्त्वे चेति** पारतन्त्र्यस्य ब्रह्माज्ञाननिमित्तकत्वात् ज्ञानेनाज्ञाननिवृत्तौ पारतन्त्र्यमपि निवर्तते इत्यर्थः ।

1. **अनाश्वासं**—अदृष्टार्थकर्मानुष्ठाने विश्वासाभावम् ।

कर्ममन्त्रौषधितपःकालादीनां च विद्यते ।
महती शक्तिरित्यत्र युक्तमाशङ्कितुं फले ॥ (1476)

देवादयः स्वतन्त्रत्वात् फलप्राप्तिविघातयोः ।
सर्वं कुर्युरनाश्वासः तस्मात्प्राप्नोति कर्मसु ॥ (1477)

* नैवं सर्वपदार्थानां नियतादानकारणात् ।
जगद्वैचित्र्यदृष्टेश्च स्वभावे तदसंभवात् ॥ (1478)

सुखादिफलदं कर्मेत्यस्मिन् पक्षे व्यवस्थिते ।
श्रुतिन्यायादिसंसिद्धेर्नातो विघ्नकृतः सुराः ॥ (1479)

कर्मणैव स्वसिद्ध्यर्थं तेषां क्रोडीकृतत्वतः ।
नात्मानं लभते कर्म देवेशाद्यनपेक्षि सत् ॥ (1480)

शङ्कते—नन्विति । [1474] समर्थानां विघ्नकरत्वेऽ(पि)[ति]प्रसङ्गान्तरमाह—तथेति । [1475] एतत् स्पष्टयति—कर्मेति । [1476] [1]तस्मात् स्वभाववादो युक्तः, इत्युपसंहरति—देवादय इति । [1477]

प्राणिनां सुखादिवैचित्र्यदृष्टेः, तैलादिकार्यार्थिभिः [2]तिलादिकारणोपादानाच्च न युक्तः स्वभाववादः, इति दूषयति—नैवमिति । [1478] अस्तु कर्मफलं जगत्, किमतः; तत्राह—सुखादीति । [1479] देवादीनां कर्मफल(त्व)विघ्नकारित्वाभावे हेतुमाह—कर्मणेति । तमेव हेतुं व्यतिरेकद्वारा द्रढयति—नात्मानमिति । [1480] देवादी[नां]कर्मफलानुगुणत्वे किं सिद्धम्, इत्यत्राह

---

1. 'नैवं सर्वपदार्थानाम्' इति समाधानवार्त्तिके स्वभाववादनिराकरणात् अत्र चोद्यावसाने स्वभाववादतात्पर्यमाह—तस्मात् स्वभाववादो युक्तः इत्युपसंहरतीति ।

2. तिलादिकारणोपादानाच्चेति प्रतिनियतेत्यादिः ।

* "कस्येदं चोद्यं, स्वभाववादिनः अस्वभाववादिनो वेति विकल्प्य, आद्यं दूषयति—नैवमिति । द्वितीयं प्रत्याह—सुखादीति ।" इति अवतारयति शास्त्रप्रकाशिका।

फलदानेऽनुलोमत्वान्नामी स्युर्विघ्नकारिणः ।
यथा कर्म तथेशादि कर्मापेक्ष्यैव सिद्ध्यति ॥ (1481)

सर्वं सर्वमपेक्ष्यैव संहतत्वात् प्रसिद्ध्यति ।
प्रधानगुणभावश्च क्वचित्कस्य चिदिष्यते ॥ (1482)

विघ्नकार्येऽपि चाप्येते नानपेक्ष्य प्रकुर्वते ।
तत्सामर्थ्याप्रणोद्यत्वात्सर्वेषां सर्वकर्मसु ॥ (1483)

गुणप्रधानभावश्च देवकालेश्वरादिषु ।
कर्मस्वनियतो दृष्टो नान्यथा चोपपद्यते ॥ (1484)

—**फलेति** । यथा कर्म देवाद्यपेक्षं, तथा देवादयः कर्मापेक्षाः । अतो न [1]तत्फलविघ्नकारित्वमिति, हेत्वन्तरमाह—**यथेति** । [1481] [2]अन्योन्यापेक्षत्वे हेतुमाह—**सर्वमिति** । कथं तर्हि क्वचित् कस्य चित् प्राधान्यम्, अत आह—**प्रधानेति** । [3]सर्ववादिभिरिष्टं, नेदं[4][चो]द्यमित्यर्थः । [1482] देवादेः कर्मापेक्षत्वे हेत्वन्तरमाह—**विघ्नेति** । विघ्नलक्षणं यत् कार्यं तदपि कर्मानपेक्षा देवादयो न कुर्वते । सर्वेषु कर्मसु सर्वेषां हेतूनां सामर्थ्यस्यानिराकार्यत्वात् । अतो विघ्नकरणेऽपि कर्मसामर्थ्यस्यानिरस्यत्वात् [5]तत्र [6]तेषां यथा कर्मापेक्षा, तथा अन्यत्रापि सर्वत्र [7]तदपेक्षेत्यर्थः । [1483] कर्मापेक्षत्वेऽपि तेषां प्राधान्यात् तत्फलविघ्नकारिता, अत आह—**गुणेति** । [1484] अन्यथानुपपत्तिं प्रथयति—**यदेति** । बहूनामेकस्मिन् कार्ये समप्रधानानां भिन्नमतित्वे कार्या[नु]दयप्रसङ्गादभिन्नमतित्व-

---

1. **न तत्फलविघ्नकारित्वमिति** देवानामिति शेषः ।
2. **अन्योन्यापेक्षत्वे** इति कर्मणां देवानाञ्चेत्यादिः ।
3. **सर्ववादिभिरिष्टमिति** क्वचित् कस्यचित् प्राधान्यमिति शेषः ।
4. **नेदं चोद्यमिति** अतः तत्र कथम् इति चोद्यमयुक्तमित्यर्थः ।
5. **तत्र**—विघ्नकरणे ।
6. **तेषां**—देवानाम् ।
7. **तदपेक्षा**—कर्मापेक्षा ।

यदैकस्य प्रधानत्वं तदान्यस्याप्रधानता ।
एवं नृत्यज्जगन्नित्यमतद्वृत्त्यात्मनि स्थितम् ॥ (1485)

* गुणप्रधानभावश्च पदार्थानामनन्ततः ।
क्षेपीयस्त्वाच्च कालस्य दुर्ज्ञेयो मतिविभ्रमात् ॥ (1486)

कर्मैव कारणं केचित् फलप्राप्तौ प्रचक्षते ।
दैवमेकेऽपरे कालं स्वभाव इति चापरे ॥ (1487)

श्रुतयः स्मृतिवादाश्च कर्मप्राधान्यमेव तु ।
अङ्गीकृत्य प्रदृश्यन्ते प्रवृत्ताः सर्व एव हि ॥ (1488)

पुण्यः पुण्येन भवति पापः पापेन कर्मणा ।
वचांस्येवं सुबहुशो लक्ष्यन्ते शास्त्रभूमिषु ॥ (1489)

यद्यप्येषां स्वविषये प्राधान्यं कस्य चित् क्वचित् ।
अप्राधान्यं तदन्येषां तथापि तु न कर्मणाम् ।
फलप्राप्तावहेतुत्वं शास्त्रन्यायावधारणात् ॥ (1490)

सिद्ध्यर्थं गुणप्रधानभावोऽभ्युपेयः इति भावः। गुणप्रधानभावेन जगद्वैचित्र्याद्द्वैतविघातः, अत्राह—एवमिति । [1485] गुणप्रधानभावोऽस्ति चेत् अस्मिन् देशादाविदं प्रधानस्मृतिं ध्वनयति—वचांसीति । ? अत्र ग्रन्थपातः ।

पुष्पोद्गमतमोऽपहारादौ कालसूर्यादेः प्राधान्यप्रसिद्धेः [1]न कर्मैव प्रधानम्, अत्राह—यद्यपीति । हेतुत्वं—प्राधान्यमिति यावत् । (1490) कर्मणः फल-

---

* 'गुणप्रधानभावश्च' इत्यादयः चत्वारः श्लोकाः मुद्रितपुस्तकानुसरेण निवेशिता इति बोध्यम् ।

1. न कर्मैव प्रधानमिति श्रौतस्मार्तवचनसिद्धमपि कर्मप्राधान्यं न घटते इति भावः ।

कर्मणः फलसंप्राप्तिरप्राप्तिश्चेह येक्ष्यते ।
साद्गुण्यविगुणत्वाभ्यां सा स्यात्कर्मण एव च ।। (1491)

विघ्नं कुर्वन्ति नो देवा विद्योत्थफलसंगतौ ।
उक्तं यदपनुत्त्यर्थं तत्र प्रतिविधीयते ।। (1492)

अविद्याहानमात्रत्वात्कैवल्याप्तिफलात्मनः ।
तत्प्राप्तेर्ज्ञानकालत्वान्नालं विघ्नाय देवताः ।। (1493)

चक्षूरूपाभिसंबन्धसमकाला यथेष्यते ।
रूपाभिव्यक्तिरेवं स्यादविद्याध्वस्तिरात्मनः ।। (1494)

यथास्थितात्मयाथात्म्यज्ञानजन्मातिरेकतः ।
न तत्तमोनिवृत्तिः स्यात् तदुत्थस्य च वस्तुनः ।। (1495)

हेतुत्वमेव नास्ति [1]कारीर्यादिषु व्यभिचारात् । कुतस्तत्प्राधान्यम्, अत्राह— कर्मण इति । क्वचित् [2]फलदर्शनात् कारीर्यादेः तद्धेतुत्वं सिद्ध्येत् । यत्र [3]तत्र दृश्यते, तत्र अङ्गादिवैकल्यं [4]प्रयोजकमित्यर्थः । (1491)

विद्याफले देवानां विघ्नकरत्वनिरासः

कर्मफले देवादीनां विघ्नकरत्वं निरस्य, विद्याफले [5]तदाशङ्कितं निरसि(त)-[तु]मनुवदति— विघ्नमिति । परिहरति— अपनुत्त्यर्थमिति । (1492) परिहारं प्रकटयति— अविद्येति । (1493) दृष्टान्तेनैतत्[6] स्पष्टयति— चक्षुरिति । (1494) अज्ञाननिवृत्तेः [7]साधनान्तराधीनत्वात् न ज्ञानसमकाला कैवल्याप्तिः,

---

1. कारीर्यादिषु व्यभिचारादिति क्वचित् कारीर्यादिके कर्मणि अनुष्ठितेऽपि वृष्टिरूपफलस्यादर्शनादित्यर्थः ।
2. फलदर्शनात्—वृष्टिरूपफलदर्शनात् ।
3. तत्र दृश्यते—वृष्टिः फलं न दृश्यते ।
4. प्रयोजकमिति फलानुत्पत्तिप्रयोजकमित्यर्थः ।
5. तदाशङ्कितं—आशङ्कितं देवानां विघ्नकरत्वम् ।
6. एतत् स्पष्टयति—अज्ञानध्वंसरूपकैवल्याप्तिः विद्यासमकाला इत्येतत् स्पष्टयति ।
7. साधनान्तराधीनत्वात्—विद्यातिरिक्तसाधनाधीनत्वात् ।

सर्पात्मना गृहीतायां न दण्डादीक्ष्यते स्रजि ।
प्रतीच्येकतनुग्राह्ये तदन्यन्न तथेक्ष्यते ॥ (1496)

अन्योन्यव्यभिचारित्वमज्ञानेऽपि ह्यनात्मनाम् ।
किमु विध्वस्तनिःशेषघनाज्ञानेऽन्तरात्मनि ॥ (1497)

* रूप्याभज्ञानवेलायां शुक्तिकाधीर्न बाधते ।
तदसूतेरिह स्वात्मन्यादिमध्यान्तबाधधीः ॥ (1498)

निर्निमित्तं प्रमात्रादेः प्रत्यग्रूपमनात्मनः ।
सनिमित्तं पराग्रूपमात्मनो मोहहेतुतः ॥ (1499)

अत्राह—**यथेति** । (1495) विमतमज्ञानोत्थं व्यभिचारित्वात् सर्पवत्, इत्याह—**सर्पेति** । स्रजि सर्पधीगृहीतायां न दण्डादिभ्रान्तिः, दण्डादिधीगृहीतायां न सर्पभ्रमो यथा, तथा आत्मनि एकतनुग्राह्ये—जा(य)[ग्र]त्प्रपञ्चरूपेण गृहीते, न स्वप्नभ्रमः, स्वप्नभ्रमगृहीते न जागद्भ्रम इत्यर्थः । **सर्वात्मना** इति पाठे, स्रजि यथा [1]विशेषरूपेण गृहीतायां न दण्डादिधीः, ए (वाह्मा)[वमा]त्मन्यद्वितीयरूपे गृहीतेऽनु (फलस्य)[पलभ्य] मानं द्वैतं तत्वधीनिवर्त्यत्वात् मिथ्येत्यर्थः । (1496) व्यभिचारित्वं किंपुनर्न्यायेनाह—**अन्योन्येति** । (1497)

इतश्च जगन्मिथ्येत्याह—**रूप्येति** । रूप्यधीकाले [2]शुक्तिकाधीर्न बाधिकास्ति । आत्मनि स्वरूपज्ञानं बाधकं वाक्योत्थज्ञानात्प्राक् ऊर्ध्वं तत्काले चास्ति । तस्मात् प्रतिपन्नोपाधौ निषेधविषयत्वात् मिथ्येत्यर्थः । (1498) स्वरूपज्ञानमेव नास्ति, कथं तस्य बाधकत्वम्, अत्राह—**निर्निमित्तमिति** । प्रमात्रादेरनात्मनः चैतन्याकारभजनं स्वाभाविकम् । अतः प्रमात्रादिसाक्षित्वेन स्वरूपानुभवः

---

1. **विशेषरूपेण**—स्रक्त्वेन असाधारणरूपेण ।
2. **शुक्तिकाधीः** — इयं शुक्तिकेति शुक्तिकात्वप्रकारकधीः ।

* "**रूप्येति** रूप्याकारं ज्ञानं यदा जायते तदा अधिष्ठानशुक्तीदमंशज्ञानं रूप्यतज्ज्ञाने न बाधते । तयोः इदमंशाज्ञानानुत्थत्वात् । प्रत्यग्ब्रह्मणि तु वाक्योत्थज्ञानात्प्रागूर्ध्वं तत्काले च स्वरूपज्ञानाख्या बाधधीः द्वैततद्धियोरस्ति । अतो यत्र रूप्यादौ कल्पितत्वसंमतिः, तत्र कदाचिदेव बाधधीः, द्वैते सदेत्यावश्यकं कल्पितत्वम् ।" इत्यपि विवृणोति **शास्त्रप्रकाशिका** ।

एक आत्मेति विज्ञाने दोषोऽप्यप्रतिबन्धकः ।
मूढात्मनामपि ह्येतन्न विसंवादमृच्छति ॥ (1500)

मिथ्यासंशयविज्ञानमनात्मानं प्रतीष्यते ।
प्रत्यगात्मनि तद्यस्मात् सम्यग्ज्ञानान्न भिद्यते ॥ (1501)

अज्ञानं चेच्चिदाकारं संशयादिषु का कथा ।
* प्रमित्सिते प्रतीच्यस्मान्न दोषो नापि बाधकम् ॥ (1502)

महिमानो यदामी स्युरविद्याया न वस्तुनः ॥ (1503)

सिद्ध इत्यर्थः। प्रमात्रादेश्चैतन्याकारस्वीकारवत् आत्मनोऽपि बुद्ध्याकारभजनस्य स्वाभाविकत्वादकल्पितत्वं [1]तस्य, इत्यत आह—सनिमित्तमिति । (1499) अविद्यादोषप्रतिबन्धात् न स्वरूपानुभवसिद्धिः, अत्राह—एक इति । प्रतिदेहमहमेकोऽह (मह)मेकः इत्यहंप्रत्ययसाक्षित्वेनात्मसिद्धौ [2]नाविद्यादोषो विरोधीत्यर्थः । (1500) स्वरूपानुभवे लिङ्गान्तरमाह—मिथ्येति । मिथ्याज्ञानादेरसम्यक्त्वं अनात्मानं प्रत्येव । आत्मनि तु सम्यग्ज्ञानमेव । सदा तस्य चैतन्यभजनात् । ततो न तत्साधकानुभवाभाव इत्यर्थः । (1501) मिथ्याज्ञानादेः चैतन्याकारभजनं किंपुनर्न्यायेनाह—अज्ञानमिति । संशयादेः चैतन्याकारभजनप्रतिपादनफलमाह—प्रमित्सित इति । अस्मात्—संशयादिज्ञानात्, प्रमातुमिष्टे प्रतीचि न दोषः नापि बाधकमित्यर्थः । (1502) सकारणस्य जगतः तत्त्वधीबाध्यत्वे प्रकृते(कः) किं स्यात्, अत्राह—महिमान इति । आत्ममात्रत्वात् सर्वस्येत्यर्थः ।

---

1. तस्य—बुद्ध्यादेरनात्मनः ।

2. नाविद्यादोषो विरोधीति तस्यापि स्वसिद्धावनुभवापेक्षत्वादिति भावः ।

* "यथोक्तस्वरूपज्ञानेन कुतो द्वैतबाधः । न हि तस्य बाधकत्वे कदाचिदपि द्वैतं स्यात् । तथा च व्यवहारादिविरोधः इत्याशङ्क्याह—प्रमित्सित इति । अस्मात्—तत्त्वमादिवाक्यात्, प्रतीचि प्रमातुमिष्टे, न कारणदोषः, नापि बाधकम् । अध्यक्षादेः कल्पितविषयत्वात् । अतः अदुष्टकारणत्वात् अबाध्यत्वाच्च वाक्योत्थं ज्ञानं सम्यग्ज्ञानं तदिद्धं च स्वरूपज्ञानमज्ञानादिबाधकं न केवलमिति कुतो यथोक्तानुपपत्तिप्रसक्तिरित्यर्थः ।" इति शास्त्रप्रकाशिका ।

कालादेवादयः तस्यां ध्वस्तायां तद्विनाशतः ।
देवेश्वरादयः के स्युर्विघ्नं वा कस्य कुर्वते ॥ (1504)

यत्र त्वस्येति श्रुत्यैव सर्वमेतत् स्फुटीकृतम् ।
इहापि हेतुसंसिद्ध्यै तत् स्पष्टमभिधीयते ॥ (1505)

यतो विघ्नकृतामात्मा प्रत्यग्याथात्म्यविद्भवेत् ।
तद्गोचरातिवर्तित्वं विद्याकाले तमोहतेः ॥ (1506)

आत्मामीषां तदा ब्रह्म देवादीनां भवेद्दृशी ।
कालाद्यन्तरितं यत्स्यात् प्राप्त्युत्पत्त्यादिलक्षणम् ॥ (1507)

अनात्मैव फलं तत्र देवानामीशता भवेत् ।
अपि ज्ञातात्मतत्त्वानामभावात् ज्ञानसन्ततेः ॥ (1508)

(1503–1504) [1]तत्र मानमाह—यत्रेति । 'आत्मा ह्येषाम्' इति [2]हेतुवाक्यतात्पर्यमाह—इहापीति । तत्—आत्मत्वं । अविघ्नकर्तृत्वे हेतुत्वेनोच्यते इत्यर्थः । (1505) हेतुवाक्यं व्याकरोति—यत इति । अतः तद्गोचरा(नि)[ति] वर्तित्वं—देवादिप्रयुक्तविघ्नाविषयत्वमित्यर्थः । (1506) विद्याधिकारिणो मानवस्य कथं देवाद्यात्मत्वम्, अत्राह—आत्मेति । ज्ञानादज्ञाननिवृत्तौ विद्वानेषामात्मा भवति । अतो न ते विघ्नकर्तार इत्यर्थः । क तर्हि तेषां विघ्नकर्तृत्वम्, अत्राह—कालेति । ईशता—निग्रहानुग्रहसमर्थतेत्यर्थः ।

अन्त्यस्य ज्ञानस्य तत्सन्तानस्य वा अविद्यानिवर्तकत्वं न विद्यामात्रस्य इति स्वयूथ्यशङ्का, तन्निरासश्च

विद्याकाले तमोहतेः (वा. 1506) इति यदुक्तम्, तत्र स्वयू[3]थ्यः शङ्कते—अपीति । अज्ञानामिव तत्त्वज्ञानामपि न ब्रह्मास्मीति ज्ञानसन्ततिः ज्ञानस्या-

---

1. तत्र मानं—सर्वस्य आत्ममात्रत्वे प्रमाणम् ।
2. हेतुवाक्येति देवानां विदुषः विद्याफलप्राप्तौ विघ्नकर्तृत्वाभावे हेतुनिरूपकवाक्येत्यर्थः ।
3. स्वयूथ्यः — वेदान्त्येकदेशी अन्त्यज्ञानस्याज्ञाननिवर्तकत्ववादी ।

अन्त्योऽविद्यापनुद्बोधो रागादिप्रत्ययोत्थितेः ।
* इति चेन्नैतदेवं स्यादाद्येऽनैकान्तिकत्वतः ॥ (1509)

नान्त्याऽविद्यापनुद्बुद्धिरात्मैकविषयत्वतः ।
आद्यात्मबुद्धिवद्धेतोरनैकान्तिकतेष्यते ॥ (1510)

अनैकान्तिकता हेतोस्तद्वत् सन्ततिवादिनः ।
न चाभ्यासात् प्रमाणानि कुर्वन्त्यर्थावबोधनम् ॥ (1511)

संबन्धमात्राभिव्यक्तेर्व्यञ्जकत्वात्प्रदीपवत् ।
भोजनादौ न च सति ज्ञानसन्ततिरिष्यते ॥ (1512)

नन्तरफलत्वोपगमात् । अतो न सा अविद्यानिवर्तिकेत्यर्थः । (1507–1508) मरणकालोत्पन्नज्ञानमेव अविद्यानिवर्तकं न प्राक्तनमिति कुतोऽवगम्यते, अत्राह—**अन्त्य इति** । [1]प्रागिव ऊर्ध्वमपि [2]रागादिदर्शनादित्यर्थः । अन्त्यबोधस्य अज्ञाननिवर्तकत्वं, अन्त्यत्वात्, आत्मविषयत्वाद्वा । आद्ये, [3]अहं मनुष्य इति चरमज्ञाने अनैकान्तिकता । द्वितीये दोषमाह—**नैतदिति** । (1509) अनुमानविरोधमाह—**नान्त्येति** । अन्त्यज्ञानमविद्यानिवर्तकं, आत्मविषयज्ञानत्वात् व्यतिरेकेण घटज्ञानवत्, अत्राह—**हेतोरिति** । (1510) अभ्यासस्याविद्यानिवर्तकत्वात् अन्त्यज्ञानस्य [4]तदभावानुमानं सिद्धसाधनम्, अत्राह—**अनैकान्तिकतेति** । [5]सन्ततेरपि अविद्यानिवर्तकत्वं आत्मविषयत्वाच्चेत्, आद्यसन्ततावनैकान्तिकतेत्यर्थः । मानानामभ्यासापेक्षया अर्थनिश्चायकत्वात् अभ्यासादुत्पन्ननिश्चयः अविद्यानिवर्तकः, इत्यत आह—**न चेति** । मानस्यात्म[6]संबन्धमात्रेणार्थव्यञ्जक-

---

1. **प्रागिवेति** ब्रह्मास्मीति ज्ञानादित्यादिः ।
2. **रागादिदर्शनादिति** रागादेश्चाज्ञानकार्यत्वादिति भावः ।
3. **अहं मनुष्य इति चरमज्ञाने इति** अध्यासात्मकत्वेन अज्ञाननिवर्तकत्वरूपसाध्याभाववति तज्ज्ञाने अन्त्यत्वसत्त्वात् व्यभिचार इत्यर्थः ।

* **आद्ये अनैकान्तिकत्वत इति** अज्ञाननिवर्तकत्वरूपसाध्याभाववति आद्यब्रह्मज्ञाने आत्मविषयत्वसत्त्वात् व्यभिचार इत्यर्थः ।

4. **तदभावानुमानं**—अविद्यानिवर्तकत्वाभावानुमानम् ।
5. **सन्ततेरपि**—अन्त्यसन्ततेरपि ।
6. **आत्मसंबन्धमात्रेण**—मेयेन मानसंबन्धमात्रेण ।

तदन्तरायबाहुल्यात् सुषुप्त्यादौ च नेष्यते ।
प्रत्यक्प्रमेयपूर्वैव सर्वासां नो यतो धियाम् ।
स्मृतिराम्रेडनं तस्मात् सिद्धमात्मधियः सदा ॥ (1513)

ज्ञानस्य वस्तुतन्त्रत्वान्न कर्त्रनुविधायिता ।
शीतोष्णज्ञानवत्तस्मान्नेष्यते ज्ञानसन्ततिः ॥ (1514)

भोजनादिनिरोधेन सन्ततिश्चेत् समर्थ्यते ।
उक्ता परिहृतिस्तत्र न भूयोऽपि व्यपेक्षते ॥ (1515)

क्षुत्पिपासापरिम्लानचेतस्त्वान्नितरां न सा ।
भोजनादिनिरोधेन न च तस्याः प्रमेक्ष्यते ॥ (1516)

सन्तत्यारम्भकधियामियत्तानवधारणात् ।
शास्त्रार्थानिश्चयो दोषः स चानिष्टः प्रसज्यते ॥ (1517)

त्वादित्यर्थः । किञ्च, अविच्छिन्ना धीसन्ततिः अर्थनिश्चयहेतुः, उत विच्छिन्ना । नाद्यः, असंभवात्, इत्याह—भोजनादाविति । (1511–1512) द्वितीये, लौकिकात्मज्ञा(ना)[नस्या]भ्यासः साध्यः, अखण्डब्रह्मज्ञान(स्ये)[स्य वे]ति विकल्प्य, प्रथमं प्रत्याह—प्रत्यगिति । लौकिकात्मधीसन्ततेः सर्वेषां [1]स्वतःसिद्धत्वात् न ततोऽविद्यानिवर्तको निश्चय इत्यर्थः । (1513) द्वितीयं दूषयति—ज्ञानस्येति । कर्तुमकर्तुमन्यथा वा कर्तुमशक्यं ज्ञानं, कुतस्तदभ्यास इत्यर्थः । (1514)

यदुक्तं अविच्छिन्नधीसन्तत्यनुपपत्तिरिति, तत्र [2]परः परिचोदयति—भोजनादीति । 'ज्ञानस्य वस्तुतन्त्रत्वात्' इत्युक्तः परिहारः, इत्याह—उक्तेति । (1515) [3]पक्षश्चायमसंगतः, इत्याह—क्षुदिति । अभ्यासकार्यत्वे मानाभावाच्च न सन्तति[:] कार्या, इत्याह—भोजनेति । (1516) अभ्यासजनिश्चयस्य अविद्यानिवर्तकत्वे दोषान्तरमाह—सन्ततीति । (1517) 'आत्मेत्येवोपासीत'

---

1. स्वतःसिद्धत्वादिति सर्वेषामपि प्रत्ययानां अहमिति लौकिकात्मधीपूर्वकत्वादिति भावः ।
2. परः — अभ्यासवादी ।
3. पक्षश्चायं—भोजनादिनिरोधेन सन्ततिसमर्थनपक्षः ।

मतं सन्ततिमात्रत्वे निश्चितिः स्यात्तथापि च ।
अनैकान्तिकता हेतोराद्यसन्ततिवद्भवेत् ॥ (1518)

समानविषयत्वेऽपि नाद्याऽविद्यां निहन्ति चेत् ।
ज्ञानसन्ततिरन्त्या नः सेत्स्यतीत्यत्र का प्रमा ॥ (1519)

मरणेऽपि न विश्वासो हिक्किकावशवर्तिनः ।
ज्ञानसन्ततिनिष्पत्तौ तमोमात्रसमाप्तितः ॥ (1520)

कर्मच्छिद्रेषु कुर्वन्ति येऽपि सम्यग्धियं बलात् ।
* नूनं ते नासिकाग्रेण वीक्षन्ते सूर्यमण्डलम् ॥ (1521)

वस्तुतन्त्रं न हि ज्ञानं नृतन्त्रं लोकवह्निवत् ।
अनन्यज्ञातृकत्वाच्च प्रत्यग्ज्ञानस्य सर्वदा ॥ (1522)

न चानिवर्तकं ज्ञानं प्रत्यङ्मोहस्य युज्यते ।
स्वानुभूतिविरुद्धत्वादग्निदाहाबोधवत् ॥ (1523)

इति धीसन्ततिमात्रं मुक्तिसाधनं निश्चितम्, इत्याह—(स)[म]तमिति । दूषयति —तथापीति । (1518) फल[1]व्यभिचारित्वं विशदयति—समानेति । (1519) अन्त्यसन्ततिमुपेत्यो[2]क्त्वा, सैव न युक्ता, इत्याह—मरणेऽपीति । अन्त्यकाले भवन् शब्दविशेषो हिक्किका । (1520) ननु प्रतिदिनं नित्यनैमित्तिकानुष्ठानपरिशिष्टकालेषु अनुष्ठितधीसन्तानात् सनिदानसंसारनिवृत्तेः, किं यावज्जीवा(व)[वि]च्छिन्नतदभ्यासेन, इत्याशङ्क्याह—कर्मेति । (1521) इच्छया ज्ञानस्य कर्तुमशक्यत्वं स्पष्टयति—वस्त्विति । आत्मधियो व्यवहारदशायां सदा स्वसाक्षिकत्वाच्च न कर्तव्यता, इत्याह—अनन्येति । (1522) धीमात्रादविद्यानिवृ(त्ति)[त्य]योगादभ्यासापेक्षा, अत्राह—न चेति । अग्निर्न द(द)[ह]तीतिवत् आत्मधियोऽ-

---

1. फलव्यभिचारित्वमिति फलं—अविद्यानिवृत्तिः, तजनकत्वाभावमिति यावत् ।
2. उक्त्वेति दूषणमित्यादिः ।
* 'नूनं ते नासिकाग्रेण वीक्षन्ते सूर्यमण्डलम्' इत्यनेन इच्छया ज्ञानस्य कर्तुमशक्यत्वं विवक्षितमिति बोध्यम् ।

सर्ववेदान्तवाक्यानामेतावन्मात्रनिष्ठतः ।
न चार्थवादता तेषामन्याशेषत्वकारणात् ॥ (1524)

अहंधीविषयत्वाच्चेत्तेषां स्यादर्थवादता ।
नोक्तत्वात् परिहारस्य न चाहंगम्यतात्मनः ॥ (1525)

अहंबुद्ध्येक्ष्यते प्रत्यक् प्रतीचा चाप्यहंमतिः ।
* अन्योन्याश्रयता दोषः स्यादहंवृत्तिवीक्षणे ॥ (1526)

यत एवमतो यो नः प्रत्यक्संमोहहानिकृत् ।
आद्योऽन्त्यः संततो वासौ बोधो मुक्तिफलः स्मृतः ॥ (1527)

यत्तूक्तं ज्ञाततत्त्वानामपि रागादिदर्शनात् ।
नाविद्याहानिकृत् ज्ञानमत्र प्रतिविधीयते ॥ (1528)

विद्या न निवर्तते इति स्वानुभवविरुद्धमित्यर्थः । (1523) वेदान्तानामन्यपरत्वादक्यधियोऽप्रमाणत्वात् नाविद्यानिवर्तकत्वम्, अत्राह—सर्वेति । [1]तत्परत्वं '[2]सर्वोऽप्ययं वेदः' इत्यत्रोक्तमित्यर्थः । (1524) अहंधीसिद्धात्मविषयत्वात् वेदान्तानामनुवादकत्वादमात्वम्, इत्याह—अहमिति । अहंधीगम्यः प्रमाता, तत्साक्षिणो ब्रह्मत्वं वेदान्ता बोधयन्ति इत्युक्तं परिहारं स्मारयति—नेति । (1525) साक्षिणोऽहंधीगम्यत्वाभावे हेतुमाह—अहंबुद्ध्येति । (1526) विचारफलमुपसंहरति—यत इति । (1527)

ज्ञाततत्त्वानामपि रागादिदर्शनात् न ज्ञानमविद्यानिवर्तकमित्याक्षेपस्य जीवन्मुक्तिनिरूपणेन परिहारः

परोक्तमनूद्य परिहरति—यत्त्विति । (1528) परिहारं प्रकटयति—आरब्धेति ।

---

1. तत्परत्वं—आत्मयाथात्म्यपरत्वम् ।
2. सर्वोऽप्ययमिति संबन्धग्रन्थे इत्यादिः ।
* अहंवृत्तिवीक्षणे—अहमिति वृत्त्या साक्षिणः गम्यत्वे ।

आरब्धफलशेषैकहेतुत्वाद्देहसंस्थितेः ।
रागादिप्रत्ययोत्पत्तिरिषुचक्रादिवेगवत् ॥ (1529)

तस्य वृत्तफलत्वान्नो ज्ञानं स्यात्तन्निवृत्तिकृत् ।
अतीतत्वाच्च तद्धान्यै नालमात्मावबोधनम् ॥ (1530)

यत्तु स्वात्माश्रयं कर्म ह्यनारब्धफलं भवेत् ।
उत्पित्स्वनागतं कृत्स्नं ज्ञानं हन्ति तदेव नः ॥ (1531)

अनारब्धफलं कर्म न त्वारब्धफलं यदि ।
निरुणद्ध्यात्मविज्ञानं तदनिष्टं प्रसज्यते ॥ (1532)

प्रारब्धात्मफलं नो चेत् कर्म ज्ञानं निवर्तयेत् ।
अनारब्धफलं हन्तीत्यत्रापि स्यान्न निश्चितिः ॥ (1533)

येन कर्मणा शरीरमारब्धं [1]तत्कार्यत्वाद्विदुषो रागादेः, [2]तत्क्षये कैवल्यमवश्यं भवतीत्यर्थः । (1529) कर्मत्वात् आरब्धकर्मणोऽपि अनारब्धकर्मवत् ज्ञानान्निवृत्तिः स्यात्, अत्राह—तस्येति । आरब्धफलस्य भोगादेव क्षयः । अन्यथा जीवन्मुक्तिशास्त्रविरोधादित्यर्थः । प्रारब्धकर्मणः फलरूपेणोत्पन्नत्वात् पृथक् रूपान्तराभावात् न तन्निवर्तिका धीः, इत्याह—अतीतत्वाच्चेति । (1530) कस्य तर्हि ज्ञानान्निवृत्तिः, अत्राह—यत्त्विति । स्वात्माश्रयं—तत्त्वधीविषयात्मगतमिति यावत् । अदत्तफलं कर्म फलरूपेणोत्पित्सु, ज्ञानोत्तरकालभावि च धीबाध्यमित्यर्थः । (1531) अनिष्टं प्रसञ्जयितुं सिद्धान्तिनोक्तमनुवदति—**अनारब्धेति** । (1532) विमतं न धीबाध्यं कर्मत्वादारब्धकर्मवत् इत्यनिष्टं दर्शयति—**प्रारब्धेति** । (1533) 'क्षीयन्ते चास्य कर्माणि' (मु. 2-2-8) इति [3]श्रुतिविरुद्धकालात्ययापदि-

---

1. **तत्कार्यत्वात्**—प्रारब्धकर्मशेषकार्यत्वात् ।
2. **तत्क्षये**—प्रारब्धकर्मक्षये ।
3. **श्रुतिविरुद्धकालात्ययापदिष्टमिति** विमतं न धीबाध्यं कर्मत्वादिति बाधितहेत्वाभासः । श्रुतिविरुद्धकालात्ययापदिष्टमिति बाधितावान्तरप्रभेदः अनुसन्धेयः । इयं सिद्धान्तिनः शङ्का बोध्या ।

न चेदारब्धकार्येषु ज्ञानस्वातन्त्र्यमिष्यते ।
अनारब्धेषु नितरां, पुंसोऽपि स्याद्यथेष्टता ॥ (1534)

न च तेषु निरुद्धेषु किंचिन्नः स्यात्प्रयोजनम् ।
प्राङ्मृतेर्मुक्त्यसंसिद्धेः अबीजत्वाच्च संसृतेः ॥ (1535)

* सर्वसंहारकाले च निरोधोऽभूदशेषतः ।
तावानपि न पर्याप्तो निरोधो मुक्तये कथम् ॥ (1536)

ष्टम्, इत्यत्राह—**न चेदिति** । वर्तमानापदेशत्वादर्थ[1]वादोऽयमित्यर्थः । किञ्च, विदुषो यथेष्टचेष्टापि स्यात् वर्तमानदेहे पतिते देहान्तरानङ्गीकारात्, इत्याह—**पुंसोऽपीति** । (1534) [2]किमारब्धस्य धीबाध्यत्वं साध्यं, [3]अनारब्धस्य तद्बाध्यत्वं वा । प्रथमं प्रत्याह—**न चेति** । ज्ञानादारब्धफलकर्मसु दग्धेषु न किंचित् प्रयोजनमस्तीति [4]देहपातात् प्राक् द्वैतदर्शनाभावरूपमुक्त्यभावादित्यर्थः । द्वितीयं दूषयति—**अबीजत्वाच्चेति** । [5]उत्तरकालं संसारस्य बीजाभावात् मुक्तिः स्यादेव । अनारब्धफलकर्मणां ज्ञानात् दाहस्य श्रुतिस्मृतिप्रसिद्धत्वात् । न च यथेष्टचेष्टा, [6]तन्मूलदोषाभावादित्यर्थः । [1535]

ज्ञानस्य मुक्तिहेतुत्वे भवदुक्तं स्यात् । न ज्ञानात् मुक्तिः, चित्तनिरोधस्य मुक्तिहेतुत्वात्, अत्राह—**सर्वेति** । तथापि न धीमात्रान्मुक्तिः अहं ब्रह्मास्मीति निरन्तरप्रत्ययप्रवाहजनितभावनोपचयस्य [7]तद्धेतुत्वात्, अत्राह—**भावनेति** ।

---

1. **अर्थवादोऽयमिति** 'क्षीयन्ते चास्य कर्माणि' इति वेदः अर्थवादः इत्यर्थः ।
2. **आरब्धस्य**—आरब्धफलस्य कर्मणः ।
3. **अनारब्धस्य**—अनारब्धफलस्य कर्मणः ।
4. **देहपातात् प्रागिति** न हि ज्ञानोदये सति सद्यः शरीरं पतति । जीवन्मुक्तिशास्त्रात्, विद्यासंप्रदायाच्च । न च सति देहे द्वैतदर्शनाभावरूपा विदेहमुक्तिरिति भावः ।
5. **उत्तरकालं**—शरीरपातोत्तरकालम् ।
6. **तन्मूलदोषेति** यथेष्टचेष्टाप्रयोजकदोषेत्यर्थः ।
* **सर्वसंहारकाले**—प्रलयकाले । विमतो निरोधः न मुक्तिहेतुः निरोधत्वात् प्रलयस्थनिरोधवदित्यर्थः ।
7. **तद्धेतुत्वात्**—मुक्तिहेतुत्वात् ।

अल्पीयोऽहःसमभ्यस्तो निरोधोऽलं विमुक्तये ।
भावनोपचयान्नापि मुक्तिः स्याद्भङ्गुरत्वतः ॥ (1537)

दुःख्यस्मीत्यपि चेद् ध्वस्ता कोटिकल्पोपबृंहिता ।
अल्पीयोऽभ्यासजा साध्वी भावनेत्यत्र का प्रमा ॥ (1538)

शास्त्रार्थस्य समाप्तेश्च मुक्तिः स्यात्तावता मितेः ।
रागादयः सन्तु कामं न तद्भावोऽपराध्यति ॥ (1539)

*आगमाद्वेद् चेद्ब्रह्म ब्रह्मैव भवतीति हि ।
फलावस्थस्य च सतः कुतो रागादिसंभवः ॥ 1540)

न च ब्रह्मपरिज्ञानहुताशप्लुष्टमण्वपि ।
संभाव्यते ब्रह्मधियः सर्वान्त्यत्वैकहेतुतः ॥ (1541)

---

[1]तदुपचयस्य न मुक्तौ निमित्तत्वं मानाभावात्, उपादानत्वे तस्यानित्यत्वात् मोक्षोऽप्य(निश्चयः)[नित्यः] स्यादित्यर्थः । [1536–1537] तदनित्यत्वमसिद्धमिति चेत्, अत्राह—दुःखीति । [1538] कुतस्तर्हि मुक्तिरिति, ज्ञानात्, इत्याह—शास्त्रेति । ज्ञानादपि न मुक्तिः, विदुषोऽपि रागादिदर्शनात्, अत्राह—रागादय इति । 'ब्रह्मविद्ब्रह्मैव भवति' (मु. 3-2-9) इत्यादिश्रुतेः ज्ञानादेव मुक्तिः । तावता—ब्रह्मज्ञानान्मोक्षः इत्येतावन्मात्रप्रतिपादनेन, शास्त्रार्थस्य समाप्तत्वात्—उपनिषत्प्रयोजनस्य पर्यवसितत्वात्, ज्ञानदग्धवीर्यरागाद्यनुवृत्तावपि न विरोध इत्यर्थः । [1539] अस्मदादेरिव विदुषोऽपि अदग्धवीर्य एव रागादिरनुवर्तते, [2]तत्कार्यदर्शनात्, अत्राह—आगमादिति । रागादिकं सर्वं बाधितमनुवर्तते । अन्यथा विद्यानर्थक्यादित्यर्थः । [1540] ब्रह्मधियः अन्येन बाधितत्वात् न तथा

---

1. तदुपचयस्य—भावनोपचयस्य ।

2. तत्कार्यदर्शनात्—रागकार्यदर्शनात् ।

* 'मुक्तेष्वादिवत्' (वा. 932) इति वार्त्तिकव्याख्यानावसरे न्यायकल्पलतिकायां 'आगमाद्वेद चेत्' इति वार्तिकं संपूर्णमुद्धृतं वर्तते । तत्र 'कुतो रागादिसंभवः' इति पाठदर्शनात्, अस्माभिः स एवं पाठोऽत्र स्थापितः इति बोध्यम् 'कुतो रागादिसंप्लुतिः' इति मु. पु. पाठः ।

सम्यग्ज्ञानविरुद्धा धीर्न चैकात्म्यं विजानतः ।
* उत्पद्यते निर्विषया विषयाशयहानतः ॥ (1542)

लोकेऽनिर्ज्ञाततत्त्वस्य मिथ्याधीरुपजायते ।
प्रध्वस्ततत्त्वतमसः कुतः स्यात्कारणादृते ॥ (1543)

सम्यग्ज्ञानेऽपि चेत्सा स्याद्विश्रम्भः प्रसज्यते ।
एवं सत्यप्रमाणत्वं मितेश्चापि प्रसज्यते ॥ (1544)

सम्यङ्मिथ्याधियोर्यस्माद्विशेषो नोपलभ्यते ।
व्यवहारस्य लोपोऽतः सर्वस्य स्यादसंशयः ॥ (1545)

सम्यग्ज्ञानसमुत्पत्तिसमनन्तरमेव च ।
शरीरपातः कस्मान्नेत्येतच्चाप्यपहस्तितम् ॥ (1546)

पूर्वोक्तेनैव न्यायेन वक्तव्यं नावशिष्यते ।
ज्ञानोत्पत्तावतो ध्वस्तिः सर्वेषामपि कर्मणाम् ॥ (1547)

रागादेर्बाधितत्वम्, अत्राह—न चेति । [1541] 'अण्वपि' इति कथम्, जगद्दृष्टेरनष्टत्वात्, अत्राह—सम्यगिति । [1542] कारणाभावाच्च न मिथ्याधीः, इत्याह—लोक इति । [1543] सम्यग्ज्ञानेऽपि मिथ्याधीकारणाज्ञानभावात् सा न विरुद्धा, इत्यत्राह—सम्यग्ज्ञानेऽपीति । अज्ञाननिवृत्त्यभावे मानममानं स्यादित्यर्थः । [1544] [1]अस्तु, को दोषः, अत्राह—सम्यगिति । तस्मात् विदुषः मिथ्याज्ञानाभावात् न रागाद्युपप्लव इत्यर्थः । [1545] ज्ञानस्य मुक्तिहेतुत्वे [2]तत्समकालं देहपातात् सद्योमुक्तिः स्यात्, अत्राह—सम्यग्ज्ञानेति । प्रारब्धकर्मवशात् शरीरस्थितेः न सद्यो मुक्तिरित्यर्थः । [1546] [3]अनारब्धफलानां ज्ञानात् दाहः, इति प्रकृतं निगमयति—ज्ञानेति । [1547]

---

* विषयाशयहानतः— विषयाणामाशयः—समुदायः, तस्यासत्त्वात् ।

1. अस्तु—मानममानमस्तु ।

2. तत्समकालं—ज्ञानसमकालम् ।

3. अनारब्धफलानामिति कर्मणामिति शेषः ।

'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥' (1548)

सर्वदृष्टान्तसारूप्यप्रसक्तौ तन्निषेधकृत् ।
तावदेव चिरं तस्येत्यपवादः श्रुतीरितः ॥ (1549)

नेत्रबन्धविनिर्मोकादुपदेशः स्मृतिं प्रति ॥ (1550)

ततस्तदर्थग्रहणमनुष्ठानं ततः परम् ।
स भूरिगत्युपचयात् ग्रामाद् ग्रामान्तरं व्रजेत् ॥ (1551)

सम्यग्ज्ञातोपदेशार्थः स्वयं च प्रतिभानवान् ।
द्राघीयसा स कालेन गन्धारान्प्रतिपद्यते ॥ (1552)

यथैवमेवेहापि स्याद्य इहाचार्यवान्नरः ।

---

[1]अत्र मानमाह (भ. गी. 4-37)—**यथेति** । [1548] सर्वकर्मनिवर्तकज्ञानादेव मुक्तिः इत्ययुक्तम् । [2]मोक्षदृष्टान्ते अनुष्ठानप्रतीतेः, तत्राह—**सर्वेति** । [1549] [3]दृष्टान्तगतार्थं दर्शयितुं 'यथाभिनहनं प्रमुच्य प्रब्रूयात् एतां दिशं गन्धाराः, एतां दिशं व्रजेति, स ग्रामाद् ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसंपद्येत' (छा. 6-14-2) इति श्रुत्यर्थमाह—**नेत्रेति** । (1550–1551) '[4]पण्डितः' इत्यस्यार्थमाह—**सम्यगिति** । 'मेधावी' इत्येतदर्थमाह—**स्वयं चेति** । (1552) 'एवमेवेहाचार्यवान्पुरुषो वेद' (छा. 6-1-42) इत्यस्यार्थमाह—**यथेति** । दृष्टान्तगतस्य [5]सर्वस्य [6]प्रकृ(तस्य)[ते] निवारणाय, 'तस्य ताव-

---

1. **अत्र मानं**—ज्ञानस्य कर्मदाहकत्वे प्रमाणं भगवद्वाक्यम् ।
2. **मोक्षदृष्टान्ते अनुष्ठानप्रतीतेरिति** गन्धारपुरुषस्य गन्धारदेशावाप्तिरूपे छान्दोग्योक्ते ब्रह्मप्राप्तिरूपमोक्षस्य दृष्टान्ते, ज्ञानानन्तरं ग्रामाद्ग्रामगमनरूपानुष्ठानस्य प्रतीतेरित्यर्थः ।
3. **दृष्टान्तगतार्थं**—मोक्षस्य दृष्टान्तगतार्थम् ।
4. **पण्डित इत्यस्येति** 'पण्डितो मेधावी' इति छान्दोग्यश्रुतिगतस्य पण्डितशब्दस्येत्यर्थः । एवमुत्तरत्रापि ।
5. **सर्वस्य**—अनुष्ठानादेः ।
6. **प्रकृते**—दार्ष्टान्तिकमोक्षप्राप्तौ ।

निःशेषदृष्टान्तोक्त्यर्थप्रसक्तिविनिवृत्तये ।
अपवादं श्रुतिरियं तस्य त्विति जगाद नः ॥ (1553)

तस्य त्वेवंविदः पुंसस्तावदेव चिरं भवेत् ।
यावदैकात्म्यसंमोहपङ्को नापनीयते ॥ (1554)

* प्रत्यग्याथात्म्यविज्ञानजन्मनो नातिरेकभाक् ।
प्रत्यङ्मोहाभिनहनध्वंसश्चाप्यन्यथामतेः ॥ (1555)

तस्माद्याथात्म्यविज्ञानसमुत्पत्तेः पुरैव तु ।
आत्माज्ञानं सकार्यं स्यात्तस्य बाध्यत्वकारणात् ॥ (1556)

यस्मिन् प्राप्ते यद्भवति तत्तस्मात्स्यात्कथं पुरा ।
अन्त्यं तस्मात्परिज्ञानं सर्वबाध्यस्य बाधकम् ॥ (1557)

देव चिरं यावन्न विमोक्ष्ये' (छा. 6 - 14 - 2) इत्येतद्वाक्यम्, इत्याह—**निःशेषेति** । (1553) तद्वाक्यं व्याचष्टे—**तस्येति** । (1554) अज्ञाननिवृत्त्या सद्वितीयत्वात् न[1] संसारावस्थातो विशेषः, अत्राह—**प्रत्यगिति** । अभिनहनं-संबन्धः । अज्ञाननिवृ(त्त)[त्तिः] [2]बुद्धीद्धबोधमात्रमित्यर्थः । (1555) [3]तत्र गमकमाह—**तस्मादिति** । (1566) सकार्यमज्ञानं नासीदस्ति भविष्यतीति त्वयाङ्गीकारात् कथं '[4]पुरैव' इत्युक्तम्, अत्राह—**यस्मिन्निति** । वाक्योत्थज्ञाने सति भवदज्ञानहानं तस्मात् पुरा कथं स्यात् । नासीदस्तीत्यादि तु वस्तुवृत्तापेक्षमित्यर्थः । ज्ञानस्य सकार्याविद्यानिवर्तकत्वादन्त्यत्वं सिद्धम्, इत्युपसंहरति—**अन्त्यमिति** । (1557)

---

1. न संसारावस्थातो विशेष इति मुक्तेरिति शेषः ।
2. बुद्धीद्धबोधेति महावाक्यजन्याखण्डाकारबुद्धिवृत्तीद्धस्वरूपबोधेत्यर्थः ।

* "प्रकृतां जीवन्मुक्तिमेव प्रकारान्तरेण साधयति—**प्रत्यगिति**" इत्यवतारयति शास्त्रप्रकाशिका ।

3. तत्र गमकं—अज्ञाननिवृत्तेः बुद्धीद्धबोधमात्रत्वे गमकम् ।
4. पुरैवेति ज्ञानोत्पत्तेः पूर्वं सकार्यमज्ञानम् इत्युक्तिः नोपपद्यते इत्यर्थः ।

ऋणिनोऽप्यस्य देवाद्या नेशते ब्रह्मवेदिनः ।
* इत्युक्तं किंनिमित्तं चेदत्र प्रतिविधीयते ॥ (1558)

न विज्ञातात्मयाथात्म्यं प्रत्यृणित्वं भवेद्यतः ।
* अविद्याविषयं तत्स्यात्तस्य कर्तृत्वकारणात् ॥ (1559)

यत्र वा अन्यदित्यादि तथा च श्रुतिशासनम् ।
ध्वस्ताविद्यस्य तन्न स्यात्तस्यैकात्म्यस्वभावतः ॥ (1560)

न चेहाविदुषोऽपि स्यादृणित्वं हेत्वसंभवात् ।
न किञ्चिन्नः सुरैः प्रत्तमृणित्वं येन नो भवेत् ॥ (1561)

उत्तमर्णानामपि देवानां ज्ञानिनः फलप्रतिबन्धे

स्वातन्त्र्याभावहेतुनिरूपणम्

जीवन्मुक्तिं साधयता देवादीनामुत्तमर्णत्वेऽपि [1]फलप्रतिबन्धे न स्वातन्त्र्यमित्युक्तम्। तत्र हेतुं पृच्छति—**ऋणिनोऽपीति** । परिहरति—**अत्रेति**। (1558) परिहारं स्पष्टयति—**नेति** । यतः—कर्तृत्वाभावादित्यर्थः । (1559) अविदुषोऽस्ति कर्तृत्वादि, इत्यत्र मानमाह—**यत्रेति** । विदुषः [2]तदभावे मानमाह—**ध्वस्तेति** । ‘यत्र त्वस्य सर्वमात्मैवाभूत्’ (बृ. 6 - 5 - 15) इति श्रुतेरित्यर्थः । (1560) ज्ञानिनः अधमर्णत्वाभावं [3]कैमुतिकन्यायेनाह—**न चेति** । **प्रत्तं**—दत्तमित्यर्थः । (1561) ‘(याज) [जाय]मानो वै ब्राह्मणः’ इत्यादिवाक्यादृणित्वम् ,

---

1. **फलप्रतिबन्धे**—विदुषः विद्याफलस्य प्रतिबन्धे ।

* ‘तत्र प्रतिविधीयते’ इति मु. पु. पाठः।

* **तत् स्यात्**—ऋणित्वं स्यात् ।

2. **तदभावे**—कर्तृत्वाद्यभावे ।

3. **कैमुतिकन्यायेनेति** अविदुषामेवाधमर्णत्वाभावे किमु वक्तव्यं, विदुषः नाधमर्णत्वमिति इति रीत्येत्यर्थः। देवकृतवर्षणादिप्रदानन्तु, ईश्वराज्ञाधीनं स्वाधिकारकृतं नास्माकमृणित्वापादकम् । ‘भीषास्माद्वातः पवते’ इति श्रुतेरिति भावः ।

वचनादिति चेन्नैवं तदुक्तेरर्थवादतः ।
अवदानविधेः शेषो ह्यर्थवादो हि तद्वचः ॥ (1562)

विद्वांसं प्रति नेशाना यदि देवादयो मताः ।
कस्मिन्विषय ऐश्वर्यं तेषां स्यात्सोऽधुनोच्यते ॥ (1563)

प्रामाण्यं कर्मकाण्डस्य यस्मिन्विषय इष्यते ।
अविद्याविषयः साक्षादथ योऽन्यामितीर्यते ॥ (1564)

सम्यग्ज्ञानसमुत्पत्तौ कर्मकार्यसमाप्तितः ।
नापेक्षा कर्मकाण्डे स्यात् तत्प्रामाण्यकृतार्थतः ॥ (1565)

*प्रकृतैकात्म्यविद्याया व्युत्थानायाथगीरियम् ।
न हि संगच्छते विद्याऽविद्यायोगं विरोधतः ॥ (1566)

इत्याह—**वचनादिति** । तदपि 'अवदानैरेवा(प)[व]दयते' इति अवदानविधिना एकवाक्यत्वात् [1]तच्छेषार्थवादत्वात् न स्वार्थे मानम्, इति परिहरति—**नैवमिति** । (1562)

'अथ योऽन्याम्' इत्यादिवाक्यस्यावतरणं तदर्थनिरूपणं च

धीफलस्यावश्यकत्वात् विदुषि देवादीनामस्वातन्त्र्ये, कुत्र स्वातन्त्र्यमिति पृच्छति—**विद्वांसमिति** । '[2]अथ योऽन्याम्' इत्यवतारयति—**सोऽधुनेति** । (1563) अस्य वाक्यस्यार्थान्तरमाह—**प्रामाण्यमिति** । अविद्याकार्यसाध्यसाधनादौ कर्मश्रुतेः प्रामाण्यमुच्यते इत्यर्थः । (1564) नाविद्याकार्ये कर्मादौ तच्छ्रुतेर्मात्वं, विदुषोऽपि कर्मापेक्षत्वात्, अत्राह—**सम्यगिति** । कर्मफलस्य स्वर्गादेः सम्यग्ज्ञाने समाप्तत्वात्—बाधितत्वादित्यर्थः । (1565) तात्पर्यमुक्त्वा अक्षरार्थ-

---

1. **तच्छेषार्थवादत्वात्**—अवदानविधिशेषार्थवादत्वात् ।

2. **अथ योऽन्यामिति** "अथ योऽन्यां देवतामुपास्ते, अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम् ।" इति श्रुतिः ।

* **अथगीः**—अथशब्दः । **विरोधतः**—निवर्त्यनिवर्तकभावात् ।

प्रतीच्यनन्य एकस्मिन्नविद्यापिहितेक्षणः ।
अनन्योऽप्यात्मनो भिन्नामुपास्ते देवतां नरः ॥ (1567)

अन्योऽसाविति वाक्येन व्याख्योपासापदस्य तु ।
भेददर्शनमेवातः उपास्त इति भण्यते ॥ (1568)

* किं मूलं भिन्नदृष्टेः स्यादिति श्रुत्या तदुच्यते ।
न स वेदेत्यविद्येयं नामरूपप्रपञ्चकृत् ॥ (1569)

आत्माविद्याग्रहग्रस्तः संहतस्तज्जवस्तुभिः ।
स एष पशुतामेति देवादीनां स्वकर्मभिः ॥ (1570)

बहूपकारकृद्यद्वद्गवादिर्लौकिकः पशुः ।
देवादीनां तथाऽविद्वान् पशुः स्यादुपकारकृत् ॥ (1571)

एकैकस्वामिको लोके गवादिः पशुरिष्यते ।
ततोऽप्यतिशयः पुंसां सर्वलोकोपकारिता ॥ (1572)

माह—**प्रकृतेति** । (1566) '(ये)[यो]ऽन्याम्' इत्यादेरर्थमाह—**प्रतीचीति** । (1567) विहितं मानसं कर्म उपासनपदवाच्यमिह नास्ति । कथं 'उपास्ते' इत्युक्तम्, अत्राह—**अन्योऽसाविति** । (1568) '**न स वेद**' इत्यस्य तात्पर्यमाह—**किं मूलमिति** । भेददर्शनकारणमुच्यते इत्यर्थः । (1569) अज्ञस्य पशुत्वमुक्तं श्रुत्या । [1]तत् साधयति—**आत्मेति** । ब्राह्मण्याद्यभिमानवानेव पशुः न विद्वानित्यर्थः । (1570) अ(न्य)[ज्ञ]स्य स्वकर्मभि[2]रुपकारकत्वे दृष्टान्तमाह—**बहूपकारकृदिति** । (1571) गवादिपशुवैलक्षण्यं नरपशोराह—**एकैकेति** । (1572) '[3]यथा ह' इत्यादिदृष्टान्ततात्पर्यमाह—**एकेति** । एकाधिष्ठितो

---

* **भिन्नदृष्टेः**—भेददर्शनस्य ।

1. **तत् साधयति**—अज्ञस्य पशुत्वं साधयति ।

2. **उपकारकत्वे इति** देवादीनामित्यादिः ।

3. **यथा ह इत्यादि** "यथा ह वै बहवः पशवः मनुष्यं भुञ्ज्युः, एवमेकैकः पुरुषो देवान् भुनक्ति । एकस्मिन्नेव पशावादीयमाने अप्रियं भवति, किमु बहुषु । तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ।" इति श्रुतिवाक्यमत्रानुसन्धेयम् ।

एकैकक्रियया लोके एकैकस्वामिकः पशुः ।
अनेकैः संहतश्चैवं कदा चिदुपकारकः ।। (1573)

भूरिक्रियावांस्तु नरः तथाऽनेकेश्वरोऽवशः ।
एकैको निखिलं विश्वं बिभर्त्यज्ञो दिवानिशम् ।। (1574)

अस्यैवार्थस्य दृष्टान्तः यथा हेत्यभिधीयते ।
यत एवमतो युक्तं देवादेर्भृशमप्रियम् ।। (1575)

अपि भूरिपशोः पुंसः एकस्मिन्नपि तस्करैः ।
ह्रियमाणे पशौ तीव्रं दुःखं समुपजायते ।
किमु सर्वस्वहरणे वक्तव्यं दुःखकारणम् ।। (1576)

*सर्वस्वतुल्ये नृपशौ ब्रह्मधीपरिमोषिणा ।। (1577)

ह्रियमाणे महद्दुःखं तस्मादेषां तदप्रियम् ।
यद्यथोक्तं परं ब्रह्म मनुष्या विद्युरञ्जसा ।। (1578)

*सर्वाधिकारहेत्वग्निब्रह्मज्ञानस्य जन्मनि ।
अव्यावृत्ताननुगतात् प्रतीचोऽन्यन्न शिष्यते ।। (1579)

दोहनाद्येकैकक्रियया कदाचिदेकस्योपकरोति । कदाचित् अनेकैः संभूय शक-(टा)[टो]द्वहनादिक्रिययोपक(ष)[रो]तीत्यर्थः । (1573) दार्ष्टान्तिकमाह—भूरीति । (1574) उक्तेऽर्थे [1]वाक्यमवतारयति—अस्येति । 'एकस्मिन्नेव' इत्यादिकमवतारयितुं भूमिकां करोति—यत इति । ब्रह्मज्ञानस्य देवपशुत्व-निवर्तकत्वादित्यर्थः । (1575) अक्षरार्थमाह—अपीति । (1576) 'तस्मादेषाम्' इत्यादेरर्थमाह—सर्वस्वेति । (1577–1578) कथं ब्रह्मधियः परिमोषित्वम्,

---

1. वाक्यं—'यथा ह' इति वाक्यम् ।

* ब्रह्मधीपरिमोषिणा—ब्रह्मविद्यारूपतस्करेण ।

* सर्वाधिकारहेत्वग्निब्रह्मज्ञानस्येति सर्वस्मिन् कर्मण्यधिकारः—स्वामित्वेन संबन्धः, तत्र हेतुः ब्राह्मण्याद्यभिमानः, तस्य सहेतोः अग्निरिव दाहकं यत् ब्रह्मज्ञानं तस्येत्यर्थः ।

नावशिष्यत एतस्मात्तदविद्योत्थमण्वपि ।
प्रध्वस्तत्वादविद्याया ब्रह्मात्मज्ञानवह्निना ॥ (1580)

'क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवानां मर्त्यैरुपरि वर्तनम् ॥' (1581)

तस्मान्मुमुक्षुर्देवादीन् सम्यगाराध्य कर्मभिः ।
उन्मुक्तबन्धनस्तैः सन्नापित्सेत् ज्ञानमात्मनः ॥ (1582)

तद्विपक्षस्तु यो बालो बलादेव मुमुक्षति ।
स्वर्गादेरपि विभ्रष्टो नरकं स निगच्छति ॥ (1583)

प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः ।
संन्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशयाः ॥ (1584)

'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥' (1585)

अत्राह—सर्वेति । सकार्याविद्यानिवर्तकत्वादित्यर्थः । (1579) ज्ञानस्याज्ञानमात्रनिवर्तकत्वात् न द्वैतनिवृत्तिः, अत्राह—ना(वे)[वशि]ष्यत इति । (1580) देवादीनां कर्मिणो देवप्राप्तिरपि नेष्टा, किमु ब्रह्मप्राप्तिः, इत्यत्र व्यासवाक्यमुदाहरति—क्रियावद्भिरिति । (1581) देवादीनां विद्याप्रतिबन्धकत्वे मुमुक्षुप्रवृत्तिर्विफला स्यात्, अत्राह—तस्मादिति । इह जन्मनि जन्मान्तरे वा [1]अनुष्ठितशुद्धबुद्धिरित्यर्थः । (1582) विपक्षे दण्डमाह—तद्विपक्षस्त्विति । (1583) देवाद्याराधनाभावे मुमुक्षोः नरकप्राप्तिः कुत इति चेत्, अविवेकिनो निषिद्धाचरणावश्यंभावात्, इत्याह—प्रमादिन इति । अविवेकः—प्रमादः । (1584) अविरक्तस्य संन्यासो न धीसाधनम्, इत्यत्र (भ. गी. 3-4) भगवद्वाक्यमाह—न कर्मणामिति । (1585) तर्हि संन्यास-

---

1. अनुष्ठितशुद्धबुद्धिः—अनुष्ठितैः कर्मभिः शुद्धान्तःकरणः ।

* 'कषायं पाचयित्वा तु श्रेणीस्थानेषु च त्रिषु।
प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमम् ॥ (1586)

भावितैः करणैश्चायं बहुसंसारयोनिषु ।
* आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे ॥ (1587)

तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः ।
त्रिष्वाश्रमेषु कोऽन्वर्थो भवेत्परमभीप्सतः ॥' (1588)

इत्येवं भगवद्व्यासवचांस्यत्र सहस्रशः ।
श्रूयन्ते न्यायदृब्धानि तस्मात्तान्यादराच्छ्रयेत् ॥ (1589)

शास्त्रार्थः सूत्रितस्तावदात्मेत्येवेति यत्नतः ।
उक्तश्च तस्य सूत्रस्य संबन्धः सप्रयोजनः ॥ (1590)

त्वाविशेषात् विरक्तानां संन्यासोऽपि न धीसाधनम्, इत्याशङ्क्य, स्मृतिविरोधमाह—(मो. ध. 82-3) **कषायमिति**। (1586) कथं तर्हि 'ब्रह्मचर्यादेव प्रव्रजेत्' (जा. 4-1) [1]इत्यक्रमसंन्यासविधिः, अत्राह—(मो. ध. 164-26) **भावितैरिति**। (1587) [2]मोक्षसाधनत्वमुक्तम् । तदुपपादयति—(मो. ध. 164-27) **तमासाद्येति** । [3]एतत्कारिकाद्वयं **शुकजनकसंवादे जनकवाक्यम्** । (1588) शुद्धबुद्धेः पारिव्राज्यं धीसाधनमित्यत्र उक्तमानमुपसंहरति—**इत्येवमिति**। (1589)

एकादशकण्डिकार्थनिरूपणम्

चातुर्वर्ण्यसृष्टिकथनम्

ससंगतिप्रदर्शनमेतत्कण्डिकातात्पर्यविवरणम्

'ब्रह्म वा इदम्' इत्यादेः अतीतग्रन्थेन संगतिकथनाय, वृत्तं संकीर्तयति—**शास्त्रार्थ इति**। 'आत्मेत्येव' (बृ. 3-4-7) इत्यत्र सूत्रितज्ञानस्य, 'तदाहुः'

---

* **श्रेणीस्थानेषु त्रिषु** सोपानस्थानीयेषु त्रिषु आश्रमेषु ।

1. **अक्रमसंन्यासविधिः**—गृहस्थाद्याश्रमप्रातिक्रम्य विनैव संन्यासस्य विधानम् ।

* **मोक्षं** मोक्षहेतुज्ञानार्थसंन्यासाश्रमम् ।

2. **मोक्षसाधनत्वमुक्तमिति** संन्यासाश्रमस्येत्यादिः ।

3. **एतत् कारिकाद्वयं**—'भावितैः' इत्यादिकारिका, 'तमासाद्य' इत्यादिकारिका च ।

संसारानर्थहेतुत्वमविद्यायाश्च वर्णितम् ।
योऽन्यामित्यादिवाक्येन तत्कार्यमपि सूत्रितम् ॥ (1591)

विद्यावत् सह कार्येण ह्यविद्यापीह सूत्रिता ।
* सामर्थ्याद्विस्तरस्तस्या आऽऽध्यायान्तादिहोच्यते ॥ (1592)

* यथोक्तात्मानभिज्ञो योऽविद्याकार्याभिमानवान् ।
पशुवद्देवताः पाति स जुहोत्यादिकर्मभिः ॥ (1593)

* आऽध्यायावसितेस्तस्मादविद्याया विभूतयः ।
वक्ष्यन्ते विस्तरेणातः परो ग्रन्थोऽवतार्यते ॥ (1594)

इत्यादिना मो[1]क्षफलं, तयोः संबन्धश्च सा[2]ध्यसाधनलक्षण उक्त इत्यर्थः । (1590) 'अथ योऽन्याम्' (बृ. 3-4-10) इत्यादावुक्तमनुवदति—**संसारेति** । (1591) विस्तरेणोक्तं संक्षिप्याह—**विद्यावदिति** । वृत्तं संकीर्त्य, उत्तरसंगतिमाह—**सामर्थ्यादिति** । सह कार्येण सूत्रिताविद्यायाः प्रपञ्चार्थः उत्तरग्रन्थ इत्यर्थः । [1592] 'सामर्थ्यात्' इति यत् अविद्याकर्मादिस्वरूपेऽन्वितावयवत्वमुक्तम्, तत् विशदयति—**यथोक्तेति** । अज्ञस्य ब्रह्मक्षत्राद्यभिमानवतः कर्माधिकाराभिधानात् अविद्याप्रपञ्चनार्थं उत्तरारम्भ इत्यर्थः । (1593) यस्मादविद्याकार्येऽन्वितावयवत्वं तस्मात्, इत्युपसंहरति—**(अ)[आ]ध्यायेति** । समुदायतात्पर्यमुक्त्वा, अन[3]न्तरवाक्यमवतारयति—**अत इति** । [1594] अविद्याकार्यप्रपञ्चनार्थत्वे हेत्व-

---

1. **मोक्षफलं**—मोक्षरूपं फलम् ।
2. **साध्यसाधनलक्षणः**—साध्यसाधनत्वरूपः ।
* **सामर्थ्यात्**—अध्यायसमाप्तिपर्यन्तस्योत्तरग्रन्थस्य अविद्याकार्यप्रतिपादनशक्तिमत्त्वात् ।
* **अविद्याकार्याभिमानवान्**—अविद्याकार्ये देहादौ अहंममाभिमानवान् ।
* **आऽध्यायावसितेः**—एतदध्यायसमाप्तिपर्यन्तम् ।
3. **अनन्तरवाक्यं**—' ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत् ' इत्यादिवाक्यम् ।

अस्यैवार्थस्य सिद्ध्यर्थमग्निसर्गादनन्तरम् ।
इन्द्रादिसर्गः प्राङ्नोक्तः मोहकार्यविवक्षया ॥ (1595)

परिपूरणाय सृष्टेस्तु ह्यग्निसर्गः पुरोदितः ।
यत एवमतोऽविद्याकार्योऽनर्थोऽखिलो भवेत् ॥ (1596)

इन्द्रादिसर्गस्तत्रैव तच्छेषत्वात्समीक्ष्यताम् ।
अविद्याकार्यसिद्ध्यर्थमिह त्वस्य प्रपञ्चनम् ॥ (1597)

स्रष्टृ यज्जगतः पूर्वमात्मैवेत्यभिशब्दितम् ।
तदग्न्याद्यभिमान्यत्र ब्रह्मेति व्यपदिश्यते ॥ (1598)

न्तरमाह—**अस्येति** । 'अथेत्यभ्यमन्थत्' [बृ. 3-4-6] इति अनु[1]ग्राहकदेवता-सर्गं प्रक्रम्य, अग्नेरेव सृष्टिरुक्ता, नत्विन्द्रादीनाम् । इह तु अविद्यां प्रस्तुत्य ते[2]षां सृष्टिरुच्यते । अतोऽय[3]मर्थो गम्यते इत्यर्थः । [1595] एवं तर्हि अग्निसर्गोऽप्यत्रैव वाच्यः अविद्याकार्यत्वात्, अत्राह—**परिपूरणायेति** । अनात्मजातस्य अविद्याकार्यत्वे फलितमाह—**यत इति** । स्रक्सर्पवदित्यर्थः । [1596] प्राजापत्य-सृष्टिपूरणार्थं तत्राग्निसर्गकथनं चेत्, इन्द्रादिसर्गोऽपि [4]तत्रैव वाच्यः, अन्यथा [5]तदपूर्तेः, अत्राह—**इन्द्रादीति** । केन तर्हि अभिप्रायेण [6]तत्कीर्तनम्, अत्राह—**अविद्येति** । [1597]

'ब्रह्म वा' इत्यादिश्रुत्यर्थविवरणम्

एवं संगतिमुक्त्वा [7]ब्रह्मपदार्थमाह—**स्रष्ट्रिति** । 'आत्मैवेदमग्र आसीत्-(बृ. 3-4-1) इत्यत्रात्मशब्देनोक्तं ब्रह्म अग्निं सृष्ट्वा तद्रूपं ब्राह्मणत्वजात्यभिमानि अस्मिन् वाक्ये

---

1. **अनुग्राहकदेवतेति** वागादीन्द्रियानुग्राहकाग्नयादिदेवतेत्यर्थः ।
2. **तेषां**—इन्द्रादीनाम् ।
3. **अयमर्थः**—अविद्याकार्यप्रपञ्चनार्थः उत्तरग्रन्थः इत्ययमर्थः ।
4. **तत्रैव**—'अथेत्यभ्यमन्थत्' इत्यादिकण्डिकायामेव ।
5. **तदपूर्तेः**—प्राजापत्यसृष्टेः पूरणाभावात् ।
6. **तत्कीर्तनं**—इन्द्रादिसृष्टेः अत्र कीर्तनम् ।
7. **ब्रह्मपदार्थमिति** 'ब्रह्म वा इदमग्र आसीत् तदेकं सन्न व्यभवत्' इति अनन्तर-वाक्यघटकब्रह्मपदस्यार्थमित्यर्थः ।

ब्रह्मैकजात्यवच्छिन्नं यस्मादग्रे व्यवर्तत ।
नानेकजातिमद्धेतुकर्मणेऽलं ततो भवेत् ॥ (1599)

चातुर्वर्ण्यप्रसाध्यं तन्नैकजातिप्रसाधनम् ।
कर्मालं सिद्धये लोके शिबिकोद्वहनं यथा ॥ (1600)

गृहीतिरभिषिक्तानामिन्द्रादीनां श्रुतौ श्रुता ।
श्रेयोरूपप्रसिद्ध्यर्थं क्षत्रस्येत्यवगम्यते ॥ (1601)

धर्मान्तैः सहितैर्यस्मात्कर्म सिद्ध्यति नान्यथा ।
तेन तेन विना शक्तमतस्तत्तदचीक्लृपत् ॥ (1602)

ब्रह्मासृजद्यतः क्षत्रमात्मनोऽप्यतिवीर्यवत् ।
बलवत् क्षत्रतस्तस्मान्नान्यद्भूतमिहेष्यते ॥ (1603)

ब्रह्मशब्देनोच्यते इत्यर्थः । [1598] 'एकमेव' इत्यस्यार्थमाह—**ब्रह्मेति** । [1599] अध्यापनादेरेक[1]जातिसाध्यत्वात् नानेकजातिमद्धेतुत्वं कर्मणः, अत्राह—**चातुर्वर्ण्येति** । [2]पालकाभावे तद[3]प्यशक्यकरणमित्यर्थः । [1600] '[4]यान्येतानि' इत्यादिना अभिषिक्तेन्द्रादिग्रहे अभिप्रायमाह—**गृहीतिरिति** । क्षत्रियस्योत्तमत्वख्यापनार्थमित्यर्थः । [1601] पालके क्षत्रे सृष्टे, कर्मानुष्ठानसंभवात् [5]वर्णान्तरसृष्टिः किमर्था, अत आह—**धर्मान्तैरिति** । [1602] 'तस्मात् क्षत्रात्' इत्यादेरर्थमाह—**ब्रह्मेति** । [1603] । 'तस्मात्[6] ब्राह्मणः' इत्यादि व्याकरोति—

---

1. **एकजातिसाध्यत्वादिति** ब्राह्मण्यमात्रसाध्यत्वादित्यर्थः ।
2. **पालकाभावे**—पालकस्य क्षत्रियस्याभावे ।
3. **तदपि**—अध्यापनादिकमपि एकजातिसाध्यं कर्म ।
4. **यान्येतानीति** "तच्छ्रेयोरूपमत्यसृजत क्षत्रम् । यान्येतानि देवता क्षत्राणि इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति । तस्मात् क्षत्रात्परं नास्ति ।" इति श्रुतिः ।
5. **वर्णान्तरसृष्टिः**—वैश्यादिसृष्टिः ।
6. **तस्माद्ब्राह्मण इति** 'तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये । क्षत्रस्य योनिर्यद्ब्रह्म ।' इति श्रुतिः ।

तस्माच्च ब्राह्मणोऽधस्तात् राजसूये महाक्रतौ ।
आसन्दीस्थमुपास्ते त्वं राजन् ब्रह्मेति संभ्रमात् ॥ (1604)

ब्रह्मेति श्रावितो राज्ञा ब्रह्मा प्रत्याह तं नृपम् ।
त्वमेव राजन् ब्रह्मेति क्षत्रे तद्यश आत्मनः ॥ (1605)

दधाति भास्वद्ब्रह्माख्यं यस्मिन् सर्वं प्रतिष्ठितम् ।
क्षत्रस्य योनिर्ब्रह्मेदं क्षत्रं ह्याविरभूत्ततः ॥ (1606)

यतोऽतो, यद्यपि क्षत्रं ब्राह्मण्यं प्रतिपद्यते ॥ (1607)

परमत्वं, तथाप्यन्ते राजसूयक्रतोः पुनः ।
उपनिश्रयति ब्रह्म गुणभावेन पूर्ववत् ॥ (1608)

ब्रह्मैव चान्ततः क्षत्रमुपनिश्रयतीत्यतः ।
क्रतुकालैव ब्रह्माप्तिः क्षत्रस्येत्यवसीयते ॥ (1609)

स्वां योनिमिति हेतूक्तिः कार्यं कारणसंश्रयम् ।
न हि कारणतोऽन्यत्र वृत्तिः कार्यात्मनः क्वचित् ।
ब्रह्मैककारणो राजा तस्माद्ब्रह्मैव संश्रितः ॥ (1610)

तस्माच्चेति । आसन्दीस्थं—म(न्त्रा)[ञ्चा]रूढमित्यर्थः । [1604] उपास्तिप्रकारं प्रकटयति—**ब्रह्मेति** । 'सैषा' इत्यादिवाक्यार्थमाह—**क्षत्रस्येति** । [1605-1606] [1]तयोर्ब्राह्मण्यस्य तुल्यत्वादेकैव जातिः स्यात्, अत्राह—**यद्यपीति** । क्षत्रस्य ब्राह्मण्यप्राप्तिः क्रतुकाल एव नान्यत्रेत्यर्थः । [1607-1608] अस्मिन्नर्थे 'ब्रह्मैवान्तत उपनिश्रयति' इत्येतद्व्याचष्टे—**ब्रह्मैव चेति** । [1609] 'स्वां योनिम्' इत्यस्याभिप्रायमाह — **स्वामिति** । [1610]

---

1. **तयोः**—ब्रह्मक्षत्रयोः ।
"'तस्माद्यद्यपि राजा परमतां गच्छति, ब्रह्मैवान्तत उपनिश्रयति स्वां योनिम् ।'" इति श्रुतिवाक्यमनुसन्धेयम् ।

यस्तु बाहुबलोन्मत्तः स्वां योनिं ब्राह्मणं नृपः ।
वाङ्मात्रेणापि सक्रोधो हिनस्तीह प्रमादतः ॥ (1611)

ब्रह्मोपमर्दनात्पापः प्रागपि क्रूरकर्मकृत् ।
ततोऽपि पापात् पापीयान् स स्याद्ब्रह्मापवादतः ॥ (1612)

उत्तमाभिजनोपेतं भूर्युदारगुणं द्विजम् ।
यथा श्रेयांसं हिंसित्वा पापीयान्स्यात्तथैव सः ॥ (1613)

सृष्ट्वापि चतुरो वर्णान् व्यवस्थाकारणं विना ।
कर्मणे नैव पर्याप्तं ब्रह्माभूत्पूर्ववत्ततः ॥ (1614)

ब्रह्मक्षत्रादिरूपाणि यतोऽतीत्यासृजत्प्रभुः ।
श्रेयोरूपस्ततो धर्मः सर्वानप्यनुशास्त्यसौ ॥ (1615)

तदेतत्सृष्टं धर्माख्यं क्षत्रस्याधिपतेरपि ।
प्रशास्तृ तद्भयाद्यस्मात् क्षत्रं भीतं प्रवर्तते ॥ (1616)

---

[1]य(उप)[उ ए] नम्' इत्यादेरर्थमाह—यस्त्विति। [1611-1612] उक्तार्थं दृष्टान्तेन स्पष्टयति—उत्तमेति। [1613]

चतुर्दशकण्डिकार्थनिरूपणम्
धर्मादिसृष्टिः

सृष्टैश्चतुर्भिर्वर्णैरेव कर्मानुष्ठानसिद्धेः किं धर्मसृष्ट्या, अत्राह—सृष्ट्वापीति। ततो धर्मं श्रेयो[2] रूपमसृजतेत्यर्थः। (1614) कथं धर्मस्य श्रे (यत्वं)[योरूपत्वम्], अत्राह—ब्रह्मेति। [1615] धर्मस्य श्रेष्ठत्वे हेत्वन्तरमाह—तदेतदिति।

---

1. य उ एनमिति "य उ एनं हिनस्ति स्वां स योनिमृच्छति, स पापीयान् भवति, यथा श्रेयांसं हिंसित्वा।" इति श्रुतिः।
कर्मसाधनवित्तोपार्जनाय विशः, वसवो रुद्राः आदित्याः विश्वेदेवाः मरुतः इति गणदेवताः असृजत। ततः परिचर्यायै शूद्रं पूषणमसृजत। एवं द्वादशत्रयोदश-कण्डिकयोः विट्शूद्रसृष्टिरुक्ता बोध्या।

2. श्रेयोरूपं—श्रेष्ठम्।

क्षत्रस्यापि यतो धर्मः साक्षादधिपतिस्ततः ।
धर्मादन्यन्महद्भूतं न भूतं न भविष्यति ॥ (1617)

श्रेयोरूपप्रसिद्ध्यर्थं प्रसिद्धिरुपवर्ण्यते ।
अथो इत्यादिना धर्मविशिष्टत्वावबुद्धये ॥ (1618)

आशंसते बलीयांसमबलीयानपि स्वयम् ।
धर्मं बलं समाश्रित्य जेतुं लोके तथा यथा ॥ (1619)

राजा बलेनाल्पबलो बलीयांसं कुटुम्बिनम् ।
जेतुमाशंसते तस्मात् धर्मः स्याद्बलवत्तमः ॥ (1620)

बलीयसापि राज्ञेह स्पर्धमानोऽबलोऽपि सन् ।
जेतुमुत्सहते भूपं धर्मात्मकबलाश्रयात् ॥ (1621)

एतदेव यतो ज्यायोरूपं धर्मेत्युदाहृतम् ।
रूपान्तरेभ्यः सर्वेभ्यः तद्धि सत्यात्मकं यतः ॥ (1622)

तस्यास्य धर्मरूपस्य कार्यकारणतां मिथः ।
यो वै स धर्म इत्युक्त्या वक्तुं प्रवर्तते श्रुतिः ॥ (1623)

[1616] '[1]तस्माद्धर्मात्' इत्यादेरर्थमाह—**क्षत्रस्यापीति**। [1617] '[2]अथो' इत्यादेस्तात्पर्यमाह—**श्रेयोरूपेति**। [1618] एवं तात्पर्यमुक्त्वा वाक्यं योजयति—**आशंसत इति**। [1619-1620] 'यथा राज्ञैवम्' इत्यस्यार्थान्तरमाह—**बलीयसेति**। [1621] धर्मस्य(सं)[स]त्यत्वाच्च [3]स उत्तमः, इत्याह—**एतदेवेति**। **एको** यतःशब्दः ततःशब्दार्थे प्रयुक्तः। (1622) '[4]यो वै' इत्यादेस्तात्पर्यमाह—**तस्येति**। धर्मसत्ययोरन्योन्यहेतुत्वमुच्यते इत्यर्थः। [1623] तयोः स्वरूपं

---

1. **तस्माद्धर्मादिति** 'तस्माद्धर्मात्परं नास्ति' इति श्रुतिः।
2. **अथो इति** "अथो अबलीयान् बलीयांसमाशंसते धर्मेण यथा राज्ञैवम्।" इति वाक्यम्।
3. **स उत्तमः**—धर्म उत्तमः।
4. **यो वै इत्यादेरिति** "यो वै स धर्मः सत्यं वैतत्, तस्मात् सत्यं वदन्तमाहुः धर्मं वदतीति, धर्मं वा वदन्तं सत्यं वदतीति, एतद्ध्येवैतदुभयं भवति।" इति श्रुतिरनुसन्धेया।

प्रयोगलक्षणो योऽयं श्रुतिस्मृत्युदितो मतः ।
स धर्म इति विज्ञेयः सत्यं शास्त्रार्थलक्षणम् ॥ (1624)

अक्षरानुगतोऽप्यर्थो यदि संशय्यते तदा ।
नित्यप्रयोगरूपोत्थविज्ञानात्तद्विनिश्चितिः ॥ (1625)

प्रयोगेऽपि च संशीतौ वाक्यार्थज्ञानसंश्रयात् ।
निर्णुदेत्संशयं प्राज्ञ एवमन्योन्यहेतुता ॥ (1626)

यथा प्रयोगमुल्लङ्घ्य व्याख्यातुं शक्नुयात्सुधीः ।
यथाशास्त्रं तथोल्लङ्घ्य कर्तुं शक्नोत्यथापरः ॥ (1627)

अतथ्यान्यपि तथ्यानि दर्शयन्तीह वादिनः ।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥ (1628)

शास्त्रार्थस्तत्प्रयोगश्च यदा त्वन्योन्यसंश्रयात् ।
प्रवर्तते तदा कर्तुर्न प्रमादो मनागपि ॥ (1629)

विविच्य दर्शयति—**प्रयोगेति**। अग्निहोत्रादि अनुष्ठीयमानं धर्मः। तदेव शास्त्रात् गम्यमानं सत्यमित्यर्थः। [1624] कुतस्त[1]योरन्योन्यहेतुत्वम्, अत्राह—**अक्षरेति**। धर्मः संदिग्धो निश्चेतव्यः [2]शास्त्रार्थवशात्। शास्त्रार्थोऽपि संदिग्धः [3]प्रयोजनवशान्निर्णतव्य इत्यर्थः। [1625-1626] तयोरन्यो(न्या)[न्य]नियामकत्वोक्तेः को भावः, अत्राह—**यथेति**। शिष्टाचारमुल्लङ्घ्य प्रज्ञावान् [4]अन्यथा व्याख्याने समर्थः। तथा शास्त्रार्थमनादृत्य धाष्टर्यादन्यथाऽऽचरति। तद्वारणार्थमित्यर्थः। [1627] [5]अन्योन्यातिक्रमसंभवं स्पष्टयति—**अतथ्यानीति**। [1628] कथं तर्हि ज्ञानानुष्ठानयोर्नियमः, अत्राह—**शास्त्रार्थ इति**। [1629]

---

1. **तयोः**—धर्मसत्ययोः।
2. **शास्त्रार्थवशादिति** अतः सत्यस्य धर्महेतुत्वमित्यर्थः।
3. **प्रयोजनवशात्**—अनुष्ठानवशात्। तथा च धर्मस्य सत्यहेतुत्वमित्यर्थः।
4. **अन्यथा व्याख्याने इति** शास्त्रस्येत्यादिः।
5. **अन्योन्यातिक्रमेति** शिष्टाचारशास्त्रार्थव्याख्यानयोरित्यादिः।

नायं धर्म इति ज्ञेयो योऽयं सृष्टाविहेरितः ।
क्षत्रादिनियमाशक्तेः तस्याचैतन्यरूपतः ॥ (1630)

देवता तु ह्यधिष्ठात्री धर्मोऽस्मीत्यभिमानिनी ।
* सैवेह सृज्यते धात्रा नियमार्थप्रसिद्धये ॥ (1631)

धर्मस्यैव तु रूपेण देवता रूपिणी मता ।
तन्नाम्ना नामवत्येवं देवतान्तरयोजना ॥ (1632)

* एकैव देवता तस्मान्नामरूपाद्युपाधिभिः ।
आभाति बहुरूपेव तत्पराधीनचेतसाम् ॥ (1633)

यथोक्तार्थोपसंहारः उत्तरार्थविवक्षया ।
ब्राह्मणस्य पुरानुक्तेः तदुक्त्यर्था परा श्रुतिः ॥ (1634)

धर्मशब्देन [1]प्रसिद्धं धर्मं गृहीत्वा 'तच्छ्रेयोरूपम्' इत्यादि व्याख्यातम्। **इदानीं न** स गृह्यते, इत्याह—**नायमिति** । [630] कस्तर्हि धर्मपदार्थः, अत्राह—**देवतेति** । [1631] देवतायां धर्मशब्दप्रवृत्तिनिमित्तमाह—**धर्मस्येति** । उक्तमन्य[2]त्रातिदिशति—**एवमिति** । अग्न्यादिशब्दवाच्या अपि अत्र[3] देवताः इत्यर्थः । [1632] स(ष्ट्र)[ष्ट]देवतानां बहुत्वादद्वैतहानिः, अत्राह—**एकैवेति** । यतः परदेवता जगत्कारणं, तस्मादित्यर्थः । [1633]

पञ्चदशकण्डिकार्थनिरूपणम्

'तदेत[4]द्ब्रह्म' इत्यादेस्तात्पर्यमाह—**यथोक्तेति** । किं(तु) तदुत्तरमिति, तदाह—**ब्राह्मणस्येति** । देवेषु क्षत्रादीनामेवोक्तत्वात्, 'अथेत्यभ्यमन्थत्'

---

1. **प्रसिद्धं धर्मं**—अचेतनमपूर्वाख्यमिति यावत् ।
* **नियमार्थप्रसिद्धये**—नियमरूपप्रयोजनसिद्धये ।
2. **अन्यत्र**—अग्न्यादौ ।
3. **अत्र**—सृष्टिप्रकरणे ।
* "**तस्मात्**—सदेव सौम्येदमित्यादेरागमादिति यावत् ।" इति **शास्त्रप्रकाशिका** ।
4. **तदेतदिति** 'तदेतद्ब्रह्म क्षत्रं विट् शूद्रः' । इति श्रुतिवाक्यम् ।

दैववर्णविभागस्य मनुष्येष्वपि भण्यते ।
विनियोगो यथोक्तोऽयं वर्णानां प्रविभागशः ॥ (1635)

क्षत्रादीनां पुरोक्तत्वादनुक्तेर्ब्राह्मणस्य च ।
*को न्वेषु ब्राह्मण इति चोदिते स्यात्परा श्रुतिः ॥ (1636)

देवतायाः समाख्यातो विभागो वर्णसंश्रयः ।
तत्पूर्वको मनुष्येषु विभागस्त्वधुनोच्यते ॥ (1637)

यदग्निनाभवद्ब्रह्म देवेष्वविकृतं नृषु ।
ब्राह्मणेन तदेवाभूत् ब्रह्मत्राविकृतात्मना ॥ (1638)

या जातिर्ब्राह्मणत्वाख्या साग्निरेवेति निश्चितिः ।
जातिरूपेण सा स्थित्वा जातिमेव नियच्छति ॥ (1639)

(बृ. 3-4-6) इत्यत्राग्निरुक्तत्वेऽपि तस्य ते[1]षु ब्राह्मणत्वस्यानुक्तत्वात्, [2]तत्कथनार्थं चातुर्वर्ण्यमुपसंहृत्य, 'त[3]दग्निनैव' इत्याद्या श्रुतिः प्रवृत्तेत्यर्थः । (1634) अ[4]र्थान्तरमाह—दैवेति । अग्निजन्मोक्त्या देवेषु ब्राह्मणस्योक्तत्वात् देवेषु उक्तक्षत्रादिविभागस्य मनुष्येषु कथनार्थमारम्भ इत्यर्थः । (1635) 'ब्राह्मणस्य पुरानुक्तेः' इत्येतत् प्रपञ्चयति—क्षत्रादीनामिति। (1636) द्विती[5]यार्थं वाक्य[6]-स्योक्तं प्रपञ्चयति—देवताया इति । (1637)

'तदग्निना' इत्यादिवाक्यं व्याचष्टे—यदिति । यत् ब्रह्म देवेषु अग्नि-रूपेणाभवत्, तदेवाग्निभावापन्नं मनुष्येषु ब्राह्मणरूपेणाभवदित्यर्थः । (1638) अग्नि(ब्रा)[ब्राह्म]णयोर्भेदात् कथं [7]सामानाधिकरण्यम्, अत्राह—या जातिरिति ।

---

1. तेषु—देवेषु ।
2. तत्कथनार्थं—अग्नेः देवेषु ब्राह्मणत्वकथनार्थम् ।
3. तदग्निनैवेति "तदग्निनैव देवेषु ब्रह्माभवत् ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियः वैश्येन वैश्यः शूद्रेण शूद्रः ।" इति श्रुतिः ।
4. अर्थान्तरमिति 'तदग्निनैव' इत्यादिश्रुतेरित्यादिः ।
* एषु—देवेषु ।
5. द्वितीयार्थं—मनुष्येषु चातुर्वर्ण्यविभागम् ।
6. वाक्यस्य—'तदग्निना' इत्यादिवाक्यस्य ।
7. सामानाधिकरण्यमिति अग्निर्ब्राह्मण इति इत्यादिः ।

* आग्नेयो ब्राह्मणश्चातस्तत्संबन्धात् श्रुतेः श्रुतः ।
अनुग्रहनियन्तृत्वे ब्राह्मणस्याग्नितो यतः ॥ (1640)

नियम्यमानो दैवेन क्षत्रियेण मनुष्यगः ।
इक्ष्वाकादिरभूत्पूर्वः क्षत्रियस्तद्वदुत्तरः ॥ (1641)

ब्रह्मैवाविकृतं यस्मात्पूर्वयोर्विकृतिं पुनः ।
क्षत्रियादौ समापेदे तेनाग्निब्राह्मणाश्रयात् ॥ (1642)

कामितार्थस्य संसिद्धिः कर्मिणां कामिनामिह ।
* स्थित्वाग्नौ ब्राह्मणे चेह लोकमीप्सन्ति कर्मिणः ॥ (1643)

एकत्वे कथं नियम्यनियामकता, इत्याशङ्क्य, [1]उपाधिभेदात्, इत्याह—**जातीति** । (1639) [2]अत्र गमकमाह—**आग्नेय इति** । श्रुतेः—'आग्नेयो वै ब्राह्मणः' इति वाक्यादित्यर्थः । (1640) अग्निब्राह्मणवत् इन्द्रराजन्ययोरपि नियन्तृनियम्यत्वं 'ऐन्द्रो राजन्यः' इति दर्शयति—**नियम्यमा(ने)न इति** । देवविट्शूद्रनियमितं मनुष्यविट्शूद्रयोर्जन्म दर्शयति—**तद्वदिति** । [1641] 'तस्मा[3]दग्नौ' इत्यादेस्तात्पर्यमाह—**ब्रह्मैवेति** । पूर्वयोः—अग्निब्राह्मणयोः । आकाशाद्यात्मना विकृतमपि ब्रह्म क्षत्रादिरूपेणाविकृतं स्थितं, क्षत्रादौ पुनः अग्न्यादिरूपेण विकृतं स्थितं यस्मादित्यर्थः । अग्नौ ब्राह्मणे चेति सप्तम्यर्थमाह—**स्थित्वेति** । [1642-1643]

---

1. **उपाधिभेदादिति** अधिदैवतरूपेण नियामकत्वं, अध्यात्मरूपेण नियम्यत्वमित्यर्थः ।
2. **अत्र गमकं**—अग्निब्राह्मणयोः नियम्यनियामकभावे प्रमाणम् ।

* 'श्रुतौ श्रुतः' इति मु. पु. पाठः ।

3. **तस्मादग्नाविति** 'तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येषु ।' इति श्रुतिः ।

* **स्थित्वेति** अग्नौ ब्राह्मणे च निमित्ते तत्संबन्धिकर्मवशात् लोकं-कर्मफलम् ईप्सन्ति इत्यर्थः ।

* कर्मकार्यश्च लोकोऽत्र ज्ञेयोऽग्न्यादिसमाश्रयात् ।
प्रत्यग्याथात्म्यधीमात्रात्परलोकाप्तिरिष्यते ॥ (1644)

अजातशत्रुजनकसुलभादिनिदर्शनात् ।
अविद्योत्थाधिकाराच्च लोकोक्तिर्न परात्मनि ॥ (1645)

* अव्याकृतव्याकरणात् स्वाभिप्रायाच्च नेष्यते ।
अव्याकृतव्याकरणरूपाभ्यां छाद्यते परः ॥ (1646)

'लोकमिच्छन्ते' इत्यत्र भर्तृप्रपञ्चाभिमत-
लोकपदार्थनिराकरणम्

लोकशब्देन परमात्मोच्यते इति भर्तृप्रपञ्चमतम् । तं प्रत्याह—कर्मेति । अग्निब्राह्मणसंबन्धिकर्मसाध्यत्वश्रुतेरित्यर्थः । परमात्मग्रहेऽपि कर्मसाध्यत्वं स्यात्, अत्राह—प्रत्यगिति । [1644] [1]हेतुमाह—अजातेति । कर्महीनानां सुल[2]-भादीनां ज्ञानात् मुक्तिश्रु(ति)[तेः]र्धीरेव साधनमित्यर्थः । अविद्याकार्यप्रकरणपठि-तत्वाच्च [3]लोको न परः, इत्याह—अविद्येति । [1645] भर्तृप्रपञ्चमतेन अविद्या-कार्यप्रकरणत्वमसिद्धम्, इत्यत्राह—अव्याकृतेति । 'तद्धेदं तर्ह्यव्याकृतम्' (बृ. 3-4-7) इति अविद्यासूत्रव्याख्यानं 'अथ योऽन्याम्' (बृ. 3-4-10) इति ग्रन्थः इति ते[4]नापि स्वीकारात् न परो लोक इत्यर्थः । अव्याकृततत्कार्ययोः

---

* कर्मकार्यः—कर्मफलम् । लोकः—लोकपदार्थः ।

1. हेतुमाह—ज्ञानमात्रस्य परमात्मप्राप्तिहेतुत्वे गमकमाह ।
2. सुलभादीनामिति सुलभा नाम ब्रह्मवादिनी जनकेन विवादमकरोदिति प्रसिद्धम् ।
3. लोको न परः—लोकपदार्थः न परमात्मा ।
4. तेनापि—भर्तृप्रपञ्चेनापि ।

* अव्याकृतेति कार्यकारणाभ्यां न परः व्यज्यते, किन्तु छाद्यते—आव्रियते । 'अन्यदेव तद्विदितात्' इति श्रुतेः कार्यकारणनिषेधेनैव परः व्यज्यते इत्यर्थः ।

आविष्कृतिस्तन्निषेधादन्यदेवेति च श्रुतेः ॥ (1647)

उत्तरत्र स्वशब्देन लोकस्य च विशेषणात् ।
कर्मणां फलमेवात्र लोकशब्देन भण्यते ॥ (1648)

लोकशब्देन संप्राप्तं कर्मकार्यमपेक्ष्य हि ।
स्वगिराऽनात्मनो लोकाद्विशिनष्ट्यात्मरूपकम् ॥ (1649)

स्वत्वेनाव्यभिचारित्वात् व्यभिचारादनात्मनः ।
कर्मकार्यनिवृत्त्यर्थमर्थवत्स्याद्विशेषणम् ॥ (1650)

* 'जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यात् मैत्रो ब्राह्मण उच्यते ॥'

परलोकाभिव्यक्तिहेतुत्वात् [1]तद्ग्रहे न [2]विरोधः, इत्यत्राह—**अव्याकृतव्याकरणेति** । (1646-1647) 'स्वं लोकमदृष्ट्वा प्रैति' इत्यत्र [3]लोकस्य परस्य स्वशब्देन विशेषणाच्च कर्मफलमेवात्र[4] लोकः, इ(त्यत्रा)[त्या]ह—**उत्तरत्रेति** । [1648] [5]पक्षान्तरेऽपि विशेषणो[6]पपत्तिः, इत्यत्राह—**लोकशब्देनेति** । परमते [7]प्रकृतव्यावर्त्याभावात् विशेषणवैयर्थ्यमित्यर्थः । (1649) [8]स्वमते विशेषणार्थवत्त्वमाह—**स्वत्वेनेति** । (1650) लोकशब्दस्य कर्मफलार्थत्वं ब्रुवता ब्राह्मणस्य

---

1. **तद्ग्रहे**—परमात्मग्रहणे ।
2. **न विरोधः**—न प्रकरणविरोधः ।
3. **लोकस्य परस्य**—परमात्मरूपलोकस्य ।
4. **अत्र**—'लोकमिच्छन्ते' इति वाक्ये ।
5. **पक्षान्तरेऽपि**—भर्तृप्रपञ्चपक्षेऽपि ।
6. **विशेषणोपपत्तिः**—'स्वं लोकमदृष्ट्वा' इत्यत्र स्वमिति विशेषणोपपत्तिः ।
7. **प्रकृतव्यावर्त्याभावात्**—प्रकृतस्य, स्वशब्देन व्यावर्त्यस्य, कर्मकार्यरूपलोकस्याभावादिति यावत् ।
8. **स्वमते**—'लोकमिच्छन्ते' इत्यत्र लोकशब्दस्य कर्मफलार्थकत्वमते ।

* 'जप्येनैव तु' इति मनुस्मृतिवाक्यं वार्त्तिकत्वेन पठितमिति, **न्यायकल्पलतिकायां** तदवतरणात् ज्ञायते । अतोऽस्माभिः वार्त्तिकमध्ये तत् स्थापितम् । परन्तु, शास्त्रप्रकाशिकानुसारेण तत् न वार्त्तिकमध्यपतितमिति ज्ञायते । मुद्रितपुस्तके न दृश्यते च तस्य पाठः इति बोध्यम् ।

त्रयाणामपि वर्णानां श्रुतौ संन्यासदर्शनात् ।
ब्राह्मणस्यैव संन्यास इति श्रुत्या विरुध्यते ॥ (1651)

लिङ्गं च न्यायरहितं प्रामाण्याय न कल्पते ।
ब्राह्मणोक्तिबलात्तस्मात् कामितोऽर्थो न सिद्ध्यति ॥ (1652)

* उपलक्षणं च तद्ग्राह्यं ब्राह्मणग्रहणं श्रुतौ ।
ब्राह्मणस्य प्रधानत्वाद्युक्तं तदुपलक्षणम् ॥ (1653)

ब्राह्मणत्वात्मलाभोऽपि यः स्यात् क्षत्रियवैश्ययोः ।
स्वमहिम्ना तयोर्नासावपिब्राह्मणसंश्रयात् ॥ (1654)

जातिमात्र(ता)[ला]भात् पुमर्थसिद्धिरुक्ता । अत्र मानमाह—(मनु. 2-72) जप्येनेति । तन्मात्रादभ्युदयलाभेऽपि कुतस्त(नो)[तो]निःश्रेयससिद्धिः? तत्र, 'संन्या[1]सस्य विधानाच्च ब्राह्मणस्य' इति भाष्यकारैरुक्तम् । तत्र ब्राह्मणग्रहणं अविवक्षितं विवक्षितं वा । आद्ये, तन्मात्रात् पुमर्थसिद्धौ नायं हेतुः । द्वितीयश्चेत्, तत्राह—त्रयाणामिति । 'ब्रह्मचर्यं समाप्य'(जा.) इत्यादिकायामित्यर्थः । (1651) 'ब्राह्मणाः प्रव्रजन्ति' इति विशेषणात् सामान्यश्रुतिः [2]विशेषे नीयते, इत्याशङ्क्याह—लिङ्गं चेति । अन्यपरवाक्यस्थं श्रुतिसामर्थ्यं लिङ्गं न्यायहीनं सामा[3]न्यश्रुतिमपि न बा(धि)[ध]ते इत्यर्थः । (1652) महाभारते,

पौरवृद्धाश्च ये तत्र निवसन्त्यस्मदाश्रयाः ।
प्रसाद्य सर्वे वक्तव्याः पाण्डुः प्रव्रजितो वने ॥ (भा. आदि.)

इति क्षत्रियस्यापि विरक्तस्य संन्यासाध्यवसायदर्शनात् ब्राह्मणग्रहणमुपलक्षणम्, इत्याह—उपलक्षणं चेति । (1653) ब्राह्मणस्यैव प्रधानत्वमित्ययुक्तम् । राजन्य-वैश्ययोरपि राजसूय, वैश्यस्तोमयोः ब्राह्मणत्वलाभात्, अत्राह—ब्राह्मणत्वेति ।

---

1. संन्यासस्य विधानाच्च ब्राह्मणस्य इति, 'पारिव्राज्यदर्शनाच्च' इति भाष्यस्यार्थतोऽनुवादः ।
2. विशेषे नीयते—ब्राह्मणपरतया व्याख्यायते इत्यर्थः ।
3. सामान्यश्रुतिमपीति यद्यपि लिङ्गं सामान्श्रुतेः प्रबलं, तथापि अन्यपरवाक्यस्थस्य न्यायहीनस्य न सामान्यश्रुतिबाधकत्वमित्यर्थः ।

* उपलक्षणं वा' इति मु. पु. पाठः ।

ब्राह्मणं न ह्यनाश्रित्य राजसूयादिहेतुकः ।
ब्राह्मणत्वाभिसंबन्धः प्राधान्यं तेन पूर्वयोः ॥ (1655)

वर्णान्तरगतापेक्षा नाग्निब्राह्मणयोस्तथा ।
ब्राह्मणः स्वमहिम्नैव पुरुषार्थं समश्नुते ॥ (1656)

अग्निब्राह्मणयोर्हेतुः प्राधान्ये भण्यते स्फुटः ।
एताभ्यामेव रूपाभ्यां यतो ब्रह्माभवत्स्वयम् ॥ (1657)

अग्निब्राह्मणयोर्यस्मात् ब्रह्म साक्षाद्भूत्पुरा ।
विट्क्षत्रयोर्व्यवहितं प्राधान्यं तेन पूर्वयोः ॥ (1658)

ब्रह्मेति जातिरेवात्र ग्राह्या न तु पराक्षरम् ।
तत्कारणत्वात्सर्वस्य हेतूक्तिस्तत्र दुर्घटा ॥ (1659)

(1654) व्यतिरेकमुखेन एतत् साधयति—**ब्राह्मणमिति** । पूर्वयोः—**अग्निब्राह्मणयोरित्यर्थः** । (1655) सापेक्षत्वात् क्षत्रादेरप्राधान्ये ब्राह्मणोऽप्रधानः [1]क्षत्राद्यपेक्षत्वात्, अत्राह—**वर्णान्तरेति** । ब्राह्मणस्य ब्राह्मण्यार्थं न[2] क्षत्राद्यपेक्षेत्यर्थः । ब्राह्मणस्य प्राधान्यफलमाह—**ब्राह्मण इति** । (1656) 'एता[3]भ्याम्' इत्यादेस्तात्पर्यमाह—**अग्नीति** । वाक्यं व्याकरोति—**एताभ्यामिति** । अतस्त[4]योः प्राधान्यम्, इति शेषः । (1657) 'स्वयम्' इत्येतत् स्फुटयति—**अग्निब्राह्मणयोरिति** । (1658)

'एताभ्यां हि रूपाभ्यां ब्रह्माभवत्' इति वाक्ये ब्रह्मशब्दस्य भर्तृप्रपञ्चाभिमतार्थनिराकरणम्

'एताभ्यां हि' इत्यत्र ब्रह्म[5]शब्दं परमा(त्मने)[त्मे]ति—**भर्तृप्रपञ्चमतं** प्रत्याह—

---

1. **क्षत्राद्यपेक्षत्वादिति** पालनाद्यर्थं क्षत्रियापेक्षणादित्यर्थः ।
2. **न क्षत्राद्यपेक्षेति** क्षत्रियवैश्ययोस्तु ब्राह्मण्यार्थमेव ब्राह्मणापेक्षेति भावः ।
3. **एताभ्यामिति** 'एताभ्यां हि रूपाभ्यां ब्रह्माभवत्' इति श्रुतिः ।
4. **तयोः प्राधान्यं**—अग्निब्राह्मणयोः प्राधान्यम् ।
5. **ब्रह्मशब्दं**—ब्रह्मशब्दबोध्यम् ।

सर्वेषां प्रत्यगात्मत्वात् पक्षपातोऽपि नेष्यते ।
अग्निब्राह्मणयोर्विष्णोस्तावन्मात्रसमाप्तितः ॥ (1660)

ब्रह्मैवेदं विश्वमिति साक्षादाम्नायशासनम् ।
विद्याविनयसंपन्ने इति च स्मृतिशासनम् ॥ (1661)

क्षत्रादाविव तुल्याग्निविप्रयोर्विकृतिर्दृशेः ।
तेजोऽबन्नादिभूतानां तुल्या सत्कारणात्मता ॥ (1662)

अग्निब्राह्मणरूपेण ब्रह्म साक्षाद्व्यवस्थितम् ।
तत्प्राप्तौ हेतुताग्न्यादेरिति निर्ह्रीकवागियम् ॥ (1663)

ब्रह्मेति । [1]ब्राह्मणजातिरेव स्वरूपेण अग्निरूपेण चाभवदित्यर्थः । अन्यथा परस्य सर्वात्मत्वात् अग्निब्राह्मणरूपेणैव स्थितिः विशेषतो न युक्तेत्यर्थः । (1659) हेतोरयुक्तिं प्रकटयति—**सर्वेषामिति** । [1660] सर्वस्य [2]तावन्मात्रत्वे मानमाह —**ब्रह्मैवेति** । [1661] अविकृतमग्निब्राह्मणयोः, [3]इतरत्र [4]विकृतमिति विशेषः त्वयैवेष्यते, इत्यत्राह—**क्षत्रादाविति** । आकाशादिरूपेण विकृतस्य ब्रह्मणः अग्निब्राह्मणाप(त्ते)[त्ति]रित्यर्थः । सर्वस्य ताव[5]न्मात्रत्वमुक्तमुपसंहरति —**तेज इति** । 'सन्मूलाः सौम्येमाः सर्वाः प्रजाः' (छा. 6-8-4) इति श्रुतेरित्यर्थः । (1662) उपसंहरति–**अग्नीति** । अग्निब्राह्मणरूपेण ब्रह्मण एवावस्थितत्वात् त(द्व) [द्विरु]द्धं कर्म ब्रह्मप्राप्तिसाधनमित्ययुक्तमित्यर्थः । (1663)

---

1. **ब्राह्मणजातिरेवेति** ब्राह्मणजात्यभिमानि सूत्राख्यं ब्रह्मेति यावत् ।
2. **तावन्मात्रत्वे**—परब्रह्ममात्रत्वे ।
3. **इतरत्र**—क्षत्रादौ ।
4. **विकृतमिति** ब्रह्मेति शेषः ।
5. **तावन्मात्रत्वं**—ब्रह्ममात्रत्वम् ।

वर्णाश्रमादिसर्गोऽयं कर्मार्थो ब्रह्मणः स्मृतः ।
धर्माख्यं कर्म च ज्ञेयं स्वाधिकारनियन्तृतः ॥ (1664)

तेनैव कर्मणा मुक्तिं प्राप्स्यामः शाश्वतीं वयम् ।
अज्ञात्वैव परं तत्त्वमेवं प्राप्ते परा श्रुतिः ॥ (1665)

नियन्ता चाभिमन्ता च ब्राह्मणत्वस्य हव्यवाट् ।
कर्मैवाग्नेर्नियन्तृ स्यात्कर्मणो देवता तथा ॥ (1666)

स्यादेतदग्निरेवैनं ब्रह्मभावाय वक्ष्यति ।
अदृष्टात्मतत्त्वमपि तच्च नैवोपपद्यते ॥ (1667)

'अथ यो ह वा' इत्यादिवाक्यस्य स्वमतेन
भर्तृप्रपञ्चमतेन च संबन्धनिरूपणम्

'[1]अथ' इत्याद्युत्तरवाक्यनिरस्यपक्षमाह—**वर्णेति** । स्वाधिकारनियन्तृतः—स्वस्मिन् अधिकारः—स्वामित्वेन संबन्धः येषां पुंसां तन्नियन्तृत्वात् चेतना देवतैव धर्मशब्दोक्तेत्यर्थः । (1664) फलत्वात् स्वर्गवदपवर्गस्यापि कर्मसाध्यत्वमिति फलितं निगमयति—**तेनेति** । (1665)

भर्तृप्रपञ्चैः एतद्वाक्यनिरस्यपक्षमुक्तं दर्शयति—**नियन्तेति** । ब्राह्मणस्य नियन्ता अग्निः कर्मणा नियम्यते, कर्म चाग्निनेत्यर्थः । (1666) [2]तयोरन्योन्यनियामकत्वे किं सिद्धम्, अत्राह—**स्यादेतदिति** । एवं नियम्यनियामकरूपेण वर्तमानोऽग्निः कर्मिणं ब्रह्मभावाय प्रापयिष्यति, किं ज्ञानेनेत्यर्थः । [3]तेषां सिद्धान्तं सूचयति—**तच्चेति** । (1667) [4]तदीयसंबन्धमुपसंहरति—**व्याचक्षत इति** ।

---

1. **अथ इत्यादीति** "अथ यो ह वा अस्माल्लोकात् स्वं लोकमदृष्ट्वा प्रैति, स एनमविदितो न भुनक्ति, यथा वेदो वाननुक्तः, अन्यद्वा कर्माकृतं । यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति, तद्धास्यान्ततः क्षीयत एव ।" इत्युत्तरवाक्यजातमनुसन्धेयम् ।
2. **तयोः** — अग्निकर्मणोः ।
3. **तेषां**—भर्तृप्रपञ्चानाम् ।
4. **तदीयसंबन्धं**—भर्तृप्रपञ्चोक्तमुत्तरवाक्यसंबन्धम् ।

व्याचक्षते परं ग्रन्थमेवं संबन्धपूर्वकम् ।
न कश्चित्फलभेदोऽत्र तस्मादुभयथापि सन् ॥ (1668)

न कर्मणा भवेन्मुक्तिर्नापि चाग्निसमाश्रयात् ।
* ज्ञानादेव तु कैवल्यमज्ञानादेव नास्ति तत् ॥ (1669)

आशङ्कितनिवृत्त्यर्थमथेत्यत्र प्रयुज्यते ।
ह वा इति प्रसिद्ध्यर्थं मुक्तिर्न ज्ञानतोऽन्यतः ॥ (1670)

कर्म कृत्स्नं समाप्यापि तत्त्वज्ञानाद्बहिष्कृतः ।
लभते निर्वृतिं नैव ज्ञानादेव हि सा यतः ॥ (1671)

अस्वैः पिण्डादिभिर्योग आ विरिञ्चादविद्यया ।
प्रतीचस्तद्व्युदासार्थं स्वं लोकमिति शब्द्यते ॥ (1672)

अज्ञानिनः स्यान्मरणं संसर्गः कारणात्मनि ।
ज्ञानात् ध्वान्तनिवृत्तिस्तु मरणं स्याद्विपश्चिताम् ॥ (1673)

तदीयमपि संबन्धमङ्गीकरोति—**न कश्चिदिति** । [1]उभयविधः संबन्धः शोभन इत्यर्थः । (1668) प्रदर्शित[2]मतद्वयनिरासेन वाक्यमवतारयति—**नेति** । (1669)

'अथ' इत्यादिश्रुत्यर्थवर्णनम्

तात्पर्यमुक्त्वा अथशब्दमवतारयति—**आशङ्कितेति** । (1670) अल्पफलानामपि कर्मणां संभूयानुष्ठितानां निःश्रेयसफलत्वम्, इत्यत्राह—**कर्मेति** । (1671) 'स्वं लोकम्' इति [3]स्वशब्दविशेषणकृत्यमाह—**अस्वैरिति** । (1672) 'अस्माल्लोकात्' इत्येतत् व्याख्यातुं विद्वदविद्वन्मरणविभागमाह—**अज्ञानिन**

---

1. **उभयविधः संबन्धः** — भगवत्पादभाष्योक्तः भर्तृप्रपञ्चोक्तश्च संबन्धः ।
2. **मतद्वयेति** अपवर्गस्यापि कर्मसाध्यत्वमिति, अग्निरेव कर्मिणं मोक्षं प्रापयिष्यतीति च मतद्वयेत्यर्थः ।

* **अज्ञानादेव नास्ति तदिति** तत्-कैवल्यं अज्ञानादेव असत्कल्पं भातीत्यर्थः । अतः ज्ञानमात्राधीनं कैवल्यमिति भावः ।

3. **स्वशब्दविशेषणकृत्यमिति** स्वशब्दरूपविशेषणस्य प्रयोजनमित्यर्थः ।

* मृत्योर्मृत्य्वपरिज्ञानादज्ञस्य मरणं तमः ।
अविद्वन्मृतिसिद्ध्यर्थमस्माल्लोकादितीर्यते ॥ (1674)

अज्ञात्वैव परं देवमागमापायरूपिणः ।
अस्वभूतादेहलोकान्म्रियते योऽज्ञो नरः ॥ (1675)

* अज्ञाततत्त्वः स परो न भुनक्ति ह्यतद्विदम् ।
कैवल्यफलदानेन प्रत्यगात्मापि सन्परः ॥ (1676)

तद्दृष्टिमात्रतः सिद्धेर्नान्यतस्तदवाप्यते ।
मोहमात्रान्तरायत्वात्तत्कर्मालं न मुक्तये ॥ (1677)

वेदस्य ग्रहणं यद्वन्न स्यादध्ययनादृते ।
कृष्यादि वान्यदकृतं कर्म नालं फलाय च ॥ (1678)

* भूरि कर्म करिष्यामि तत्फलानन्त्यसिद्धये ।
कर्मणोऽचिन्त्यशक्तित्वात् नैवमप्युपपद्यते ॥ (1679)

इति । (1673) अज्ञमरणं प्रपञ्चयति—**मृत्योरिति** । तमस्संसर्गो मृतिरज्ञस्येत्यर्थः । अविद्वन्मरणद्योतनाय 'अस्माल्लोकात्' इति वाक्यम्, इत्याह—**अविद्वदिति** । (1674) एतद्वाक्यार्थमाह—**अज्ञात्वेति** । (1675) **'स एनम्'** इत्यादिवा(क्य)[क्यार्थ]माह—**अज्ञात[त]त्त्व इति** । (1676) विना ज्ञानं कर्मणा मुक्तिसिद्धेः अज्ञातोऽपि परः [1]पालयेत्, अत्राह—**तद्दृष्टीति** । आत्मधीमात्रात् कैवल्यसिद्धेरित्यर्थः । (1677) 'यथा वेदः' इत्यादेरर्थमाह—**वेदस्येति** । (1678) '[2]यदिह' इत्यादिव्यावर्त्यमाह—**भूरीति** । सकृदनुष्ठितादेकस्मात्कर्मणो मुक्त्यभावेऽपि असकृदनुष्ठितादनेककर्मणः सा स्यादित्यर्थः । उत्तरत्वेन वाक्य-

---

* **मृत्योः मृत्य्वपरिज्ञानादिति** मृत्योः अज्ञानस्य मृत्युः - नाशकः अखण्डाकारवृत्त्यारूढ चिदात्मा, तस्याज्ञानादित्यर्थः ।

* **न भुनक्ति** —न पालयति ।

1. **पालयेदिति** मुक्तिदानेनाज्ञं पालयेदित्यर्थः ।

2. **'यदिह' इत्यादिव्यावर्त्यमिति** 'यदिह वा अनेवंवित् महत्पुण्यं करोति' इति वाक्येन निरसनीयचोद्यमित्यर्थः ।

* भूरि कर्म इत्यत्र अश्वमेधादि महत्तरकर्म विवक्षितमिति **शास्त्रप्रकाशिकाकाराः** ।

अप्रज्ञातात्मतत्त्वः सन् यदि नाम दिवानिशम् ।
कल्पकोटिसहस्राणि कुर्यात्कर्म महच्छुभम् ॥ (1680)

तदप्यस्य तथाभूतमन्तवत्त्वात्प्रतिक्षणम् ।
विध्वंसमेत्यपचयात् कोष्ठागारादिवद् ध्रुवम् ॥ (1681)

कृतस्य हि क्षयोऽवश्यमकृतस्याक्षयात्मता ।
प्रसिद्धातीव जगति श्रुत्यैवं तेन भण्यते ॥ (1682)

उक्तदोषापनुत्तिः स्यात्कथमस्येति चोदिते ।
आत्मानमिति निर्वक्ति श्रुतिः परिहृतिं पराम् ॥ (1683)

निःशेषानात्मसंदृष्टिनिराकरणसिद्धये ।
एवेत्यवधृतिर्ज्ञेया प्रत्यङ्मात्रेक्षणाय तु ॥ (1684)

प्रत्यङ्मात्रदृशः पुंसो न न्याय्यः स्यात्समुच्चयः ।
* ब्रह्मात्मनि समाप्तस्य न तदन्यार्थशेषता ॥ (1685)

मवतारयति—नैवमिति । (1679) [1]तत् व्याचष्टे—अप्रज्ञातेति । कर्मकार्यत्वे कैवल्यमनित्यं स्यादित्यर्थः । (1680–1681) लोकप्रसिद्ध्या [2]एतदुपपादयति—कृतस्येति । [1682]

'[3]आत्मानमेव' इति उत्तरवाक्यमाकांक्षापूर्वकमवतारयति—उक्तेति । [1683] एवशब्दार्थमाह—निःशेषेति । [1684] एवशब्दस्य श्रौतमर्थमुक्त्वा [4]आर्थिकमर्थमाह—प्रत्यङ्मात्रेति । [1685]

---

1. तत् व्याचष्टे—' यदिह ' इत्यादिवाक्यं व्याचष्टे ।
2. एतत्—कर्मसाध्यस्यानित्यत्वम् ।
3. आत्मानमेवेति 'आत्मानमेव लोकमुपासीत' इति श्रुतिः ।
4. आर्थिकमर्थं—कर्मसमुच्चयाभावम् ।

* ब्रह्मात्मनि समाप्तस्य न तदन्यार्थशेषतेति ब्रह्मात्मतया स्थितस्य विदुषः ब्रह्मान्यस्मिन् कर्मरूपार्थे कर्तृत्वेन शेषता नास्तीत्यर्थः ।

क्षयः कर्मफलस्योक्तः कृतकत्वसमन्वयात् ।
* न क्षयो ज्ञानकार्यस्य कृतकत्वाद्यसंभवात् ॥ (1686)

प्रत्यङ्मात्रैकयाथात्म्यात् क्षेत्रक्षेत्रज्ञवस्तुनः ।
तस्मिन् ज्ञातेऽखिलं ज्ञातं सर्वाज्ञाननिराकृतेः ॥ (1687)

सर्वसाधनसाध्यं च सुखं यच्चाप्यभीप्सितम् ।
सर्वानन्दैकहेतुत्वात् ब्रह्माप्तौ प्राप्तमेव तत् ॥ (1688)

यद्यत्कामयते कामी कर्मभूमाववस्थितः ।
अस्मादेवात्मविज्ञानात्तत्तत्सुखमुपाश्नुते ॥ (1689)

सहस्रदशभागर्द्ध्या सुखानन्त्यं परात्मनः ।
वक्ष्यते सर्वसौख्याप्तिस्तस्मिन् दृष्टे परात्मनि ॥ (1690)

धीकार्यत्वेऽपि मोक्षस्यानित्यत्वापत्तिः, अत्राह—**क्षय इति** । (1686) मोक्षस्य केवलज्ञानफलत्वे हेत्वन्तरमाह—**प्रत्यगिति** । (1687) '[1]यद्यत्कामयते' इत्यादेस्तात्पर्यमाह—**सर्वेति** । (1688) अस्मिन्नर्थे वाक्यं योजयति—**यद्यदिति** । (1689) आत्मज्ञानात् सर्वसुखाप्तिः आत्मसुखस्या[2]नन्त्यात्, इति मत्वा, [3]अत्र मानमाह—**सहस्रेति** । सार्वभौमोपक्रममुत्तरोत्तरशतगुणवृद्ध्या आत्मनोऽनतिशय-

---

* **ज्ञानकार्यस्य कृतकत्वाद्यसंभवादिति** ज्ञानफलस्य ब्रह्मात्मभावस्य स्वाभाविकत्वेन जन्यत्वासंभवात् अज्ञानहानिमात्रस्य ज्ञानाधीनत्वादित्यर्थः । एवञ्च 'न ह्यस्य कर्म क्षीयते' इति श्रुतेः विदुषः कर्म-ज्ञानकार्यं कैवल्यं न नश्यति इत्येवमर्थः प्रतिपादित इति बोध्यम् ।
भाष्यकारास्तु कर्मपदस्य प्रसिद्धकर्मार्थकत्वं स्वीकृत्य, "न ह्यस्य कर्म क्षीयते कर्माभावादेवेति नित्यानुवादः । यथा अविदुषः कर्मक्षयलक्षणं संसारदुःखं सन्ततमेव, न तथा तदस्य विद्यते इत्यर्थः । 'मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन' इति यद्वत् ।" इति वर्णयन्ति ।

1. **यद्यत्कामयते इति** "अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते ।" इति श्रुतिवाक्यम् ।

2. **आनन्त्यात्**—निरतिशयत्वात् ।

3. **अत्र मानं**—आत्मसुखस्य निरतिशयत्वे प्रमाणम् ।

अन्तर्भावः परानन्दे सुखानामाविरिश्वतः ।
अस्माद्धयेवेति वाक्येन सर्वेषां नः प्रबोध्यते ॥ (1691)

स्थितेऽप्येवं प्रमाणार्थे के चिद् व्याचक्षतेऽन्यथा ।
प्रमान्तरविरुद्धार्थमिमं ग्रन्थं यथोदितम् ॥ (1692)

न कर्म कारणं मुक्तेः क्षयिष्णुत्वसमन्वयात् ।
कर्मस्वेव नियच्छन्ति देवताश्च न मुक्तिदाः ॥ (1693)

कर्माधिकृतिहेतुत्वादग्न्यादेर्देवतात्मनः ।
नाप्युत्थायेह कर्मभ्यो ब्रह्म ज्ञातुं क्षमो नरः ॥ (1694)

सुखत्वोक्तेः [1]तत्प्राप्तौ सर्वसुखाप्तिरित्यर्थः । (1690) उपसंहरति—**अन्तर्भाव इति** । (1691)

'आत्मानमेव लोकमुपासीत' इति वाक्यस्य भर्तृप्रपञ्चमतेनार्थनिरूपणम्

'आत्मानमेव' इति वाक्यं केवलज्ञानात् मुक्तिः [2]इत्येवमर्थं व्याख्याय, [3]भर्तृप्रपञ्चव्याख्यानमनुवदति—**स्थिते त्विति** । अखण्डब्रह्मप्रतिपादकवाक्यविरुद्धमित्यर्थः । (1692) तदीयव्याख्यानं दर्शयितुं [4]तदीयपूर्वपक्षमाह—**न कर्मेति** । कर्मफलस्यानित्यत्वादित्यर्थः । तर्हि देवता मुक्तिकारणम्, अत्राह—**कर्मस्विति** । कर्मणि प्रेरकत्वात् देवता न मुक्तिकरीत्यर्थः । ज्ञानात्तर्हि मुक्तिः, इत्यत्राह—**नेति** । यावज्जीवश्रुतिविरोधात् कर्म त्यक्तुमशक्यम् । अत्यक्तकर्मणः (अ)[न]ज्ञानोत्पत्तिरित्यर्थः (1693-1694) अज्ञात एव तर्ह्यात्मा मुक्तिं साधयेत्,

---

1. तत्प्राप्तौ—आत्मसुखप्राप्तौ ।
2. इत्येवमर्थं—इत्येवमर्थकम् ।
3. भर्तृप्रपञ्चव्याख्यानमिति 'आत्मानमेव' इति वाक्यस्येत्यादिः ।
4. तदीयपूर्वपक्षं—भर्तृप्रपञ्चोक्तपूर्वपक्षम् ।

प्रत्यगात्माप्यसंदृष्टो मुक्त्या नैवोपतिष्ठते ।
* देवताज्ञाकरत्वेन ब्रह्मविद्या विरुद्ध्यते ॥ (1695)

कर्मिणः कर्मशेषत्वं स्वाराज्यं ब्रह्मवेदने ।
नातः समुच्चयान्मुक्तिः नापि स्यात्सा विकल्पतः ॥ (1696)

सति ज्ञाने तदुभयं तत्तु नैवोपपद्यते ।
ऋणानि चानपाकृत्य कर्म त्यक्तुं न लभ्यते ॥ (1697)

ऋणानि त्रीण्यपाकृत्येत्येवं च स्मृतिशासनम् ॥ (1698)

* एवं न कर्मतो मोक्षः कर्मणः क्षयवत्त्वतः ।
ज्ञानाभावान्न विज्ञानात् नोभाभ्यां तदसंभवात् ॥ (1699)

वीक्ष्यापन्नस्य तस्यैवं सामर्थ्यं ज्ञानकर्मणोः ।
उद्बिभावयिषुः साक्षात् प्रवृत्तैषा परा श्रुतिः ॥ (1700)

लोकमात्मानमेवेममुपासीतात्मविद्यया ।
इति स्यादर्थवत्त्वाय समाधिर्ज्ञानकर्मणोः ॥ (1701)

अत्राह—**प्रत्यगिति**। ज्ञानकर्मसमुच्चयो न युज्यते, कर्मिणो ज्ञानायोगात्, इत्युक्तम्। तत्र हेतुमाह—**देवतेति**। (1695) विरोधं स्पष्टयति—**कर्मिण इति**। फलितमुपसंहरति—**नात इति**। (1696) कर्मिणो ज्ञानानुपपत्तौ तत्त्यागिनो ज्ञानं स्यात्, इत्याशङ्क्य, त्याग एव न युज्यते, इत्याह—**ऋणानीति**। (1697-1698) [1]तदीयपूर्वपक्षमुपसंहरति—**एवमिति**। (1699)

धीकर्मसमुच्चयात् मोक्षो नेत्युक्ते, कुतोऽसौ स्यादिति निरूपयतः, धीकर्मणोः समुच्चितयोः मोक्षहेतुत्वप्रतिपादनाय 'आत्मानमेव लोकम्' इत्यादि वाक्यम्, इत्याह—**वीक्ष्येति**। (1700) सिद्धान्तत्वेन प्रवृत्तश्रुतिं प्रकटयति—**लोकमिति**। धीकर्मणोरर्थवत्त्वाय लोकं द्वैतावस्थं आत्मानं अद्वैतावस्थमापाद्य उपासीतेति

---

* **देवताज्ञाकरत्वेन**—कर्मानुष्ठानेनेति यावत्।

* **कर्मणः क्षयवत्त्वतः**—कर्मणः क्षयिष्णुफलवत्त्वादिति यावत्।

1. **तदीयपूर्वपक्षं**—भर्तृप्रपञ्चोक्तं पूर्वपक्षम्।

द्वैतैकत्वात्मिकावस्था विरिञ्चाख्या परात्मनः ।
* विज्ञानकर्माभिव्यङ्ग्या द्वैतत्वात्सा क्षयात्मिका ॥ (1702)

अवस्था याऽनभिव्यक्ता तस्यैव परमात्मनः ।
अविशेषात्मिका सास्य कारणत्वात्त्वनश्वरी ॥ (1703)

तत्रैवं सति लोकेऽस्मिन् द्वैताद्वैतात्मसंस्थितौ ।
* द्वैतावस्थामुपास्ते यः तस्यासौ क्षीयते ध्रुवम् ।
द्वैतत्वात्, यः पुनर्धीमान् कर्मावस्थां यथोदिताम् ॥ (1704)

अव्यक्तावस्थामापाद्य सदोपास्ते परात्मना ।
न क्षीयते कर्म तस्याद्वैतत्वादेव कारणात् ॥ (1705)

ब्रह्मोपास्तिर्भवेदेवं कर्म चानुष्ठितं भवेत् ॥ (1706)

समाधिः—ध्यानं स्यादित्यर्थः । (1701) द्वैतावस्थ एवात्मा कस्मात् नोपासितव्यः, इत्याशङ्क्य, तदुपासकस्य दोषं वक्तुं तदवस्थाया ना(सि)[शि] त्वमाह—द्वैतेति । (1702) [1]व्याकृतावत् अवस्थात्वात् अव्याकृतापि नश्वरी, इत्यत्राह—अवस्थेति । (1703) [2]अवस्थाद्वयमुक्त्वा द्वैतावस्थोपासकस्य दोषमाह—तत्रेति । अद्वैतावस्थोपासकस्य गुणमाह—यः पुनरिति । कर्मावस्थां—द्वैतावस्थामित्यर्थः । (1704-1705) एवमुपासकेन कर्मापि कृतं स्यात् । अतो [3]द्वयो-

---

* विज्ञानकर्माभिव्यङ्ग्येति सूत्रोपास्तिरूपविज्ञाननित्यकर्मसमुच्चयसाध्या द्वैतैकत्वात्मिका व्याकृतावस्थेत्यर्थः ।

1. व्याकृतावत्—व्याकृतावस्थावत् ।

2. अवस्थाद्वयं—द्वैतावस्थामद्वैतावस्थाञ्च ।

* असौ—द्वैतावस्था सूत्राख्या, क्षीयते द्वैतत्वात् ।

3. द्वयोः—कर्मविज्ञानयोः ।

व्यक्तं ससाधनं कर्म ब्रह्मभावेन पश्यतः ।
* न क्षीयते कर्म तस्य सदैकात्म्यावसानतः ॥ (1707)

हिरण्यगर्भविज्ञानकर्मणोः प्रथमः किल ॥ (1708)

समुच्चयः, ततोऽन्योऽयमव्यक्तब्रह्मविद्यया ।
व्यक्तसूत्रात्मविद्यायाः परोऽप्येष समुच्चयः ॥ (1709)

द्वयोर्यथोक्तयोर्मध्ये कतरोऽयं समुच्चयः ।
प्रथमोऽथ द्वितीयो वा, न न्यायोऽस्त्युभयोरपि ॥ (1710)

प्रथमश्चेत्, त्वयैवोक्तं क्षीयेते कामकर्मणी ।
निःशेषभोगभुक्तत्वात् कृत्स्नप्राप्त्या द्वयात्मनः ॥ (1711)

रर्थवत्ता, इति फलितमाह—**ब्रह्मेति** । (1706) कर्मफलस्यानित्यत्वात् [1]'न ह्यस्य' इति व्याहतम्, अत्राह—**व्यक्तमिति** । (1707)

भर्तृप्रपञ्चाभिमतार्थनिराकरणम्

तदभिमतसमुच्चयद्वयनिरासः

भर्तृप्रपञ्चमतं दूषयितुं तदुपगतसमुच्चयं विभजते—**हिरण्यगर्भेति** । हिरण्यगर्भोपासनस्य [2]कर्मणा समुच्चय एकः, द्वितीयः [3]हिरण्यगर्भोपासनस्य कर्मणो [ऽव्यक्तब्रह्मो] पासनया समुच्चयः त्वयेष्ट इत्यर्थः । (1708–1709) 'आत्मानमेव' इति वाक्ये द्वयोर्मध्ये कतरः समुच्चयः त्वदभिमतः इति पृच्छति —**द्वयोरिति** । सामान्येन दूषयति—**नेति** । (1710) [4]आद्यमनुवदति—

---

1. **न ह्यस्येति व्याहतं**—'न ह्यस्य कर्म क्षीयते' इति वाक्यं प्रमाणविरुद्धार्थकम् ।
* **ऐकात्म्यावसानत इति** अद्वैतावस्थोपासकस्य कर्म वस्तुमात्रपर्यवसानात् न क्षीयते इत्यर्थः ।
2. **कर्मणा**—नित्यादिकर्मणा ।
3. **हिरण्यगर्भोपासनस्य कर्मणः** — हिरण्यगर्भोपासनात्मककर्मणः ।
4. **आद्यमनुवदति**—हिरण्यगर्भोपासननित्यादिकर्मसमुच्चयं आत्मानमेवेति वाक्यविवक्षितमनुवदति ।

विशीर्यते ततः कार्यं कृत्स्नं च कारणं तथा ।
ततः क्षेत्रज्ञरूपस्य सर्वभोज्यातिलङ्घिनः ॥ (1712)

केवलाज्ञानमात्रेण व्यवधानं परात्मनः ।
अप्राप्य परमात्मानमन्तराले व्यवस्थितिः ॥ (1713)

इह त्वक्षितिरेवोक्ता भवता कामकर्मणोः ।
न हास्य क्षीयते कर्मेत्यस्माद्ध्येवेति चोक्तितः ॥ (1714)

पूर्वोत्तरोक्तवचसोर्व्याहतिर्वः प्रसज्यते ।
अथ द्वितीयोऽभिमतो न तथाप्युपपद्यते ॥ (1715)

प्रथमश्चेदिति । व्याहतिः (वा. 1715) इत्युत्तरेणान्वयः । [1]तद्वक्तुं ‘**किमेनं न जहाति**’ (बृ. 5 - 2 - 12) इत्यत्र [2]परोक्तं दर्शयति—**त्वयेति** । आद्यसमुच्चयानुष्ठानात् [3]अशेषभुक्तभोगत्वात् कामकर्मक्षयात् शरीरद्वयवियोग इत्यर्थः । विदेहकैवल्यमेव तर्हि प्रथमसमुच्चयानुष्ठानफलं स्यात्, अत्राह—**तत इति** । [4]शरीरद्वयवियोगात् सकलात् द्वैतात् व्यावृत्तस्य परस्मादज्ञानमात्रव्यवहितस्य [5]अन्तरालावस्थानमाद्यसमुच्चयफलमुक्तमित्यर्थः । (1711–1712–1713) तथापि कथं व्याघातः, अत्राह—**इह त्विति** । ‘आत्मानमेव’ इत्यत्र तु । ‘**न हास्य**’ इत्यादिना कामकर्मणोः [6]अ(क्ष)[क्षि]तिः प्रथमसमुच्चयफलमुच्यते इति [7]त्वया व्याख्यातम् । अतो विरोध इत्यर्थः । [8]द्वितीयमनुवदति—**अथेति** । [9]दूषयति—

---

1. **तद्वक्तुं**—पूर्वोत्तरवाक्ययोर्विरोधं वक्तुम् ।
2. **परोक्तं**—भर्तृप्रपञ्चोक्तम् ।
3. **अशेषभुक्तभोगत्वादिति** सूत्रात्मप्राप्त्येत्यादिः ।
4. **शरीरद्वयवियोगः**—स्थूलसूक्ष्मशरीरवियोगः ।
5. **अन्तरालावस्थानं**—संसारमुक्त्योरन्तराले अवस्थानम् ।
6. **अक्षितिः**—क्षयाभाव इति यावत् । ‘न हास्य कर्म क्षीयते, अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते’ इति कामकर्मणोः क्षयाभावः फलमुच्यते इति भर्तृप्रपञ्चव्याख्यानम् ।
7. **त्वया**—भर्तृप्रपञ्चेन ।
8. **द्वितीयं**—व्यक्ताव्यक्तोपासनसमुच्चयम् ।
9. **दूषयति**—पूर्वोत्तरवाक्यविरोधेन दूषयति ।

फलं त्वयैव व्याख्यातं द्वितीयस्याः समुच्चितेः ॥ (1716)

द्वैतैकत्वधिया मृत्युं कामकर्मस्वलक्षणम् ।
तीर्त्वाऽऽत्मविद्यया विद्वानमृतत्वं समश्नुते ॥ (1717)

न ह्यस्य क्षीयते कर्म यद्यत्कामयतेऽक्षरात् ।
तत्तत्सृजत इत्युक्त्योः पूर्वोत्तरविरुद्धता ॥ (1718)

कामकर्मक्षये यस्मादमृतत्वं फलं श्रुतम् ।
यदा सर्वे प्रमुच्यन्ते इत्येवं बहुशः श्रुतौ ॥ (1719)

कथमेति स कैवल्यमक्षितौ कामकर्मणोः ।
कैवल्यावाप्तौ च कथं तयोरक्षितिरुच्यते ॥ (1720)

इतश्च व्याहतिः स्पष्टा ब्रह्मविद्या विरुध्यते ।
देवताज्ञाकरत्वेनेत्युक्तं यत्प्रणिधानतः ॥ (1721)

नेति । (1714–1715) विरोधं[1] वक्तुं 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' (ईश. 11) इत्यत्र [2]तदुक्तसमुच्चयफलविभागमाह— **फलमिति** । द्वितीयसमुच्चयस्य विभज्यैव फलं दर्शितं, सूत्रोपासनस्य कामकर्मक्षयः फलं, अद्वैतोपासनायाः आत्मविद्यायाः अमृतत्वं फलमिति । इह तु कामादेरक्षयस्य [3]तत्फलत्वेन कीर्तनात् व्याहतिरित्यर्थः । (1716–1717–1718) न केवलं पूर्वापर-विरोधात् अनुपपन्नमिदं व्याख्यानम् । [4]श्रुतिविरोधाच्च, इत्याह—**कामेति** । (1719) कामकर्मणी संसारः, तदक्षयो मुक्तौ व्याहतः, इति न्यायविरोधमाह —**कथमिति** । (1720)व्याहत्यन्तरमाह—**इतश्चेति** । [5]तां स्पष्टयितुं [6]पूर्ववाद्युक्तं

---

1. **विरोधं**—पूर्वापरविरोधम् ।
2. **तदुक्तसमुच्चयफलविभागं**—भर्तृप्रपञ्चोक्तं द्वितीयसमुच्चयस्य फलविभागम् ।
3. **तत्फलत्वेन**—द्वितीयसमुच्चयफलत्वेन ।
4. **श्रुतिविरोधाच्च**—मोक्षे कामक्षयवादिश्रुतिविरोधाच्च ।
5. **तां**—विवक्षितां अन्यां पूर्वोत्तरव्याहतिम् ।
6. **पूर्ववाद्युक्तं**—'आत्मानमेव लोकमुपासीत' इति वाक्यनिरसनीयं पूर्वपक्षवादिनोक्तं 'देवताज्ञाकरत्वेन ब्रह्मविद्या विरुद्ध्यते' (वा. 1695), इति वार्तिकप्रतिपादितम् ।

ससाधनमिदं कर्म ब्रह्मभावेन पश्यतः ।
तदेव ब्रह्मविज्ञानं कथं नेह विरुद्ध्यते ॥ (1722)

पूर्वं कृत्वाथ तत्कर्म पश्चाद्ब्रह्मात्मनेक्षते ।
व्युत्थाय कर्मणः कृत्स्नान्मोक्षाशंसेति चेन्मतम् ॥ (1723)

एवं समर्थ्यमानेऽपि न मुक्तिः कर्मणो भवेत् ।
व्युत्थितस्यैव कर्मभ्यो मुक्त्यभ्युपगमत्वतः ॥ (1724)

अथ गार्हस्थ्य एवायं कर्मकाले विभिन्नधीः ।
कर्म कृत्वाथ तच्छान्तौ कर्म ब्रह्मेति वेत्स्यति ॥ (1725)

एवं समादधानस्य कामितोऽर्थो न सिध्यति ।
पराधीनमृतेर्जन्तोर्मुक्तिः स्यात्पाक्षिकी यतः ॥ (1726)

भेदं पश्यन्यदि मृतो बद्ध एव भवेन्नरः ।
कर्म ब्रह्मेति संपश्यन् मृतश्चेत् ब्रह्मसाद्भवेत् ॥ (1727)

---

[1]परैः सिद्धान्तत्वेनोपेतमनुवदति—**ब्रह्मेति** । देवताज्ञाकरत्वं—अग्निहोत्राद्यनुष्ठानम् । तेन विरुद्ध्यते ब्रह्मधीरिति त्वयोक्तमित्यर्थः । (1721) किमतः, तत्राह—**ससाधनमिति** । अनुष्ठानकाले ब्रह्मवित् कर्म ब्रह्मभावेन पश्यति इतीदानीमुच्यते । अतो विरोध इत्यर्थः । (1722) कालभेदेनाविरोधं शङ्कते—**पूर्वमिति** । अज्ञः सन् कर्म कृत्वा पश्चात् तत् ब्रह्मभावेन पश्यतीत्यर्थः । (1723) दूषयति—**एवमिति** । (1724) कर्मणः [2]तद्धेतुत्वं शङ्कते—**अथेति** । अ(ये)[यं]-कर्माधिकारी, तदनुष्ठानकाले[3]कर्तृत्वादिविभागधीः कर्मानुष्ठाय, शुद्धात्मा गार्हस्थ्ये स्थित्वैव कर्म ब्रह्मेति पश्यति । अतोऽस्ति [4]तस्य मुक्तिहेतुतेत्यर्थः । (1725) दूषयति—**एवं समादधानस्येति** । (1726) [5]पाक्षिकत्वं स्पष्टयति—**भेदमिति** । मरणस्यानियत-

---

1. **परैः** — भर्तृप्रपञ्चैः ।
2. **तद्धेतुत्वं**—मुक्तिहेतुत्वम् ।
3. **कर्तृत्वादिविभागधीः**—कर्तृत्वादिभेदज्ञानवान् ।
4. **तस्य**—कर्मणः ।
5. **पाक्षिकत्वमिति** मुक्तेरित्यादिः ।

भेददृष्टेर्बलीयस्त्वात् तस्याः स्वाभाविकत्वतः ।
* इच्छातश्चापि भाव्यत्वात्तदापि स्यान्न निर्वृतिः ॥ (1728)

कुर्वाण एव चेत्कर्म कर्म ब्रह्मेति पश्यति ।
देवताज्ञाकरत्वेन ब्रह्मविद्या विहन्यते ॥ (1729)

इत्युक्तिर्वो विरुद्ध्येत पूर्वोत्तरविघाततः ।
अपास्तदेवतात्यक्तद्रव्यं कर्मापि दुर्घटम् ॥ (1730)

त्यक्तद्रव्यादिसंभेददृष्ट्यैव नियतत्वतः ।
यागादिकर्मणस्तस्मादसमीचीनमुच्यते ॥ (1731)

ससाधनमिदं कर्म ब्रह्मैवेति समीक्षणम् ।
ईदृङ् न लोके वेदेऽपि प्रसिद्धं कर्म कुत्रचित् ॥ (1732)

आत्मानमित्यतो वाक्यात् कर्मदृक् चेत्प्रसेत्स्यति ।
वाक्यभेदप्रसङ्गत्वान्नैवमप्युपपद्यते ॥ (1733)

कालत्वात् विभागज्ञानवतो मृतस्य बन्धः । कर्म ब्रह्मभावेन पश्यतो मृतस्य ज्ञानान्मुक्तिरित्यर्थः । (1727) संप्रति कर्मिणः पाक्षिक्यपि मुक्तिर्नास्ति, इत्याह—**भेदेति** । नैसर्गिकभेदधियो ब्रह्मज्ञाना[त्] बलवत्त्वात् ब्रह्मज्ञानस्य चेच्छया कर्तुमशक्यत्वादित्यर्थः । (1728) एवं कालभेदादवि[1]रोधे ध्वस्ते, कर्मकाल एव ज्ञानान्मुक्तिस्तस्य, इति शङ्कते—**कुर्वाण** इति । पूर्वोक्तव्याहतिमाह—**देवतेति** । (1729) ससाधनं कर्म ब्रह्म पश्यता कर्माप्यनुष्ठितमिति, यदुक्तम्; तत् दूषयति—**अपास्तेति** । कर्त्राद्यनपेक्षमपि किंचित् कर्म ज्ञानसहभावि स्यात्, अत्राह—**ईदृगिति** । (1730-1731-1732) न वेदविरोधः, [2]अस्य वाक्यस्यैत[3]न्मानत्वात्, इत्याह—**आत्मानमिति** । नेदमत्र मानमिति परिहरति—**वाक्येति** । (1733)

---

* 'तदापि स्यान्न निर्वृतिः' इत्यत्र अपिरवधारणार्थः ।

1. **अविरोधे ध्वस्त इति** ज्ञानकर्मणोरित्यादिः ।
2. **अस्य वाक्यस्य**—'आत्मानमेव लोकमुपासीत' इति वाक्यस्य ।
3. **एतन्मानत्वात्**—कर्त्रादिभेदरहिते कर्मणि प्रमाणत्वात् ।

एवंविधस्य कर्मत्वमुपास्ति चात्मनस्तथा ।
उभयं विदधद्वाक्यं भिद्येतैव न संशयः ॥ (1734)

ब्रह्मार्पणमिति वचो यथोक्तेनैव वर्त्मना ।
निर्धारितार्थं जानीयात् स्फुटन्यायसमाश्रयात् ॥ (1735)

पूर्वाभ्यामन्य एवायं तृतीयश्चेत्समुच्चयः ।
श्रुतौ स्मृतौ वा लोके वा सिद्धश्चेदस्तु नान्यथा ॥ (1736)

तस्मादसदिदं गीतमात्मानमिति यद्वचः ।
तत्समुच्चयसिद्ध्यर्थमित्येतच्चोक्तयुक्तितः ॥ (1737)

* कार्यलिङ्गसमुच्छित्तिः फलं नाद्यसमुच्चितेः ।
युक्त्या कल्पयितुं शक्यं श्रुतिवाक्यविरोधतः ॥ (1738)

---

[1]एतत् स्पष्टयति—**एवंविधस्येति** । (1734) 'ब्रह्मार्पणं ब्रह्म हविः' (भ. गी. 4-24) इत्यादिस्मृतिः [2]एवंविधकर्मणि मान (मित्यर्थः) [म्] इत्यत्राह—**ब्रह्मार्पणमिति** । (1735) एवं [3]समुच्चयद्वये निर(स्त)[स्ते] कर्मणात्मविद्यायाः समुच्चयः तृतीयः स्यात्, इति शङ्कते—**पूर्वाभ्यामिति** । मानाभावेन दूषयति—**श्रुताविति** । [1736] [4]उपसंहरति—**तस्मादिति** । [1737]

देहद्वयनाशस्य आद्यसमुच्चयफलत्वनिरासः

देहद्वयनाशस्य आद्यसमुच्चयफलत्व[5]मङ्गीकृत्योक्तम् । इदानीं तदपि न युक्तम्, इत्याह—**कार्येति** । स्थूलशरीरं **कार्यमिति** यावत् । [1738] श्रुति-

---

1. **एतत् स्पष्टयति**—वाक्यभेददोषवत्त्वं स्पष्टयति ।
2. **एवंविधकर्मणि**—कर्त्रादिविभागरहितकर्मणि ।
3. **समुच्चयद्वये**—सूत्रात्मोपासननित्यादिकर्मसमुच्चयः सूत्रात्मोपासनाख्यकर्मणः अद्वैतोपासनया समुच्चयः इत्येवं समुच्चयद्वये ।
4. **उपसंहरति**—आत्मानमेवेति वाक्यस्य समुच्चयसाधकत्वनिरासमित्यादिः ।
5. **अङ्गीकृत्योक्तमिति** दूषणमिति शेषः ।

* **लिङ्गं**—सूक्ष्मशरीरम् ।

द्वैतैकत्वात्मविज्ञानकर्मानुष्ठायिनः पितुः ।
* पुत्रे न्यस्तात्मभारस्य मरणात्परतः फलम् ॥ (1739)

पृथिव्यै चैनमित्यादि त्यन्नात्मावाप्तिलक्षणम् ।
श्रूयते स्पष्टवचनं देहादेर्नाशनं कुतः ॥ (1740)

न चाप्यतिक्रमार्थत्वं जय्य इत्यस्य युक्तिमत् ।
* तस्याऽऽविशतिवाक्येन विरोधादेव कारणात् ॥ (1741)

मतं त्यन्नात्मसंप्राप्तेरूर्ध्वं भोगस्य भुक्तितः ।
* सामर्थ्यात्कल्प्यते कार्यं प्राणानां नाशनं पितुः ॥ (1742)

नैवं स्यात् ब्रह्मबोधस्य निष्फलत्वप्रसङ्गतः ।
विद्याफलस्य संप्राप्तेः प्रागपि ब्रह्मबोधतः ॥ (1743)

विरोधं विशदयति–**द्वैतेति** । 'पृथिव्यै चैनमग्नेश्च दैवी वागाविशति' [बृ. 3·5-18] इत्यादिवचनं (त्प)[त्य] न्नावाप्तिलक्षणसूत्रात्मप्राप्तिगमकं श्रूयते इत्यर्थः । **देहादेर्नाशनं** फलं कुतः इति [1]व्यवहितेन संबन्धः । [1739-1740] 'पुत्रेणैवायं लोको जय्यः' [बृ. 3-5-16] इत्यत्र [जय्य] शब्दस्यातिक्रमार्थत्वात् आद्यसमुच्चयानुष्ठातुः लोकत्रयातिक्रमवत् देहद्वयनाशोऽपि फलं स्यात्, इत्यत आह—**न चेति** । [1741] देहद्वयनाशस्य साक्षादाद्यसमुच्चयफलत्वाभावेऽपि प्रणा[2]ड्या तत्फलत्वं स्यात्, इति शङ्कते—**मतमिति** । [1742] दूषयति—**नैवमिति** । [1743]

---

* **पुत्रे न्यस्तात्मभारस्येति** कृतसंप्रत्तिकर्मणः इत्यर्थः ।

1. **व्यवहितेन संबन्ध इति** 'देहादेर्नाशनं कुतः' (वा. 1740) इत्यत्र नाशनपदोत्तरं 'मरणात्परतः फलम्' (वा. 1739) इति वार्तिकस्थफलपदस्य संबन्ध इत्यर्थः ।

* **आविशतिवाक्येन**—'अग्नेश्च दैवी वागाविशति इति' वाक्येन । तथा च जय्यशब्दस्य आप्त्यर्थकत्वमेव नातिक्रमार्थत्वमिति भावः ।

2. **प्रणाड्या**—सूत्रात्मतां प्राप्तस्य भुक्तभोगतया, भोगार्थं देहस्थितेरयोगात् देहनाशः इत्येवं परम्परयेत्यर्थः ।

* **प्राणानां नाशनं पितुः**—पितुः- प्रजापतेः प्राणानां—प्राणप्रधानशरीरस्य नाशनं—नाशः कार्यं कल्प्यते इत्यर्थः ।

संसारानर्थनाशो हि विद्यायाः प्रार्थ्यते फलम् ।
विद्यामृतेऽपि तच्चेत्स्यात् ध्रुवं विद्या निरर्थिका ॥ (1744)

ध्वान्तनाशोऽथ विद्यायाः कार्यं चेदभिधीयते ।
सर्वानर्थस्य नष्टत्वात् किमन्यत्स्यात् तमोहृतेः ॥ (1745)

उत्खातदन्तोरगवत् अविद्या किं करिष्यति ।
विद्यमानापि विध्वस्ततीव्रानर्थपरम्परा ॥ (1746)

कामकर्मादिविध्वस्तौ नाविद्याऽनर्थभुक्तये ।
प्रतीचोऽलमृते कार्यं कारणं न हि कारणम् ॥ (1747)

विद्यमाना पुनः कामं कर्म चापि प्रवर्तयेत् ।
अविद्येति मतं चेत्स्यात्, नैवमप्युपपद्यते ॥ (1748)

संसारनिवृत्तेर्धीफलत्वात् कथं विद्यानिष्फलत्वम्, अत्राह—**संसारेति** । देह[1]-द्वयपूर्वकत्वात्संसारस्येत्यर्थः । [1744] ज्ञानस्याज्ञानहानिः फलान्तरमस्ति, इति शङ्कते—**ध्वान्तेति** । अज्ञाननिवृत्तिरनर्थनिवृत्तेर्हेतुत्वेन फलं, न स्वरूपेण, इति परिहरति—**सर्वेति** । [1745] स्थिताविद्यायाः संसारोत्पादकत्वात् [2]तन्नाशेन भवितव्यम्, अत्राह—**उत्खातेति** । (1746) अत्र हेतुमाह—**कामेति** । कामकर्मादिकार्यमृते अविद्याख्यं कारणं न हि कारणं—[3]कार्यं नोत्पादयतीत्यर्थः । (1747) स्थिताविद्या नष्टं कामादि उत्पादयति । अतस्तन्नाशेन भवितव्यम्, इति शङ्कते—**विद्यमानेति** । दूषयति—**नैवमिति** । (1748) [4]एतत् स्पष्टयति—

---

1. **देहद्वयपूर्वकत्वात्संसारस्येति** 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति श्रुतेरिति भावः ।
2. **तन्नाशेन**—अविद्यानाशेन । अतः विद्याया न निरर्थकत्वमिति भावः ।
3. **कार्यं नोत्पादयति**—भोगं नोत्पादयति ।
एवमुत्तरत्रापि ।
4. **एतत् स्पष्टयति**—अविद्यायाः नष्टकामाद्युत्पादकताया अनुपपन्नत्वं स्पष्टयति ।

अविद्या विद्यमाना चेच्छक्तोत्पादयितुं बलात् ।
नाशकद्रक्षितुं नाशात् कथं ते कामकर्मणी ॥ (1749)

अथ कारणसंसर्गो नाशशब्देन भण्यते ।
सर्वान्प्रत्यविशिष्टत्वात् फलं तन्न समुच्चितेः ॥ (1750)

तस्मात्संघातविध्वंसो निर्युक्तिक इहोच्यते ।
इह सत्यपि संमोहे संघातश्चेद्विशीर्यते ॥ (1751)

देहहेत्वन्तराभावाद् भूयोऽपि विफलैव धीः ।
आनर्थक्यं ब्रह्मधियः न च युक्तं कथं चन ।
निःशेषोपनिषत्काण्डनैरर्थक्यप्रसङ्गतः ॥ (1752)

अपि च ध्वस्तनिःशेषकार्यप्राणादिसाधनः ।
श्रवणादि कथं कुर्यात् ब्रह्मविद्योपलब्धये ॥ (1753)

अविद्येति । (1749) कामादेः सावशेषनाशस्य आद्यसमुच्चयफलत्वात् अविद्यायां सत्यां, पुनः कामादिः स्यात् । अतः तन्नाशेन भाव्यम्, इत्याह—अथेति । [1]तादृशनाशस्य सुप्त्यादौ सर्वेषां स्वतः [2]सि(द्धि)[द्धे]र्नैवम्, इत्याह—सर्वान्प्रतीति । (1750) कामादेः निरन्वयनाशः तर्हि समुच्चयफलम्, इत्याह—अथेति । (1751) [3]भाषितदोषेण दूषयति—देहेति । (1752)

ध्वस्तदेहद्वयस्य अन्तरालावस्थस्य

श्रवणाद्यनुष्ठानमिति परोक्तेरयुक्तता

ध्वस्तदेहद्व(ये)[य]स्य अन्तरालावस्थस्य श्रवणाद्यनुष्ठानं परेणोच्यमानमपि न युक्तम्, इत्याह—अपि चेति । (1753) आद्यसमुच्चयकर्तुः वैराग्यविवक्षया

---

1. तादृशनाशस्य—सावशेषकामादिनाशस्य ।
2. नैवं—नाद्यसमुच्चयफलत्वम् ।
3. भाषितदोषेण—पूर्वोक्तेन विद्यानैरर्थक्यदोषेण ।

वैराग्यातिशयार्थत्वात् गौणं चेन्नाशनं मतम् ।
स्वव्याख्यानविरोधित्वान्नैवमप्युपपद्यते ॥ (1754)

अत्रैव संनिमज्जन्ति प्राणाः सर्वे स्वकारणे ।
मृतः शेते स आध्मातो जीवतैतद्विरुध्यते ॥ (1755)

फलं चैतत्त्वयैवोक्तं प्रथमायाः समुच्चितेः ।
तस्मान्न जीवतो वाच्यं गौणं विशरणं त्वया ॥ (1756)

अत्रैवेति फलं चोक्त्वा प्रथमायाः समुच्चितेः ।
व्युत्थितस्याखिलाद्भोज्यान्नाममात्रावशेषिणः ॥ (1757)

परमात्मापरिज्ञानमात्रयाऽनाप्तनिर्द्वयः ।
ब्रह्मविद्याऽत आरब्धा ब्रह्माविद्यानिवृत्तये ॥ [1758]

लिङ्गवियोगस्य गौणस्य मतत्वात् श्रवणाद्युपपत्तिः, इति शङ्कते—वैराग्येति । दूषयति—स्वव्याख्यानेति । (1754) [1]विरोधं दर्शयितुं [2]तदीयव्याख्यानमाह—अत्रेति । विरोधमाह—जीवतेति । देहद्वयवता सह [3]तदुक्तं फलं विरुध्यते इत्यर्थः । (1755) प्राणानां स्वकारणे निमज्जनं न प्रथमसमुच्चयफलम्, अत्राह—फलं चेति । फलितमाह—तस्मादिति । (1756) विद्वत्प्राणानामात्मनि मज्जनेऽपि तस्य भोज्यविशिष्टत्वात् लिङ्गभङ्गस्य गौणत्वम्, अत आह—अत्रेति । 'अत्रैव सम[व]नीय[न्ते]' इत्यादिना आद्यसमुच्चितेः [4]आत्यन्तिकनाशं फलमुक्त्वा, [5]तस्य भोज्याद् व्यावृत्तस्य संज्ञामात्रशेषिणः ब्रह्मापरिज्ञानरूपाविद्यया अना(प्ति)-[प्त]मिव निर्द्वयं ब्रह्म । अतोऽविद्याहान्यर्थं विद्याऽरब्धव्येति त्वदीयमिदं [6]पञ्चमे वृत्तं व्याख्यानम् । तेन विरुद्धं देहद्वयवतो देहादिसंघातस्य गौणं वि(चा)[श]

---

1. विरोधं—स्वव्याख्यानविरोधम् ।
2. तदीयव्याख्यानं—पञ्चमाध्यायस्थं भर्तृप्रपञ्चव्याख्यानम् ।
3. तदुक्तं फलं—प्राणानामात्मनि मज्जनं त्यक्तप्राणस्य स्थूलदेहस्य आध्मानं च ।
4. आत्यन्तिकनाशं—आत्यन्तिकं देहनाशम् ।
5. तस्य—विदुषः ।
6. पञ्चमे—पञ्चमाध्याये ।

एतत्त्वदीयं व्याख्यानं, तद्विरुद्धमिदं वचः ।
संघातस्य विशरणं जीवतश्चेति दुःस्थितम् ॥ (1759)

* निषिद्धषड्विकारस्य श्रुत्यैव परमात्मनः ।
अविद्या तद्विकारश्च न युक्तस्तूषरादिवत् ॥ (1760)

हिरण्यगर्भद्वारैव मुक्तिरित्यपि यद्वचः ।
* तस्यापि दूषणं ज्ञेयं यथोक्तन्यायवर्त्मना ॥ (1761)

हिरण्यगर्भवद्यस्मात् क्रिम्यादेरपि संगतिः ।
ब्रह्मात्मलक्षणाऽसाध्वी तेनेयं कल्पना कृता ॥ (1762)

रणमितीदं वाक्यम् । अतो दुर्घटं विशरणस्य गौणत्वमित्यर्थः । (1757–1758–1759)

ऊषरप्रदेशस्य यथा सलिलं विकारः, तथा अविद्या परस्य विकारः, इति [1]इतरे कल्पयन्ति । तदप्ययुक्तम्, इत्याह—**निषिद्धेति** । (1760)

सूत्रान्तपदमात्रस्यैव कैवल्यमिति, यत्तदीयं कल्पनं, तदपि दूषयति—**हिरण्यगर्भेति** । (1761) उक्तं न्यायं प्रकटयति—**हिरण्यगर्भवदिति** । ब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञस्य ब्र(ह्मा)[ह्म]तादात्म्यमविशिष्टं, तत्त्वमादिशास्त्रेभ्यः । अतोऽसाध्वी

---

1. इतरे—भर्तृप्रपञ्चाः ।

* "किञ्च आत्मनः श्रुत्या निर्विकारत्वनिश्चयात् अविद्यया तज्जकामादिना च वस्तुतोऽयोगात् विद्यया निरवशेषस्य मुख्यस्यैवाविद्यादिनाशस्य संभवात् गौणपक्षस्यायुक्ततेत्याह—**निषिद्धेति** अवधारणार्थः तुशब्दः । आत्मनः वस्तुतः अविद्यातज्जायोगे दृष्टान्तमाह—**ऊषरेति** । यथा ऊषरादेरुदकाद्यारोपविषयस्य वस्तुतो नोदकादियोगः तथा आत्मनोऽपि वस्तुतो नाविद्यादिसंगतिः अस्थूलादिश्रुत्या निर्विकारत्वनिर्णयादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

* 'तद्यो यो देवानां प्रत्यबुध्यत' इत्याद्युक्तमभिप्रेत्य, 'यथोक्तन्यायवर्त्मना' इत्युक्तमिति **शास्त्रप्रकाशिकाकाराः** ।

* संसारिताऽविशिष्टैव मोक्षादर्वाक्षु भूमिषु ।
ब्रह्मा विश्वसृजो धर्म इत्यादिवचनान्मनोः ॥ (1763)

विद्यां चेत्यादिमन्त्रोऽपि न समुच्चयबोधकः ।
परस्परविरोधित्वान्न सहावस्थितिस्तयोः ॥ (1764)

क्त्वायोगात्पूर्वकालत्वमविद्यायाः प्रतीयते ।
स्वाभाविकं कर्म मृत्युः विद्या शास्त्रीयमुच्यते ॥ (1765)

कल्पनेत्यर्थः । (1762) सूत्रादर्वाचीनजीववर्गस्य अविद्याकार्यसंसारपारतन्त्र्यात् न[1] तत्र मुक्तिः, अत आह—संसारितेति । (1763)

'विद्यां च,' 'संभूतिं च' इति मन्त्रयोः समुच्चयबोधकत्वाभावः

'विद्यां च' (ईश. 11) इत्यादिमन्त्रस्य [2]समुच्चयप्रकाशकत्वात् [3]उभयविधफललाभः, अत्राह—विद्यां चेति । (1764) परस्परविरोधित्वमसिद्धं, 'यस्तद्वेदोभयं सह' (ईश. 11) इति [4]सहश्रु(ति)[तेः,] अत्राह—क्त्वायोगादिति । 'तीर्त्वा' इति क्त्वायोगात् 'समानकर्तृकयोः पूर्वकाले' (क्त्वा) इति (पा. 3-4-21) [5]तद्विधेः, [6]अविद्यायाः विद्यातः पूर्वकालत्वमित्यर्थः । विद्याविद्ययोरसमुच्चयेऽपि

---

1. न तत्र मुक्तिः—न सूत्रादर्वाचीनभूमिषु मुक्तिः ।

* अविशिष्टैवेति मनुवचनात् हिरण्यगर्भपदस्यापि धर्मफलत्वावगमात् तस्यापि संसारपारतन्त्र्यमिति न विशेष इत्यर्थः ।

2. समुच्चयप्रकाशकत्वात्—व्याकृताव्याकृतोपासनासमुच्चयप्रकाशकत्वात् ।

3. उभयविधफललाभः—सूत्रातिः, कैवल्यश्चेति फलद्वयलाभः । 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति वाक्यस्य, द्वैतैकत्वोपासनात्मिकया अविद्यया मृत्युं कामकर्मादिलक्षणं तीर्त्वा, विद्या—अद्वैतोपासनया अमृतं कैवल्यमाप्नोति इत्यर्थं वर्णयन्ति भर्तृप्रपञ्चाः । तत्र सूत्रपदप्राप्त्या सूत्रोपासनेन कामादिध्वस्तिः । तथाच सूत्रातिकैवल्यरूपोभयविधफलं समुच्चयात् सिद्ध्यतीति भावः ।

4. सहश्रुतेः—साहित्यार्थकसहशब्दश्रवणात् ।

5. तद्विधेः—क्त्वाप्रत्ययविधानात् ।

6. अविद्याया इति तीर्त्वा इति क्त्वाप्रत्ययेन अविद्याकृतमृत्युतरणस्य विद्यातः पूर्वकालिकत्वबोधनेन अविद्याया अपि विद्यापूर्वकालीनत्वं लभ्यते इति भावः ।

मृत्युः स्वाभाविकं ज्ञानं शास्त्रीयं संभवस्तथा ।
शास्त्रीयेणेतरत्तीर्त्वा विद्ययाऽमृतमश्नुते ॥ (1766)

धीकर्मणोः समुच्चयः स्यात्, इत्याशङ्क्य, [1]मन्त्रं व्याचष्टे—**स्वाभाविकमिति** । 'अविद्यया मृत्युम्' इत्यत्र विहिताकरणं निषिद्धकरणञ्च मृत्युः, [2]तद्धेतुत्वात् । 'विद्यां चाविद्याञ्च' इत्यत्रापि शास्त्रीयं कर्म विद्या, [3]शुद्धिद्वारा तद्धेतुत्वात् । स्वाभाविकं कर्म [4]मृत्युपदोदितमविद्या । निवर्त्यनिवर्तकभावेन सहभाववचनम् । तत्र अवि(द्या)[द्य]या—[5]पूर्वत्र विद्याशब्दोदितया, मृत्युं—पूर्वत्र अविद्याशब्दोदितं, अतिक्रम्य, केवलब्रह्मविद्यया कैवल्यमाप्नोतीत्यर्थः ।

'संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते' ॥ (ईश. 14)

इत्यस्मिन् मन्त्रे मृत्युः—निषिद्धं नग्नाङ्गनादिदर्शनमुच्यते । विनाशशब्देन शास्त्रीयं हिरण्यगर्भाद्युपासनम् । तत्रापि, सहभावः निवर्त्यनिवर्तकभावेन । विनाशेन—सूत्राद्युपासनेन पूर्वत्र संभूतिशब्दोदितेन, मृत्युं तीर्त्वा—अतिक्रम्य, संभूत्या—केवलब्रह्मविद्यया, अमृतमश्नुते । अतो न समुच्चयावकाश इत्यर्थः । (1765-1766)

---

1. **मन्त्रं**—'विद्यां चाविद्यां च' इति मन्त्रम् ।
2. निषिद्धकरणादेः मृत्युत्वोपचारे निमित्तमाह—**तद्धेतुत्वादिति** ।
3. कर्मणः विद्यात्वोपचारे हेतुमाह—**शुद्धिद्वारेति** ।
4. **मृत्युपदोदितं**—'अविद्यया मृत्युं तीर्त्वा' इत्यत्र मृत्युपदेनोक्तम् ।
5. **पूर्वत्रेति** 'विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ।' इति पूर्वार्धे इत्यर्थः । एवमुत्तरत्रापि । यः विद्यां—शास्त्रीयं कर्म, अविद्याञ्च—स्वाभाविकं कर्म च, उभयं सह—निवर्त्यनिवर्तकभावेन सहितं वेद । सः अविद्यया—शास्त्रीयकर्मणा, मृत्युं—स्वाभाविकं कर्म तीर्त्वा—अतिक्रम्य विद्यया —अद्वैतात्मतत्त्वधिया, अमृतमश्नुते इति निष्कृष्टः मन्त्रार्थो बोध्यः । 'संभूतिं च विनाशञ्च' इति मन्त्रस्यायं निष्कृष्टोऽर्थ उच्यते । यः संभूतिं—शास्त्रीयं सूत्राद्युपासनं, विनाशञ्च–निषिद्धनग्नाङ्गनादिदर्शनञ्च सह—निवर्त्यनिवर्तकभावेन सहितं वेद । सः विनाशेन—सूत्राद्युपासनेन मृत्युं—अशास्त्रीयदर्शनं तीर्त्वा, संभूत्या—अद्वैतब्रह्मविद्यया अमृतमश्नुते । इति ॥

नाविरतो दुश्चरितादिति चागमिकं वचः ।
तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥ (1767)

तस्मात्समुच्चयाशेह कार्या नाक्षरसंश्रयात् ।
अप्रमाणं ब्रुवाणस्तु नास्माभिर्विनिवार्यते ॥ (1768)

* तस्मादुत्थाय कर्मभ्यः प्रत्यक्प्रवणबुद्धयः ।
प्रत्यग्याथात्म्यविज्ञानान्निर्वान्तीत्येष निश्चयः ॥ (1769)

'अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ॥' (1770)

न चेह लोकशब्देन कश्चिदन्योऽभिधीयते ।
परात्मनः स्वशब्देन विशेषणसमन्वयात् ॥ (1771)

सर्वकर्मत्यागिनः शुद्धसत्त्वस्य ज्ञानोत्पत्तिवाक्याच्च न समुच्चयः, इत्याह—**नेति** ।

'नाविरतो दुश्चरितात् नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥' (का. 1 - 2 - 24)

इत्यादि श्रौतं वच इत्यर्थः । (1767) समुच्चयनिरासमुपसंहरति—**तस्मादिति** । (1768) स्वपक्षं निगमयति—**तस्मादुत्थायेति** । (1769) अत्र पुराणसंमतिमाह—**अपुण्येति** । (1770)

'आत्मानमेव लोकमुपासीत' इत्यत्र कर्मफलभूतो हिरण्यगर्भो लोकः इत्यस्यायुक्तता

'आत्मानमेव' इत्यत्र कर्मफलभूतो हिरण्यगर्भो लोकः इत्युक्तम् । तदयुक्तम्, इत्याह—**न चेति** । 'स्वं लोकमदृष्ट्वा' इ(पि)[ति] स्वशब्दार्पितविशेषणेन संबन्धात् लोकशब्दार्थस्य, [1]तत्र [2]लोकशब्दः परः प्रकृत इति स एवा[3]त्र ग्राह्यः ।

---

* 'तस्माद् व्युत्थाय' इति मु. पु. पाठः।

1. तत्र—'स्वं लोकमदृष्ट्वा' इत्यत्र ।

2. लोकशब्दः—लोकशब्दबोध्यः ।

3. अत्र—'आत्मानमेव लोकमुपासीत' इति वाक्ये ।

आत्मानमेवेति तथा चात्मशब्दो विशेषणम् ।
लोकस्य ग्रहणं तस्मान्न कर्मसमवायिनः ।। (1772)

विद्याप्रकरणे चोर्ध्वमात्मनैव विशेषणात् ।
येषां नो ह्ययमात्मेति कार्यलोकनिवृत्तये ।। (1773)

अस्माद्ध्येवेति लिङ्गाच्चेल्लोकोऽन्यः स्यात्परात्मनः ।
स्वलोकस्यार्थवादत्वान्नैवमप्युपपद्यते ।। (1774)

साधनान्तरसंभाव्यं यावत्संभाव्यते फलम् ।
कृत्स्नं तदात्मनो लोकात् सिद्धमस्येति नूयते ।। (1775)

अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गादित्यर्थः । (1771) हेत्वन्तरमाह—**आत्मानमिति ।** स्वशब्दपर्यायेण आत्मशब्देन लोकस्य विशेषितत्वादित्यर्थः । (1772) लोकशब्देनात्र परस्य ग्रहे हेत्वन्तरमाह—**विद्येति** । [1]षष्ठे, 'स वा एष महान्' (बृ. 6 - 4 - 22) इत्यादिविद्याप्रकरणे 'येषां नोऽयमात्मायं लोकः' (बृ. 6 - 4 - 22) इत्यात्मशब्दार्थेन लोकस्य [2]कर्मफलनिवृत्त्यर्थं विशेषणात् [3]अत्रापि स एव ग्राह्यः । अन्यथा पूर्वापरव्याघातादित्यर्थः । (1773) लोकशब्देन परग्रहे '[4]अस्माद्ध्येव' इति काम्यफलोत्पत्तिश्रवणमयुक्तं स्यात् परात्मनो निर्विकारत्वात्, इति शङ्कते—**अस्मादिति** । अन्या[5]र्थदर्शनं न्यायरहितं दुर्बलं प्रकरणात्, इति परिहरति—**स्वलोकस्येति** । (1774) [6]अर्थवादत्वं साधयति—**साधनान्तरेति** । नूयते —[7]स्तूयते इति यावत् । [1775] विदुषो ज्ञानात्

---

1. **षष्ठे**—षष्ठाध्याये ।
2. **कर्मफलनिवृत्त्यर्थं**—कर्मफलस्य लोकशब्दार्थतावारणायेति यावत् ।
3. **अत्रापि**—'आत्मानमेव लोकम्' इति वाक्येऽपि ।
4. **अस्माद्ध्येवेति** 'अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत् सृजते' इति वाक्येनेति यावत् ।
5. **अन्यार्थदर्शनं**—अर्थवादः ।
6. **अर्थवादत्वमिति** । 'अस्माद्ध्येव' इति वाक्यस्येत्यादिः ।
7. **स्तूयते इति** स्वलोकः स्तूयते इत्यर्थः ।

योऽकाम इति वाक्येन ह्ययमेवार्थ उच्यते ।
सर्वं कर्माखिलमिति स्मृतेरपि शुभं वचः ॥ (1776)

यद्यकृत्स्नोऽपरिज्ञानात् ज्ञानात्कात्स्न्यं समश्नुते ।
आत्मशब्दप्रयोगोऽयं तदा लोके समञ्जसः ॥ (1777)

अन्यथाऽव्याकृतावस्थाल्लोकादिति वदेच्छ्रुतिः ।
ब्रह्मलोकनिरासार्थं वचः स्यात्सविशेषणम् ॥ (1778)

नान्यस्मिन् प्रकृतेऽन्योऽर्थो विरह्य्य विशेषणम् ।
ग्रहीतुं सुधिया शक्यः वैश्वानरवरादृते ॥ (1779)

उक्तेन वचसा तावत्स्वाराज्यं विदुषोऽवदत् ।
कथं नूपकरोत्यज्ञो देवादीनिति भण्यते ॥ (1780)

सर्वफलाप्तौ शास्त्रान्तरसंवादमाह—**य इति** । 'योऽकाम आप्तकाम आत्मकामः' [बृ. 6-4-6] इत्यादिनेत्यर्थः । [1776] प्रकरणात् परमात्मग्रहमुक्त्वा, [1]तत्र लिङ्गमाह—**यदीति** । आत्मशब्देना[2]परिच्छिन्नार्थेन समानाधिकृतलोकशब्दवाच्यः पर एवेत्यर्थः । [1777] यदि परो न गृह्यते, तदा विशेषणं वाच्यम्, इत्याह—**अन्यथेति** । अव्याकृतावस्थादिति विशेषणं कुतो वाच्यम्? अत्राह—**ब्रह्मेति** । 'स्वं लोकम्' इति प्रकृतपरमात्मलोकनिवृत्त्यर्थमित्यर्थः । [1778] विशेषणं विनैव 'अस्मात्' इत्यत्र परस्माद(न्यः)[न्य]ग्रहणं किं न स्यात्, अत्राह—**नान्यस्मिन्निति** । [1779]

षोडशकण्डिकार्थनिरूपणम्

अविदुषः देवाद्युपकारनिरूपणम्

'आत्मानम्' इत्यत्र परग्रहणमुक्त्वा वृत्तं संकीर्तयति—**उक्तेनेति** । आत्मविदः '[3]अस्मात्' इत्यनेन कैवल्यमुक्तमित्यर्थः । उत्तरतात्पर्यमाह—

---

1. **तत्र लिङ्गं**—लोकशब्देन परमात्मग्रहणे लिङ्गम् ।
2. **अपरिच्छिन्नार्थेनेति** आत्मशब्दस्य अपरिच्छिन्नार्थता 'यच्चाप्नोति' इत्यादि—वाक्येनोपपादिता अनुसन्धेया ।
3. **अस्मादित्यनेन**—'अस्माद्ध्येवात्मनो यद्यत्कामयते, तत्तत्सृजते' इति वाक्येन ।

वर्णाश्रमाभिमानी सन्नतत्त्वज्ञः पराङ्मतिः ।
कानेषोऽवति पशुवत् कर्मभिः कैश्च सर्वदा ॥ (1781)

सर्वेश्वरेशिता तावत्पूर्वश्रुत्योपवर्णिता ।
यथा त्वज्ञस्य पारार्थ्यं तथेदानीं प्रपञ्च्यते ॥ (1782)

अज्ञातात्मा ह्यविद्योत्थसंघातो देहलिङ्गवान् ।
आत्मलोकाभिधानाभ्यां देहान्तोऽत्राभिधीयते ॥ (1783)

यागादि कार्यं देवादेः देहलिङ्गद्वयादृते ।
नान्यथा युज्यते यस्मादतस्तद्वानिहोच्यते ॥ (1784)

कर्मणा नार्जितो यस्मान्न कश्चिदुपकारकृत् ।
गृही देवादिभिस्तस्मादार्जितोऽभूत्स्वकर्मभिः ॥ (1785)

कथमिति । अज्ञः कथं देवादीन् प्रत्युपकुर्यादित्येतदर्थः '[1]अथो[अ]यम्' इत्यादिः परो ग्रन्थ इत्यर्थः । [1780] [2]उत्तरार्धं विशदयति—**वर्णेति** । [1781] प्रतिपत्तिसौकर्यार्थं विस्तरेणोक्तं संक्षिप्य, आह—**सर्वेश्वरेति** । विदुषो हिरण्यगर्भादौ स्वातन्त्र्यमुक्तम् । अज्ञस्य पारतन्त्र्यमुच्यते इत्यर्थः । (1782) तात्पर्यमुक्त्वा आत्मलोकशब्दार्थमाह—**अज्ञातेति** । (1783) अविद्वान् अविद्याकार्यदेहद्वयवान् [3]अत्र शब्द[4]द्वयवाच्यः, इत्युक्तार्थे हेतुमाह—**यागादीति** । (1784) [5]एवंविधस्य सर्वप्राणिभोग्यत्वं कुत इति, [6]तत्कर्मोपार्जितत्वात्, इत्याह—**कर्मणेति** । (1785) देवादीनां वृष्टिद्वारोपकारकत्व[म][7]कर्मोपार्जितानाम् । अतो

---

1. **अथो अयमित्यादिरिति** 'अथो अयं वा आत्मा सर्वेषां भूतानां लोकः' इत्यादिः ग्रन्थः ।
2. **उत्तरार्धमिति** 'उक्तेन' इति वार्तिकस्य उत्तरार्धं 'कथं नूपकरोत्यज्ञः देवादीनिति भण्यते' इति भागमित्यर्थः ।
3. **अत्र**—'अथो अयं वा' इत्यादिवाक्ये ।
4. **शब्दद्वयवाच्यः** — आत्मशब्दस्य लोकशब्दस्य च वाच्यः ।
5. **एवंविधस्य**—स्थूलसूक्ष्मदेहद्वयवतः अज्ञस्य ।
6. **तत्कर्मोपार्जितत्वात्**—सर्वप्राणिकर्मोपार्जितत्वात् ।
7. **अकर्मोपार्जितानाम्**—अस्मत्कर्मानुपार्जितानाम् ।

देवादयोऽपि गृहिणा तद्वदेव स्वकर्मभिः ।
आर्जिता एव विज्ञेयास्तन्निमित्तफलेक्षणात् ॥ (1786)

कर्त्रेह यत्कृतं कार्यं तद्भोगायावकल्पते ।
अकृताभ्यागमो यस्मात् कृतनाशश्च नेष्यते ॥ (1787)

कर्तृत्वं चास्याविद्यातो न स्वतः कर्तृताऽऽत्मनः ।
* कर्तेव भोक्ताप्यज्ञः स्यात् विद्यायां द्वयमप्यसत् ॥ (1788)

अभुक्तस्याप्युपात्तस्य ह्यविद्यापिहितात्मनाम् ।
आत्मयाथात्म्यविज्ञानात्कर्मणोऽतः क्षयो भवेत् ॥ (1789)

* सर्वः सर्वस्य कार्यं स्यात् सर्वः सर्वस्य कारणम् ।
असंहतं मिथो नालं जडं वस्तु प्रवर्तितुम् ॥ (1790)

---

[1]व्यतिरेकोऽसिद्धः, अत्राह—देवादयोऽपीति । (1786) यत् यस्योपकारकं तत् तत्कर्मोपार्जितमिति न व्याप्तिः, ईश्वरे व्यभिचारात्, अत्राह—कर्त्रेति । [2]तस्यापि [3]विशिष्टरूपेण कर्मार्जितत्वात् न व्यभिचार इत्यर्थः । (1787) 'कर्त्रेह यत्' इति वदता आत्मनः कर्तृत्वोपगमात् अकर्तृब्रह्मतादात्म्यश्रुतिविरोधः, अत्राह—कर्तृत्वं चेति । [4]कल्पितत्वफलमाह—विद्यायामिति । (1788) 'नाभुक्तं क्षीयते कर्म' इत्यादिस्मृतेः सत्यपि ज्ञाने कर्मफलभोगोऽवश्यंभावी, इत्यत आह—अभुक्तस्येति । अतः — ज्ञानादित्यर्थः । (1789) तत्कर्मार्जितं तदुपकारकमिति पूर्वोक्ते स्थिते, सर्वस्य सर्वत्र साक्षात् परम्परया वा उपकारकत्वात्

---

1. व्यतिरेकोऽसिद्ध इति यत् यत्कर्मानार्जितं तत् न तदुपकारकमिति व्यतिरेकः असिद्ध इत्यर्थः ।
2. तस्यापि—ईश्वरस्यापि ।
3. विशिष्टरूपेणेति स्वरूपेण तु निर्विकारस्य अनुपकारकत्वमेवेति न व्यभिचार इति बोध्यम् ।
4. कल्पितत्वफलमिति कर्तृत्वभोक्तृत्वयोरित्यादिः ।

* "द्वयोः (कर्तृत्वभोक्तृत्वयोः) आविद्यत्वे विद्यापोद्यत्वं हेतुमाह—विद्यायामिति ।" इति शास्त्रप्रकाशिका ।
* 'सर्वं सर्वस्य कार्यं स्यात् सर्वं सर्वस्य कारणम्' इति मु. पु. पाठः ।

सर्वः सर्वस्य भोक्तैव चित्प्राधान्यविवक्षया ।
बाह्योपरक्तबुद्धीनां भोगश्चिद्वसानता ॥ (1791)

मधुब्राह्मणविद्यायामिदमेव प्रवक्ष्यते ।
वस्त्वैकात्म्यप्रसिद्ध्यर्थं प्राधान्येनातियत्नतः ॥ (1792)

एवं सत्ययमात्मेति संहतो जगदात्मना ।
लोको भोज्यः पशुर्ज्ञेयः देवादेरुपकारकः ॥ (1793)

* देवादिभिरुपात्तोऽयमित्येतद् गम्यते कुतः ।
अस्यार्थस्य प्रसिद्ध्यर्थं स यदित्यादि भण्यते ॥ (1794)

यो देवतां समुद्दिश्य द्रव्यत्यागः स उच्यते ।
यागः आसेचनाधिक्याद्धोमाख्यः स्यात्स एव तु ॥ (1795)

कार्यकारणभावोऽ(प्य)[व्य]वस्थितः स्यात्, अत्राह—सर्व इति । कर्तृभोक्तृत्वनियमात् सर्वस्य भोक्तृत्वे घटादेरपि तत् स्यात्, अत्राह—चित्प्राधान्येति । को नाम भोग इति, तमाह—बाह्येति । शब्दाद्याकारज्ञानानामनुभवव्याप्तिः भोग इत्यर्थः । (1790-1791) सर्वः सर्वस्य कार्यं कारणञ्च, इत्यत्र मानमाह—मधुब्राह्मणेति । (1792) सर्व[1]स्योपकार्योपकारकत्वे, प्रकृते किं सिद्धम्, अत्राह—एवं सतीति । (1793)

'स यज्जुहोति' इत्यादिवाक्यार्थनिरूपणम्

'स [2]यज्जुहोति' इत्यत्रादौ व्याव(र्त)[र्त्य]शङ्कामाह—देवादिभिरिति । [3]तदुत्तरत्वेन वाक्यमवतारयति—अस्येति । (1794) यागहोमशब्दयोरपुनरुक्तार्थमाह—य इति । आसे(व)[च]नं—प्रक्षेपः ।

---

1. उपकार्योपकारकत्वे—उपकार्यत्वे उपकारकत्वे च ।
2. स यज्जुहोतीत्यत्र—'स यज्जुहोति यद्यजते तेन देवानां लोकः ।' इति वाक्ये ।
* गम्यते कुतः इति पूर्वोक्तमधुब्राह्मणानुमानातिरिक्तविषयशङ्का ।
3. तदुत्तरत्वेन—शङ्कोत्तरत्वेन ।

लोकत्वस्य विधेयत्वात् यज्जुहोतीत्यनूद्यते ।
नानूक्तिं केचिदिच्छन्ति देवाद्यार्जितसिद्धये ॥ (1796)
नावश्यकार्यता चैषां सिद्धाऽतोऽन्यत्र मानतः ।
नित्यत्वाद्धेतुवचनं न युक्त्याऽतोऽवगम्यते ॥ (1797)

'यजतिचोदना द्रव्यदेवता(कृयं)[क्रिया]समुदाये कृतार्थत्वात्'
(पू. मी. 4-2-27)

यजति, ददाति, जुहोति इति श्रुतया[1]गादीनां भेदो न वेति संशये, त्यागात्मत्वेनाविशेषात् नेति प्राप्ते, द्रव्यत्यागस्य यागत्वात्, तस्यैव प्रक्षेपाधिकस्य होमत्वात्, पर[2]स्वीकारपर्यन्तस्य(चानन्य)[दान]त्वात् भेदस्ते[3]षामिति स्थितमित्यर्थः । (1795) होमादेर्विधेयत्वात् कथं सिद्ध[4]वत् निर्देशः, अत्राह—**लोकत्वस्येति** । भर्तृप्रपञ्चमतमाह—**नानूक्तिमिति** । पणक्रीतदासवत् देवादिभिरार्जितेन गृहिणा देवाद्यर्थत्वेन होमादेरवश्यकार्यत्वात् [5]अत्र तद्वि[6]धीयते इत्यर्थः । (1796) दूष[7]यति—**नेति** । होमादेरत्रोच्यमानस्यावश्यकर्तव्यत्वस्य, नित्यत्वात् यावज्जीवश्रुतेः सिद्धत्वात् नात्र विधेयत्वम् । अतो देवादिभिरर्जितत्वादिति हेतुवचनमत्र अग्निहोत्रादेर्विधेयत्वे न घटते इत्यर्थः । (1797) [8]'यदनुब्रूते' इत्या-

---

1. **यागादीनां**—यागहोमदानानाम् ।
2. **परस्वीकारः** — परस्य संप्रदानस्य, स्वीकारः—ममेदं भवतु इतीच्छा ।
3. **तेषां**—यागादीनाम् ।
4. **सिद्धवन्निर्देशः** — लिङ्प्रयोगं विना 'यज्जुहोति' इति वर्तमानापदेशः । मानान्तरप्राप्तहोमादिकमनूद्य, तत्कर्तुः देवानां लोकत्वमत्र विधीयते ।
5. **अत्र**—'यज्जुहोति' इत्यादिवाक्ये ।
6. **तद्विधीयते**—होमादिकं विधीयते ।
7. **दूषयतीति** भर्तृप्रपञ्चाभिमतं अत्र वाक्ये होमादेर्विधेयत्वमित्यादिः ।
8. 'अथ यदनुब्रूते तेन ऋषीणाम्' इति वाक्येन अहरहः ब्रह्मयज्ञेन ऋषीणां लोक उच्यते ।

"अथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते, तेन पितृणाम् । अथ यन्मनुष्यान्वासयते, यदेभ्योऽशनं ददाति, तेन मनुष्याणाम् । अथ यत्पशुभ्यस्तृणोदकं विन्दति, तेन पशूनाम् । यदस्य गृहेषु श्वापदा वयांसि आपिपीलिकाभ्य उपजीवन्ति, तेन तेषां लोकः ।" इत्युत्तराणि श्रुतिवाक्यानि बोध्यानि ।

यच्चाप्यहरहर्वेदमनुब्रूते प्रयत्नवान् ।
ऋषीणां तेन लोकोऽयं गृहस्थो भोज्य उच्यते ॥ (1798)

उत्तरेष्वपि वाक्येषु समाना योजनेक्ष्यताम् ।
अक्षराणां न तत्रास्ति वस्तु किञ्चित्तिरोहितम् ॥ (1799)

यस्मात्सर्वाणि भूतानि सर्वदोपकरोत्ययम् ।
* अविनाशमतस्तानि तस्येच्छन्ति स्वदेहवत् ॥ (1800)

स्वकर्मार्जितसंभोगदायित्वेऽस्ति न कश्चन ।
देवादीनां विशेषोऽत्र गृहस्थस्वात्मदेहयोः ॥ (1801)

ब्रह्मविद्याहुताशेन विनाशेऽस्याप्यकर्तृता ।
अयं नाशो महानस्य ह्यन्यः शक्यश्चिकित्सितुम् ॥ (1802)

देरर्थमाह—यच्चेति । (1798) उक्तमन्यत्रातिदिशति–उत्तरेष्विति । (1799)

'यथा ह वै स्वाय लोकाय' इत्यादिवाक्यार्थवर्णनम्

'[1]यथा ह' इत्यादेरर्थमाह—**यस्मादिति** । (1800) 'स्वदेहवत्' इत्यत्र हेतुमाह–**स्वकर्मेति** । (1801) कर्माधिकारिणामविनाशमिच्छतां देवादीनामभिप्रायमाह–**ब्रह्मेति** । यदि ब्रह्मविद्या कर्मिणो भवति, तदा कर्तृत्वस्य नाशः । [2]स नाशो महान्, पुनः कर्तृत्वस्य संपादयितुमशक्यत्वात् । यस्तु कर्तृत्वनाशो द्रव्याद्यभावनिमित्तः, स शक्यचिकित्सः, भूयोऽपि द्रव्यार्जनेन । अतः पूर्व[3]स्मात्

---

1. **यथा ह इत्यादेरिति** "यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति ।" इति श्रुतिः ।

* 'तस्येच्छन्त्यात्मदेहवत्' इति मु. पु. पाठः ।

2. **स नाशः** — ब्रह्मविद्यानिमित्तः कर्तृत्वनाशः ।

3. **पूर्वस्मात् नाशात्**—ब्रह्मविद्यानिमित्तकर्तृत्वनाशात् ।

* अतः श्रुतिवचो न्याय्यं तस्मादेषामितीरितम् ।
मा भूत् सर्वस्वहानिर्नो ब्रह्मयाथात्म्यविद्यया ॥ (1803)

अवश्यमृणवत्कृत्यं यावज्जीवादिवाक्यतः ।
यथोक्तं विदितं वेदे तथा स्मृतिवचःसु च ॥ (1804)

अवदानविधौ तच्च विशेषेण विचारितम् ।
ऋणं हेत्यर्थवादेषु तस्मात्कुर्याद्यथोदितम् ॥ (1805)

प्रवृत्तौ च निवृत्तौ च यथोक्तस्याधिकारिणः ।
स्वातन्त्र्ये सति संसारसृतौ कस्मात्प्रवर्तते ॥ (1806)

नाशात् अधिकारिणं देवादयो रक्षन्तीत्यर्थः । (1802) अत्र[1] गमकमाह— [अतः] श्रुतीति । (1803)

'तद्वा एतद्विदितं मीमांसितम्' इति वाक्यार्थवर्णनम्

'तद्वा एतद्विदितम्' इत्यादेरर्थमाह—अवश्यमिति । आदिशब्दात्, 'अहरहर्भूतेभ्यो बलिं हरेत्' 'अहरहर्दद्यात्' 'अहरहः स्वधाकुर्यात्' 'अहरहः स्वाहाकुर्यात्' 'तस्मात् स्वाध्यायोऽध्येतव्यः' इत्यादिश्रुतिसंग्रहः । 'न कर्मणामनारम्भात्' (भ. गी. 3-4) 'कुरु कर्मैव तस्मात्त्वम्' (भ. गी. 4-15) 'तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर' (भ. गी. 3-9) इत्यादिस्मृतिश्चेत्यर्थः । (1804) 'मीमांसितम्' इत्येतत् व्याचष्टे—अवदानेति । 'हृदयस्याग्रेऽवद्यति" इत्याद्यवदानविधिः । तत्प्रकरणे, 'जायमानो वै ब्राह्मणः योऽस्ति स देवेभ्यः ऋषिभ्यः पितृभ्यो मनुष्येभ्यः' (तै. सं. 6-3-10-5) इत्याद्यर्थवादेष्वित्यर्थः । (1805)

सप्तदशकण्डिकायाः पातनिका

'आत्मैवेदम्' इत्यादेरुत्तरस्य पातनिकां करोति—प्रवृत्तौ चेति । 'आत्मेत्येवोपासीत' इति निवृत्तिमार्गः(अन्य)'[अथ]योऽन्याम्' इत्यादिप्रवृत्ति-

---

1. अत्र गमकं—देवादिभिः कर्माधिकारिणां रक्षणे ज्ञापकम् ।

* तस्मादेषामिति 'तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ।' इति वाक्यम् ।

न तु विध्वस्तनिःशेषसंसारानर्थवर्त्मनि ।
निवृत्तिलक्षणे वाच्यं केनायं प्रेर्यतेऽवशः ॥ (1807)

रक्षन्ति ननु देवास्तं न विशिष्टाधिकारिणम् ।
तेऽपि रक्षन्ति यत्नेन न च सामान्यमानुषम् ॥ (1808)

अन्यथा कृतनाशः स्यादकृताभ्यागमस्तथा ।
सामान्यनररक्षायां तस्मादेतदनुत्तरम् ॥ (1809)

नाप्यविद्येति वक्तव्यं तस्या ध्वान्तैकमात्रतः ।
मिथ्याधीमात्रहेतुत्वात् प्रेरकत्वं न युक्तिमत् ॥ (1810)

* अनर्थपरिपाकत्वमपि जानन्प्रवर्तते ।
पारतन्त्र्यमृते दृष्टा प्रवृत्तिर्नेदृशी क्वचित् ॥ (1811)

मार्गश्लोकः । उभ[1]यत्र साम[2]र्थ्यात् निवृत्तिमार्गं परित्यज्य प्रवृत्तिमार्ग एव वर्तते । [3]अत्र हेतुर्वाच्य इत्यर्थः । (1806-1807) देवादिरक्षणं [4]तत्र कारणमुक्तम्, इति शङ्कते—रक्षन्तीति । दूषयति—नेति । तेऽपि गृहस्थादिकं रक्षन्ति, न ब्रह्मचारिणं, [5]तस्य नैष्ठिकादिसर्वाश्रमसाधारण्यात् । अतः [6]तस्य नियमिनः प्रवृत्तिमार्गस्वीकारे कारणं वाच्यमित्यर्थः । (1808) स्वतन्त्रा देवादयः [7]मनुष्यमात्रे कर्मण्येव प्रवर्तयन्ति, इ(त्या)[त्यत्रा]ह—अन्यथेति । देवादिरक्षणप्रयोजककर्मणः तेन कृतत्वादित्यर्थः । (1809) आत्माविद्या नियामिका स्यात्, इत्यत्राह—नापीति । वस्त्वाच्छादनेन मिथ्याधीमात्रहेतुत्वादित्यर्थः । (1810) स्वभाववाद-माशङ्क्याह—अनर्थेति । ब्रह्महत्यादेः दुःखफलत्वं जानन्नपीत्यर्थः । (1811)

---

1. उभयत्र—प्रवृत्तिनिवृत्तिमार्गयोः ।
2. सामर्थ्यादिति सामर्थ्ये सत्यपीति यावत् ।
3. अत्र हेतुः — प्रवृत्तिमार्गे एव वर्तने हेतुः ।
4. तत्र कारणं—प्रवृत्तिमार्गाश्रयणे कारणम् ।
5. तस्य—ब्रह्मचारिणः ।
6. तस्य नियमिनः — नैष्ठिकब्रह्मचारिणः ।
7. मनुष्यमात्रे—मनुष्यसामान्यम् ।

* 'अविद्यायाः स्वरूपेणाप्रवर्तकत्वे हेत्वन्तरमाह—अनर्थेति ।' इति शास्त्र-प्रकाशिका ।

तस्माच्छ्रेयोऽर्थिनः पुंसः प्रेरकोऽनिष्टकर्मणि ।
वक्तव्यस्तन्निरासार्थमित्यर्था स्यात्परा श्रुतिः ॥ (1812)

प्राप्ताशेषपुमर्थोऽयं स्वत एवेह मानवः ।
निरस्ताशेषानर्थश्च तन्मोहाद्विपरीतधीः ॥ (1813)

अनाप्तापुरुषार्थोऽयं निःशेषानर्थसंकुलः ।
इत्यकामयतानाप्तान्पुमर्थान्साधनैर्जडः ॥ (1814)

जिहासति तथानर्थानविद्वानात्मनि श्रितान् ।
अविद्योद्भूतकामः सन्नथो खल्विति च श्रुतिः ॥ (1815)

'अकामतः क्रिया काचित् दृश्यते नेह कस्यचित् ।
यद्यद्धि कुरुते किंचित् तत्तत्कामस्य चेष्टितम् ॥ (1816)

काम एष क्रोध एष इत्यादि वचनं स्मृतेः ।
प्रवर्तको नापरोऽतः कामादित्यवसीयते ॥ (1817)

संसारफले कर्मणि प्रवर्तको हेतुः परिहाराय वाच्यः, इति फलितमाह—**तस्मादिति** । [1]एतदर्था उत्तरा श्रुतिः, इत्याह—**इत्यर्थे(इ)ति** । प्रवर्तककामप्रकाशनार्थेत्यर्थः । (1812) अप्राप्तः पुमर्थः कामोद्बोधकः, प्राप्तः तन्निवर्तकः । तस्मात् आत्मनोऽनतिशयसुखरूपस्य कुतः कामसंभवः, अत्राह—**प्राप्तेति** । (1813) विपरीतज्ञानं प्रकटयति—**अनाप्तेति** । मिथ्याज्ञानात् कामः, इत्याह—**इत्यकामयतेति** । कामस्य प्रवर्तकत्वं निगमयति—**अविद्येति** । यतः कामजन्म सा अविद्यैव प्रवर्तिका(सु)[स्तु] किं तेन, अत्राह—**अथो खल्विति** । 'अथो खल्वाहुः काममयः एवायं पुरुषः' (बृ. 6-4-5) इति श्रुतिः [2]तस्य प्रवर्तकत्वमाहेत्यर्थः । (1814–1815) [3]स्मृतिमप्याह—**अकामत इति** । कामस्य प्रवर्तकत्वमुपसंहरति—**प्रवर्तक इति** । (1816–1817)

---

1. **एतदर्था**—प्रवृत्तिमार्गे प्रवर्तककथनार्था ।
2. **तस्य**—कामस्य ।
3. **स्मृतिमपि**—मनुस्मृतिं गीतामपि । कामस्य प्रवर्तकत्वे प्रमाणतयेत्यादिः ।

प्राग्दाराद्यभिसंबन्धादेकाक्येव पुमानभूत् ।
ऊर्ध्वं दारादिसंबन्धात्पुत्रपौत्रादिसंयुतेः ॥ (1818)

विस्तारितकुटुम्बं तं कस्मैचित्कश्चिदन्तिके ।
व्याचष्टे कामसंभूतं पुत्रपौत्रादिविस्तरम् ॥ (1819)

प्राग्दारोद्वहनात् कृत्स्नं कुटुम्बं यत्प्रपश्यसि ।
आत्मैवैकः पुमानासीन्नासीत् पुत्रादि किञ्चन ॥ (1820)

आत्मप्रत्ययनिर्ग्राह्यं केवलं प्रागभूदिदम् ।
पुत्रपौत्रादिसंभिन्नं कुटुम्बं यत्प्रपश्यसि ॥ (1821)

कामाद्यशेषबीजात्माऽप्रज्ञातात्मैकतत्त्वकः ।
* सोऽतिग्रहग्रहाविष्टो विपरीतार्थनिश्चयः ॥ (1822)

स्वतःकृत्स्नोऽप्यसंबोधादकृत्स्नो विपरीतधीः ।
तृष्णया प्रहितो बालः सोऽकामयत मानवः ॥ (1823)

'आत्मैवेदमग्र आसीदेक एव' इत्यादिश्रुत्यर्थवर्णनम्

कामस्य प्रवर्तकत्वमुक्त्वा, [1]वाक्यं व्याचष्टे—**प्रागिति** । (1818) एवकारार्थं लोकप्रसिद्ध्या दर्शयति—**विस्तारितेति** । (1819) कथमिति, तदाह—**प्राग्दारेति** । दारोद्वहनात् प्राक् आत्मैव एकः इति संबन्धः । 'आत्मैव' इत्येतत् स्पष्टयति—**आत्मेति** । (1820–1821) [2]'सोऽकामयत' इत्यत्र सशब्दार्थमाह—**कामादीति** । कामादेरशेषस्य बीजं अज्ञानं, तदात्मा - तदधीन इति यावत् । कामा(त्मा)[त्म]केनातिग्रहेण आविष्ट इत्यर्थः । [1822] **विपरीतनिश्चयमेवाह—स्वत इति** । [1823] किमकामयत, तदाह—**कर्मेति** । **कर्मणि**

---

1. वाक्यं—'आत्मैवेदमग्र आसीदेक एव ।' इति वाक्यम् ।

2. सोऽकामयतेति "सोऽकामयत जाया मे स्यात् अथ प्रजायेय, अथ वित्तं मे स्यात्, अथ कर्म कुर्वीयेति, एतावान्वै कामः ।" इति श्रुतिरनुसन्धेया ।

* अतिग्रहग्रहाविष्ट इति कामाख्यः यः अतिग्रहः स एव ग्रहः, तेनाविष्ट इत्यर्थः ।

कर्माधिकारहेतुर्मे जाया स्यात्कर्मसाधनम् ।
* पूर्वपूर्वस्य हेतुत्वमथशब्दैरिहोच्यते ॥ (1824)

अथ प्रजात्मना तस्यां जायेय स्थास्नुकर्मणे ।
स पुत्रेणैवेति वचस्तथाच श्रूयते स्फुटम् ॥ (1825)

दैवमानुषवित्तेन संपन्नोऽहमथोत्तरम् ।
कर्म कुर्यां यथाप्राप्तं दृष्टादृष्टार्थसिद्धये ॥ (1826)

एतावानेव कामोऽस्य नातोऽन्योऽर्थोऽवशिष्यते ।
साध्यसाधनरूपे हि द्वे एवात्रैषणे यतः ॥ (1827)

एषणे एव चाप्येते साध्यसाधनकल्पिते ।
पुमर्थस्यानवसितेरैकात्म्यस्याप्रसिद्धितः ॥ (1828)

कर्मसाधनरूपत्वाज्जायादेर्न पुमर्थता ।
लोकत्रयासंगृहीतेरेतावानिति दुर्घटम् ॥ (1829)

स्वामित्वेन पुंसः संबन्धे(यं) कथं जाया हेतुः, अत्राह—**कर्मसाधनमिति ।** [1824] 'प्र(यो)जायेय' इत्येतदर्थमाह—**अथेति ।** अत्र मानमाह—**स इति ।** 'स पुत्रेणैवास्मिल्लोके प्रतितिष्ठति' [बृ. 3 - 5 - 17] इति श्रौतं वच इत्यर्थः । [1825] 'कर्म कुर्वीय' इत्यस्यार्थमाह—**दैवेति ।** [1826] 'एतावान्' इत्यस्य तात्पर्यमाह—**एतावानिति ।** पुत्रादिसाध्यं [1]लोकत्रयं साधनेऽन्तर्भाव्य अवधारणमित्यर्थः । हेतुमाह—**साध्येति ।** [1827] पुत्रादिना स्वर्गादिसिद्धेः कर्मण एव पुमर्थसिद्धिः, इत्याशङ्कय, मैवं, कर्मतत्साध्ययोः कामात्मत्वेनानर्थत्वात्, इत्याह—**एषणे[इ]ति ।** (1828) लोकत्रयस्य साध्यस्य पूर्वमनुक्तत्वा[त् ए]तावानिति अव[2]धारणमयुक्तम्, इति शङ्कते—**कर्मेति ।** [1829] साधनोक्तिसामर्थ्यात् साध्य-

---

* '**पूर्वपूर्वस्य हेतुत्वमथशब्दैरिहोच्यते**' **इति** अथ प्रजायेय इत्यादिवाक्यत्रयगताथशब्दैः पूर्वपूर्वस्य जायादेः उत्तरोत्तरहेतुत्वमुच्यते इत्यर्थः ।

1. **लोकत्रयं**—मनुष्यलोकः देवलोकः पितृलोकश्चेति त्रयम् ।

2. **अवधारणं**—'एतावान्वै कामः' इत्यवधारणम् ।

न, लोकत्रयसाध्यस्य साधनैकव्यपाश्रयात् ।
आक्षिप्तसाधनं साध्यमितरत्कर्म साधनम् ॥ (1830)

* लोकत्रयं फलं यस्मादुत्पत्त्याद्यात्मकं मतम् ।
कर्मानाक्षिप्य नात्मानं तच्चापि लभते स्वतः ॥ (1831)

समाप्तिः कर्मणो नापि लोकत्रयफलादृते ।
अन्तर्णीतफलं तस्मादिह साधनमुच्यते ॥ (1832)

एषणैकैव तेनेयमुत्तरत्राभिधास्यते ॥ (1833)

अर्थात्साध्याभिधानं स्यात्साधनाभिहितौ यथा ।
भोजनेऽभिहिते पुंसो ह्यर्थात्तृप्तिः प्रतीयते ॥ (1834)

साध्यसाधनरूपे द्वे एषणे काम उच्यते ।
अयथावस्तुरूपत्वादात्माज्ञानैकहेतुके ॥ (1835)

स्यार्थादुक्तत्वात् उपपन्नमवधारणम्, इति परिहरति—**नेति** । **साध्यं आक्षिप्त**[1]**-साधनं**, साध्यादितरत् कर्माख्यं साधनं आक्षिप्त[2]साध्यमित्यर्थः । [1830] **साध्य**स्याक्षिप्तसाधनत्वं [3]व्यतिरेकद्वारा उपपादयति—**लोकत्रयमिति** । [1831] (साध्यमिति) साधनेन साध्यस्याक्षेपेऽपि व्यतिरेकमाह—**समाप्तिरिति** । [1832] साध्यसाधनयोः मिथो बद्धत्वं हेतूकृत्य (मिथो) वाक्यशेषप्रवृत्तिः, इत्याह—**एषणेति** । उत्तरत्र—'[उभे ह्येते] एषणे एव' [बृ. 6-4-22] इत्यत्रेत्यर्थः । [1833] साधनोक्त्या साध्यस्यार्थो[4]क्तौ दृष्टान्तमाह—**अर्थादिति** । [1834] साध्यसाधनयोः कामात्मत्वेनानर्थत्वं श्रुतेरभिप्रायमाह—**साध्येति** । **किं तर्हि** कार्यम्, अत्राह—**व्युत्थायेति** । कर्मसंन्यासं कृत्वा धीसाधनश्रवणादिकमनु-

---

1. **आक्षिप्तसाधनम्**—साधनाक्षेपकमिति यावत् ।
2. **आक्षिप्तसाध्यं**—साध्याक्षेपकमिति यावत् ।
3. **व्यतिरेकद्वारा**—फलं विना साधनं न पर्यवस्यतीत्येवं रूपेण ।

* 'लोकत्रयफलम्' इति मु. पु. पाठः ।

4. **अर्थोक्तौ**—अर्थादुक्तौ ।

विश्वासोऽतोऽत्र विदुषा न कार्यः स्वप्नलाभवत् ।
व्युत्थायैवैषणाभ्योऽतः प्रत्यग्ज्ञानं समाश्रयेत् ॥ (1836)

इच्छन्नपि यतो नातो भूयो विन्देदतोऽधिकम् ।
तस्मादविद्याभूमिष्ठः कृत्स्न एतावता भवेत् ॥ (1837)

एकैकमपि जायादेर्यावन्नाप्नोति पूरुषः ।
अकृत्स्नस्तावदस्मीति जडः संभावयत्ययम् ॥ (1838)

यावदेते यथोद्दिष्टा आप्ताः स्युः कामपूर्वकाः ।
कृत्स्नोऽस्मीति तदात्मानं संभावयति मानवः ॥ (1839)

आत्मजायाप्रजावित्तविद्याभिः पञ्चभिः कृतम् ।
कर्म पाङ्क्तं भवेदेवं पाङ्क्तेन छन्दसा मितम् ॥ (1840)

बाह्यस्य कर्मणस्तावदात्माद्यैः पाङ्क्ततोदिता ।
* तेष्वसत्स्वथ पाङ्क्तत्वमुच्यतेऽध्यात्मकर्मणः ॥ (1841)

तिष्ठेदित्यर्थः । [1835-1836] '[1]नेच्छन्' इत्यादेरर्थमाह—**इच्छन्निति** । [1837] अविद्यावस्थायां साध्यसा[2]धनसंपूर्णपरिपूर्णः स्यात् इत्येतत्, व्यतिरेकमुखेनाह—**एकैकमिति** । [1839]

'मन एवास्यात्मा' इत्यादिश्रुतिवाक्यार्थवर्णनम्

'मन एवास्य' इत्येतदवतारयितुं भूमिकामाह—**आत्मेति** । आत्मादयः **पञ्च**, पङ्क्ति (रिति)[रपि] पञ्चा(पि)क्षरेति संख्यासाम्यादित्यर्थः । [1840][3] '**मन एव**' इत्यस्य तात्पर्यमाह—**बाह्यस्येति** । [1841] उक्तं संक्षिप्याह—**बाह्येति** ।

---

1. **नेच्छन्निति** "नेच्छंश्च न अतो भूयो विन्देत् । तस्मादप्येतर्हि एकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति । स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते ।" इति श्रुतिः ।
2. **साध्यसाधनसंपूर्णपरिपूर्णः** — साध्यसाधनसंपूर्त्या परिपूर्णः ।
3. **मन एवेत्यस्येति** "मन एवास्यात्मा, वाग्जाया, प्राणः प्रजा, चक्षुर्मानुषं वित्तं, चक्षुषा हि तद्विन्दते, श्रोत्रं दैवं, श्रोत्रेण हि तच्छृणोति, आत्मैवास्य कर्म, आत्मना हि कर्म करोति ।" इति श्रुतिः, आध्यात्मिकं कर्म ध्यानं प्रतिपादयति ।

* **अध्यात्मकर्मणः** — ध्यानकर्मणः ।

बाह्याध्यात्मिकभेदेन कर्मैतदुभयात्मकम् ।
पाङ्क्तं यथा तद्भवति तथैतदभिधीयते ।। (1842)

अध्यात्मं मन एवात्मा तदायत्तत्वकारणात् ।
वाग्जायादिप्रवृत्तीनां यजमानवदेव तत् ।। (1843)

वाक् च जायेति विज्ञेया तदधीनत्वकारणात् ।
यद्ध्यायतीह मनसा वाचा वक्ति तदेव हि ।। (1844)

संप्रधार्य मनो वाचा मन्त्रलौकिकरूपया ।
अथ प्रस्पन्दतेऽत्यर्थं सा क्रिया प्राण उच्यते ।। (1845)

आगमार्थं विनिश्चित्य मनसाथ प्रवर्तते ।
प्राणः प्रजेति तां चेष्टां प्राहुर्वेदविदो जनाः ।। (1846)

द्विधैवाध्यात्मिकं वित्तं कार्यभेदात्प्रचक्षते ।
दैवमानुषताप्यस्य साधनत्वोपचारतः ।। (1847)

[1842] अध्यात्मयज्ञे, मनसि यज[1]मानबुद्धिः कार्या, इत्याह—**अध्यात्ममिति** [1843] 'वाक् जाया' इत्येतदर्थमाह—**वाक् चेति** । [2]मनोऽधीनत्वं स्पष्टयति—**यदिति** । [1844] मनोवाक्साध्यव्यापारे प्रजाधीः कार्या, इति वक्तुं प्राण **शब्देन** [3]क्रियोच्यते, इत्याह–**संप्रधार्येति** । [1845] 'प्राणः प्रजा' इत्यस्यार्थं माह—**आगमार्थमिति** । [1846] उपासार्थमाध्यात्मिकवित्तद्वैविध्यमाह—**द्विधैवेति** । चक्षुषा रूपधीः, श्रोत्रेण शब्दधीरिति कार्यभेदादित्यर्थः । चक्षुषो मानुषत्वं, श्रोत्रस्य दैवत्वं कथं श्रुत्योक्तम्, अत्राह—**दैवेति** । चक्षुः श्रोत्रं च वित्त[4]-

---

1. **यजमानबुद्धिरिति** 'मन एवास्यात्मा' इत्यत्र आत्मशब्दार्थः यजमानः इति भावः ।
2. **मनोऽधीनत्वमिति** वाचः इत्यादिः ।
3. **क्रियोच्यते**—वाङ्मनसनिर्वर्त्या चेष्टोच्यते ।
4. **वित्तद्वयसाधनत्वात्**—मानुषदैववित्तसाधनत्वात् ।

परीक्ष्य चक्षुषा यस्माल्लभते गोधनादिकम् ।
चक्षुः स्यान्मानुषं वित्तं यथाऽयुर्घृतमुच्यते ॥ (1848)

दैवभावाप्तितो दैवं ज्ञानं वित्तमिहोच्यते ।
* तत्साधनत्वाच्छ्रोत्रस्य श्रोत्रमाध्यात्मिकं धनम् ॥ (1849)

बाह्यवागादिचेष्टा च या चान्तःकरणाश्रया ।
देहेऽभिव्यज्यते यस्मात् आत्मा कर्म ततो भवेत् ॥ (1850)

संमितः संख्यया पादैः पाङ्क्तस्य छन्दसो यतः ।
पाङ्क्तो यज्ञः ततः सद्भिः सर्वदा समुदाहृतः ॥ (1851)

तत्कार्यत्वात्पशुः पाङ्क्तः यच्च किञ्चिच्चराचरम् ।
तच्चापि पञ्चभूतोत्थं विद्यात् पाङ्क्तमशेषतः ॥ (1852)

द्रव्यसाधनत्वात् उपचारे[ण]त[1]थोच्यते इत्यर्थः । [1847] साध[2]नत्वं स्फुटयन् 'चक्षुर्मानुषम्' इत्यादिवाक्यं योजयति—**परीक्ष्येति** । [1848] श्रोत्रे दैववित्तधीः कार्येति, 'श्रोत्रं दैवम्' इत्यादि व्याचष्टे—**दैवेति** । [1849] 'आत्मैव' इत्यस्यार्थमाह—**बाह्येति** । आत्मा—देहः, तत्र कर्मदृष्टिः कार्येत्यर्थः । [1850] 'पाङ्क्तो यज्ञः' इत्यस्यार्थमाह—**संमित इति** । उभ[3]यविधो यज्ञः पञ्चसंख्यायोगात् पाङ्क्त इत्यर्थः । [1851] 'पाङ्क्तः (शुक्तिः) [पशुः]' इत्यादे-

---

1. **तथोच्यते**—मानुषवित्तत्वेन दैववित्तत्वेन चोच्यते ।

2. **साधनत्वं**—वित्तसाधनत्वम् ।

* **तत्साधनत्वाच्छ्रोत्रस्येति** श्रोत्रस्य श्रवणद्वारा देवज्ञानहेतुत्वात् **श्रोत्रे दैववित्तदृष्टिरित्यर्थः ।**
"स एष पाङ्क्तो यज्ञः पाङ्क्तः पुरुषः पाङ्क्तमिदं सर्वं यदिदं **किञ्च** तदिदं सर्वमाप्नोति य एवं वेद ।" इति श्रुतिरनुसन्धेया ।

3. **उभयविधो यज्ञः** — बाह्यः आध्यात्मिकश्च यज्ञः ।

पाङ्क्तकर्मात्मको यज्ञः यज्ञकार्यमिदं जगत् ।
एतद्याथात्म्यतो ज्ञात्वा तदेवाप्नोत्यशेषतः ॥ (1853)

इति तृतीयाध्यायस्य चतुर्थं ब्राह्मणम्

—: * :—

र्थमाह—**तत्कार्यत्वादिति** । [1852] 'तदिदं सर्वम्' इत्यादेरर्थमाह—**पाङ्क्तेति**। साधनं साध्यं च हि[1]रण्यगर्भरूपं पाङ्क्तमित्युपास्य[मि]त्यर्थः [1853]

इति तृतीयाध्यायस्य चतुर्थं ब्राह्मणम्

—: * :—

---

1. **हिरण्यगर्भरूपं पाङ्क्तमित्युपास्यमिति** तच्च पाङ्क्तसूत्रमात्मत्वेन अनुसन्दधतः तदाप्तिरेव फलं, तत्क्रतुन्यायादिति भावः ।

इति तृतीयाध्यायस्य चतुर्थं ब्राह्मणम्

अथ तृतीयाध्यायस्य पञ्चमं ब्राह्मणम्

अथ योऽन्यामिति ग्रन्थादारभ्योरुप्रयत्नतः ।
अविद्यायाः समाम्नाताः आ समाप्तेर्विभूतयः ॥ (1)

अध्यायस्यात्र चाविद्वान् वर्णाद्यात्माभिमानवान् ।
धर्मेण नियतात्मा सन् जुहोत्यादिस्वकर्मभिः ॥ (2)

देवादिकृमिपर्यन्तं बिभर्ति जगदव्ययम् ।
* एवमेव जगद्योनिरेकैकः कर्मकृन्नरः ॥ (3)

कृत्स्नेन जगता यद्वत् कर्मकृत्समुपार्जितः ।
यथोक्तकर्मभिस्तेन जगत्तद्वदुपार्जितम् ॥ (4)

अथ तृतीयाध्यायस्य पञ्चमं ब्राह्मणम्

संगतिप्रदर्शनाय वृत्तानुवादः उत्तरब्राह्मणतात्पर्यनिरूपणं च

ब्राह्म[1]णयोः संगत्यर्थं वृत्तमाह—**अथेति** । 'अथ योऽन्याम्' (बृ. 3-4-10)इत्यारभ्य आऽध्यायसमाप्तेः अविद्याविभूतयः प्रपञ्च्यन्ते इत्युक्तमित्यर्थः । 'अथो अयम्' इत्यादावुक्तमनुद्रवति—**अत्र चेति** । एकस्य जगत्कर्तृत्वे, नान्येषां तत्कर्तृत्वं कृतकर(ण)[णा]योगात्, अत्राह—**एवमेवेति** । (1-2-3) **एकैकस्य** कृत्स्नजगद्धेतुत्वं दृष्टान्तेनाह—**कृत्स्नेनेति** । यथा सर्वप्राणिभिः **एकैकः** कर्मा-

---

अथ पञ्चमं ब्राह्मणम्

ससान्नविभागकथनात् इदं ससान्नब्राह्मणमिति व्यवह्रियते ।

1. ब्राह्मणयोः — चतुर्थपञ्चमब्राह्मणयोः ।

* "विशिष्टज्ञानक्रियाविशिष्टस्य सूत्रस्यैव जगत्कर्तृत्वं, नेतरेषाम् ज्ञानाद्यतिशया-भावादित्याशङ्क्याह—**एवमिति** । विहिताविहितज्ञानकर्मभ्यां सूत्रवदितरेषामपि संभवति जगत्कर्तृत्वमित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

स्वदेहवद्यतो भुङ्क्ते एकैकोऽनवशेषतः ।
साधारणानि वस्तूनि तथाऽसाधारणान्यपि ॥ (5)

* स्वकर्मणानुपात्तस्य न च भोगोऽत्र दृश्यते ।
एकैकेनोपकारित्वात्तस्माज्जगदुपार्जितम् ॥ (6)

स्वभावतोऽखिलं कर्म धर्माधर्मादिलक्षणम् ।
साधारणविशेषात्मफलमारभते द्विधा ॥ (7)

गुणप्रधानभावेन साधारणविशेषतः ।
सूत्रादेः कर्मणः कार्यं कृम्यन्तस्याभिजायते ॥ (8)

द्रव्यादिदर्शनाधीनं फलं सर्वस्य कर्मणः ।
साधारणादिसंभेदभिन्नं तेन क्रियाफलम् ॥ (9)

क्वचित्साधारणात्मैव तथाऽसाधारणं क्वचित् ।
क्वचिच्चोभयथा कार्यं द्रव्यादीक्षणचित्रतः ॥ (10)

र्जितः, एवमेकैकेन जगदा[1]र्जितमित्यर्थः । (4) [2]हेतुमाह—**स्वदेहवदिति** । (5) स्वकर्मणानार्जितमपि भोग्यं स्यात् स्वर्नदीवत्, इत्यत्राह—**स्वकर्मणेति** । (6) सर्वस्य कर्मणः प्रतिपुरुषमसाधारणस्य असाधारणफलहेतुत्वात् कथं साधारणवस्तु-भोगः, इत्यत्राह—**स्वभावत इति** । आदिपदेन मिश्रकर्मसंग्रहः । (7) एतद्वि-शदयति—**गुणेति** । सूत्रादिकृम्यन्तप्राणिजातस्य यत् कर्म तत् गुणप्रधानभावेन उत्कर्षनिकर्षरूपेण, सामान्यविशेषात्मना च फलमारभते, द्विधा भोगदृष्टेरित्यर्थः । (8) [3]अत्रैव युक्त्यन्तरमाह—**द्रव्येति** । आदिपदेन क्रियासंग्रहः । **तेनेति** । द्रव्यादिदृष्टिवैचित्र्येणेत्यर्थः । (9) एतत् स्पष्टयति—**क्वचिदिति** । रम्योद्यानादि-दर्शनादौ क्वचित् उभयथा कार्यं, क्वचित्—स्वकलत्रदर्शनादौ असाधारणं, क्वचित्—नृत्येक्षणादौ सामान्यरूपमित्यर्थः । (10)

---

1. **आर्जितमिति** कर्मार्जितमित्यर्थः ।
2. **हेतुमाह**—जगतः एकैकेन कर्मार्जितत्वे हेतुं भोग्यत्वमाह ।
* **स्वकर्मणानुपात्तस्येति** परकीयं गृहादिकं परस्य भोग्यं न हि दृश्यते इत्यर्थः ।
3. **अत्रैव युक्त्यन्तरं**—कर्मणां नानाफलारम्भकत्वे एव युक्त्यन्तरम् ।

* समासव्यासतस्तस्माद्यथोक्तज्ञानकर्मभिः ।
एकैकेन जगत्कृत्स्नमुपात्तं भोगसिद्धये ॥ (11)

सर्वः सर्वस्य कर्ता च कार्यं चापि यथा तथा ।
मधुविद्याप्रसङ्गेन विस्पष्टमभिधास्यते ॥ (12)

यदजीजनत्फलं कर्ता स्वकर्मज्ञानसाधनः ।
सप्तान्नप्रविभागेन तद्विभज्य प्रदर्श्यते ॥ (13)

त्रीण्यन्नानि फलं कर्तुः चत्वार्यन्नानि यानि तु ।
प्रयोगसमवायित्वात्तानि स्युः कर्मसाधनम् ॥ (14)

* विज्ञानात्मा पिता तावन्न मनो न प्रजापतिः ।
अविशिष्टाधिकारित्वान्न विज्ञानात्मनोऽपरः ॥ (15)

उपसंहरति—**समासेति** । (11) [1]अत्र मधुब्राह्मणं मानम्, इत्याह—**सर्व इति** । (12) अनुवादे सर्वं सर्वस्य कार्यं इत्युक्त्वा उत्तर(त्र)ब्राह्मणतात्पर्यमाह—**यदिति** । [2]उपासनार्थमिति शेषः (13) [3]तेषां मध्ये अन्नत्रयं फलं, इतरत् कर्मणः साधनम्, इत्याह—**त्रीणीति** । (14)

द्वितीयकण्डिकार्थनिरूपणम्

'मन एव पिता' (बृ. 3-5-7) इति श्रुतेः मनसः पितृत्वमत्रोच्यते, जगत्कारण(त्वा)[त्व]योगात् प्रजापतेर्वा, इत्यत्राह—**विज्ञानात्मेति** । जीवस्य

---

* **समासव्यासतः** — साधारणरूपेण विशेषरूपेण च ।

1. **अत्र**—सर्वस्य मिथः हेतुहेतुमद्भावे ।
2. **उपासनार्थमिति** स्वकर्मादिना सृष्टस्य जगतः सप्तधा विभक्तस्य सूत्रात्मकस्य स्वात्मना ध्यानं सूत्रभावफलकं विधातुमिदं ब्राह्मणमित्यर्थः ।
3. **तेषां मध्ये**—सप्तानामन्नानां मध्ये ।
   अत्र ब्राह्मणे प्रथमकण्डिकायां यत्सप्तान्नानि इत्यादिना स ऊर्जमुपजीवतीति श्लोकाः इत्यन्तेन ग्रन्थेन, सप्तानामन्नानां सविनियोगानां संक्षेपतः प्रकाशकत्वात् सूत्रभूताः श्लोकशब्दिता मन्त्राः आम्नाताः । द्वितीयकण्डिकायां, मन्त्रानुवादपुरस्सरं मन्त्रार्थः श्रुत्या वर्णितः । अतः प्रथमकण्डिका न पृथक् विवृतेति बोध्यम् ।

* "यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेति, मेधया हि तपसाऽजनयत्पिता ।" इति श्रुतिः । तत्र पितृपदार्थः 'विज्ञानात्मा पिता' इति वार्त्तिके उच्यते ।

सिसृक्षितत्वान्मनसः तथा त्र्यन्नात्मनः प्रभोः ।
साधारणात्मनः स्रष्टा नातः क्षेत्रज्ञतोऽपरः ॥ (16)

ग्रन्थार्थधारणाशक्तिर्मेधा यद्यपि भण्यते ।
तथापि ज्ञानमेवेह साधनत्वाद्विवक्षितम् ॥ (17)

शास्त्रीयलौकिकज्ञानाविशेषग्रहसिद्धये ।
सामान्यज्ञानग्रहणं मेधयेत्यभिधित्सितम् ॥ (18)

तपःशब्देन कृच्छ्रादि यदि नामाभिधीयते ।
तथापि कर्मग्रहणं सप्तान्नोद्धृतिहेतुतः ॥ (19)

धिया धियेति लिङ्गाच्च गृह्येते ज्ञानकर्मणी ।
मेधातपोगिरा नान्ये ग्राह्ये तदफलत्वतः ॥ (20)

कर्मद्वारा जगत्कारणत्वात् स एवात्र[1] पितेत्यर्थः । (15) इतश्च [2]तयोरग्रहः, इत्याह— सिसृक्षितत्वा(चे)[दि]ति । मनोहिरण्यगर्भयोः कार्ययोः कारणत्वायोगादित्यर्थः । (16) [3]मेधाशब्दार्थमाह—ग्रन्थेति । (17) किं तत् ज्ञानमिति, तदाह—शास्त्रीयेति । ब्रह्मज्ञानादन्यत् ज्ञान[4]मात्रमित्यर्थः । (18) तपःशब्देन विवक्षितमाह—तपःशब्देनेति । कर्ममात्रं तपःशब्दवाच्यमित्यर्थः । (19) [5]परस्तात् [6]धीकर्मश्रवणाच्च तयोर(त्रा)[त्र] ग्रहणम्, इत्याह—धियेति । (20)

---

1. अत्र—'तपसाऽजनयत् पिता' इति वाक्ये ।
2. तयोरग्रहः—मनोहिरण्यगर्भयोः पितृपदेनाग्रहः ।
3. मेधाशब्दार्थमिति 'मेधया तपसाऽजनयत्पिता' इति वाक्ये इत्यादिः ।
4. ज्ञानमात्रं—ज्ञानसामान्यम् ।
5. परस्तात्—अत्रैव कण्डिकायामुपरिष्टात् ।
6. धीकर्मश्रवणात्—'धिया धिया जनयते कर्मभिः' इति श्रुतेः ।

पाङ्क्तं हि प्रकृतं कर्म वेदेति ज्ञानमेव च ।
विहाय नातः प्रकृतं युक्तोऽप्रकृतसंग्रहः ॥ (21)

मेधातपोऽतिरेकेण नान्यत्स्यात्साधनं यतः ।
प्रसिद्धत्वादतो हीति व्याचष्टे श्रुतिरञ्जसा ॥ (22)

अस्य भोक्तृसमूहस्य साधारणमचीक्लपत् ।
एकमन्नं पिता सृष्ट्वा तच्चेदं यदिहाद्यते ॥ (23)

यदिदं प्राणिभिर्नित्यमद्यतेऽहरहस्तृषा ।
साधारणमिदं युक्तं सर्वभूतस्थितेस्ततः ॥ (24)

*स य एतदुपास्तेऽन्नमसाधारणरूपतः ।
पाप्मनो नैव स द्रष्टा व्यावर्तेत इहातुरः ॥ (25)

इतश्च [1]तयोरेव ग्रहणम्, इत्याह—**पाङ्क्तं हीति** । 'एष पाङ्क्तो यज्ञः' (बृ. 3-4-17) इति कर्म प्रकृतम्। 'य एवं वेद' (बृ. 3-4-17) इति ज्ञानम् । अतोऽप्यत्र [2]मेधातपसी ज्ञानकर्मणी इत्यर्थः । (21)

हि[3]शब्दार्थमाह—**मेधेति** । 'मे(धायी)[धया हि' इ] त्यादि ब्राह्म[ण] श्रुतिः [4]तेनैव स्रष्टृत्वमाहेत्यर्थः । (22) '[5]एकमस्य साधारणम्' इत्यस्यार्थमाह—**अस्येति** । (23) साधारणमन्नं अन्यदेव किं न स्यात्, अत्राह—**यदिदमिति** । (24) 'स य एतदुपास्ते' इत्यस्यार्थमाह—**स य इति** । साधारणमन्नं असाधारणीकुर्वतो दोषः मन्त्रेणाप्युक्तः, इत्याह—**मोघमिति** ।

---

1. **तयोरेव**—धीकर्मणोरेव ।
2. **मेधातपसी**—मेधातपःशब्दबोध्ये ।
3. **हिशब्दार्थमिति** 'मेधया हि तपसाऽजनयत्पिता' इति ब्राह्मणवाक्यगतहिशब्दस्यार्थमित्यर्थः ।
4. **तेनैव**—मेधातपःशब्दितज्ञानकर्माख्यसाधनेनैव ।
5. **एकमस्येति** "एकमस्य साधारणमिति, इदमेवास्य तत्साधारणमन्नं, यदिदमद्यते । स य एतदुपास्ते, न स पाप्मनो व्यावर्तते, मिश्रं ह्येतत् । " इति श्रुतिरनुसन्धेया ।

*. **स य इति** साधारणमन्नं असाधारणीकृत्य आत्ममात्रभोग्यं कृत्वा तत्परः—तन्निष्ठो भवति यः, तस्य पापान्न निवृत्तिरिति श्रुत्यर्थो बोध्यः ।

उपासनं च तात्पर्यमिह श्रुत्याऽभिधीयते ।
मोघमन्नमिति तथा मन्त्रे ताच्छील्यनिन्दनम् ॥ (26)

वैश्वदेवं हि नामैतद्यदन्नमुपसाध्यते ।
नालमेतद्धि सर्वेषां पाप्मनां विनिवृत्तये ॥ (27)

इत्येवं केचिदिच्छन्ति तत्तु युक्त्या न युज्यते ।
अनूक्तेर्यदिदमिति सिद्धोऽर्थोऽनूद्यते यतः ॥ (28)

* प्रात्यक्ष्यं च न तस्यास्ति शास्त्रमात्रप्रमाणतः ।
यथा सर्वात्ययक्लान्तस्थस्य प्रत्यक्षता तथा ॥ (29)

"मोघमन्नं विन्दते (स) [अ] प्रचेताः सत्यं ब्रवीमि (वव)[वध] इत् स तस्य । नार्यमाणं पुष्यति नो सखायं केवलाघो भवति केवलादी ।' (तै. ब्रा. 2-8-8) इति मन्त्रे । (25-26)

'एकमस्य साधारणम्' इति श्रुतेः भर्तृप्रपञ्च-
व्याख्यानं तन्निराकरणं च

वैश्वदेवाख्यं साधारणशब्दवाच्यमत्र स्मार्तान्नम्, इति **भर्तृप्रपञ्चमतमाह—वैश्वदेवं हीति** । [1]तदुपासकस्य [2]कथं पापादनिवृत्तिः, अत्राह—**नालमिति** । स्मार्तकर्मणा कस्य चिदेव पापस्य निवृत्तेरित्यर्थः । (27) दूषयति—(**नन्विति**) [**तत्त्विति**] । [3]अयुक्तमेवाह—**अनूक्तेरिति** । (28) वैश्वदेवाख्यमपि प्रत्यक्षसिद्धत्वात् 'यदिदम्' इत्यनुवादयोग्यम्, अत्राह—**प्रात्यक्ष्यं चेति** । हेतुमाह—**शास्त्रेति** ।

'वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् ।
आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥' (मनु. 3-84)

इत्यादिशास्त्रगम्यत्वादित्यर्थः । अप्रत्यक्षत्वं व्यतिरेकदृष्टान्तेनाह—**यथेति** । (29)

---

1. तदुपासकस्य—वैश्वदेवान्नोपासकस्य ।
2. कथं पापादनिवृत्तिरिति वैश्वदेवस्य शास्त्रीयकर्मणः पापनिवर्तकत्वादिति भावः ।
3. अयुक्तमेव—अयुक्तत्वमेव ।
* 'प्रात्यक्ष्यं न च' इति मु. पु. पाठः ।

प्रतिप्राणि ममेदं स्यादभिलाषश्च दृश्यते ।
सर्वप्राण्यंशमिश्रत्वं ततोऽस्मिन्नवसीयते ॥ (30)

नात्मार्थं पाचयेदन्नमिति चापि स्मृतेर्वचः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ।
अन्नादे भ्रूणहा मार्ष्टीत्यादीह वचनं स्मृतेः ॥ (31)

तस्यापि चान्तःपातित्वात्सर्वाद्यस्यैव युक्तिमान् ।
ग्रहः, तस्य गृहीतौ तु नास्यान्तःपातिता तथा ॥ (32)

असृष्टाविनियोगत्वे प्राप्नुतस्तद्ग्रहे सति ।
सर्वप्राणिभिराद्यस्य, तच्चानिष्टं प्रसज्यते ॥ (33)

स्वपक्षे तस्योपपत्तिमाह—**प्रतिप्राणीति**। अतो वैश्वदेवस्य न साधारण्यम्, इत्युपसंहरति—**सर्वेति**। (30) [1]तदसाधारणीकरणे पापादनिवृत्तौ मानमाह—**नात्मार्थमिति**।

'नात्मार्थं पाचयेदन्नं न वृथा घातयेत्पशून् ।
न चैकः स्वयमश्नीयात् विधिवर्जं न निर्वपेत् ॥'

इति **स्मृतिः**। षडङ्गवेदाध्यायी भ्रूणः। तद्घातको भ्रूणहा। **स्वकीयान्नादेः** स्वीयं पापं मार्ष्टि—क्षिपति इत्यन्नदातुः पापक्षयस्मरणात् [2]**इतरस्य** पापादनिवृत्तिर्गम्यते इत्यर्थः। (31) वैश्वदेवान्नस्य [3]मदुक्तान्नेऽन्तर्भावाच्च तदेव ग्राह्यम्, इत्याह—**तस्येति**। (32) परमते दोषान्तरमाह—**असृष्टेति**। **वैश्वदेवान्नग्रहे** सर्वप्राण्याद्यस्य पितृसृष्टत्वं विनियुक्तत्वं च न स्यादित्यर्थः। (33) **शास्त्रविहित**-

---

1. **तदसाधारणीकरणे**—साधारणस्यान्नस्य असाधारणीकरणे-**स्वमात्रभोग्यत्वकरणे** इति यावत्।
2. **इतरस्य**—अन्नस्यादातुः।
3. **मदुक्तान्ने**—सर्वप्राण्याद्यान्ने।

अव्यावृत्तिश्च पाप्मभ्यो वैश्वदेवान्नसंग्रहे ।
न न्याय्यं वचनं तस्य शास्त्रमात्रव्यपाश्रयात् ॥ (34)
अल्पीयःपापहानिश्च नापि शब्दात्प्रतीयते ।
न स पाप्मन इत्यस्मादश्रुता न च गृह्यते ॥ (35)
सर्वाद्यान्नगृहीतौ तु हेतुर्गमक इष्यते ।
असाधारणकारित्वं तस्य साधारणात्मनः ॥ (36)
सर्वप्राणभृदन्नस्य तस्माद् ग्रहणमिष्यते ।
उक्तयुक्तिबलादत्र नान्यस्येति विनिश्चितिः ॥ (37)
पापानिर्मोकहेतूक्तिः मिश्रमित्यभिधीयते ।
सर्वार्थस्य हि पापाय यतोऽसाधारणी क्रिया ॥ (38)
प्रक्षेपोऽग्नौ हुतं विद्यात् तत्पूर्वं बलिकर्म च ।
प्रहुतं चेह विज्ञेयं ते देवेभ्यो ददौ पिता ॥ (39)

वैश्वदेवग्रहे तदुपासकस्य पा(प)[पा]निवृत्तिवाक्यं(वाव्यु)[चायु]क्तम्, इत्याह—**अव्यावृत्तिश्चेति** । (34) [1]स्मार्तकर्मानुष्ठानादल्पपापनिवृत्तिप्रतिपादकं [2]तत्, अत्राह—**अल्पीय इति** । (35) 'मिश्रं ह्येतत्' इति वाक्योक्तहेतुः [3]मदुक्तान्नग्रहगमकः, इत्याह—**सर्वाद्येति** । कोऽसौ हेतुः, तमाह—**असाधारणेति** । (36) स्वमतमुपसंहरति—**सर्वेति** । (37) 'मिश्रं ह्येतत्' इति वाक्यं [4]परमतनिरासार्थं व्याख्यातमपि, इदानीं क्रमप्राप्तं व्याचष्टे – **पापेति** । (38)

'द्वे देवानभाजयत्' इति मन्त्रार्थनिरूपणम्

'[5]हुतं च प्रहुतं च' इत्यस्यार्थमाह—**प्रक्षेप इति** । (39) 'तस्मात्'

---

1. **स्मार्तकर्मानुष्ठानात्**—वैश्वदेवानुष्ठानात् ।
2. **तदिति** 'स य एतदुपास्ते, न स पाप्मनो व्यावर्तते' इति वाक्यमित्यर्थः ।
3. **मदुक्तान्नेति** सर्वप्राण्याद्यान्नेत्यर्थः ।
4. **परमतनिरासार्थमिति** वैश्वदेवान्नस्यैव साधारणान्नत्वेन ग्रहणमिति भर्तृप्रपञ्चमतनिरासार्थमित्यर्थः ।
5. **हुतञ्चेति** "द्वे देवानभाजयदिति, हुतञ्च प्रहुतञ्च । तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वति । अथो आहुर्दर्शपूर्णमासाविति । तस्मान्नेष्टियाजुकः स्यात् ।" इति श्रुतिरनुसन्धेया ।

देवेभ्योऽन्ने यतः प्रत्ते हुतप्रहुतलक्षणे ।
तानुद्दिश्य ततोऽद्यापि जुह्वति प्र च जुह्वति ॥ (40)

यतः सूत्रपदे द्वित्वमविशेषेण चोदितम् ।
श्रौतस्मार्तविभागेन तत एतद्विकल्पितम् ॥ (41)

स्मार्तान्नानन्तरोक्तत्वात् स्मार्तत्वं स्याद् द्वयोस्तयोः ।
अग्निहोत्राभिसंबन्धात्स्यातां वा श्रुतिचोदिते ॥ (42)

मन्त्रे द्वित्वाविशिष्टत्वात् हुतप्रहुतलक्षणे ।
श्रुत्याऽतस्ते विकल्प्येते श्रौते स्मार्ते हि तुल्यवत् ॥ (43)

इत्यादेरर्थमाह—देवेभ्य इति । (40) 'अथो आ(यु)[हुः]दर्शपूर्णमासाविति' [इति] [1]श्रुत्युक्तविकल्पे हेतुमाह—यत इति । 'द्वे देवानभाजयत्' इति [2]सूत्रपदे द्वित्वमात्रश्रवणात् विशेषा[3]श्रवणात् हुतप्रहुते वा, दर्शपूर्णमासौ वेति विकल्पितमित्यर्थः । (41) विकल्पिते हेत्वन्तरमाह—स्मार्तेति । सर्वान्नस्य साधारणशब्देन ग्रहात् तस्मिन् स्मार्तान्नस्य आद्यत्वेनान्तर्भावात्, तद[4]नन्तरमुक्तत्वात् 'द्वे देवानभाजयत्' इति, [5]हुतप्रहुतयोर्ग्रहः । 'तद्यदिदमाहुः अमुं यज अमुं यज' इति प्रकृत्य श्रुतत्वात् दर्शपूर्णमासयोर्ग्रहः । विकल्पस्य [6]अष्टदोषदुष्टत्वेऽपि गत्यन्तराभावात् व्रीहियवादिवदिहाङ्गीकृतोऽसावित्यर्थः । (42) उपसंहरति—मन्त्र इति । (43) '(नि)[ने]ष्टियाजुकः स्यात्' इत्यस्यार्थमाह—दर्शश्चेति ।

---

1. श्रुत्युक्तविकल्पे—द्वे अन्ने, हुतप्रहुते वा, दर्शपूर्णमासौ वेति विकल्पे ।
2. सूत्रपदे इति संक्षेपतोऽर्थप्रकाशकत्वात् सूत्रात्मके मन्त्रे इत्यर्थः ।
3. विशेषाश्रवणात्—द्वित्वाश्रयव्यक्तिविशेषयोरश्रवणात् ।
4. तदनन्तरं—स्मार्तान्नानन्तरम् ।
5. हुतप्रहुतयोरिति स्मार्तयोरिति शेषः ।
6. अष्टदोषदुष्टत्वेऽपीति व्रीहिभिर्यजेत, यवैर्वा यजेत, इति विकल्पस्थले अष्टौ दोषाः । व्रीहिशास्त्रानुष्ठाने यवशास्त्रस्य अनुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः, यवशास्त्रानुष्ठानकाले च यवशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यपरित्यागश्चेति चत्वारो दोषाः । एवं व्रीहिशास्त्रेऽपि दोषचतुष्टयमिति विकल्पस्याष्टदोषदुष्टतेति वाक्यविदो वदन्ति ।

69

दर्शश्च पौर्णमासश्च देवान्न ते यतः श्रुते ।
प्रायस्ताभ्यां न कामाय यष्टव्यमिति गम्यते ॥ (44)

नेहेष्टयो निषिध्यन्ते देवप्राधान्यसिद्धये ।
ताच्छीलिकोक्तुञश्रवणात्तच्छीलत्वं निवार्यते ॥ (45)

* प्रसक्तान्यपि नोच्यन्ते त्रीण्यन्नान्यत्र कारणात् ।
तेषां फलत्वादुक्तेभ्यः साधनेभ्योऽन्यता यतः ॥ (46)

स्व[1]रूपतः प्राबल्यदौर्बल्यसंभवेऽपि प्रकृतत्वादिसाम्यात् विकल्पः इति पूर्वपक्षः । राद्धान्तस्तु विषमशब्दत्वात् श्रौतस्मार्तयोः न व्रीहियवादिसाम्यमिति, स्मार्तं बाधित्वा श्रौतमेव ग्राह्यमिति । [2]तत्रैतदपि वाक्यं गमकं द्रष्टव्यं 'नेष्टियाजुकः स्यात्' इति । (44) [3]काम्यदर्शपूर्णमासस्य सर्वथा निषेध एव, इत्यत्राह—नेति । हेतुमाह—ताच्छीलिकेति । 'आकेः तच्छीलतद्धर्मतत्साधुकारिषु' (पा. सू. 3-2-134) इत्यधि[4]कारे उक्तः । अधिकारे च 'यजजपदशां य(त्)ङः' (पा. सू. 3-2-166) इत्युक्ञ् युङ्[यङ]न्तेभ्यः । अत्र तु छान्दसत्वात्(युटो)[यङो]ऽश्रवणमित्यर्थः । (45)

सप्तमतया मन्त्रोक्तस्य पश्वन्नस्य तुरीयत्वेन ब्राह्मणे व्याख्यानस्याभिसन्धिः

'त्रीण्यात्मनेऽकुरुत' इति मन्त्रपदक्रमप्राप्तं हित्वा [5]पश्वन्नं तुरीयत्वेन व्याख्यायते । तत्राभिप्रायमाह—प्रसक्तानीति । उक्ता[6]न्नत्रयस्य साधनत्वात्

---

1. स्वरूपत इति श्रौतस्मार्तत्वाभ्यामिति यावत् ।
2. तत्र—श्रौतदर्शपूर्णमासयोर्ग्रहणे ।
3. काम्यदर्शपूर्णमासस्य—स्वर्गादिकामनया क्रियमाणदर्शपूर्णमासस्य ।
4. अधिकारे उक्त इति ताच्छीलिकपदविवरणम् । "इष्टिशब्देन किल काम्या इष्टयः । शतपथीयं प्रसिद्धिः ।" इति भाष्यम् ।
5. पश्वन्नमिति सप्तमतयोक्तमिति शेषः ।
6. उक्तान्नत्रयस्य—सर्वसाधारणान्नस्य देवान्नयोश्च ।

* कारणादिति पाठक्रमात् कारणात् प्रसक्तान्यपीति संबन्धः ।

सौकर्यप्रतिपत्तेश्च भूयोविषयतस्तथा ।
साधनैकसजातित्वादानन्तर्यमकारणम् ॥ (47)

पयोऽन्नमेव प्रायेण मनुष्याः पशुभिः सह ।
भुञ्जते पय एवाग्रे तेषामन्नमतोऽस्तु तत् ॥ (48)

भुञ्जते पय एवाग्रे क्रमेणान्यतृणादि हि ।
अतोऽनुमीयते पित्रा तेभ्यः प्रत्तं पयः पुरा ॥ (49)

पशवः पय एवाग्रे भुञ्जते नापरं ततः ।
कथमेतद्विजानीम इत्येतदभिधीयते ॥ (50)

पश्वन्नस्यापि साधनस्य तैः संगत्युपपत्तेः अन्न[1]त्रयस्य फलत्वात् तेभ्योऽन्यत्वोपपत्ते-रित्यर्थः । (46) [2]हेत्वन्तरमाह—**सौकर्येति** । साध्यसाधनयं विभागकरणे प्रतिपत्तिसौकर्यात् पश्वन्नं व्याख्याय अन्नत्रयं व्याख्यायते । अध्यात्माधिभूताधिदैव-विषयत्वेन विस्तीर्णविषयत्वाच्चेत्यर्थः । (47)

'पशुभ्य एकं प्रायच्छदिति तत्पयः' इत्यादिश्रुत्यर्थवर्णनम्

पशुभ्यो दत्तमन्नं दर्शयति—**पय इति** । पशुभिः तृणस्याप्यद्यमानत्वात् '**पय एव**' इत्ययुक्तम्, अत्राह—**भुञ्जत इति** । अनुमीयते—दृष्टानुसारात् कल्प्यते इत्यर्थः । (48-49) 'तस्मात्कुमारम्' इत्यादिवा[3]क्यव्यावर्त्यमाह—**पशव इति** । तदुत्तरत्वेन वाक्यमवतारयति—**एतदिति** । (50)

---

1. **अन्नत्रयस्य फलत्वादिति** 'त्रीण्यात्मनेऽकुरुत' इत्यादिना वक्ष्यमाणस्य मनोवाक्प्राणात्मकस्यान्नत्रयस्य सूत्रात्मना फलत्वादित्यर्थः ।
2. **हेत्वन्तरमिति** पश्वन्नस्य तुरीयत्वेन व्याख्याने हेत्वन्तरमित्यर्थः । "पशुभ्य एकं प्रायच्छदिति, तत्पयः । पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति । तस्मात् कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्ति ।" इति श्रुतिः । **अग्रे**—जन्मोत्तरकाले ।
3. **वाक्यव्यावर्त्यं**—वाक्येन निरसनीयं चोद्यम् ।

यत एवमतो लोके कुमारं जातमग्रतः ।
जातरूपव्यवहितं लेह्यन्ति घृतं जनाः ॥ (51)

तस्यानु तदभावे वा पाययन्ति स्तनं शिशुम् ।
पशुष्वपि तथा जातं वत्सं कश्चित् प्रपृच्छति ॥ (52)

कियांस्ते वयसा वत्स इत्याचष्टे वयो यथा ।
अतृणाद इति तृणं नाद्याप्यत्ति मनागपि ॥ (53)

वर्तते पयसैवासावद्यापीत्यवसीयते ।
प्राण्यप्राणि जगत्सर्वं तस्मिन्नेत्र प्रतिष्ठितम् ॥ (54)

पयसीदं जगन्मत्रमित्येतद्गम्यते कुतः ।
प्रसिद्धेर्गम्यते न्यायाद्यतोऽसावभिधीयते ॥ (55)

आहुतिः पय एव स्यादाज्यं वा पय एव वा ।
पय एवाहुतिः सर्वमित्येतच्च श्रुतेर्मितेः ॥ (56)

वाक्यं व्याचष्टे—यत इति । यतः पश्चन्नं पयः, अत इत्यर्थः । [51] 'स्तनं(चे)[वा'इ]त्यादेरर्थमाह—तस्येति । '[1]अथ वत्सं जातम्' इत्यादेरर्थमाह —पशुष्विति । 'तस्मिन् सर्वम्' इत्यादि व्याकरोति–प्राणीति । (52-53 54) पयसि सर्वं प्रतिष्ठितमित्यत्र मानं[कि]मिति शङ्कते—पयसीति । श्रुतिप्रसिद्धि-रूपन्यायात् गम्यते, इत्याह—प्रसिद्धेरिति । (55) आदौ याज्ञिकप्रसिद्धिं दर्शयति—आहुतिरिति । यदाज्यं पयो वा आहुतिमयं तत्सर्वं पय एवेति "घृताहुतिर्वा पयआहुतिर्वोभयं त्वेतत्पय एव" इति श्रुतिमानात् गम्यते

---

1. अथ वत्समिति "अथ वत्सं जातमाहुः अतृणाद इति । तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति, पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न ।" इति श्रुतिः ।

* अथैषाज्याहुतिर्यज्ञे यद्धविः सर्वरूपकम् ।
पशुश्चाप्याज्यमेवैतत्करोतीत्यपि चागमः ॥ (57)

आज्याभिघारसंस्कारात् सर्वमेव पयो हविः ।
पयस्येव जगत्कृत्स्नमग्निहोत्रे प्रतिष्ठितम् ॥ (58)

ते वा एते इति तथा परिणामोऽखिलं जगत् ।
अग्निहोत्राहुतेः साक्षात् श्रुतावेव समीरितम् ॥ (59)

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः ॥" (60)

पयोद्रव्याहुतेश्चैतत्परिणामोऽखिलं जगत् ।
एतच्च श्रुतितः सिद्धं विश्वमाहुतिकारणम् ॥ (61)

इत्यर्थः । [56] [1]अत्रैव श्रुत्यन्तरमाह—अथेति । [57] सर्वस्य पयस्त्वेऽपि प्रकृते किमायातम्, अत्राह—पयसीति । अग्निहोत्रे यत् पयः तत्रैव प्रतिष्ठित-मित्यर्थः । [58] [2]प्रतिज्ञामात्रमेतत्, अत्राह–ते वा इति । "ते वा आहुती हुते उत्क्रामतः ते अन्तरिक्षमाविशतः" (षट्प्रश्नी) इत्यादिश्रुतौ अग्निहोत्राहुतेः पयोरूपायाः परिणामो जगत् समीरितमित्यर्थः । [59] [3]स्मृतिरप्यत्र मानम्, इत्याह—(मनु. 3-76) अग्नाविति । [60] पयःपरिणामत्वात् जगतः तस्मिन् जगत् मग्नमिति शास्त्रार्थमुपसंहरति—पयोद्रव्येति । [61]

---

1. अत्रैव श्रुत्यन्तरमिति होम्यस्य सर्वस्यापि पयस्त्वे एव प्रमाणं श्रुत्यन्तरमित्यर्थः ।

* अथेति अथशब्दो यज्ञारम्भार्थः । आज्याहुतेः तावत् पयस्त्वं तद्विकारत्वात् । यच्च यज्ञे सर्वरूपकं पुरोडाशाद्यात्मकं हविः, यश्च पशुः एतत्सर्वमाज्यमेव, अभि-घारसंस्कारात् करोति पुरुषः । न हि चर्वादि आज्यानभिघारितं होम्यम् । पयश्चाज्य-मिति सर्वस्य पयस्त्वम् इत्यागमशासनमित्यर्थः ।

2. प्रतिज्ञामात्रमेतत्—अग्निहोत्रपयसि जगतः प्रतिष्ठितत्वं प्रमाणरहितमिति यावत् ।

3. स्मृतिरपि—मनुस्मृतिरपि ।

यथोक्तदर्शनस्तुत्यै दर्शनान्तरकुत्सनम् ।
तस्मिन् सर्वमिति ह्यस्य दर्शनस्य विधित्सया ॥ (62)

पयसैवाग्निहोत्रे हि जुह्वन् संवत्सरं द्विजः ।
* जयत्येव पुनर्मृत्युं न भूयो मृतिभाग्भवेत् ॥ (63)

संवत्सरे प्रयोगाणामग्निहोत्रे हि संख्यया ।
षष्ट्युत्तराणि त्रीण्येव शतानीति विनिश्चितम् ॥ (64)

क्षपाहान्यपि तावन्ति संख्ययेह भवन्ति हि ।
शतानि सप्त संख्याताः प्रयोगार्धाश्च विंशतिः ॥ (65)

'[1]तद्यदिद[मा]हुः' इत्यादेस्तात्पर्यमाह—यथोक्तेति । [2]परदर्शननिन्दा (ना)[न]निषेधार्था । किन्तु अत्र विधित्सितोपासनस्तुत्यर्था इत्यर्थः । (62) तात्पर्यमुक्त्वा वाक्यं योजयति–पयसेति । [63] [3]अत्र अग्निहोत्रहोमात् मृत्युजयः श्रूयते, (सो)[नो]पासनात्, इत्याशङ्क्य, उपासनां दर्शयितुं संख्यासाम्यमाह—संवत्सरे इति । सायं प्रातः क्रियमाणाग्निहोत्रहोमानामेकस्मिन् वत्सरे षष्ट्युत्तर-त्रीणि शतानि भवन्ति इत्यर्थः । (64) अहोरात्राणामपि सै(वा)[व]संख्या, इत्याह—क्षपेति । इदानीं सायंप्रातर्होमयोः रात्रिवासरयोः प्रविभागे विंशत्यधिकसप्त शतानि भवन्ति, इत्याह—शतानीति । [65] प्राजापत्येष्टकानां पुंनाडीनां[च]

---

1. तद्यदिदमिति "तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति, न तथा विद्यात्, यदहरेव जुहोति तदहः पुनः मृत्युमपजयत्येवं विद्वान् सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति।" इति श्रुतिः ।
अत्र एवं विद्वान् इत्यादिनोक्तोपासनस्य पयसि सर्वजगतः प्रतिष्ठितत्वदर्शनस्य स्तुत्यै अग्निहोत्रसंबन्धिनी अन्योपासना निन्द्यते इति प्रघट्टकार्थः ।

2. परदर्शनेति अन्योपासनेत्यर्थः ।

* न भूयो मृतिभाग्भवेदिति सकृत् मृत्वा पुनर्मरणाय देहं न गृह्णातीत्यर्थः ।

3. अत्र—'संवत्सरं पयसा जुह्वत्' इति वाक्ये ।

याजुष्मत्योऽपि तावत्य इष्टकाः स्युः प्रजापतेः ।
संवत्सराग्नेश्चित्यस्य पुंसो नाड्यस्तथैव च ॥ (66)

संपदैवाहुतीर्विद्वान्संपाद्याग्नेस्तथेष्टकाः ।
* संवत्सरमवाप्नोति स्वनाडीसंख्यया नरः ॥ (67)

पुमान् संवत्सरोऽग्निश्च नाड्यहोरात्रयाजुषैः ।
संपदैते समाः सर्वे तस्मात्संवत्सरश्रुतिः ॥ (68)

संवत्सरात्मसंपत्त्या कालात्मानं समश्नुते ।
इत्येवंदृष्टयो धीरा यदाहुरसदेव तत् ॥ (69)

सैव[1] संख्या, इत्याह—याजुष्मत्योऽपीति । संवत्सरात्मक(मि)[चि]त्याग्निरूप-(प्रा)[प्र]जापत्यवयवभूतयाजुष्मतीसंज्ञकेष्टकासु प्रयोगाभेदेन षष्ट्यधिकत्रिशतत्वं, तद्भेदेन विंशत्यधिकसप्तशतत्वम् । देहाभिमानिनः साधकस्य नाड्यश्च स्थूलादि-भेदेन उक्तसंख्या भवन्तीत्यर्थः । [66] विवक्षितमुपासनमाह—संपदेति । अग्निहोत्रा(दि)हुतीः पुंसंब(न्धि[न्धी]नि अहोरात्राणि संवत्सरावयवभूतानि च विभज्य, अविभज्य वा, नाडीश्च पुंसंबन्धिनीः प्राजापत्यात्मकया(यु)[जु]ष्मत्येष्टका-रूपेण संख्यासामान्यात् ध्यायन्, योऽग्निहोत्रं संवत्सरं जुहुयात्, अपजयति स मृत्युमित्यर्थः । [67] [2]अवयवोपासनमुक्त्वा, [3]अवयव्युपासनमाह—पुमानिति । नाड्यहोरात्रयाजुषैः नाड्यादिगतसंख्यासामान्येन संपदा, पुमान् संवत्सरः अग्निश्च समाः । तेन सामान्येन आत्मनः अग्नेश्च संवत्सरात्मप्रजापत्यात्मना समत्वमापाद्य, अग्निरहं च प्रजापतिरेव इति अग्निहोत्रहोमकाले ध्यायन् मृत्युं जयति मृत्युं कालात्मकं प्राप्नोति इत्येतत् 'संवत्सरं पयसा जुहुति' इति श्रुत्योच्यते इत्यर्थः ।

---

1. सैव संख्या—विंशत्यधिकसप्तशतसंख्या ।

*. संवत्सरमवाप्नोति—प्रजापतिमाप्नोति, ततः मृत्युमपजयतीत्यर्थः ।

2. अवयवोपासनमिति पुरुषस्यावयवाः नाड्यः, संवत्सरस्यावयवाः अहोरात्राणि, चित्याग्नेरवयवाः याजुष्मत्य इष्टकाः । तदुपासनमित्यर्थः ।

3. अवयव्युपासनमिति पुरुषसंवत्सराग्नीनामुपासनमित्यर्थः ।

पयस्यन्तर्हितं विश्वं पश्यन्नेवं पयो नरः ।
एकयैव स आहुत्या जगदात्मानमश्नुते ॥ (70)

तत्रैवं सति को मूढो द्राघीयांसं प्रतीक्षते ।
संवत्सरावधिं कालं सकृदाहुतिसाधने ॥ (71)

पयो द्रव्यं यथातत्त्वदर्शी चेच्छ्रद्धयान्वितः ।
यदैवाहर्जुहोतीत्थं हन्ति मृत्युं तदैव सः ॥ (72)

एकयैव स आहुत्या देवेभ्योऽन्नं ह्यशेषतः ।
प्रयच्छति यतो नातः प्रयोगान्तरमीक्ष्यते ॥ (73)

हुतमेवं जगत्कृत्स्नं नातोऽन्यदवशिष्यते ।
यथोक्तदर्शनात्तस्मात् सर्वोप्यथा मृत्युजिद्भवेत् ॥ (74)

उक्तवद्बुद्धि संभाव्य वक्ष्यमाणान्यपि श्रुतिः ।
अन्नानि कस्मादित्याह प्रश्नवाक्यविवक्षया ॥ (75)

एतत् दूषयति—**इत्येवमिति** । [68-69] [1]असत्त्वं स्पष्टयति—**पयसीति** । पयःप्रतिष्ठं विश्वमिति विद्वान् पयसा अग्निहोत्रं जुह्वत् एकयैव अग्निहोत्राहुत्या [2]संवत्सरात्मानमाप्नोतीत्यर्थः । (70) किमतः, अत्राह—**तत्रैवमिति** । (71) '[3]यदहरेव' इति प्रतिज्ञावाक्यं योजयति—**पय इति** । [72] 'सर्वं हि' इति हेतुवाक्यार्थमाह—**एकयैवेति** । तृप्ता देवा(न्न [स्त]स्य मृत्युक्षयहेतव इत्यर्थः । (73) प्रयोगान्तरा(नु)[न]पेक्षत्वे हेतुमाह—**हुतमिति** । (74) '[4]कस्मात्तानि'

---

1. **असत्त्वं**—निरुक्तोपासनया मृत्युजयवचनस्यासमीचीनत्वम् ।
2. **संवत्सरात्मानं**—जगद्रूपं प्रजापतिम् ।
3. **यदहरेवेति** 'यदहरेव जुहोति, तदहः पुनर्मृत्युमपजयत्येवं विद्वान् ।' इति प्रतिज्ञावाक्यम् । तत्र हेतुवाक्यं, 'सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति' इति, इति विभागः ।
4. **कस्मात्तानीति** 'कस्मात्तानि न क्षीयन्ते अद्यमानानि सर्वदेति ।' इति श्रुतिः ।

अद्यमानान्यथान्नानि यथोक्तान्यत्तृभिः सदा ।
कस्मात्क्षयं न संयान्ति यवपूर्णकुसूलवत् ॥ (76)

प्रश्नस्य कस्मात्तानीति श्रुत्यैवाचार्यभूतया ।
पुरुषो वा इति गिरा हेतुरुक्तोऽक्षये परः ॥ (77)

अद्यते चेत्सदैवान्नं जन्यते न तु तत्ततः ।
यथोक्तः स्यादयं दोषो न तु तन्नेह जन्यते ॥ (78)

अन्नाक्षयत्वहेतुत्वात् पुरुषोऽक्षितिरुच्यते ।
* स हि धीहाप्रबन्धेन सर्वदान्नं करोत्यतः ॥ (79)

क्रियाबुद्धिप्रबन्धेन यतो भोक्ताप्यहर्निशम् ।
तदन्नं जनयत्येव तस्मादन्नं न हीयते ॥ (80)

इत्यादेरभिप्रायमाह—उक्तवदिति । फलरूपाणि [1]त्रीण्यन्नानि अनुक्तान्यपि उक्तवत् गृहीत्वा प्रश्नः क्रियते इत्यर्थः । [75] तात्पर्यमुक्त्वा अक्षरार्थमाह—अद्यमानानीति । (76) 'पुरुषो वा अ(क्ष)[क्षि]तिः' इत्येत[2]दुत्तरत्वेनाव-तारयति—प्रश्नस्येति । [77] व्यतिरेकद्वारा उपपादयति—अद्य(ति)[ते] चेदिति । सप्तविधमन्नं (यु)[भु]ज्यते एव न (युज्य)[जन्य]ते चेत्, [3]भवदुक्तदूषणं स्यात् । न च न जन्यते । किन्तु (पिता) जन्यते एवेत्यर्थः । (78) 'पुरुषो वा अ(क्ष)[क्षि]तिः' इति पदार्थमाह—अन्नेति । 'स हीदम्' इत्यादेरर्थमाह—स हीति । (79) हेतुवाक्यार्थं निगमयति—क्रियेति । (80)

---

1. **त्रीण्यन्नानि**—मनोवाक्प्राणात्मकानि ।

2. **उत्तरत्वेन**—कुतो न क्षीयन्ते इति प्रश्नोत्तरत्वेन ।

3. **भवदुक्तदूषणं**—अन्नापक्षयरूपदूषणम् ।
'पुरुषो वा अक्षितिः । स हीदमन्नं पुनः पुनर्जनयते ।' इति श्रुतिः । हेतुवाक्य स हीदमन्नमिति, इति बोध्यम् ।

* **धीहाप्रबन्धेन**—ज्ञानकर्मसमूहेन ।

भोगादस्यैव भोगेन भुज्यमानत्वहेतुतः ।
अन्नाक्षयो भवेदेवं तयोरव्यतिरेकतः ॥ (81)

सुखदुःखादिसंवित्तिः फलं पूर्वस्य कर्मणः ।
रागद्वेषक्रिया तत्र स्यात्फलान्तरसिद्धये ॥ (82)

रागादिपूर्वकं कर्म जायते फलवद्यतः ।
रागादिरहितं तत्तु निष्फलं सुप्तवागिव ॥ (83)

को हेतुरक्षयत्वे स्यादिति पृष्टमथाधुना ।
तद्विदः फलसिद्ध्यर्थं भूयः प्रश्नोऽयमुच्यते ।
अक्षितित्वं कथं पुंस इत्येतच्चाधुनोच्यते ॥ (84)

ज्ञानकर्मभ्यामन्नजनकत्वे हेतुमाह—भोगादस्येति । कर्तृत्वभोक्तृत्वयोः [1]मिथो बन्धादित्यर्थः । (81) भोक्तृत्वं कथं कर्तृत्वप्रयोजकम्, अत्राह—सुखेति । सुखदुःखयोः रागादिद्वारेण शुभाशुभं कर्मोत्पाद्य जगद्धेतुतेत्यर्थः । (82) रागादेः सकलक्रियाहेतुत्वमन्वयव्यतिरेकाभ्या(मन्वय)माह—रागादीति । (83)

'यो वै तामक्षितिं वेद' इत्यादिवाक्यार्थवर्णनम्

'यो [2]वैताम्' इति वाक्यमवतारयितुं [3]पातनिकां करोति—को हेतुरिति । कस्मात्तानि न क्षीयन्ते इति प्रश्नस्योत्तरं, 'पुरुषो वा अक्षितिः' इत्युक्तमित्यर्थः । तद्वाक्यमवतारयति—अथेति । अक्षितित्वगुणविशिष्टसप्तान्नात्मकप्रजापत्युपासकस्य फलकथनाय, 'यो वै तामक्षितिम्' इति श्रुतिः प्राक्त[4]नमेव प्रश्नमुत्थापयतीत्यर्थः । प्रश्नस्वरूपप्रदर्शनपुरःसरं 'स हीदम्' इति वाक्यमवतारयति—अ(क्ष)क्षि]तित्वमिति । (84)

---

1. मिथो बन्धादिति परस्परं संबन्धादित्यर्थः । इदञ्च 'अव्यतिरेकतः' इति पदस्य विवरणं बोध्यम् ।
2. यो वैतामिति "यो वैतामक्षितिं वेदेति । पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिः । यद्धै तन्न कुर्यात् क्षीयेत ह ।" इति श्रुतिः ।
3. पातनिकां—अवतरणिकाम् ।
4. प्राक्तनमेव प्रश्नं—अन्नाक्षयत्वे हेतुप्रश्नम् ।

स हीदमन्नं कुरुते तत्तत्कालप्रसूतया ।
धिया धिया हि पुरुषः कर्मभिश्चान्नमात्मनः ॥ (85)

भुज्यमानान्यपि ततो न क्षीयन्ते प्रबन्धतः ॥ (86)

यथैव पुरुषोऽन्नानां भोक्तात्यन्तं तथैव सः ।
कर्ताप्यत्यन्तमेव स्यादन्योन्याव्यतिरेकतः ॥ (87)

एवं प्रबन्धरूपेण साध्यसाधनलक्षणम् ।
अविद्यापटसंवीतचेतसां स्यान्निवेक्ष्यते ॥ (88)

एतच्च भण्यते श्रुत्या पुंसो वैराग्यसिद्धये ।
संसारादविरक्तस्य मुक्तीच्छा नेह कस्यचित् ॥ (89)

फलहेत्वोर्मिथोऽत्यन्तं सर्वदाऽव्यतिरेकतः ।
सम्यग्ज्ञानादृते नास्ति तद्धेतूच्छित्तिकारणम् ॥ (90)

त्यक्त्वान्यत्सकलं तस्मात् सम्यग्ज्ञानस्य लब्धये ।
मनोवाक्तनुचेष्टाभिर्महान्तं यत्नमाचरेत् ॥ (91)

तद् व्याचष्टे—**स हीति** । (85 86) पुरुषस्यान्नभोक्तृत्वात् कथं [1]तत्कर्तृत्वम्, अत्राह—**यथेति** । [2]कर्तृभोक्त्रोः मिथो बन्धस्योक्तत्वादित्यर्थः । (87) कार्यत्वादन्नस्य [3]अन्वक्षविनाशिनः कथमक्षय[4]त्वम्, अत्राह-**एवमिति** । गङ्गाप्रवाहवत् स्रोतोरूपेणेत्यर्थः । (88) जगतः क्षणिकत्वं कस्मादुच्यते, अत्राह—**एतच्चेति** । वैराग्येन वा किम्, अत्राह—**संसारादिति** । (89) हेतुमाह—**फलेति** । संसारस्य तद्धेतुरागादेश्च अविना[5]भावादित्यर्थः । विरक्तस्यापि मुमुक्षोः न श्रवणादौ प्रवृत्तिः, कर्मकार्यत्वात् मुक्तेः, अत्राह-**सम्यगिति** । (90) फलितमाह—**त्यक्त्वेति** । कर्मत्यागपुरःसरं धीसाधनं श्रवणादिकं कुर्यादित्यर्थः । (91)

---

1. तत्कर्तृत्वं—अन्नकर्तृत्वम् ।
2. कर्तृभोक्त्रोः—कर्तृत्वभोक्तृत्वयोः ।
3. अन्वक्षविनाशिनः—प्रत्यक्षं विनाशवतः ।
4. अक्षयत्वं—अविनाशित्वम् ।
5. अविनाभावः—व्याप्तिः ।

पुमोऽक्षितित्वं यो वेद तस्येदं फलमुच्यते ।
सोऽन्नमत्ति प्रतीकेन वृत्त्यान्नं मुख्ययात्ति सः ॥ (92)

नैवंविद् गुणतामेति ह्यन्नं प्रति कदाचन ।
प्रधानभूतः सन् भुङ्क्ते सर्वदान्नं स कामतः ॥ (93)

अपि देवान् स संयाति तथोर्जं चोपजीवति ।
प्रशंसैषा यथोक्तस्य विज्ञानस्येति निश्चितिः ॥ (94)

अन्नत्रयं यदुत्कृष्टं तस्यायं निर्णयोऽधुना ।
शरीरकार्यसंस्थस्य वर्ण्यतेऽध्यात्मरूपकम् ॥ (95)

प्रासङ्गिकं परिसमाप्य, व्या[1]ख्यामनुवर्तयति—पुंस इति । (92) उक्तमर्थं व्यतिरेकद्वारा उपपादयति—नैवंविदिति । (93) '[2]स देवान्' इत्यादेरर्थमाह—अपीति । (94)

उत्तरश्रुतितात्पर्यकथनम्

उत्तरसन्दर्भतात्पर्यमाह—अन्नेति । साधनात्मकान्न[3]चतुष्टयं व्याख्याय, स्थूलसूक्ष्मदेहात्मस्थितफलरूपान्न[4]त्रयव्याख्यानाय उत्तरग्रन्थ इत्यर्थः । समुदा(ह)-[य]तात्पर्यमुक्त्वा, अनन्तरवाक्यतात्पर्यमाह—वर्ण्यत इति । आदौ आध्यात्मिक-मन्त्रत्रयमुच्यते इत्यर्थः । (95)

---

1. व्याख्यामनुवर्तयति—'यो वैतामक्षितिं वेद' इत्यादिश्रुतिव्याख्यामनुवर्तयति । 'सोऽन्नमत्ति प्रतीकेनेति, मुखं प्रतीकं, मुखेनेत्येतत् ।' इति श्रुतिः । तत्र मन्त्रगत-प्रतीकपदस्य मुखमर्थं उक्तः । मुखपदस्य मुख्यत्वं—प्राधान्यमित्यर्थः । तथा च उपासकः प्राधान्येन अन्नमत्ति नान्नं प्रति गुणभूतः इति मन्त्रार्थः । तदुक्तं 'सोऽन्न-मत्ति प्रतीकेन वृत्त्यान्नं मुख्ययात्ति सः ।' इति । मुख्यया वृत्त्या—प्राधान्येन अन्नं सः अत्तीति तदर्थो बोध्यः ।
2. स देवानिति 'स देवानपि गच्छति, स ऊर्जमुपजीवतीति प्रशंसा ।' इति श्रुतिः । ऊर्ज—अमृतम् ।
3. अन्नचतुष्टयं—सर्वसाधारणं, देवान्नद्वयं, पश्वन्नमिति चतुष्टयम् ।
4. त्रयेति मनोवाक्प्राणात्मकत्रयेत्यर्थः ।

प्रयोगसमवायित्वं पूर्वेष्वन्नेषु वर्णितम् ।
मोक्तारश्चापि ये तेषां तेऽपि श्रुत्योपवर्णिताः ॥ [96]

प्रयोगसमवायित्वात्पूर्वेषां कर्मणां सताम् ।
मनआदि त्रयं कार्यं तादर्थ्येनोत्तरा श्रुतिः ॥ [97]

उत्पाद्य त्रीण्यथान्नानि मेधया तपसा पिता ।
मनो वाचं तथा प्राणमात्मार्थं तानि चाकरोत् ॥ [98]

मनसोऽस्तित्वसिद्ध्यर्थं श्रुत्योपन्यस्यतेऽनुमा ।
सतश्च तस्य कामादिरूपाण्यपि च वक्ष्यति ॥ [99]

पूर्वोत्तरयोः हेतुहेतुमद्भावाभावे कथं तद[1]नन्तरमे[2]तदुक्तम्, एतदनन्तरं तत् किं न स्यात्, अत्राह—प्रयोगेति । (96-97)

तृतीयकण्डिकार्थनिरूपणम्

'त्रीण्यात्मनेऽकुरुत' इति मन्त्रार्थवर्णनम्

वृत्तानुवादेन संगतिमुक्त्वा, 'त्रीण्या[3]त्मने' इत्यादेरर्थमाह—उत्पाद्येति । (98)

'अन्यत्रमनाः' इत्यादिश्रुतितात्पर्यकथनम्

'[4]अन्यत्रमनाः' इत्यादेः तात्पर्यमाह—मनस इति । तर्हि 'स्व[5]रूपं च' इति

---

1. तदनन्तरं—सर्वसाधारणादिचतुष्टयोक्त्यनन्तरम् ।
2. एतत्—मनआदित्रयम् ।
3. त्रीण्यात्मने इति 'त्रीण्यात्मनेऽकुरुतेति, मनो वाचं प्राणं, तान्यात्मनेऽकुरुत ।' इति श्रुतिः ।
4. अन्यत्रमना इति "अन्यत्रमना अभूवं नादर्शं, अन्यत्रमना अभूवं नाश्रौषमिति, मनसा ह्येव पश्यति मनसा शृणोति ।" इति श्रुतिः मनसोऽस्तित्वे प्रमाणप्रदर्शनपरा बोध्या ।
5. स्वरूपं चेति भाष्यमसंगतं पुनरुक्तत्वादिति 'तेषां मनसोऽस्तित्वं स्वरूपं च प्रति संशयः, इत्यत आह–अस्ति तावत्' इत्यादि, 'अन्यत्रमना अभूवम्' इत्यादिश्रुत्यवतरणिकाभाष्यम् । तत्र अस्तित्वमित्यनेन स्वरूपमित्यस्य पुनरुक्तत्वमिति भावः ।

अविद्याधिकृतावस्थां धर्मधर्म्यादिसंगतिः ।
अविद्याकार्यसंस्थैव न त्वसौ प्रत्यगात्मनः ॥ [100]

इत्येतत्प्रतिपत्त्यर्थं परो ग्रन्थोऽवतार्यते ।
मा भूत्कामादिधर्मित्वमात्मनीति प्रयत्यते ॥ [101)

पृष्टो जरद्गवं यान्तमद्राक्षीस्त्वमितीतरः ।
* ततोऽन्यत्रमना आसं नातोऽद्राक्षं त्वदीरितम् ॥ [102]

विषयान्तरसंबद्धं मनो दृष्टं घटादिवत् ।
* आत्मैकसाक्षिकं तच्च ह्युक्तार्थापत्तिसंश्रयात् ॥ [103]

भाष्यमसंगतं पुनरुक्तत्वात्, अत्राह—सतश्चेति । रूपा[1]णि—धर्मा इत्यर्थः । (99) विवक्षितं तात्पर्यमाह—अविद्येति । (100) कि[2]मत्र मानम्, अत्राह—इत्येतदिति । (101)

'अन्यत्रमनाः' इत्यादिश्लोकार्थकथनम्

एवं विभज्य तात्पर्यमुक्त्वा 'अन्यत्र' इत्यादेरर्थमाह—पृष्ट इति । इतरः वक्तीति शेषः । जरद्गव[3]धीहेतुसाकल्ये सति कदाचित् एव जायमानज्ञानं, विषयाद् व्यतिरिक्तहेतुसापेक्षं, [4]तस्मिन् सति कदाचित् जायमानत्वात्, यदेवं तदेवम्, यथा छेद्यादिसमवधाने कदाचिदेव जायमानछिदिक्रिया तदतिरिक्त-कुठारसापेक्षा इत्यनुमानमित्यर्थः । (102) इयुकारस्य साक्षिसिद्धं च तत्, इत्याह—विषयान्तरेति । (मा)[म]नोऽतिरिक्तधीकारणसाकल्ये सति कदाचिदेव

---

1. रूपाणि धर्मा इत्यर्थ इति तथा च स्वरूपपदं तदीयधर्माभिप्रायकमिति न पुनरुक्ततेति भावः ।
2. किमत्र मानम्—प्रत्यगात्मनि धर्मधर्मिसंगत्यभावे मानम् किम् ।
3. जरद्गवधीहेत्विति अत्र धीपदेन अन्तःकरणवृत्तिरुच्यते ।
4. तस्मिन् सति—धीविषये सति ।

* शास्त्रप्रकाशिकायां 'पृष्टो जरद्गवम्' इति वार्तिकं अर्थादिसंनिध्ये कदाचिदेव ज्ञानोत्पत्त्यनुपपत्तिः इत्यर्थापत्तिः मनःसाधिकेत्येवंपरतया व्याख्यातम् ।

* 'उक्तार्थापत्त्यवष्टम्भात् कारणान्तरसिद्धावपि, कथं मनःसिद्धिरित्याशङ्क्य, पारिशेष्या-दित्याह—तच्चेति ।' इति शास्त्रप्रकाशिकाकाराः ।

अस्त्यात्मा चित्स्वभावोऽत्र चक्षुश्चाविकलं तथा ।
सप्रकाशं गवाक्षं च न च पश्यति चेतनः ॥ [104]

* अतोऽनुमीयतेऽस्त्यन्यद्यस्मिन्न सति नेक्षते ।
द्रष्ट्रादि संहतं सर्वं यस्मिंश्च सति वीक्षते ॥ (105)

यत्तदस्ति मनस्तत्स्यात्प्रसिद्ध्या चास्ति तन्मनः ।
अभून्मम मनोऽन्यत्र यतो नाद्राक्षमित्यतः ॥ (106)

सदप्यात्मादिकं सर्वं दर्शनादावकारणम् ।
मनसैव यतो द्रष्टा गवादीह प्रपश्यति ॥ (107)

निःशेषप्रत्ययाधारधर्म्यस्तित्वं प्रसाध्य हि ।
कामादिधर्मसिद्ध्यर्थं काम इत्याद्यथोच्यते ॥ (108)

धीजन्मानुपपत्तिरर्थापत्तिश्च मानम्, इत्याह—**तच्चेति** । (103) [1]हेतुविशेषणासिद्धिमाशङ्क्य, परिहरति—**अस्तीति** । अन्वयव्यतिरेकावाह—**यस्मिन्निति** । (104-105) यत्किञ्चित्कारणसिद्धावपि न मनःसिद्धिः, अत्राह—**मन इति** । प्रसिद्ध्यापि मनः साधयति—**प्रसिद्ध्या चेति** । [2]तामाह—**अभूदिति** । अन्यत्र मनः अभूत् यतः, अतो नाद्रा(क्ष्य)[क्ष]मित्यर्थः । (106) मनोऽस्तित्वसाधनमुपसंहरति–**सदपीति** । अतोऽस्ति तन्मन इत्यर्थः । (107)

सावतरणं 'कामः संकल्पः' इत्यादिश्रुत्यर्थवर्णनम्

वृत्तानुवादेन [3]उत्तरमवतारयति—**निःशेषेति** । (108) कामादेः देहादि-

---

* 'विमतमात्माद्यतिरिक्तापेक्षं तस्मिन् सत्यपि कादाचित्कत्वात् घटवत्, इत्याह—अत इति' इति शास्त्रप्रकाशिका ।

1. **हेतुविशेषणासिद्धिमिति** तस्मिन् सति कदाचित् जायमानत्वादित्युक्तहेतौ विशेषणस्य कादाचित्कत्वस्यासिद्धिमित्यर्थः ।

2. **तामाह**—लोकप्रसिद्धिमाह ।

3. **उत्तरं**—'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतिवाक्यम् ।

साधनान्येव मनसो बुद्धिकर्मेन्द्रियाण्यपि ।
सहैवायतनैः सर्वैः प्राधान्यं मनसस्ततः ॥ (109)

* विषयाभिलाषः कामः स्यान्न विशेषेऽस्ति कारणम् ।
इन्द्रियालोचितार्थस्य स्यात्संकल्पोऽवधारणम् ॥ (110)

अनिश्चयात्मिका वृत्तिर्विचिकित्सेत्युदाहृता ।
आस्तिक्यबुद्धिः श्रद्धा स्यादश्रद्धा तद्विरोधिनी ॥ (111)

धृतिश्रद्धे विना न स्युः कामाद्याः कारणादृते ।
यतोऽकामादयोऽप्यत्र ह्युक्ता एवार्थतो मताः ॥ (112)

धारणं च धृतिर्ज्ञेया बुद्ध्योपात्तस्य वस्तुनः ।
विपर्ययोऽधृतिस्तस्या ह्रीर्लज्जेत्यभिधीयते ॥ (113)

विज्ञानं निश्चितं धीः स्यात् भयं भीरभिधीयते ।
एतत्सर्वं मनो ज्ञेयमिति तादात्म्यमुच्यते ॥ (114)

धर्मत्वं [1]तदन्वयव्यतिरेकवत्त्वात् । कथं मनोधर्मत्वम्, अत्राह— **साधनानीति** । (109) कामादिपदार्थमाह— **विषयेति** । सामान्यतो दृष्टस्य विशेषतोऽवधारणं [2]काममूलं संकल्प इत्यर्थः । (110-111) अधृतिः अश्रद्धेति धृतिश्रद्धयोरभाववत् कामाद्यभावः [3]कस्मात् नोक्तः, अत्राह— **धृतिश्रद्धे इति** । श्रद्धाधृत्योः कामादिहेतुत्वात् तयोरभावोक्त्या [4]तत्कार्यकामाद्यभावोऽप्यर्थादुक्त एवेत्यर्थः । (112) 'धृतिः' इत्यादेरर्थमाह— **धारणं चेति** । (113-114) बुद्धिं हित्वा मनस्तादात्म्यं

---

1. **तदन्वयव्यतिरेकवत्त्वात्**—देहे सति कामादिः असति नेति देहाद्यन्वयव्यतिरेकवत्त्वात् ।
2. **काममूलं**—कामस्य मूलम् ।

* **न विशेषेऽस्ति कारणमिति** अनेन 'कामः स्त्रीव्यतिकराभिलाषादिः' इति भाष्ये अरुचिरुक्तेति बोध्यम् ।

3. **कस्मान्नोक्त इति** 'कामः संकल्पः' इत्यादिश्रुतौ कुतो नोक्त इत्यर्थः ।
4. **तत्कार्येति** श्रद्धाधृतिकार्येत्यर्थः ।

बुद्धेश्च मनसश्चैक्यं विवक्षित्वोपसंहृतिः ।
इन्द्रियाण्यपि सर्वाणि स्वान्तस्यैव तु वृत्तयः ॥ (115)

यतः स्वकार्यनिर्देशः स्वान्तस्य स्पर्शनेन्द्रिये ।
मन एव ततो ज्ञेयं शरीरेन्द्रियसंहतिः ॥ (116)

पुंसो भोगप्रसिद्ध्यर्थं वैचित्र्यं धीर्निगच्छति ।
देहेन्द्रियाद्यवस्थाभिस्ततो धीः सर्वमेव तु ॥ (117)

'जिघ्रन्ती भवति घ्राणं पश्यन्ती चक्षुरुच्यते ।
शृण्वती भवति श्रोत्रं' इति व्यासोऽप्यभाषत ॥ (118)

शुक्लं कृष्णमणु स्थूलमिति धीः कर्मणो वशात् ।
द्वैताधिकारमापन्ना वैश्वरूप्यं निगच्छति ॥ (119)

प्रत्यक्चिद्देशभेदेन न हि शुक्लादिवस्तुनः ।
सत्ता संभाव्यतेऽन्यत्र प्रत्यग्वद् ग्राह्यवस्तुनः ॥ (120)

कस्मादुच्यते, तत्राह—**बुद्धेश्चेति** । कामादिवत् इन्द्रियाण्यपि मनोवृत्तयः इत्येवंपरत्वेन '[1]तस्मादपि' इति वाक्यं व्याकरोति—**इन्द्रियाणीति** । (115) [2]हेतुत्वेन 'पृष्ठतः' इत्येतत् व्याचष्टे—**यत इति** । उपसंहरति —**मन एवेति** । (116)सर्वस्य मनोमात्रत्वे, किमर्थं चक्षुराद्यात्मना मनसोऽवस्थानम्, अत्राह—**पुंस इति** । (117) [3]धीरेव चक्षुराद्यात्मना स्थिता, इत्यत्र मानमाह—**जिघ्र(ती)[न्ती]ति** । (118) [4]तथापि न मनसः सर्वत्वं, विषयस्य ततो [5]भेदात्, अत्राह—**शुक्लमिति** । (119) सर्वस्य [6]धीविवर्तत्वे धीरेवाद्वया, नात्मा,

---

1. **तस्मादपीति** 'तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति ।' इति श्रुतिः ।
2. **हेतुत्वेन**—इन्द्रियाणां मनोवृत्तित्वे हेतुत्वेन ।
3. **धीरेव**—मन एव ।
4. **तथापि**—इन्द्रियाणां मनोरूपत्वेऽपि ।
5. **ततो भेदात्**—मनसो भिन्नत्वात् ।
6. **धीविवर्तत्वे**—मनोविवर्तत्वे । उत्तरत्रापि धीपदेन मनो ग्राह्यम् ।

नातः शुक्लादिवस्त्वस्ति बुद्धिरेव क्रियावशात् ।
शुक्लादिरूपतामेति पुरुषार्थप्रसिद्धये ॥ (121)

धीर्विपर्ययरूपेयं यतः शुक्लादिरूपिणी ।
मन एवेत्यतः प्राज्ञाः सर्वरूपं प्रचक्षते ॥ (122)

आत्मार्थेनैव सत्यत्वं कृत्स्नात्मीयस्य वस्तुनः ।
* तस्य तन्मात्रयाथात्म्यादिति पूर्वमवादिषम् ॥ (123)

अपि सर्वाणीन्द्रियाणि मन एव यतस्ततः ।
पृष्ठतोऽपि नरः स्पृष्टः मनसैव प्रपद्यते ॥ (124)

पराङ्मुख उपस्पृष्टः पाणेः स्पर्शोऽयमीदृशः ।
इति स्पर्शविशेषं ना मनसैव प्रपद्यते ॥ (125)

त्वचोपस्पृष्टिमात्रेण स्पर्शमात्रं प्रपद्यते ।
स्पर्शतादिविशेषं तु मनसैव प्रपद्यते ॥ (126)

इत्यत्राह—**प्रत्यगिति** । सकार्यं मनः चिन्मात्रमित्यर्थः । (120) [1]प्रासङ्गिकं चोद्यं परिहृत्य, प्रकृतमेवाह—**नात इति** । (121) सर्वस्य धीकार्यत्वे विद्वत्प्रसिद्धिं मानयति—**धीरिति** । (122) तर्हि अधिष्ठानत्वात् धियः सत्यत्वं आत्मवत्, इत्यत्राह—**आत्मार्थेनेति** । (123)

'तस्मादपि' इति श्रुतेरक्षरशो व्याख्यानम्

'तस्मादपि' इति वाक्यं संक्षेपतो व्याख्यातम् । इदानीमक्षरशो व्याकरोति—**अपीति** । (124) 'पृष्ठतः' इत्येतत् विशदयति—**पराङ्मुख इति** । (125) मनसैव इति कथमवधारणं त्वचोऽपि स्पर्शधीहेतुत्वात्, **अत्राह—**

---

1. **प्रासङ्गिकं चोद्यं**—सर्वस्य धीविवर्तत्वप्रसङ्गादागतं धियः अद्वयत्वचोद्यम् ।
* **पूर्वमवादिषमिति** 'प्रत्यक्चिद्द्वयभेदेन' इति वार्त्तिके अवादिषमित्यर्थः ।

मनसैव यतोऽशेषकरणस्वार्थधीभवः ।
सर्वं हि मन एवेति श्रुतिराह वचस्ततः ॥ (127)

मनस्तावत्सुनिर्णीतं शरीरं चेन्द्रियाणि च ।
तदनन्तरतो वाचो व्याख्या प्रस्तूयतेऽधुना ॥ (128)

यः कश्चेत्यविशेषोक्तिर्नादवर्णपदोक्तिभिः ।
संयोगोत्थो वियोगोत्थो यश्चापि प्रत्ययात्मकः ॥ (129)

वागेव स इति ज्ञेयः, कुतो यस्मादियं सदा ।
समानयोने रूपस्य वाक् प्रमाऽतोऽवबोधिका ॥ (130)

वागेव प्रत्ययादौ स्यादित्येतद्गम्यते कुतः ।
स्वाभिधेयावबोधस्य ह्यासमाप्तेरियं यतः ॥ (131)

त्वचेति । (126) फलितं निगमयति—**मनसेति** । अशेषकरणानां—इन्द्रियाणां, स्वार्थेषु—विषयेषु, धीभवः—ज्ञानोत्पत्तिरित्यर्थः । (127)

अन्नत्रयान्तःपातिवाचो निरूपणम्

'[1]यः कश्च' इत्यादेस्तात्पर्यमाह—**मनस्तावदिति** । आध्यात्मिकवाक्करणं व्याख्यायते इत्यर्थः । (128) अविशेषोक्तिः कस्मात्, अत्राह—**यः कश्चेति** । ध्वनि[:]वर्णः पदम् इत्येतैः सह वेणुदलादिसंयोगजः विभागजश्च शब्दः [2]तदुत्थप्रत्ययः करणान्तरजप्रत्ययश्च वागेवेति प्रतिपत्तव्य इत्यर्थः । [3]सर्वस्य वाक्त्वे हेतुं (प्रच्छय)[पृच्छ]ति—**कुत इति** । तमाह—**यस्मादिति** । नामरूपयोरविद्याकार्यत्वात् [4]समानयोनित्वम् । तत्र समानयोनेः प्रका(श)[श्य]स्य वाक् अवबोधिका प्रमा प्रकाशकं ज्ञानं यतः, अतः प्रत्ययादेः वाक्त्वमुपपन्नमित्यर्थः । (129-130)[5]धीशब्दयोः वाङ्मात्रत्वे किं मानमिति, उत्तरवाक्यमवतारयितुं पृच्छति

---

1. **यः कश्चेति** 'यः कश्च शब्दो वागेव ।' इति श्रुतिः ।
2. **तदुत्थप्रत्ययः**—शब्दजन्यवृत्तिः ।
3. **सर्वस्य**—प्रत्ययसहितशब्दस्येति यावत् ।
4. **समानयोनित्वं**—एकोपादानकत्वं, स्वोपादानोपादेयत्वमिति यावत् ।
5. **धीशब्दयोः**—प्रत्ययशब्दयोः ।

यतोऽत्यर्थं प्रवृत्ता वाक् घटबोधे प्रदीपवत् ।
अर्थावबोधनं कार्यं वाचो नान्यदितोऽपरम् ॥ (132)

शब्दोच्चारणशक्तं हि ननु वागिन्द्रियं मतम् ।
कथं तद्विषयः शब्दो वागित्यत्राभिधीयते ॥ (133)

सत्यमन्यत्र तद्ग्राह्यं तस्य तत्रैव योग्यतः ।
इह त्वन्नत्रयस्यैव सर्वात्मत्वं विवक्षितम् ॥ (134)

मनोऽन्तःपाति निखिलं रूपं यद्वद्विवक्ष्यते ।
* तस्य प्रकाशकस्तद्वत् सर्वः शब्दो विवक्ष्यते ॥ (135)

—वागेवेति । '[1]सैषा' इत्यादि [त][2]दुत्तरत्वेनावतारयति—**स्वाभिधेयेति ।** स्वाभिधेयावबोधस्य अत्यर्थं यतः प्रवृत्ता इति संबन्धः । विवक्षितं विशदयति—**अर्थेति** । अर्थज्ञानार्थं वाचः प्रवृत्तत्वात् [3]ततोऽन्यत् [4]तस्या न [5]कार्यमित्यर्थः । (131-132) [6]प्रकाशकमात्रं वाक्शब्देनोच्यते इत्युक्तम् । तत्र चोदयति—**शब्देति** । (133) अर्धाङ्गीकारेण परिहरति—**स(त्व)[त्य]मिति** । अनङ्गीकृतमाह—**इह त्विति ।** अन्नत्रयसर्वात्मत्वस्य प्रसिद्धवागिन्द्रियग्रहेऽनुपपत्तेरित्यर्थः । (134) वागि(त)[ति]शब्द इति चात्र प्रकाशकमात्रं ग्राह्यमित्येतत् दृष्टान्तेनाह—**मन इति** । प्रकाश्यमात्रं रूपं विवक्ष्यते यथेत्यर्थः । (135) [7]शब्देन्द्रियं व्यावर्त्य,

---

1. **सैषा इत्यादीति** 'सैषा ह्यन्तमायत्ता ।' इति वाक्यम् ।
2. **तदुत्तरत्वेन**—मानप्रश्नोत्तरत्वेन ।
अत्र 'य कश्च शब्दो वागेव सा' इत्येकं वाक्यम् । 'एषा ह्यन्तमायत्ता' इति अपरं वाक्यमिति भाष्यादवगम्यते । शास्त्रप्रकाशिकातोऽपि तथैवावगम्यते इति बोध्यम् ।
3. **ततोऽन्यत्**—अर्थज्ञानादन्यत् ।
4. **तस्याः**—वाचः ।
5. **न कार्यमिति** शब्दप्रत्ययावर्थप्रकाशकौ । अतो न तौ वाचस्तत्त्वतो भिद्येते । तद्वत् प्रकाशकत्वादिति प्रकाशकमात्रस्य वाक्त्वं युक्तमिति भावः ।
6. **प्रकाशकमात्रं**—प्रकाशकसामान्यम् ।

* **शब्दो विवक्ष्यते**—वागितिपदेन शब्दः विवक्ष्यते ।

7. **शब्देन्द्रियं**—शब्दोच्चारणशक्तमिन्द्रियं, वागिन्द्रियमिति यावत् ।

प्रकाशस्यैव सर्वस्य शब्दत्वप्रतिपत्तये ।
एषा हि नेत्यतो वक्ति वागिन्द्रियनिवृत्तये ॥ (136)

रूपात्मकं यथा चक्षू रूपस्यैव प्रकाशकम् ।
वाक् च शब्दात्मिका तद्वच्छब्दस्यैवास्तु दीपिका ॥ (137)

इति चोद्यं समाशङ्क्य परिहारं प्रचक्षते ।
एषा हि नेति केचित्तु नेयं दीपादिवन्मता ॥ (138)

श्रोत्रादिकरणग्राह्यं सर्वं तद्रूपमुच्यते ।
तस्य प्रकाशिकैवेयं न प्रकाश्या प्रदीपवत् ॥ (139)

प्रकाश्यमेव चात्यन्तं मनो रूपं यथा तथा ।
प्रकाशिकैवं चात्यन्तं वाग्रूपस्येति निश्चितिः ॥ (140)

प्रकाशकमात्रस्य [1]ग्रहणार्थं 'एषा हि न' इति वाक्यम्, इत्याह—प्रकाशस्येति । (136)

'एषा हि न' इत्यस्य भर्तृप्रपञ्चव्याख्यानम्

'एषा हि न' इत्यस्य भर्तृप्रपञ्चमतेन व्यावर्त्यं दर्शयति—रूपात्मकमिति । (137) [2]परिहारत्वेन वाक्यमवतारयति—इति चोद्यमिति । परिहारं स्पष्टयति—नेयमिति । दीपो यथा सजातीयग्राहकः, न तथा वाक् । किन्तु [3]प्रकाश्यमात्रप्रकाशि(वा)[का] । अतः प्रकाशमात्रं वागित्यर्थः । (138) [4]रूपमात्रप्रकाशकस्य वाक्त्वे चक्षुर्मात्रस्य वाग्रूपता स्यात् नान्यस्य, अत्राह—श्रोत्रेति । प्रदीपवत्—यथा दीपः प्रकाशकः प्रकाश्यश्च नैवं वागित्यर्थः । (139) प्रकाशिकैव इत्येतत् सोदाहरणमाह—प्रकाश्यमेवेति । (140) [5]प्रसिद्ध(मान)-

---

1. ग्रहणार्थमिति वाक्पदेनेत्यादिः ।
2. परिहारत्वेन—चोद्यपरिहारत्वेन ।
3. प्रकाश्यमात्रप्रकाशिका—प्रकाश्यसामान्यप्रकाशिका ।
4. रूपमात्रप्रकाशकस्येति अत्र मात्रशब्दः इतरव्यावृत्त्यर्थः । एवं चक्षुर्मात्रस्येत्यत्रापि ।
5. प्रसिद्धनामरूपेति प्रसिद्धं नाम देवदत्तादि । प्रसिद्धं रूपं शुक्लादि ।

प्रकाश्यमेव रूपं स्यात् प्रकाशो वाक् तथैव च ।
* विद्यादेतत् समासेन लक्षणं रूपसंज्ञयोः ॥ (141)

नामापि गृह्यमाणं सद्रूप भवति शौक्ल्यवत् ।
रूपं च बोधयत्तद्वत् नामपक्षेऽवतिष्ठते ॥ (142)

एवं वाङ्मनसे सम्यग्व्याख्याय प्रविभागशः ।
तयोर्विधारणः प्राणस्त्वनिरुक्तोऽथ भण्यते ॥ (143)

अन इत्यविशिष्टस्य वायोर्ग्रहणमिष्यते ।
स एव प्रादिसंबन्धाद्विशेषार्थो भवेदसुः ॥ (144)

उत्सर्गो मुखनासाभ्यां पिण्डस्य प्रणतिस्तथा ।
प्राणो नाम मरुद्वृत्तिरपानस्त्वधुनोच्यते ॥ (145)

* अवाग्वायोरधःश्वासो देहस्यावाग्गतिस्तथा ।
अपान एष कथितो, व्यानः सांप्रतमुच्यते ॥ (146)

[नाम]रूपग्रहनिवृत्त्यर्थं तल्लक्षणमाह—**प्रकाश्यमिति** । (141) [1]लक्षणयोरन्योन्यत्रातिव्याप्तिमाशङ्क्याह—**नामेति** । (142)

अन्नत्रयान्तःपातिप्राणस्य व्याख्यानम्

वृत्तानुवादेन '[2]प्राणः' इत्यादि अवतारयति—**एवमिति** । (143) प्राणादिभेद औपाधिकः न स्वाभाविकः, इति मत्वाऽऽह—अ(त)[न] **इति** । (144) प्रादिसंबन्धात् इत्येतत् विशदयति—**उत्सर्ग इति** । पिण्डस्य (प्राणिनि)[प्रणतिः]·

---

* **रूपसंज्ञयोरिति** संज्ञा—नाम । नामरूपयोरित्येतत् ।

1. **लक्षणयोरन्योन्यत्रेति** नामलक्षणस्य रूपे, रूपलक्षणस्य नाम्नि चेत्यर्थः ।

2. **प्राण इत्यादीति** "प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एव ।" इति श्रुतिः ।

* '**अवाग्वायोरपश्वासः**' इति मु. पु. पाठः ।

वीर्यवत्कर्महेतुत्वं व्याप्य देहे च वर्तनम् ।
व्यानवृत्तिरियं प्रोक्ता ह्युदानाख्यापि कीर्त्यते ॥ (147)

योद्यमादिक्रियाहेतुस्तथाभ्युदयकर्मकृत् ।
उत्कर्षहेतुर्देहे नुः वृत्तिः सोदानसंज्ञिता ॥ (148)

समाहरति वृत्तीर्यो हृद्देशे कीलवत् स्थितः ।
स समान इति ज्ञेयः सर्वकार्योपसंहृतिः ॥ (149)

यस्यैता वृत्तयः प्रोक्ता वृत्तिमान्सोऽन उच्यते ।
संपूर्यावस्थितो देहं शाकल्यप्रश्ननिष्ठितः ॥ (150)

* प्राणशब्दः पुरा प्रोक्तो वृत्तिमात्राभिधायकः ।
अन्ते वृत्तिमदर्थः स्यात् सर्वं प्राण इतीरणात् ॥ (151)

देह(स्या)[स्यो]न्नतिरिति यावत् । अवाग्वायोः इत्येतस्य स्फुटीकरणं अघः (श्वासर) [श्वास] इति । उत्कर्षहेतुत्वमुपपादयति— **अभ्युदयकर्म**(त्व)[कृ]**दिति** । सर्वकार्योपसंहृतिः—सर्वस्य अशितस्य पीतस्य च सर्वत्र देहे समुपहृतिः नयनम्, तद्धेतुरित्यर्थः । (145–146–147–148–149) अनशब्दार्थमुक्त्वा तस्य स्थानमाह—**यस्येति** । किं तस्य स्वरूपं, तदाह—**शाकल्येति** । 'कस्मिन्नुदानः प्रतिष्ठित इति, समाने इति' (बृ. 6-9-26) समानशब्देनोक्त इत्यर्थः । (150) 'इत्येतत्सर्वं प्राण एव' इत्ययुक्तम्, प्राणस्य वृत्तिविशेषत्वात्, इत्याशङ्क्य, [1]अत्र प्राणशब्दार्थमाह— **प्राणेति** । (151) '[2]एतन्मयो वा अयमात्मा' इत्यत्र

---

1. **अत्र प्राणशब्दार्थमिति** 'एतत्सर्वं प्राण एव' इति वाक्ये प्राणशब्दस्यार्थमित्यर्थः ।

* **पुरा प्रोक्त इति** 'प्राणोऽपानो व्यानः' इत्यत्र आदौ प्राणशब्दः वृत्त्यर्थक इत्यर्थः ।

2. **एतन्मय इति** "एतन्मयो वा अयमात्मा, वाङ्मयो मनोमयः प्राणमयः ।" इति श्रुतिः ।

नाम रूपं तथा कर्म संहतं सत् त्रिदण्डवत् ।
मिथः संकीर्णवृत्तिस्थं देह आत्मेति चोच्यते ॥ (152)

एतावानेव संघातो देहः प्राणादिरूपकः ।
वाङ्मयोऽथ प्राणमयस्तथैव च मनोमयः ॥ (153)

नामात्र वाङ्मयं सर्वं रूपं सर्वं मनोमयम् ।
तद्वत् प्राणमयं कर्म देहस्यास्यैष संग्रहः ॥ (154)

अन्नत्रयविभागोऽयमध्यात्म उपवर्णितः ।
अथाधिभूतविषये विभागस्तस्य कीर्त्यते ॥ (155)

आत्मशब्दार्थमाह—**नामेति** । नामादेः मिथः संहतत्वं स्पष्टयति—**संकीर्णमिति** । मिथः संकीर्णवृत्त्या पिण्डीभूय स्थितमित्यर्थः । (152) 'वाङ्मयः' इत्यादेरर्थमाह—**एतावानिति** । (153) आध्यात्मिकं नामादि विभजते—**नामात्रेति** । (154)

चतुर्थादिदशमपर्यन्तकण्डिकार्थनिरूपणम्
वाङ्मनःप्राणानामाधिभौतिको विस्तारः

वृत्तं संकीर्त्य उत्तरतात्पर्यमाह—**अन्नत्रयेति** । (155) 'वागेवायम्' इत्यादेः [1]पर्यायपञ्चकस्यार्थमाह—**भूर्लोकमिति** । या वागिह अधिभूते प्रोक्ता,

---

1. **पर्यायपञ्चकस्येति** प्राजापत्यानामन्नानां वाङ्मनःप्राणानां लोकत्रयत्वेन वेदत्रयत्वेन, देवपितृमनुष्यरूपत्वेन, पितृमातृप्रजात्वेन, विज्ञातविजिज्ञास्याविज्ञातत्वेन च विस्तारः उपासनार्थमुक्तः पञ्चभिः पर्यायैः । "त्रयो लोका एत एव, वागेवायं लोकः मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः । त्रयो वेदा एत एव, वागेवर्ग्वेदः मनो यजुर्वेदः प्राणः सामवेदः । देवाः पितरो मनुष्या एत एव, वागेव देवाः मनः पितरः प्राणो मनुष्याः । पिता माता प्रजा एत एव, मन एव पिता, वाङ्माता प्राणः प्रजा । विज्ञातं विजिज्ञास्यमविज्ञातमेत एव, यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति । यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्य मन एनं तद्भूत्वाऽवति । यत्किञ्चाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावति ।" इति श्रुतिरनुसन्धेया । वार्त्तिके प्रतिपत्तिसौकर्याय विभज्य वाचि मनसि प्राणे चाध्यात्मिके भूरादीनां पञ्चानां पञ्चानां प्रत्येकं दृष्टिः विवृतेति बोध्यम् ।

भूर्लोकं जानतर्ग्वेदं देवा माता च वागियम् ।
अधिभूत इह प्रोक्ता विज्ञातं यच्च सा च वाक् ॥ (156)

अन्तरिक्षं यजुर्वेदः पितरश्च पिता तथा ।
इह यच्च विजिज्ञास्यं तन्मनोऽत्राधिभौतिकम् ॥ (157)

द्युलोकः सामवेदश्च मनुष्याः प्रजया सह ।
यच्च किञ्चिदविज्ञातं प्राणोऽसावाधिभौतिकः ॥ (158)

यत्किञ्चिदिह विज्ञातं तद्वाग्रूपं प्रचक्षते ।
मनोरूपं विजिज्ञास्यं प्राणस्याज्ञातमेव तु ॥ (159)

भूर्लोकादिषु सर्वेषु मनोवाक्प्राणलक्षणम् ।
यथासंभवमायोज्यमेकैकस्मिंस्त्रयं त्रयम् ॥ (160)

अधिभूते यतोऽशक्या वक्तुं वागादिविस्तृतिः ।
यत्किञ्चेत्युपसंहारं लक्षणोक्त्या ततोऽकरोत् ॥ (161)

लक्षणेनैव संसिद्धे आधिभौतिकसंग्रहे ।
त्रय इत्यादिकोक्तिस्तु नियमार्थेति निश्चयः ॥ (162)

तां भूर्लोकं ऋग्वेदं(व)[च] जानत । ये देवाः, या माता, यच्च विज्ञातं, तत्सर्वं वागेवेत्यन्वयः । (156) यथा भूर्लोकादिधीः वाचि कार्या, तथा अन्तरिक्षादिधीः मनसि कार्या इत्याह—**अन्तरिक्षमिति** । (157) द्युलोकादिदृष्टिः प्राणे कर्तव्या, इत्याह—**द्युलोक इति** । (158) 'यत्किञ्च विज्ञा(न)[त]म्' इत्यादेरर्थसंक्षेपमाह—**यत्किञ्चिदिति** । (159) भूरादीनां प्रत्येकं [1]विज्ञातादिरूपत्रयवत्त्वात् कथं वागादेः तद्रूपत्वं, अत्राह—**भूरिति** । तत्रापि विज्ञातादिकं वागादिरेवेत्यर्थः । (160) विज्ञातादेः विशेषतो निर्देशासंभवात् 'यत्किञ्च' इति सामान्योक्तिरनर्थिका, इत्यत्राह—**अधिभूत इति** । (161) सामान्योक्तिरूपलक्षणेनैव आधिभौतिकसंग्रहसिद्धेः, '[2]वागेवायम्' इत्यादि अनर्थकम्, अत्राह—**लक्षणेनेति** । भूराद्यात्मना वागादीनामुपासनार्थमित्यर्थः । (162)

---

1. **विज्ञातादिरूपत्रयेति** विज्ञातविजिज्ञास्याविज्ञाताख्यरूपत्रयेत्यर्थः ।

2. **वागेवायमित्यादीति** विशेषनिर्देशकवाक्यमिति शेषः ।

व्याख्याने प्रस्तुते त्वस्मिन्नविद्यायाः समन्ततः ।
कार्यकारणरूपेण तस्या एषोपसंहृतिः ॥ (163)

प्राणात्मना तदज्ञातं ब्रह्म कारणमुच्यते ।
नामात्मना तु तन्मानं मनो रूपं च मीयते ॥ (164)

यतोऽविद्यैव सर्वेयं मनोवाक्प्राणलक्षणा ।
* अतस्तत्तत्त्वसंबोधात्तां जग्ध्वाऽमृतमश्नुते ॥ (165)

* विज्ञातादन्यदेवैतद्विज्ञाताच्चथा पृथक् ।
ब्रह्मतदुभयं जग्ध्वा पूर्णमेवावशिष्यते ॥ (166)

* विज्ञातादिविदं भोगैर्वागाद्या देवता नरम् ।
विज्ञातादिस्वरूपेण तमवन्ति पृथक् पृथक् ॥ (167)

'यत्किञ्च' इत्यादि वाक्यं आधिभौतिकविस्तरस्यैवोपसंहारार्थमित्युक्तम् । इदानीं सकारणं जगत् अनेनोपसंहृतम्, इत्याह—**व्याख्यान इति** । (163) किं तत् कारणं कार्यं वा, तदाह—**प्राणेति** । [164] कृत्स्नस्य साभासप्रत्यग्विद्यात्मत्वोपसंहारफलमाह—**यत इति** । [165] 'त(त्कृत्व)[त्त्व]संबोधात्' इत्ययुक्तम्, अव्यावृत्ताननुगतवस्त्वभावात्, अत्राह—**विज्ञातादिति** । [166] 'वागेनं [1]तद्भूत्वाऽवति' इत्यादेरर्थमाह—**विज्ञातादीति** । विज्ञातादिस्वरूपेण, दृष्टाः इति शेषः । [167]

---

* **तत्तत्वसंबोधादिति** तस्य साभासाविद्यात्मनो जगतः, तत्त्वं - अव्यावृत्ताननुगतं ब्रह्म, तस्य संबोधादित्यर्थः । **तां**—सकार्यामविद्याम् ।

* **विज्ञातादिति** तथा च 'अन्यदेव तद्विदितादथो अविदितादधि' इति श्रुतिः तादृशवस्तुनि मानमिति भावः । **उभयं जग्ध्वा**—विज्ञातमविज्ञातं च जग्ध्वा ।

1. **अवतीत्यादेरिति** 'वागेनं तद्भूत्वावति, मन एनं तद्भूत्वावति, प्राण एनं तद्भूत्वावति' इति फलवाक्यत्रयस्येत्यर्थः ।

* **विज्ञातादीति** विज्ञातविजिज्ञास्याविज्ञातानां वाङ्मनःप्राणानां विभूतिविदं नरं, वागाद्याः तत्तद्देवताः विज्ञातादितत्तद्रूपेण स्थित्वा पृथक् भोगैरवन्तीत्यर्थः ।

वागादयस्तावदुक्ताः संक्षेपेणाधिभौतिकाः ।
तेषामेवाधिदैवेऽथ व्याख्या प्रस्तूयतेऽधुना ॥ (168)

अध्यात्ममधिभूतं च यस्या रूपं पुरोदितम् ।
अधिदैवविवक्षायां तस्या वाच इदं वपुः ॥ (169)

अध्यात्ममधिभूतं च व्याख्याता याऽत्र वाक् पुरा ।
वाचा सर्वाधिदैविक्या संव्याप्ता साऽविभागतः ॥ (170)

* तामसं कठिनं चोर्वी शरीरं वाच उच्यते ।
अग्नेः प्रकाशरूपस्य साऽऽधारत्वेन संस्थिता ॥ (171)

अग्निस्तु सात्त्विकं रूपमाधेयत्वेन स क्षितौ ।
वर्तते तामसे रूपे दैव्येवं द्विविधा हि वाक् ॥ (172)

वाङ्मनःप्राणानामाधिदैविको विस्तारः

एकादशकण्डिकार्थनिरूपणम्

'तस्यै वाचः' इत्यादेः संगत्यर्थं वृत्तं संकीर्तयति—**वागादय इति** । [168] '[1]तस्यै वाचः' इत्यादेरक्षरार्थमाह—**अध्यात्ममिति** । आधाराधेयत्वेन द्वैविध्यात् आधिदैविकवाचः पृथिवी आधारः, अग्निराधेय इत्यर्थः । [169] '[2]तद्यावती' इत्यादेरर्थमाह—**अध्यात्ममिति** । अविभागतः संव्याप्ता—कार्यत्वात् कारणरूप(पाठात् आ)[वाचा तादा]त्म्येन संगतेत्यर्थः । [170] 'तस्याः' इत्यादि [3]भाष्यं तात्पर्यतो व्याख्यातम् । इदानीं पदशो व्याचष्टे—**तामसमिति** । [171-172]

---

1. **तस्यै वाच इत्यादेरिति** 'तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निः ।' इत्यस्येत्यर्थः ।
2. **तद्यावती इत्यादेरिति** 'तद्यावत्येव वाक् तावती पृथिवी तावानयमग्निः' इत्यस्येत्यर्थः ।
3. **भाष्यमिति** भगवत्पादभाष्यमित्यर्थः ।

* "भर्तृप्रपञ्चव्याख्यानमङ्गीकर्तुमनुकीर्तयति — **तामसमिति**" इति **शास्त्रप्रकाशिका**।

अध्यात्ममधिभूतं च वागेकैवाधिदैविकी ।
सामान्यव्यक्तिभेदेन ह्येकाऽनेका च सोच्यते ॥ (173)

इत्येवं केचिदिच्छन्ति तथान्यादृगपीष्यते ।
तत्रैवं सति वाग्रूपे एवं व्याख्यातरूपके ॥ (174)

यावत्येषा च वागुक्ता तस्या इत्येवमादिना ।
अध्यात्मादिपरिच्छिन्ना या वाक् सा तावती मता ॥ (175)

वागध्यात्मेऽधिभूते च तावत्येषाऽऽधिदैविकी ।
तेन तेन विशेषेण देवतैव यतो भवेत् ॥ (176)

एकैकत्राधिकारेऽग्निः स एव व्यवतिष्ठते ।
पृथिव्यग्निस्वरूपेण क्वचिद्वागात्मना भवेत् ॥ (177)

अत्र भर्तृप्रपञ्चव्याख्यानम्

आधिदैविकी वाक् कारणं, अध्यात्माधिभूत (त्वात्) [वाक्] कार्यमिति व्याख्यातम् । इदानीं भर्तृप्रपञ्चव्याख्यानं स्वीकार्यं दर्शयति—अध्यात्ममिति । [173] [1]अवस्थावस्थावद्भावेन अंशांशिभावेन च [2]तैरिष्टा वाग्देवता, इत्याह—तथान्यादृगिति । 'तद्यावत्येव वाक्' इत्यादेः [3]तदुक्तमर्थमाह—तत्रेति । एवमर्थनिश्चये सति एवं-सामान्यादिरूपेण वाचि व्याख्यातायां, यावती वाक् आधिदैविकी 'तस्यै' इत्यादिना व्याख्याता, अध्यात्माधिभूतपरिच्छिन्ना या वाक्, सा तावती—तदभिन्नेत्यर्थः । [174-175] अध्यात्मादिपरिच्छिन्नवाचः आधिदैविकवागभिन्नत्वमुक्त्वा, आधिदैविकवाचः अध्यात्मादिवागात्मत्वमाह—वागिति । [176] 'तावानयमग्निः' इत्यस्यार्थमाह—एकैकत्रेति । पृथिव्यात्मना वागात्मना च एकैकस्मिन्न[4]धिकारे अग्निः कार्त्स्न्येन द्रष्टव्य इत्यर्थः । [177]

---

1. अवस्थावस्थावद्भावेनेति सामान्यविशेषभावेनेत्यादिः ।
2. तैः—भर्तृप्रपञ्चैः ।
3. तदुक्तं—भर्तृप्रपञ्चोक्तम् ।
4. अधिकारे—स्थाने ।

यथोदितमिदं योज्यं मनःप्राणात्मनोरपि ।
दैव्यां वाचि यदुद्दिष्टं तुल्यव्याख्यानहेतुतः ॥ (178)

अध्यात्ममधिभूतं च प्रजा गीर्मनसोर्यथा ।
अधिदैवेऽपि तद्वाच्यमित्यर्थः पर आगमः ॥ (179)

मनसश्चन्द्रभावो हि सर्वत्र श्रूयते स्फुटः ।
तस्यादित्येन संबन्धः कस्मादत्राभिधीयते ॥ (180)

द्वादशकण्डिकार्थनिरूपणम्

[1]'अथैतस्य' इत्यादौ, कथितं न्यायमतिदिशति—**यथोदितमिति** । (178) [2]'तौ मिथुनम्' इत्यादेस्तात्पर्यमाह—**अध्यात्ममिति** । 'मन एवा(त्मा)-स्यात्मा [वाग्जाया] प्राणः प्रजा' इत्यध्यात्मे, 'मन एव पिता वाङ्माता प्राणः प्रजा' इत्यधिभूते च वाङ्मनसयोः प्राणस्य प्रजात्वमुक्तम् । तथा अधिदैवेऽपि [3]तस्य [4]तत्प्रजात्वं वाच्यम्, इत्यर्थेयं श्रुतिरित्यर्थः । (179)

[5]'असावादित्यः' इत्यादिकं श्रुत्यन्तरविरोधेनाक्षिपति—**मनस इति** । 'ब्रह्मर्णात्विजा मनसा चन्द्रेण' (बृ. 5-1-6) 'चन्द्रमा मनसो जातः' (पु. सू. 12-6) इत्यादावित्यर्थः । (180) परिहरति—**विवक्षितत्वादिति** । 'धियो यो

---

1. **अथैतस्येत्यादाविति** 'अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपं असावादित्यः, तद्यावदेव मनः तावती द्यौः तावानसावादित्यः ।' इत्यत्र, 'अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपं, असौ चन्द्रः, तद्यावानेव प्राणः तावत्य आपः । तावानसौ चन्द्रः ।' इत्यत्र चेत्यर्थः ।

2. **तौ मिथुनमित्यादेरिति** 'तौ मिथुनं समैतां, ततः प्राणोऽजायत' इत्यस्येत्यर्थः ।

3. **तस्य**—प्राणस्य ।

4. **तत्प्रजात्वं**—वाङ्मनसयोः प्रजात्वम् ।

5. **असावादित्य इत्यादिकमिति** 'असावादित्यः' इति आदित्यमनसोरैक्यमुक्त्वा, 'तौ मिथुनम्' इति अग्न्यादित्ययोः वाङ्मनोरूपयोः मिथुनवचनमित्यर्थः ।

* विवक्षितत्वादैक्यस्य मनोबुद्ध्योरतः श्रुतिः ।
आदित्येनैव सम्बद्धे मनश्चन्द्रमसा न तु ॥ (181)

प्रसवाधिकृतेश्चात्र सावित्रः प्रसवस्ततः ।
सवित्रैवाभिसंबन्धो मनसस्तेन शस्यते ॥ (182)

अनुग्रहव्यपेक्षायां मनसश्चन्द्रमा भवेत् ।
अधिदैवं तथाऽऽदित्यश्चक्षुषो देवता तथा ॥ (183)

अग्निरेव यतः सर्वप्रकाशो जगतीष्यते ।
रूपाणां प्रविभागश्च त्वष्टृपाकनिबन्धनः ॥ (184)

तयोर्ग्निमनसोरेवं प्रकाशप्रसवात्मनोः ।
* प्राग्यथोक्तात्मनोर्योगात् प्राणोऽभूदन्तरिक्षगः ॥ (185)

नः प्रचोदयात्' (गाय.) इति [1]बुद्धेरादित्यो देवता प्रसिद्धेत्यर्थः । (181) [2]हेत्वन्तरमाह—प्रसवेति । मनसः प्राणप्रसव उच्यते, 'ततः प्राणोऽजायत' इति । प्रसवस्य सवितृदेवत्वात् मनसः तत्संबन्ध इत्यर्थः । (182) तर्हि [3]चन्द्रमनःसंबन्धप्रतिपादकवाक्यानां का गतिः, अत्राह—अनुग्रहेति । (183)

चोद्यं परिहृत्य, अग्न्यादित्याभ्यामाधिदैविकवाङ्मनोरूपाभ्यां प्राणोत्पत्तिनिमित्तमाह—अग्निरिति । प्रकाशव्याप्तिं विना न किञ्चिज्जायते । प्रकाशः अग्निरेव । तथा पाकमन्तरेणापि न किञ्चिज्जायते । पाकश्चा[4]दित्यात्मक इत्यर्थः । (184) 'ततः प्राणोऽजायत' इत्यस्यार्थमाह—तयोरिति । (185) उक्तार्थं

---

1. बुद्धेरादित्यो देवतेति तथा च बुद्ध्यभिन्नमनसोऽपि आदित्यसंबन्धोऽभिहितः इति भावः ।

* 'विवक्षितत्वादैक्यस्य' इति वार्त्तिके भर्तृप्रपञ्चभाष्योक्तमेव प्रतिपादितमिति शास्त्रप्रकाशिकाकाराः ।

2. हेत्वन्तरमिति आदित्येन मनःसंबन्धे इत्यादिः ।

3. चन्द्रमनःसंबन्धेति चन्द्रेण मनसः संबन्धेत्यर्थः ।

4. आदित्यात्मक इति कालात्मकादित्यकृत इति यावत् ।

* यथोक्तात्मनोः—अग्न्यादित्यरूपयोरिति यावत् ।

प्राणोऽभवद्यथाध्यात्मे प्रजा वाक्स्वान्तयोस्तथा ।
प्राणस्यैवाधिदैवेऽपि प्रसवोऽयमिहोच्यते ॥ (186)

नान्नत्रयं व्यपेक्ष्येह जन्म प्राणस्य कथ्यते ।
किन्तु पाङ्क्तक्रियापेक्षं प्राणजन्माभिधीयते ॥ (187)

स यथाध्यात्मिके देहे प्राणस्तद्वत्प्रजापतेः ।
अन्तरिक्षगतः प्राणः स एष परमेश्वरः ॥ (188)

यतोऽसपत्नस्तेनायमिन्द्र इत्यभिधीयते ।
ननु वाङ्मनसे स्तोऽस्य तत्कुतोऽस्यासपत्नता ॥ (189)

नैवं, वाङ्मनसे यस्मात् प्राणवृत्त्यैव जीवतः ।
यदनेनान्नमत्तीति तस्मादेत इतीरणात् ॥ (190)

दृष्टान्तेन स्पष्टयति—प्राण इति । (186) 'मनो वाचं प्राणम्' (बृ. 3-5-3) इत्यत्र प्राणोत्पत्तेरुक्तत्वात् कथं पुनः तदुत्पत्तिरुच्यते, अत्राह—नान्नेति । वायोः पाङ्क्तकर्मफलस्यापि पाङ्क्तत्वोपपादनाय उत्पत्तिरुच्यते इत्यर्थः । (187) कोऽसौ प्राण उत्पन्नः, अत्राह—स यथेति । अन्नभूतप्राणस्यायं व्यष्टिरूपो वायुः आकाशस्थो भवेदित्यर्थः । तस्य [1]इन्द्रत्वासपत्नत्वगुणोपदेशादुपासनार्थः, इत्याह—स एष इति । अद्वितीयत्वादसपत्नः, असपत्नत्वादिन्द्र इत्यर्थः । वाङ्मनसयोः द्वितीययोः सत्त्वात् कथमसपत्नता, इत्याह—नन्विति । (188-189) प्राणाधीनत्वात् वाङ्मनसयोः न द्वितीयत्वमिति परिहरति—नैवमिति । तयोः प्राणाधीनत्वे 'यदनेनान्नमत्ति तेनैतास्तृप्यन्ति' (बृ. 3-3-18) इति वाक्यं, 'तस्मादेते एतेनाख्यायन्ते प्राणाः' (बृ. 3-5-21) इति च वाक्यं प्रमाण-

---

1. इन्द्रत्वासपत्नत्वगुणोपदेशादिति "स इन्द्रः स एषोऽसपत्नः द्वितीयो वै सपत्नः, नास्य सपत्नो भवति य एवं वेद ।" इति प्राणस्य इन्द्रत्वासपत्नत्वगुणकस्योपासनं तत्फलं चोक्तं बोध्यम् ।

प्राणस्यैव यतो वृत्ती उक्ते वाङ्मनसे अपि ।
प्राणस्यातोऽद्वितीयत्वं ततश्चेन्द्रत्वमेव च ॥ (191)

न सपत्नो भवत्यस्य योऽसपत्नं विवेद हि ।
असपत्नमुपासीनः ससपत्नः कुतो भवेत् ॥ (192)

उक्ता पाङ्क्तानुरोधेन वाङ्मनःप्राणसंश्रया ।
अन्नत्रयविभागेन प्रक्रिया त्वधुनोच्यते ॥ (193)

अध्यात्ममधिभूतं च तथा चैवाधिदैवतम् ।
उक्ता वागादयः सर्वे समा एवेति गृह्यताम् ॥ (194)

साम्यं केन प्रकारेणेत्यनन्ता इत्यतोऽवदत् ॥ (195)

नन्वध्यात्मेऽधिभूते च परिच्छिन्नाः पुरोदिताः ।
वागादयस्त्विह कथमनन्ता इत्युदीरणम् ॥ (196)

मित्यर्थः । (190) [1]किमतः, तत्राह—**प्राणस्येति** । (191) '**नास्य**' इत्यादि-[2]फलवाक्यार्थमाह—**न सपत्न इति** । (192)

त्रयोदशकण्डिकार्थविवरणम्

'[3]त एते सर्व एव समाः' इत्ययुक्तम् । प्राणसंवादे प्राणश्रैष्ठ्याव-धारणात्, अत्राह--**उक्तेति** । 'तौ मिथुनम्' इत्यादिना पाङ्क्तकर्मफलस्यापि पाङ्क्तत्वार्थं अन्तरिक्षस्थप्राणस्योत्पत्तिरुक्ता । इदानीं अन्नत्रयविभागेन स्थित-वागादिविषयोपास्त्यर्थं साम्योक्तेरविरोध इत्यर्थः । (193) [4]तद्वाक्यार्थमाह—**अध्यात्ममिति** । (194-195)

पूर्वापरविरोधं चोदयति—**नन्विति** । (196) आधिदैविकरूपेण आन-

---

1. **किमत इति** वाङ्मनसयोः प्राणाधीनत्वात् किं फलतीति यावत् ।
2. **फलवाक्यार्थमिति** असपत्नत्वगुणकोपासनस्य फलबोधकवाक्यस्यार्थमित्यर्थः ।
3. **त एत इति** "त एते सर्व एव समाः सर्वेऽनन्ताः, स यो हैतानन्तवत उपास्ते, अन्तवन्तं स लोकं जयति, अथ यो हैताननन्तानुपास्ते अनन्तं स लोकं जयति ।" इति श्रुतिः ।
4. **तद्वाक्यार्थमिति** 'त एते सर्व एव समाः' इत्यादिवाक्यस्यार्थमित्यर्थः ।

नैतदेवं यतोऽनन्ताः सर्वे भावा यथोदिताः ।
वाचा सर्वाधिदैविक्या लोकादेरप्यनन्तता ॥ (197)

अधिकारपरिच्छेदे सर्वं यस्मात्समाप्यते ।
नासंहतायाः कर्तृत्वं देवतायाः स्वतोऽपरैः ॥ (198)

स्वाधिकारविनिष्पत्तौ देवता देवतागणम् ।
सर्वमेवात्मसात्कृत्वा तत्तत्कार्यं करोति हि ॥ (199)

आभूतसंप्लवस्थानमानन्त्यं चेह गृह्यते ।
कर्मकार्यस्य हि सतो मुख्यानन्त्यं न युक्तिमत् ॥ (200)

एवं सतीह योऽनन्तानुपास्ते सततोद्यतः ।
सोऽनन्तमेव वागादिलोकमाप्नोति मानवः ॥ (201)

उपास्तेऽन्तवतो यस्तु सोऽन्तवन्तमवाप्नुते ।
लोकं यतस्ततोऽनन्तमेत्यनन्तात्मभावनात् ॥ (202)

न्त्योक्ते[1]रविरोधः, इत्याह— नेति । लोकतदन्तर्वर्तिपदार्थानामपि तदाधिदैविकवागात्मना आनन्त्यम्, किमु वाच्यं वागादेः, इत्याह—लोकादेरपीति । (197) सर्वस्यानन्त्ये हेत्वन्तरमाह —अधिकारेति । अधिकारपरिच्छेदे—एकस्य व्यापारनिष्पत्तौ, तेनेतरत् सर्वं संहन्यते । तस्मात् संह(र)त्य कार्यकरत्वात् सर्वेषामानन्त्यमित्यर्थः । (198) संहत्य कार्यहेतुत्वमसिद्धम्, इत्याशङ्क्य, [2]मधुब्राह्मणसिद्धम्, इत्याह—स्वाधिकारेति । (199) [3]त्रिविधान्तराहित्यानन्त्यं बहूनां व्याहतम्, अत्राह—आभूतेति । [200] 'स यो हैतान्' इत्या(दि)[दे]रर्थमाह—एवं सतीति । श्रुत्यर्थमुपसंहरति—यत इति । अपरिच्छिन्ने [4]अन्नत्रये [5]सूत्राद्यात्मभावनादित्यर्थः । (201–202)

---

1. अविरोध इति अध्यात्मादिरूपेण परिच्छिन्नत्वोक्तेरिति शेषः ।
2. मधुब्राह्मणसिद्धमिति अस्मिन् प्रघट्टके मधुप्रपञ्चभाष्यवाक्यमेव प्रमाणतयोद्धरन्ति शास्त्रप्रकाशिकाकाराः इति बोध्यम् ।
3. त्रिविधान्तराहित्यं—देशतः कालतः वस्तुतश्च परिच्छेदशून्यत्वम् ।
4. अन्नत्रये—वाङ्मनःप्राणात्मके ।
5. सूत्रेति सूत्रात्मनि तत्र अहमिति भावनादित्यर्थः ।

अधिकारो द्वयोऽत्र प्रकृतः पाङ्क्तकर्मणः ।
प्रक्रियाऽन्नत्रयस्यापि विभागः प्रकृतस्तथा ॥ (203)

* तत्राधिदैवमुक्तानि त्रीण्यन्नानि विभागशः ।
सोपासनानि पाङ्क्तस्य वक्तव्यमवशिष्यते ॥ (204)

अधिदैवे त्रयं तूक्तं मनोवाक्प्राणलक्षणम् ।
पाङ्क्तस्य कर्मणः कार्यं नोक्तं वित्तं च कर्म च ॥ (205)

पाङ्क्तस्य कर्मणः कार्यं न तावदवगम्यते ।
पाङ्क्तत्वसिद्धये यावन्नोच्येते वित्तकर्मणी ॥ (206)

* लोककालात्मको देवो विराट्संज्ञः प्रजापतिः ।
तस्याधिलोकमात्मोक्तो योऽयमन्नत्रयात्मकः ॥ (207)

चतुर्दशकण्डिकार्थनिरूपणम्

अन्नत्रयोपासनतत्फलयोरुक्तत्वात् [1]उत्तरग्रन्थवैयर्थ्यमाशङ्क्य, वृत्तं संकीर्तयति—**अधिकार इति**। द्वयोरधिकारमेवाह—**प्रकृत इति**। पाङ्क्तकर्मणः अधिकारः—व्यापारः, प्रकृतः। प्रक्रिया—फलं, तदपि प्रकृतम्। अन्नत्रयविभिन्नं [भजनं] च प्रकृतमित्यर्थः। (203) अनन्तरोक्तमनुवदति—**तत्रेति**। उत्तरवाक्यार्थमाह—**पाङ्क्तस्येति**। (204) किं तद्वक्तव्यम्, तदाह—**अधिदैव इति**। वित्तं कर्म च परिशिष्टत्वात् वाच्यमित्यर्थः। (205) कस्मात् वित्तकर्मणोर्वाच्यत्वम्, अत्राह—**पाङ्क्तस्येति**। तस्मात् [2]फलस्य पाङ्क्तत्वार्थं वित्तकर्मप्रतिपादनाय उत्तरग्रन्थ इत्यर्थः। (206) 'स एषः' इत्यादेः संगत्यन्तरमाह—**लोकेति**। वित्तकर्मप्रतिपादनाय उत्तरवाक्यमित्युक्तम्। [3]तत्र कथं तद्धीः, अत्राह

---

1. **उत्तरग्रन्थेति** 'स एष संवत्सरः प्रजापतिः' इत्यादिग्रन्थेत्यर्थः।

* **विभागश इति** ध्यानफलविभागेनेत्यर्थः।

2. **फलस्य**—पाङ्क्तकर्मफलस्य।

* **लोकेति** त्र्यन्नात्मनिरूपणेन लोकात्मकत्वं प्रजापतेर्निरूपितम्। कालात्मकत्वं वक्तव्यमिति 'स एष संवत्सरः' इति उत्तरग्रन्थारम्भ इत्यर्थः।

3. **तत्र कथं तद्धीरिति** कालात्मके प्रजापतौ चन्द्रमसि वित्तकर्मधीः कथमित्यर्थः।

अधिकालं तु योऽस्यात्मा सोऽयं चन्द्रमसोच्यते ।
पक्षमासर्तुवर्षादेः स कर्ता कर्मणोऽनिशम् ।
हानिवृद्धिस्वभावेन वित्तं चाप्यत्र लक्ष्यते ॥ (208)

कलाकाष्ठालवाद्यात्मा विश्वं विपरिणामयन् ।
प्राणपिण्डात्मकः काल आ महाप्रलयात् स्थितः ॥ (209)

यैकाऽवशिष्यते तस्य कला पक्षक्षये तथा ।
* प्रविश्य प्राणभृत्सर्वं पक्षतो जायते पुनः ॥ (210)

—पक्षेति । चन्द्रमसि पक्षादिकरणाख्यं कर्म लक्ष्यते । तथा पञ्चदशकलाना-मुपचयापचयात्मकत्वात् चन्द्रमसि वित्तत्वमित्यर्थः । (207–208) **भाष्ये** 'जगद्विपरिणमयितृत्वं कर्म' इत्युक्तम् । तदनुसृत्याह—**कलेति** । (भ)[ल]वादिलक्षणमन्यत्रोक्तम्—

"नलिनीदलसं(हि)[ह]त्यां सूक्ष्मसूच्यभिवेधने ।
दले दले तु यः कालः स कालो [1]लववाचकः ॥ (1)
लवैः त्रुटिः स्यात् त्रिंशद्भिः क[लां]तावत्त्रुटिं विदुः ।
काष्ठा तावत्कला ज्ञेया तावत्काष्ठा निमेषकः ॥ (2)"

इति । प्राणपिण्डात्मकः — सूत्रविराडात्मेति यावत् । (209) 'सोऽमावास्याम्' इत्यादेरर्थमाह—**यैकेति** । (210) 'तस्मात्' इत्यादि व्याचष्टे—**रात्राविति** ।

---

1. **लववाचक इति** लवः इति शब्दः वाचको यस्य सः, लवशब्दवाच्य इति यावत् । "स एष संवत्सरः प्रजापतिः षोडशकलः तस्य रात्रय एव पञ्चदश कलाः, ध्रुवैवास्य षोडशी कला । स रात्रिभिरेव आपूर्यते अप च क्षीयते । सोऽमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रजायते । तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यात् अपि कृकलासस्य, एतस्या एव देवताया अपचित्यै ।" इति श्रुतिरनुसन्धेया ।

* **पक्षतो जायते इति** शुक्लपक्षोपक्रमप्रतिपदः सकाशात्, जायते—द्वितीयकलायुक्तो भवतीत्यर्थः ।

रात्रौ यस्मात्स एतस्यां प्रविश्यास्ते प्रजापतिः ।
प्राणभृन्निखिलं तस्माद्धिंसां तस्यां परित्यजेत् ॥ (211)

कलाभिरस्तः कृत्ताभिः कृकलास इति स्मृतः ।
हिंसां न कुर्यात्तस्यापि किन्त्वनारब्धहिंसनम् ॥ (212)

सामि प्रमापितस्यापि रात्रौ तस्यां विवर्जयेत् ।
* प्राणभृद्धिंसनं यत्नात् किन्त्वनारब्धपीडनम् ॥ (213)

कृकलासे प्रसिद्धा या हिंसा प्राणभृतां स्वतः ।
तामप्यत्र न कुर्वीत किमु वक्तव्यमन्यतः ॥ (214)

* एतस्या एव पूजायै देवताया निषेधनम् ।
प्राणभृद्धिंसनस्येह नान्यदस्ति प्रयोजनम् ॥ (215)

---

(211) कृकलासशब्दस्य यौगिकार्थमाह—**कलाभिरिति**। (212) उक्तमेव व्यनक्ति—**सामीति**। अर्धहिंसितस्यापि हिंसा न कार्येत्यर्थः। (213) कृकलास-शब्दस्य प्राणिविशेषे रूढिमाश्रित्याह—**कृकलास इति**। (214) 'एतस्याः' इत्यादेरर्थमाह—**एतस्या इति**। सामान्येन हिंसानिषेधे सिद्धे [1]विशेषतः तन्निषे-धस्यैत[2]त्फलमित्यर्थः। (215) [3]सामान्यतो हिंसानिषेधे मानमाह—**स्मृतावपीति**।

---

* '**प्राणभृद्धिंसनम्**' इत्यत्र प्राणभृदिति भिन्नं पदं कर्तृवाचकम् ।

1. **विशेषतः तन्निषेधस्य**—अमावास्यायां हिंसानिषेधस्य ।

2. **एतत् फलमिति** सोमदेवतापूजनं फलमित्यर्थः ।

* "विशेषनिषेधस्य शेषानुज्ञापरत्वात् 'न हिंस्यात्सर्वा भूतानि' इत्यादिना विरोध-माशङ्क्य, 'एतस्या एव' इत्यादि व्याकरोति—**एतस्या इति**" इति **शास्त्र-प्रकाशिका** ।

3. **सामान्यतो हिंसानिषेधे**—अमावास्यायां कृकलासनिर्देशं विना हिंसानिषेधे । यथाश्रुतं तु वक्ष्यमाणस्मृतेः अमावास्यायां हिंसानिषेधकत्वात् नोपपद्यते इति बोध्यम् ।

स्मृतावपि निषिद्धेयं हिंसा पर्वसु कर्मिणाम्।
विशिष्टफलसंगत्या इहोक्तिः सत्यवद्भवेत् ॥ (216)

* केवलज्ञानमात्रेण माभूत् त्र्यन्नात्मकं फलम् ।
परात्मज्ञानवत् तस्मात् तस्योपासनमुच्यते ॥ (217)

वित्तमेव कला मे स्युः कल्पयित्वा ध्रुवां स्वयम् ।
* इत्युपासीत यः सोऽथ कलात्मानं प्रपद्यते ॥ (218)

"वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतीन् ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ (1)

वीरुधो घातयेद्यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥" (2)

इति स्मृतिः । अमावास्यायां विशेष[तो] हिंसानिषेधस्य पापक्षयादिफलान्तरमाह—**विशिष्टेति** । यथा सत्यवचनं अविशेषेण विहितमपि व्रतस्थस्य विशेषेण विधीयते इत्यर्थः । (216)

पञ्चदशकण्डिकार्थनिरूपणम्

'[1]यो वै स संवत्सरः' इत्यादेस्तात्पर्यमाह—**केवलेति** । [217] 'तस्य वित्तमेव' इत्यादेः तात्पर्यमाह—**वित्तमिति** । याः पञ्चदश प्रजापतेः चन्द्रमसः कलाः ताः मे वित्तमेव, उपचयापचय[व]त्त्वादिति स्ववित्ते पञ्चदशकलादृष्टिं कृत्वा(घनां)[ध्रुवां]षोडशीं कलां स्वदेहं कल्पयि(त्वेच्छेय)[त्वा, इति एवं]

---

1. यो वै इति "यो वै स संवत्सरः प्रजापतिः षोडशकलः अयमेव सः योऽयमेवं-वित्पुरुषः । तस्य वित्तमेव पञ्चदश कलाः, आत्मैवास्य षोडशी कला । स वित्तेनैव आ च पूर्यते, अप च क्षीयते । तदेतन्नभ्यं यदयमात्मा।" इति श्रुतिरनुसन्धेया ।

* **केवलज्ञानमात्रेणेति** कर्मासमुच्चितेन अभ्यासानपेक्षेण त्र्यन्नात्मज्ञानेनेत्यर्थः । **परात्मज्ञानवदिति** वैधर्म्यदृष्टान्तः ।

* **कलात्मानं प्रपद्यते**—षोडशकलं प्रजापतिमाप्नोति ।

यथोक्तगुणकं विद्वानुपासीत प्रजापतिम् ।
आरोप्यात्मशरीरेऽस्मिंस्तत्साधर्म्येण संततम् ॥ (219)

वित्तमेव कलास्तस्य तद्धान्युपचयौ क्रिया ।
ध्रुवास्य देह एवायं जीवन्स्यात् षोडशी कला ॥ (220)

सोऽकामयत जायेति साधनान्येव नः श्रुतिः ।
अब्रवीन्न तु तत्साध्यं तदुक्त्यर्थं परा श्रुतिः ॥ (221)

साधनोक्त्यैव तत्साध्यं यदि नामावसीयते ।
विशिष्टफलसंबन्धो न तथापि प्रतीयते ॥ (222)

पुत्रादिसाधनानां स्यादुत्पत्त्यादिसमन्वयात् ।
साध्यं लोकत्रयमतस्त्रयो वावेति च श्रुतिः ॥ (223)

उपासीतेत्यर्थः (218) [1]अर्थान्तरभूतप्रजापतेः आत्मनि दृष्ट्यारोपे किं [2]गुणसाम्यम्, अत्राह—**यथोक्तेति** । षोडशकलात्मके एकादशेन्द्रियपञ्चभूतात्मके स्वरूपेणानन्ते समारोप्येत्यर्थः । (219) स्वीयवित्ते कलारोपे साधर्म्यमाह—**वित्तमेवेति** । (220)

षोडशकण्डिकावतरणम्

[3]तद्भावफलस्य प्रजापत्युपासनस्योक्तत्वात् व्यर्थमुत्त[4]रवाक्यम्, इत्यत आह-**सोऽकामयतेति** । [221] साधनोक्त्यैव साध्यमप्युक्तम्, अत्राह—**साधनेति** । **हेतुफलयोः** मिथो ब(हु)[द्ध]त्वेऽपि इदमस्य फलमिति विशेषधीः नोक्त्या विनेत्यर्थः । [222]

'ऋणं तस्मिन् संनयत्यमृतं च निगच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥' (ऐ. ब्रा. 7-13-4)

इत्यादिश्रुतेः पुत्रादीनां मुक्तिहेतुत्वात्, न लोकत्रयमात्रसंबन्धः, अत्राह—

---

1. **अर्थान्तरभूतेति** आत्मन इत्यादिः ।
2. **गुणसाम्यं**—उपासकस्य प्रजापतेश्च गुणसाम्यम् ।
3. **तद्भावफलस्य**—प्रजापतिभावफलकस्य ।
4. **उत्तरवाक्यं**—'अथ त्रयो वाव लोकाः' इत्यादिवाक्यम् ।

त्रय एव यतो लोकाः साध्याः पुत्रादिसाधनैः ।
तन्मुमुक्षुरतो मुक्त्यै त्यजेत् सर्वैषणा यतिः ॥ (224)

अन्यथैवाभिसंबन्धं के चिदत्र प्रचक्षते ।
ज्ञानादेव पुमर्थाप्तेर्निष्फले सुतकर्मणी ॥ (225)

निःशेषफलसंप्राप्तेर्दर्शनादेव केवलात् ।
सुतादिना न तद्र्थः नापि स्यात् पाङ्क्तकर्मणा ॥ (226)

तयोरिहार्थवत्त्वाय त्रयो वा वेति भण्यते ।
परीक्ष्यैतत्परिग्राह्यं न तु निर्युक्तिकं बुधैः ॥ (227)

पुत्रादीति । उक्तश्रुतेरर्थवादत्वात् साध्यस्यानित्यत्वप्राप्तेश्च [1]नोत्तरश्रुतिभङ्ग इत्यर्थः । (223) लोकफलत्वं पुत्रादेरुच्यमानमयुक्तम्, तत्त्वज्ञानानुपयोगात्, **अत्राह—त्रय इति** । (224)

'त्रयो वा व' इत्यादिकस्य भर्तृप्रपञ्चोक्तसंबन्धनिरूपणम्

'त्रयो वाव' इत्यादिवाक्यस्य भर्तृप्रपञ्चोक्तसंबन्धमाह—**अन्यथेति** । [2]तमेव वक्तुं [3]तदीयं पूर्वपक्षमाह—**ज्ञानादिति** । [4]अन्नोपासनं ज्ञानम् । [5]तद्भावश्च पुमर्थः । [225] तदेव स्पष्टयति—**निःशेषेति** । [226] [6]तदीयसिद्धान्तमाह—**तयोरिति** । (स्तु)[सु]तकर्मणोरपि अन्नात्मोपासनासमुच्चितयोः फलवत्त्वप्रतिपादनायोत्तरग्रन्थ इत्यर्थः ।

तदीयपूर्वपक्षिणः तदभिमतसमुच्चयनिराकरणम्

तदभिमतं [7]समुच्चयं निराकरोति—**परी(क्षे)[क्ष्ये]ति** । समुच्चयो युक्तो

---

1. **नोत्तरश्रुतिभङ्गः इति** पुत्रादीनां लोकत्रयमात्रसंबन्धबोधिकायाः 'अथ त्रयो वा व लोकाः' इत्यादिश्रुतेः न भङ्ग इत्यर्थः ।
2. **तमेव**—भर्तृप्रपञ्चोक्तसंबन्धमेव ।
3. **तदीयं**—भर्तृप्रपञ्चोक्तम् ।
4. **अन्नोपासनं**—अन्नात्मोपासनम् ।
5. **तद्भावः**—अन्नात्मप्रजापतिभावः ।
6. **तदीयसिद्धान्तं**—भर्तृप्रपञ्चोक्तसिद्धान्तम् ।
7. **समुच्चयं निराकरोतीति** उक्तपूर्वपक्षीति शेषः ।

स्वफलेऽन्यानपेक्षाणां साधनानां समुच्चयः ।
न युक्तो निरपेक्षत्वात् गमनेक्षणयोरिव ॥ (228)

अन्यापेक्षाणि चेद्द्युः कर्मैकत्वं तदा भवेत् ।
समुचितिर्न चैकस्य रुद्रेणापि समर्थ्यते ॥ (229)

तन्तुवीरणमृद्दारुसाधनानां पृथक्त्वतः ।
पटादिकार्यनिष्पत्तौ न तेषां स्यात्समुच्चयः ॥ (230)

तुरीवेमशलाकादेः स्वकार्येऽन्योन्यसंहतेः ।
समुचितिरयुक्तेयं तदाप्येकत्वहेतुतः ॥ (231)

लोकत्रयस्य संप्राप्तिर्विद्ययैवेति चेन्मतम् ।
तस्याः सर्वाप्तिहेतुत्वात्, नैतदेवं पृथक्त्वतः ॥ (232)

न वेति विचार्य ग्राह्यमित्यर्थः । [227] समुच्चयो(मु)[यु]क्तिमाने(च)[व], किमत्र विचार्यम्, अत्राह—स्वफल इति । [228] साधनानां मिथः सापेक्षाणां फलहेतुत्वात् निरपेक्षत्वमसिद्धम्, अत्राह—अन्येति । साधनैक्यात् न समुच्चय इत्यर्थः । [229] भूयोदर्शनसाध्यत्वात् [1]व्याप्तेः, निरपेक्षाणा[म]समुच्चये [2]दृष्टान्ता[न्त]रमाह—तन्त्विति । कटो(प)[पा]दानं वीरणम् । पृथक्त्वतः—निरपेक्षत्वादिति यावत् । [230] संभूयैकफलहेतूनामसमुच्चितौ दृष्टान्तमाह—तुरीति । [231] एवं भर्तृप्रपञ्चपूर्ववादी तदभिमतसमुच्चयं निरस्य (स्तु)[श्रु]तकर्मणोरानर्थक्यमुपसंहरति—लोकेति । मन्त्रात्मोपासनायाः लोकत्रयाप्तिहेतुत्वात् समुच्चयायोगाच्चेत्यर्थः ।

भर्तृप्रपञ्चस्य समुच्चयनिराकरणपरिहारः

भर्तृप्रपञ्चः परिहारमाह—नैतदिति । (232)

---

1. व्याप्तेः—व्याप्तिज्ञानस्य—निरपेक्षत्वं यत्र तत्र समुच्चयो नेति व्याप्तिज्ञानस्य इति यावत् ।

2. दृष्टान्तान्तरं—'गमनेक्षणयोरिव' इत्युक्तदृष्टान्तादन्यं दृष्टान्तम् ।

प्रत्येकं भिन्नसाध्यं हि पुत्रकर्मादि साधनम् ।
एकाकिन्या न तत्साध्यं विद्ययैवेति निश्चितिः ॥ (233)

पुत्रेणैवेत्यतो वक्ति साधनान्तरनिह्नुतिम् ।
ज्योतिषेत्यत्र संचोद्य परिहारं प्रचक्षते ॥ (234)

प्राप्त्यतिक्रमसंभित्तेः विषयप्रविभागतः ॥ (235)

नैतदेवं, यतो नेह पुत्रोत्पत्त्यतिरेकतः ।
साधनान्तरजय्योऽयं लोकोऽतश्चोदितं न सत् ॥ (236)

कथं पृथक्त्वम्, अत्राह—**प्रत्येकमिति** । (233) [1]किमत्र मानम्, अत्राह—**पुत्रेणेति** । 'पुत्रेणैव' इत्यवधारणमयुक्तम्, 'ज्योतिषेमं लोकं जयति' इति मनुष्यलोकजयहेत्व[2]न्तरश्रुतेः, इत्याशङ्क्य, त एव परिहरन्ति, इत्या[ह]—**ज्योतिषेति** । (234) परिहारं स्फोरयति—**प्राप्तीति** । ज्योतिष्टोमेनास्य लोकस्य प्राप्तिः, प्राप्तस्य पुत्रेणातिक्रमः । अतो [3]युक्तमवधारणमित्यर्थः । (235) 'न हि पुत्रोत्पादनादन्येन मनुष्यलोकजयोऽस्ति' इति [4]भाष्यं व्याकरोति—**नैतदिति** । अवधारणमयुक्तमित्येवं चोद्यं न, यस्मात् पुत्रोत्पत्तिव्यतिरेकेण अयं लोकः साधनान्तरजय्यः इह—वेदे न श्रुतः, इति चोद्यं निराकृत्य, [5]तन्निगमयति—**अत इति** । (236) [6]असत्त्वं साधयति—**ज्योतिष्टोमेति** । तत्कर्तुः भोगार्थमेव

---

1. **किमत्र मानम्**—पुत्रादेः प्रत्येकं फलसंबन्धे प्रमाणं किम् ।
2. **हेत्वन्तरश्रुतेः**—हेत्वन्तरस्य ज्योतिश्शब्दितज्योतिष्टोमस्य श्रवणात् ।
"अथ त्रयो वाव लोकाः मनुष्यलोकः पितृलोको देवलोक इति । सोऽयं मनुष्यलोकः पुत्रेणैव जय्यः नान्येन कर्मणा । कर्मणा पितृलोकः विद्यया देवलोकः । देवलोको वै लोकानां श्रेष्ठः । तस्माद्विद्यां प्रशंसन्ति ।" इति श्रुतिः ।
3. **युक्तमवधारणमिति** मनुष्यलोकातिक्रमणे पुत्रातिरिक्तसाधनाभावादिति भावः ।
4. **भाष्यं व्याकरोति**—भर्तृप्रपञ्चभाष्यं व्याकरोति ।
5. **तन्निगमयति**—चोद्यनिराकरणं निगमयति ।
6. **असत्त्वमिति** चोदितस्येत्यादिः ।

ज्योतिष्टोमेन संप्राप्तिर्भोगायैव तु तत्कृतः ।
सुतेनातिक्रमोऽप्राप्तेः प्राप्तो निर्विषयस्ततः ॥ (237)

यद्येवं तर्हि संत्याज्यं ज्योतिषेति वचः श्रुतम् ।
मैवं, मनुष्यलोकस्य यतस्तत्राप्तिरिष्यते ॥ (238)

प्राप्तस्य ज्योतिषा तस्य पुत्रेणातिक्रमो जयः ।
इति निर्युक्तिकं कैश्चित् व्याख्यानं यत्नतः कृतम् ॥ (239)

जय्य एव सुतेनायं लोक इत्यवधार्यते ।
ज्योतिषापि स चेज्जेयो जीयतां न निषिध्यते ॥ (240)

अस्य लोकस्य ज्योतिष्टोमेन प्राप्तिः, अतिक्रमस्तु पुत्रेणैव, अन्यतोऽप्राप्तेः । [1]सोऽप्यन्येनाप्तश्चेत्, तदा पुत्रः साध्याभावात् व्यर्थः स्यात् । न [2]च श्रौतं निर्विषयं युक्तम् । अतः चोदितमसदित्यर्थः । (237) 'पुत्रेणैवायं लोको जय्यः' इतिवत् 'ज्योतिषेमं लोकं जयति' इति श्रुतेः [3]तत्रापि [4]जयः अतिक्रमो युक्तः, स चेत् पुत्रेणैव, ज्योतिर्वाक्यं हेयं स्यात्, इति शङ्कते— **यदीति** । गोशब्दवदने[5]कार्थत्वेन[न]विरोधः [6]इत्युक्तमेव परिहारमाह— **मैवमिति** । अस्य व्याख्यानस्य हेयत्वमाह— **इति निर्युक्तिकमिति** । (238–239)

पुत्रेणैवायं लोको जय्यः इत्यस्य भर्तृप्रपञ्चव्याख्यानदूषणम्

कथं [7]निर्युक्तिकत्वम्, अत्राह— **जय्य इति** । (240) अवधारणेन

---

1. सोऽपि—मनुष्यलोकातिक्रमोऽपि ।
2. न च श्रौतमिति साधनमिति शेषः ।
3. तत्रापि—'ज्योतिषेमं लोकं जयति' इत्यत्रापि ।
4. जयः—जयतेरर्थः ।
5. अनेकार्थत्वेनेति जयतेरित्यादिः । आप्तिः अतिक्रमश्चेति नानार्थकत्वेनेत्यर्थः ।
6. उक्तमेव—'प्राप्त्यतिक्रमसंभित्तेर्विषयप्रविभागतः' इत्यत्रोक्तमेव ।
7. निर्युक्तिकत्वमिति उक्तव्याख्यानस्येत्यादिः ।

नरलोकः सुतेनायं जय्य एवेति भण्यते ।
एवेत्ययोगव्यवच्छित्तौ नान्ययोगव्यपेक्षया ॥ (241)

अतिक्रमो जयार्थश्चेत् सामर्थ्यादेव सिद्धितः ।
पितृलोकाद्यसंप्राप्तेस्तत्रातिक्रमगीर्वृथा ॥ (242)

नापुत्रस्येति निःशेषलोकाप्तौ साधनं सुतः ।
श्रूयते, मन्दपालादि तथाचात्र निदर्शनम् ॥ (243)

---

[1]अन्ययोगव्यवच्छेदार्थेन विरोधात् [2]ज्योतिषो न [3]तत्फलत्वम्, अत्राह—**नरेति ।** (241) यत्तु 'प्राप्तस्य ज्योतिषा' (वा. 239) इत्यादि, तत्राह—**अतिक्रम इति ।** ज्योतिष्टोमेनास्मिल्लोके भोगात् क्षीणे तद्बलादेवातिक्रमसिद्धेः पुत्रवैयर्थ्यमित्यर्थः । जय्यशब्दस्य अतिक्रमार्थत्वे, 'कर्मणा पितृलोकः,' 'विद्यया देवलोकः' इत्यत्रापि [4]तस्यानुवर्तमानस्य अतिक्रमार्थत्वं वाच्यं स्यात् । तन्न युक्तम्, इत्याह—**पितृलोकेति ।** [5]हेत्वन्तराभावादित्यर्थः । (242) 'नापुत्रस्य लोकोऽस्ति ।' 'तत्सर्वे पशवो विदुः' इति श्रुत्या व्यतिरेकद्वारा सुतस्य लोकाप्तिहेतुत्वोक्तेश्च [6]नातिक्रमार्थत्वम्, इत्याह—**नेति ।** मन्दपालचित्रकेतुनिदर्शनाच्च एवम्, इत्याह **मन्दपालेति ।** उक्तं हि,

'किमर्थमावृता लोका ममैव तपसान्विताः ।
किं मया न कृतं तत्र यस्येदं कर्मणः फलम् ॥

इति मन्दपालेन पृष्टैरुक्तम्—

---

1. **अन्ययोगव्यवच्छेदार्थेनेति** पुत्रान्यस्य मनुष्यलोकजयसाधनत्वयोगाभावार्थकेनेत्यर्थः ।
2. **ज्योतिषः**—ज्योतिष्टोमस्य ।
3. **न तत्फलत्वं**—न मनुष्यलोकजयफलकत्वम् ।
4. **तस्य**—जय्यशब्दस्य ।
5. **हेत्वन्तराभावादिति** पितृलोकाप्तौ कर्मातिरिक्तस्य हेतोरभावादित्यर्थः । पितृलोकाप्तिं विना तदतिक्रमायोगात् अतिक्रमार्थः जय्यशब्दः व्यर्थः स्यादिति भावः ।
6. **नातिक्रमार्थत्वमिति** जय्यशब्दस्येति शेषः ।

श्रुतं साध्यं समुल्लङ्घ्य नातोऽन्यत्कामजं फलम् ।
प्रत्यग्विविदिषाऽन्यत्र कर्मणां श्रूयते फलम् ॥ (244)

किञ्च भुक्त्वाऽथवाऽभुक्त्वा ज्योतिष्टोमफलं नरः ।
अतिक्रमेदिमं लोकं नाभयत्रापि युज्यते ॥ (245)

भुक्त्वातिलङ्घनं तावत् विनापि सुतजन्मना ।
निःशेषकर्मकार्याणां भोगेनैव समाप्तितः ॥ (246)

* परब्रह्मात्मविज्ञानजन्मनापि हि कर्मणाम् ।
नाभुक्त्वा फलमाप्नोति निर्वृतिं परमां नरः ॥ (247)

'तदपाक्रियते सर्वं यज्ञेन तपसा(शु)[सु]तैः ।
तपस्वी यज्ञकृद्वापि न तु ते विद्यते प्रजा ॥'

इति । (243) सुतस्य लोकातिनाथनत्वेऽपि तद(पि)[ति]क्रमस्य पुमर्थत्वात् [1]तादर्थ्यं कल्पनीयम्, अत्राह—**श्रुतमिति** । अतिप्रसङ्गादिति भावः । श्रुतस्वर्गादिफलत्यागेन कर्मणां विविदिषार्थत्वं यथा [2]त्वयोच्यते, तथा पुत्रस्य श्रुतलोकासिद्ध्या तदतिक्रमार्थत्वं कल्प्यताम्, अत्राह—**प्रत्यगिति** । [3]विविदिषावाक्य इत्यर्थः । (244) [4]अतिक्रमार्थत्वनिरासाय विकल्पयति—**किञ्चेति** । दूषयति—**नेति** । (245) [5]प्रथमकल्पदोषं विशदयति—**भुक्त्वेति** । पुत्रवैयर्थ्यमित्यर्थः । (246) [6]द्वितीयं दूषयति—**परेति** । तत्त्वज्ञानेऽप्यनतिलङ्घ्यं कर्मेति

---

1. **तादर्थ्यं**—लोकातिक्रमफलकत्वम् ।
2. **त्वया**—सिद्धान्तिना ।
3. **विविदिषावाक्ये** इति वार्तिकस्थस्य **अन्यत्र**पदस्य विवरणम् । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इति वाक्यं विविदिषावाक्यम् ।
4. **अतिक्रमार्थत्वनिरासायेति** जयशब्दस्येत्यादिः ।
5. **प्रथमकल्पदोषं**—भुक्त्वा अतिक्रमः इति कल्पे दोषम् ।
6. **द्वितीयं**—अभुक्त्वाऽतिक्रमकल्पम् ।

* "सर्वकर्मफलानां न भोगेन समाप्तिः, किन्तु, 'क्षीयन्ते चास्य' इति श्रुतेः मुक्तिहेतोर्ज्ञानात्, इत्याशङ्क्याह—**परेति** । आगमसिद्धमाहात्म्यमपि ज्ञानं नारब्धं

नैरर्थक्यप्रसक्तिश्च ज्योतिष्टोमादिकर्मणः ।
* न चेद् भुक्तं फलं तस्य तदभावेऽपि चात्ययः ॥ (248)

चन्द्रलोकादिसंप्राप्तिः श्रूयते कर्मणः फलम् ।
पुण्यलोका भवन्तीति तथाच श्रुतितः स्फुटम् ॥ (249)

सुतजन्मादिभिश्चेत्स्यात् सर्वकर्मफलात्ययः ।
परब्रह्मैकविज्ञानं निष्फलं वः प्रसज्यते ॥ (250)

अनुच्छित्तिश्च भागेन स्पष्टं श्रुतिवचः श्रुतम् ।
धिया धियेति वाक्येन भोगादेव क्रियास्थितेः ॥ (251)

---

[1]त्वत्सिद्धान्त इत्यर्थः । (247) भङ्ग्यन्तरमाह—नैरर्थक्येति । स्यात् तर्हि [2]भुक्त्वाऽनिक्रमपक्ष एव, इत्याशङ्क्य, पुत्राभावेऽप्यतिक्रम[3] उक्तः, इत्याह—तदभावेऽपीति । (248) नित्यकर्मणामपि फलमावश्यकं, कि(तु)[नु] काम्यानाम्, इत्यभिसन्धाय नित्यानां फलवत्त्वे मानमाह—चन्द्रेति । 'सर्व एते पुण्यलोका भवन्ति' (छा. 2-23-1) इति श्रुतेरित्यर्थः । (249) [4]पुत्रादित्रयस्य [5]लोकत्रयातिक्रमार्थत्वे दोषान्तरमाह—सुतेति । (250) भुक्त्वा अतिलङ्घने पुत्रादिवैयर्थ्यमुक्तम् । संप्रति भोगादशेषबन्धा(न्य)[त्य]यो न युक्तः, [6]भोगादपूर्वोत्पत्तेः, इत्याह—अनु वृ [च्छि]त्तिश्चेति । (251)

कर्म नाशयति, तस्य भोगादेव ध्वस्तेः चातुर्थिकत्वात् (चतुर्थाध्यायसिद्धत्वात्) इत्यर्थः ।" इति शास्त्रप्रकाशिका ।

1. त्वत्सिद्धान्तः — भर्तृप्रपञ्चसिद्धान्तः ।
2. भुक्त्वाऽतिक्रमपक्ष एवेति युक्त इति शेषः ।
3. अतिक्रम उक्त इति तथाच न पुत्रस्य मनुष्यलोकातिक्रमफलकत्वमिति भावः ।

* "ज्योतिष्टोमादेर्नित्यस्याफलत्वात् न भोगाभोगचिन्तेति मतमाशङ्क्याह—तदभावेऽपीति तस्याफलत्वपक्षेऽपि न पुत्रस्य एतल्लोकातिक्रमहेतुत्वं, प्रापकाभावेन स्वतोऽतिक्रमसिद्धेः । नच काम्यं कर्म प्रापकं तस्य भोगात् क्षये यथोक्तदोषादित्यर्थः ।" इति शास्त्रप्रकाशिका ।

4. पुत्रादित्रयस्य—पुत्रकर्मविद्यानाम् ।
5. लोकत्रयातिक्रमार्थत्वे—मनुष्यलोकपितृलोकदेवलोकातिक्रमफलकत्वे ।
6. भोगादपूर्वोत्पत्तेरिति भोगेन भुज्यमानसजातीयार्थे रागः, तेन क्रियमाणकर्मणा अपूर्वमुत्पद्यते । तेन पूर्वविद्यमानभोगो जायते इति भावः ।

कर्मणा पितृलोकाप्तिर्नाश्रुतेरन्यसाधना ।
कर्मैवोपास्तिरूपं यत्तद्विद्येत्यत्र भण्यते ॥ (252)

देवलोकाभिसंबन्धाद्देवताविषयैव सा ।
विद्या न तु निरस्तान्यप्रत्ययब्रह्मात्रैकगोचरा ॥ (253)

मनुते यन्न मनसा मनो येन मतं सदा ।
तदेव विद्धि ब्रह्मेति न त्विदं यदुपासते ॥ (254)

उपासिक्रियया व्याप्तिरब्रह्मत्वस्य लक्षणम् ।
इति श्रुत्यैव निर्दिष्टं नोपास्यं ब्रह्म तेन नः ॥ (255)

विद्यया देवलोकाप्तिः श्रुतत्वादेव कारणात् ।
नैवकाराभिसंबन्धाद्देवेत्यत्र न संगतिः ॥ (256)

'कर्मणा पितृलोकः विद्यया देवलोकः' इत्यस्य भाष्यकारीय-व्याख्याननिरूपणम्

[1]परमतं निरस्य, 'कर्मणा' इत्यादिवाक्यार्थमाह—**कर्मणेति** । न पुत्रादिसाध्या, [2]तत्साधनत्वेन [3]तस्या(:)श्रुतेरित्यर्थः । 'विद्यया' इत्यत्र विद्या-शब्दार्थमाह —**कर्मेति** । (252-253) उपास्यस्यैव ब्रह्मत्वा[त्त] दुपासनमेव[वि] द्येत्याशङ्क्य, ब्रह्म नोपास्यं [4]श्रुतिविरोधात्, इत्याह—**मनुत इति** । (254) उक्तश्रुतेरभिप्रायमाह—**उपासीति** । (255)

निरुक्त, भाष्यकारीयव्याख्यानस्यायुक्तत्वम्

'कर्मणा अग्निहोत्रादिना केवलेन पितृलोको जेतव्यः, न पुत्रेण नापि विद्यया । विद्यया देवलोको न पुत्रेण नापि कर्मणा ।' इति **भाष्यानुसारेण** व्याख्यातम् । इदानीं विद्याकर्मणोरेवकारं प्रक्षिप्य व्याख्यानं **भाष्यकारीय-**

---

1. **परमतं**—भर्तृप्रपञ्चमतम् ।
2. **तत्साधनत्वेन**—पितृलोकाप्तिसाधनत्वेन ।
3. **तस्य**—पुत्रस्य ।
4. **श्रुतिविरोधात्**—'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।' इति श्रुतिविरोधात् ।

भूयःफला यतो विद्या पूर्वाभ्यां तेन सादराः ।
विद्यामेव प्रशंसन्ति न तथा पुत्रकर्मणी ॥ (257)

लोकानां श्रेष्ठ इति च न चेदाप्तिर्विवक्षिता ।
सर्वलोकेष्विदं वाक्यमत्यये दुर्घटं भवेत् ॥ (258)

अत्ययश्चेदभिप्रेतः पुत्रोत्पत्त्यादिभिस्त्रिभिः ।
अपास्तर्णोऽथ स कथं कर्मस्वेव नियुज्यते ॥ (259)

मयुक्तम्, इत्याह—विद्ययेति । नैवकाराभिसंबन्धात्, [1]विद्यया कर्मणैवेति न युक्तम् । 'पुत्रश्चेत्' (वा. 279) इत्यादिना [2]साधनान्तराधीनत्वस्यापि वक्ष्यमाणत्वात् । अतो न [3]विद्या(या)दावेवकारसंगतिरित्यर्थः । (256)

'देवलोकः' इत्यादि वाक्यार्थवर्णनं, अत्ययस्य जयशब्दार्थत्वदूषणं च

'[4]देवलोकः' इत्यादेरर्थमाह—भूयःफलेति । (257) देवलोक(श्रैष्ठ्य) [श्रैष्ठ्य] वचनं [5]परमते न युक्तम्, इत्याह—लोकानामिति । सर्वलोकेष्वपि अत्यये जयशब्दार्थे सतीत्यर्थः । (258) पुत्रोत्पत्त्यादे(रि)[र]ति[6]क्रमार्थत्वे स्ववचनविरोधः, इत्याह—अत्ययश्चेदिति । पुत्रादिना लोकत्रयातिक्रमे [7]देहद्वयवियोगात् अतिक्रान्तबन्धस्य ऋणत्रयातिक्रमसिद्धेः, 'संक्रामितात्मभा(वो)[रोऽ]पि नाग्निहोत्रं परित्यजेत्' इति अपाकृतर्णत्रयस्यानु[8]ष्ठानोक्तिर्विरुद्धेत्यर्थः । (259)

---

1. **विद्यया कर्मणैवेति** विद्ययैव, कर्मणैवेति इत्यर्थः ।
2. **साधनान्तरेति** अनुशिष्टपुत्ररूपेत्यादिः ।
3. **विद्यादाविति** विद्यया इत्यत्र, कर्मणा इत्यत्र चेत्यर्थः ।
4. **देवलोक इति** 'देवलोको वै लोकानां श्रेष्ठः । तस्माद्विद्यां प्रशंसन्ति ।' इति श्रुतिः ।
5. **परमते**—अतिक्रमस्य जयशब्दार्थत्ववादिभर्तृप्रपञ्चमते ।
6. **अतिक्रमार्थत्वे**—लोकातिक्रमफलकत्वे ।
7. **देहद्वयवियोगात्**—स्थूलसूक्ष्मदेहवियोगात् ।
8. **अनुष्ठानोक्तिरिति** भर्तृप्रपञ्चानामिति शेषः ।

'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।'
इति पूर्वाश्रमे वासो ऽनस्तर्णस्य निषिध्यते ॥ (260)

यथा नापाकृतर्णस्य मोक्षेच्छा वार्यते तथा ।
अनधीत्य द्विजो वेदानित्यादिवचनान्मनोः ॥ (261)

इष्ट्वेति च तथा क्त्वान्तश्रवणात्पूर्वकालता ।
नीत्वा समाप्तिं कर्माणि फलवन्त्यफलानि च ॥ (262)

शुद्धधीः प्रव्रजेत्पश्चाद्विरक्तः कर्मणां फलात् ।
इत्यनुक्रमसंन्यासे संप्रत्तिरुपदिश्यते ॥ (263)

अपाकृतर्णस्यानुष्ठानं ब्रुवतो मनुवाक्यविरोधश्च, इत्याह—**ऋणानीति** । (260)

'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥' (मनु. 2-168)

इति चानपाकृतर्णस्य मुमुक्षा निन्द्यते । तथा [1]इतरस्य [2]पूर्वाश्रमेच्छा निन्द्यते, इत्याह—**अनधीत्येति** । (261) अपाकृतर्णस्य अनुष्ठानाभावे हेत्वन्तरमाह—**इष्ट्वेति** ।

'अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य यत्नतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥' (मनु. 6-36)

इति [3]क्त्वाप्रत्ययस्य श्रवणात् सत्वशुद्धेः पूर्वकालत्वमनुष्ठानस्येत्यर्थः ।

सप्तदशकण्डिकार्थनिरूपणम्

एवं [4]परमतं परास्य '[5]अथ' इत्यादेस्तात्पर्यमाह—**नीत्वेति** । (262–263)

---

1. **इतरस्य**—अपाकृतर्णस्य ।
2. **पूर्वाश्रमेच्छा**—गृहस्थाश्रमेच्छा ।
3. **क्त्वाप्रत्ययस्येति** पूर्वकालार्थकस्येत्यादिः ।
4. **परमतं**—भर्तृप्रपञ्चमतम् ।
5. **अथेत्यादेरिति** 'अथातः संप्रत्तिः' इत्याद्युत्तरसन्दर्भस्येत्यर्थः ।

योऽनुक्रमेणेति तथा श्रुतौ स्पष्टमिदं वचः ॥ (264)

अननुक्रमसंन्यासे न संप्रत्तिक्रियेष्यते ।
पुत्रे सत्येव सा यस्मान्नास्त्यसौ ब्रह्मचारिणः ॥ (265)

यद्यपुत्र इति वचः संभवे सति युक्तिमत् ।
निरस्तदारसंबन्धे न तु स्याद्ब्रह्मचारिणि ॥ (266)

---

263) संप्रत्तेः क्रमसंन्यासाङ्गत्वे [1]कौषीतकिश्रुतिसंवादमाह— य इति । 'योऽनुक्रमेण संन्यस्यति संन्यस्तो भवति, कोऽयं संन्यास उच्यते, कथं संन्यस्तो भवति' इत्युपक्रम्य, 'य आत्मानं क्रियाभिः(स)[गु]गुप्तं करोति' इत्यादिना इतिकर्तव्यताजातमुक्त्वा, 'सशिखान् केशान्[नि]कृन्त्य, विसृज्य यज्ञोपवीतं, निष्क्रम्य' इति संन्यासं विधाय, 'पुत्रं दृष्ट्वा, 'त्वं ब्रह्म त्वं यज्ञस्त्वं लोकस्त्वं सर्वमित्यनुमन्त्रयीत' (कौ.) इति स्पष्टमेतदर्थवचनमित्यर्थः। (264) संन्यासत्वादक्रमसंन्यासस्यापि संप्रत्तिरङ्गम्, अत्राह—अननुक्रमेति । (265) पुत्रिणो गृहिणः क्रमसन्यासः, नापुत्रस्येति, तत्राह—यदीति । 'यद्यपुत्रो भवति आत्मानमेव सर्वं ध्यात्वाऽनवेक्ष्यमाणः प्राचीमुदीचीं वा दिशं प्रव्रजेत्' (कौ.) इत्यादिवाक्यं पुत्रहीनस्यापि गृहिणः संन्याससंभवे घटते, नान्यथेत्यर्थः। ब्रह्मचारि सन्यासिविषयमेतत्,[2] अत्राह—निरस्तेति । 'यद्यपुत्रः' इति प्राप्तप्रतिषेधत्वात् [3]अप्राप्तप्रतिषेधस्य अगतिकगतित्वात् ब्रह्मचारिणः पुत्रप्राप्त्यभावात् न तद्विषयमित्यर्थः। [266] ब्रह्मचारिणो न संन्यासोऽस्ति [4]मनुवाक्यविरोधात्, अत्राह—

---

1. कौषीतकिश्रुतीति "काठकश्रुतिं संवादयति—य इति ।" इति शास्त्रप्रकाशिका । 'योऽनुक्रमेण' इत्यादिवाक्यजातं न्यायकल्पलतिकायां शास्त्रप्रकाशिकायाञ्च समानमेव दृश्यते । उभयत्रापि श्रुतौ स्यात्, तथाऽन्यत्र बहुलं दर्शनादिति बोध्यम् ।

2. एतत्—'यद्यपुत्रो भवति' इत्यादिवाक्यम् ।

3. नान्तरिक्षेऽग्निश्चेतव्यः इति वत् अप्राप्तप्रतिषेधत्वमुक्तवाक्यस्याशङ्क्याह—अप्राप्तप्रतिषेधस्येति ।

4. मनुवाक्येति 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।' इति वाक्येत्यर्थः ।

ब्रह्मचर्यादेवेत्यादिवाक्यानि शतशः श्रुतौ ।
* श्रूयन्ते तु ऋणवचो विरोधात्स्यादपस्मृतिः ॥ (267)

वेदाहमिति मन्त्रोक्तेस्तमेवेत्यवधारणात् ।
निषेधान्नान्य इत्युक्तेर्न मुक्तिः सुतजन्मतः ॥ (268)

न तत्र दक्षिणा यन्ति विद्ययैव तदाप्यते ।
इति न्याय्यं श्रुतेर्वाक्यं कस्मान्नाद्रियतेऽञ्जसा ॥ (269)

संन्यासमेवोपक्रम्य संप्रत्तिः श्रूयते श्रुतौ ।
* यथाऽन्यत्र तथेहापि कस्मान्नाभ्युपगम्यते ॥ (270)

सर्वकर्मनिवृत्तिर्हि जीवतोऽत्र विधीयते ।
एकमेव व्रतमिति संन्यासिन्येव युक्तिमत् ॥ (271)

ब्रह्मचर्यादिति । [267] पुत्रोत्पादनादिकर्मण एव मुक्तिसिद्धेः न मुमुक्षोः संन्यासः; अत्राह—वेदेति । 'वेदाहमेतं पुरुषं महान्तम्' (तै. आ. 3-12-7) इत्यारभ्य, 'तमेवं विद्वानमृत इ(द)[इ]भवति' (तै. आ. 3-12-7) इति वाक्यात्, 'तमेव विदित्वाऽतिमृत्युमेति' इत्यवधारणात्, 'नान्यः पन्था विद्यतेऽयनाय' (तै. आ. 3-12-8) इति निषेधाच्च ज्ञानादेव मुक्तिरित्यर्थः । [268] [1]अत्रैव वाक्यान्तरमाह—नेति । (269) संन्यासाङ्गं संप्रतिरित्ययुक्तमुक्तम् । मरिष्यतः उपासनाङ्गत्वेन तदुक्तेः, अत्राह—संन्यासमिति । [270] उपरिष्टात् 'एकमेव व्रतं चरेत्' (बृ. 3-5-23) इति सर्वव्यापारोपरमविधानात् अत्र संन्यासविधिः, इत्याह—सर्वेति । [271] गार्ग्यः सर्वसंन्यासं कृत्वा अजातशत्रुमुपगतो

---

* अपस्मृतिरिति प्रत्यक्षश्रुतिविरोधे स्मृतिरप्रमाणमिति भावः ।

1. अत्रैव—ज्ञानादेव मुक्तिरित्यत्रैव ।

* अन्यत्र श्रुतौ—'योऽनुक्रमेण' इत्यादिके कौषीतकिश्रुतिवाक्ये ।

* लब्धत्र्यन्नात्मकफलो भावनाज्ञानकर्मभिः ।
संन्यस्ताशेषकर्मा सन्बोध्यतेऽजातशत्रुणा ॥ (272)

नामरूपक्रियादेहः सर्वोऽस्मीत्यभिमानवान् ।
अतत्त्वज्ञोऽधिकार्यत्र विद्याया उपवर्ण्यते ॥ (273)

अयं लोकश्च पुत्रेण यादृशेन च जीयते ।
तादृक् पुत्रोऽत्र वक्तव्यः इत्यारभ्योत्तरा श्रुतिः ॥ (274)

पुत्रकर्मपरज्ञाननृपित्रमरलोकतः ।
व्याख्यातो नियमोऽन्योन्यं फलसाधनसंगतेः ॥ (275)

पुत्रकर्मार्थमात्रत्वान्न पृथक् साधनान्तरम् ।
जाया, मानुषवित्तं च कर्मैकार्थत्वकारणात् ॥ (276)

विद्यार्थमिति वक्ष्यमाणत्वादत्र [1]तद्विधिः इत्याह—**लब्धेति** । [272] गार्ग्यस्य संन्यासित्वं कुतोऽवगतमिति चेत्, ज्ञानार्थमजातशत्रुगमनात्, इत्याह—**नामेति** । ब्राह्मणस्य क्षत्रियोपसदनाभावेऽपि तदनुज्ञया श्रवणादि युक्तमित्यर्थः । [273]

'अथातः संप्रत्तिः' इत्यादिवाक्यस्य भाष्योक्तसंबन्धवर्णनम्

[2]संप्रत्तिवाक्यस्य **भाष्योक्तं** संबन्धमनुवदति—**अयमिति** । (274) तं संबन्धं वक्तुं वृत्तमाह—**पुत्रेति** । [3]पुत्रादित्रयस्य [4]लोकत्रयेण यथाक्रमं फ(ल)[लं] साधनमित्यन्यो[5]न्यसंगतेर्नियमो व्याख्यात इत्यर्थः । (275) जायावित्तयोः प्रकृतयोरविनियो(ग)[गेन] न्यूनत्वम्, अत्राह—**पुत्रेति** । जाया पुत्रार्था कर्मार्था

---

1. अत्र तद्विधिः — अत्र संन्यासविधिः ।
* लब्धत्र्यन्नात्मकफलः — सूत्रभावापन्न इति यावत् ।
2. संप्रत्तिवाक्यस्य—'अथातः संप्रत्तिः' इत्यादिवाक्यस्य । स्वमतेत संबन्ध-मुक्त्वेत्यादिः ।
3. पुत्रादित्रयस्य—पुत्रकर्मविद्यारूपस्य ।
4. लोकत्रयेण—मनुष्यपितृदेवलोकैः ।
5. अन्योन्यसंगतेः—परस्परसंबन्धस्य ।

स्वरूपलाभमात्रेण साधनत्वं निगच्छतः ।
कर्मज्ञाने, सुतस्तस्य साधनत्वं व्रजेत्कथम् ॥ (277)

इत्येवमभिसंबन्धो वक्तुर्भाष्यकृतः स्फुटः ।
अस्मदुक्ताविरोधीति तेन नेहातियत्यते ॥ (278)

पुत्रश्चेदनुशिष्टः स्याल्लोकस्तेनैव जीयते ।
नान्येन कर्मणात्रार्थो नृलोकजयसिद्धये ॥ (279)

च । वित्तं कर्मार्थम् । तस्मात् त्रयमेव पुत्रादिकं साधनमित्यर्थः । (276) अस्तु वृत्तमेवम् । प्रस्तुते किं स्यात्, अत्राह—स्वरूपेति । विद्याकर्मणी क्रियात्मत्वात् स्वरूपलाभमात्रेण साधनम् । पुत्रस्य तु द्रव्यत्वात् न तन्मात्रेण साधनत्वं, क्रियोपरक्तस्यैव कुठारादेः साधनत्वात् । सुतस्य [1]साधनत्वोक्त्यर्थं संग(ति)[ति] वाक्यारम्भ इत्यर्थः । (277) निगमयति—इत्येवमिति । [2]नायं दूष्यते, इत्याह —अस्मदिति । (278)

भाष्योक्तसंबन्धस्यादूष्यत्वेऽपि 'कर्मणा पितृलोकः'
इत्यादेः भाष्योक्तव्याख्यानस्य दूष्यत्वम्

भाष्यकारीयसंबन्धस्यादुष्टत्वे, 'कर्मणा पितृलोकः' इत्यादेर्व्याख्यानमपि [3]तदीयमदुष्टमिति, 'विद्यया देवलोकाप्तिः श्रुतत्वादेव कारणात्' (वा. 250) इत्याद्ययुक्तमुक्तम्, इत्याशङ्क्याह—पुत्र[श्चे]दिति । द्विविधो मनुष्यलोकजयः पुत्रेण पितुः अध्ययनादिकर्तव्यशेषानुष्ठानं भोग(स्य)[श्च] । तत्राद्यो जयः अनुशिष्टेन पुत्रेणैव नान्येन । अतः पुत्रेणैव इत्यवधारणमुपपन्नम् । द्वितीयस्तु जयः हेत्वन्तरेणापि स्यात्, '[4]ज्योतिषा' इति श्रुतेः । इममेव [5]विभागमभिप्रेत्य

---

1. साधनत्वोक्त्यर्थं—मनुष्यलोकसाधनत्वोक्त्यर्थम्
2. नायं दूष्यते—भाष्यकारोक्तः संबन्धो न दूष्यते ।
3. तदीयं—भाष्यकारीयम् ।
4. ज्योतिषेति श्रुतेः—'ज्योतिषेमं लोकं जयति' इति श्रुतेः ।
5. विभागमभिप्रेत्येति 'पुत्रेणैव जय्यः' इत्यत्रेति शेषः ।

पुत्रस्यैवावधृतये एवकारो भवेदयम् ।
पितृदेवलोकसंप्राप्तिः श्रुतेहान्यैश्च साधनैः ॥ (280)

व्याख्यानमिदमेवात्र निर्दोषं दोषवत्परम् ।
इदमेव ततो ग्राह्यं न तु यद्दोषवन्मतम् ॥ (281)

अथानन्तरमेवोक्तात्कर्मोपासनचेष्टितात् ।
अतस्तत्फलनिष्पत्तेः संप्रत्तिः संविधीयते ॥ (282)

यतो मनुष्यलोकोऽयं विशिष्टसुतसाधनः ।
तस्मात्संप्रत्तिकर्मेह वक्तव्यं तत्फलार्थिने ॥ (283)

अयोगव्यवच्छेदार्थमेवपदमुक्तमित्यर्थः । [1]उत्तरवाक्यद्वयेऽपि एवकारानुपपत्तिमाह —**पितृदेवेति** । पितृलोकजयोऽपि न नित्यकर्मणैव 'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छा. 8-2-1) इति [2]श्रुतेः । नापि विद्ययैव देवलोकजयः (पूर्वतोऽनुवर्तते) 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिस्मृतेरित्यर्थः । **श्रुतेहान्यै-श्चेति** । इह—शास्त्रे, अन्यैश्च श्रुतेत्यर्थः । (279-280) यत्र **एवकारः** श्रुतः [3]ततोऽन्यत्र एवकारो न गच्छतीति स्वीयव्याख्यानमेव युक्तम्, इत्याह — **व्याख्यानमिति** । (281)

'अथातः संप्रत्तिः' इत्यादेरर्थवर्णनम्

एवं [4]संप्रत्तिवाक्यस्य [5]संबन्धद्वयमुक्त्वा, अथातःशब्दयोरर्थमाह—**अथेति** । **संप्रत्तिः संविधीयते**—उपासनफलार्थं तदङ्गत्वेन क्रमसंन्यासोपयोगिसंप्रत्तिविधिरि-त्यर्थः । [282] अतःशब्दस्यार्था[6]न्तरमाह—**यत इति** । [283] उपासकस्योपा-

---

1. **उत्तरवाक्यद्वयेऽपि**—कर्मणा पितृलोकः, विद्यया देवलोकः इति वाक्ययोरपि
2. **इति श्रुतेरिति** पितृलोकस्य विद्याफलत्वावगमादिति भावः ।
3. **ततोऽन्यत्र**—कर्मणा पितृलोकः, विद्यया देवलोकः, इत्यत्र चेत्यर्थः ।
4. **संप्रत्तिवाक्यस्य**—'अथातः संप्रत्तिः' इत्यादिवाक्यस्य ।
5. **संबन्धद्वयं**—स्वकीयं भाष्यकारीयञ्च संबन्धम् ।
6. **अर्थान्तरमिति** कर्मोपासनयोरनुष्ठानस्य फलहेतुत्वादर्थान्तरं, मनुष्यलोकजयस्य विशिष्टसुतसाधनकत्वरूपमर्थमित्यर्थः ।

विदुषैव तु कर्तव्या संप्रत्तिर्नाविपश्चिता ।
यतोऽतः सूत्रिता नेयं सूत्रकृद्भिरनित्यतः ॥ (284)

संप्रत्तिरिति नामैतदात्मसंस्कारकर्मणः ।
प्रतिपत्तिक्रिया वा स्यादातुरन्यासदर्शनात् ॥ (285)

प्रैष्यन्निति च कालोऽस्य कर्मणोऽत्र विधीयते ।
ज्ञातकादिपरिज्ञानात् ज्ञातुं कालोऽपि शक्यते ॥ (286)

मुमूर्षुश्च पिता पुत्रमथाऽऽहूयानुमन्त्रयेत् ।
त्वं ब्रह्मेत्यादिभिर्वाक्यैः सोऽपि प्रत्याह बोधितः ॥ (287)

कर्मभ्यः प्रव्रजिष्यन्वा प्रैष्यन्नित्यभिधीयते ।
धातूपसर्गयोर्मुख्यस्तथार्थोऽप्याश्रितो भवेत् ॥ (288)

सनाङ्ग संप्रत्तिकर्म इत्ययुक्तम् । तस्य स्वतन्त्रत्वात् अग्निहोत्रादिकर्माङ्गत्वाद्वा, अत्राह—**विदुषेति** । स्वातन्त्र्ये कर्माङ्गत्वे च कल्पसूत्रकारैः सूत्रणीयम् , न च सूत्रितम् । तस्मात् विद्याङ्गमित्यर्थः । [284] संप्रत्तिशब्दार्थमाह—**संप्रत्तिरिति** । स्नानादिवत् संस्कारकर्म संप्रत्तिरित्यर्थः । तस्यार्थान्तरमाह—**प्रतिपत्तीति** । रोगिणो गृहिणः अर्थात् मुमूर्षोः कर्मत्यागे प्राप्ते, 'चात्वाले कृष्णविषाणां प्रास्यति' इति वत् पुत्रसमर्पणरूपेण कर्म त्यजेदिति प्रतिपत्तिक्रिया संप्रत्तिरित्यर्थः । मृत्युकालस्य दुर्ज्ञानत्वात् कथं [1]तत्र [2]तत् कार्यम् , अत्राह—**जातकेति** । आदिपदात् दुःस्वप्नादिसंग्रहः । अथ—मुमूर्षानन्तरमिति यावत् । [285–286–287] संन्यासाङ्गत्वेन संप्रत्तिविधिपक्षे 'प्रैष्यन्' इत्यस्यार्थमाह—**कर्मभ्य इति** । गत्यर्थेन इण्धातुना युक्तप्रोपसर्गस्य प्रव्रजनार्थत्वात्, [3]अपादानापेक्षायां योग्यतया कर्मभ्य इति सिद्ध्यतीत्यर्थः । [288]

---

1. **तत्र**—मृत्युकाले ।
2. **तत्**—संप्रत्तिकर्म ।
3. **अपादानापेक्षायां**—केभ्यः प्रव्रजनमित्याकाङ्क्षायां सत्यामिति यावत् । अत्र 'यदा प्रैष्यन्मन्यते, अथ पुत्रमाह, त्वं ब्रह्म त्वं यज्ञः त्वं लोक इति । स पुत्रः प्रत्याह, अहं ब्रह्म अहं यज्ञोऽहं लोक इति ।' इति श्रुतिरनुसन्धेया ।

* अहं ब्रह्मेति पितरं पूर्वमेवोपशिक्षितः ।
प्रतिवक्तुं न शक्तः स्यात् न चेत् प्राक् शिक्षितो भवेत् ॥ (289)

पुत्रानुमन्त्रणस्यार्थं व्याचष्टे स्वयमेव नः ।
श्रुतिस्तिरोहितार्थत्वान्मन्त्राणामित्यतोऽवदत् ॥ (290)

अनूक्तं यदधीतं स्यात् यच्चाध्येतव्यमिष्यते ।
यच्चानधीतं तस्योक्तौ ब्रह्मेत्यत्रैकता भवेत् ॥ (291)

त्वं ब्रह्मेतीह वाक्यार्थो ह्ययमत्र विवक्षितः ।
अध्येतव्यार्थनिष्पत्तिस्त्वनिष्पत्त्या मया कृता ॥ (292)

यावन्मत्कर्तृकं किञ्चिन्मानेन प्रतिपाद्यते ।
त्वत्कर्तृकं तदस्त्वत्र पितुरेवं विवक्षितम् ॥ (293)

लोकोक्त्यैव हि यज्ञानां तत्फलत्वाद् ग्रहे सति ।
नित्ययज्ञगृहीत्यर्थं के च यज्ञा इतीरणम् ॥ (294)

'अहं ब्रह्म' इत्यादेस्तात्पर्यमाह—**अहमिति** । पितरं प्रत्याह इति शेषः । प्राक् शिक्षितत्वं व्यतिरेकद्वारा आह—**प्रतिपत्तुमिति** । [289] 'यद्वै [1]किञ्च' इत्यादि अवतारयति—**पुत्रेति** । [290] अक्षरार्थमाह—**अनूक्तमिति** । [291] 'त्वं ब्रह्म' इति मन्त्रस्य विवक्षितार्थे [2]ब्राह्मणवाक्यं योजयितुं तमाह—**त्वमिति** । [292] 'ये वै के च' इत्यादिब्राह्मणार्थमाह—**यावदिति** । यज्ञादि मत्कर्तृकं सर्वं त्वत्कर्तृकमस्तु इत्यर्थः । [293] 'ये वै के च लोकाः' इति लोकग्रहे तद्धेतुयज्ञग्रहात् 'ये [वै] के च (या)[यज्ञाः]' इति पुनरुक्तम्, इत्यत्राह—**लोकेति** । [294] उक्तानुवादेन '[3]एतावद्वा' इत्यादेस्तात्पर्यमाह—**ब्रह्मेति** ।

---

* **पूर्वमेवोपशिक्षित इति** मृत्युकालात्पूर्वमेव पित्रा मत्कार्याध्ययनादिशेषः त्वया कार्यः इति शिक्षितः पुत्रः अहं ब्रह्मेत्यादि वाक्यत्रयं पितरं प्रत्याह इत्यर्थः ।

1. **यद्वै किञ्चेति** "यद्वै किञ्चानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता । ये वै के च यज्ञाः तेषां सर्वेषां यज्ञ इत्येकता । ये वै के च लोकाः इत्येकता ।" इतिश्रुतिरनुसन्धेया ।

2. **ब्राह्मणवाक्यं**—यद्वै किञ्चेत्यादिकं वाक्यम् ।

3. **एतावद्वा इत्यादेरिति** 'एतावद्वा इदं सर्वम्, एतन्मा सर्वं सन्नयमितोऽभुजनदिति' इति श्रुतिवाक्यम् ।

ब्रह्मेत्यादिपदार्थोऽयमुक्तस्तावत्समासतः ।
त्वं ब्रह्मेति तु वाक्यार्थः श्रुत्येदानीं विभाव्यते ॥ (295)

एतावदेव कर्तव्यं गृहिणेहाधिकारिणा ।
वेदा यज्ञाश्च लोकाश्च नातोऽन्योऽर्थोऽवशिष्यते ॥ (296)

यथोक्तार्थचिकीर्षुः संस्तन्मयः तत्क्रतुः स्वतः ।
इतोऽधिकारबन्धान्माऽभुनजत्पालयेदिति ॥ (297)

चेतस्याधाय वाक्यार्थमिममाह पिता सुतम् ।
त्वं ब्रह्मेत्यादिवाक्यानां नातोऽन्योऽर्थो विवक्षितः ॥ (298)

यत उक्तं चिकीर्षुः सन्ननुशिष्टश्च तादृशः ।
अतो लोकहितार्थं तं पुत्रमाहुर्मनीषिणः ॥ (299)

अनुशिष्टो यतः पुत्रः पित्रैवेति समर्थताम् ।
अनुशिष्टमतो लोक्यं पुत्रमाहुर्विपश्चितः ॥ (300)

'त्वं [1]ब्रह्म' इत्यादिवाक्यतात्पर्यकथनपरमित्यर्थः । [295] 'एतावद्वा इदं सर्वम्' इत्यस्यार्थमाह—**एतावदिति** । [296] 'एतन्मा सर्वम्' इत्यादेरर्थमाह—**यथोक्तेति** । अध्ययनादि चिकीर्षुः पुत्रः तन्मयः तत्सं(स्कृतश्च)[कल्पश्च] इतोऽधिकारसंबन्धात् मनुष्यनिमित्तात् मां, पालयिष्यतीत्यर्थः । इतिशब्दार्थमाह—**इति चेतसीति** । 'त्वं ब्रह्म' इत्यादेरर्थान्तरपर(त्व)त्वान्नोक्तप्रमापकत्वम्, अत्राह—**त्वमिति** । [297–298] '[2]तस्मात्पुत्रम्' इत्यादेर(र्थान्तर)[र्थ]माह—**यत इति** । [299]

'पूतीति नरकस्याख्या दुःखं च नरकं विदुः ।
पूतित्राणा(दयः)[र्थिनः] पुत्रमिहेच्छन्ति परत्र च ॥'

---

1. **त्वं ब्रह्मेत्यादिवाक्येति** 'त्वं ब्रह्म त्वं यज्ञस्त्वं लोकः' इति वाक्यत्रयेत्यर्थः ।
2. **तस्मात्पुत्रमिति** 'तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः । तस्मादेनमनुशासति ।' इति श्रुतिः ।

पितरश्चात एवैनमनुशासति सत्सुतम् ।
अनुशिष्टेन पुत्रेण लोक्यः स्यामिति यत्नतः ॥ (301)

संक्रामितात्मभारोऽपि नाग्निहोत्रं परित्यजेत् ।
इत्येतत्कर्मरागोक्तं निष्प्रमाणं न गृह्यते ॥ (302)

संप्रत्तिलिङ्गात् संन्यासविधिरत्र विवक्षितः ।
निःशेषोपनिषन्मानमेकं ज्ञानमितीष्यते ॥ (303)

ब्यन्नात्मभावसंप्राप्तेर्जीवतैव कृतत्वतः ।
* साधनानां फलान्तत्वात् संन्यासः किं निवार्यते ॥ (304)

इति पुत्र[1]मात्रस्य लोकहितत्वस्मृतेः, किं तदनुशिष्टया, अत्राह—**अनुशिष्ट इति** । (300) 'तस्मादेनम्' इत्यादेरर्थमाह—**पितरश्चेति** । (301)

संप्रत्तिं कृत्वापि यावज्जीवमग्निहोत्रं कर्तव्यमेवेति
भर्तृप्रपञ्चमतदूषणम्

संप्रत्तिविधि [2]तदर्थ[वादौ] व्याख्याय, 'स एष संप्र(ति)[त्ति]कृत् यावज्जीवति न तावदग्निहोत्रमुत्सृजेत्' इति **भर्तृप्रपञ्चोक्तं** दूषयति—**संक्रामि[ते]ति** । (302) कर्मत्यागेऽपि न मानमस्ति, इत्यत्राह—**संप्रत्तीति** । [3]अन्यत्र संन्यासाङ्गत्वेन विहितसंप्रत्तेः अत्र प्रतीतेः, अङ्गिसंन्यासोऽत्र विविक्षितः । [4]सर्वशाखाप्रत्ययात्मकं कर्मेति न्यायादित्यर्थः । [303] ब्यन्नात्मोपासकस्य कर्मत्यागे हेत्वन्तरमाह—**ब्यन्नेति** । [304] यावज्जीवमग्निहोत्रं जुहुयात् इत्यादिश्रुतिविरोधात्

---

1. **पुत्रमात्रस्य**—अनुशिष्टाननुशिष्टसाधारणपुत्रसामान्यस्य ।
2. **तदर्थवादाविति** 'तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः, तस्मादेनमनुशासति ।' इति संप्रत्तिविधेरर्थवादः ।
3. **अन्यत्र**—कौषीतकिश्रुतौ ।
4. **सर्वशाखेति** तथा च सर्वासां शाखानामेकवाक्यतेति भावः ।
* **साधनानां फलान्तत्वात्**—उपास्तीनां उपास्यदेवतामावसाक्षात्कारपर्यन्तत्वात् ।

यावज्जीवश्रुतिप्राप्तेर्न चेत्तत्त्याग इष्यते[1] ।
प्रयोगावसितेर्नैवं जरिणोऽधिकृतिर्न च ॥ (305)

प्रातर्देशावसानत्वादग्निहोत्रादिकर्मणः ।
नित्यानामपि संन्यासः कर्मणां स्यात्तदैव तु ॥ (306)

संक्रामितात्मभारस्य त्वं ब्रह्मेति वचोऽर्थवत् ।
तदा स्यात्सर्वकर्माणि यदि संन्यस्य तिष्ठति ॥ (307)

सर्वात्मकार्यनिचयपुत्रसंक्रामितत्वतः ।
न चेत्तित्यक्षितं सर्वं प्रतिप्रसवगीर्भवेत् ॥ (308)

न संन्यासः कार्यः, इति शङ्कते—**यावदिति**। अग्निहोत्रादेर्नियतकालत्वात् कालान्तरे तद्व्यवच्छेदात् मैवम्, इत्याह—**प्रयोगेति**। जीवता यथाकालमवश्यं कार्यमग्निहोत्रादि इत्येवम(र्थ)[र्था] यावज्जीवश्रुतिः, अत्राह—**जरिण इति**। 'जीर्णो वा वि[र]मेत्' इत्यादिश्रुतेरित्यर्थः । [305] विरक्तस्य संन्यासे किंपुनर्न्यायमाह—**प्रातरिति** । 'द्वे पौर्णमा(स्ये)[स्यौ] द्वे अमावास्ये यजेत एकामेव यजेत' इति श्रुतेः [1]प्रातरादिप्रयोगकालीनत्वात् कर्माधिकारस्य, मध्ये तदनधिकारात् द्रव्यादिसाधनसंपन्नस्यापि संन्यासो न विरुद्धः । किं पुनः विरक्तस्य संक्रामितात्मभारस्य वाच्यमित्यर्थः । [306] 'त्वं ब्रह्म' इत्यादि संप्र(ति)[त्ति] वाक्यमपि [2]न्यासपक्षे एव युक्तम्, इत्याह—**संक्रामितेति**। [307] [3]हेतुमाह—**सर्वात्मेति**। विपक्षे दण्डमाह—**न चेदिति**। संप्र(ति)[त्ति] वाक्यात् सर्वं कर्म त्यक्तुं नेष्टं चेत्, कृतसंप्रत्तिकेनापि एतावत्कार्यमिति वाक्यं स्यात्। तदभावात् निरवशेषेण कर्मत्यागोऽत्र विधेय इत्यर्थः। (308) [4]तत्र मानान्तरमाह **कौषीतकीति**। "अत ऊर्ध्वमनशनमपां प्रवेशनं महाप्रस्थानं

---

1. **प्रातरादीति** निश्चितकालोपलक्षणम् ।
2. **न्यासपक्षे**—संन्यासपक्षे ।
3. **हेतुमाह**—संन्यासपक्षे एव वाक्यस्यार्थवत्त्वे हेतुमाह ।
4. **तत्र**—तत्संन्यासे ।

कौषीतकिश्रुतौ तद्वत् गृहस्थस्यैव जीवतः ।
संन्यासः श्रूयते स्पष्टः पुत्रैश्वर्ये सुखं वसेत् ॥ (309)

संन्यस्य सर्वकर्माणि सर्वदोषानपानुदेत् ।
इत्यादि मनुनाप्युक्तं तद्विरुद्धं च भण्यते ॥ (310)

उपास्तिफलमेवास्य पितुर्यद्वदिहोच्यते ।
प्रतिप्रसूयते कस्मान्नाग्निहोत्रादिकं तथा ॥ (311)

एकमेवेत्यवधृतैर्युक्तं प्राणव्रतं पितुः ।
संस्कारकत्वात्तस्यैव न तदन्यदिहेष्यते ॥ (312)

म्रियते स यदैवंवित्पुत्रसंक्रामितक्रतुः ।
* क्रत्वञ्जितैस्तदा प्राणैः सह पुत्रं विशत्ययम् ॥ (313)

वृद्धाश्रमं वा गच्छेत्, पुत्रैश्वर्ये वा वसेत्" (कौ.) इति गृहस्थस्यैव संन्यासः श्रूयते इत्यर्थः । (309) तन्मूलस्मृतिमाह—संन्यस्येति ।

संन्यस्य सर्वकर्माणि कर्मदो(ष)[षा]नपानुदेत् ।
नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥'

इति **मनुनोक्तम्** । [310] कर्मसंन्यासे हेत्वन्तरमाह—उपास्तीति । यथा कृतसंप्रत्तिकस्य उपास्तिफलं 'पृथिव्यै चैनम्' [बृ. 3-5-18] इत्यादावुच्यते, तथा सर्वकर्मसंन्यासः संप्रत्तिवाक्येनाविवक्षितश्चेत्, अग्निहोत्राद्यपि तस्यानन्तरवाक्ये प्रतिश्रूयेत । तदभावात् संन्यासो विवक्षित इत्यर्थः [311] [1]कृतसंप्रत्तेः नोपास्तिफलमेव प्रस्तूयते, प्राणनादिव्यापारस्य प्रतिप्रसवात्, अत्राह—एकमिति । 'एकमेव व्रतं चरेत्' इत्युक्त[2]प्राणनादेः प्राणोपास्तित्वे पुंसंस्कारत्वेन मनोनिग्रहद्वारा सर्वोपरमहेतुत्वात् प्राणनादेः जीवनार्थत्वे स्थि[3]तिहेतुत्वात् संन्यासाविरोधित्वमित्यर्थः । (312)

---

1. **कृतसंप्रत्तेरिति** उपासकस्येति शेषः ।
2. **प्राणनादेः** — प्राणनादिपदार्थस्य ।
3. **स्थितिहेतुत्वात्**—पुरुषस्थितिहेतुत्वात् ।

* **क्रत्वञ्जितैः प्राणैरिति** क्रतुः संकल्पः । सर्वस्य संकल्पस्य पुत्रे समर्पितत्वात् प्रजापतिरस्मि इति संकल्पस्यैवावशिष्टत्वात्, तेन संस्कृतैः वागादिभिः प्राणैः पुत्रं विशतीत्यर्थः ।

प्रागात्मक्रतुसंक्रान्तेरभूयाद्दक्क्रतुः पिता ।
स तादृक्क्रतुबिम्बोऽस्य संक्रान्तः स्वसुते पितुः ॥ (314)

जलार्कस्येव संक्रान्तिः स्वाभासभ्रमकारणात् ।
परोपाधिनिमित्तैव कौटस्थ्यात्प्रत्यगात्मनः ॥ (315)

क्रत्वञ्जितधियो यद्वत् स्वात्मदेहस्य साक्षिता ।
तद्वत्पुत्रादिदेहेषु मोहान्नानात्मविभ्रमः ॥ (316)

* स्वाधिकारसुतावेशात् पितैवाविशतीत्यतः ।
स्वयं निरधिकारस्तु दैवप्राणोऽवतिष्ठते ॥ (317)

' स यदैवंवित् ' इत्यादिश्रुत्यर्थनिरूपणम्

' [1]स य(दे)[दै]वंवित् ' इत्यादेरर्थमाह—म्रियत इति । (313) देहिनो देहस्य वा न देहान्तरे निवेशः, [2]अन्यभोग्यत्वात्, अत्राह—प्रागिति । अग्निहोत्रादिकर्तव्यविषयसंकल्पस्य सुतेऽ[3]र्पणमित्यर्थः । (314) मुख्यप्रवेशं हित्वा, कस्मादौपाधिकप्रवेशग्रहः, अत्राह—जलेति । सवितुः जले संक्रान्तिवत् उपहितस्य पितुः स्वकार्यसंकल्पस्य स्वपु(त्र)[त्रार्पण] रूपाभासात् तत्र स्वप्रवेशभ्रमहेतोः संक्रान्तिः, [4]अन्यादृशसंक्रान्तेरयोगादित्यर्थः । (315) प्रतीचः कौटस्थ्यमसिद्धं [5]विभक्तत्वेन विकारित्वात्, अत्राह—क्रत्विति । कार्यतासंकल्पाविष्टबुद्ध्युपलक्षित(विधा)[चिद्धा]तोः सर्वदेहसाक्षित्वेनैक्यात् भेदधीः भ्रान्तिरित्यर्थः । (316) प्रकृतप्रवेशमुपसंहरति—स्वाधिकारेति । (317) तर्हि

---

1. स यदैवंविदिति " स यदैवंविदस्माल्लोकात् प्रैति, अथैभिरेव प्राणैः सह पुत्रमाविशति । " इति श्रुतिः ।
2. अन्यभोग्यत्वादिति देहान्तरस्येति शेषः ।
3. अर्पणमिति तदेव प्रवेशपदेनोपचर्यते इत्यर्थः ।
4. अन्यादृशसंक्रान्तेः — लताया वृक्षे संक्रान्तितुल्यायाः संक्रान्तेः ।
5. विभक्तत्वेन—भिन्नत्वेन ।

* स्वाधिकारसुतावेशात्—स्वाधिकारस्य सुते समर्पणात् । दैवप्राणोऽवतिष्ठते—फलरूपेण तिष्ठति ।

आध्यात्मिकेन देहेन न्यूनकार्यसमाप्तये ।
पिता पुत्रेण कुर्वाण आस्ते तत्फलभुक् स्वयम् ॥ (318)

दैवसाधनसंपन्नः पुत्र एवावतिष्ठते ।
पिता तु तत्फलात्मैव न तु साधनरूपभृत् ॥ (319)

नाकारि कार्यं यत्पित्रा स्वाधीत्यादि प्रमादतः ।
* तत्पूरणात्पितुस्त्राणात् पुत्र इत्यभिधीयते ॥ (320)

संपूर्णस्वात्मकार्योऽयं पिता दैवात्मना स्थितः ।
पितुः सामिकृतं कार्यं पूरयन्वर्तते सुतः ॥ (321)

मृतेरुच्छिद्यते लोकः साधनोच्छित्तिहेतुतः ।
पितुरित्यपि नाशङ्का कार्या यस्मात्स एव तु ।
पुत्रेणैव शरीरेण कुर्वन्नास्ते नवं नवम् ॥ (322)

एकस्यैवाधिकारित्वमनधिकारित्वं चैकदा स्यात्, अत्राह—**आध्यात्मिकेनेति** । पुत्ररूपेणा(न)धिकारी फलरूपेणा[न]धिकारी पितेत्यर्थः । (318) एकस्य [1]द्वैरूप्यं व्याहतम्, अत्राह—**दैवेति** । (319)

'स यद्यनेन' इत्यादिश्रुत्यर्थवर्णनम्

'[2]स यद्यनेन' इत्यादेरर्थमाह—**ना(क)[का]रीति** । (320) फलितमाह—**संपूर्णेति** । देवरूपेण वर्तमानस्य पितुः संपूर्णकार्यत्वे हेतुमाह—**पितुरिति** । (321) '[3]स पुत्रेणैवास्मिंल्लोके' इत्यादेरर्थमाह—**मृतेरिति** । पुत्रेणैतल्लोकजय-

---

1. **द्वैरूप्यं**—पुत्ररूपत्वं फलरूपत्वञ्चेत्युभयम् ।
2. **स यद्यनेनेति** "स यद्यनेन किञ्चिदक्ष्णयाऽकृतं भवति, तस्मादेनं सर्वस्मात् पुत्रो मुञ्चति, तस्मात् पुत्रो नाम ।" इति श्रुतिः ।

* **तत्पूरणात्**—अनुशासनद्वारा तस्य करणेन पूरणात् ।

3. **स पुत्रेणेति** 'स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठति ।' इति वाक्यम् ।

पुत्रेणैवेत्यतो वक्ति नित्याधिकृतिसिद्धये ।
जयतीमं पिता लोकमेवंभूतेन सूनुना ॥ (323)

* न त्वात्मलाभमात्रेण जयः स्यात् ज्ञानकर्मवत् ।
पुत्राधिकारनुत्त्यर्थमथशब्दः प्रयुज्यते ॥ (324)

कृतसंप्रत्तिकं दैवाः प्राणा वागादयः समम् ।
पितरं संविशन्त्युक्ताः सदा तद्भावभावितम् ॥ (325)

पृथिव्यै चैनमित्यादि तद् व्याचष्टे यथा तथा ।
हेत्वर्थो वाऽथशब्दोऽयं यस्मात्संक्रामितक्रतुः ॥ (326)

* तद्वियोगादतो दैवा आविशन्ति यथोदिताः ॥ (327)

मुपसंहरति—**जयतीति** । (322–323) एवंभूतेनेति विशेषणव्यवच्छेद्यमाह—**न(न्वि)[त्वि]ति** । सुतोत्पत्तिमात्रेण नेत्यर्थः । '[1]**अथैनम्**' इत्यत्र अथशब्दार्थमाह—**पुत्रेति** । [2]एनमिति प्रकृतपरामर्शकत्वात् पुत्रपरत्वाशङ्का स्यात्, तन्निवृत्त्यर्थमथपदमित्यर्थः । (324) '**एनम्**' इत्यादेरर्थमाह—**कृतेति** । तद्भावभावितं—[3]सौत्रप्राणेषु आत्मभावनायुक्तमित्यर्थः । (325) **कथं** प्रविशन्ति, इत्यत्राह—**पृथिव्यै चेति** । अथशब्दस्य प्रकरणविच्छेदार्थत्वमुक्त्वा, अर्थान्तरमाह—**हेत्विति** । (326–327)

---

* 'एवंभूतेन सूनुना' इति सूनोः उक्तानुशासनवत्त्वरूपमेवंभूतत्वं विशेषणमुक्तम् । तत्प्रयोजनं **न त्वात्मलाभमात्रेण** इति वार्त्तिके अभिधीयते । **ज्ञानकर्मवदिति** ज्ञानशब्दितमुपासनं, कर्म च यथा स्वोपत्तिमात्रेण देवलोकपितृलोकप्राप्तिहेतुः, तथा न पुत्रः स्वोत्पत्तिमात्रेण मनुष्यलोकजयहेतुरित्यर्थः ।

1. **अथैनमिति** "अथैनमेते दैवाः प्राणा अमृता आविशन्ति" इति श्रुतिः ।
2. **एनमितीति** एनमित्यत्र एतच्छब्दस्य सर्वनाम्नः इति यावत् ।
3. **सौत्रप्राणेष्विति** दैवेषु सूत्रात्मनः प्राणेष्वित्यर्थः ।

* **तद्वियोगात्**—कर्तव्यतासंकल्पवियोगात् ।
अत्र "पृथिव्यै चैनमग्नेश्च दैवी वागाविशति । सा वै दैवी वाक् यया यद्यदेव वदति तत्तद्भवति ।" इति श्रुतिः । अत्र पृथिव्यै इत्यत्र पञ्चम्यर्थे चतुर्थी । पृथिव्या इति यावत् ।

श्रुतिस्था या हि वाक् तस्याः पञ्चमीयं परा भवेत् ।
ततो लब्धात्मलाभायाः प्रथमा जन्महेतुतः ॥ (328)

वाचं संश्रुत्य वाक्यस्थां चिनुते भावनामयीम् ।
उपादानमतः श्रौती स्याद्वाणी भावनात्मनः ॥ (329)

न हि वस्तु स्वतः सिद्धमन्यत्स्यात्परमात्मनः ।
सदेवेत्यादिकं शास्त्रं बाधितं स्यात्तथा सति ॥ (330)

धिया धियेति कार्यत्वं कृत्स्नस्य जगतः स्वयम् ।
श्रुत्यैव स्पष्टमाख्यातं नातोऽभिव्यक्तिरिष्यते ॥ (331)

अष्टादशकण्डिकार्थनिरूपणम्

पृथिव्यग्न्योरेव देववाक्त्वात् [1]कथमेकत्रैव पञ्चमी प्रथमा च, इत्याशङ्क्याह—**श्रुतिस्थेति** । श्रुतिदृष्टा, पूर्व(वासेद्वो)[सिद्धो]पास्यहिरण्यगर्भस्य वाक् । तस्याः परस्तात् पृथिव्या अग्नेरिति च पञ्चमी । दैवी वागिति प्रथमा ततो जातायामुपासकवाचीत्यर्थः । (328) कथमुपासकवाचः [2]ततो जन्म, अत्राह—**वाचमिति** । वाक्यस्थां सौत्रीं वाचमिति यावत् । (329) सूत्रस्य स्वतः सिद्धत्वात् तद्वागपि स्वतःसिद्धा । तदभिन्नत्वादुपासकवाचोऽपि जन्म न युक्तम् । अन्यथा 'भिन्नघटप्रदीपप्रकाशवदभिव्यक्तिमात्रं वाचः' इति भाष्यविरोधात् इत्याशङ्क्य, सूत्रादेः स्वतःसिद्धिरसिद्धा, इत्याह—**न हीति** । (330) भाष्यकारीयाभि[3]व्यक्तिवाक्यात् स्वतःसिद्धिः किं न स्यात्, अत्राह—**धियेति** । (331) वागादेः स्वतोऽसिद्धौ वाक्यान्तरमाह—**आर्तेति** । 'अतोऽन्यदार्तम्' (बृ. 5-4-2) 'वाचारम्भणं विकारो नामधेयम्'

---

1. **एकत्रैव पञ्चमी प्रथमा चेति** पृथिव्यामग्नौ च पञ्चमी, दैवी वागिति प्रथमा चेत्यर्थः ।
2. **ततो जन्म—** हिरण्यगर्भवाचो जन्म ।
3. **अभिव्यक्तिवाक्यात्—**'अभिव्यक्तिमात्रं वाचः' इत्युक्तभाष्यवाक्यात् ।

आर्तश्रुतेश्च प्राणादि वाचारम्भणशास्त्रतः ।
नाऽऽत्मवत्स्यात्स्वतः सिद्धमुत्पत्त्यादिश्रुतेस्तथा ॥ (332)

कर्तृभिः क्रियते तस्माद्भावनाज्ञानकर्मभिः ।
त्र्यन्नात्मकमिदं विश्वं नातोऽभिव्यक्तिरिष्यते ॥ (333)

ब्रह्मैवेदं तथाऽऽत्मैव पुरुषश्चेति चागमः ।
एवं सत्यर्थवान्नः स्यादन्यथा स्यादनर्थकः ॥ (334)

* पुत्रकर्मापरज्ञानसाधनान्यपरे जगुः ।
मनुष्यलोकपित्रमरलोकेभ्यः स्युर्निवृत्तये ॥ (335)

एवं मोक्षार्थतां तेषां पुत्रादीनां प्रचक्षते ।
लोकव्यावृत्तिमार्गेण श्रुतिस्तेषां निषेधकृत् ॥ (336)

(छा. 6-1-4) 'एतस्माज्जायते प्राणः' (मु. 2-1-3) इत्यादिकमपि कार्यत्वे मानमित्यर्थः । (332) अत्रैव हेत्वन्तरमाह—**कर्तृभिरिति** । (333) उक्तार्थे श्रुतार्थापत्तिं मानयति—**ब्रह्मैवेति** । नः—अस्माकमिति यावत् । (334) पुत्रादित्रयस्य लोकत्रयाप्तिहेतु[ता]मुक्त्वा [1]सिंहावलोकितनी[त्या]तस्य[2] तदतिक्रमार्थत्वमनुवदति—**पुत्रेति** । (335) अतिक्रमार्थत्वे किं फलम्, अत्राह—**एवमिति** । लोकातिक्रमे देहद्वयातिक्रमात् बन्धध्वस्तिरित्यर्थः । दूषयति—**श्रुतिरिति** । उपासकस्य सूत्राप्तिः 'पृथिव्यै चैनम्' इत्यादिनोक्तेत्यर्थः । (336) पुत्रादेः संसारफलत्वे हेत्वन्तरमाह—**काम्यमिति** । [3]ऋणश्रुतिस्मृतिभ्यां पुत्रादेः मुक्तिफलता,

---

1. **सिंहावलोकितनीत्या**—सिंहावलोकनन्यायेन । सुदूरं गतेन सिंहेन पश्चात् अवलोक्यते यथा तथेत्यर्थः । पुत्रेणायं जय्यः इत्यादिवाक्यार्थविचारावसरे निरस्तमपि जयतेरतिक्रमार्थत्वं, सुदूरं श्रुत्यर्थाविष्करणेन गत्वा पुनर्निराकरणायानूद्यते इति भावः ।
2. **तस्य तदतिक्रमार्थत्वं**—पुत्रादित्रयस्य लोकत्रयातिक्रमार्थत्वम् ।

* **पुत्रकर्मापरज्ञानेति** पूर्वार्धे मीमांसकपक्षः, उत्तरार्धे भर्तृप्रपञ्चपक्षश्चाभिहित इति शास्त्रप्रकाशिकाकाराः ।

3. **ऋणश्रुतिस्मृतिभ्यामिति** ऋणापाकरणबोधकश्रुतिस्मृतिभ्यामित्यर्थः ।

काम्यमेवाखिलं पाङ्क्तं कर्मेत्येवं प्रकृत्य तु ।
पुत्रादीनां स्वसाध्यार्थविनियोगोपसंहृतेः ॥ (337)

संसारफलतैवातः पुत्रादेर्गम्यते श्रुतेः ।
अविद्वद्विषयैवातः ऋणश्रुतिरपीष्यते ॥ (338)

प्रजया किं करिष्याम इत्येवं च प्रवक्ष्यति ।
नातो विदितवेद्यस्य कथं चित्स्यादृणश्रुतिः ॥ (339)

* व्यावृत्त्यर्थानि नैतानि पुत्रादीनि यथा तथा ।
पृथिव्यै चैनमित्याद्या स्वयं निर्वक्ति नः श्रुतिः ॥ (340)

न च त्र्यन्नात्मसंप्राप्तिः कैवल्यमिति युज्यते ।
तस्या मेधातपोजत्वात् पौनःपुन्येन तच्छ्रुतेः ॥ (341)

तथा क्षयश्रुतेस्तस्य यद्धैतदिति वाक्यतः ।
पृथिवी शरीरमित्युक्तेः शरीरित्वं प्रजापतेः ॥ (342)

इत्यत्राह—**अविद्वदिति** । (337-338) इतश्च अवि[1]द्याविषया, इत्याह—**प्रजयेति** । '[किं]प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' (बृ. 6-4-22) इति वाक्यमपि अविरक्ताधिकारत्वं प्रमापयतीत्यर्थः । (339) अति[2]क्रमार्थत्वं निरस्तं निगमयति—**व्यावृत्त्यर्थानीति** । (340) सूत्रात्मप्राप्तिरेव कैवल्यमित्याशङ्क्य, आह—**न चेति** । 'धिया धिया' इति पौनःपुन्यं, 'यद्धैतन्न कुर्यात् क्षीयेत ह' (बृ. 3-5-2-2) इति क्षयश्च श्रूयते इत्यर्थः । देहवत्त्वश्रुतेश्च न तद्भावो मुक्तिः, इत्याह—**पृथिवीति** । 'पृथिवी शरीरं ज्योतीरूपमयमग्निः' (बृ. 3-5-11) इति श्रुतेः 'त्रयं वा इदं नाम रूपं कर्म' (बृ. 3-6-1) इति श्रुतेश्चेत्यर्थः ।

---

1. **अविद्याविषयेति** अविद्वद्विषयेत्यर्थः । ऋणापाकरणश्रुतिरिति शेषः ।
2. **अतिक्रमार्थत्वं**—मनुष्यलोकाद्यतिक्रमार्थत्वम् । पुत्रादित्रयस्येति शेषः ।

* 'मीमांसकमतं श्रुतिविरोधेन निरस्य तेनैव मतान्तरं (भर्तृप्रपञ्चमतं) निरस्यति—**व्यावृत्त्यर्थानीति**' इति शास्त्रप्रकाशिका ।

नामरूपक्रियात्वेन मोहकार्योपसंहृतेः ॥ (343)

* कस्यचिन्मुक्तयेऽलं स्यात् कस्यचित् त्र्यन्नवित्तयै ।
सकृच्छ्रुतं वचोऽशक्तं विधातुं द्वयमञ्जसा ॥ (344)

भूर्यर्थता प्रकाशादेः प्रत्यक्षादेव कारणात् ।
* न त्वागमैकगम्येषु तथात्वमवसीयते ॥ (345)

श्वेतोऽसौ धावतीत्यादेरनेकोक्तित्वकारणात् ।
अनेकार्थावसायः स्यान्न त्वेवमिह युज्यते ॥ (346)

निःशेषभूतात्मैकः सन्नधिदैवात्मना स्थितः ।
भूतपापैरसंकीर्णो दैवं सुखमुपाश्नुते ॥ (347)

(341-342-343) सूत्रप्राप्तिफलं कर्मादि, न मुक्तिफलमित्युक्तम् । ननु अविरक्तस्य संसारफलमपि कर्मादि, विरक्तस्य मुक्तिफलं स्यात्, इत्यत्राह—**कस्यचिदिति ।** (344) अग्निप्रकाशस्य जलादेश्चानेका[1]र्थत्ववत् एकवाक्यस्यानेकार्थता किं न स्यात् तत्राह—**भूरिति ।** वाक्यभेदप्रसक्तेरित्यर्थः । (345) एकमपि वाक्यमनेकार्थं दृष्टम्, इत्यत्राह—(श्वे)[श्वे त इति । इतोऽसौ श्वा धावति, श्वेतो धावतीति च अनेकार्थत्वं विवक्षावैचित्र्यात् । तच्च पौरुषेये नापौरुषेये तत्र '[2]अर्थैकत्वाद्' इत्यादेरनतिलङ्घ्यत्वादित्यर्थः । (346)

विंशकण्डिकास्थस्य 'स एवंवित्' इत्यादिवाक्यस्यार्थवर्णनम्

'[3]स एवंवित्' इत्यादेस्तात्पर्यमाह—**निःशेषेति ।** (347) तद्वाक्यं

---

* **त्र्यन्नवित्तये** इति त्र्यन्नात्मकसूत्रभावलाभायेत्यर्थः ।

1. **अनेकार्थत्ववदिति** अत्रानेकफलवत्त्वमनेकार्थत्वम् ।

* **तथात्वं** अनेकार्थत्वम् ।

2. **अर्थैकत्वादित्यादेरिति** 'अर्थैकत्वादेकं वाक्यम्' इत्यस्येत्यर्थः । कृतसंप्रत्तिकमुपासकं दैवी वागाविशति इत्युक्तम् । एवं 'दिवश्चैनमादित्याच्च दैवं मन आविशति, तद्वै दैवं मनः येनानन्द्येव भवति अथो न शोचति' इति दैवमनसः, 'अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणः यः संचरंश्चासंचरंश्च न व्यथते अथो न रिष्यति' इति दैवप्राणस्य चावेशोऽभिहितो बोध्यः ।

3. **स एवंविदिति** 'स एवंवित् सर्वेषां भूतानामात्मा भवति यथैषा देवतैवम्' इति वाक्यस्येत्यर्थः ।

सर्वभूतात्मभूतोऽसौ सर्वानन्यत्वदर्शनः ।
जगदुत्पत्तिसंहारैः क्रीडन्निव विचेष्टते ॥ (348)

वाक् च सा सर्वभूतानां श्रोत्रं त्वग्रसनं मनः ।
घ्राणपादादयः सर्वे सर्वोपादानकारणात् ॥ (349)

*ज्ञानं सप्रतिघं यद्वत्कार्यं वास्मासु दृश्यते ।
नैवमीशस्य सर्वत्र पूर्वोक्तादेव कारणात् ॥ (350)

किञ्च सर्वाणि भूतानि तमवन्ति यथाबलम् ।
इममर्थं श्रुतिर्वक्ति दृष्टान्तेन प्रयत्नतः ॥ (351)

पूर्वजन्माभिनिर्वृत्तां यथैवावन्ति देवताम् ।
तथैवैवविदं भागैः सर्वभूतानि सर्वदा ॥ (352)

सर्वभूतात्मतापत्तिर्यद्येवंविद इष्यते ।
संगतिर्भौतिकैर्न स्यात्तस्य दुःखादिभिः कथम् ॥ (353)

नापरिच्छिन्नबुद्धित्वात्तस्य दुःखाद्युपप्लुतिः ।
कुक्षिस्थक्रिमिदुःखैर्नो न मनागपि संगतिः ॥ (354)

व्याचष्टे—सर्वेति । (348) न केवलं [1]विद्वान् प्राण एव, किन्तु वागाद्यपि, इत्याह—वाक् चेति । (349) सर्वोपादानत्वेन सर्वात्मत्वमयुक्तमुक्तम् । [2]तस्य परिच्छिन्नज्ञानादिमत्त्वात्, अत्राह—ज्ञानमिति । (350) 'स यथैताम्' इत्यादेस्तात्पर्यमाह—किंचेति । (351) तद् व्याकरोति—पूर्वेति । (352) 'य(त्)[दु] किंचेमाः' इत्यादि अवतारयितुं चोदयति—सर्वभूतेति । (353)

---

1. विद्वान्—प्रकृतोपासकः ।

* सप्रतिघं—प्रतिघातसहितं, प्रतिबद्धमिति यावत् । अत्र "स यथैतां देवतां सर्वाणि भूतान्यवन्ति, एवं हैवंविदं सर्वाणि भूतान्यवन्ति । यदु किञ्चेमाः प्रजाः शोचन्ति अमैवासां तद्भवति । पुण्यमेवामुं गच्छति । न ह वै देवान्पापं गच्छति ।" इति श्रुतिः उपास्तिफलनिरूपणपरा अनुसन्धेया ।

2. तस्य—सूत्रात्मकस्य विदुषः ।

अस्मदाद्यभिमानित्वे तस्यास्मद्दुःखसंगतिः ।
तस्य कृत्स्नाभिमानित्वान्नास्मन्मात्राभिमानिता ॥ (355)

ईश्वरत्वाच्च तस्यास्मद्दुःखैर्न स्यात्समागमः ।
अस्माकं दुःखसंप्राप्तिरनैश्वर्यकृतैव तु ॥ (356)

इत्यादि हृदये कृत्वा न्यायं श्रुतिरुदाहरत् ।
यदु किञ्चेति विस्पष्टं प्रजादुःखनिषेधकृत् ॥ (357)

यच्छोचन्ति प्रजाः सर्वा दुःखैराध्यात्मिकादिभिः ।
आसामेवात्मभिः साकं तद् दुःखमुपयुज्यते ॥ (358)

यथोक्तन्यायतो दुःखं न सार्धं देवतात्मना ।
कृतनाशस्तथा च स्यादकृताभ्यागमस्तथा ॥ (359)

पुण्यमेव कृतं यस्मात् पुण्यमेवामुमेत्यतः ।
पापस्याकरणादेव नैति पापं कदाचन ॥ (360)

अग्निं न ढौकते शैत्यमग्निवस्तुस्वभावतः ।
पाप्मानो देवतां तद्वद्देवतात्मस्वभावतः ॥ (361)

न तस्य दुःखसंबन्धः अपरिच्छिन्नधीत्वात्, इति परिहरति—नेति । (354) अपरिच्छिन्नाभिमानस्य दुःखाभावहेतुत्वं व्यतिरेकमुखेनाह—अ(स्मा)[स्मदा]-दीति । (355) [1]हेत्वन्तरमाह—ईश्वरत्वाच्चेति । (356) उक्तार्थे श्रुतिमवतारयति—इत्यादीति । आदिपदेन सर्वज्ञत्वादिसंग्रहः । (357) 'यदु किञ्चेमाः' इत्यादेस्तात्पर्यमुक्त्वा, अक्षरार्थमाह—यच्छोचन्तीति । (358) देवतात्मनापि तद्भोक्तव्यं सर्वभूतात्मत्वात्, अत्राह—यथोक्तेति । (359) कृतना(सा)[शा]दिकं स्पष्टयन् 'पुण्यमेव' इत्यादिकं व्याचष्टे—पुण्यमिति । (360) देवतायाः पापसंसर्गाभावं दृष्टान्तेन स्पष्टयति—अग्निमिति । (361)

---

1. हेत्वन्तरमिति तस्य दुःखासंबन्धे इत्यादिः ।

सर्व एव समाः प्राणा इत्युक्तेः साम्यनिश्चितौ ।
उपासने विकल्पेन प्राप्ते मीमांस्यते व्रतम् ॥ (362)

दैववागादिसंपत्तिर्मृतस्य त्वन्नदर्शिनः ।
जीवता किं व्रतं धार्यमिति मीमांस्यतेऽधुना ॥ (363)

सर्वात्मकर्मसंन्यासात्प्राप्तो नैष्कर्म्यरूपके ।
प्राणव्रतविधानार्थं परो ग्रन्थोऽवतार्यते ॥ (364)

* बहूक्त्यैव तु सर्वेषां सिद्धं पूर्वमुपासनम् ।
स यो हैतानिति ततो नेदं पूर्वमपेक्षते ॥ (365)

एकविंशद्वाविंशकण्डिकार्थनिरूपणम्

'अथातो व्रतमीमांसा' इत्यादेस्तात्पर्यमाह—**सर्व इति** । [1]त्रयाणां न साम्येनोपासनं, प्राणस्यैव [2]प्राधान्येन, इति प्रतिपादनाय उत्तरं वाक्यमित्यर्थः । (362) वृत्तं संकीर्त्य उक्तं स्पष्टयति—**दैवेति** । सिद्धेति शेषः । किं व्रतं, कस्य व्रतमिति विचार्य प्राणस्यैवेति निश्चीयते इत्यर्थः । (363) [3]तात्पर्यान्तरमाह—**सर्वेति** । प्राणव्रतप्रतिप्रसवार्थमित्यर्थः । (364) 'अथातः' इत्यादिकं [4]प्राणोपासामेव विधत्ते, इत्यत्राह—**बहूक्त्येति** । 'स यो हैताननन्तान्' (बृ. 3-5-13) इति बहुवचनेन प्राणोपासनस्यापि सिद्धत्वात् नेदं [5]तद्विधायकम् । किन्तु तदङ्गीकारेण तदङ्गव्रतविधायकत्वात् 'स यो हैतान्' इति पूर्ववाक्यमपेक्षते इत्यर्थः । (365) वाङ्मनसयोरुपासां निरस्य [6]प्राणोपासाविधिपरम्, इत्यत्राह—

---

1. **त्रयाणां**—वाङ्मनःप्राणानाम् ।
2. **प्राधान्येनेति** वाङ्मनसयोस्तु प्राणोपसर्जनत्वेनोपासनमिति भावः ।
3. **तात्पर्यान्तरं**—भाष्योक्तातिरिक्तं तात्पर्यम् । उत्तरवाक्यस्येत्यादिः ।
4. **प्राणोपासामेवेति** एवेन व्रतस्य व्यवच्छेदः ।
5. **तद्विधायकं**—प्राणोपासाविधायकम् ।
6. **प्राणोपासाविधिपरमिति** उत्तरवाक्यमिति शेषः ।

* "स्वतन्त्रस्यैव तस्य (प्राणव्रतस्य) विधायकमिदं न प्राणोपास्त्यङ्गस्य प्रापकाभावादिति चेत्, नेत्याह—बहूक्त्येति" इति **शास्त्रप्रकाशिका** ।

वाक्खान्तयोः स्वरूपोक्तिः वृथैव स्यात्पुरोदिता ।
तयोरुपासनं नो चेत्प्राणवत्स्याद्विवक्षितम् ॥ (366)

मृत्युना श्रमरूपेण ग्रस्ता वागादयो यतः ।
म्लोचन्त्यपि च शाम्यन्ति तेन भग्नव्रताः स्मृताः ॥ (367)

तद्रूपो मध्यमो वायुः श्रमास्तमयवर्जितः ।
यतोऽभग्नव्रतस्तस्मात् तस्यैव व्रतमाश्रयेत् ॥ (368)

प्राणे म्लोचन्ति वायौ च वागाग्न्यग्न्यादयो यतः ।
प्राणस्यैव व्रतं धार्यमतो नान्यस्य कस्यचित् ॥ (369)

वागिति । (366) तस्मात् प्राणव्रतविधिपरमेवेति तात्पर्यमुक्त्वा, '[1]तस्मात्' इत्यादेरर्थमाह—**मृत्युनेति** । अग्न्यादयः म्लोचन्ति—अस्तं यन्ति, वागादयः श्राम्यन्तीत्यर्थः । (367) '[2]अथेमम्' इत्यादेरर्थमाह—**तद्रूप इति** । (368) तस्यैव इत्यवधारणे हेतुमाह—**प्राण इति** । अध्यात्मं प्राणे वागादयः, अधिदैवं वा(यौ)यावग्न्यादयः इत्यर्थः । (369) 'तस्मादेते' इत्यादेस्तात्पर्यमाह—

---

1. **तस्मादित्यादेरिति** 'तस्मादेते एतेनाख्यायन्ते प्राणा इति' इति वाक्यस्येत्यर्थः ।
2. **अथेममित्यादेरिति** 'अथेममेव नाप्नोद्योऽयं मध्यमः प्राणः ।' इत्यादिवाक्यस्येत्यर्थः ।

अत्रेदं बोध्यम् । वाङ्मनःप्राणानां कस्य कर्म व्रतत्वेन धारयितव्यमिति मीमांसा । प्रजापतिः वागादीनि करणानि ससर्ज । तानि परस्परं स्पर्धां चक्रुः । वाक् वदिष्याम्येव—स्वव्यापारात् वदनादनुपरतैवाहं स्यामिति व्रतं धृतवती, चक्षुः द्रक्ष्यामीति, श्रोत्रं श्रोष्यामीति, इत्येवं सर्वकरणानि व्रतं धृतवन्ति । तानि सर्वाणि मृत्युः श्रमो भूत्वा संजग्राह । तानि स्वस्वव्यापारादुपरतान्यासन् । तत्र मध्यमः प्राण एव श्रमं नाप्नोत् । अतः प्राण एव श्रेष्ठः, अतः तमेवात्मत्वेन प्रतिपद्येमहि इति निश्चित्य प्राणरूपमेव प्रतिपन्नानि । सर्वाण्यपि करणानि प्राणरूपेणैव रूपवन्ति चलनात्मना । अतः वागादयः प्राणशब्देनोच्यन्ते । इत्यध्यात्मं विचारः । अधिदैवं, अग्न्यादित्यचन्द्राणां स्पर्धाऽसीत् । ज्वलिष्याम्येवाहमिति अग्निर्दध्रे, तप्स्याम्यहमित्यादित्यः, भास्याम्यहमिति चन्द्रमाः । एवमन्या देवता यथायथम् । अग्न्यादीनामुदयास्तमयवत्त्वेऽपि वायोरस्तमयरहितत्वात्, सैषा अनस्तमिता देवता वायुः इति विधारितं (21-22) कण्डिकयोरिति ॥

प्राणैकालिङ्गनात्प्राणा यथा तन्नामरूपिणः ।
आसन् प्राणविद्प्येवं प्राणात्मोपासनाद्भवेत् ॥ (370)

सर्वेन्द्रियेषु यावान् स्यात् परिस्पन्दः क्रियात्मसु ।
प्राणस्यैव स विज्ञेयस्तेषां त्वर्थप्रकाशनम् ॥ (371)

यथा वागादयस्तद्वदधिदैवेऽपि योजयेत् ।
अग्न्यादिषु परिस्पन्दो वायोरेवेति निश्चयः ॥ (372)

वागाद्यनुग्रहः सिद्धस्त्वग्न्यादेः कर्म केवलम् ।
सर्वेन्द्रियाणामात्मैव प्राणः सर्गो लयस्तथा ॥ (373)

प्राणरूपाभिधानाभ्यां ख्याता वागादयो यथा ।
प्राणवित्संज्ञया ख्यातिं याति विद्वत्कुलं तथा ॥ (374)

प्राणेति । यथा वागादीनां प्राणनामरूपत्वम्, एवं तदुपासकोऽपि तन्नामरूपः स्यादित्यर्थः । (370)

वागादीनां [1]प्राणनामरूपत्वमुपपादयितुं [2]तेषु चलनस्य प्राणधर्मत्वमाह—**सर्वेति** । क्रियापदं प्रकाशस्याप्युपलक्षणम् । प्रकाशशब्दो वचनादेरपि । [3]एकादशेन्द्रियेषु चलनस्य प्राणधर्मत्वात् तेषां प्राणनामरूपतेत्यर्थः । (371) अध्यात्ममुक्तमधिदैवे योजयति—**यथेति** । एवं चलनस्य प्राणधर्मत्वात् [4]तदात्मत्वमुक्तम्, इत्याह—**सर्वेति** (372-373) '[5]तेन' इत्यादेरर्थमाह—**प्राणेति** । (374)

---

1. **प्राणनामरूपत्वं**—प्राणनामरूपवत्त्वम् ।
2. **तेषु**—वागादिषु ।
3. **एकादशेन्द्रियेषु**—मनःसहितेषु कर्मज्ञानेन्द्रियेषु ।
4. **तदात्मत्वं**—प्राणात्मकत्वम् ।
5. **तेनेत्यादेरिति** 'तेन ह वा व तत्कुलमाचक्षते, यस्मिन् कुले भवति, य एवं वेद ।' इति वाक्यस्येत्यर्थः ।

यश्चापि प्राणवित्स्पर्धी स्पर्धामनु स मृत्युवत् ।
शोषमित्वा मृतिं याति द्विष्यान्नातोऽनवेदिनम् ॥* (375)

ब्राह्मणोक्तार्थदार्ढ्याय श्लोको मन्त्रोऽनुकीर्त्यते ।
यतश्चोदेति सूर्योऽसौ यत्र चास्तं निगच्छति ॥ (376)

प्रश्नरूपमिदं वाक्यं यतः प्रत्युक्तिरुच्यते ।
प्राणादित्यादिना, भानोरुदयास्तमयौ कथम् ॥ (377)

यदा वै पुरुषः शेते प्राणमप्येति वाक् तदा ।
चक्षुः श्रोत्रं मनस्तद्वत् जायते तत एव च ॥ (378)

'य [1]उ हैवंविद' इत्यादेरर्थमाह—**यश्चेति** । (375)

त्रयोविंशकण्डिकार्थनिरूपणम्

'[2]अथ' इत्यादेरर्थमाह—**ब्राह्मणेति** । [3]मन्त्रभागे प्रश्नद्योतकाभावेऽपि, [4]प्रत्युक्तिदर्शनात् प्रश्नत्वं द्रष्टव्यम्, इत्याह—**यत इति** । प्राणादादित्योदयादौ मानं पृच्छति—**भानोरिति** । (376-377) तत्र मानं दर्शयितुं वागादीनां [5]तदुत्पत्तौ मानमाह—**यदेति** । 'स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रम्' (छा. 4 3·3) इत्यादिश्रुतेरित्यर्थः । (378) अग्न्यादित्यादेः प्राणादुत्पत्तौ 'यदा सूर्योऽस्तमेति वायुमेवाप्येति' (छा. 4-3-1) इत्यादिश्रुतिं

---

1. **य उ हेति** 'य उ हैवंविदा स्पर्धते अनुशुष्यत्यनुशिष्य हैवान्ततो म्रियते ।' इति श्रुतिः ।

* **अनवेदिनं**—प्राणोपासकम् ।

2. **अथेत्यादेरिति** 'अथैष श्लोको भवति । यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति ।' इति श्रुतिः ।
3. **मन्त्रभागे**—'यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति' इत्यत्र ।
4. **प्रत्युक्तिदर्शनादिति** 'प्राणाद्वा एष उदेति प्राणेऽस्तमेति' इत्यादिप्रतिवचनदर्शनात् पूर्ववाक्यस्य प्रश्नत्वमवसीयते इत्यर्थः ।
5. **तदुत्पत्तौ**—प्राणादुत्पत्तौ ।

अधिदैवतमप्येवं वायोरग्न्यादिसंभवः ।
अप्ययश्च यथाध्यात्मं श्रेयान्प्राणस्ततोऽन्यतः ॥ (379)

* आत्मैव प्राणशब्दः स्यात् प्राणबन्धनवाक्यतः ।
असदेवेदमित्युक्तेरात्मनो भानुसंभवः ॥ (380)

यत एव समुत्पत्तिस्तत्रैव प्रलयोऽपि च ।
मृदो जातस्य कुम्भस्य न लयो वीरणादिषु ॥ (381)

वागादिगणधारित्वाद्धर्मं वायुव्रतं विदुः ।

मानयति—**अधिदैवतमिति** । (379) प्राणस्याशेषजगद्धेतुत्वे [1]ब्रह्मकारणत्ववाक्यभङ्गः, अत्राह—**आत्मेति** । [2]अत्रैव मानान्तरमाह—**असदिति** । 'एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वा अन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते । प्राणबन्धनं हि सोम्य मनः' (छा. 6-8-2) इति श्रुतेरेव प्राणशब्दः परमात्मा न भवति, किन्तु, 'असदेवेदमग्र आसीत् तत्सदासीत्' (छा. 3-19-1) इत्यसच्छब्देन जगत्कारणं प्रक्रम्य, तस्मात् पृथिव्याद्युत्पत्तिमुपदिश्य, तस्मादेवादित्योत्पत्तेः 'अथ यत्तदजायत सोऽसावादित्यः' (छा. 3-16-3) इत्युक्तत्वात् [3]प्राणशब्दः परमात्मेत्यर्थः । (380) 'प्राणेऽस्तमेति' इति मन्त्रभागार्थमाह—**यत इति** । (381) '[4]तं देवाः' इत्यादेरर्थमाह—**वागादीति** । (382)

---

1. **ब्रह्मकारणत्ववाक्यभङ्गः**—ब्रह्मणः जगत्कारणत्वबोधकवाक्यस्य भङ्गः ।

* **आत्मेति** अज्ञातात्मनः प्राणशब्दबोध्यत्वान्न ब्रह्मकारणत्ववाक्यभङ्ग इति भावः ।

2. **अत्रैव**—आत्मन एव प्राणशब्दबोध्यत्वे एव ।

3. **प्राणशब्दः**—प्राणशब्दबोध्य इति यावत् ।

4. **तं देवा इति** "तं देवाश्चक्रिरे धर्मं, स एवाद्य स उ श्व इति । यद्वा एते अमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति । तस्मादेकमेव व्रतं चरेत् प्राण्याच्चैवापान्याच्च । नेन्मा पाप्मा मृत्युराप्नुवदिति । यद्यु चरेत् समापिपयिषेत् । तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति ।" इति श्रुतिरत्रानुसन्धेया ।

* चक्रिरे दध्रिरे धर्मं धारणं प्रकृतं यतः ॥ (382)

अद्यापि क्रियते तैस्तत्कर्तारश्चापि तत्सुराः ।
अम्रियन्त यमष्ठुर्हि तस्मिन्काले पराजिताः ।
धर्मव्रतं तदेवाद्य बिभ्रत्यम्रयादयः शुभम् ॥ (383)

अभग्नं मृत्युना यस्मात् प्राणस्यैव व्रतं ततः ।
एकमेव व्रतं प्राणं चरेदा मरणात्सदा ॥ (384)

प्राण्यादपान्यात्प्राणात्मा ह्युक्त्यादिष्वपि कर्मसु ।
अन्तर्भावो यतोऽमीषां श्रोत्रादीन्द्रियकर्मणाम् ॥ (385)

प्राणकर्मणि तेनैतदेकमेव व्रतं चरेत् ॥ (386)

प्राणापानात्मकं यस्मात् व्रतं प्राणैककर्तृकम् ।
प्राण्यादपान्याच्च ततो नित्यमा मरणाद् बुधः ॥ (387)

प्राणात्मनैव वागादिव्रतान्यपि चरेत् सदा ।
वागाद्यासङ्गव्रत्तन्मां पाप्मा मा प्रापदासुरः ॥ (388)

'स एव' इत्यादि व्याचष्टे—**अद्यापीति**। तैः—वागादिभिरित्यर्थः। 'यद्वा एते' इत्यादेरर्थमाह—**अम्रियन्तेति**। (383) 'तस्मात्' इत्यादेरर्थमाह—**अभग्नमिति**। (384) किं तद्व्रतमिति, तदाह—**प्राण्यादिति**। व्यापारान्तरं न कुर्यादित्यर्थः। हेतुमाह—**अन्तर्भाव इति**। (385-386) व्रतस्य प्राणकर्तृकत्वाच्च तदेव कार्यम्, इत्याह—**प्राणेति**। (387) एकमेव इत्यवधारणं कथम्, वागादिव्यापारस्यावश्यंभावात्, अत्राह—**प्राणात्मनेति**। 'नेत्'

---

* धारणं प्रकृतं यत इति करणार्थस्य करोतेः धारणार्थत्वे प्रकरणं नियामकमित्यर्थः। अमुर्हि—अमुष्मिन् काले।

इति तृतीयाध्यायस्य पञ्चमं ब्राह्मणम्

— : *:—

इत्येवमभिसन्धिः सन् विद्वान् प्राणव्रतं चरेत् ।
प्राणव्रतं चेदारब्धं चिकीर्षेत्तत्समापनम् ॥ (389)

अभ्यस्तेनामृतेर्यस्मात्सायुज्यादि समश्नुते ।
व्यष्टयात्मदेवतायास्तु तस्मादेवं विधीयते ॥ (390)

इति तृतीयाध्यायस्य पञ्चमं ब्राह्मणं समाप्तम्

—: * :—

इत्यादेरर्थमाह—वागादीति । 'यदि' इत्यादेरर्थमाह—प्राणेति । (388-389 390)

इति तृतीयाध्यायस्य पञ्चमं ब्राह्मणं समाप्तम् ।

—: * :—

अथ तृतीयाध्यायस्य षष्ठं ब्राह्मणम्

तद्धेदमित्यविद्याया उक्तं कार्यमशेषतः ।
उक्तार्थस्यैव संक्षेपः त्रयं वा इत्यथोच्यते ॥ (1)

अज्ञातैकात्म्यकार्यं तद्यदेतदभिशब्दितम् ।
न तु विध्वस्तसंमोहप्रत्यङ्मात्रसतत्त्वगम् ॥ (2)

एवमुक्ते विरक्तोऽस्मात् मुमुक्षुः श्रद्धयान्वितः ।
ब्रह्मज्ञानेऽधिकारी स्यात् कथं नामेति भण्यते ॥ (3)

अविद्योत्थपुमर्थेभ्यो विमुखीभूतमानसः ।
आत्मतत्त्वविजिज्ञासुस्तद्व्यावृत्तो भवेन्नरः ॥ (4)

बाह्यार्थबद्धधिषणः प्रत्यग्याथात्म्यवित्तये ।
* नालं विरोधात्पुरुषः पराञ्चीत्यागमोक्तितः ॥ (5)

अथ तृतीयाध्यायस्य षष्ठं ब्राह्मणम्

षष्ठब्राह्मणावतरणम्

(व्या)वृत्तं संकीर्त्य [1]उत्तरब्राह्मणमवतारयति—तद्धेदमिति । सूत्रितसकार्याज्ञानस्य 'अथ योऽन्याम्' (बृ. 3 - 4 - 10) इत्यादिना(दि)[वि]स्तृतस्योपसंहारायोत्तरं ब्राह्मणमित्यर्थः । (1) किं तदुपसंहारेण, अत्राह—अज्ञातेति । विरक्तः विद्यायां कथं नामाधिकारी स्यात् इत्यालोच्य श्रुत्याऽयमुपसंहारः क्रियते इत्यर्थः । (2–3) अविरक्तस्यापि विद्याधिकारा[त्] किं वैराग्येण, अत्राह—अविद्योत्थेति । (4) अविरक्तस्यानधिकारे मानमाह—बाह्येति । (5) सर्वस्या-

---

अथ षष्ठं ब्राह्मणम्

1. **उत्तरब्राह्मणं**—'त्रयं वा इदं नाम रूपं कर्म' इत्यादिकं षष्ठं ब्राह्मणम् ।

* **विरोधात्**—अनात्मासङ्गस्य आत्मज्ञानस्य चान्योन्यविरोधात् ।

अविद्यामात्रहेतुत्वं न त्वैकात्म्यानुसारिता ।
यथोक्तवस्तुनः कस्मादित्येतत्प्रतिपाद्यते ॥ (6)

अज्ञातादात्मनः साक्षादभिव्यक्तिः पुरोदिता ।
अहेतुफलरूपस्य नामरूपक्रियात्मभिः ॥ (7)

नामाद्यात्मकतैवास्य ब्रह्मादेः स्थावरावधेः ।
न तु वस्त्वन्तरं तत्स्यात् यथा तदिह वर्ण्यते ॥ (8)

* कारणत्वसमानत्वस्वात्मलाभत्वहेतुभिः ।
नामाद्यात्मकतैतस्य प्रपञ्चस्य प्रसाध्यते ॥ (9)

विद्याकार्यत्वे वैराग्यादिसिद्धिः, [1]तदे[व]कस्मात्, इत्यत्राह—**अविद्येति** । [2]तत्र हेतु[:] 'त्रयम्' इत्यादिनोच्यते इत्यर्थः । (6) त(त्त)त् स्फुटयितुं वृत्तमाह—**अज्ञातादिति** । अहेतुफलरूपस्य – कार्यकारणभावरहितः आत्मैव रूप[म]स्येति अहेतुफलरूपं जगत् । अस्याज्ञातादभिव्यक्तिरुक्ता 'तद्धेदम्' (बृ. 3 - 4 - 7) इत्यादावित्यर्थः । (7)

प्रपञ्चस्य नामरूपकर्मात्मकत्वनिरूपणम्

प्रथमकण्डिकार्थनिरूपणम्

'[3]त्रयम्' इत्यादेस्तात्पर्यमाह—**नामेति** । (8) [4]कुतः, इत्यत आह—

---

1. **तदेव कस्मात्**—सर्वस्याविद्याकार्यत्वमेव कुतः प्रमाणात् ।

2. **तत्र हेतुः**—अविद्याकार्यत्वे हेतुः ।

3. **त्रयमित्यादेरिति** "त्रयं वा इदं नाम रूपं कर्म । तेषां वागित्येतदेषामुक्थम्, अतो हि सर्वाणि नामान्युत्तिष्ठन्ति । एतदेषां साम, एतद्धि सर्वैर्नामभिः समम् । एतदेषां ब्रह्म, एतद्धि सर्वाणि नामानि बिभर्ति । " इति श्रुतिरनुसन्धेया ।

4. **कुतः इति** सर्वस्य प्रपञ्चस्य नामरूपकर्मात्मकत्वं कुत इत्यर्थः ।

* **कारणत्वेति** पर्यायत्रयेऽपि, नामादेः, उक्थमिति कारणत्वं, सामेति समानत्वं ब्रह्मेति स्वात्मलाभश्च उक्तानीति बोध्यम् ।

अनेकभेदसंभिन्नं यदेतद् व्याकृतं जगत् ।
नामरूपक्रियातत्त्वमेतत्सर्वं प्रतीयताम् ॥ (10)

त्रयं वा इदमित्येवं प्रतिज्ञार्थमिदं वचः ।
हेतूक्तिरुत्तरो ग्रन्थस्तेषामित्यादिनोच्यते ॥ (11)

वागित्यनेन शब्देन नादमात्रं विवक्ष्यते ।
अपजुहूषितत्वात्तु नादोत्थस्य विकारतः ॥ (12)

* एषां नादविकाराणामुक्थं नादस्तदुत्थितेः ।
सर्वनाम्नामतो नादः उकथमित्यभिधीयते ॥ (13)

तथा सामान्यतो वाचो विशेषाणां तदात्मता ।
* न हि निष्कृष्य सामान्यात् विशेषः कश्चिदीक्ष्यते ॥ (14)

कारणत्वेति । (9) तात्पर्यमुक्त्वा अक्षरार्थमाह—**अनेकेति** । (10) [1]उत्त(रवा)क्यस्य [2]अपुनरुक्तमर्थं दर्शयितुमाह—**त्रयमिति** । (11) वाक्शब्दार्थमाह—**वागिति** । [3]शब्दविशेषा(ग्राहो)[ग्रहे] हेतुमाह—**अपजु(ह)[हू]षितत्वादिति** । (12) 'एतदेषामु(क्त)[क्थ]म्' इत्यस्यार्थमाह—**एषामिति** । (13) 'एतदेषां साम' इत्यादेरर्थमाह—**तथेति** । सामान्यानुविद्धो विशेषो न ततो भिन्नः, इत्याह—**न हीति** । (14) 'एतदेषां ब्रह्म' इत्यस्यार्थमाह—

---

1. **उत्तरवाक्यस्य**—'तेषां नाम्नाम्' इत्यादिवाक्यस्य ।

2. **अपुनरुक्तमर्थमिति** 'त्रयं वा इदं नाम रूपं कर्म' इति वाक्येनेत्यादिः ।

3. **शब्दविशेषाग्रहे इति** वाक्शब्देनेत्यादिः ।

* **एषामिति** सर्वे नामविशेषाः नादजन्यत्वात् नादमात्राः, न नादात् तत्त्वतो भिद्यन्ते यथा मृदो घटो न भिद्यते तथेत्यर्थः ।

* **न हीति** सर्वे नामविशेषाः नामसामान्ये कल्पिताः प्रत्येकं तदनुविद्धत्वात् रज्ज्वदंशानुविद्धसर्पादिवदित्यर्थः ।

आत्मत्वाच्च तथा वाचो नात्मीयोऽन्योऽवशिष्यते ।
* कार्त्स्न्येनैवाभिसंबन्धादात्मीयस्येह वस्तुनः ॥ (15)

कार्यकारणगो भेदः प्राप्तो लोके य ईक्ष्यते ।
अविचारितसंसिद्धः सोऽयं श्रुत्या निषिध्यते ॥ (16)

* एवं सति प्रमाणत्वमपूर्वार्थावबोधनात् ।
अन्यथातोऽनुवादः स्यात् श्रुतेर्ज्ञातार्थबोधनात् ॥ (17)

चक्षुषो विषयः चक्षुःशब्देनेहाभिधीयते ।
रूपाणामिति संबन्धात् रूपात्मत्वात्तथैव च ॥ (18)

आत्मत्वाच्चेति । (15) कारणत्वादिना एकत्वसाधकश्रुतेस्ता[1]त्पर्यमाह — **कार्येति** । (17)

द्वितीयकण्डिकार्थनिरूपणम्

'अथ रूपाणां चक्षुः' इत्यत्र चक्षुःशब्देन रूपसामान्यग्रहः, इत्याह— **चक्षुष इति** । [2]हेतुमाह— **रूपाणामिति** । 'रूपाणां चक्षुः' इत्यत्र रूपविशेषाणां

---

* **कार्त्स्न्येनेति** सर्वं नाम तत्सामान्यात् पृथक् न वस्तुतोऽस्ति, तेनात्मवत्त्वात्, यत् येनात्मवत्, न तत् ततोऽन्यद्वस्तुतोऽस्ति, यथा मृदाऽत्मवान् घटः न वस्तुतो मृदोऽन्योऽस्तीत्यर्थः ।

1. **तात्पर्यं**— आविद्यभेदनिषेधे तात्पर्यम् ।

* "अथेयं श्रुतिः अभेदं बोधयति न भेदं निषेधति, उभयार्थत्वे वाक्यभेदात्, अतो भेदाभेदपरता, इत्याशङ्क्याह—**एवमिति** । भेदाभेदबोधित्वे दोषमाह— **अन्यथेति** । भेदस्य लोकवादिसिद्धत्वात्, अभेदस्य च सुवर्णं कुण्डलमित्यादि-सामानाधिकरण्यधीदृष्टत्वात् भेदाभेदवादिश्रुतेः ज्ञातार्थत्वेन अनुवादित्वादप्रामाण्य-मित्यर्थः ।" **इति शास्त्रप्रकाशिका** ।
" अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्ति, एतदेषां साम एतद्धि सर्वैः रूपैः समं, एतदेषां ब्रह्म एतद्धि सर्वाणि रूपाणि बिभर्ति । " इति श्रुतिः ।

2. **हेतुं**—चक्षुःशब्देन रूपसामान्यग्रहे हेतुम् ।

यद्यद्धि रूप्यते किञ्चित् शब्दस्पर्शादिकं धिया ।
तत्तद्रूपमिति ज्ञेयं तैजसत्वाविशेषतः ॥ (19)

त्वाष्ट्रमेव हि सर्वत्र तेजो रूपादिलक्षणम् ।
तस्माद्विषयसामान्यं चक्षुःशब्देन भण्यते ॥ (20)

हेतुतज्जाविभागेन कार्यकारणहेतुतः ।
वाचारम्भणशास्त्राच्च विकारानृततोच्यते ॥ (21)

अन्तर्भावश्च सामान्ये विशेषाणामथोच्यते ।
सामान्यमेतत्सर्वेषां विशेषाणां समं हि तैः ॥ (22)

* न विशेषो न सामान्यं भेदतोऽभेदतोऽस्ति नः ।
तथा रूपविशेषाणां रूपमात्रात्मकत्वतः ।
स्रग्वत् सर्पादिकान् यद्वद्रूप सर्वं बिभर्ति हि ॥ (23)

कार्यत्वं चक्षुषः कारणत्वमिति संबन्धादित्यर्थः । हेत्वन्तरमाह—**रूपेति** । चक्षुषो रूपमात्रतेजोविकारत्वेन रूपात्मत्वाच्चेत्यर्थः । (18) रूपशब्देन शुक्लाद्येव किं न गृह्यते, अत्राह—**यद्यदिति** । (19) तैजसत्वं साधयति—**त्वाष्ट्रमिति** । रूपरसादि सर्वं सवितृतेजसा पच्यमानं त्वाष्ट्रं तेज एवेत्यर्थः । प्रकृतं निगमयति—**तस्मादिति** । (20) कारणत्वादिभिरेकत्वसाधकश्रुतेः भेदधीविरोधादमात्वम्, इत्यत्राह—**हेत्विति** । (21) 'एतदेषां साम' इत्यस्यार्थमाह—**अन्तर्भावश्चेति** । 'एतद्धि' इत्यादेरर्थमाह—**सामान्यमिति** । (22) तर्हि सामान्यविशेषभा(वं)[वः] पारमार्थिक इष्टः स्यात्, अत्राह—**नेति** । 'एतदेषां ब्रह्म' इत्यस्यार्थमाह—**तथेति** । 'एतद्धि' इत्यादेरर्थमाह—**सर्पादिकानिति** । (23)

---

* **न विशेषो न सामान्यं भेदतोऽभेदतोऽस्ति नः** इति निस्सामान्यविशेषात्मकं वस्तु वदतामस्माकं मते, सामान्यात् विशेषः, विशेषाच्च सामान्यं न भेदेनाभेदेन वाऽस्ति । भेदसंबन्धयोर्दुर्वचत्वात्, अभेदे अन्यतरपरिशेषात् । अतः सामान्यविशेषभावः कल्पितः व्यवहाराङ्गमित्यर्थः ।

उक्तं समासतस्तावदेकत्वं नामरूपयोः ।
कर्मणोऽपि तथैकत्वमधुना प्रतिपाद्यते ॥ (24)

* वाक्चक्षुःशब्दतो यद्वत् गृह्यते विषयस्तयोः ।
आत्मनो विषयस्तद्वदात्मशब्देन गृह्यते ॥ (25)

सर्वेन्द्रियपरिस्पन्दो व्यज्यते नः शरीरके ।
शरीरविषयस्तस्मादात्मेत्यत्राभिधीयते ॥ (26)

* आत्मैव त्वस्य कर्मेति तथैवाभिहितं पुरा ।
अतोऽत्र कर्मसामान्यं गृह्यते देहसंश्रितम् ॥ (27)

तृतीयकण्डिकार्थनिरूपणम्

उक्तमनूद्य [1]संगतिमाह—**उक्तमिति** । नामविशेषाणां [2]नाम्ना रूपविशेषाणां रूपेण एकत्वमुक्तम् । कर्मविशेषाणां कर्मणैकत्वमुच्यते इत्यर्थः । (24) आत्मा देहः, तन्निर्वर्त्यकर्मसामान्यमात्मशब्देनोच्यते, इत्याह—**वागिति** । (25) हेतुमाह—**सर्वेति** । (26) [3]आत्मेति कर्मसामान्यग्रहणे हेत्वन्तरमाह—**आत्मैवेति** । (27)

---

1. **संगतिं**—'अथ कर्मणाम्' इत्युत्तरसन्दर्भसंगतिम् । 'अथ कर्मणामात्मेत्येतदेषामुक्थं, अतो हि सर्वाणि कर्माण्युत्तिष्ठन्ति । एतदेषां साम, एतद्धि सर्वैः कर्मभिः समं । एतदेषां ब्रह्म, एतद्धि सर्वाणि कर्माणि बिभर्ति ।' इति श्रुतिः ।

2. **नाम्ना**—नामसामान्येन । एवं रूपेण, कर्मणा इत्यत्रापि बोध्यम् ।

* **वागिति** प्रथमपर्याये वाक्शब्देन तद्विषयनामसामान्यस्य, द्वितीयपर्याये चक्षुःशब्देन तद्विषयरूपसामान्यस्य च यथा ग्रहणं, तथा तृतीये पर्याये आत्मशब्देन आत्मविषयकर्मसामान्यस्य ग्रहणमित्यर्थः । शरीरविषयत्वं शरीरनिर्वर्त्यत्वपर्यवसितम् ।

3. **आत्मेतीति** आत्मशब्देनेति यावत् ।

* **पुरा** - चतुर्थब्राह्मणे सप्तदशकण्डिकायाम् ।

नाम रूपं तथा कर्म यदेतत् त्रयमीरितम् ।
एकमेव भवत्येतत् त्रयं सद्देहमात्रकम् ॥ (28)

विकर्तृत्वेन कर्मात्र नामरूपात्मनोर्भवेत् ।
कर्मणः साधनत्वेन नामरूपे व्यवस्थिते ॥ (29)

रूपमेव प्रतिष्ठा स्यात्सर्वदा नामकर्मणोः ।
न हि रूपमनाश्रित्य विद्येते नामकर्मणी ॥ (30)

प्राण एव प्रतिष्ठैवं सदा स्यान्नामरूपयोः ।
प्राणैकात्म्याश्रयाद्यस्मादात्मलाभः सदा तयोः ॥ (31)

* तद्वद्वागाश्रयत्वं च तयोः स्याद्रूपकर्मणोः ।
वाचा प्रकाश्यमाने ते प्रयुज्येते यतः सदा ॥ (32)

'[1]तदेतत् त्रयम्' इत्यादेरर्थमाह—**नामेति** । तत् त्रयं देहमात्रम् । (28) केन रूपेण नामादीनां [2]देहस्थितिः, इत्याशङ्क्य, मिथो हेतुफलभावेन, इत्याह—**विकर्तृत्वेनेति** । अत्र—देहे इति यावत् । (29) अन्योन्याश्रयत्वेनापि [3]स्थितिः, इत्याह—**रूपमेवेति** । (30) [4]कर्मात्मकप्राणस्याप्याश्रयत्वमाह—**प्राण इति** । (31) रूपकर्मणोः [5]वागाश्रयत्वे न का चिद्युक्तिः, अत्राह—**तद्वदिति** । (32)

---

1. **तदेतत् त्रयमिति** 'तदेतत् त्रयं सदेकमयमात्मा । आत्मो एकः सन्नेतत् त्रयम् ।' इति श्रुतिः ।
2. **देहस्थितिः**—देहे स्थितिः ।
3. **स्थितिरिति** नामादीनामित्यादिः ।
4. नामरूपयोः प्राणाश्रयकत्वेऽपि कथं कर्माश्रयत्वं स्यादित्याशङ्क्याह—**कर्मात्मकप्राणस्यापीति** ।
5. **वागाश्रयत्वे**—नामाश्रयकत्वे ।

* **तद्वदिति** प्रकाश्यस्य प्रकाशकाश्रयत्वादिति भावः ।

आश्रयाश्रयिभावेन नामरूपक्रियात्मनाम् ।
एकार्थानां सतां तेषां संहतिः स्याच्छरीरके ॥ (33)

एकः सन्नेष आत्मापि त्रयमेतत्प्रपद्यते ।
नामरूपक्रियाभिन्नो देहोऽयं गृह्यते यतः ॥ (34)

एतन्मयोऽयमात्मेति तथा पूर्वं प्रपञ्चितम् ।
एतावद् व्याकृतं सर्वं यदेतत्संहतं त्रिभिः ॥ (35)

तदेतत्खलु वैराजं नामरूपक्रियात्मकम् ।
नामरूपात्मसत्त्येन च्छन्नं प्राणामृतं तु तत् ॥ (36)

प्राणशब्देन लिङ्गात्मा भण्यते करणात्मकः ।
पिण्डस्य मरणे नैतन्म्रियतेऽतोऽमृतं मतम् ॥ (37)

पृथिव्यबग्निभूतानि सत्संज्ञान्यत्र लक्षयेत् ।
त्यसंज्ञके तु विज्ञेये वाय्वाकाशे महात्मभिः ॥ (38)

---

[1]उपसंहरति—आश्रयेति । एकार्थानामिति । एकस्यात्मनः सुखदुःखफलत्वेन स्थितानामित्यर्थः । (33) 'आ(त्मै)[त्मो ए] कः सन्' इत्यादेरर्थमाह—एक इति । (34) देहस्य [2]त्र्यात्मकत्वे श्रुत्यन्तरमाह—एतन्मय इति । उक्तत्रयव्यतिरिक्तमपि कार्यमस्ति, इत्यत्राह—एतावदिति । (35) अत्र, स्मृतिमुदाहरति—तदेतदिति । '[3]अमृतम्' इत्यादेरर्थमाह—नामेति । वैराजशरीरेण सत्त्यशब्दितेन सौत्रशरीरममृतमावृतमित्यर्थः (36) 'प्राणो वा अमृतम्' इत्यस्यार्थमाह—प्राणेति । (37) 'नामरूपे सत्त्यम्' इत्यत्र [4]सत्त्यार्थं वक्तुं सत्त्यत्पदयोरर्थमाह—पृथिवीति (38) सत्त्यपदार्थमाह—सच्चेति । (39)

---

1. उपसंहरतीति नामादीनां स्थितिमित्यादिः ।
2. त्र्यात्मकत्वे—नामरूपकर्मात्मकत्वे ।
3. अमृतमित्यादेरिति 'तदेतदमृतं सत्त्येन, प्राणो वा अमृतं, नामरूपे सत्त्यं, ताभ्यामयं प्राणश्छन्नः ।' इति श्रुतिरनुसन्धेया ।
4. सत्त्यार्थं—सत्त्यशब्दस्यार्थम् ।

सच्च त्यच्चेति तत्सत्त्यं पञ्चभूतात्मकं विदुः ।
करणायतनं स्थूलं वैराजं यत्प्रचक्षते ॥ (39)

* अस्याप्यन्तर्गतः प्राणो विज्ञानात्मेति यं विदुः ।
आ संसारात् स्थितः स्थास्नुः परिणामात्मकः सदा ॥ (40)

यथाकर्म यथाज्ञानमुपादत्ते शरीरकम् ।
प्लुष्यादिना समोऽतोऽयं श्रुतावप्यभिधीयते ॥ (41)

उपात्ताशेषभूतोऽयं यथोक्तोपात्तदेवतः ।
कृत्स्नाविद्योत्थमानी च प्रत्यगज्ञानकारणात् ॥ (42)

हैरण्यगर्भे तत्त्वज्ञो वैराजे च शरीरके ।
आबद्धात्माभिमानोऽयं गार्ग्योऽविद्यासमन्वितः ॥ (43)

कृत्स्नसंसारमान्येषः सर्वोऽस्मीति व्यवस्थितः ।
ब्रह्मोपदेशविषयः श्रुत्यैवोत्थाप्यते जडः ॥ (44)

नामरूपाभिमानाभ्यां मर्त्याभ्याममृतः स्वयम् ।
प्राणः करणसंघातश्छन्नः संवेष्टितः सदा ॥ (45)

यस्येदमायतनं तस्य(का)[क]रणस्य किं सतत्त्वम्, अत्राह—**अस्येति** । (40) स्थूलदेहनाशे करणं न वि[न]श्यति चेत्, कथं देहान्तरस्वीकारः, अत्राह—**यथेति** । तत्र 'समः प्लुषिणा' (बृ. 3 - 3 - 22) इत्यादि वाक्यं मानम्, इत्याह—**प्लुष्यादिनेति** । (41) अव्याकृतस्य जगतः [1]देहद्वयत्वेनोपसंहारो निष्फलः, अत्राह—**उपात्तेति** । (42) कृत्स्नाभिमानित्वं विशदयति—**हैरण्यगर्भ इति** । (43) किमत्र उपसंहारस्य फलमुक्तमिति चेत्, देहद्वया(ति)[द्वि]रक्तस्य निर्गुणज्ञानाधिकारित्वम्, इत्याह—**कृत्स्नेति** । 'दृप्तबालाकिर्हानूचानो गार्ग्य आस' (बृ. 4 - 1 - 1) इत्यादिकयेत्यर्थः । [44] 'ताभ्याममयम्' इत्यादेरर्थमाह—**नामेति** । (45)

---

* **विज्ञानात्मेति** उपाधितद्वतोरेकत्वं गृहीत्वोक्तम् ।

1. **देहद्वयत्वेन**—स्थूलसूक्ष्मदेहत्वेन ।

संप्रदायविदस्त्वत्र नानात्वैकत्ववादिनः ।
भिन्नाभिन्नात्मकं ब्रह्म नामरूपादिवज्जगुः ॥ (46)

त्रयं सदेकमेव स्यादेकं सत्तद्यथा त्रयम् ।
अनेनैवानुमानेन विद्याद् ब्रह्मापि तादृशम् ॥ (47)

दृगादिशक्त्यनेकत्वेऽप्येकमेव परं विदुः ।
शक्तिशक्तिमतोरैक्याद्द्वैतमिति भण्यते ॥ (48)

सास्नादिषु यथा गोत्वमभेदेन व्यवस्थितम् ।
मिथः सास्नादयो भिन्ना गोत्वाभिन्नास्तथापि ते ॥ (49)

'तदेतत् त्रयम्' इत्यादेः भर्तृप्रपञ्चाभिमतं व्याख्यानम्

स्वमतमुक्त्वा पर[1]मतमाह—**संप्रदायेति** । (46) 'त्रयम्' इत्यादिवाक्यं नामादेः भिन्ना[2]भिन्नत्वं वक्ति । [3]न ब्रह्मणः, अत्राह—**त्रयमिति** । नामादि ब्रह्मणो दृष्टान्त उच्यते । अनेन दृष्टान्तेन ब्रह्म भिन्नाभिन्नं विद्यादित्यर्थः । (47) [4]दृगादिशक्तिभिः भिन्ना[5]भिन्नं चेत्, [6]एकत्वं न स्यात्, अत्राह—**दृगादीति** । एकत्वात् भिन्नाभिन्नस्य ब्रह्मणः तदैक्यश्रुतिरविरुद्धेत्यर्थः । (48) एकं [7]द्विरूपमिति विप्रतिषिद्धम्, अत्राह—(स्नानेति) [सास्नेति] । खण्डादयो गोबुद्ध्य(न)[नु]रक्ता मिथो व्यावृत्ता अपि न गोत्वात् व्यावर्तन्ते । गोत्वमनुवृत्तमेकं यथेत्यर्थः ।

---

1. **परमतं**—भिन्नाभिन्नब्रह्मवादिभर्तृप्रपञ्चमतम् ।
2. **भिन्नाभिन्नत्वं वक्तीति** त्रयं सदेकमित्यादि वाक्यं नामरूपकर्मणां भिन्नानां त्रयाणामेकत्वं, एकः सन्नेतत् त्रयमिति एकस्य त्रयात्मत्वं भिन्नत्वं च वदतीत्यर्थः ।
3. **न ब्रह्मण इति** तथा च त्रयं सदेकमिति वाक्यं न ब्रह्मणः भिन्नाभिन्नत्वे मानमिति भावः ।
4. **दृगादिशक्तिभिरिति** ब्रह्मगताभिरित्यादिः ।
5. **भिन्नाभिन्नमिति** ब्रह्मेति शेषः ।
6. **एकत्वमिति** ब्रह्मण इति शेषः ।
7. **द्विरूपमिति**—भिन्नमभिन्नं चेति ।

भिन्नाभिन्नात्मता यद्वत् स्थूलेष्वर्थेषु दृश्यते ।
सूक्ष्मेष्वपि तथा विद्यादनुमानबलाद् बुधः ॥ (50)

* परपक्षे न दृष्टान्तः कश्चिदप्युपलभ्यते ।
भिन्नाभिन्नात्मकं तस्मात्सर्वं वस्त्विति निश्चयः ॥ (51)

अनुमानैकसिद्धत्वाद्भिन्नाभिन्नात्मवस्तुनः ।
आगमेनात्र किं कार्यं लिङ्गसिद्धानुवादिना ॥ (52)

नचागमस्य तात्पर्यमेवंभूतेऽस्ति वस्तुनि ।
अस्थूलं नेति नेतीति ज्ञाताज्ञातह्रुतेस्तथा ॥ (53)

* विशेषात्मनिषेधाय तथा सामान्यरूपिणः ।
क्षुरविश्वंभरौ श्रुत्या दृष्टान्तौ प्रतिपादितौ ॥ (54)

---

(49) दृष्टान्तानुवादेन दार्ष्टान्तिकमाह—**भिन्नेति** । ब्रह्म भिन्नाभिन्नं मेयत्वात् गवादिवदित्यर्थः । (50) ब्रह्म न भिन्नाभिन्नं जगदुपादानत्वात् अज्ञानवत्, अत्राह—**परेति** । सर्वस्य भिन्नाभिन्नत्वादित्यर्थः । (51)

भिन्नाभिन्नं ब्रह्मेति भर्तृप्रपञ्चमतदूषणम्

अनिष्टप्रसक्त्या दूषयति—**अनुमानेति** । (52) आगमगम्यवस्तुस्फुटीकरणार्थत्वादनुमानस्य नागमवैयर्थ्यम्, अत्राह—**न चेति** । (53) क्षुरविश्वंभर-[1]दृष्टान्तश्रुत्या सामान्यविशेषभावनिषेधाच्च एकरसं ब्रह्म, इत्याह—**विशेषेति** ।

---

* "विमतं भिन्नाभिन्नं वस्तुत्वात् गवादिवत् इत्ययुक्तं, विमतं न भिन्नाभिन्नं निःसामान्यत्वात् अन्त्यविशेषवत् इत्यनुमानादित्याशङ्क्याह—**परेति** । सामान्यादन्यत्वं हेतुश्चेत् खण्डादौ व्यभिचारः, असामान्यवत्त्वं चेत्, गोत्वादौ व्यभिचारः । न चात्र दृष्टान्तोऽस्ति, अन्त्यविशेषाणामप्रामाणिकत्वादिति भावः ।" इति **शास्त्रप्रकाशिका** ।

1. दृष्टान्तश्रुत्या—'यथा क्षुरः क्षुरधाने विश्वंभरो वा विश्वंभरकुलाये' इति श्रुत्या ।

* "प्रवेशवाक्यवशादपि ब्रह्मैकरस्यमित्याह—**विशेषेति** । तथाशब्दो निषेधानुकर्षणार्थः । सामान्यविशेषाभ्यां ब्रह्मणो देहे प्रवेशं वक्तुं दृष्टान्तावुक्तौ । न चैवं ब्रह्मणो द्विरूपत्वम्, मिथो विरोधात् तदतिरिक्तस्वरूपाभावेऽपर्यवसानात् । अतो निःसामान्यविशेषमेकरसं ब्रह्मेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

अन्त्या विशेषा दृष्टान्तः परपक्षेऽपि विद्यते ।
* तवैव पक्षे दृष्टान्तो यथा नास्ति तथोच्यते ॥ (55)

निःसामान्या विशेषाः स्युर्गोता तेभ्यो न चेद्भिदुरुक् ।
अथ व्यावर्तते तेभ्यो गोत्वं ते खण्डद्भवेत् ॥ (56)

व्यावृत्तं यदि भिन्नेभ्यस्त्वयाऽभिन्नगिरोच्यते ।
व्यावृत्तं न विशेषश्चेत्यहो विद्याविचेष्टितम् ॥ (57)

अव्यावृत्तं विशेषेभ्यस्त्वथ सामान्यमुच्यते ।
सामान्यस्य विशेषत्वात् विशेषा एव केवलाः ॥ (58)

तं न पश्यन्ति (बृ. 3-4-7) इति [1]तन्निषेधादित्यर्थः । (54) यदुक्तं परक्षे न दृष्टान्तः, इति, तत्राह—अ(न्त्ये)[न्त्या इ]ति । [2]स्वदोषोऽयमुदाहृतः, इत्याह —(न)[त] वैवेति । (55) 'सास्नादिषु यथा गोत्वम्' (वा. 49) इत्युक्तो दृष्टान्त इति चेत्, गोत्वं तेभ्योऽभिन्नं, भिन्नं, भिन्नाभिन्नं वा, । आद्यं दूषयति—**निस्सामान्या इति** । सामान्यस्य विशेषमात्रत्वात् निर्गतसामान्या विशेषाः स्युरित्यर्थः । द्वितीयं दूषयति—**अथेति ।** विमतं न सामान्यं भिन्नाभिन्नत्वात् खण्डवदित्यर्थः । (56) भिन्नाभिन्नमिति तृतीयेऽपि, विशेषाद् व्यावृत्तमभिन्नशब्देनोच्यते, अव्यावृत्तं वा । आद्यं दूषयति—**व्यावृत्तमिति ।** भि(न्ना)[न्नो] न विशेषः, सामान्यमिति मूढभाषितमित्यर्थः । (57) द्वितीयमनुवदति—**अव्यावृत्तमिति ।** 'निस्सामान्या विशेषाः स्युः' (वा. 56) इत्युक्तं स्मारयन् परिहरति —**सामान्यस्येति ।** (58) 'विशे(ष)[षा] एव' इति कथम्, [3]व्यावृत्तेषु [4]अनु-

---

1. **तन्निषेधात्**—सामान्यविशेषभावनिषेधात् ।

2. **स्वदोषोऽयमिति** दृष्टान्ताभावः स्वस्य भिन्नाभिन्नवादिनः एव दोषः इत्यर्थः ।

* 'त्वत्पक्ष एव' इति मु. पु. पाठः ।
"अन्त्या इति वादिनां प्रामाणिकत्वेन सिद्धतया तेषां दृष्टान्तत्वं सिद्धम् । न निःसामान्यत्वानिरुक्तिः, सामान्यवदन्योन्याभाववतः सामान्यत्वानधिकरणत्वस्य तत्त्वादिति भावः ।" इति **शास्त्रप्रकाशिका** ।

3. **व्यावृत्तेषु**—खण्डमुण्डादिषु ।

4. **अनुवृत्तप्रत्ययवेद्यत्वेन**—गौरित्यनुगतप्रत्ययविषयत्वेन ।

न ह्यभिन्नधिया गोत्वं विशेषेषु प्रतीयते ।
विशेषमात्रनिष्ठत्वाद्भिन्नाभिन्नं किमुच्यते ॥ (59)

अभेदः किं तयोर्योगः किं वैकात्म्यमभिन्नता ।
नाभेदो मेषयोर्योगे यथा भिन्नौ तथा युतौ ॥ (60)

व्यामिश्रं यदि वा शुद्धं गोत्वं भेदेषु गम्यते ।
नोभयत्राप्यभिन्नत्वमसाधारण्यसंस्थितेः ॥ (61)

* **भेदेषु चोपयुक्तं तद् गोत्वं यद्वा पृथक् स्थितम् ।**
सामान्यं वा विशेषो वा कोऽनयोरभिधीयताम् ॥ (62)

वृत्तप्रत्ययवेद्यत्वेन सामान्यसिद्धेः, अत्राह—**न हीति** । [1]अव्यावृत्ते विशेषमात्रत्वादित्यर्थः । फलितमाह—**भिन्नेति** । (59) विधान्तरेण अभिन्नपदार्थं विकल्पयति—**अभेद इति** । संबन्धो नाभेदव्यवहारार्हः संबन्धत्वात् संयोगवत् इति दूषयति—**नेति** । (60) द्वितीये [2]जातिव्यक्तिद्वयमभेदः गोत्वमात्रं वेति विकल्पयति—**व्यामिश्रमिति** । दूषयति—**नेति** । जातिव्यक्त्योरसाधारणरूपेण स्थितयोरेकत्वविरोधादित्यर्थः । (61) पुनरपि अभेदांशं विकल्पयति—**भेदेष्विति** । ईषत् अभिन्नं, अत्यन्ताभिन्नं वेत्यर्थः । उभयत्र दोषमाह—**सामान्यं वेति** । उपयोगे अनुपयोगे च सामान्यविशे(षि)[ष]त्वं [न सु]ज्ञानं, उपयुक्तत्वानुपयुक्तत्वयोः [3]साधारण्यादित्यर्थः । (62)

---

1. **अव्यावृत्ते**—विशेषेभ्यः अव्यावृत्ते गोत्वे ।

2. **जातिव्यक्तिद्वयमिति** जातिः व्यक्तिश्चेति द्वयमित्यर्थः ।

* **भेदेषु चोपयुक्तं तद् गोत्वं यद्वा पृथक् स्थितमिति** उपयुक्तमित्यस्य अपृथक्स्थितमित्यर्थः, पृथक्स्थितमिति कोट्यन्तरनिर्देशात् । तथा च गोत्वं सामान्यं भेदेषु —विशेषेषु खण्डादिषु अत्यन्ताभिन्नत्वेन स्थितं वा पृथक् स्थितमभिन्नं वा इति विकल्पार्थो बोध्यः ।

3. **साधारण्यात्**—गोत्वखण्डादिसाधारण्यात् ।

* उपयुक्तं विशेषत्वादितरस्याप्यनन्वयात् ।
भिन्नाभिन्नात्मतां नैति द्वैरूप्यासंभवात्तयोः ॥ (63)

वस्तुवृत्तं न सामान्यं न विशेषस्तथैव च ।
अपेक्षामात्रतः सिद्धेः व्योम्नि कार्ष्ण्यादिवृत्तवत् ॥ (64)

प्रत्यभिज्ञानतोऽभेदः खण्डमुण्डस्थगोत्वयोः ।
एकाधिकरणज्ञानात् खण्डाद्यैस्तद्विभिन्नता ॥ (65)

भिन्नाधिकरणज्ञानान्नैवमप्यभिदा तयोः ।
सामान्येऽभिन्नधीर्यस्मात् भिन्नेष्वेव तु भिन्नधीः ॥ (66)

यदि धीसंभवः, तथापि न भिन्नाभिन्नता, इत्याह—**उपयुक्तमिति** । खण्डाभिन्नस्य गोत्वस्य खण्डवत् व्यावृत्तत्वात्, इतरस्य—खण्डस्यापि मुण्डादावनन्वयात् न भिन्नाभिन्नात्मतापत्तिः, तयोरेकैकस्य[व्या]वृत्तानुवृत्तरूपद्वयायोगादित्यर्थः । (63) सामान्यविशेषयोरितरे[1]तरापेक्षयोर्मिथ्यात्वाच्च न भिन्नाभिन्नता, इत्याह—**वस्तुवृत्तमिति** । (64)

परः सामान्यादेः भेदादि साधयति—**प्रत्यभिज्ञा[न]त इति** । तदिदं गोत्वमिति खण्डमुण्डस्थगोत्वप्रत्यभिज्ञानात् तदभेदधीः । खण्डा गौरिति व्यक्तिसामानाधिकरण्यात् [2]व्य(क्त)[क्त्य]भेदात् व्यक्त्यात्मना सामान्यस्य भेद इति भिन्नाभिन्नत्वं तयोरित्यर्थः । (65) अनुवृत्तव्यावृत्तधियोर्भिन्नविषयत्वात् मैवम्, इत्याह—**भिन्नेति** । तत् स्फुटयति—**सामान्य इति** । अभेदबुद्धेः सामान्य-

---

* "कथमुपयुक्तपक्षे तद्भावासिद्धिः (सामान्यविशेषभावासिद्धिः), तत्राह—**उपयुक्तमिति** । विशेषेषु उपयुक्तं न सामान्यं, विशेषान्तर्भावात् । न विशेषः, तस्य सामान्यापेक्षस्य तदभावेऽभावादित्यर्थः । अनुपयुक्तपक्षे तयोरसत्त्वं साधयति—**इतरस्यापीति** । अनुपयुक्तस्यापि निशेषेष्वयोगात् न सामान्यादितेत्यर्थः ।" **इति शास्त्रप्रकाशिका** ।

1. **इतरेतरापेक्षयोरिति** सामान्यं विना विशेषस्य, विशेषं विना सामान्यस्य चायोगादिति भावः ।

2. **व्यक्त्यभेदादिति** व्यक्तीनाञ्च भिन्नत्वादिति शेषः ।

प्रत्यक्षेणानुपात्तत्वान्न स्मृतिस्तदितीक्षणम् ।
न हि प्रत्यक्षतोऽप्राप्तं स्मर्यते वस्तु किञ्चन ॥ (67)

सामानाधिकरण्यस्य विभिन्नार्थव्यपाश्रयात् ।
* अभेदधीः कथं तत्र विशेषणविशेष्ययोः ॥ (68)

अभिन्नवचसा भिन्नप्रतिषेधोऽभिधीयते ।
प्राप्तस्य भिन्नरूपस्य शून्यताऽतः प्रसज्यते ॥ (69)

विषयत्वान्नैकाधिकरण्यमित्यर्थः । (66) यत्तु 'प्रत्यभिज्ञा[न]तोऽभेदः' इति, तत्राह—प्रत्यक्षेणेति । अनेकव्यक्तिप्रतीतिसापेक्षप्रतीतिकसामान्यस्य [1]एकप्रतीतौ पूर्वमप्रतीतत्वात्, गोत्वमिति स्मरणायोगात् प्रत्यभिज्ञानुपपत्तिः, पूर्वानुभूतानुसन्धानात्मकत्वात् प्रत्यभिज्ञाया इत्यर्थः । (67) भेदाभेदबुद्ध्योः सामानाधिकरण्यं नास्तीत्युक्तम् । तदुपगमेऽपि भेदाभेदासिद्धिः, इत्याह—सामानाधिकरण्यस्येति । जातेः व्यक्तिसामानाधिकरण्यात् तदभिन्नत्वं त्वयोच्यमानं न सिद्ध्यति, भिन्नयोरेव नीलोत्पलादिषु सामानाधिकरण्यात् । न हि नीलं नीलम्, उत्पलमुत्पलमिति वा [2]तद्भवति, किन्तु नीलमुत्पलमिति । ततश्च भिन्नयोरभेदायोगात् घटपटवत् सामानाधिकरण्यं भेदमेव साधयेदित्यर्थः । (68) [3]भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृ(त्तिं)[त्तिः] सामानाधिकरण्यमिति चेत् । लक्षणा[त्] समानाधिकृतयोर्भिन्नाभिन्नत्वमिति किमभेदशब्देन भेदाभाव उच्यते, तदन्यः, तद्विरोधी वा । यदि आद्यः, तत्राह—अभिन्नेति । भिन्नपदप्राप्तभेदस्य अभेदपदेन प्रतिपन्नोपाधौ निषेधात् [4]शून्यता स्यादित्यर्थः । (69) [5]द्वितीयं दूषयति—वच इति ।

---

1. एकप्रतीतौ—खण्डो गौरिति प्रतीतौ ।
2. तद् भवति—सामानाधिकरण्यं भवति ।
* विशेषणविशेष्ययोः — जातिव्यक्त्योरिति यावत् ।
3. भिन्नप्रवृत्तिनिमित्तानामिति नीलत्वोत्पलत्वरूपविभिन्नशक्यतावच्छेदककनीलोत्पलशब्दयोः एकस्मिन् व्यक्तिविशेषे वृत्तिः सामानाधिकरण्यमित्यर्थः ।
4. शून्यता स्यादिति तथा च न वस्तुनो भिन्नाभिन्नात्मता सिद्ध्यतीति भावः ।
5. द्वितीयं—अभेदशब्दस्य भेदान्यार्थकत्वम् ।

वचो भेदनिषेधं चेन्न कुर्याद्भेदवाक्यवत् ।
भिन्नाभिन्नात्मतापक्षहानिरेवं प्रसज्यते ॥ (70)

तक्रकौण्डिन्यवन्न्यायो न चेहाप्यवसीयते ।
उत्सर्गानवकाशत्वात् शून्यतैवात आपतेत् ॥ (71)

* भिन्नौ जातिगुणौ द्रव्यात् स्वानुभूत्यनुरोधतः ।
तद्विरोधादभिन्नत्वं कथं मानात् प्रतीयते ॥ (72)

अभिन्नं सद्विभिन्नत्वं न कथं चित्प्रपद्यते ।
स्वाश्रयत्वादभिन्नस्य कुतोऽस्य स्यात्पराश्रयः ॥ (73)

एकत्र भेदतदभावयोरसिद्धेः अभेदशब्देन वस्त्वन्तराभिधानादित्यर्थः । (70) कथमभेदशब्दस्य भेदनिषेधार्थत्वे भेदस्य शून्यता, सर्वत्र प्राप्तस्य कारणे निषेधात् । यथा 'आर्येभ्यो दधि दीयताम्' इत्यार्यत्वोपाधौ कौण्डिन्येऽपि प्राप्तस्य दध्नः, 'तक्रं कौण्डिन्याय' इति विशेषविधिना [1]निषिद्धस्य न सर्वत्र शून्यत्वम्, अताह —तक्रेति । सर्ववस्तु भिन्नाभिन्नमिच्छ(ता)[तां] उत्सर्गापवादयोर्विषयव्यवस्था-हेत्वभावात् तत्तद्वस्तुगताभेदशब्देन तत्तद्वस्तुगतभेदप्रतिषेधात् भेदस्य शून्यतैवे-त्यर्थः । (71) अभेदशब्दस्य विरोधि[2]वचनत्वकल्पं परास्यति—भिन्नाविति । विरुद्धयोरेको[3]पाधौ संस(र्गो)[र्गे]व्याघात इत्यर्थः । (72) एतद्दोषपरिजिहीर्षया जात्यादेः द्रव्यादिभेदोपगमो यदि, तत्राह—अभिन्नमिति । स्वरूपत्वेनान्तरङ्गा-भेदविरोधात् [4]परापेक्षबहिरङ्गभेदासिद्धिरित्यर्थः । (73) भिन्नयोरभिन्नयोश्च सामा-

---

1. **निषिद्धस्येति** कौण्डिन्ये निषिद्धस्येत्यर्थः ।
2. **विरोधिवचनत्वकल्पं**—विरोधि उच्यते अनेनेति विरोधिवचनं तत्त्वम् । भेद-विरोधिबोधकत्वमिति यावत् ।
3. **एकोपाधौ**—एकाधिकरणे ।

* "जात्यादौ क्वचिदेव भिन्नाभिन्नत्वाभ्युपगमात् तस्य सर्वत्रानिष्टेः उत्सर्गापवाद-सिद्धिः, इत्याशङ्क्य, जात्यादेर्धर्मिणश्च भेदमुपेत्याभेदं प्रत्याह—भिन्नाविति ।" इति शास्त्रप्रकाशिका ।

4. **परापेक्षेति** प्रतियोगिसापेक्षेत्यर्थः । अत एव बहिरङ्गत्वं भेदस्य ।

अन्यानपेक्षं यद्यस्य वृत्तं तत्पारमार्थिकम् ।
* अन्यापेक्षं यतोऽन्यत्वं तेन तत् व्योमकार्ष्ण्यवत् ॥ (74)

* गोत्वसत्वप्रमेयत्ववस्तुत्वादीनि भिन्नवत् ।
सामान्यानीह खण्डादौ तेनान्योन्यविरुद्धता ॥ (75)

यदेकं तन्न नानेति नाना नैकमिति प्रमा ।
योऽनुभूतिविरोध्यर्थः स कथं स्थाप्यते बलात् ॥ (76)

भेदाः सामान्यतां यान्ति सामान्यं भेदतां यदि ।
लोकप्रसिद्धिबाधः स्यात् स चापि स्यादनर्थकः ॥ (77)

नाधिकरण्यायोगात् कल्पितभेदे तदु[1]पपत्तिः, इति मत्वा, भेदस्य मिथ्यात्वमाह— **अन्येति ।** (74) भङ्गान्तरं वक्तुं तदभ्युपगममाह—**गोत्वेति** । सत्वादिसामान्यानि खण्डादौ—विशेषे स्थितानि भिन्नवत्—खण्डादि(प)[व]देव भिन्नानि चेत्यर्थः । दूषयति—**तेनेति** । भिन्नत्वेन हेतुना अन्योन्यविरुद्धता—अन्योन्यभिन्नता । भिन्नस्याभेदायोगात् अभिन्नस्य च भेदायोगादित्यर्थः । (75) एतदेवानुभवेनाविष्करोति—**यदेकमिति** । (76) जातिव्यक्त्योरभेदेऽपि लोकानुभवविरोधः, इत्याह—**भेदा इति** । भवतु बाधः इति चेत्, अत्राह—**स चेति** । (77) सामान्यविशेषयोः द्रव्याद्भिन्नत्वं [भिन्नत्वं भिन्नाभिन्नत्वं](च)[वे]ति विकल्प्य,

---

1. **तदुपपत्तिः**—सामानाधिकरण्योपपत्तिः ।

* अन्यापेक्षमिति सिद्धयोः, सिद्धासिद्धयोर्वा अपेक्षाऽसंभवात् सापेक्षं कल्पितमित्यर्थः ।

* "किञ्च गोत्वादीनि मिथो अभिन्नान्येव वा भिन्नाभिन्नानि वा । आद्ये गोत्वाभिन्नस्य खण्डादेः सत्वादिना तद्योगात् असत्वामेयत्वादिप्रसक्तिः । अन्यथा तेषां मिथो भिन्नत्वानुपपत्तिरिति मत्वा, द्वितीये दोषमाह—**गोत्वेति** तानि खण्डादिनिष्ठानि तद्वन्मिथो भिन्नान्येव दृश्यन्ते । तथा च न तान्यभिन्नान्येव अनुभवविरोधादित्यर्थः । तृतीयं निराह—**तेनेति ।** तानि मिथो भिन्नाभिन्नानि चेत्, जात्यादेरिव धर्मिणः भिन्नाभिन्नतेति इष्टासिद्धिः । तेन त्वदुक्त्योर्मिथो विरोधितेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

सामान्यं च विशेषश्च द्रव्यतन्त्रौ मतौ यदि ।
असामान्यविशेषात्मद्रव्यवत्प्राप्नुतश्च तौ ॥ (78)

* गुणतन्त्रं यदा द्रव्यं प्रसिद्धेर्बाधनं तदा ।
एकस्यानेकतापत्तिर्द्रव्यस्यापि प्रसज्यते ॥ (79)

द्रव्येणैवाभिसंबन्धाद् गुणानां न परस्परम् ।
अन्योन्यानभिसंबन्धान्न विशेषस्तथेतरत् ॥ (80)

* सामान्येतरतो भिन्नं द्रव्यं चेद्भवतो मतम् ।
तन्निषेधेन तत्सिद्धेः कथं स्यात्तदभिन्नता ॥ (81)

आद्यं दूषयति—**सामान्यं चेति** । द्रव्यतन्त्रौ—द्रव्याभिन्नाविति यावत् । सामान्यविशेषनिर्मुक्तद्रव्यमात्रत्वात् स्वरूपाभावात् [1]तयोः भिन्नाभिन्नता दूर[2]निरस्तेत्यर्थः । (78)

[3]अभेदेऽपि, द्रव्यस्य सामान्यादावन्तर्भावः, सामान्यादेः द्रव्ये वा । आद्यं प्रत्याह—**गुणेति** । आ(श्र)[श्रि]ताभिन्नत्वमाश्रयस्य प्रसिद्धिविरुद्धम् । एक[4]स्यानेकत्वं च व्याहतमित्यर्थः । (79) [5]द्वितीयं दूषयति—**द्रव्येणेति** । **गुणानां**—आश्रितानामिति यावत् । अभिसंबन्धात्—अभेदात् । **अन्योन्यानभिसंबन्धात्**—मिथो भिन्नत्वाभिन्नत्वयोरयोगात्, द्रव्यमात्राणामित्यर्थः । (80) द्रव्यात् [6]तयोर्भेदकल्पमनुवदति—**सामान्येति** । द्रव्यं सामान्येतरौ च भिन्नाभिन्नाविति शेषः । दूषयति—**तदिति** । सामान्यविशेषव्यतिरेकेण द्रव्यसिद्धेः,

---

1. तयोः—सामान्यविशेषयोः ।
2. दूरनिरस्तेति सत्येव धर्मिणि तद्गतधर्मचिन्तेति भावः ।
3. अभेदेऽपि—सामान्यविशेषयोर्द्रव्याभेदेऽपि ।
4. एकस्य—द्रव्यस्य । अनेकत्वञ्चेति आश्रितसामान्यविशेषात्मकानेकान्तर्भावप्रयुक्तमनेकत्वञ्चेत्यर्थः ।

* गुणतन्त्रं आश्रिताभिन्नं—आश्रितान्तर्भूतमिति यावत् ।

5. द्वितीयं—सामान्यादेः द्रव्येऽन्तर्भावम् ।
6. तयोः—सामान्यविशेषयोः ।

* सामान्येतरतः—सामान्यविशेषाभ्याम् ।

अथाभिन्नं मतं ताभ्यां द्रव्यस्यापह्नवस्ततः ।
न विशेषो न सामान्यमन्योन्यासंगतेर्भवेत् ॥ (82)

भिन्नाभेदादभिन्नस्य भेदः स्यात् पिण्डवद् ध्रुवम् ।
पिण्डश्च सर्वगस्तद्वत् गोत्वाभेदात्प्रसज्यते ॥ (83)

अन्योन्याव्यतिरेकित्वादैकात्म्यं प्राप्नुयात्तयोः ।
* ततः प्रत्यक्षबाधः स्यात् तद्भेदो हि तदाश्रयः ॥ (84)

व्यस्ताभेदात्समस्तोऽर्थो व्यस्तवन्न मनागपि ।
समस्ताकारवज्ज्ञानं कुर्यात्प्रत्यक्षबाधतः ॥ (85)

व्यस्ताभेदेऽपि चेत् कुर्यात् समस्तधिषणां बलात् ।
व्यस्तात्मनाऽसमस्तोऽपि कुर्यात् प्लुषिधियं गिरिः ॥ (86)

असाधारणरूपेण भेदो जगति निश्चितः ।
साधारण्यं तयोर्मानात् समस्तव्यस्तयोः कुतः ॥ (87)

द्रव्यव्यतिरेकेण तयोश्च सिद्धेः मिथोऽभिन्नता न स्यादित्यर्थः । (81) तृतीयमुत्थापयति—**अथेति** । भिन्नात्मकं चेति शेषः । दूषयति–**द्रव्यस्येति** । अभेदांशेन द्रव्यस्य सामान्यविशेषमात्रत्वात् द्रव्याभावात् [1]तयोरन्योन्याभेदस्य द्रव्याधीनत्वात् द्रव्याभावेऽभावात तयोरभावः स्यादित्यर्थः । (82) जातिव्यक्त्योरभेदे दोषान्तरमाह–**भिन्नेति** । (83) परस्परैक्ये प्रत्यक्षबाधमाह–**अन्योन्येति** । (84) सामान्यस्य व्यक्त्यभेदे अनुगतज्ञानकर्मकारकत्वं न स्यात् , इत्याह—**व्यस्तेति** । भिन्न(स्या)[स्य]सामान्यधीकर्मत्वे अध्यक्षबाधात् कर्मकारकत्वं न स्यादित्यर्थः । (85) विपक्षे दण्डमाह—**व्यस्ताभेदेऽपीति** । (86) अनुवृत्तं सामान्यं, व्यावृत्ता व्य(ति)[क्ति]रिति लक्षणभेदेन तयोर्भेदादैक्यासिद्धिः, इत्याह—**असाधारणेति** । साधारण्यं—ऐक्यमित्यर्थः । (87)

---

1. **तयोरन्योन्याभेदस्य**—सामान्यविशेषयोः परस्पराभेदस्य ।

* **तदाश्रयः**—प्रत्यक्षविषयः ।

सर्वाभेदाच्च सर्वस्य रज्ज्वां सर्पादिबुद्धयः ।
रज्जुबुद्धिवदेव स्युः तद्धीश्चाप्यहिबुद्धिवत् ॥ (88)

निषेधविधिहेतूनां सर्वेषां सर्ववस्तुषु ।
* समाप्तेरधिकाराणामप्रवृत्तिः प्रसज्यते ॥ (89)

अभावमानक्लृप्तयर्थो यश्चायासः कृतो महान् ।
निष्फलः सोऽभिसंवृत्तो भिन्नाभिन्नाव्यवस्थितौ ॥ (90)

स्वविशेषानुरोधित्वं सामान्यानां मतं यदि ।
समस्तव्यस्ततापक्षः तदा कुप्यति कल्पितः ॥ (91)

न चापि सर्वसामान्यविशेषार्थावबुद्धये ।
कश्चिदप्यधिकार्यस्ति कृत्स्नेऽपि जगतीदृशः ॥ (92)

भेदाभेदवादिनः प्रमाणतदाभासव्यवस्था च न स्यात्, इत्याह—**सर्वेति** । (88) दोषान्तरमाह—**निषेधेति** । अधिकाराणां—प्रवृत्तिनिमित्तब्राह्मणत्वादीनां, सर्ववस्तुषु—चण्डालादिष्वपि भावादित्यर्थः । (89) किञ्च, सर्वं सर्वस्मात् भिन्नाभिन्नं, किञ्चित् कुतश्चिद्वा । आद्यं प्रत्याह—**अभावेति** । घटादेः भूतलाद्यात्मना गृह्यमाणस्य योग्यानुपलम्भासिद्धेरित्यर्थः । (90) द्वितीयं शङ्कते—**स्वविशेषेति** । गोत्वं स्वव्यक्तिभिः भिन्नाभिन्नं, [1]अश्वत्वाद्यपि तथेत्यर्थः । दूषयति—**समस्तेति** । क्वचिदत्यन्तभेदे तद्दृष्टान्तेन अन्यत्रापि भिन्नयोरत्यन्तभेदानुमानादित्यर्थः । (91)

---

* **समाप्तेः**—सम्यगाप्तेः । भावादिति तद्विवरणं बोध्यम् ।
'अधिकाराणां—प्रवृत्त्यादिहेतुमतामधिकारिणामित्यर्थः' इति **शास्त्रप्रकाशिका** ।

1. **अश्वत्वाद्यपि तथेति** अश्वत्वाद्यपि स्वव्यक्तिभिः भिन्नाभिन्नमित्यर्थः ।

इति षष्ठं ब्राह्मणम्

इति तृतीयोऽध्यायः समाप्तः

—: * :—

न वेदार्थो न चापीदृक् तर्केणाप्युपपद्यते ।
भिन्नाभिन्नेक्षणं सर्वं यथोक्तन्यायवर्त्मना ॥ (93)

इति षष्ठं ब्राह्मणम्

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसुरेश्वराचार्यविरचिते बृहदारण्यकोपनिषद्भाष्यवार्त्तिके तृतीयोऽध्यायः

समाप्तः

—: * :—

निरङ्कुशभिन्नाभिन्नत्वं तथात्वोपासनार्थं कल्प्यते परेण । तद्सर्वज्ञस्याशक्यम्, इत्याह—**न चेति** । (92) भिन्नाभिन्ननिराकरणमुपसंहरति—**न वेदार्थ इति** । (93)

इति षष्ठं ब्राह्मणम्

इति श्रीमत्परमहंसपरिव्राजकाचार्याभयानन्दपूज्यपादशिष्येण आनन्दपूर्णमुनीन्द्रेण विरचितायां सुरेश्वरवार्त्तिकटीकायां न्यायकल्पलतिकायां तृतीयोऽध्यायः

समाप्तः

—: * :—

अथ चतुर्थोऽध्यायः

प्रथमं ब्राह्मणम्

तद्धेदमित्यविज्ञातप्रत्यक्तत्त्वादिदं जगत् ।
रज्ज्वां सर्पादिवज्जातं नामरूपक्रियात्मकम् ॥ (1)

'अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैः तद्वदात्मा विकल्पितः ॥' (2)

ॐ श्रीगणपतये नमः

अथ चतुर्थोऽध्यायः

प्रथमं ब्राह्मणम्

विद्यानुभ(वं)[व]संभूतव्याख्यां तारप्रभो[ः]प्रभाम् ।
भृशं संभावयन् (बु)[शु]भ्रां विद्याम्भोधिर्विजृम्भते ॥ (1)

भूम्ने सकलसौभाग्यसीम्ने सच्चित्सुखात्मने ।
धाम्ने धाम्नामात्मधाम्ने भूयादेषा नमस्क्रिया ॥ (2)

वृत्तानुवादपूर्वकं उत्तराध्यायसंगतिनिरूपणम्

विद्यातत्फलयोः अविद्यातत्कार्ययोश्च तृतीये [1]वर्णितत्वात् किमुत्तराध्यायेन, इति शङ्कामपाकर्तुं, वृत्तं संकीर्तयति—तद्धेदमिति । (1) [2]आप्तवाक्येन उक्तं स्थिरीकरोति—अनिश्चितेति । (2) अविद्यामूलत्वेन जगतोऽनर्थत्वोक्तिः किंफला,

---

अथ चतुर्थोऽध्यायः

प्रथमं ब्राह्मणम्

अजातशत्रुणा दृप्तबालाकये तत्त्वोपदेशप्रकरणादिदं अजातशत्रुब्राह्मणमिति व्यवह्रियते ।

1. वर्णितत्वादिति वक्तव्यस्यानवशेषादिति शेषः ।

2. आप्तवाक्येन—वैतथ्यप्रकरणस्थितया गौडपादाचार्यकारिकया ।

* अनर्थहेतुरज्ञातः तदुत्थं चाखिलं जगत् ।
प्रतीचोऽनर्थः इत्यस्माद्भीतोऽत्यर्थं मुमुक्षति ॥ (3)

पुरुषार्थोऽखिलानर्थप्रध्वस्तिः प्रत्यगात्मनः ।
सम्यक्तत्त्वपरिज्ञानं पुरुषार्थस्य कारणम् ॥ (4)

निरस्ताशेषानर्थात्मकृत्स्नाह्लादसतत्त्वकः ।
स्वतो यतोऽयं संसारी तेनाज्ञो विपरीतदृक् ॥ (5)

मोहमात्रान्तरायत्वात्पुरुषार्थस्य नापरम् ।
अविद्याध्वंसिनो बोधात् किञ्चित्साधनमिष्यते ॥ (6)

आत्मेत्येवेति विद्यायाः सूत्रमित्युदितं पुरा ।
उपोद्घातस्तथा तस्य प्रागुक्तः सप्रयोजनः ॥ (7)

प्रतीचि साक्षाद्विज्ञाते ज्ञेयं सर्वं समाप्यते ।
निःशेषतस्तमोध्वस्तेः पुमर्थश्च समाप्यते ॥ (8)

यत एवमतः पश्येदात्मन्यात्मानमद्वयम् ।
आत्मैको ब्रह्मविद्याया विषयः श्रुतितो मतः ॥ (9)

अत्राह—**अनर्थेति** । अज्ञातः, आत्मेति शेषः । (3) सहेतुमनर्थम(त्त)[नू]द्य, [1]सहेतुमर्थमाह—**पुरुषार्थ इति** । (4) [2]कुत एतत्, अत्राह—**निरस्तेति** । (5) धीसमुच्चितं, केवलं कर्म[वा] श)[मु]क्तिहेतुः, अत्राह—**मोहेति** । (6) वक्तव्याभावात् [3]अध्यायानर्थक्यचोद्यं तदवस्थम्, अत्राह—**आत्मेति** । (7) अनात्मबोधादपि तत्सिद्धेः किमात्मधिया, अत्राह—**प्रतीचीति** । (8) अत्र[4] मानमाह—**यत इति** । (9) क तर्हि अविद्या सूत्रिता, अत्राह—**अथेति** ।

---

* 'अनर्थहेतुरज्ञानम्' इति मु. पु. पाठः ।

1. **सहेतुमर्थमिति** कारणसहितं पुमर्थमित्यर्थः ।

…**तदिति** प्रत्यगात्मनः सम्यक् तत्त्वपरिज्ञानस्य पुरुषार्थहेतुत्वं कुतः हेतो-

…**नर्थक्येति** चतुर्थाद्यध्यायानर्थक्यमित्यर्थः ।

…—आत्मज्ञानस्यैव परमपुरुषार्थहेतुत्वे प्रमाणम् ।

अथ योऽन्यामिति तथाऽविद्यां चानूद्य नश्वरीम् ।
आऽध्यायावसितेः कार्यं तस्या व्याख्यातमञ्जसा ॥ (10)

अध्यात्ममधिभूतं च तथा चैवाधिदैवतम् ।
भूतं भवद्भविष्यश्च साध्यं साधनमेव च ।
जनिमत्सर्वमेवेदमविद्यायाः समुत्थितम् ॥ (11)

संक्षिप्य चाप्युपन्यस्तमध्यायान्ते च तत्पुनः ॥ (12)

त्रयं वा इदमित्येवं रूपं नाम च कर्म च ।
त्रयस्यापि च संक्षेपो लिङ्गदेहात्मसंहतिः ॥ (13)

त्रैलोक्यात्मशरीरोऽयं विश्वरूपः प्रजापतिः ।
* अन्तर्णीताखिलानन्तदेवतः प्राणविग्रहः ॥ (14)

अविज्ञातात्मतत्त्वः संस्तदध्यस्ताभिमानवान् ।
पराक् प्रवृत्तेर्विरतो विद्याया विषयस्त्वयम् ॥ (15)

साक्षात्कृतात्मभावोऽयमेवंलक्षणवस्तुनि ।
श्रुत्योपस्थाप्यते गार्ग्यो ब्रह्मविद्याभिधित्सया ॥ (16)

---

(10) किं तदविद्याकार्यमिति, तदाह—अध्यात्ममिति । (11) 'त्रयं वा इदम्' (बृ. 3-6-1) इत्यादावुक्तमनुवदति—संक्षिप्येति । (12) 'तदेतत् त्रयम्' (बृ. 3-6-3) इत्याद्युक्तमनुवदति—त्रयस्यापीति । (13) इममर्थं स्पष्टयति—त्रैलोक्येति । अन्तर्नीता अखिला [अनन्ताः] देवताः यस्मिन्, सः अन्तर्णीताखिलानन्तदेव(त)[तः] निखिलदेवतात्मक इति यावत् । (14) इत्थं वृत्तमनूद्य संगतिमाह—अविज्ञातेति । तदध्यस्ताभिमानवान्—अविद्यारोपितदेहद्वयाभिमानी । विषयः—अधिकारी । एवंलक्षणवस्तुनि—सूत्रात्मनि । साक्षात्कृतात्मभावः—तद्भावनाभावितबुद्धिरिति यावत् । (15-16) विद्वान् गार्ग्यः कथं

---

* अन्तरिति "अन्तर्णीतं अन्तर्भावितमखिलं जगत् अनन्ताश्च अन्तर्णीता देवताः येन स तथेति विग्रहः ।" इति शास्त्रप्रकाशिका ।

अकृत्स्नब्रह्मवेदित्वात् दृप्तोऽसावल्पकस्ततः ।
न हि पूर्णपरिज्ञानः कश्चित् दृप्यति निर्द्वयः ॥ (17)

समाप्ताशेषविज्ञेयपुरुषार्थस्तथा परः ।
अजातशत्रुरैकात्म्यात् गार्ग्याचार्यः प्रकल्पते ॥ (18)

व्याख्यातायामविद्यायां, तदुच्छित्तावथाधुना ।
आत्मेत्येवेति सूत्रस्य व्याख्या प्रस्तूयते स्फुटा ॥ (19)

श्रुत्या गार्ग्याद्युपन्यासशिष्याचार्यस्वरूपया ।
सुखावबोधसिद्ध्यर्थमियमाख्यायिकोदिता ॥ (20)

अन्ये त्वत्राभिसंबन्धमेवं व्याचक्षते बुधाः ।
स एष इत्युपन्यस्तो विज्ञानात्मा हि यः पुरा ॥ (21)

विद्याधिकारित्वेनोत्थाप्यते, अत्राह—अकृ(त्स्न इ)[त्स्ने]ति । दृप्त[1]त्वश्रुतेः अब्रह्मविदित्यर्थः । (17) अजातशत्रोरपि अब्रह्मवित्त्वात् आचार्यत्वानुपपत्तिः, अत्राह—समाप्तेति । (18) एवं ब्राह्मणसंगतिमुक्त्वा, अध्यायसंगतिमाह—व्याख्यातायामिति । तर्हि विद्या[2]सूत्रमेव व्याक्रियतां, किमाख्यायिकया, अत्राह—सुखेति । (19-20)

भर्तृप्रपञ्चोक्तसंगतिः तन्निराकरणं च

स्वमतेन संबन्धमुक्त्वा, भर्तृप्रपञ्चमतेनाह—अन्ये त्विति । अत्र—अध्याययोर्द्वयोरित्यर्थः । [3]कथमिति, [4]तमाह—स इति । 'स एष प्रविष्टः' (बृ. 3-4-7) इति सूत्रित इत्यर्थः । (21) [5]तस्यार्थस्यासंदिग्धत्वा(द्य)[त्व्य]र्थस्तन्निर्णयः, अत्राह

---

1. दृप्तत्वश्रुतेरिति 'दृप्तबालाकिः' इति तस्य दृप्तत्वश्रवणादित्यर्थः । ब्रह्मविदः दर्पादेरसंभवादिति भावः ।
2. विद्यासूत्रं—'आत्मेत्येवोपासीत' इति वाक्यम् ।
3. कथमिति व्याख्यानप्रकारप्रश्नः ।
4. तमाह—व्याख्यानप्रकारमाह ।
5. तस्यार्थस्य—विज्ञानात्मनः - जीवस्य ।

गार्ग्यकाश्येतिहासेन वक्ष्यते तस्य निर्णयः ।
कर्त्र्यो भोक्त्र्यश्च देहेऽस्मिन् देवता एव नापरः ।

श्रुतिर्गार्ग्यात्मना सेयं पूर्वपक्षमभाषत ॥ (22)
आत्मनोऽस्तित्वकर्तृत्वभोक्तृत्वप्रतिपत्तये ॥ (23)

* श्रुत्या सिद्धान्तसिद्ध्यर्थं काश्यरूपं प्रकल्पितम् ।
निष्फलत्वात् स चायुक्तः प्रकृतानभिसंगतेः ॥ (24)

* देवतास्तित्वपक्षेऽपि किमस्तित्वादि नेष्यते ।
देहाद्भिन्नस्य विज्ञातुरिष्टं चेन्निष्फलः श्रमः ॥ (25)

—**कर्त्र्य इति** । करणाधिष्ठात्र्यो [1]देवता एव देहस्वामिन्यः, न तदतिरिक्तो जीवोऽस्तीत्यर्थः । (22) कथं तर्हि सिद्धान्तः, अत्राह—**आत्मन इति** । आक्षिपति—**निष्फलत्वादिति** । प्राणदेवतायाः कर्तृत्वादिनिरासेन आत्मनः कर्तृत्वादिसिद्ध्यर्थमुत्तरब्राह्मणत्रयम्, इत्ययं सं(बोध)[बन्धो] न युक्तः । ब्रह्मात्मत्वज्ञानात् मुक्तिरिति 'तदात्मानमेवावेत्' (बृ. 3-4-10) इत्यत्र प्रकृतं न सिद्ध्येत् आत्मनः पारमार्थिककर्तृत्वादिप्रतिपादने । अतः प्रकृतानभिसंबन्धादित्यर्थः । (24) [2]निष्फलत्वं साधयति—**देवतेति** । स्थूलदेहातिरिक्तात्मनोऽस्तित्वादि विवक्षितं चेत्, देहातिरिक्तप्राणदेवतास्तित्वपक्षेऽपि **लोकायतमतनिरासेन** तस्या एवात्मतत्त्वेन कर्तृत्वाद्युपपत्तेः तदतिरिक्तात्मास्तित्वादिसाधनं व्यर्थमित्यर्थः । (25) स्वमते नैकोऽपि दोषः, इत्याह—**अज्ञातेति** । पूर्वप(क्ष)[क्षि]तया—पूर्ववा-

---

1. **देवता एव**—अग्न्यादित्यादय एव ।

* **काश्यरूपं प्रकल्पितमिति** वेदस्यापौरुषेयत्वादिति भावः ।

2. **निष्फलत्वं**—प्राणदेवतातिरिक्तस्य जीवस्यास्तित्वादिसाधनस्य निष्फलत्वम् ।

* **देवतेति** गार्ग्येष्टप्राणस्यास्तित्वपक्षेऽपि देहद्वयातिरिक्तस्य जीवस्य तद्द्वारा अस्तित्वादि किमिति नेष्यते । तथा चेदिष्टं, तर्हि देवतायास्तन्निरासेन ज्ञातुः वस्तुतः तत्साधने प्रयत्नो वृथेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

* अज्ञातैकात्म्ययाथात्म्यो यदा त्विह विवक्ष्यते ।
अविद्याकार्यनिष्ठः सन् श्रुत्या गार्ग्यशरीरया ॥ (26)

पूर्वपक्षितयाऽशेषदुःखहेतूपशान्तये ।
पूर्वपक्षनिदानच्छित् काश्यः सिद्धान्तवाग्यपि ॥ (27)

श्रुत्येहोत्थाप्यतेऽशेषवेदान्तार्थावबुद्धये ।
सर्वोऽप्येष तदा यत्नः फलवान् स्यान्न चान्यथा ॥ (28)

श्रद्धाचारादिविध्यर्था यदि वाऽऽख्यायिका त्वियम् ।
यथोक्तदर्शनाम्नार्थो नान्यदस्तीति भावितः ।
अतोऽतिदृप्तोऽविज्ञातदर्पकारणघस्मरः ॥ (29)

श्रद्धालु वित्तसंपन्नं श्रेयोऽर्थिनमुपेत्य तु ।
ब्रह्म तेऽहं ब्रवाणीति गार्ग्यः काश्यमभाषत ॥ (30)

(गा)दितया गार्ग्यः श्रुत्या विवक्ष्यते यदा, तदा सर्वो यत्नः फलवान्—अदुष्ट इत्यर्थः । (26–27–28) सुखावबोधाय आख्यायिके (ये) त्युक्तम् । इदानीमर्थान्तरमाह—(अ)[श्र]द्धेति । 'नैषा तर्केण(मि)[म]तिरापनेया' (का. 1-2-9) [1]इत्यादिपदार्थः ।

प्रथमकण्डिकार्थनिरूपणम्

एवं संगतिमुक्त्वा '[2]दृप्तबालाकिः' इत्यादेरर्थमाह—यथोक्तेति ।

---

* अज्ञातेति विराट् वैश्वानरः प्रजापतिः हिरण्यगर्भः इत्यादिशब्दैः व्यपदेश्यः प्राणः एको देवता सूर्यादिप्रविभक्तकरणा । एतावदेव ब्रह्म । प्रत्येकं च शरीरभेदेषु परिसमाप्तं चेतनावत् कर्तृ भोक्तृ च इत्येवं प्राणात्माभिमानी अज्ञः पूर्ववादी । तन्निरासाय प्राणादेरात्मत्वनिरासः, अतिरिक्तात्मोक्तिः काश्यस्य, गार्ग्याज्ञानच्छेदनाय प्रवृत्तः अजातशत्रुरिति सर्वं समञ्जसं भवति इति समुदायार्थः ।

1. आदिपदार्थ इति तर्कबुद्धिनिषेधार्थापि आख्यायिका इति आदिपदेन उक्तमित्यर्थः ।

2. दृप्तबालाकिरित्यादेरिति " दृप्तबालाकिर्हानूचानो गार्ग्य आस । स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति । स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मः, जनको जनक इति जना धावन्ति । " इति श्रुतिरनुसन्धेया ।

न जातो न भविष्योऽस्ति शत्रुरैकात्म्यदर्शनात् ।
अजातशत्रुः काश्योऽतो गार्ग्यबुद्धिविरुद्धधीः ॥ (31)

ब्रह्म यस्मात्परं नास्ति न च वस्त्वन्तरं यतः ।
ब्रवाण्युपास्यं तत्तेऽहं सर्वापध्वस्तिकारणम् ॥ (32)

नापृष्ट इति नन्वेतद्विरुद्धमकरोदृषिः ।
यद् ब्रह्म ते ब्रवाणीति ह्यपृष्टः काश्यमब्रवीत् ॥ (33)

* दर्पादिदर्शनान्नूनं वेत्त्यकृत्स्नात्मदर्शनम् ।
कृत्स्नत्वार्थमतोऽप्राक्षीत् काश्यं प्रज्ञासमन्वितम् ॥ (34)

श्रद्धालुरधिकारी यो जिज्ञासुर्विनयान्वितः ।
अपृष्टेनापि वक्तव्या तस्मै विद्या विपश्चिता ॥ (35)

अविज्ञातं दर्पकारणस्याज्ञानस्य घस्मरं–भक्षकं तत्त्वं येन, सः अविज्ञातदर्पकारणघस्मरः । (29-30) कथमस्य अजातशत्रुत्वम्, अत्राह—**न जात इति** । (31) ब्रह्मपदार्थमाह—**ब्रह्मेति** । (32)

'नापृष्टः कस्य चिद् ब्रूयात् न चान्यायेन पृच्छतः ।
जानन्नपि च मेधावी जडवल्लोकमाचरेत् ॥' (मनु. 2-110)

इति स्मृतिविरुद्धं ऋषिणा कृतम्, इति शङ्कते—**नापृष्ट इति** । (33) 'ब्रवाणि' इत्यस्य पृच्छामि इत्यर्थे [1]प्रयोगादविरोधः, इत्याह—**दर्पादीति** । अकृत्स्नात्मदर्शनं, स्वमिति शेषः । (34) [2]मुख्यार्थग्रहेऽपि न दोषः, इत्याह—**श्रद्धा(लुवादेति)[लुरिति]** । (35) अत्र व्यतिरेकद्वारा मानमाह—(मनु.

---

1. प्रयोगादिति लक्षणयेत्यादिः ।

* अकृत्स्नात्मदर्शनं अकृत्स्नं आत्मदर्शनं यस्य तम् । **स्वं—आत्मानं—गार्ग्यम्** । कृत्स्नत्वार्थं—पूर्णवस्तुविज्ञानार्थम् ।

2. मुख्यार्थग्रहेऽपीति ब्रवाणि इत्यत्र धातोरित्यादिः ।

'धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥' (36)

धर्मार्थौ यत्र च स्यातां शुश्रूषा वापि तद्विधा ।
वक्तव्या तत्र विद्येति निषेधादेव लिङ्ग्यते ॥ (37)*

नष्टाश्वदग्धरथवन्न्यायं चाश्रित्य भूमिपम् ।
प्राह मानुषवित्ताढ्यं दैववित्तसमन्वितः ॥ (38) *

वित्तद्वयेन संपन्नो यतोऽधिक्रियते नरः ।
सर्वकर्मस्वतोऽवादीत् बालाकिः काश्यमन्तिकात् ॥ (39)

ब्रह्म तुभ्यं ब्रवाणीति वाङ्मात्रव्यापृतावहम् ।
गोसहस्रं ददाम्यद्य विनाप्यैकात्म्यनिर्णयात् ॥ (40)

गोसहस्रप्रदानस्य निमित्तं श्रुतिरभ्यधात् ।
जनको जनक इति नामाभ्यासतः स्फुटम् ॥ (41)

शुश्रूषुं जनकं सर्वे जना दित्सन्तमेव च ।
विवक्षवोऽभिधावन्ति तमुद्दिश्य जिघृक्षवः ॥ (42)

2-112) **धर्मेति** । (36) अनधिकार्येवात्रोक्तः, नाधिकारी, इत्यत्राह—**धर्मार्थाविति** । प्रश्नव्यतिरेकेणापि इति शेषः । (37) अन्तरेण प्रश्नं ब्रवाणीति प्रवृत्तौ हेत्वन्तरमाह—**नष्टेति** । (38) मानुषवित्तेनास्य[1] किं साध्यम्, अत्राह-**वित्तद्वयेनेति** । (39) 'सहस्रमेतस्याम्' इत्यादेरर्थमाह—**ब्रह्मेति** । (40) 'जनकः' (स्या) [इत्या]देस्तात्पर्यमाह—**गोसहस्रेति** । (41) तदर्थमाह—

---

* **लिङ्ग्यते**—गम्यते ।

1. **अस्य**—दैववित्तसंपन्नस्य गार्ग्यस्य ।

* दैववित्तसमन्वितम् इति मु. पु. पाठः ।

* मौढीं प्रसिद्धिमुल्लङ्घ्य गार्ग्योऽयं मामुपागतः ।
नूनं दित्सुं च शुश्रूषुं संभावयति मामपि ॥ (43)

आदित्यचक्षुर्बुद्धिस्थः चेतनः सर्वगो ध्रुवः ।
एतमेव सदोपासे ब्रह्मेति रविमध्यगम् ॥ (44)

तथा ब्रुवाणं तं गार्ग्यं काश्यो मा मेत्यथोचिवान् ।
केवलो मतिसंवादो भवदुक्तेर्मयाऽभवत् ॥ (45)

न त्वपूर्वार्थविज्ञानं प्रतिज्ञातं यथा त्वया ।
मा वोचोऽतो यतो वेद्मि विनापि वचनात्तव ॥ (46)

शुश्रू(ष/[षु]मिति । (42) तथापि सहस्रदानं [1]वाङ्मात्रे कस्मात्, अत्राह—मौढीमिति । (43)

द्वितीयकण्डिकार्थनिरूपणम्

ब्राह्मणेन किं तद् ब्रह्मोपदिष्टमिति, तदाह—आदित्येति । (44) विना त्वद्वचनमस्य ब्रह्मणः मया ज्ञाततवात् नेदं वाच्यम्, इत्याह —तथेति । (45-46)

---

1. वाङ्मात्रे कस्मादिति ब्रह्म ते ब्रवाणि इति वाङ्मात्रे सति विनापि तदुक्तिं गोसहस्रदानं कस्मादुक्तमित्यर्थः ।

* 'मौग्धीम्' इति मु. पु. पाठः ।

अत्रेदं बोध्यम् । स्वयं ब्रवाणि इत्येवं ब्रह्म वक्तुं प्रवृत्तः गार्ग्यः, आदित्ये, चन्द्रे, विद्युति, आकाशे, वायौ, अग्नौ, अप्सु, आदर्शे, यन्तं पश्चाच्छब्दोऽनूदेति तत्र, दिक्षु, छायायां, आत्मनि, पुरुषः इत्येवं द्वादश पुरुषान् स्वोपास्यान् अवोचत्, राजा तु तत्सर्वं मया विदितमेव, तत्तदुपासनायाः फलं उपास्यगुणविशेषञ्च जानामि इति तदुभयमपि एकैकोपासनाया ब्रवीति । ततः शान्तदर्पः गार्ग्यः राजनिकटे शिष्यभावमुपगतः । ततः राजा गार्ग्यमुपदिदेश इति आख्यायिका प्रवृत्तेति ॥
"स होवाच गार्ग्यः य एवासावादित्ये पुरुषः, एतमेवाहं ब्रह्मोपासे इति । स होवाचाजातशत्रुः मा मैतस्मिन् संवदिष्ठाः, अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमुपासे इति । स य एतमेवमुपास्ते अतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ।" इति प्रथमपर्यायः ।

निषेधाभ्यासो मा मेति ज्ञातब्रह्मप्रवादिनः ।
आबाधितधियाऽभ्यस्तो गार्ग्यस्यानुक्तिकारणात् ॥ (47)

सुप्रसिद्धं यदस्माकं त्वच्छासनमृतेऽपि तत् ।
नापेक्षते भवद्वाक्यं सिद्ध्यर्थं प्राक्प्रसिद्धितः ॥ (48)

तदुपासां न वेद्मीति मा च शङ्कां कृथा यतः ।
उपासनं च वेद्यस्य गुणं तत्फलमेव च ॥ (49)

अतीत्य सर्वभूतानि प्राधान्येन स्थितो यतः ॥ (50)

अतिष्ठा इति नामास्य तेनादित्यात्मनोऽभवत् ।
* चक्षुर्मुदीप्तिमत्त्वाच्च राजेत्येषोऽभिधीयते ॥ (51)

स य एतं यथोद्दिष्टमुपास्तेऽहर्निशं नरः ।
यथोपासनमेवास्य फलं भवति नान्यथा ॥ (52)

'मा मा' इति द्विर्वचनतात्पर्यमाह— निषेधेति । गार्ग्यो हि विना स्वोपदेशं राज्ञा ज्ञातस्य ब्रह्मणः प्रकर्षेण वदनशीलः । तस्येषत्[1] बाधबुद्ध्या निषेधो राज्ञाऽभ्यस्तः, मुख्यस्य ब्रह्मणस्तेनानुक्तेरित्यर्थः । (47) विना तदुक्तिं कथं ज्ञातत्वमिति चेत्, अत्राह— सुप्रसिद्धमिति । (48) ब्रह्ममात्रं जानासि नोपासा-गुणफलानि, इत्याशङ्क्याह— तदुपासामिति । (49) अतिष्ठागुणं व्याचष्टे— अतीत्येति । (50) 'राजा' इत्यस्यार्थमाह— चक्षुर्मु(डि)[दि]ति । (51) उत्तरवाक्यार्थमाह— स य इति । (52)

---

1. ईषत् बाधबुद्ध्येति, आबाधितधिया इत्यस्य आङः ईषदर्थत्वस्वीकारेण विवरणम् ।

* 'चक्षुरुद्दीप्तिमत्त्वाच्च' इति मु. पु. पाठः ।

मतिसंवाददोषेण काश्येनोत्सारिते रवौ ।
गार्ग्यो ब्रह्मान्तरं राज्ञे प्रवक्तुमुपचक्रमे ।। (53)

चन्द्रे मनसि बुद्धौ च ब्रह्मोपासेऽहमद्वयम् ।
भानुमण्डलतो यस्मात् द्विगुणं चन्द्रमण्डलम् ।
बृहन्निति ततश्चन्द्रः प्रमाणेनाभिधीयते ।। (54)

अम्भोऽतिपाण्डरं वासो यस्माच्चन्द्राभिमानिनः ।
तस्मात्पाण्डरवासाः स्यात् सोमः सौम्यत्वकारणात् ।। (55)

ज्योत्स्नया राजतेऽत्यर्थं सोमो ब्राह्मणराजतः ।
सोमो राजेत्यतो वक्ति तदुपासाविधित्सया ।। (56)

तुल्याभिधानधर्मत्वाल्लता सोमोऽपि गृह्यते ।
* उभयोर्दैवतैकत्वादुपास्यं तेन तद् द्वयम् ।। (57)

तृतीयकण्डिकार्थनिरूपणम्

'[1]स होवाच' इत्यादेस्तात्पर्यमाह—मतीति । (53) 'य एवासौ' इत्यादेरर्थमाह—चन्द्र इति । बृहच्छब्दार्थमाह—भान्विति । (54) 'पा(ण्डु)[ण्ड]रवासाः सोमः' इत्यस्यार्थमाह—अ(म्न)[म्भ]इति । (55) 'राजा' इत्यस्यार्थमाह—ज्योत्स्नयेति । (56) सोमशब्देन लतासोमोऽपि गृह्यते, इत्याह—तुल्येति । सोमः इत्यभिधानं [2]द्वयोस्तुल्यम् । [3]लतासोमेऽपि ह्यस-

---

1. स होवाचेत्यादेरिति 'स होवाच गार्ग्यः य एवासौ चन्द्रे पुरुषः एतमेवाहं ब्रह्मोपासे इति' । चन्द्रपुरुषः उच्यते । तत्र 'मा मा संवदिष्ठाः' इत्युक्त्वा, राज्ञा, बृहन् पाण्डरवासाः सोमः राजा इति गुणचतुष्टयमुपास्यमुक्त्वा, उपास्यगुणानुसारेण तत्फलं, 'स य एतं एवमुपास्ते अहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ।' इत्युच्यते ।
2. द्वयोः—लताचन्द्रयोः ।
3. लतासोमेऽपि इत्यपिना चन्द्रो गृह्यते ।

* उपास्यं तेन तद्द्वयमिति प्राणात्मना एकीकृत्येति शेषः । लताचन्द्रद्वयं प्राणात्मना एकीकृत्य उपास्यमित्यर्थः ।
तृतीयपर्याये विद्युति त्वचि हृदये चैका देवता । तस्याः तेजस्वित्वं गुणः । 'तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति' इति उपासनाफलमुक्तम् ।

एषैका देवता विभ्वी प्रत्येकार्थावसायिनी ।
भोक्त्री कर्त्री च सर्वत्र तस्या भोज्यमतोऽपरम् ॥ (58)

ब्रह्मैषा सर्वसंव्याप्त्यात्मेत्येतामुपास्महे ।
व्याख्या तुल्यैव विज्ञेया सर्ववाक्येषु पूर्ववत् ॥ (59)

गुणो यत्र हि यः पुंसो नाम्ना संभाव्यतेऽत्र तु ।
फलं तदेव तस्य स्यात् सर्ववाक्येषु निर्णयः ॥ (60)

भानुचन्द्रमसोस्तेजो जलदैरभिभूयते ।
* विद्युत्तत्राप्यतितरां तेजस्वी तेन विद्युति ॥ (61)

वृद्ध्याख्यो धर्मोऽपि विद्यते, द्वित्रिपत्रादिरूपेण वृद्धेरित्यर्थः । देवतापि हिमांशुरेकैवेति । (57) तां विशिनष्टि—ए(ष्ये)[षे]ति । (58) अन्यत् अस्याः भोज्यमित्ययुक्तम्, ब्रह्मणोऽतथात्वात्, अत्राह—ब्रह्मेति । उक्तव्याख्यामुत्तरपर्यायेषु अतिदिशति—तुल्येति । व्याख्या । (59) तदेव प्रकटयति—गुण इति । (60)

चतुर्थकण्डिकार्थनिरूपणम्

[1]भान्वादेरपि तेजस्वित्वात् विद्युत एव तेजस्वित्वं कथं विशेषगुणः, अत्राह—भान्विति । (61)

---

1. भान्वादेरपीति आदिपदेन चन्द्राग्न्योः ग्रहः ।

* विद्युत्तत्राप्यतितरामिति तत्रापि—जलदेषु सत्स्वपि, विद्युत् अतितरां तेजस्विनीत्यर्थः । तेजस्वी तेन विद्युतीति तेन विद्युति तेजस्वी ध्येयः पुरुष इत्यर्थः । चतुर्थपर्याये आकाशे हृदयाकाशे चैका देवता । पूर्णं, अप्रवर्ति, इति उपास्यं गुणद्वयम् । 'पूर्यते प्रजया पशुभिः, नास्यास्माल्लोकात् प्रजोद्वर्तते' इति फलमुक्तम् । प्रजासन्तानाविच्छित्तिः, 'प्रजा नोद्वर्तते' इत्यस्यार्थः ।

खण्डशो न यथा मूर्तं खं पूर्णं चाप्रवर्तनात् ।
* अप्रवर्त्यक्रियत्वात्स्युर्व्योम्नि सर्वाः प्रवृत्तयः ॥ (62)

जिष्णुः स्याज्ज्यशीलत्वात् जीयते न परैर्यतः ।
अपराजिष्णुरित्येवं तस्माद्देवाभिधीयते ॥ (63)

अन्यतो मातृतो जाता अन्यतस्त्या उदाहृताः ।
अप्यन्यतस्त्यजायी स्यात् सापत्नभ्रातृमर्दनः ॥ (64)

जिष्णुरिन्द्रगुणे [illegible]तेर्वैकुण्ठगुणतः परः ।
सेनाऽपराजितेत[illegible]स्मात् सपत्नानां पराजयः ॥ (65)

पञ्चमकण्डिकार्थनिरूपणम्

आकाशब्रह्मणः पूर्णं, अप्रवर्ति इति गुणद्वयं व्याचष्टे—**खण्डश इति** । अविभक्तत्वात् पूर्णम् , अप्रवर्तनात् अचलत्वात्—अप्रवर्ति इत्यर्थः । अप्रवर्तिशब्द-स्यार्थान्तरमाह—**अक्रियत्वादिति** । स्वयं न क्रिया[वत्] क्रियावतामधिकरण-मित्यप्रवर्तीत्यर्थः । (62)

षष्ठकण्डिकार्थनिरूपणम्

'(य)[जि]ष्णुः' इत्यादिफलत्रयं व्याचष्टे—**जिष्णुरिति** । (63–64) गुणत्रयोपासनस्य फलत्रयं विभजते—**जिष्णुरिन्द्रेति** । (65)

---

* 'अप्रवर्त्यक्रियावत्स्युः' इति मु. पु. पाठः ।

पञ्चमपर्याये वायौ प्राणे हृदि चैका देवता । [1]इन्द्रः—परमेश्वरः, [2]वैकुण्ठः—अप्रसह्यः, [3]अपराजिता सेना, (मरुतां गणदेवतात्वात्) इति गुणत्रयम् । [1]जिष्णुः [2]अपराजिष्णुः, [3]अन्यतस्त्यजायी—अन्यतस्त्यानां—सपत्नानां जयशीलः, इति फलत्रयम् । क्रमेण एकैकगुणोपासनस्य एकैकं फलमिति बोध्यम् ।
षष्ठे पर्याये अग्नौ वाचि हृदि चैका देवता । विषासहिः इति गुणः । 'विषासहिर्हि भवति, विषासहिर्हास्य प्रजा भवति ।' इति फलमुक्तम् । फलवचने विषासहिपदस्य परेषां मर्षयिता इत्यर्थः ।

* अभ्याहितमपि जगत्सहते़ऽग्निर्यतस्ततः ।
भस्मीकरणादुक्तो विषासहिरितीश्वरैः ॥ (66)

अप्सु रेतसि बुद्धौ च पुरुषं ब्रह्म चेतनम् ।
उपास्य एतमित्युक्तः काश्यः प्रत्याह पूर्ववत् ॥ (67)

प्रतिबिम्बोदयः कार्यं प्रतिरूपं यतस्ततः ।
प्रतिरूप उपास्योऽप्सु फलमप्यस्य तादृशम् ॥ (68)

अन्वर्थे प्रतिशब्दोऽयं फलस्य पुरुषार्थतः । *
प्रातिलोम्येन तु ज्ञेयो ह्यनर्थः स्यात्तथा सति ॥ (69)

सप्तमकण्डिकार्थनिरूपणम्

विषासहित्वमग्नेर्युक्तम्, इत्याह—**अभ्याहितमिति** । (66)

अष्टमकण्डिकार्थनिरूपणम्

'य एवायमप्सु' इत्यादेरर्थमाह—**अप्स्विति** । (67) जलाभिमानिदेवस्य [1]प्रतिबिम्बोदयकार्यं गुणः । तदुपासकस्य फलमपि तादृक्, इत्याह—**प्रतिबिम्बेति** । (68) प्रतिशब्दादनर्थ [2]प्राप्तिफलप्रतीतेः त्याज्योपासा, इत्यत्राह—**अन्वर्थ इति** । अनुरूप इति यावत् । (69) किं तदनुरूपत्वम्, अत्राह—

---

* **अभ्याहितमिति** यत् हविः स्वस्मिन् विष्यते—क्षिप्यते तत् सोढुं शीलमस्य इति विषासहिपदस्य व्युत्पत्तिः अग्नौ । ईश्वरैः—वेदार्थनिर्धारणसमर्थैः ।
सप्तमे पर्याये अप्सु रेतसि हृदि चैका देवता । प्रतिरूप इति गुणः । प्रतिरूपं हैवैनमुपगच्छति नाप्रतिरूपम् । अथो प्रतिरूपोऽस्माज्जायते ' इति फलमुक्तम् ।

1. **प्रतिबिम्बोदयकार्यं**—प्रतिबिम्बोदयरूपं कार्यम् ।

2. **अनर्थप्राप्तिफलप्रतीतेरिति** प्रतिशब्दस्य प्रतिकूलार्थकत्वादिति भावः ।

* अन्वर्थे इति अनोः-निपातस्यार्थे इत्यर्थः । निपातानामनेकार्थत्वात् उपासनाफलस्य पुरुषार्थत्वात् फलवाक्ये प्रतिरूपपदस्य अनुरूपार्थकत्वमेवेति भावः
अष्टमे पर्याये आदर्शे, प्रसादस्वभावे चान्यत्र खड्गादौ, हार्दे च सत्वशुद्धिस्वभावे, एका देवता । रोचिष्णुः इति गुणः । 'रोचिष्णुर्ह भवति, रोचिष्णुर्हास्य प्रजा भवति ' इति फलमुक्तम् ।

श्रुतिस्मृतिसदाचारान् प्रति यः सततोद्यतः ।
प्रतिश्रुत्यादिरूपत्वात् प्रतिरूपस्ततोऽस्तु सः ॥ (70)

रोचिष्णूपनिषत्कान्तमादर्शाक्षादिबुद्धिषु ।
उपास इत्यभिहिते काश्यः प्रत्याह पूर्ववत् ॥ (71)

यत्रोपास्यबहुत्वं स्यात् फलं तत्र प्रजास्वपि ।
शतह्रदादर्शाद्यर्था बहवस्ते प्रसिद्धितः ॥ (72)

फलं यद्गुणकं यत्र तद्गुणं स्यादुपासनम् ।
फलानुमानतस्तत्र न फलं ह्यनुपासितम् ॥ (73)

श्रुतीति । एतद्गुणोपासकस्य श्रुत्याद्यनुरूपः पुत्रादिः स्यादित्यर्थः । (70)

नवमकण्डिकार्थनिरूपणम्

'[य]एवायम्' इत्यादेरर्थमाह—**रोचिष्ण्विति** । [1]दीप्यमानरहस्यकान्तिसहितमित्यर्थः । (71) 'रोचिष्णुर्ह' इत्यादिना [प्रजागतं] स्वगतश्च फलमत्र श्रूयते । [2]विद्युदात्मवाक्ययोरपि 'तेजस्वी ह[3]' इत्यादिना [4]उभयत्र फलमुक्तम् । स्वामिगाम्येव तदुक्तम्, इत्याशङ्क्याह—**यत्रेति** । स्वामिनोऽन्यत्रापि वाचनिकं फलमविरुद्धमित्यर्थः । (72) उपा (स्येके)[स्यैक्ये]ऽपि फलबहुत्वं युक्तम्, अत्राह—**न फलमिति** । अनुमानं व्यतिरेकमुखेनाह—**न फलमिति** । फलबहुत्वेन भाव्यमित्यर्थः । (73)

---

1. दीप्यमानरहस्यकान्तिसहितमिति रोचिष्णूपनिषत्कान्तम् इति वार्त्तिके उपनिषत्पदं रहस्यार्थकमिति भावः ।

2. विद्युदात्मवाक्ययोरपि—विद्युद्वाक्ये आत्मवाक्येऽपि ।

3. तेजस्वी ह इत्यादिना— 'तेजस्वी ह भवति, तेजस्विनी हास्य प्रजा भवति' इति, 'आत्मन्वी ह भवति आत्मन्विनी हास्य प्रजा भवति' इति च वाक्याभ्याम् ।

4. उभयत्र—आत्मनि प्रजायां च ।

गच्छन्तमनु यः शब्दो बहिर्वच्छ्रूयतेऽध्वनि ।
अध्यात्मं दैहिके शब्दे बुद्धौ चेति विनिर्दिशेत् ॥ (74)

पुंसोऽभिधावतस्तूर्णं देहदेशैः समाहतः ।
प्राणो वृत्तिविशेषेण बहिर्वत्कुरुते ध्वनिम् ॥ (75)

वृत्तिक्षेपादसुत्यमायुषश्च तदाश्रितेः ।
शतायुरेव भवति म्रियते नापमृत्युना ॥ (76)

दिक्षु द्वितीयोऽनपगः सद्वितीयः सदैव सः ।
* दुःसंभाव्या हि पूर्वा दिक् मुक्त्वाशां पश्चिमां जनैः ॥ (77)

साधुभृत्यपरीवारः सर्वदोपासको भवेत् ।
पुत्रादिगणसंतानस्थैर्यमेव सदा भवेत् ॥ (78)

दशमकण्डिकार्थनिरूपणम्

'य एवायं यन्तम्' इत्यादेरर्थमाह—**गच्छन्तमिति** । (74) गच्छतः किं ध्वनिकारणम्, अत्राह—**पुंस इति** । वृत्तिविशेषेण-गतिभेदेनेत्यर्थः । (75) शाब्दपुरुषस्य असुरिति गुणः । तदुपासाफलमाह—**वृत्तीति** । (76)

एकादशकण्डिकार्थनिरूपणम्

'द्वितीयोऽनपगः' (त) इत्यस्यार्थमाह—**दिक्ष्विति** । सद्वितीयत्वं साधयति—**दुःसंभाव्येति** । (77) [1]गुणद्वयोपासाफलमाह—**साध्विति** । (78)

नवमे पर्याये गच्छन्तमनु यः शब्दः उदेति, तस्मिन् बाह्ये देहस्थे चाध्यात्मिके बुद्धौ च एका देवता । असुरिति गुणः । 'सर्वं हैवास्मिंल्लोके आयुरेति नैनं पुरा कालात् प्राणो जहाति ।' इति फलमुक्तम् ।

दशमे पर्याये दिक्षु कर्णयोः हृदि चैका देवता । द्वितीयः, अनपगः, इति गुणद्वयम् । 'द्वितीयवान् ह भवति, नास्माद्गणश्छिद्यते' इति फलमुक्तम् ।

* **दुःसंभाव्येति** प्राच्यादेः पश्चिमाद्यपेक्षत्वादिति भावः ।

1. **गुणद्वयेति** द्वितीयत्वानपगत्वरूपगुणद्वयेत्यर्थः ।

एकादशे पर्याये बाह्ये तमसि, अध्यात्मं चावरणात्मके अज्ञाने, हृदि, चैका देवता । मृत्युः गुणः । 'सर्वं हैवास्मिन् लोके आयुरेति, नैनं पुरा कालान्मृत्युरागच्छति' । इति फलमुक्तम् ।

छायामये तथाऽज्ञाने बुद्धौ चैकैव देवता ।
* मृतिकालात्पुरा नास्य व्याधिरप्युपसर्पति ॥ (79)

विराडात्मनि देहे च बुद्धावित्यादि पूर्ववत् ।
आत्मन्वीति च वश्यात्मा प्रजा चापि शमान्विता ॥ (80)

व्यस्तानां पूर्वमुद्देशः समस्तानां त्विहोदितः ।
* विवक्षावसितिर्गार्ग्ये तथा सत्युपपद्यते ॥ (81)

प्रत्याख्यातोपदेशः सन् संवादेन पुनः पुनः ।
ब्रह्मान्यदन्यदवददात्मन्वीत्यन्तमादरात् ॥ (82)

विशेषाणामनन्तत्वात् समस्तं ब्रह्म सोऽवदत् ।
तस्मिन्नपि निषिद्धेऽथ तूष्णीं गार्ग्यो बभूव ह ॥ (83)

द्वादशकण्डिकार्थनिरूपणम्

'य एवायं छायामयः' इत्यादेरर्थमाह—छायेति । अस्य मृत्युरिति गुणः । फलं दीर्घायुष्यं रोगाद्यभावो विशेषः, इत्याह—मृतिकालादिति । (79)

त्रयोदशकण्डिकार्थनिरूपणम्

'य एवायमात्मनि' इत्यादि व्याचष्टे—विराडात्मनीति । आत्मन्वी गुणो विराट्पुरुषस्येति शेषः । तदुपासकस्य वश्यात्मत्वं फलं, प्रजा च वश्यात्मा स्यात्, इत्याह—आत्मन्वीति । (80) अवान्तरं विशेषमाह—व्यस्तानामिति । अन्त्यपर्याये समस्तव्यस्तस्य प्राणस्योपासनं, पूर्वत्र व्यस्तानामेवेत्यर्थः । (81) विवक्षावसितिं विशदयति—प्रत्याख्यातेति । सर्वविशेषाणामशक्याभिधानत्वात् समस्तं ब्रह्मोक्तम् । तत्र विशेषान्तर्भा(वं)[वात्] । तस्मिन्नपि (विषये)[निषिद्धे]

---

* 'मृत्युकालात् पुरा' इति मु. पु. पाठः ।
द्वादशे पर्याये विराडात्मनि प्रजापतौ, देहे, हृदि चैका देवता । आत्मन्वीति गुणः । आत्मन्वी ह भवति, आत्मन्विनी ह्यस्य प्रजा भवति ।' इति फलमुक्तम् ।

* विवक्षावसितिर्गार्ग्ये—गार्ग्यस्य संबन्धिनी ब्रह्मविवक्षायाः समाप्तिः ।

यत्कृत्स्नं ब्रह्म पूर्वोक्तं तदेवेदमविद्यया ।
एकधाऽनेकधा मूढैः कल्प्यते रज्जुसर्पवत् ॥ (84)

* अवाक्शिरसमालोक्य नृपो गार्ग्यमनुत्तरम् ।
एतावदिति तं प्राह शेषाशङ्कानिवृत्तये ॥ (85)

निगृह्यमाणयोगे च प्लुतिमत्र विनिर्दिशेत् ।
ब्रह्म ब्रवाणीत्यात्थ त्वमेतावद्ब्रह्म तच्च ते ॥ (86)

अज्ञाते जगदज्ञातं ज्ञाते ज्ञातं च यत्र तत् ।
तदेव ब्रह्म पूर्णत्वान्न त्वदुक्तमकृत्स्नतः ॥ (87)

ब्रह्मवदनादुपरतवानित्यर्थः । (82–83) उक्तादन्यस्य ब्रह्मत्वे भेदात् परिच्छिन्नत्वम्, अत्राह—यत्कृत्स्नमिति । (84)

चतुर्दशकण्डिकार्थनिरूपणम्

'[1]एतावन्नू३' इत्यस्य तात्पर्यमाह—अवाक्शिरसमिति । (85) [2]प्रतिज्ञाहान्या निगृह्यमाणगार्ग्येण प्रश्नसंबन्धेऽ[3]स्मिन् वाक्ये प्लुतिः, इत्याह—निगृह्यमाणेति । 'वाक्यस्य टेः प्लुत उदात्तः' (पा. सू. 8-2-82) इत्येतस्मिन्नधिकारे, 'विभाषा पृष्टप्रतिवचने हेः' (पा. सू. 8-2-93) इत्यस्मात् विभाषानुवृत्तौ, 'निगृह्य(नि)[नु] योगे च' (पा. सू. 8-2-94) इति प्लुतविधिः। (86) न प्रतिज्ञाहानिः, आदित्यादेर्ब्रह्मण उक्तेः, [4]अन्यस्य ब्रह्मणोऽभावात्, अत्राह—अज्ञात इति । (87) कृत्स्नस्य ब्रह्मत्वे हेतुमाह—अन्यावृत्तेति ।

---

1. 'स होवाचाजातशत्रुः, एतावन्नू ३ इति । एतावद्धीति । नैतावता विदितं भवतीति । स होवाच गार्ग्यः उप त्वा यानीति' । इति श्रुतिरनुसन्धेया ।

* 'अवाक्शिरस्कम्' इति मु. पु. पाठः। शेषाशङ्कानिवृत्तये—अवशिष्टस्य मुख्यब्रह्मणः गार्ग्येण ज्ञातत्वाशङ्कानिवृत्तये।

2. प्रतिज्ञाहान्येत्यादि ब्रह्म ते ब्रवाणि इति प्रतिज्ञातार्थानिर्वहणात् प्रतिज्ञाहानिर्नाम निग्रहस्थानं गार्ग्यस्य बोध्यम् ।

3. अस्मिन् वाक्ये—एतावन्नू ३ इति वाक्ये ।

4. अन्यस्येति आदित्यादेरन्यस्येत्यर्थः ।

अव्यावृत्तानुगतत्वतःसिद्धात्मवस्तुनि ।
* मुख्यार्थो ब्रह्मशब्दः स्यान्न त्वदुक्तेऽतथात्वतः ॥ (88)

यस्मादेवमतो गार्ग्यमेतावद्धीति वादिनम् ।
नृपो नैतावतेत्याह ब्रह्मत्वासंभवं स्फुटम् ॥ (89)

अज्ञातब्रह्मतत्त्वस्य दुःसंभाव्यमिदं वचः ।
नैतावतेति ब्रह्मातः काश्यो वेत्तीति लिङ्ग्यते ॥ (90)

गार्ग्योऽनुमाय राज्ञोऽथ प्रावीण्यं ब्रह्मवेदने ।
उपायानीत्युवाचेमं परब्रह्मावबुद्धये ॥ (91)

* परब्रह्म विजिज्ञासुरुपेतोऽस्म्यहमादरात् ।
अनुशाधि यथातत्त्वमित्येवं वादिनं नृपः ॥ (92)

क्षत्रियं ब्राह्मणो जात्या यदुपेयादनापदि ।
प्रतिलोममिदं वृत्तं धर्मशास्त्रैर्निषिद्धतः ॥ (93)

---

(88) 'नैतावता' इत्यस्य तात्पर्यमाह—यस्मादिति । (89) काश्यस्य ब्रह्मवित्त्वमविदित्वा [1]कथमुक्तम्, 'उप त्वा यानि' इति, तत्राह—अज्ञातेति । (90) तद्वाक्यं व्याचष्टे— गार्ग्य इति । (91)

पञ्चदशकण्डिकार्थनिरूपणम्

'[2]प्रतिलोमम्' इत्यादेरर्थमाह—परेति । धर्मशास्त्रैरिति ।

'अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥ (मनु. 2-241)
नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ।
ब्राह्मणे वाननूचाने कांक्षन् गतिमनुत्तमाम् ॥' (मनु. 2-242)

---

* अतथात्वत इति आदित्यादेः व्यावृत्तरूपत्वादित्यर्थः ।

1. कथमुक्तमिति गार्ग्येणेत्यादिः ।

2. प्रतिलोममित्यादेरिति 'स होवाचाजातशत्रुः, प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयात् ब्रह्म मे वक्ष्यतीति ।' इति श्रुतिः ।

* 'परं ब्रह्म' इति मु. पु. पाठः ।

योगक्षेमफलार्थाय गमनं न निषिध्यते ।
ब्रह्म मे वक्ष्यतीत्यर्थं निषिद्धं नृपसर्पणम् ॥ (94)

अतोऽनुपेतमेव त्वां करविन्यस्तबिल्ववत् ।
ब्रह्म विज्ञापयिष्यामि यज्ज्ञाने सर्वविद्भवेत् ॥ (95)

इत्युक्त्वा तमथो पाणौ गृहीत्वोत्थितवान्नृपः ।
आजग्मतुश्च तौ सुप्तं नरं कार्यविवक्षया ॥ (96)

गार्ग्योक्तब्रह्माभोक्तृत्वं तथाऽमीषामनात्मताम् ।
बालाकेर्बोधयिष्यामीत्यतः सुप्तमगान्नृपः ॥ (97)

देवतानामभिः काश्यो गत्वा सुप्तं यथोदितैः ।
आमन्त्रयां तदा चक्रे बृहन्नित्येवमादिभिः ॥ (98)

*** संबोध्यमानोऽपि तथा सुप्तो नैवोद्बुध्यत ।**
यतोऽतो गार्ग्याभिमतो न भोक्तेत्यवगम्यते ॥ (99)

इत्यादिभिरित्यर्थः । (92–93) 'योगक्षेमार्थमीश्वरमधिगच्छेत्' (गौ. ध. 1 - 9 - 63) इत्यादिना ब्राह्मणस्यापि क्षत्रियगमनं न्यायप्राप्तम्, अत्राह— **योगेति** । अलब्धलाभो योगः । लब्धस्य पालनं क्षेमः । (94) '[1]व्येव(त्या)त्वा' इत्यादेरर्थमाह—**अत इति** । (95) ततः किमकरोत्, इत्यत्राह— **इत्युक्त्वेति** । (96) 'कार्यविवक्षया' इत्येतत् स्पष्टयति—**गार्ग्येति** । अमीषां—आदित्यादीनामित्यर्थः । (97) गार्ग्याभिमतं प्राणस्य भोक्तृत्वं निर(स्य) [सितुं] [2]'तमेतैः' इत्यादेरर्थमाह—**देवतेति** । (98) 'स नोत्तस्थौ' इत्येतत् व्याकरोति—**संबोध्यमानोऽपीति** । (99)

---

1. 'व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ । तौ ह पुरुषं सुप्तमाजग्मतुः ।' इति श्रुतिः । विज्ञपयिष्यामीति योजना ।

2. **तमेतैरित्यादेरिति** "तमेतैर्नामभिरामन्त्रयाञ्चक्रे, बृहन् पाण्डरवासः सोम राजन्निति, स नोत्तस्थौ । तं पाणिनाऽपेषं बोधयाञ्चकार । स होत्तस्थौ ।" इति श्रुतिवाक्यम् ।

* **संबोध्यमानोऽपीति** बोधनार्थं प्रयुक्तनामश्रवणाभावात् आपेषणाच्चोत्थानात् प्राणस्य व्याप्रियमाणस्याभोक्तृत्वं सिद्ध्यतीति भावः ।

जाग्रत्कालं परित्यज्य सुप्तं किमिति जग्मतुः ।
* स्पष्टत्वात् सर्वभावानां जाग्रत्काले हि शक्यते ॥ (100)

प्राणानां देवतानां च पुरुषस्य च संकरात् ।
बोधे न शक्यते कर्तुं विवेको भोक्तृभोज्ययोः ॥ (101)

भोक्तृत्वमेव पुंसोऽस्ति भोज्यत्वं न मनागपि ।
काश्यभिप्रायतोऽन्यस्य भोज्यतैव न भोक्तृता ॥ (102)

संकीर्णत्वादशक्यः स्यात् प्रबोधे भोक्तृभोज्ययोः ।
कर्तुं विवेकोऽतो यातः सुप्तं पुरुषमादरात् ॥ (103)

तस्माद्यद्यपि सांनिध्यं प्राणादीनां प्रजागरे ।
संकीर्णत्वान्मिथस्तेषां दुःशकं तद्विवेचनम् ॥ (104)

सुप्तपुरुषगमनस्य सार्थकता

संनिहितं त्यक्त्वा व्यवहि(तं)[त]सुप्तगमनमयुक्तम्, इति शङ्कते—**जाग्रदिति ।** [1]गार्ग्येष्टात्मनो नि(ष्क्रिय)[ष्कृष्य] जाग्रति [2]काश्येष्टस्य दर्शयितुमशक्यत्वात्, इत्यत्राह—**स्पष्टत्वादिति** । सर्वपदार्थानां जाग्रति स्पष्टत्वात् काश्याभिमतो दर्शयितुं शक्यते इत्यर्थः । (100) जागरे पदार्थानां क्षीरनीरवत् संसृष्टत्वात् [3]विवेकासिद्धिः, इति परिहरति—**प्राणानामिति** । (101) कोऽसौ विवेक इति, तमाह—**भोक्तृत्वमिति** । (102) भोक्तृत्वादात्मनो विकारित्वमिति चेत्, न, भोक्तृत्वस्य [4]साक्षितामात्रत्वात्, इत्याह—**संकीर्णत्वादिति** । (103) यत्तु '**स्पष्टत्वात्**' (वा.100) इति, तत्राह—**तस्मादिति** । (104) स्वापेऽपि

---

1. **गार्ग्येष्टात्मनः** इति पञ्चम्यन्तम् ।
2. **काश्येष्टस्येति** आत्मन इति शेषः ।

* 'स्पष्टता सर्वभावानां जाग्रत्काले हि लक्ष्यते' इति मु. पु. पाठः ।

3. **विवेकासिद्धिः**—भेदानिर्णयः ।
4. **साक्षितामात्रत्वादिति** भोज्यत्वं साक्ष्यत्वमिति बोध्यम् ।

आत्मनः प्रोषितत्वात्तु भोगोऽस्मै न प्रयुज्यते ।
उदासतेऽखिलाः सुप्ते देवताः करणैः सह ॥ (105)

जाग्रद्बोधप्रयुक्तस्य कर्मणः प्रक्षयात्तदा ।*
शेरते करणान्यस्य सह भोक्त्रात्मनाऽऽत्मनि ॥ (106)

प्राण एकस्तु जागर्ति भोक्ता यो गार्ग्यसंमतः ।
प्राणेन रक्षन्निति च तथोदर्के प्रवक्ष्यते ॥ (107)

प्राणाग्नय इति स्पष्टं तथाऽनस्तमितश्रुतेः ।
अश्रान्तः प्राण एवातो जागर्त्यत्र दिवानिशम् ॥ (108)

यथा जाग्रदवस्थायां भोक्ता प्राणः पुराऽभवत् ।
स्वप्नेऽप्येष तथैवास्ते बोद्धा चेद् बुद्ध्यतामयम् ॥ (109)

संकीर्णत्वं समम्, इत्यत्राह—आत्मन इति । भो(क्ता)[क्त्रा]करणैश्च सह अधिष्ठातृदेवतानामुपसंहारात् तत्र शक्यवि(दे)[वे]कत्वमित्यर्थः । (105) उपसंहारहेतुमाह—जाग्रदिति । (106) गार्ग्याभिमतात्मनोऽप्युपसंहारात् तस्यापि [1]न भोगः, अत्राह—प्राण इति । तत्र मानमाह—प्राणेति । 'प्राणेन रक्षन्नवरं कुलायम्' (बृ. 6-3-12) इति प्राणस्यानुपसंहारः स्वापे वक्ष्यते इत्यर्थः । [107] वाक्यान्तरमाह—प्राणेति । 'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' (प्र. 4-3) इति श्रुतेः, तथा 'सैषाऽनस्तमिता देवता यद्वायुः' (बृ. 3-5-22) इति श्रुतेश्चेत्यर्थः । उपसंहरति—अश्रान्त इति । (108)

प्राणस्यानात्मत्वनिरूपणम्

[2]अ(श्रुवं)[स्तु], ते[न] किं स्यात्, अत्राह—यथेति । (109) प्राणस्य स्वापे असं(बं)[बो]धोऽन्य[3]नामभिरामन्त्रणात्, न त्वचेतनत्वात्, इत्यत्राह—

---

* तदा—स्वापे । आत्मनि—अज्ञाते परात्मनि ।

1. न भोग इति न भोगप्रसङ्ग इत्यर्थः ।

2. अस्तु—प्राणस्य जागरणमस्तु ।

3. अन्यनामभिः—अन्यस्य प्राणान्यस्य चन्द्रस्य, नामभिः बृहन् इत्यादिभिः ।

प्राणस्येन्दोस्तथा चापां त्र्यन्नात्माविष्कृतौ यतः ।
ऐक्यमुक्तमतः प्राणो बोध्यते चन्द्रनामभिः ॥ (110)

बृहन्नित्येवमादीनि सन्तु चेहोपलक्षणम् ।
अनुक्तदेवतानाम्नां सामर्थ्यात्तद्ग्रहोऽथवा ॥ (111)

यदि भोक्ता भवेत्प्राणो जाग्रद्वच्छब्दमागतम् ।
अश्रोष्यत् , स न चेद्भोक्ता नाश्रोष्यदुपलादिवत् ॥ (112)

ननु सुप्तेऽपि पुंस्यस्मिन् बोधितः सन्स्वनामभिः ।
भोक्तैव भोत्स्यते शब्दं न त्वभोक्ता परो जडः ॥ (113)

नैवातोऽपि विवेकः स्यादुत्थितः कोऽनयोर्द्वयोः ॥ (114)

नैवं, गार्गीयपक्षस्य विशेषावधृतेः सदा ।
अजातशत्र्वभिप्रेतब्रह्मणः प्राक् प्रमाणतः ॥ (115)

योऽनस्तमित एकोऽत्र वागाद्यस्तमयेऽमृतः ।
* इन्द्रोऽसपत्नोऽब्देहश्च नामरूपसमावृतः ॥ (116)

प्राणस्येति । 'अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रः' (बृ. 3·5·13) इत्यादिनेत्यर्थः । (110) तर्हि [1]सर्वात्मत्वात् प्राणस्य आदित्यादिनामभिरपि संबोधनप्रसक्तिः, अत्राह—**बृहन्निति** । हेत्वन्तरमाह—**सामर्थ्यादिति** । सूत्रप्राणयोरैक्यसामर्थ्यात् अनुक्तादित्यादिनामभिरपि संबोधितवानित्यर्थः । (111) एवं चन्द्रनामभिः संबोधने निमित्तमुक्त्वा, तदग्रहणादभोक्तृत्वं प्राणस्य, इत्याह—**यदीति** । स चेन्नाश्रोष्यत् न भोक्ता स्यादित्यन्वयः । (112) संबुद्धिनामाग्रहणात् प्राणो नात्मेत्युक्ते, शङ्कते—**नन्विति** । आत्मा शब्दोपलब्धा नानात्मा इत्येतावता विवेका(त्सि)[सि]द्धिरित्यर्थः । हेतुमाह—**उत्थित इति** । प्राणस्यासुप्तत्वे निमित्तान्तरादश्रवणयोगात् शब्दमुपलभ्य केनोत्थितमिति उत्थानकाले सन्देहादित्यर्थः । (113–114) विशेषदर्शनात् न सन्देहः, इत्याह—**नैवमिति** ।

---

1. **सर्वात्मत्वात् प्राणस्येति** सूत्रात्मकस्येति शेषः ।

* **अब्देहः**—प्राणस्यापः शरीरम् इत्युक्तत्वात् । **नामरूपसमावृतः**—नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः इत्युक्तत्वात् ।

अध्यात्माद्यखिलं विश्वं संव्याप्य समवस्थितः ।
ओतं प्रोतं जगद्यस्मिन् अरनाभिनिदर्शनात् ॥ (117)

कुर्वाणस्तुमुलं शब्दं स्वव्यापारमशेषतः ।
कुर्वाण एव स्वप्नेऽपि प्राण आस्ते प्रबोधवत् ॥ (118)

न च भोक्त्रन्तरं प्राणात् गार्ग्येणेहाभ्युपेयते ।
तत्काले भिन्नकाले वा प्राणादन्यस्य भोज्यतः ॥ (119)

तस्मादवश्यं बोद्धव्यं बोध्यं साक्षादुपस्थितम् ।
प्राणेन बोद्धृरूपत्वात् दाह्यं दग्धा यथा दहेत् ॥ (120)

न चासौ बोध्यमानोऽपि प्रत्यबुध्यत नाम तत् ।
प्राणोऽभोक्ता ततः सिद्धः स्वनामाप्रतिबोधनात् ॥ (121)

स्वाख्याविशेषसंबन्धाग्रहणाच्चेन्न बुद्धवान् ।
अग्रहासंभवान्नैवं सर्वज्ञा देवता यतः ॥ (122)

---

(115) विशेषदर्शनं विशदयति—योऽनस्तमित इति । (116) [1](वि)[त्रि]विधज(म)[ग]द्व्यापित्वं [2]प्रागुक्तं विशेषान्तरमाह—अध्यात्मेति । (117) शब्दकर्तृत्वं समस्तस्वव्यापारकर्तृत्वञ्च स्वापे विशेषान्तरमाह—कुर्वाण इति । (118) प्राणस्य भृत्यस्थानीयत्वात् तत्स्वामिनि उपरतव्यापारे न शब्दश्रुति-प्रसक्तिः, अत्राह—न चेति । (119) प्राणस्यैव भोक्तृत्वं यस्मात्, तस्मात् इदमत्रानिष्टं पर्यवसितम्, इत्याह—तस्मादिति । (120) इष्टप्रसञ्जनमाशङ्क्याह —न चेति । (121) संबुद्धिनामाग्रहणं [3]संबन्धाग्रहात्, इति शङ्कते—

---

1. त्रिविधजगदिति अध्यात्माधिभूताधिदैवात्मकजगदित्यर्थः ।
2. प्रागुक्तं—तृतीये ज्ञानाधिकारे उक्तम् ।
3. संबन्धाग्रहादिति बृहन्नित्यादिशब्दानां प्राणेनार्थेन यः संबन्धः वाच्यवाचक-भावरूपः, तस्याज्ञानादित्यर्थः ।

त्वत्पक्षेऽप्यग्रहो दोषस्तुल्यश्चेदिति चोद्यते ।
नैवं कृत्स्नाभिमानित्वादेकदेशानहंकृतेः ॥ (123)

अङ्गुल्याद्यभिधानोक्तौ न हि तद्वान् प्रबुध्यते ।
कृत्स्नदेहाभिमान्येवं नैकदेहाभिधानभुक् ॥ (124)

प्राणस्य तु समाप्तत्वात् समस्तव्यस्तवस्तुषु ।
नात्मवत्स्यादसंबोधस्तस्य सर्वाभिमानतः ॥ (125)

बोधाबोधौ चितेर्न स्तः कूटस्थज्ञप्तिमात्रतः ।
परायत्तप्रबोधो ना ह्यप्पात्रोत्थाद्रवेरिव ॥ (126)

स्वाख्येति । असंभवेन प्रत्याह—**अग्रहेति** । (122) नामाश्रुतेरनात्मत्वं (त)[त्व][1]दभिप्रतात्मनाऽपि समम्, इत्याह—**त्वत्पक्षेऽपीति** । निराचष्टे—**नैवमिति** । (123) परिहारं सदृष्टान्तं स्पष्टयति—**अङ्गुलीति** । यथा अङ्गुलिः कुत्र इत्युक्ते, न देवदत्तस्य सकलदेहाभिमानिन उत्थानम्, एवं [2]का(ष्ठा)[श्या]त्मनोऽङ्गुलिस्थानीयप्राण(म)[मा]त्राभिमानाभावात् तन्त्रा(म)[मा]ग्रहणं, न त्वनात्मत्वादित्यर्थः । (124) [3]प्राणस्यापि स्वैकदेशचन्द्रनाम्नाऽऽमन्त्रणादग्रहो, न त्वनात्मत्वात्, अत्राह—**प्राणस्येति** । गोत्ववत् समस्तवस्तुषु [4]समाप्तत्वात् चन्द्रे [5]अहमभिमानोपपत्तिरित्यर्थः । (125) प्राणव(च्छि)[च्चि]दात्म[नो ऽ]पि पूर्णस्य सर्वाभिमानसिद्धेः बोधाबोधौ तुल्यौ अत्राह—**बोधेति** । चिन्मात्रस्य कथं चक्षुराद्यधीनं ज्ञत्वम्, अत्राह—**नेति** । [6]अमुख्यात्मेत्यर्थः । स एव मुख्यः

---

1. **त्वदभिप्रेतात्मनोऽपि**—काश्याभिमतात्मनोऽपि ।
2. **काश्यात्मनः**—काश्यसंमतस्यात्मनः । सर्वकार्यकरणाभिमानित्वादिति शेषः ।
3. **प्राणस्यापीति** कृत्स्नाभिमानिन इति शेषः ।
4. **समाप्तत्वादिति** पर्याप्तत्वादित्यर्थः। प्रत्येकमित्यादिः। गोत्वस्य सकलगोव्यक्तिवृत्तेः प्रत्येकं गोव्यक्तिपर्याप्तत्वमस्ति । अत एव प्रत्येकं गौरिति प्रतीतिरुपपद्यते इति भावः ।
5. **अहमभिमानोपपत्तिरिति** तथाच प्राणस्य भोक्तृत्वे नामाग्रहणं नोपपद्यते इति भावः ।
6. **अमुख्यात्मेति** पुरुषवाचिनः 'ना' इति शब्दस्य चिदाभासः अमुख्यात्मा अर्थः इति भावः ।

स्वसंज्ञयाप्यसंबोधो यथा दृष्टस्तदात्मनः ।
भोक्तृत्वे सत्यपि तथा प्राणेऽप्यप्रतिबोधनम् ॥ (127)

सुप्तासुप्तत्वसंभेदविशेषन्यायसंभवात् ।
नैव सुप्तग्रहो युक्तो न त्वसुप्तस्य युज्यते ॥ (128)

* श्रोत्रादेर्गुणभूतत्वात् प्रधानं प्रति सर्वदा ।
तस्मिञ्जाग्रति जागर्ति सुप्ते स्वपिति तद्वशात् ॥ (129)

नेन्द्रियाणां भवेत्स्वापो यदि प्राणप्रधानता ।
नामात्याः शेरते यस्माद्राज्ञि स्वामिनि जाग्रति ॥ (130)

अप्रसिद्धार्थसंज्ञाभिरुक्तेश्चेदप्रबोधनम् ।
* देवतात्मनिषेधार्थपरत्वात्तद्ग्रहोऽर्थवान् ॥ (131)

प्राणस्याभोक्तृतासिद्धिः स्वनामाग्रहणादपि ।
देवताप्रतिषेधार्थं बोध्यते चन्द्रनामभिः ॥ (132)

नान्यः, अत्राह — अ(प्य)[प्या]त्रेति । प्रतिबिम्बात् बिम्बादित्यवत् चैतन्याभासात् कूटस्थबोधोऽन्य इत्यर्थः । (126) प्रासङ्गिकं परिसमाप्य प्रकृतचोद्यमुद्भावयति— **स्वसंज्ञयेति** । (127) उक्तं स्मारयन् परिहरति—**सुप्तेति** । (128) इन्द्रियव्यापारोपरमाद[1]श्रवणं, न त्वनात्मत्वात्, इत्यत्राह—**श्रोत्रादेरिति** । (129) श्रोत्रादेरनुपसंहारं दृष्टान्तेनाह—**नेन्द्रियाणामिति** । (130) प्राणनामत्वेनाप्रसिद्धनाम्ना बोधितत्वादनुत्थानं, नानात्मत्वात्, इति शङ्कते—**अप्रसिद्धेति** । देवतानाम्ना संबुद्धौ फलमाह—**देवतेति** । (131) 'देवता[ना]मभिः' इति सिद्धान्तभागं विभजते—**प्राणस्येति** । प्राणः इत्यादिस्वनाम्ना संबोधितस्यानुत्थानात् प्राणस्यानात्मत्वे सिद्धे देवतानामभिः संबोधनं चन्द्रदेवता अस्मिन् देहे कर्त्री भोक्त्री इति शङ्कानिरासार्थमित्यर्थः । (132)

---

1. अश्रवणमिति प्राणस्येति शेषः ।

* श्रोत्रादेरिति काश्याभिमतात्मनः भोक्तृत्वे तु तस्य प्राधान्यात् तस्मिन् सुप्ते करणानां व्यापारोपरमादग्रह उपपद्यते इति भावः ।

* तद्ग्रहोऽर्थवानिति देवतानामग्रहणं सार्थकमित्यर्थः ।

स्मृतिज्ञानैषणादीनां संधानानुपपत्तितः ।
करणानामभोक्तृत्वं देहांशानामिवेष्यते ॥ (133)

* अचैतन्यात्तथोक्तस्य कुतो भोक्तृत्वसंभवः ।
चिदन्यस्य च भोज्यत्वात् नान्यस्यातोऽस्ति भोक्तृता ॥ (134)

दण्डापूपिकनीत्यैव करणानामभोक्तृता ।
न च प्राणातिरेकेण देवताऽन्योपपद्यते ॥ (135)

ननु तद्व्यतिरेकेण प्राणादित्यादिरीरितः ।
देवताविषयो भेदः स कथं विनिवार्यते ॥ (136)

नैवं, तस्य समस्तस्य प्राण एकत्वहेतुतः ।
* अरनाभ्यादिदृष्टान्तात् वायुप्राधान्यतस्तथा ॥ (137)

इन्द्रियाणामनात्मत्वम्

प्राणस्यानात्मत्वमुक्त्वा इन्द्रियाणां तदाह—**स्मृतीति** । प्रत्येकमिन्द्रियाणां नात्मत्वं [1]स्मृत्याद्यनुपपत्तेरित्यर्थः । (133) तत्समूहस्या(ना)त्मत्वात् योऽहं रूपमद्राक्षं सोऽहं शृणोमि इति संधानोपपत्तिरिति चेत्, न, ज[ड]त्वात्, इत्याह —**अचैतन्यादिति** । दृश्यत्वात् जडत्वमित्याह—**चिदन्यस्येति** । (134) करणानामनात्मत्वे हेत्वन्तरमाह—**दण्डेति** । (ये)[य]स्मिन् दण्डे अपूपा लग्नाः स दण्ड एव पिपीलिकाभक्षितः, किं पुनः अपूपा भक्ष्यन्ते इति वाच्यम् । एवं प्राणस्यानात्मत्वे प्राणग्रस्तकरणानामनात्मत्वसिद्धिरित्यर्थः । प्राण, करण, चन्द्रदेवतानामनात्मत्वेऽपि देवतान्तरस्यात्मत्वम्, अत्राह—**न चेति** । (135) पूर्वापरविरोधं शङ्कते—**नन्विति** । (136) न, [2]तस्य प्राणमात्रत्वात्, इत्याह—**नैवमिति** । (137)

---

1. **स्मृत्याद्यनुपपत्तेरिति** अन्यदृष्टस्यान्येन प्रतिसन्धानायोगादिति भावः ।

* '**अचैतन्यादिति** यथा समुदायः समुदायिभ्यो भेदाभेदाभ्यामयुक्तः, तथा चैतन्याभिन्नत्वेनोक्तस्याचेतनस्य करणवर्गस्य न भोक्तृता जडत्वात् घटवदित्यर्थः ।' इति **शास्त्रप्रकाशिका** ।

2. **तस्य प्राणमात्रत्वात्**—देवताप्रभेदस्य प्राणस्वरूपत्वात् ।

* **वायुप्राधान्यत इति** संवर्गविद्यायां अग्न्याद्यपेक्षया वायुप्राधान्यप्रतिपादनात्, वाय्वात्मकप्राणातिरेकेण नास्ति देवतेति भावः ।

संघात एव भोक्तास्तु तस्य प्रत्यक्षसंगतेः ।
* न तु तद्व्यतिरिक्तस्य भोक्तृता मित्यसंभवात् ॥ (138)

नाचेतनस्य भोक्तृत्वं कथं चिद्‌वकल्पते ।
चिद्‌न्यस्य च भोग्यत्वात् कम्बलौदनतोयवत् ॥ (139)

न चापि चिद्विशिष्टत्वं प्रत्यक्षेणोपलभ्यते ।
चित्संबन्धोपलब्ध्यर्थं तज्ज्ञाता कः प्रकल्प्यते ॥ (140)

नेह चिद्‌व्यतिरेकेण स्वार्थं किञ्चिद्‌पीष्यते ।
* नापि स्वार्थातिरेकेण प्रमाणफलभाग्भवेत् ॥ (141)

स्थूलदेहस्यानात्मत्वम्

प्राणादेरात्मत्वं निरस्य स्थूलदेहस्य तन्निरसितुं पूर्वपक्षयति–**संघात इति** । [1]भूतचतुष्टयसमाहारदेहो भोक्ता, मनुष्योऽहं पश्यामीति प्रत्यक्षेण भोक्तृत्वप्रतीतेरित्यर्थः । (138) दूषयति—**नेति** । अचेतनत्वमसिद्धम्, इत्यत आह—**(चि)[चि]द्‌न्यस्येति** । दृश्यत्वादचेतनत्वं, अचेतन(त्वं)[स्य] भोग्यत्वमित्यर्थः । (139) चिद्विशिष्टः कायो भोक्तेति [2]तदभ्युगमः, तत्र मानं च [3]प्रत्यक्षमेवेष्टम् । तन्निराचष्टे—**न चेति** । चितोऽप्रत्यक्षत्वादित्यर्थः । चिद्विशिष्टस्य प्रत्यक्षत्वे स एव [4]देहो न, [5]ज्ञानकर्तृकर्मविरोधात् । न देहातिरिक्तो ज्ञाता [6]तेनेष्टः, इत्याह— **चित्संबन्धेति** । (140) अस्वप्रकाशत्वाच्च देहादेरभोक्तृत्वम्, इत्याह—**नेहेति** । (141) चिद्विशिष्टग्रहे विशेषणचितोऽपि ग्राह्यत्वात्,

---

* मित्यसंभवात्—प्रमाणासंभवात् ।

1. भूतचतुष्टयसमाहारदेहः—तादृशसमाहारात्मकः देहः ।
2. तदभ्युपगमः—देहात्मवादिनोऽभ्युपगमः ।
3. प्रत्यक्षमेवेष्टमिति देहात्मवादिन इति शेषः । तेन प्रत्यक्षातिरिक्तप्रमाणानङ्गीकारादिति बोध्यम् ।
4. देहो नेति ज्ञातेति शेषः ।
5. ज्ञानकर्तृकर्मविरोधात्—ज्ञाननिरूपितकर्मत्वकर्तृत्वयोः एकत्रावृत्तेः ।
6. तेनेष्टः—देहात्मवादिनेष्टः ।

* प्रमाणफलभाक्–प्रमाकरणं प्रमाणं, तस्य फलं प्रमा, तदाश्रयः प्रमातेति यावत् ।

न ह्यचित्कं प्रमेयं सत् चिन्मितिकिञ्चिदपीक्ष्यते ।
न चानुभूतिः प्रात्यक्ष्यमन्यतोऽपेक्षते जडात् ॥ (142)

देहात्प्रत्यक्षनिष्पत्तौ न च प्रत्यक्षमिष्यते ।
लिङ्गस्य चाप्रमाणत्वात् कुतः प्रत्यक्षमानिता ॥ (143)

* यथाऽर्थान्तरसंबद्धे प्रत्यक्षे देहनिष्ठिते ।
अनुसन्धानसंसिद्धौ न किञ्चिन्मानमिष्यते ॥ (144)

---

[1]चितेर्न वि)[चि]दन्तरं ग्राहकं, [2]चिद्भेदासिद्धेः, नाप्यचित्, इत्याह—**न हीति** [3]चितं मिनोति चिन्मित् । [4]घटवदित्यर्थः । [5]चिद्ग्राहकं प्रमाणमपि अजडं चे न मानमेयविभागः । जडं चेत्, अत्राह—**न चेति**। जडस्य घटवदजडसाधक मयुक्तमित्यर्थः । [142] चैतन्यस्य कार्यत्वे प्रत्यक्षमनुमानं[वा]मानम् । नाद्य इत्याह—**देहादिति** । तस्य रूपादिमदर्थविषयत्वादित्यर्थः । द्वितीयं [6]सिद्धान्त-विरोधेन प्रत्याह—**लिङ्गस्येति** । [143] प्रत्यक्षैकप्रमाणवादिनः सोऽहमित्यादि-प्रत्यभिज्ञा न सिद्ध्यति । तद्धेतुसंस्कारस्याप्रत्यक्षत्वात् कार्यलिङ्गानुमानस्यानिष्टेः, इत्याह—**यथेति** । अर्थान्तरसबद्धे—[7]शब्दादिविषये देहाश्रिते प्रत्यक्षे यथा न

---

1. **चितेर्न चिदन्तरं ग्राहकमिति** चितो ज्ञातृ न चिदन्तरमित्यर्थः ।
2. **चिद्भेदासिद्धेरिति** चितः अवान्तरभेदासिद्धेः—चितः एकत्वादिति यावत् ।
3. **चितं मिनोति** इत्यनन्तरं इतीति पूरणीयम् । चिन्मित् इत्यस्य चितो ज्ञातृ इत्यर्थः ।
4. **घटवदित्यर्थ इति** अचित्कं-जडं घटवत् मेयं, न चितो ज्ञातृ इति पर्यवसितार्थः ।
5. **चिद्ग्राहकं प्रमाणमपि**—चिद्ग्रहकरणं प्रमाणमपि । **न ह्यचित्कम्** इति वार्त्तिके, पूर्वार्धेन जडस्य चितो ज्ञातृत्वनिरासः । उत्तरार्धेन, चिद्ग्रहकरणत्वस्य जडे निरासः इति विभागोऽवसेयः ।
6. **सिद्धान्तविरोधेन**—देहात्मवादिसिद्धान्तविरोधेन ।
7. **शब्दादिविषये**—शब्दादिविषयके ।

* 'तथार्थान्तरसंबन्धे' इति मु. पु. पाठः ।
"किञ्च, ते, मयेदं विदितमित्यनुसन्धानासिद्धिः, साधकाभावात्, इत्याह—**तथेति** । यथा देहस्य चिद्वैशिष्ट्ये प्रत्यक्षस्य तत्कर्तृकत्वे तस्यैव मानत्वे च मानाभावः । तथा अर्थान्तरेण शब्दादिना विषयविषयिभावसंबन्धवति प्रत्यक्षे देहाश्रिते सति, मयैवं

वागभिव्याहृतिश्चेयं लिङ्गाप्रामाण्यवादिनः ।
* अप्रत्यक्षात्परज्ञप्तिसंगतेः स्यादनर्थिका ॥ (145)

स्वात्मदृष्टयनुरोधेऽपि मौढ्यमेव प्रसज्यते ।
* व्युत्पत्तौ साधुलोकस्य न कश्चिदपि दित्सति ॥ (146)

अधर्मादिभयाभावाद्धन्युरेनमशङ्किताः ।
आदद्युश्च बलाद्वित्तमेतद्व्युत्पत्तितः फलम् ॥ (147)

आपेषणे विशेषस्य दृष्टत्वाद्देहसंहतिः ।
न भोक्त्री सुखदुःखादिफलानां स्यात्कदा चन ॥ (148)

यदि संघातमात्रस्य भोक्तृत्वमिह कल्प्यते ।
संघातस्याविशिष्टत्वात् नातिशीतिर्भवेत्सदा ॥ (149)

मानमस्ति, तथा अनुसन्धानसिद्धावपि न मानमित्यर्थः । [144] दृश्यत्वादिना देहस्यानात्मत्वार्थमनुमानप्रामाण्यं साधयति—**वागिति** । वागभिव्याहृतिरनर्थिका परज्ञप्तिसंगतेरप्रत्यक्षादित्यन्वयः । मदुच्चरिताच्छब्दात् परस्य प्रत्ययः स्यादित्येतन्न प्रत्यक्षं, अनिन्द्रियसंनिकर्षात् । नापि स्वदृष्टान्तेन परस्य शब्दादर्थज्ञानमनुमेयं, लिङ्गमात्वानिष्टेरित्यर्थः । [145] चार्वाकस्य शास्त्रप्रणयनमप्ययुक्तम्, अनर्थहेतुत्वात्, इत्याह—**स्वात्मेति** । स्वर्गापवर्गौ(नि)[न]स्तः, देह एवात्मेति स्वमतानुसारेऽपि व्युत्पत्तौ—शास्त्रार्थबुद्धौ मौढ्यं स्यादित्यर्थः । [146] हेतुमाह—**अधर्मेति** । एनं—साधुलोकमिति यावत् । [147] देहस्यानात्मत्वे हेत्वन्तरमाह—**आपेषण इति** । [148] व्यतिरेकमुखेनैतत् स्पष्टयति—**यदीति** । देहातिरिक्तस्यात्मत्वेपि [1]एतद्विशेषानुपपत्तिः, अत्राह—**देहेति** । किं

विदितमित्यादि यदनुसन्धानं, तत्सिद्धौ नाध्यक्षं मानं, तस्य शब्दादिविषयत्वात्, नान्यत्, अनङ्गीकारात् । अतो मानाभावादनुसन्धानासिद्धेः तन्निबन्धनस्थायित्वसिद्धिरित्यर्थः । " इति **शास्त्रप्रकाशिका** ।

* 'आप्रत्यक्ष्यात्' इति मु. पु. पाठः ।

* 'व्युत्पत्तेः' इति मु. पु. पाठः ।

1. **एतद्विशेषानुपपत्तिः**—पेषणकृतोत्थानादिविशेषानुपपत्तिः ।

ईषत्संस्पृष्टमात्रस्य बलाच्चापेषणात्तथा ।
देहादिभिन्नजातीयो भोक्ता यस्य च वादिनः ॥ (150)

धर्मादिहेतुसंबन्धबहुत्वात्स्यात्समञ्जसम् ।
पेषणापेषणकृतवेदनायां भवेद्भिदा ॥ (151)

सुखदुःखादिहेतूनामुत्तमाधममध्यतः ।
तत्प्रबोधविशेषोऽयं युक्त एव भवेत्तदा ॥ (152)

अस्ति चायं विशेषोऽत्र यत्संस्पर्शनमात्रतः ।
अबुध्यमानः संसुप्त आपिष्यापिष्य बोधितः ॥ (153)

अत आपेषणाद्योऽसावुत्थितः करणैः सह ।
राजेव सचिवैः सार्धं स भोक्तेहेति गम्यताम् ॥ (154)

* मृतकल्पमिमं देहं स्वचित्तावेशयन्निव ।
ज्वलन्निव समुत्तस्थौ यः स भोक्तेति गम्यताम् ॥ (155)

क्रोधहर्षभयोद्वेगज्ञानधर्मैर्विशेषयन् ।
शरीरं यः समुत्तस्थौ स भोक्तेत्यवसीयताम् ॥ (156)

तत् समञ्जसम् , अत्राह—**पेषणेति** । धर्माधर्म(वशा)[वास]नासंबन्धस्य तत्कृतदेहसंबन्धस्य च बहुविषयत्वात् तद्धेतुकमुत्थानं च युक्तमित्यर्थः । [149-150-151] (इ)[इ]ष्टहेतूनां बहुविधत्वाच्च उत्थानविशेषः, इत्याह—**सुखेति** । (सुषुप्तस्य) शब्दादिहेतूनां चेत्यर्थः । [152] स्पर्शमात्रेण सर्वस्योत्थानादापेषणानर्थक्यात् न तद्भङ्गादतिरिक्तात्मसिद्धिः, अत्राह—**अस्तीति** । [153] किमतः, तत्राह—**अत इति** । [154] देहस्यैवात्मत्वे स्वापे तस्याभोक्तृत्वायोगादतिरिक्त आत्मा, इत्याह—**मृतेति** । [155] तस्यापि धर्मवतो विकारादनित्यत्वम्, अत्राह—**क्रोधेति** । [156]

---

* **स्वचित्तावेशयन्निवेति** चितो भावः चित्ता, स्वस्य चित्तां आवेशयन् इव समुत्तस्थौ यः इति योजना । न हि देहे चिद्व्याप्तिमन्तरेण वस्तुतः चिदावेशोऽस्ति इति वक्तुम् इवेत्युक्तम् । न हि ज्वलनं चिदात्मनः अग्नेरिवास्ति, किन्तु तथा स्फुरणमित्यभिसन्धाय ज्वलन्निव इत्युक्तमिति बोध्यम् ।

अपि प्राणस्य पारार्थ्यं संहतत्वात् गृहादिवत् ।
ततश्च भोग्यरूपस्य भोक्तृत्वं नोपपद्यते ॥ (157)

देहस्यान्तर्गतः प्राणः स्थूणावद्देहभृत्सदा ।
संहन्यते शरीरेण यथा वायुस्तथैव सः ॥ (158)

यत एवमतः प्राणो गृहादिवद्दिहेष्यते ।
देहाच्च देहधर्मेभ्यो विधर्मात्मार्थभुक्ततः ॥ (159)

* स्वात्मांशांशिसजातीयविविक्तफलसद्मवत् ।
संहतत्वात्तथा प्राणोऽसंहतात्मोपभोगकृत् ॥ (160)

* स्वजन्मोपचयग्लानिनाशाख्याऽऽकृतिदृग्-
जन्मधर्मानपेक्षसंलब्धसत्वादिस्वार्थरूपक-

प्राणस्यानात्मत्वे हेत्वन्तरनिरूपणम्

देहादेरनात्मत्वमुक्त्वा प्राणस्यानात्मत्वे हेत्वन्तरमाह—**अपीति**। [157] संहतत्वमसिद्धम्, अत्राह—**देहस्येति**। [158] फलितमाह—**यत इति**। **परार्थ इति** शेषः। यदर्थः प्राणादिः कोऽसावात्मा, तमाह—**देहाच्चेति**। [159] प्राणः संहतस्य शेषिणः शेषः, परार्थत्वात् आसनादिवत्, अत्राह—**स्वात्मेति**। प्राणः स्वांशस्वजातीयविलक्षण(:)[भोज्यः] भोज्यत्वात् गृहवत् इत्यर्थः। [160] आत्मा संहतः शेषित्वात् देवदत्तवत्, अत्राह—**स्वजन्मेति**। स्वस्य-गृहस्य जन्म उपचयः विपरिणामः नाशः [1]आख्या [2]आकृतिश्च, तेषां स्वजन्मादीनां

---

* **स्वात्मांशांशिसजातीयनिविक्तफलसद्मवदिति** सजातीयविविक्तस्य—सजातीयेतरस्य (असंहतस्य) फलसद्म—भोग्यगृहं, तद्वदित्यर्थः।

1. **आख्या**—नामधेयम्।

2. **आकृतिः**—अवयवसंस्थानम्।

* स्वजन्मोपचयग्लानिनाशाख्याकृतिजन्मदिग्धर्मानपेक्षसंलब्धसत्वादिस्वार्थरूपकः ॥ इति मु.पु. पाठः। "**स्वजन्मेति** स्वस्य गृहस्य जन्म चोपचयश्च ग्लानिश्च नाशश्च आख्या च आकृतिश्च तस्या जन्म च दिक् चेत्येते धर्माः। ताननपेक्ष्यैव लब्धं सत्वं स्फुरणं च येन स स्वतन्त्रस्वभावः।" इति **शास्त्रप्रकाशिका**।

तद्गोचरैकसंद्रष्टृविज्ञात्रर्थं समीक्ष्य हि ।
प्राणस्य तद्गुणानां च तथार्थत्वं प्रतीयताम् ॥ (161–162)

ननु वेदान्तसिद्धान्ते न वस्त्वन्तरमिष्यते ।
सांख्यराद्धान्तवत्किञ्चित्प्रत्यगात्मैकवस्तुनः ॥ (163)

ऐकात्म्याविद्यया सर्वं प्रतीचि परिकल्पितम् ।
प्राणाद्यनात्मजातं यद्रूपं नाम च कर्म च ॥ (164)

कल्पिताकल्पितं सर्वं यदाऽऽत्मैवाभ्युपेयते ।
अन्वयव्यतिरेकोक्तिस्तदैक्यान्नेह युज्यते ॥ (165)

दृक्, (स) तान् जन्मादिधर्मानन(पक्ष्ये)[पेक्ष्य] संलब्धं सत्वं स्फुरणं च येन[सः] (तान् दृष्ट्वा), (भ)[स्वा]र्थरूपकः । स च तद्गोचराणां गृहतद्धर्माणां संद्रष्टा, स एव विज्ञाता । तदर्थत्वं—एवंविधदेवदत्तार्थत्वं गृहादेरुपलब्धमित्यर्थः । स्वजन्मेत्यारभ्य विज्ञात्रर्थमित्यन्तं समस्तं पदमेकमेव । संप्रति दार्ष्टान्तिकमाह—प्राणस्येति । प्राणतद्धर्माणां च [1]तथात्वमनुमेयमित्यर्थः । (161-162)

कल्पितभेदमाश्रित्य अन्वयादिकथनमिति निरूपणम्

अन्वयव्यतिरेकाभ्यां देहाद्यतिरिक्तात्मा स्थापितः । तत्र चोदयति—नन्विति । (163) [2]पर एव [3]वस्त्वन्तराभावं साधयति—ऐकात्म्येति । (164) [4]अस्तु, प्रकृते किं स्यात्, अत्राह—कल्पितेति । [165] किं वा कल्पितस्य

---

1. तथात्वमनुमेयमिति स्वीयजन्माद्यनपेक्षलब्धसत्वस्फुरणादिकस्वीयजन्मादिद्रष्ट्रर्थत्वमनुमेयमित्यर्थः ।
2. पर एव—चोदक एव ।
3. वस्त्वन्तराभावं—आत्मातिरिक्तवस्त्वभावम् ।
4. अस्तु—अनात्मजातं प्रतीचि कल्पितमस्तु ।

नान्वयो व्यतिरेको वा कल्पितस्यानृतत्वतः ।
* अकल्पितस्य चैकत्वान्नितरां न प्रसिद्ध्यति ॥ (166)

पुंव्युत्पत्तिप्रधानत्वादन्वयादेरदोषता ।
न त्वन्वयादिनैवेह वस्तुतत्त्वस्य संस्थितिः ॥ (167)

अविद्याकल्पितेऽप्यस्मिन्नात्मप्रत्ययमानभाक् ।
भोक्तेह गम्यते लोके न त्वनात्ममितिप्रमः ॥ (168)

* अतोऽनूद्य यथासिद्धमन्वयव्यतिरेकतः ।
भोक्तृभोग्यविवेकेन श्रुत्यैकात्म्यं प्रबोध्यते ॥ (169)

[अ]कल्पितादन्वयव्यतिरेकौ, अकल्पित(स्या)[स्य]कल्पिताद्वा । नाद्यः, इत्याह—**नेति** । द्वितीयं प्रत्याह— **अकल्पितस्येति** । [1]अद्वयत्वादित्यर्थः । [166]

तस्मात् अन्वयाद्यर्थं वास्तवभेदापेक्षा, इति प्राप्ते, प्रत्याह–**पुंव्युत्पत्तीति** । कल्पितभेदमाश्रित्य आत्मज्ञानार्थमन्वयादि श्रुत्योच्यते इत्यर्थः । तर्हि अन्वयादिनैवात्मसिद्धे[:] किं [2]तत्त्वमादिना, अत्राह—**न(न्वि)[त्वि]ति** । [167] तर्हि श्रवणात् प्रागात्मनोऽसिद्धेः अन्वयाद्यसिद्धिः, इत्यत्राह—**अविद्येति** । स्वप्रकाशत्वात् प्रागपि सिद्ध इत्यर्थः । विषयसंविदाश्रयत्वेन सिद्धस्य कथं स्वप्रकाशत्वम्, अत्राह—**न(न्वि)[त्वि]ति** । जडत्वप्रसक्तेरित्यर्थः । [168] फलितमाह—**अत इति** । यस्मादन्वयादिना त्वंपदार्थसिद्धिः, तस्मात् तमनूद्ये-

---

1. **अद्वयत्वादित्यर्थ इति** अन्वयादेः द्वयापेक्षत्वादिति भावः ।

* **अकल्पितस्य चैकत्वात्** इत्यत्र, "चकारः तृतीयनिरासार्थः । (अन्वयादेः कल्पिताकल्पिताश्रयत्वनिरासार्थः) कल्पिताकल्पितविषयत्वे द्वैतापातात् न तत्रान्वयादिरित्यर्थः" इति **शास्त्रप्रकाशिका** ।

2. **तत्त्वमादिनेति** वाक्येनेति शेषः ।

* "स्वतः सिद्धश्चेदात्मा, किमन्वयादिना, वाक्येन वा, **इत्याशङ्क्याह—अत इति** यस्मादात्मनि स्वतःसिद्धे अन्वयादिः, तस्मात् तद्वशात् भोक्त्रादिविभागाख्यत्वमर्थशोधनेन ज्ञातं तमनतिक्रम्यानूद्य, तस्य ब्रह्मैक्यं वाक्येन बोध्यते । तया च त्वमर्थशोधनार्थमन्वयादि, वाक्यञ्चैक्यज्ञानार्थमित्युभयार्थवत्तेत्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

चिदन्वयो हि सर्वत्र तत्कार्येषु समीक्ष्यते ।
व्यतिरेकोऽप्यपह्नुत्या कार्यस्येह प्रसिद्ध्यति ॥ (170)

ऐकात्म्यसिद्धौ दोषः स्यात्तत्सिद्धिश्च न वास्तवी ।
* प्रामाणिकी हि तत्सिद्धिरतो नासौ विरुध्यते ॥ (171)

न चापि मानव्यापारव्यपेक्षैकात्म्यनिश्चितौ ।
तत्फलस्य समाप्तत्वादपेक्षा निष्फला यतः ॥ (172)

यावत्त्वागमतः साक्षान्न वेत्त्यात्मानमद्वयम् ।
अन्वयाद्यात्मबोधार्थं तावत्तत्केन वार्यते ॥ (173)

त्यर्थः । [169] अन्वयादेः स्वरूपमाह—**चिदन्वयो हीति** । अविद्यातज्जेषु चिदाभासानुगतिः चिदन्वयः । जाग्रदाद्यवस्थानामेकैकाभावेऽपि चितो(न)ऽवस्थानं व्यतिरेक इत्यर्थः । [170] [1]किं [अ]द्वये मिते अन्वयाद्यनुपपत्तिः, अमिते वा । आद्ये, तदसंभवदोष इष्टः, इत्याह—**ऐकात्म्येति** । ऐकात्म्यं स्वप्रकाशत्वात् [2]सदाभिमतमेव, इत्यत्राह—**तदिति** । स्वरूपधीः नान्वयादिविरोधिनीत्यर्थः । का तर्हि तद्विरोधि(ता)[नी] सिद्धिः, अत्राह—**प्रामाणिकीति** । फलितमाह—**अत इति** । [171] प्रामाणिक्याः सिद्धेः अन्वयादिविरोधित्वे, मितस्यैवैकात्म्यस्य [3]पुनर्मानापेक्षाया[4]मन्वयादिविरोधः स्यात्, अत्राह—**न चेति** । (सदा)[माना][5]दुत्पन्नधियः [6]अविद्याध्वस्तेर[7]पेक्षा व्यर्थेत्यर्थः । [172] अमिते अद्वये, अन्वयादिविरोधकत्वं दूषयति—**यावदिति** । [173] अन्वयादिसहकृतवाक्यजधियः न

---

1. 'अन्वयव्यतिरेकोक्तिस्तदैक्यान्नेह युज्यते' (वा. 165) इत्युद्भावितं विकल्प्य दूषयति **किमद्वये मिते इति** ।
2. **सदाऽभिमतमेवेति** तथा च कुत्रापि समये अन्वयादिधीर्न स्यादिति भावः ।
* **प्रामाणिकीति** वाक्यजन्यप्रमाणवृत्तिरूपा प्रसिद्धिरेव अन्वयादिविरोधिनीत्यर्थः ।
3. **पुनर्मानापेक्षायामिति** घटादिवदित्यादिः ।
4. **अन्वयादिविरोधःस्यादिति** पूर्वोत्पन्नप्रामाणिकसिद्धेः प्रतिबन्धिकायाः सत्त्वादिति भावः ।
5. **उत्पन्नधियः**—उत्पन्नधीबलात् ।
6. **अविद्याध्वस्तेरिति** जातत्वादिति शेषः ।
7. **अपेक्षा**—पुनः मानापेक्षा ।

* अज्ञानं च तदुत्थं च ह्यात्मैवाज्ञाततत्त्वकः ।
तत्तत्त्वबोधात्तद्बाधः सर्परज्ज्वादिबाधवत् ॥ (174)

क्लृप्तानामपि रज्ज्वादौ कल्पितान्तरसंश्रयात् ।
क्लृप्तान्तरापनुत्तिः स्याद्यथा तद्वदिहात्मनि ॥ (175)

प्रत्यङ्ज्ञानैकमेयोऽतो भोक्ता भोग्यं ततोऽपरम् ।
भोग्यानां व्यभिचारेऽपि भोक्तैकोऽव्यभिचारवान् ॥ (176)

बृहन्नित्यादिभिः प्राणो बोध्यमानोऽपि यत्नतः ।
नैवान्वबुध्यत यदा चक्रे यत्नान्तरं तदा ॥ (177)

पाणिनाऽपिष्य बहुशः सुप्तं काश्योऽप्यबोधयत् ।
आपेषोद्भूतसंक्षोभस्ततोऽसौ प्रत्यबुध्यत ॥ (178)

कारणानामिदं वृत्तं यन्निमित्तान्तराश्रयात् ।
स्वात्मकार्यसमुद्भूतिरम्बराद्भ्रभूतिवत् ॥ (179)

संसारनिवर्तकत्वं, द्वैतस्य सत्यत्वात्, इत्यत्राह—अज्ञान चेति । [174] तत्त्वधियः कल्पितत्वात् कथमितरबाधकत्वम्, अत्राह—क्लृप्तानामिति । [175] चिद्धातुरेवात्मा, प्राणादिर्दृश्यत्वात् कल्पितः, इत्युपसंहरति—प्रत्यगिति । [176]

‘तं पाणिनापेषम्’ इत्यादिवाक्यार्थवर्णनम्

‘[1]तं पाणिना’ इत्यादिवाक्यं व्याचष्टे—बृहन्निति । [177-178] [2]स्वत एवोत्थानात् किमापेषणादिना, अत्राह—कारणानामिति । आकाशमभ्रोत्पत्तिनिमित्तमपि पुरोवाताद्यपेक्षम् । एवमात्मा कर्मादिसापेक्ष इत्यर्थः । [179]

---

* “आत्मधीहेतुमानसहायत्वेन अन्यथाभ्युपगमश्चेत्, तदपेक्षितद्वैतमपि स्यात्, इत्याशङ्क्याह—अज्ञानं चेति ।” इति शास्त्रप्रकाशिका ।

1. तं पाणिनेति ‘तं पाणिनाऽपेषं बोधयाञ्चकार । स होत्तस्थौ ।’ इति श्रुतिः ।

2. स्वत एवेति आत्मन इत्यादिः ।

* आपेषाल्लीनबुद्ध्यादिसमुत्पत्तौ परात्मनः ।
घटाकाशवदुत्पत्तिर्नाञ्जसैव सदा दृशेः ॥ (180)

* तस्मादप्रतिबोधेन प्राणोऽभोक्तेति गम्यताम् ।
पुंसस्तु प्रतिबोधेन भोक्तृतैवावसीयते ॥ (181)

अदाहकानां दग्धृत्वं यथा दाहकसंगतेः ।
भोक्तृसंयोगतस्तद्वत् भोक्तृत्वं देवतात्मनः ॥ (182)

देहेन्द्रियमनोधीभ्यो विविच्यात्मानमेकलम् ।
भोक्तारं दर्शयित्वाथ राजा गार्ग्यमपृच्छत ॥ (183)

आपेषणेन बुबुधे यः प्राणादिविलक्षणः ।
क्वाभूदयं पुरा बोधात् कुतश्चागतवान् पुमान् ॥ (184)

स्वापस्थाना[दा]त्मोत्थानमिति, आत्मनो घटतुल्यत्वम्, अत्राह—**आपेषादिति** । [180] 'तौ ह पुरुषं सुप्तम्' इत्यादेरर्थमुपसंहरति—**तस्मादिति** । [181] कथं तर्हि प्राणस्य भोक्तृत्वप्रसिद्धिः, अत्राह—**अदाहकानामिति** । [182]

षोडशकण्डिकार्थनिरूपणम्

वृत्तमनूद्य '[1]स ह' इत्यादेरर्थमाह—**देहेति** । [183] कथमपृच्छत, अत्राह—**आपेषणेनेति** । [184] '**विज्ञानमयः**' इत्यत्र विज्ञानपदेन ब्रह्माभि-

---

* "उत्थानमात्मनः सुप्तेरुद्बोधः । तस्य स्वरूपत्वेन अनुत्पत्तेः न हेत्वपेक्षा, इत्याशङ्क्याह—**आपेषादिति** स्वापे प्रतीचि अज्ञाते लीनस्य बुद्ध्यादेः जाग्रद्धेतुकर्मादिना परस्मादुत्पत्तौ बोधोदयो व्यवह्रियते, घटोत्पत्तौ तदाकाशोत्पत्तिवत्, न साक्षादेव तदुत्पत्तिः, इत्यत्र हेतुमाह—**सदेति**" इति **शास्त्रप्रकाशिका** ।

* **तस्मादिति** पुरुषो भोक्ता न प्राणः इत्ययं पञ्चदशकण्डिकार्थो बोध्यः ।

1. '**स ह**' **इत्यादेरिति** "स होवाचाजातशत्रुः कुत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः, क्वैष तदाऽभूत् कुत एतदागादिति । तदु ह न मेने गार्ग्यः" इति श्रुतिः ।

अन्तःकरणसंबन्धे विज्ञानमिति कर्तरि ।
प्रत्ययः करणार्थः स्यात् क्रियायां भावसाधनः ॥ (185)

प्रमेयार्थविवक्षायां शब्दः स्यात्कर्मसाधनः ।
यथोक्तानामसद्भावात्प्रायार्थः प्रत्यगात्मनि ॥ (186)

स्वाभासवदविद्योत्थबुद्ध्यादिव्याप्तिविभ्रमात् ।
तदात्मत्वाभिमानित्वाद्विज्ञानमयतात्मनः ॥ (187)

साक्षित्वेनोपलभ्यत्वात् साक्ष्यबुद्ध्यादिसंश्रयात् ।
अकारकफलत्वेन तेन प्रायार्थतेष्यते ॥ (188)

यतो विज्ञानमानी सन् सर्वं वस्त्ववगच्छति ।
विज्ञानमयता तस्मात् प्रतीचोऽबोधकारणात् ॥ (189)

धानात् तद्विकारत्वं जीवस्योच्यते इति [1]मतनिरासार्थमाह—अन्तःकरणेति । ल्युडन्तस्य विज्ञानपदस्य वाचकतया अन्तःकरणसंबन्धे, कर्तरि ल्युट्प्रत्ययः स्यात् विजानातीति विज्ञानमिति । [2]चक्षुरादिसंबन्धे, विज्ञायते अनेनेति करणार्थः स्यात् । क्रियायां वाच्यायां, विज्ञप्तिः विज्ञानमिति भावार्थः स्यात् । [3]प्रमेयसंबन्धे, विज्ञायते इति विज्ञानमिति कर्मसाधनः स्यादित्यर्थः । किमतः, अत्राह—यथेति । क्रियाकारकफलविलक्षणे कर्तृत्वादीनामभावात् विज्ञानपदेन ब्रह्मानभिधानात् तद्विकारत्वानुपपत्तौ, (विज्ञानमिति भावार्थः स्यात् प्रमेयसंबन्धे) विज्ञानमयः क्षेत्रज्ञः अन्तःकरणप्राय इत्यर्थः । [186] असङ्गस्यात्मनः कथं [4]तत्प्रायत्वम्, अत्राह—स्वाभासेति । [187] [5]हेत्वन्तरमाह—साक्षित्वेनेति । [188] [6]सर्वज्ञस्य न साक्षित्वे बुद्ध्याद्यपे(क्ष)

---

1. मतनिरासार्थमिति भर्तृप्रपञ्चमतनिरासार्थमित्यर्थः ।
2. चक्षुरादिसंबन्धे—चक्षुरादिवाचकत्वे इति यावत् ।
3. प्रमेयसंबन्धे इत्यस्यापि प्रमेयवाचकत्वे इत्यर्थो बोध्यः ।
4. तत्प्रायत्वम्—अन्तःकरणप्रायत्वम् ।
5. हेत्वन्तरमिति मयटः प्रायार्थत्वे इत्यादिः ।
6. सर्वज्ञस्येति स्वत इत्यादिः ।

* विज्ञानेन विशिष्टं वा यस्मान्मेयं प्रपद्यते ।
प्रायार्थत्वं प्रतीचोऽतः तदभिन्नग्रहाद्भवेत् ॥ (190)

विज्ञानमय इत्युक्त्वा पृथिव्यादिमयोक्तितः ।
षड्विकारनिषेधाच्च प्रायार्थत्वं समञ्जसम् ॥ (191)

अनात्मनो यतोऽशेषान्कल्पितत्वादकल्पितः ।
पूरयन्पुरुषः प्रत्यक् सर्पादीन् रशना यथा ॥ (192)

व्युत्पत्तिरियमेवात्र तात्पर्यस्य समीक्षणात् ।
स वा इति ह्युपक्रम्य नैनेनेत्यादिनिर्णयात् ॥ (193)

इयं तावत्पदार्थोक्तिः संबन्धोक्तिरथाधुना ।
प्रश्नस्य क्वैष इत्यादेः किमर्थोऽयमुपक्रमः ॥ (194)

[क्ष्य]ते, तत्राह—यत इति । [189] तत्प्रायत्वे युक्त्यन्तरमाह—**विज्ञानेनेति ।** [190] मयटः अत्र विकारार्थत्वाभावे [1]लिङ्गं दर्शयन्नुपसंहरति—**विज्ञानमय इति** । [191] पुरुषशब्दार्थमाह—**अनात्मन इति** । [192] पुरि शयनात् पुरुषः इति [2]कस्मान्न गृह्यते, अत्राह—**व्युत्पत्तिरिति** । पूर्णत्वात् पुरुषः इत्यत्र तात्पर्यहेतुमाह—**स वा इति** । 'स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः नैनेन किञ्चनानावृतं नैतेन किञ्चनासंवृतम्' (बृ. 5-5-18) इति तत्पूर्णत्वनिर्णयात् [3]तत्रैव [4]तात्पर्यसिद्धिरित्यर्थः । (193) [5]उक्तः पदार्थः । अव्यवहितेन संगतिरुच्यते, इत्याह—**इयमिति** । तदर्थं पृच्छति—**(प्राप्त)[प्रश्न]स्येति** । [194]

---

* **विज्ञानेन विशिष्टमिति** अन्तःकरणेन वृत्तिद्वारा व्याप्तमित्यर्थः ।

1. **लिङ्गमिति** प्रतीचः षट् भावविकाराः निषिध्यन्ते श्रुतौ । पृथिवीमयः इत्यप्युच्यते । न च पृथिवीविकारत्वं प्रतीचः कश्चिदभ्युपगच्छति । तथाच पृथिवीमयपदस्य प्रायार्थकत्वात् तत्समभिव्याहृतविज्ञानमयपदमपि अन्तःकरणप्रायार्थकं न विकारार्थकमिति समुदायार्थः ।
2. **कस्मान्न गृह्यते इति** भाष्योक्ता व्युत्पत्तिरित्यादिः ।
3. **तत्रैव**—पूर्णत्वात् पुरुषः इति व्युत्पत्तावेव ।
4. **तात्पर्यसिद्धिरिति** वाक्यशेषस्य निर्णायकत्वादिति भावः ।
5. **उक्तः पदार्थः**—विज्ञानमयपदस्य पुरुषपदस्य चार्थ उक्तः ।

चोद्यैकमूलां प्रश्नोक्तिं केचिद् व्याचक्षतेऽपरे ।
याथात्म्यप्रतिपत्त्यर्थमुत्थितस्य प्रचक्षते ॥ (195)

पुंसोऽस्य ज्ञस्वभावत्वे करणेष्वपि सत्सु च ।
कादाचित्कोऽवबोधोऽस्य कुत इत्युच्यतां यथा ॥ (196)

विहायैतच्छरीरं वा गतो देशान्तरं पुमान् ।
विनष्टो वा कुतो भूयो देहमागादितीर्यताम् ॥ (197)

प्रष्टव्यमेतद्गार्ग्येण शिष्यत्वान्न त्वचूचुदत् ।
नैवोदास्ते तथापीनो बोधाभ्युपगमात्स्वयम् ॥ [198]

अर्थिनेऽर्थं प्रतिज्ञाय नासंपाद्य निवर्तते ।
यथार्थितं सत्पुरुष इति सत्पुरुषव्रतम् ॥ (199)

क्वैष तदाऽभूत् इति प्रश्नस्य तत्प्रतिवचनस्य च
भर्तृप्रपञ्चमतेनाशयवर्णनम्

भर्तृप्रपञ्चरीतिमाह—**चोद्येति** । तद्गर्भामित्यर्थः । [195] कथं [1]प्रश्नवाक्यं तैर्विवृतम्, अत्राह—**पुंसोऽस्येति** । आत्मनः चिद्रूपत्वात्, मुक्तेरर्वाक् ज्ञानसाधनकरणानां भावात्, कथमस्य कादाचित्कं ज्ञानमित्यर्थः । [196] आत्मानात्मविषयज्ञानकादाचित्कत्वे सुप्तिः प्रयोजिका, इत्यत्राह—**विहायेति** । स्वापे देहत्यागेनान्यत्र गतत्वात्, नष्टत्वाद्वा गतत्वे पुनरागतिहेतुर्वाच्य इत्यर्थः । [197] शिष्यत्वात् गार्ग्येण एतत्सर्वं प्रष्टव्यं किमिति न(ष्ट) पृष्ट(म)[मि]ति चेत्, अज्ञा-(नत्वा)[ना] दित्याह—**प्रष्टव्यमिति** । अज्ञानादुपरतं गार्ग्यं राजा कुतोऽप्राक्षीत्, इत्यत्राह—**नैवेति** । इनः—राजा । बोधकत्वप्र[2]तिज्ञानादित्यर्थः । [198] प्रतिज्ञातत्यागे को दोषः, अत्राह—**अर्थिन इति** । [199] गार्ग्यस्य

---

1. **प्रश्नवाक्यम्**—'क्वैष तदाऽभूत् कुत एतदागात्' इति वाक्यम् ।
2 **प्रतिज्ञानात्** 'व्येव त्वा ज्ञपयिष्यामि' इत्युक्तत्वात् ।

* कूटस्थोऽस्यावबोधश्चेत्कादाचित्कं कुतो भवेत् ।
मतोऽवबोधोऽनित्यश्चेत् कादाचित्कं तदाऽर्थवत् ॥ (200)

देहादिष्वभिमानोऽस्य कादाचित्कः सहेतुकः ।
आगमापायिसाक्षित्वं नित्यमेवानिमित्ततः ॥ (201)

इदमेव यतो वृत्तं कारणापेक्षिणां सताम् ।
अभूत्वा भवनं तस्मात् कादाचित्कं न दोषभाक् ॥ (202)

प्रश्नाकरणे, राज्ञस्तत्करणे च तात्पर्यमुक्त्वा, प्रश्नव्याख्यामनुसन्धत्ते — कूटस्थ इति । कूटस्थबोधः आत्मा न कादाचित्कज्ञानः । अतो न गतो नापि न(इ)ष्ट इति चेदित्यर्थः । न किञ्चिदवेदिषमित्यनुभवविरुद्धमेतत्, इत्याह—**कादाचित्कमिति** । कदा ज्ञानकादाचित्कत्वानुभवोपपत्तिः, अत्राह—**मत इति** । अर्थवत्—कादाचित्कज्ञानं युक्तमिति यावत् । एतच्च 'पुंसोऽस्य' (वा. 196) इत्यत्र न युक्तमित्युक्तमिति भावः । [200] एवं प्रश्नवाक्यं तन्मतेन व्याख्याय, तदीयप्रतिवचनव्याख्यामाह—**देहादिष्विति** । बुद्ध्यादिसाक्षित्वात् कूटस्थबोधस्यापि देहस्थस्यैव कादाचित्कबोधः—देहाद्यभिमानरूपो युज्यते, धर्मादिकार्यत्वात् । धर्मादेः फलदानायोन्मुखत्वे देहाद्यभिमानः, नान्यदेति नित्यबोधत्वं, कादाचित्कबोधत्वं चाविरुद्धमित्यर्थः । [201] [1]तद्धेतोर्धर्मादेः सदा सत्त्वात् देहाद्यभिमानः सदा किं न स्यात्, अत्राह—**इदमिति** । [202]

---

* "यद्वा, प्रष्टुरभिप्रायं वदन् आत्मनो ज्ञानं नित्यमनित्यं वेति विकल्प्य, आद्यमादत्ते—**कूटस्थोऽस्येति** । अनुभवविरोधेन निरस्यति—**कादाचित्कमिति** । द्वितीयमनुवदति—**मत इति** । तदा कादाचित्कज्ञानत्वमात्मनो युक्तं, यद्यात्मा अचित्स्वभावः स्यात्, तस्य चाचित्स्वभावत्वे स्वरूपहानिः, इति मत्वाह—**कादाचित्कमिति** ।" इति व्याख्यान्तरमपि निरूपयति **शास्त्रप्रकाशिका** ।

1. **तद्धेतोः**—देहाभिमानहेतोः ।

प्रतीच्येव यतश्चाभूदागाच्च प्रत्यगात्मनः ।
प्रश्नार्थप्रतिकूलत्वात् प्रत्युक्तेर्नेदगर्थता ॥ (203)

* गत्यादिसाधनानां च देह एव स्थितेः कुतः ।
देशान्तरगतिः पुंसो नापि नाशोऽस्य युक्तिमान् ॥ (204)

साक्षाद्ब्रह्मावबोधस्य प्रतिज्ञातत्त्वकारणात् ।
भोक्तृभोक्तव्ययोस्तत्त्वं वक्तुं युक्तमतोऽञ्जसा ॥ (205)

कर्मादिहेतुजं रूपमतत्त्वं तदनन्वयात् ।
* अनिमित्तं स्वतस्तस्य सर्वदाऽव्यभिचारतः ॥ (206)

भर्तृप्रपञ्चमतनिरासः

तद्व्याख्यां प्रत्याख्याति—**प्रतीचीति** । स्वापकाले प्रतीच्येव जीवस्य स्थितिः, उत्थानकाले च तस्मादेवोत्थितिः इति वक्ष्यमाण[1]प्रतिवचनार्थगतेः त्वदुक्तरीत्या प्रश्नार्थस्य प्रत्युक्तेश्च प्रतिकूलत्वात् न परो(क्षा)[क्ता]र्थता प्रश्नस्य युक्तेत्यर्थः । [203] प्रश्नमुपगम्योक्तम् । स एव न संभवति[नि]र्बीजत्वात्, इत्याह—**गत्यादीति** । [204]

स्वमतेन प्रश्नप्रतिवचनवाक्यव्याख्यानम्

'अपरे याथात्म्यप्रतिपत्त्यर्थम्' (वा. 195) इत्यत्र सूचितं स्वमतमिदानीं दर्शयति—**साक्षादिति** । [205] किं [2]तयोस्तत्त्वमिति, तद्विविच्य दर्शयति—**कर्मादीति** । अविद्यातज्जं सर्वं [3]सुप्तावनन्वयात् व्यभिचारि दृश्यमित्यर्थः ।

---

1. **प्रतिवचनार्थगतेः**—प्रतिवचनार्थावगतेः ।

* गत्यादिसाधनानि—पादादीनि । **नापि नाशोऽस्य युक्तिमानिति** पुनरुत्थानायोगात् अकृताभ्यागमादिप्रसङ्गाच्चेति भावः ।

2. **तयोस्तत्त्वम्**—भोक्तृभोक्तव्ययोः तत्त्वम् ।

3. **सुप्तावनन्वयादिति** 'तदनन्वयात्' (वा. 206) इति वार्त्तिकांशविवरणं बोध्यम् ।

* **अनिमित्तं**—निमित्तानपेक्षम् । अत एव सदा अव्यभिचारि तदात्मनो रूपम् ।

अकारककिंयाकार्यं रूपं प्राक् प्रतिबोधतः ।
* बुबोधयिषितं मोक्तुरस्मद्गोचरवर्तिनः ॥ (207)

यतोऽस्य न पुरा बोधात् कर्मादेः कार्यमण्वपि ।
प्रतीचो गृह्यते मानादतोऽयं तत्स्वभावकः ॥ (208)

क्वाभूदेष पुरा बोधात् कुतश्चायमुपागतः ।
आचक्ष्वैतद् द्वयं गार्ग्य स्थितावागमनेऽवधिम् ॥ (209)

अभूत् प्रतीचोऽन्यत्रायमन्यस्माच्चायमागतः ।
यदि चेत्, कारकत्वं स्यान्नो चेद्भ्रान्तिरियं भवेत् ॥ (210)

* यत्र वा अन्यदित्येवं यत्र त्वस्येति चापरम् ॥ (211)

(दृष्ट) [द्रष्टृ] स्वरूपमाह—अनिमित्तमिति । क्रियाकारकफलविलक्षणं चैतन्यमात्मनो रूपमित्यर्थः । एवंविधं स्वरूपं स्वापे बोधयितु(दृ)[मि]ष्टम्, इत्याह—प्रागिति । [206-207] अनात्मनो व्यभिचारं साधयति—यतोऽस्येति । नित्यबोधमात्र आत्मा इत्युपसंहरति—अत इति [208] एवं तात्पर्यमुक्त्वा [1]अक्षरार्थमाह—क्वेति । [209] प्रष्टुरभिप्रायमाह—अभूदिति । स्वापे स्वरूपादन्यत्र स्थित्वा, तत आगतश्चेत्, क्रियाकारकफलव्यवहारः सत्यः स्यात् । स्वस्मिन्नेव स्थित्वा तस्मादागतश्चेत्, भ्रान्तोऽयं व्यवहारः, एकत्र तदयोगात् इत्यभिप्रेत्य पृष्टवानित्यर्थः । [210] भेदव्यवहारमिथ्यात्वे मानमाह—यत्रेति । [211]

---

* अस्मद्गोचरवर्तिन इति अस्मत्प्रत्ययगोचरः अहङ्कारः । तत्र साक्षित्वेन वर्तमानस्येत्यर्थः ।

1. अक्षरार्थ—प्रश्नवाक्यस्याक्षरार्थम् ।

* यत्रेति 'यत्र वा अन्यदिव स्यात्' इत्यादिका श्रुतिः अविद्याकार्यं क्रियाकारकादिव्यवहारं दर्शयति । 'यत्र त्वस्य सर्वमात्मैवाभूत्' इत्यादिका श्रुतिः विद्याकार्यं क्रियाकारकादिव्यवहाराभावं दर्शयतीति विभागः ।

वक्तुं प्रष्टुं च बालाकिः न यतो जज्ञिवांस्ततः ।
प्रश्नयोः स्वयमेवार्थं काश्यो वक्तुं प्रचक्रमे ॥ (212)

पृष्टेनापि न विज्ञातं भवता तदिदं मया ।
उच्यमानं यथातत्त्वं सम्यक् त्वं श्रोतुमर्हसि ॥ (213)

यत्रैष एतत्सुप्तोऽभूत्स्वनामामन्त्रणध्वनिम् ।
नाश्रौषीद्यन्निमित्तं ज्ञस्तन्निमित्तमिदं शृणु ॥ (214)

त्रैविध्यं लक्ष्यते यस्माद् बुद्ध्यादिप्राणभूमिषु ।
तदेषामिति षष्ठीयं श्रुत्या तस्मात्प्रयुज्यते ॥ (215)

प्रत्यक्चिदवभासश्च कारणानुगमोऽपरः ।
तथा च करणात्मानो बाह्यगोचररञ्जिताः ॥ (216)

'[1]तदु ह' इत्यादेरर्थमाह—वक्तुमिति । '[2]स होवाच' इत्यादि अवतारयति—तत इति । [212] तदेव विशदयति—पृष्टेनेति । [213]

सप्तदशकाण्डकार्थनिरूपणम्

अक्षरार्थमाह—यत्रेति । यन्निमित्तमिति—उपाध्युपसंहारेण ब्रह्मण्यवस्थानं निमित्तीकृत्येत्यर्थः । [214] षष्ठी[3]प्रयोगतात्पर्यमाह—त्रैविध्यमिति । गम्यमा(ने)[न]पदार्थत्रयविवक्षया षष्ठीप्रयोग इत्यर्थः । (215) अर्थत्रयं विविच्याह—प्रत्यगिति । तेषां मध्ये ये प्राणाः तेषामिति निर्धारणार्था षष्ठीत्यर्थः ।

---

1. तदु हेति 'तदुह न मेने गार्ग्यः ।' इति श्रुतिः ।
2. 'स होवाच' इत्यादीति "स होवाचाजातशत्रुः यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः । तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशः तस्मिन् शेते" इति श्रुतिवाक्यम् ।
3. षष्ठीप्रयोगेति 'एषाम्' इति षष्ठीप्रयोगेत्यर्थः ।

बुद्ध्यादेः कृत्स्नकार्यस्य पुंस्कर्मोद्भूतिहेतुतः ।
* बुद्ध्याद्युत्क्षेपसंहारौ तस्मात्कर्मनिबन्धनौ ॥ (217)

स्वात्माभासतो भोक्ता कर्ता त्वज्ञानहेतुतः ।
द्वयाविविक्तो हि परो भोक्ता कर्तेति चोच्यते ॥ (218)

जाग्रत्फलप्रयोगस्य यदा कर्म प्रहीयते ।
व्युत्थानहेत्वसद्भावात्तदाऽकर्ता सुषुप्सति ॥ (219)

भोक्तृप्रयुक्तं कर्तृत्वं कर्त्रा कर्म प्रयुज्यते ।
कर्मप्रयुक्तो भोगश्च ततः संस्कारसंभवः ॥ (220)

सुखदुःखादिसंस्कारसंस्कृतोऽयं जडः पुमान् ।
रागद्वेषादिनाक्षिप्तः ततो भूयः प्रवर्तते ॥ (221)

अन्योन्यं कार्यता चैषां कारणत्वं तथैव च ।
तेनानुच्छिन्नसंस्कार आत्मायं प्राक् प्रबोधतः ॥ (222)

---

(216) कर्मक्षयादस्य स्वापे स्वरूपावस्थानं वक्तुं कर्महेतुको बन्धः, इत्याह—**बुद्ध्यादेरिति** । (217) अज्ञानचिदाभासयोरपि बन्धहेतुत्वमाह—**स्वात्मेति** । आभासवशादन्यो भोक्ता, अन्यश्चाज्ञानात् कर्तेति एकस्य तत्प[1]सिद्धिविरोधः, अत्राह—**द्वयेति** । (218) कर्मादेः सदा भावात् कुतोऽस्य सुप्तिः, अत्राह—**जाग्रदिति** । स्वप्नस्या(फ)[प्यु]क्षणम् । (219) तर्हि सुप्तस्य मुक्तिप्रसक्तेः विद्यानर्थक्यम्, इत्याशङ्क्य, भोक्तृत्वादेरन्योन्यहेतुत्वा(त्माग्ज्ञाना) [2]दविच्छेदः, इत्याह—**भोक्त्रिति** । [220] [3]संस्काराज्ञानयोर्भावान्न मुक्तिः, इत्याह—**सुखेति** । (221) भोक्तृत्वादेरन्योन्यहेतुत्वफलमाह—**अन्योन्यमिति** ।

---

* बुद्ध्याद्युत्क्षेपसंहारौ —बुद्ध्यादेः उत्थानाभिभवौ ।

1. तत्प्रसिद्धिविरोधः—कर्तृत्वभोक्तृत्वप्रसिद्धिविरोधः ।

2. अविच्छेदः—संसाराविच्छेदः ।

3. संस्काराज्ञानयोर्भावादिति स्वापे इत्यादिः ।

अविद्यानाभिसंबन्धो मिथ्याधीचक्रसंस्थितः ।
आब्रह्माऽस्थाणवयं योनीर्विभ्रमीत्यनिशं परः ॥ (223)

जाग्रत्कर्मक्षये सोऽयमादायाशेषभावनाः ।
असंबुद्धात्मकोद्भूतमनोबुद्ध्यादिरूपिणा ॥ (224)

आधिस्वभावजेनेति कर्ताऽऽदानस्य भण्यते ।
प्रत्यक् चिदवभासान्तः कर्ता क्षेत्रज्ञ उच्यते ॥ (225)

आदीयमानं विज्ञानं सामर्थ्यं विषयोन्मुखम् ।
वागादीनामिह ग्राह्यं प्राणानां विषयाञ्जनम् ॥ (226)

* शक्तयः करणान्यत्र गृह्यन्ते कारणात्मना ।
परमात्मा ग्रहीतात्र स्वाभासाभिन्नविग्रहः ॥ (227)

---

(222) संस्कारानुच्छेदफलमाह—अविद्येति । (223)संस्कारमुपवर्ण्य 'विज्ञानमादाय' इत्यस्यार्थमाह—जाग्रदिति । बा(ह्याभि) [ह्येन्द्रि]याणां अर्थधीशक्तयः भावनाः । ता आदाय आकाशे शेते । आदायेति कर्ता भण्यते इति संबन्धः । 'विज्ञानेन' इत्यस्यार्थमाह —असंबुद्धेति । अज्ञातादात्मनो यदुद्भूतं मनोबुद्ध्यादि, तद्रूपिणा—तद्व्यापकेन, आधिः—उपाधिः अज्ञानम् तत्स्वभावजेन—तत्र प्रतिबिम्बितचैतन्याभासेनेत्यर्थः । [1]कर्तारं विविच्याह—प्रत्यगिति । आभासवानित्यर्थः । (224-225) 'विज्ञानम्' इत्यस्यार्थमाह—आदीयमानमिति । इन्द्रियाणां विषयग्रहणसामर्थ्यमित्यर्थः । (226) क्षेत्रज्ञः करणानां धीसामर्थ्यं चैतन्या-

---

1. कर्तारमिति आदानक्रियायां चिदवभासान्तः—चिदाभासाश्रयः जीवः कर्ता । बुद्ध्यादिगतः चिदाभासः करणम् । (विज्ञानेनेति करणे तृतीया ।) वागादिप्राणानां अर्थधीशक्तिरूपं विज्ञानं कर्म इति विवेको बोध्यः ।

* शक्तयः करणानि—अर्थग्रहणशक्तिमन्ति समर्थानि करणानि । इमानि द्वितीयान्तविज्ञानपदबोध्यानि । कारणात्मना—साभासज्ञानात्मना तृतीयान्तविज्ञानपदबोध्येन । स्वाभासाभिन्नविग्रहः – स्वाभासेन जीवेनाभिन्नः, परमात्मा आदानकर्ता । आकाशे—शुद्धे स्वरूपे शेते-तिष्ठति ।

तथा संवर्गविद्यायां प्राणवाय्वात्मना श्रुतिः ।
वागग्न्याद्युपसंहारं वक्ति नान्येन कारणात् ॥ (228)

नामाद्याशावसानं च प्राणे सर्वं प्रतिष्ठितम् ।
प्राणबन्धनवाक्याच्च सूक्तमेतद्यथोदितम् ॥ (229)

आविर्भूतस्वकार्यस्य संसर्गः कारणात्मना ।*
वागाद्यादानमत्र स्याद् बुद्बुदानां यथाम्भसा ॥ (230)

सहार्थे वा तृतीयेयं विज्ञानेनेति या श्रुता ।
सह प्रमातृज्ञानेन वागादेरुपसंहृतिः ॥ (231)

भासेनोपसंहृत्य, [1]अज्ञातब्रह्माकाशे शेते इति वाक्यार्थमुक्त्वा, [2]अर्थान्तरमाह—**शक्य इति** । सविषयाणीन्द्रियाणि परमात्मा साभासाज्ञानात्मना संगृह्णातीत्यर्थः । (227) स्वापे कार्यजातं कारणात्मना संहृत्य परमात्मस्वरूपे शेते इत्यत्र मानमाह—**त(स्ये)[थे]ति** । (स्वा)स्वापे कार्यक्रियानुसारेण 'वायुर्ह्येतान् सर्वान् [सं]वृङ्क्ते,' (छा. 4 - 3 - 2) 'प्राणो ह्येतान् संवृङ्क्ते' (छा. 4 - 3 - 3) इति **श्रुतिर्वक्तीत्यर्थः** । युक्तं चैतत्, इत्याह—**नान्येनेति** । कारणादन्येन कार्यस्योपसंहारो नास्तीत्यर्थः । (228) वाक्यान्तरमाह—**नामेति** । 'प्राणो वा आशाया भूयान्, यथा वा अरा नाभौ समर्पिताः एवमस्मिन् प्राणे सर्वं समर्पितम्' (छा. 7 - 15 - 1) इति श्रुतेरपीत्यर्थः । (229) आदानशब्दार्थमाह—**आविर्भूत इति** । (230) [3]तृतीयां करणे व्याख्याय, [4]अर्थान्तरमाह—**सहार्थ**

---

1. **अज्ञातब्रह्माकाशे**—अज्ञाते ब्रह्मणि आकाशशब्दिते इति यावत् ।

2. **अर्थान्तरमिति** 'प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशः तस्मिन् शेते' इति वाक्यस्येत्यादिः ।

* **कारणात्मना संसर्गः**—कारणात्मना तादात्म्यम् ।

3. **तृतीयां करणे व्याख्याय**—विज्ञानेन इत्यत्र तृतीयां करणार्थिकां व्याख्याय-करणार्थकत्वेन व्याख्यायेति यावत् ।

4. **अर्थान्तरमिति** तृतीयाया इत्यादिः ।

यदि वास्तु तृतीयेयमित्थंभूतार्थवाचिनी ।
प्रत्यग्ज्ञानस्वभावेन कार्यकारणसंहृतिः ॥ (232)

* अनन्यबोधप्रत्यक्षो य एष इति भण्यते ।
तस्य संप्रतिपत्त्यर्थमन्तर्हृदयकीर्तनम् ॥ (233)

पराक्प्रमेयभूमिभ्यो व्युत्थाप्य मन आदरात् ।
प्रत्यक्प्रवणया दृष्ट्या पश्यात्मानं त्वमञ्जसा ॥ (234)

आत्मबुद्धिरियं पुंसां लक्ष्यतेऽव्यभिचारिणी ।
व्यभिचारिणीष्वनात्मोत्थबुद्धिषु प्रत्यगात्मनि ॥ (235)

इति । प्रमाता[1] सह करणानामुपसंहार इत्यर्थः । (231) पुन[2]रपि अर्थान्तरमाह---**यदीति** । सहेतोः कार्यस्य चैतन्यात्मनोपसंहृतिरित्यर्थः । (232) य एष-शब्दार्थमाह---**अनन्येति** । प्रकृतत्वात् स्वप्रभः तत्पदार्थ उच्यते इत्यर्थः । तस्य तत्पदार्थस्य, संप्रतिपत्तिः---सम्यक् प्रतिपत्तिः त्वमर्थेनैक्यधीः, तदर्थम् । प्रतीचो हृदयं स्थानं, तदेव परस्यापि इत्यु(क्त्वा)[क्त्या]नयोरैक्यसिद्धिरित्यर्थः । (233) ऐक्यज्ञानाय त्वंपदार्थविवेकमाह---**परागिति** । देहादिबुद्ध्यन्तादर्थात् आत्मानं विविच्य विवेकदृष्ट्या अवगच्छेदित्यर्थः । (234) कथं [3]पदार्थो विविच्यते, अत्राह---**आत्मेति** । अनात्मबुद्धिषु व्यभिचारि[णी]षु, [4]आत्मबुद्धिः---आत्मा, अव्यभिचारीति निरूपणं विवेक इत्यर्थः । (235) स्वरूपदृष्टेः कूटस्थत्वे कथं तत्र

---

1. **प्रमात्रा सहेति** अत्र पक्षे विज्ञानेन इत्यत्र विज्ञानपदार्थः प्रमाता बोध्यः ।
2. **पुनरपि अर्थान्तरमिति** तृतीयाया इत्यादिः । अत्र पक्षे, विज्ञानेन---प्रत्यक्चैतन्यरूपेण, विज्ञानं सहेतु कार्यं आदाय---उपसंहृत्य इत्यर्थः । यद्यपि द्वितीयपक्षेऽपि तृतीया इत्थंभूतार्थिकैव । तथापि तत्र पक्षे, तृतीयान्तविज्ञानपदस्य सामान्यज्ञानं, द्वितीयान्तविज्ञानपदस्य इन्द्रियजन्यार्थं इति विशेषोऽवसेयः ।

* "**अनन्येति** स्वप्रकाशः तदर्थः य इत्युक्तः । स एव प्रत्यग्भूतः एषशब्दोक्तः इत्यर्थः ।" इति शास्त्रप्रकाशिका ।

3. **पदार्थः**---त्वंपदार्थः ।
4. 'आत्मबुद्धिरियं पुंसाम्' (वा. 331) इत्यत्र आत्मबुद्धिः इत्यस्य आत्मनो बुद्धिरित्यर्थकत्वं न घटते । अतः आत्मरूपा बुद्धिः---चैतन्यमित्यर्थकत्वमभिप्रेत्याह---**आत्मबुद्धिः**---**आत्मेति** ।

* बुद्धात्माभापि सा बाह्यपदार्थज्ञानविभ्रमात् ।
संकीर्यमाणेवाभाति तमसोपहतात्मनाम् ॥ (236)

जग्धे कार्ये च निःशेषे कारणे चात्मविद्यया ।
अपूर्वाद्यात्मनात्मायमात्मन्येवावसीयताम् ॥ (237)

* आदायाकाशशब्दाभ्यामैकात्म्यं प्रतिपाद्यते ।
क्षेत्रज्ञेश्वरयोः साक्षात् श्रुत्येहाज्ञानहानतः ॥ (238)

तात्स्थ्यात् हृदयशब्देन बुद्धिरत्राभिधीयते ।
* ऐकात्म्यप्रतिपत्त्यर्थं क्षेत्रज्ञपरमात्मनोः ॥ (239)

* घटाकाशो महाकाश इत्युक्तौ खैकधीर्यथा ।
तथेहापि कथं नाम प्रत्यग्धीः स्यादितीर्यते ॥ (240)

कर्तृत्वादिधीः, अत्राह—बुद्धेति । बुद्धात्मा तदाभा—तदात्मिका दृष्टिः कूटस्थापि देहाद्यनात्मसु आत्मविभ्रमात् कर्तृत्वादिधर्मवतीवाभातीत्यर्थः । (236) कर्तृत्वादेः कल्पितत्वफलमाह—जग्ध इति । (237) पदार्थविवेकमुक्त्वा तदैक्यधीः 'आ[दा]य' इत्यादिनोच्यते, इत्याह—आदायेति । त्वमर्थः 'आदाय' इत्युच्यते । तदर्थः 'आकाशे' इति, 'शेते' इति तदेकत्वमित्यर्थः (233) मांसपिण्डार्थहृदयशब्देन कथं बुद्धिरुच्यते, अत आह—तात्स्थ्यादिति । (239) विवक्षितमैक्यं दृष्टान्तेनाह—घटेति । (240) आकाशशब्दो भूताकाशे रूढः इति

---

* 'बुद्धात्मनोऽपि' इति मु. पु. पाठः । "बोधैकरसस्य आत्मनो या स्वरूपदृष्टिः सा" इति शास्त्रप्रकाशिका ।

* आदायाकाशशब्दाभ्यामिति 'आदाय' इति शब्देन आकाशशब्देन चेत्यर्थः । त्वंतत्पदार्थार्पणद्वारा इति शेषः ।

* ऐकात्म्यप्रतिपत्त्यर्थमिति जीवस्य बुद्धिस्थत्वप्रसिद्धेः आकाशस्य परस्यापि तन्निष्ठत्वोक्तौ तयोरैक्यं सिद्ध्यति । तदर्थं हृदयपदेन बुद्धिग्रहणमिति भावः ।

* "तयोरैकात्म्यं तादात्म्यं, ऐक्यं वा । आद्ये भेदोऽपि स्यात् । द्वितीये पदान्तरवैयर्थ्यमित्याशङ्क्य, तदैक्येऽपि व्यावर्त्यभेदात् न पदान्तरानर्थक्यमिति मन्वानः सन्नाह—घटेति । " इति शास्त्रप्रकाशिका ।

बुद्धेरन्तः प्रतीचोऽन्यो नार्थः संभाव्यते यतः ।
तस्मादाकाशशब्देन प्रत्यगात्माभिधीयते ॥ (241)

प्राणादीनां यतो जन्म वक्ष्यते प्रत्यगात्मनः ।
तस्माच्चाकाशशब्देन ब्रह्मैवात्राभिधीयते ॥ (242)

* अप्याकाशो ह वै नाम सता सोम्येति च श्रुतिः ।
ब्रह्माकाशात्परो नान्य आकाश इह गृह्यते ॥ (243)

* स्वतोऽवगमरूपेऽस्मिन् कूटस्थे कारणात्मना ।
कार्त्स्न्येनावसितिर्भोक्तुः शेत इत्यभिधीयते ॥ (244)

दृष्टान्तश्च कुमारादिः तथाच घटतेऽञ्जसा ।
प्रत्यक्चैतन्यमात्रत्वान्न तु निद्रेह युज्यते ॥ (245)

तदेवात्र ग्राह्यम्, अत्राह—बुद्धेरिति । (241) आकाशशब्देनोक्तमा[1]त्मानमनुकृष्य ततो जगदुत्पत्तिश्रवणाच्च आकाशः परः, इत्याह—प्राणादीनामिति । (242) अत्रैव श्रुत्यन्तरसंवादमाह—अपीति । 'आकाशो[ह] वै[नाम] नामरूपयोर्निर्विहिता' (छा. 8-14-1) इत्यत्रापि भूताकाशः किं न स्यात्, इत्याशङ्क्य, 'सता सोम्य तदा संपन्नो भवति' (छा. 6-8-1) इति स्पष्टश्रुतिमुदाहरति—सतेति । (243) शयनशब्दार्थमाह—स्वत इति । (244) [2]प्रसिद्धशयनं कस्मात् न स्वीक्रियते, अत्राह—दृष्टान्तश्चेति । 'स यथा कुमारो वा' इत्यादिवक्ष्यमाणदृष्टा[3]न्त-

---

1. आत्मानमनुकृष्येति 'एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः' इत्यादिना आत्मनः जगदुत्पत्तिश्रवणादित्यर्थः ।

* अथाकाशः इति मु. पु. पाठः ।

* कारणात्मना अवसितिः—अज्ञातात्माकारेणावस्थानं शयनमित्यर्थः ।

2. प्रसिद्धशयनं—निद्रा ।

3. दृष्टान्तबलादिति 'स यथा कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वा शयीत, एवमेवैष एतच्छेते' इति श्रुत्युक्तदृष्टान्तपर्यालोचनायां न प्रकृते शयनं निद्रेति ज्ञायते इति भावः ।

देहाद्यध्यक्षतां हित्वा यदायं वर्तते तदा ।
स्वात्मन्येवास्त इत्येतत्कुतश्चेत् स्वपितीत्यतः ॥ (246)

इतश्च प्रत्यगात्मस्थो नान्यत्राद्य दय पुमान् ।
सुषुप्ते स्वपितीत्युक्तस्तदेतदभिधीयते ॥ (247)

अन्ये व्याचक्षते बुद्धिविज्ञानेनेति विस्मिताः ।
वागादिज्ञानमादाय हृत्खे शेते य उत्थितः ॥ (248)

सुषुप्सुर्मनसैवात्मा मनस्येव समूहति ।
प्राणान् स्वशक्तिभिः साकं मनोऽप्यात्मनि लीयते ॥ (249)

बलादित्यर्थः । (245) 'तानि' [1]इत्य दिवा(क्यं)[क्य]व्यावर्त्यमाह—**देहादीति** । [2]उत्तरत्वेन वाक्यमवतारयति—**स्वपितीति** । (246) हेतुं स्पष्टयति—**इतश्चेति** । 'अहरह(र्ब्रह्मलोकं)गच्छन्त्यः' (छा 8·3·2) इत्यादिश्रुत्यन्तरसमुच्चयार्थः चकारः । (247)

'तदेषाम्' इत्यादिवाक्यानां भर्तृप्रपञ्चव्याख्यानम्

'तदेषाम्' इत्यादिवाक्य [3]व्याख्याय, [4]परव्याख्यामाह—**अन्य इति** । अस्मद्व्याख्याने विस्मिताः—दोषं मन्वानाः, [5]बु(द्धयौ)[द्ध्या] वागादिज्ञानमादाय हृदयाकाशे शेते इति व्याचक्षते इत्यर्थः । (आदायेत्यन्तरसमुच्चयार्थश्च-कारः) । (248) 'तदेषाम्' इत्यादि स्वयं व्याख्या(येत्यु)[यो]क्तोपसंहारक्रममाह—**सुषुप्सुरिति** । सुप्तौ का(क)[क]रणानि मनोरूपेण संहृत्य मनोऽपि स्वात्मन्येव संहरतीत्यर्थः । (249) एवमुपसं(हरतः)[हृत]करणस्य कथं स्वप्नदर्शनम्, अत्राह

---

1. **'तानि' इत्यादिवाक्यव्यावर्त्यमिति** "तानि यदा गृह्णाति अथ हैतत्पुरुषः स्वपिति नाम ।" इति वाक्येन निवर्तनीयं प्रश्नमित्यर्थः ।
2. **उत्तरत्वेन**—उक्तप्रश्नोत्तरत्वेन ।
3. **व्याख्यायेति**—स्वमतेनेत्यादिः ।
4. **परव्याख्यां—भर्तृप्रपञ्चव्याख्याम्** ।
5. **बुद्ध्येति** विज्ञानेन—बुद्ध्या, विज्ञानं—वागादिकं, आदाय हृदयाकाशे—मांसपिण्डपरिच्छिन्ने भूताकाशे शेते इति भर्तृप्रपञ्चाभिमतः श्रुत्यर्थो बोध्यः ।

विशीर्णकरणग्रामो बुद्धिभावनया युतः ।
हृद्याकाशात्प्रसृत्यात्मा नाडीभिः स्वप्नमश्नुते ॥ (250)

मनोवागादिविज्ञानविग्रहः करणाख्यया ।
विजानातीति कर्तृस्थे परस्मिन् भावसाधनः ॥ (251)

प्रकाशवृत्तिर्या ज्ञस्य सा हृद्धर्मानुगा सती ।
* उद्गच्छति यतस्तस्माद् हृद्विशेषे लयं विदुः ॥ (252)

स्वगोचरोन्मुखं ज्ञानं वागादीनामशेषतः ।
आदाय भावना बुद्ध्या शेते ज्ञो हृदयाम्बरे ॥ (253)
भावनारूपविज्ञानमभिव्यक्तं यदा हृदि ।
क्षेत्रज्ञस्यार्थवद्भाति शेते हृदीत्यतो वचः ॥ (254)

—**विशीर्णेति** । जाग्रति मनोवागादिज्ञानविग्रहः स्वापे संहृतकरणव्यापारो जाग्रद्वासनायुक्तः विज्ञानेनेति निर्दिष्टकरणसंज्ञया बुद्ध्या, स्वप्नमनुभवतीत्यर्थः । 'विज्ञानेन' इत्यस्य कर्त्रादिविषयत्वं किं न स्यात्, अत आह—**विजानातीति** । विज्ञानशब्दे कर्तृविषये विजानातीति विज्ञानं क्षेत्रज्ञः स्यात्, परस्मिन् विज्ञानशब्दप्रवृत्तौ विज्ञानमिति परः स्यात्, न(वेदो)[चेद्]भयं युक्तम्, आदायेति पृथक् कर्तृनिर्देशादित्यर्थः । (250-251) देहावयवान्तरावच्छिन्नाकाशं हित्वा, हृदयाकाश एव स्वापे, कस्मादात्मनः शयनमुच्यते, अत्राह—**प्रकाशेति** । [1]आत्मचैतन्यं [2]हृद्धर्मनाडीद्वारा शब्दादिविषयं भवतीति कृत्वा, तदवच्छिन्नाकाशे शयनमित्यर्थः । (252) 'वागादिज्ञानमादाय' (वा. 248) इत्येतदुपपादितमुपसंहरति—**स्वगोचरेति** । (253) एतच्छयनार्थमाह—**भावनेति** । जाग्रद्वासनानुरूपं विज्ञानं हार्दाकाशे कर्मवशादभिव्यक्तं अर्थवत्—शब्दादिविषया-

---

1. प्रकाशवृत्तिः—प्रकाशरूपा वृत्तिः इत्यभिप्रेत्याह—**आत्मचैतन्यमिति** ।
2. हृद्धर्मनाडीद्वारेति '**हृद्धर्मानुगा**' इत्यस्यार्थकथनम् । '**हृद्धर्माः कामादयः**' इति शास्त्रप्रकाशिका ।
* लयं विदुः इत्यत्र लयशब्दार्थः शयनम् ।

एवं श्रुतिरियं कैश्चित् व्याख्यातातिप्रयत्नतः ।
परीक्ष्यैतत् द्वयं ग्राह्यं स्वयमेव परीक्षकैः ॥ (255)

सह भावनया बुद्धेः श्रुतत्वादुपसंहृतेः ।
* न स्यात्तयोपसंहारः तेनेयं कल्पना मुधा ॥ (256)

स्वगोचरेषूत्सृष्टानि यदा गृह्णात्ययं स्वयम् ।
वागादीनि तदैवेनं स्वपितीति प्रचक्षते ॥ (257)

कारवत् भातीति हार्दाकाशे शयनमुच्यते इत्यर्थः । (254) उपसंहरति—एवमिति ।

भर्तृप्रपञ्चव्याख्यादूषणम्

[1]आक्षिपति—**परीक्ष्येति** । व्याख्यानद्वयं परीक्ष्य **भगवत्पादीयं** ग्राह्यम् । **भर्तृप्रपञ्चीयं** दुष्टं हेयमित्यर्थः । (255) तद्दोषं समर्थयते—(तृतीयं) [सहेति] । 'गृहीतं मनः' इति बुद्धेरप्युपरमश्रुतेः, तयोपसंहारकल्पनमयुक्त[2]मित्यर्थः । (256)

'तानि यदा' इत्यादिश्रुतिवाक्यार्थवर्णनम्

परमतं पराकृत्य, श्रुति[3]व्याख्यामनुसन्धत्ते—**स्वगोचरेष्विति** । (257)

---

1. आक्षिपति—दूषयति ।

* तया—बुद्ध्या ।

2. अयुक्तमिति तथाच बुद्ध्यादिसंहारे चिदाभासः करणं, चिदाभासवान् कर्ता सर्वोपसंहारे अज्ञातब्रह्मणि जीवस्य स्थितिः, इति भगवत्पादीयमतमेव युक्तमिति भावः ।

* 'न स्यात्तयोपसंहारः' इति मु- पु- पाठः ।

3. श्रुतिव्याख्यां—'तानि यदा गृह्णाति, अथ हैतत्पुरुषः स्वपिति नाम' इति श्रुतिवाक्यव्याख्यानम् ।

समाख्यासंश्रयात्तस्माद्भूत्प्राक् प्रत्यगात्मनि ।
* व्यभिचारोऽपि चेन्नास्मि, ततो युक्तिरपीर्यते ॥ (258)

* वागादिप्रकृतौ प्राणशब्दो घ्राणेऽवगम्यते ।
मुख्यस्यानुपसंहारान्न तद्वाचक इष्यते ॥ (259)

वासनामात्रहेतुश्च स्वप्ने कर्मेन्द्रियाश्रयः ।
सर्वेन्द्रियाणां लीनत्वात् व्यापारो न प्रबोधवत् ॥ (260)

वागाद्युपाधिसंबन्धे संसारित्वमिवेक्ष्यते ।
ते तूपसंहृताः सर्वेऽसंसारित्वमतो दृशेः ॥ (261)

---

[1]नामबलात् स्वापे स्वात्मनि [2]स्थानं सिद्धम्, इत्याह—**समाख्येति** । [3]अश्वकर्णादिवदपि नामसंभवात् न तद्बलादिष्टसिद्धिः, इत्याह—**व्यभिचारोऽपीति** । तर्हि स्वरूपावस्थाने युक्तिः [4]उत्तरवाक्येनोच्यते, इत्याह—**तत इति** । (258) 'तद्गृहीत एव प्राणो भवति' इत्यत्र प्राणशब्दं व्याकुर्वन् युक्तिमाह—**वागादीति** । (259) एवं करणव्यापाराभावे संसाराभा(वो)[वा]दा(प)रोपितः संसारः इत्युक्तम् । तदयुक्तं, स्वप्ने करणव्यापाराभावेऽपि संसारदर्शनात्, अत्राह—**वासनेति** । [260] अत्र हेतुमाह—**वागादीति** । असंसारित्वमिति पदम् । [261]

---

1. **नामबलात्**—स्वपितिनामबलात् ।
1. **स्थानं**—अवस्थानम् ।
3. **अश्वकर्णादिवत्**—अश्वकर्णादिशब्दवत् । अवयवार्थबोधकतां विना केवलरूढशब्दवदिति यावत् ।
* **व्यभिचारः**—स्वार्थव्यभिचारः ।
4. **उत्तरवाक्येन**—"तद्गृहीत एव प्राणो भवति गृहीता वाक् गृहीतं चक्षुः गृहीतं श्रोत्रं गृहीतं मनः ।" इति वाक्येन ।
* **वागादिप्रकृतौ**—वागादिप्रकरणे । 'मुख्यस्यानुपसंहारात्' इति मुख्यप्राणस्य अनुपसंहारोक्तिः सुप्तस्य पार्श्वस्थदृष्ट्या इति बोध्यम् ।

नतु स्वप्नेऽपि जाग्रद्वत् प्रत्यक्षमुपलभ्यते ।
सर्वेन्द्रियवियोगेऽपि सुखिदुःखित्वमात्मनः ॥ (262)

मैवं, मृषात्वात्स्वप्नोत्थसुखदुःखादिलक्षण–
संसारस्येत्यतो वक्ति श्रुतिस्तस्य मृषार्थताम् ॥ (263)

नास्य स्वापः प्रबोधो वा कुतः स्वप्नस्य संभवः ।
प्रत्यक्स्वभाव एवास्य जाग्रत्स्वप्नसुषुप्तयः ॥ (264)

सुप्तः प्रबुद्ध इत्येवं स्वप्नं पश्यति चेति यः ।
विकल्प एष भूतानामविद्यारात्रिशायिनाम् ॥ (265)

* मायामात्रमिदं सर्वं जगत् स्थावरजङ्गमम् ।
सर्पादेरिव रज्ज्वादिस्तत्त्वमस्ति परं पदम् ॥ (266)

अष्टादशकण्डिकार्थनिरूपणम्

'[1]स यत्र' इत्यादेः [2]शङ्कामाह—नन्विति । [262] परिहरति—मैवमिति । [3]उक्तार्थे वाक्यमवतारयति—इत्यत इति । (263) स्वप्नमिथ्यात्वं किंपुनर्न्यायेनाह—नास्येति । असदेव तर्हि अवस्थात्रयम्, अत्राह—प्रत्यगिति । स्वभावः—अविद्या । आत्माविद्यैवेत्यर्थः । [264] [4]एतदेव विशदयति—सुप्त इति । [265] अवस्थात्रयस्य कल्पितत्वे किंपुनर्न्यायमाह—मायेति । [266] जगतः कल्पितत्वे कथं प्राणिनां कर्तृत्वप्रमुखसंसारे सत्यत्व-

---

1. 'स यत्र' इत्यादेः — "स यत्रैतत् स्वप्न्यया चरति ते हास्य लोकाः तदुतेव महाराजो भवति, उतेव महाब्राह्मणः, उतेवोच्चावचं निगच्छति ।" इति वाक्यस्य ।

2. शङ्कामिति व्यावर्तनीयामित्यादिः ।

3. उक्तार्थे—स्वप्नमिथ्यात्वे ।

4. एतदेव—अवस्थात्रयस्य अविद्यात्वमेव ।

* विमतं न मिथ्या व्यवह्रियमाणत्वात् घटवत् इत्याशङ्क्य, दृष्टान्ते साध्यवैकल्यं 'मायामात्रमिदं सर्वम्' इति वार्तिके उक्तम् ।

* चित्तसंमोहमात्रेऽस्मिल्लोकोऽयं परिखिद्यते ।
दिङ्मोहाकुलविज्ञानो नष्टमार्ग इवाध्वगः ॥ (267)

अस्मिन्नर्थे जगादेमौ श्लोकौ यदुकुलोद्वहः ।
पुराणः शाश्वतो विष्णुः प्रपन्नाय किरीटिने ॥ (268)

'न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥' (269)

'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥' (270)

* आत्मैवेदं जगत्सर्वं सत्यापूर्वादिलक्षणम् ।
वेत्ति यस्तत्त्वतो वाक्यात् तस्यैवेह कृतार्थता ॥ (271)

* प्रत्यक्तमोऽवसाय्येव पराग्ज्ञानमशेषतः ।
* प्रत्यगात्मन्यविद्येति त्वविद्यापरिकल्पना ॥ (272)

बुद्धिः, अत्राह—चित्तेति । [267] अज्ञानात् संसारित्वोक्तिसामर्थ्यात् ज्ञानान्मुक्तिरिति चोक्तम् । तत्र भगवद्वाक्यं प्रमाणयति—अस्मिन्निति । [268] (भ. गी. 7·15, 7·14 श्लोकौ पठति—नेत्यादिना । [269·270] '(सा) [मा]मेव' इत्यादेरर्थमाह—आत्मैवेति । [271] ज्ञानात् मुक्तिश्चेत्, अक्षादिजनितादपि ज्ञानात् स्यात्, अत्राह—प्रत्यगिति । [1]भ्रान्तिरित्यर्थः । तर्हि अज्ञा(ना)[न]संबन्धाद्[2]सङ्गत्वहानिः, अत्राह—प्रत्यगात्मनीति । [272]

---

* हेतोरनैकान्तिकत्वं 'चित्तसंमोहमात्रेऽस्मिन्' इति वार्त्तिके उच्यते, इति शास्त्रप्रकाशिकाकाराः ।

* आत्मैवेति तथाच मामेव प्रपद्यन्ते इत्युक्तप्रपदनं ज्ञानरूपमिति भावः ।

* प्रत्यक्तमोऽवसायि—प्रत्यगज्ञानजन्यम् ।

1. फलितार्थमाह—भ्रान्तिरित्यर्थ इति ।
2. असङ्गत्वहानिरिति प्रत्यगात्मन इति शेषः ।

* अविद्यापरिकल्पनेति अविद्यासंबन्धः आविद्य इत्यर्थः ।

स्वार्थं प्रत्येव विज्ञेयाः सदसत्त्वादिकल्पनाः ।
जाग्रत्स्वप्नभावतः सिद्धौ स्वार्थं प्रत्येव न स्वतः ॥ (273)

* वागादिसाध्यसंदृष्टेः स्वप्नो बोधसमो यदि ।
अवस्थात्रितयस्यास्य कुतः सिद्धिरितीर्यताम् ॥ (274)

आदायेति च क्त्वान्तोक्तेः पूर्वकालैककर्मणः ।
स्वप्न एव तु संसिद्धिरादावन्ते ह्यसंभवात् ॥ (275)

* इति भूतार्थसंबोधज्ञानोन्मीलितचक्षुषाम् ।
नास्ति व्याधिर्जरा नास्ति नास्ति देशपरिभ्रमः ॥ (276)

नास्ति रोगो न सन्तापो नास्ति कामादिसंप्लुतिः ।
न स्युर्हर्षभयोद्वेगहानोपचयमृत्यवः ॥ (277)

दृश्यत्वाच्च स्वप्नादेर्मिथ्यात्वम्, इत्याह—स्वार्थं प्रतीति । [273] स्वप्नः सत्यः अर्थक्रियाकारित्वात् जाग्रद्वत्, इति शङ्कते—वागादीति । स्वप्नस्य सत्यत्वे स्वप्नजाग्रद्भेदो न स्यात्, इति दूषयति—अवस्थेति । [274] स्वप्नस्य मिथ्यात्वे हेत्वन्तरमाह—आदायेति । क्त्वाप्रत्ययान्तप्रयोगस्य समानकर्तृकक्रिययोः [1]पूर्वक्रियाविषयत्वात् प्राणादेः स्वापात्पूर्वं[स्वप्ने]जागरे वा सत्त्वावगमात् व्यभिचारित्वात् रज्जुभुजङ्गवत् मिथ्यात्वमित्यर्थः । [275] एवं स्वप्नदृष्टार्थमिथ्या(र्थ)[त्व]धीः स्वप्ने एव स्यात्, जागरे वा, इत्यत्राह—इति भूतार्थेति । भूतार्थः—जाग्रत्प्रपञ्चः । तत्संबोध एव ज्ञानम् । तेनोन्मीलित-

---

* 'वागादिसाध्यसंदृष्टेः' इति वार्त्तिके स्वप्नशब्दः अवस्थात्रयपरः, 'त्रयः स्वप्नाः' इति श्रुतेः । अवस्थात्रयस्य सत्यत्वे, तस्य स्वतः परतो वा सत्तास्फूर्ती । नाद्यः जडत्वात् , न द्वितीयः संबन्धानिरूपणात् । तथा च तदसिद्धिः इति शास्त्रप्रकाशिकाकाराः वर्णयन्ति ।

1. 'पूर्वक्रियाविषयत्वात्—पूर्वकालिकक्रियाविषयत्वात् ।

* "अवस्थात्रयमिथ्यात्वोक्तिफलमाह—इति भूतेति । उक्तमानयुक्तितः जातद्वैतमिथ्यात्वार्थनिश्चयेन पदार्थशोधने, वाक्यात् तदर्थजातज्ञानानां सर्वानर्थशान्तिः फलतीत्यर्थः ।" इति शास्त्रप्रकाशिका ।

न शोको नारतिः का चिन्न कर्तृत्वं न कार्यता।
न ज्ञेयं नापि च ज्ञाता तदभावोऽपि नेष्यते ॥ (278)

* इति क्षरार्थसंबन्धज्ञानेऽस्मिल्लोकचक्षुषा।
विकल्पहेत्वविद्यायाः प्रत्यग्याथात्म्यनिश्चितः।
सम्यग्बोधाग्निना ध्वस्तौ विकल्पो नावशिष्यते ॥ (279)

विजिज्ञापयिषुर्गार्ग्यमिममर्थमतो नृपः।
स यत्रेत्यादिकामाह परामुक्तिपरम्पराम् ॥ (280)

स्वप्नेभवत्वात् स्वप्न्येति जाग्रत्स्वापाद्विवेचनम्।
मिथ्यात्वप्रतिपत्त्यर्थं स्वप्नस्य क्रियते स्फुटम् ॥ (281)

चक्षुषां—तेनावगतजाग्रत्पदार्थानाम्, स्वप्नदृष्टपदार्थाः मि(त्या)[थ्या] भवन्तीत्यर्थः। उद्वेगः—द्वेषः। इष्टवियोगनिमित्तं मानसं दुःखं शोकः। इष्टाप्राप्तिनिमित्तमान-कारः अरतिः, इति विवेकः। [276-277-278] एवं ब्रह्मविदोऽपि जगत् म्, इत्याह—**इति क्षरेति**। विद्योदयात् प्राक् क्षरार्थसंबद्धज्ञाने शब्दादि-षये लोकचक्षुषा—(शब्दा)[श्रोत्रा]दीन्द्रियद्वारेण ज्ञाते, श्रुत्याचार्यप्रसादात् अहं ब्रह्मेति संजातधिया सकार्याविद्या निवर्तते इत्यर्थः। [279] एवं जडस्य मिथ्यात्वमुक्त्वा, [1]तत्र श्रुतिमवतारयति—**विजिज्ञापयिषुरिति**। [280]

'स यत्रैतत् स्वप्न्यया चरति' इत्यादिवाक्यार्थवर्णनम्

'स्वप्न्यया चरति' इति माध्यन्दिनपाठस्यार्थमाह—**स्वप्न इति**। तया दर्शनाख्यया वृत्त्या चरतीत्यर्थः। [281]

---

* "ज्ञातृत्वाद्यभावे ज्ञानस्याप्यभावात् तत्फलासिद्धिः, इत्याशङ्क्याह—**इति क्षरेति** द्वैतेन बाधकतया युक्तमपि ज्ञानं तदज्ञानकल्पितश्रुत्याचार्यादिरूपलोकचक्षुषोत्पद्यते। तस्मिन् सति उक्तनीत्या तत्फलसिद्धिरित्यर्थः।" इति **शास्त्रप्रकाशिका**।

1. तत्र—जडमिथ्यात्वे।

निशायां संप्रवृत्तायां संहृताक्षस्य निद्रया ।
जाग्रत्कर्मण्युपक्षीणे स्वप्नयोगे उपस्थिते ॥ (282)

बोधावस्थां तिरोनीय देहाद्याश्रयलक्षणाम् ।
कर्मोद्भावितसंस्कारस्तत्र स्वप्नरिरंसया ॥ (283)

अवस्थां प्रथयत्यन्यां मायावीवात्ममायया ।
उच्चावचान् बहूनर्थान् सोऽसृजत् सृजतेऽनृतान् ॥ (284)

अविद्याकामकर्मादिसाधनैः समुपार्जितान् ।
बोधे साधारणा येऽस्य स्वप्ने तेऽनन्यद्रष्टृकाः ॥ (285)

लोकाः कर्मफलानीति तेषां मिथ्यात्वमुच्यते ।
उतेवेत्यादिना स्पष्टमैकात्म्यप्रतिपत्तये ॥ (286)

ननु बोधे यथा लोकास्तत्कालाव्यभिचारिणः ।
स्वप्नेऽपि स्वप्नकालस्थास्तद्वत्सन्त्विति भण्यते ॥ (287)

कदाऽयं स्वप्नः स्यात्, अत्राह—**निशायामिति** । देहाद्याश्रयलक्षणां—बाह्येन्द्रियैरर्थोपलब्धिस्वरूपाम् । कर्मोद्भावितसंस्कारः—स्वाप्नभोगदकर्मणा समुद्बुद्धजाग्रद्वासन इत्यर्थः । किं तत्र करोतीति, तत्राह—**उच्चेति** । कामादिसाध्यत्वे स्वप्नस्य सत्यत्वम्, इत्यत्राह—**बोध इति** । [1]अनन्यदृष्टत्वात् शुक्तिरजतवत् मिथ्यात्वं स्वप्नदृष्टार्थानामित्यर्थः । (282-283-284-285)

'ते हास्य लोकाः' इत्यादेरर्थवर्णनम्

'[2]ते ह' इत्यादौ लोकशब्दार्थमाह—**लोका इति** । '**तदुत**' इत्यादौ इवशब्दार्थमाह—**तेषामिति** । (286) स्वप्नलोकोऽमथ्या तत्कालाव्यभिचारि-

---

1. **अनन्यदृष्टत्वादिति** अनन्यद्रष्टृकाः (वा. 285) इत्यस्य फलितार्थकथनम् ।

2. **ते ह इत्यादौ**—'ते हास्य लोकाः तदुतेव महाराजो भवति, महाब्राह्मणः उतेवोच्चावचं निगच्छति ।' इत्यत्र ।

ननु जाग्रत्स्थलोकानां मिथ्यात्वं प्राक् प्रपञ्चितम् ।
अविद्यामात्रहेतुत्वं पाणिपेषप्रबोधनात् ॥ (288)

तथा च सति दृष्टान्तो भवतो नोपपद्यते ।
मिथ्यात्मकत्वात्सर्वस्य, नैतदेवं, कुतो, यतः ॥ (289)

विवेकमात्रसिद्ध्यर्थो भोक्तृभोग्यपदार्थयोः ।
पाणिपेषादिको ग्रन्थः शुद्धिस्तत्र विवक्ष्यते ॥ (290)

तस्मात्कृतकदृष्टान्तमुपादायात्मनोऽञ्जसा ।
आध्यात्मिकादिलेपानां विशुद्धिरिह भण्यते ॥ (291)

किञ्चित्सामान्यमाश्रित्य जामित्वं प्रतिपद्यते । *
न्यायः सर्वोऽपि येनातो नैतत्साधु प्रचोदितम् ॥ (292)

त्वात् जाग्रल्लोकवत्, इति शङ्कते—नन्विति । (287) [1]साध्यवैकल्यं वक्तुं सिद्धान्ती [2]पाणिपेषणवाक्यं स्मारयति—नन्विति । (288) साध्यवैकल्यं फलितमाह—तथा चेति । [3]पूर्ववादी परिहरति—नैतदिति । साध्य(त्वे)वैक-(ल्पा)[ल्या]भावे हेतुं पृच्छति—कुत इति । तमाह —यत इति । देहद्वयाति-रिक्तस्यात्मधीसामर्थ्यात् तद्गतकर्तृत्वादि मिथ्येति सिद्धयति । जाग्रन्मिथ्यात्व-मुक्तमप्यविद्यमानसमं कृत्वा चोदयतीत्यर्थः । (289-290) अतो [4]दृष्टान्तोपपत्तिः, इत्याह—तस्मादिति । जाग्रद्दृष्टान्तेन स्वप्नसत्यत्वमाशङ्क्य, तन्निरासेन स्वप्नवत् जागरितमपि मिथ्येति साध्यते इत्यर्थः । (291) पाणिपेषणवाक्ये अर्थात् जागरिते मिथ्यात्वोक्तेः आत्मशुद्धिरुक्ता । [5]सैवेहोच्यते इति पुनरुक्तिः, अत्राह—किञ्चिदिति । यत्किञ्चित्साम्यात् पौनरुक्त्ये सर्वन्यायानां तत्

---

1. साध्यवैकल्यमिति जाग्रल्लोकस्य दृष्टान्तस्येत्यादिः ।

2. पाणिपेषणवाक्यं—'तं पाणिनापेषं बोधयाञ्चकार, स होत्तस्थौ ।' इति वाक्यम् ।

3. पूर्ववादी परिहरतीति स्वप्नलोकः सत्यः इति वादी पूर्वपक्षी, दृष्टान्ते साध्यवैकल्यं परिहरतीत्यर्थः ।

4. दृष्टान्तोपपत्तिः—अमिथ्यात्वसाधने जाग्रल्लोकस्य दृष्टान्तस्योपपत्तिः ।

5. सैव—आत्मशुद्धिरेव । इह—स्वप्नवाक्ये ।

* जामित्वं—पौनरुक्त्यम् ।

* महाराजादयो नास्य स्वप्नानुभवगोचराः ।
आत्मभूता इति ज्ञेयास्तद्भेदेनोपलम्भनात् ॥ (293)

* पर्यङ्कशयिताद्राज्ञः प्रत्यक्षादिप्रमाणकात् ।
बहिः समीक्ष्यते राजा स्वप्नदृग्भिर्वनं गतः ॥ (294)

स्वानुभूत्यनुरोधेन राज्ञो राजाऽमृषा गृहे ।
स्वप्ने प्रबुद्धस्य सतो मृषा स्याद्वनमाश्रितः ॥ (295)

जाग्रद्दृष्टं मृषा स्वप्ने स्वप्ने सज्जागरे मृषा ।
अन्योन्यव्यभिचारित्वात् स्वप्नजाग्रत्पदार्थयोः ॥ (296)

स्यात् । अवान्तरभेदादपौनरुक्त्य[1]मत्रापि समम् । [2]पूर्ववाक्ये शुद्धिद्वारा आत्मनः संविदेकरसत्वादार्थिकं जगन्मिथ्यात्वम् । इह तु लोकशब्देन [3]कर्मफल-मात्रस्वीकारात् [4]श्रौतं तदिति भेदादित्यर्थः । (292) लोकशब्देन स्वप्नार्थ-मात्रग्रहेऽपि न पौनरुक्त्यं स्वप्नदृष्टान्तेनात्र तन्मिथ्यात्वसाधनादिति, स्वप्न-मिथ्यात्वं साधयति—महाराजादय इति । विमताः स्वप्नद्रष्टुः भिद्यन्ते दृश्यत्वात् घटवदित्यर्थः । (293) जाग्रद्दृष्टार्थादन्यत्वाच्च स्वप्नार्थानां मिथ्यात्व-माह—पर्यङ्केति । (294) [5]अन्यदीयः [6]तद्भेदानुभवो भ्रान्तिः पर्यङ्कशयित एवाहं वनं गतः इति राजानुभवविरोधात्, अत्राह—स्वानुभूतीति । (295) जाग्रदवस्थायां व्यभिचारात् स्वप्नमिथ्यात्वमुक्त्वा, स्वप्ने व्यभिचारात् जागरित-

---

1. अत्रापि—स्वप्नवाक्यप्रतिपाद्येऽपि ।
2. अवान्तरभेदमाह—पूर्ववाक्ये इति पाणिपेषणवाक्ये इत्यर्थः ।
3. कर्मफलमात्रस्वीकारात्—कर्मफलसामान्यबोधनात् ।
4. श्रौतं तदिति मिथ्यात्वं वाचनिकमित्यर्थः ।

* "जाग्रद्दृष्टान्तेन स्वप्नसत्यत्वचोद्यसंभवात् वाच्यस्तस्य समाधिरिति पूर्ववादि-मुखेनोक्त्वा, कोऽसौ समाधिः, इत्यपेक्षायामाह—महाराजादय इति ।" इति शास्त्रप्रकाशिका ।

* प्रत्यक्षादिप्रमाणकादिति अत्र प्रत्यक्षं प्रमाणं पार्श्वस्थानां जाग्रतां बोध्यम् ।

5. अन्यदीयः—स्वप्नद्रष्टृराजादेः अन्यस्य जाग्रत्पुरुषस्य जायमानः ।
6. तद्भेदानुभवः — पर्यङ्कशयितराजभेदानुभवः ।

अह्नः क्षपायां च कुतः संहृताक्षस्य चेक्षणम् ।
मृतानां जीवनं तद्वत् वृद्धानां यौवनं कुतः ॥ (297)

न चक्षुरादिदृष्टीनामन्तर्देहसमीक्षणम् ।
हिमवत्प्रभृतीनां च कुतोऽन्तः संभवो हृदि ॥ (298)

नापि देहाद्विनिष्क्रम्य पर्वतादीन् समीक्षते ।
देहं विना कथमगाद्गतिसाधनवर्जितः ॥ (299)

अन्तरेणापि देहादींस्तत्कार्यं चेत्करोत्ययम् ।
व्यर्थं देहाद्युपादानमस्य प्राप्नोत्यसंशयम् ॥ (300)

ननु पर्यङ्क आसीनो गच्छन् शिबिकया वनम् ।
वेश्मतो बहिरात्मानं द्रक्ष्यतीति न तद्यतः ॥ (301)

अमात्यादीन् यथाऽदाय स्वात्मभोगप्रसिद्धये ।
नृपः स्वदेशमध्यस्थः यथेष्टं परिवर्तते ॥ (302)

स्या[पि]मिथ्यात्वमाह—जाग्रदिति । (296) योग्यका(ल)[ला]भावाच्च स्वप्नो मिथ्या, इत्याह—अहरिति । योग्यहेत्वभावाच्च मिथ्या, इत्याह—संहृतेति । मानान्तरविरोधाच्च तदाह—मृतानामिति । उचितदेशाभावाच्च स्वप्नो मिथ्या, इत्याह—हिमवदिति । (297-298) देहान्निर्गम्य पर्वतादिदर्शनान्न[1] विरोधः, अत्राह—नापीति । (299) किं देहेन, तं विना गमनसिद्धेः, अत्राह—अन्तरेणेति । (300)

'स यथा महाराजः' इत्यादिवाक्यार्थनिरूपणम्

अ(तः)[न्तः] स्वप्नोक्तिरनुभवविरुद्धा, इति शङ्कते—नन्विति । [2]तदुत्तरत्वेन 'स [3]यथा' इत्यादि वाक्यमवतार्य व्याचष्टे—न तदिति । [301-302]

---

1. न विरोधः—उचितदेशविरहो नेति यावत् ।
2. तदुत्तरत्वेन—अन्तः स्वप्नोक्तेरनुभवविरुद्धत्वशङ्कोत्तरत्वेन ।
3. स यथा इत्यादीति 'स यथा महाराजः जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेत' इति वाक्यम् ।

स्वदेहराष्ट्रसंस्थोऽयं जाग्रद्भावनिरूपिणः ।
प्राणानात्मा तथाऽऽदाय स्वप्नान् पश्यति कामतः ॥ (303)

असत्योपाधिभिः सोऽयं कूटस्थासङ्गविग्रहः ।
अविद्यारोपितमलो विद्ययात्मा विशोध्यते ॥ (304)

निःसङ्गस्य ससङ्गेन कूटस्थस्य विनाशिना ।
आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते ॥ (305)

* कूटस्थदत्तानुज्ञं सत् प्रत्याख्यातं सहान्वयम् ।
कारकाद्यन्यतो मोहान्नात्मानं प्रति ढौकते ॥ (306)

‘ [1]एवमेवैषः’ इत्यादेरर्थमाह—**स्वदेहेति** । अवस्थात्वाविशेषात् जागरितमप्यध्यस्तमित्यर्थः । [303] सर्वस्य(मिथ्या) मिथ्यात्वे तत्त्वधीहेतुत्वं न स्यात्, अत्राह —**असत्येति** । श्रुत्याचार्यादिभिरिति यावत् । (304) [2]मलस्य कल्पितत्वं[3] साधयति—**निःसङ्गस्येति** । [305] कर्तृत्वादेर्नाध्यस्तत्वं [4]विदुषोऽपि तद्दर्शनात्, अत्राह—**कूटस्थेति** । कूटस्थदत्तानुज्ञत्वं स्पष्टयति–**प्रत्याख्यातमिति** । सकारणे संसारे निवृत्ते तद्धीः बाधितानुवृत्तेरित्यर्थः । [306]

---

1. **एवमेवैष इत्यादि** ‘एवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ।’ इति श्रुतिवाक्यम् ।

2. **मलस्य**—कर्तृत्वादिकस्य ।

3. **कल्पितत्वं साधयतीति** युक्तिविरोधेनेत्यादिः ।

4. **विदुषोऽपि तद्दर्शनादिति** कर्तृत्वस्याध्यस्तत्वे विद्यया अविद्यायां ध्वस्तायां आविद्यस्य तस्यानुवृत्तेरसंभवादिति भावः ।

* “किञ्च, आत्मनि कर्तृत्वादिमलः स्वतः परतो वा । नाद्यः, इत्याह–**कूटस्थेति** । परमपि वस्तु चेत्, नेति नेत्यादिश्रुतिविरोधः । अवस्तु चेत्, तस्य मोहाव्यतिरिक्तत्वात् तत्कृतं कर्तृत्वाद्यपि न वस्तु स्यात्, इत्याह—**प्रत्याख्यातमिति** ।” इति **शास्त्रप्रकाशिका** । ‘कूटस्थादत्तानुज्ञम्’ इति. **मु. पु.** पाठः ।

ननु कामवशादस्य त्वयोक्तं परिवर्तनम् ।
द्रष्टृदृश्यादिभावश्च कथं शुद्धस्तथा सति ॥ (307)

मैवं स्वतोऽवबुद्धत्वात् कुतोऽज्ञानेन संगतिः ।
अज्ञानसंगतिं मुक्त्वा न स्यात्तज्जेन संगतिः ॥ (308)

एवं यस्मात्स्वतः शुद्धो द्वितीयासंगतेरयम् ।
आत्मा तस्मात् स्वतो मुक्तः कूटस्थज्ञप्तिमात्रतः ॥ (309)

* न यथा श्रोत्रविज्ञानं रूपेणैति समागमम् ।
संसारेण तथैवात्मा कौटस्थ्यान्नैति संगतिम् ॥ (310)

इत्यर्थस्याववोधार्थं परो ग्रन्थोऽवतार्यते ॥ (311)

विशुद्धिं व्यतिरेकं च स्वप्नजाग्रदवस्थयोः ।
उक्त्वाऽऽत्मनोऽद्वयत्वं च सुषुप्ते चाधुनोच्यते ॥ (312)

एकोनविंशकण्डिकार्थनिरूपणम्

[1]'अथ यदा' इत्यादेः शङ्कामाह—नन्विति । [307] कामा(दि)[च] संबन्धात् शुद्धत्वम्, इत्याह—मैवमिति । [308] अविद्यातज्जसंबन्धाभावे फलमाह—एवमिति । [309] कामादिसंबन्धाभावं दृष्टान्तेनाह—न यथेति । [2]तत्र मानत्वेन (पंक्ति) '[3]अथ यदा' इत्यादिवाक्यमवतारयतीत्यर्थः । [310–311] [4]अस्यैवार्थान्तरमाह—विशुद्धिमिति । [312]

---

1. अथ यदा इत्यादेरिति अवतरणायेति शेषः ।

* श्रोत्रविज्ञानं—श्रोत्रजनितं शब्दादिज्ञानम् । रूपेण समागमं नैति—रूपविषयकं न भवतीति यावत् ।

2. तत्र मानत्वेन—आत्मनि कामसंबन्धाभावे मानत्वेन ।

3. अथ यदा इत्यादिवाक्यं—'अथ यदा सुषुप्तो भवति' इति वाक्यम् ।

4. अस्यैव—'अथ यदा' इत्यादिवाक्यस्यैव ।

न वेदेत्यात्मनः श्रुत्या कर्तृत्वं प्रतिषिध्यते ।
पश्यन्नपि यतः प्राज्ञो कौटस्थ्यान्न प्रपश्यति ॥ (313)

अथ यो वेदेति तथा ज्ञातृसाक्षित्वमात्मनः ।
प्रतीचोऽकारकत्वं नः सर्वत्र प्रतिपाद्यते ॥ (314)

क्वचित् प्रमातृवित्साक्षी क्वचित् प्रत्ययवित्परः ।
क्वचित् बाह्यार्थविच्चात्मा तत्कर्तृत्वं निषिध्यते ॥ (315)

परप्रयुक्तं वेत्तृत्वं यदस्य प्रत्यगात्मनः ।
संबन्धजत्वात्तस्यातः कस्येत्यत्राभिधीयते ॥ (316)

कर्मोत्थत्वात्प्रमात्रादेः तत्क्षये क्षयवत्त्वतः ।
षष्ठीयं कर्मणि न्याय्या द्वयाभावविवक्षया ॥ (317)

'यदा न कस्य चन वेद' इत्यादेरर्थवर्णनम्

'[1]न वेद' इत्यादेरर्थमाह—नेति । [313] ज्ञानकर्तृसाक्ष्येवात्मा, न तत्कर्ता, इत्यत्र श्रुत्यन्तरमाह—अथेति । 'अथ यो वेदेदं जिघ्राणा(ह्रिया)[ति स आ] त्मा' (छा. 8-12-4) इत्यादिना [2]मनःसाक्षित्वमुक्तमित्यर्थः । [314] तर्हि प्रमातृसाक्ष्येवात्मा [3]न प्रत्ययादेः, इत्यत्राह—क्वचिदिति । कथं तर्हि 'न वेद' इति निषेधः, अत्राह—तदिति । [315] 'कस्य' इति षष्ठ्यर्थमाह—परेति । आत्मनो ज्ञा(त)[तृ]त्वस्य विषयसंबन्धजत्वात् तत्र [4]संबन्धे ष(ष्ठ्ये)[ष्ठी]त्यर्थः । [316] कर्मणः प्रमात्रादेश्च यः कार्यकारणभावः, सोऽत्र युक्तः षष्ठ्यर्थः, इत्याह—कर्मेति । कर्मकार्यत्वान्मानादेः स्वापे कर्माभावे [5]तत्कार्याभावात्

---

1. न वेदेत्यादेरिति 'यदा न कस्य चन वेद' इति वाक्यस्य ज्ञानकर्तृत्वनिषेधरूपमर्थमाह इत्यर्थः ।
2. मनःसाक्षित्वमिति ज्ञात्रित्यादिः ।
3. न प्रत्ययादेरिति साक्षीति शेषः ।
4. संबन्धे षष्ठी—संबन्धवाचिका षष्ठी ।
5. तत्कार्याभावात्—कर्मकार्यस्य प्रमातृमानादेरभावात् ।

अप्यर्थे च न शब्दोऽयमभावस्यापि वारकः ।
शेषशेषितिरोभावे सुषुप्तिरिह भण्यते ॥ (318)

अथ केन क्रमेणायं सुषुप्तं प्रतिपद्यते ।
इति क्रमविधानार्थं हिता नामेति भण्यते ॥ (319)

आ नाभितस्तथा कण्ठात् हृदयं मध्यतः स्थितम् ।
सनालं पद्मकोशाभं पञ्चच्छिद्रमधोमुखम् ॥ (320)

स्वप्नाश्रयाणि हृन्मध्ये नीलाद्याभानि देहिनः ।
स्थानानि सुरमर्त्यादिजुष्टान्यस्य भवन्त्युत ॥ (321)

किमपि कर्त्रादिकं नानुभवतीत्यर्थः । [317] 'च न' इत्यस्यार्थमाह—**अप्यर्थे इति** । स्वापे जगद्भाववदभावोऽपि नास्तीत्यर्थः । कस्मादभावनिषेधः, अत्राह—**शेषेति** । अभावः शेषः गुणत्वात्, भावः शेषी प्राधान्यात् । [1]तयोर्विशेषज्ञानाभावे सुषुप्तिरित्यर्थः । [318]

'हिता नाम नाड्यः' इत्यादिवाक्यार्थवर्णनम्

नाडीस्वरूपनिरूपणपूर्वकं सुषुप्तिप्रतिपत्तिप्रकारकथनम्

'[2]हिता ना(मि)[म' इ]त्यादेः तात्पर्यमाह—**अ(प्ये)[थे]ति** । [319] नाडीस्वरूपं वक्तुं हृदयस्थानमाह—**आ नाभित इति** । [320]

हृदयच्छिद्राणां विनियोगमाह—**स्वप्नेति** । **सुरमर्त्यादिजुष्टानीति** । आदित्यः, चन्द्रः, अग्निः, पर्जन्यः, वियदिति देवाः । प्राणः, व्यानः, अपानः, उदानः, समान इति मर्त्याः । आदिपदेन चक्षुः, श्रोत्रं, मनः, वाक्, पायुरिति [3]प्राणभेदा गृह्यन्ते । ए(तां)[ताः] सुषयः जाग्रदवस्थायामिव स्वप्ने विषयज्ञान-

---

1. तयोः—भावाभावयोः ।
2. 'हिता नाम' इत्यादेरिति "हिता नाम नाड्यः द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते । ताभिः प्रत्यवसृप्य पुरीतति शेते ।" इति श्रुतिः ।
3. प्राणभेदा गृह्यन्ते इति एते सुरमर्त्यप्राणाः यथाक्रमं हार्देषु प्राग्दक्षिणप्रत्यगुदगूर्ध्वच्छिद्रेषु यथाक्रममेकैकशो वर्तन्ते । स्पष्टश्चायमर्थः छान्दोग्यतृतीयाध्याये ।

बिलानि सुषयश्चैता जाग्रद्धत्प्रत्ययोद्भवाः ।
* एकोत्तरं नाडिशतं विष्वक् ताभ्यो विनिर्गतम् ॥ (322)

प्रतीन्द्रियं दश दश निर्गता विषयोन्मुखाः ।
नाड्यः कर्मादिहेतूत्थाः स्वप्नादिफलभुक्तये ॥ (323)

वहन्त्यम्भो यथा नद्यः नाड्यः कर्मफलं तथा ।
* अनन्तैकोर्ध्वगा नाडी तया गच्छन्विमुच्यते ॥ (324)

एकैकस्याः पुनर्नाड्याः सूक्ष्मभेदाः प्रकीर्तिताः ।
द्वासप्ततिसहस्रैस्ते संख्याता योगचिन्तकैः ॥ (325)

कदम्बकुसुमोद्भूतकेसरा इव सर्वतः ।
प्रसृता हृदयान्नाड्यः याभिर्व्याप्तं शरीरकम् ॥ (326)

हितं फलं प्रयच्छन्ति यस्मात्तस्माद्धिताः स्मृताः ।
हृदयात्ता विनिष्क्रान्ता यथाऽर्काद्रश्मयस्तथा ॥ (327)

हेतव इत्यर्थः। सुषिभ्यो निर्गतनाडीनां संख्यामाह—एकेति। नाडीशतस्यायं [1]विनियोगश्चेत् परिशिष्टनाडीनां किं फलम्, अत्राह—अनन्तेति। [321-322-323-324] शतं चैका च हृदयस्य नाड्यश्चेत् 'द्वासप्ततिः सहस्राणि' इति [2]क(स्य)[थ]मुच्यते, अत्राह—एकैकस्या इति। (325) कथं तासां व्याप्तिरिति, तत्राह—कदम्बेति। (326) नाडीनां हितत्वं कथम्, अत्राह—हितमिति। (327) पुरीतत्पदस्य [3]हृदयवेष्टनार्थत्वात् कथं देह(स्या)[व्या]प्ति-

---

* विष्वक्—विविधगतित्वेन ।

1. अयं विनियोगः—पुरुषसंबन्धमापाद्य कर्मफलभोजकत्वे विनियोगः ।

* विमुच्यते इति 'तयोर्ध्वमायन्नमृतत्वमेति' इति श्रुतेरित्यर्थः ।

2. कथमुच्यते इति काठकादिश्रुत्यनुसारेण नाडीनां एकोत्तरशतसंख्याकत्वे 'द्वासप्ततिः सहस्राणि' इति प्रकृतश्रुतिः कथं संगच्छते इत्यर्थः ।

3. हृदयवेष्टनार्थत्वादिति तथा च तद्व्याप्तिरेव 'पुरीततमभिप्रतिष्ठन्ते' इति वाक्याल्लभ्यते इति भावः ।

पुरीतदभिधानेन हृद्वेष्टनमिहोच्यते ।
तत्तूपलक्षणं विद्याद्देहव्याप्तिविवक्षया ॥ (328)

स्वप्नकर्मसमुद्भूता वासना या हृदि स्थिताः ।
नाडीभिस्ता वितत्याऽत्मा स्वप्नान्पश्यति कामतः ॥ (329)

स्वाप्नान्भोगानशेषेण भुक्त्वा स्वप्नक्रियाक्षये ।
ताभिरेवोपसंहृत्य प्राज्ञो याति सुषुप्तताम् ॥ (330)

जाग्रत्स्वप्नक्रियोद्भूतान् भुक्त्वा भोगानशेषतः ।
इन्द्रियाण्युपसंहृत्य शेते नाडीभिरात्मनि ॥ (331)

सामान्यप्रज्ञया देहं संव्याप्यान्तर्बहिः श्रमात् ।
श्येनवत्परमं स्थानमात्माऽभ्येति सुषुप्तताम् ॥ (332)

धियोऽन्तःकरणस्येह स्थानं हृदयमिष्यते ।
तत्रेन्द्रियाणि सर्वाणि बुद्धितन्त्राणि सर्वदा ॥ (333)

रुच्यते, अत्राह—पुरीतदिति । तेन दे(हो)[ह:उ]पल(क्ष)[क्ष्य]ते इत्यर्थः । (328) '[1]ताभिः' इत्यादेरर्थमाह—स्वप्नेति । (329) तथापि कथं स्वा(पि)[पः] सिद्धः, अत्राह—स्वाप्नानिति । (330) स्वप्नानन्तरं जागरितमेव किं न स्यात्, अत्राह—जाग्रदिति । (331) केन प्रकारेण शेते, इत्याह—सामान्येति । यथा श्येनः परिपतनकृतश्रमनिरासार्थं(नाडी)[नीड]माश्रयते, तथा स्थान[2]द्वयजनितश्रमापोहाय स्वापं यातीत्यर्थः । (332) प्रवेशनिर्गमन-कर्तृत्वादात्मा परिच्छिन्नः, इत्याशङ्क्य, मैवं, अन्तःकरणद्वारकत्वात्प्रवेशादेः, इत्याह—धिय इति । (333) कि[3]मतः, अत्राह—यत इति । इन्द्रियाणि

---

1. ताभिरित्यादेरिति 'ताभिः प्रत्यवसृप्य पुरीतति शेते' इति वाक्यस्येत्यर्थः ।

2. स्थानद्वयजनितेति जाग्रत्स्वप्नावस्थाद्वयसंचारजनितेत्यर्थः ।

3. किमत इति इन्द्रियाणां बुद्धितन्त्रत्वात् किमित्यर्थः ।

यत एवमतस्तानि नाडीभिः कर्मणो वशात् ॥ (334)

प्रसारयति धीर्वृत्तीर्मत्स्यजालकवद्बहिः ।
प्रसार्यायतनस्थानि तानि धीरधितिष्ठति ॥ (335)

* जाग्रत्काले ततो ज्ञोऽयमभिव्यक्तविशेषधीः ।
व्याप्नोति निष्क्रियः सर्वान् भानुर्दश दिशो यथा ॥ (336)

ता एवेन्द्रियवृत्तीः स्वार्थैस्तन्यखचिता यदा ।
संयच्छति प्रतीच्यात्मा स्वपितीति तदोच्यते ॥ (337)

बुद्ध्युपाध्यनुरोधेन प्रतीचः प्रभवाप्ययौ ।
विक्षेपलयहीनस्तु स्वतः कुम्भखवत्परः ॥ (338)

ताभिः प्रत्यक्सुप्यात्मा वृत्तीर्नाडीभिरानयन् ।
तप्तायोवच्छरीरं स्वं व्याप्य शेते स्व आत्मनि ॥ (339)

स्वहेतुमात्रया स्थानमिन्द्रियाणां न कार्यतः ।
* यतोऽतश्चिन्निभेनैव व्याप्तिः स्यात्कारणात्मना ॥ (340)

विषयोन्मुखानि करोति, तदनन्तरं धीः वृत्तीः—शब्दादिज्ञानानि प्रवर्तयतीत्यर्थः । तथापि इन्द्रियप्रेरकत्वात् आत्मनः सक्रियत्वम्; अत्राह—**प्रसार्येति** । (334-335-336) एवं निर्गमने बुद्धेरुपाधित्वमुक्त्वा, प्रवेशेऽपि [1]तदाह—**ता एवेति** । (337) बुद्धेराविर्भावतिरोभावाभ्यां आत्मनः सक्रियत्वं [नेति]दृष्टान्तेनाह—**बुद्धीति** । (338) 'ताभिः' इत्यादेरर्थमुपसंहरति—**ताभिरिति** । (339) इन्द्रियाणां[स्व]रूपेणावस्थानात् कथमुक्तस्वापसिद्धिः, अत्राह—**स्वहेत्विति** ।

---

* **अभिव्यक्तविशेषधीः**—व्यक्तचैतन्याभासाख्यविशेषयुक्तधीसहितः ।

1. तदाह—बुद्धेरुपाधित्वमाह ।

* **चिन्निभेन**—चिदाभासेन ।

" देहेन्द्रियाणां स्वापे संहारात् कुतः शरीरं व्याप्य शयनमित्याशङ्क्याह—**स्वहेत्विति** । स्वहेतुमात्रया कारणात्मनेति संबन्धः । देहेन्द्रियाणां न स्वापे स्वरूपेणावस्थितिः, किन्तु कारणात्मना । अत एव तदात्मकदेहादेः चिदाभासव्याप्तिसंभवात् देहं व्याप्य स्वात्मनि शयनं युक्तमित्यर्थः । तदा देहादेराभासव्याप्तिरिष्टा-चेत्, जागरादिभेदासिद्धिः, इत्याशङ्क्याह—

* सुषुप्तौ न शरीरेण संगतिः प्रत्यगात्मनः ।
नापि बुद्ध्यादिभिः साक्षात् तत्स्थानासंगतेर्भवेत् ॥ (341)

तीर्णो हीति तथा चैतदुत्तरत्राभिधास्यते।
सुषुप्तेऽत्र पिता चेति सर्वसंबन्धवारणम् ॥ (342)

सर्वसंसारदुःखौघव्यतीतेयं परात्मनः ।
अवस्थेत्यत्र दृष्टान्तः स यथेत्यभिधीयते ॥ (343)

स्तनन्धयो यथा बालो रागद्वेषविवर्जितः ।
तदभावाद्धि कुर्वन्ति चेतो न विषयाः सदा ॥ (344)

अप्ररूढेन्द्रियत्वाच्च रागद्वेषाद्यसंप्लुतिः ।
मृदुकण्टकवत्तद्धीर्नालं वेद्धुं स्वगोचरान् ॥ (345)

इन्द्रियाणि कारणात्म(नो)[ना]चिता व्याप्यन्ते, न कार्यात्मनेत्यर्थः । (340) स्थूलत्वाद्यभिमानो देहे विशेषव्याप्तिः । बुद्ध्यादौ ज्ञातृत्वाद्यभिमानो विशेषव्याप्तिः । स्वापे तदभावे हेतुमाह—सुषुप्ताविति । (341) अत्र मानमाह — तीर्णो(दी)[ही]ति । '[तीर्णो हि]तदा सर्वान् शाकान् हृदयस्य भवति । अत्र पिता अपिता भवति ' इत्यादि वाक्यं च विशेष(:।)व्याप्त्यभावे मानमित्यर्थः । (342)

'स यथा कुमारो वा ' इत्यादिश्रुत्यर्थवर्णनम्

'[1]स यथा ' इत्यादिश्रुतेः तात्पर्यमाह—सर्वेति । (343) कुमारदृष्टान्ते विवक्षितमर्थमाह—स्तनन्धय इति । (344) रागाद्यसंभवे हेत्वन्तरमाह—

---

* सुषुप्ताविति तत्र चितः सामान्यव्याप्तिरेव, न विशेषव्याप्तिः । अतो देहे स्थूलत्वाद्यभिमानस्य बुद्ध्यादिषु ज्ञातृत्वाद्यभिमानस्य चाभावाद्विशेष इत्यर्थः । " इति शास्त्रप्रकाशिका ।

1. स यथा इत्यादिश्रुतेरिति "स यथा कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वा शयीत, एवमेवैष एतच्छेते ।" इति श्रुतेरित्यर्थः ।

सर्वत्राव्याहताज्ञश्च विधेयप्रकृतित्वतः ।
राजा वाऽतिसुखी लोके प्ररूढेन्द्रियवानपि ॥ (346)

विज्ञाताशेषतत्त्वो वा ब्राह्मणः कृतकृत्यतः ।
आनन्दस्य परां काष्ठामतिघ्नीमेत्य निर्वृतः ॥ (347)

बालादित्रयमप्येतदेको दृष्टान्त इष्यते ।
बालमौग्ध्यमदान्धत्वनिवृत्त्यर्थं तथोच्यते ॥ (348)

बालस्य निर्विवेकत्वात् सविवेकः क्षितीश्वरः ।
तन्मदान्ध्यनिषेधार्थं महाब्राह्मण उच्यते ॥ (349)

अतीत्य दुःखहेतूंन्या हन्ति दुःखान्यशेषतः ।
आनन्दस्य परा निष्ठा तेनातिघ्नीति भण्यते ॥ (350)

निर्विकारात्मनां यस्माद्बालादीनां स्व आत्मनि ।
अतीव जायते ह्लादो दृष्टान्तः स विवक्षितः ॥ (351)

परसंबन्धमेत्यात्मा कार्यकारणरूपिभिः ।
ऐकात्म्यलक्षणं साक्षात् शेते इत्यभिधीयते ॥ (352)

अप्ररूढेति । (345) 'महाराजो वा' इत्यस्यार्थमाह—सर्वत्रेति । (346) महाब्राह्मणदृष्टान्तं व्याचष्टे—विज्ञातेति । (347) महाब्राह्मणः एक एव दृष्टान्तः, इति दर्शयितुमाह—बालादीति । एतत् बालादित्रयमपि न दृष्टान्तः, किन्तु एक एव दृष्टान्त इत्यर्थः । तदेव व्यनक्ति—बालेति । बालो मूढः, मदान्धो राजा । तद्दोषद्वयनिरासाय महाब्राह्मणोक्तिरित्यर्थः । (348) बाले दोषं दृष्ट्वा महाराजस्य गृहीतिः । तत्रापि दोषं दृष्ट्वा, महाब्राह्मणग्रहात् स एव दृष्टान्तः, इत्याह—बालस्येति । (349) अतिघ्नीशब्दार्थमाह—अतीत्येति । (350) [1]दृष्टान्तभेदं स्वीकृत्यैव विवक्षितमाह—निर्विकारेति । (351) 'एवमेव' इत्यादौ शयनशब्दार्थमाह—प(रमि)[रे]ति । अहङ्कारादिना साकं जीवो

---

1. दृष्टान्तभेदं—बालमहाराजमहाब्राह्मणरूपं दृष्टान्तत्रयम् ।

अत्यन्तसंनिकृष्टानामपि भिन्नात्मनां मितेः ।
लोचनस्थाञ्जनादीनां न दृष्टिपथतेष्यते ॥ (353)

किमु प्रध्वस्तनिःशेषभेदहेताविशात्मनि ।
ग्राह्यग्राहकसंबन्धः सर्वभेदापनोदिनि ॥ (354)

स्वस्थावस्थैव येतेषां प्रसिद्धा जगतीक्ष्यते ।
दृष्टान्तत्वेन स्वापस्य सैव साक्षाद्विवक्ष्यते ॥ (355)

दार्ष्टान्तिकत्वेन यतः सुषुप्तोऽत्र विवक्षितः ।
नापि बालादिस्वापस्य विशेषः कश्चिदीक्ष्यते ॥ (356)

* अव्याहतमतिर्बालः सर्वातिशयवर्जिताम् ।
आनन्दस्य परां निष्ठामतिघ्नीं प्रतिपद्यते ॥ (357)

यावद्यावत्प्ररूढत्वं रागादेर्जायते शिशोः ।
तावत्तावत्प्ररूढत्वं दुःखस्याप्यभिजायते ॥ (358)

ब्रह्मणा ता(र्दा)[दा]त्म्यसंब(न्धे)[न्धं] स्वापे यातीति शेते इत्युच्यते इत्यर्थः । (352) स्वापे ब्रह्मैक्यं गतश्चेत्, अहं ब्रह्मास्मीति कस्मात् न जानाति, तत्राह —अत्यन्तेति । अत्यन्तसंनिकर्षस्य ज्ञानविरोधित्वात् तथाऽनवगम इत्यर्थः । (353-354) दृष्टन्तश्रुत्या [1]बालादिस्वापस्यैव दृष्टान्तत्वोक्तेः दृष्टान्त [2]दार्ष्टान्तिकयोरविशेषः, अत्राह—स्वस्थेति । (355) [3]अत्र हेतुमाह—दार्ष्टान्तिकत्वेनेति । हेत्वन्तरं वदन् निगमयति—नापीति । (356) स्वस्थावस्थापि सुखाभावात् न दृष्टान्तः, अत्राह—अव्याहतेति । (357) तस्यापि अशनायादिमत्त्वात् कथं निरतिशयसुखम्—अत्राह, यावदिति । दुःखबहुत्वं सुखाल्पत्वप्रयोजकमित्यर्थः ।

---

1. बालादिस्वापस्यैव दृष्टान्तत्वोक्तेरिति 'यथा कुमारो वा...अतिघ्नीमानन्दस्य गत्वा शयीत' इति शयनशब्दितस्वापस्य दृष्टान्तत्वाभिधानादित्यर्थः ।
2. दृष्टान्तदार्ष्टान्तिकयोरविशेषः—तयोरभेदः ।
3. अत्र हेतुमाह—स्वस्थावस्थाया दृष्टान्तत्वे हेतुमाह ।

* "बालस्याविवेकात् न स्वस्थावस्था परानन्दरूपास्ति । तत् कथं तद्दृष्टान्तसिद्धिरित्याशङ्क्याह—अव्याहतेति ।" इति शास्त्रप्रकाशिका ।

सृष्टावन्यपरायां तु न चोद्यस्यास्ति संभवः ।
* कौटस्थ्यात् कथमुत्पत्तिरचित्कं चेतनात्कथम् ॥ (388)

निःसाधनं च कार्याणि कथं कुर्यादनेकधा ।
विश्वरूपसमुत्पत्तिरेकरूपात्कथं भवेत् ॥ (389)

इत्येवमादिचोद्यानां पुंस्वभावानुरोधतः ।
परिहारवचः श्रौतं न च वस्त्वनुरोधतः ॥ (390)

ऊर्णनाभिः स्वयं कर्ता प्रयुङ्क्ते कर्म चात्मना ।
तन्तून्स्वतः प्रसिद्धेन करणेन च तन्तुना ।
गमिक्रियां साधयति तथैवात्रापि चात्मनि ॥ (391)

अचेतनो यथा जालः ऊर्णनाभेः सचेतनात् ।
आकाशादि जगत्कार्यमात्मनश्चेतनात्तथा ॥ (392)

सृष्टेरन्यार्थत्वे फलमाह—**सृष्टाविति** । चोद्यान्याह—**कौटस्थ्यादिति** । (388-389) सृष्टेरनिर्वाच्यत्वात् चोद्यानवतारे, 'स यथा' इत्यादिपरिहारवाक्यानर्थक्यम्, अत्राह—**इत्येवमादीति** । सापेक्षत्वे अनीश्वरत्वं, अनपेक्षत्वे नैर्घृण्यादिकमित्यादिपदार्थः । पुंबुद्ध्यनुसारेण प्रादुर्भवतः चोद्यस्य परिहारायेति भावः । (390)

विंशकण्डिकार्थनिरूपणम्

तात्पर्यमुक्त्वा [1]वाक्यं व्याचष्टे—**ऊर्णेति** । किं तत् प्रयुज्यमानं कर्म, तदाह—**तन्तूनिति** । स्वयमेव कर्त्रा करणं च त्यक्त्वा अनेकधा सृष्टत्वमाह—**स्वत इति** । [2]दार्ष्टान्तिके योजयति—**तथेति** । (391) 'चेतनात्कथम्' (वा. 388) इत्येतत् परिहरति—**अचेतन इति** । (392) ('अ)[य]थाग्नेः' इत्यादि व्याकरोति

---

* 'कूटस्थात्' इति मु. पु. पाठः ।

1. **वाक्यं**—'स यथोर्णनाभिः' इत्यादिवाक्यम् ।
2. **दार्ष्टान्तिके**—आत्मनि । 'ऊर्णनाभिः' इति वार्तिके 'निःसाधनं च कार्याणि कथं कुर्यादनेकधा' (वा. 389) इति चोद्यं परिहृतं भवति ।

कुत आगादिति त्वस्य प्रश्नार्थाविश्चिकीर्षया ।
सुषुप्ताज्जाग्रदापत्तिर्यथा तदधुनोच्यते ॥ (365)

नन्ववस्थाद्यो हि यत्रेह स तस्मादन्यतो व्रजन् ।
वेश्मतो ग्रामतो वाऽसौ तत एव व्रजेद् ध्रुवम् ॥ (366)

तस्मात्सामर्थ्यतः सिद्धः उत्तरप्रश्ननिर्णयः ।
* तन्निर्णयार्थमारम्भो न कार्यो जामिदोषतः ॥ (367)

न निमित्ताद्यर्थतापि पञ्चम्या उपपद्यते ।
ऊर्णनाभ्यग्निदृष्टान्ते न निमित्तादि गम्यते ॥ (368)

* प्रत्युक्तौ न निमित्तादि यदि साक्षात्समीक्ष्यते ।
अपादानार्थतैवास्तु दोषस्यान्यत्र दर्शनात् ॥ (369)

(सि)[शु]द्धिः फलमित्यर्थः । (364) उत्तरसंगतिमाह—**कुत इति** । **अस्य**—जीवस्य । सुषुप्तादि[ति]संबन्धः । (365)

काश्यप्रश्नयोः पुनरुक्तिदोषशङ्का, तत्परिहारश्च

[1]पुनरुक्तिं वक्तुं लौकिकन्यायावष्टम्भेन चोदयति—[**नन्विति** ।] (366) फलितमाह—**तस्मादिति** । [2]प्रथमप्रश्ननिर्णयेनो[3]त्तरप्रश्ननिर्णयादित्यर्थः । (367) 'कुतः' इति पञ्चम्याः निमित्तं, आक्षेपो वाऽर्थः, नापादानम् । अतो न पुनरुक्तिः, अत्राह—**न निमित्तेति** । ब्रह्मस्थस्येहागमे निमित्तं न पृच्छ्यते, [4]नापि तत् क्षिप्यते इत्यर्थः । (368) तर्हि अपादानार्थैवास्तु पञ्चमी, इति शङ्कते—

---

1. **पुनरुक्तिमिति** काश्यकृतप्रश्नयोरित्यादिः ।
2. **प्रथमप्रश्ननिर्णयेन**—'क्वैष तदाऽभूत्' इति प्रश्ननिर्णयेन ।
3. **उत्तरप्रश्नेति** 'कुत एतदागात्' इति प्रश्नेत्यर्थः ।

* **जामिदोषतः**—पौनरुक्त्यदोषात् ।

4. **नापि तत् क्षिप्यते**—नापि आगमननिमित्तं क्षिप्यते ।

* **प्रत्युक्ताविति** प्रतिवचनानुसारेणैव प्रश्नवाक्यतात्पर्यस्य वक्तव्यत्वादिति भावः ।

नन्वत्रापि समो दोषो वाक्यस्य पुनरुक्तता ।
नैवं, यतोऽखिलध्वान्तकार्यध्वंसो विवक्षितः ॥ (370)

अव्यावृत्ताननुगतं पूर्णं ब्रह्म विवक्षितम् ।
प्रत्यङ्मात्रैकयाथात्म्यं न दोषो जामिता ततः ॥ (371)

विषयौ द्वावुपन्यस्तौ विद्याविद्यात्मनोरिह ।
आत्मेत्येवेति विद्याया विषयः प्रागुदाहृतः ॥ (372)
अविद्याविषयस्तावत्संसारानर्थ ईरितः ।
क्रियाकारकभेदेन नामरूपक्रियात्मकः ॥ (373)

तत्राविद्योद्भवं कार्यं यावत्किञ्चिद्विवक्षितम् ।
तत्प्रत्यपादि निखिलं पूर्वं श्रुत्यैव यत्नतः ॥ (374)

अविद्याप्रतिपक्षाया विद्याया विषयोऽधुना ।
प्रवक्तव्योऽतस्तद्योग्यौ प्रश्नौ द्वौ समुदाहृतौ ॥ (375)

प्रत्युक्ताविति । (369) पुनरुक्तिमुक्तां परः स्मारयति —**नन्विति** । परिहरति —**नैवमिति** । प्रथमप्रश्नेन शुद्धिः विवक्षितेत्यर्थः । (370) उत्तरप्रश्नतात्पर्यमाह —**अव्यावृत्तेति** । प्रश्नद्वयच्छलेन सकार्याविद्यानिर्मुक्तप्रत्यग्ब्रह्म गः प्रतिपिपादयिषितत्वात् न पुनरुक्तिः, इत्याह —**न दोष इति** । (371) प्रश्नद्वयस्यैतदर्थत्वं स्पष्टयितुं [1]**तृतीयार्थ**मनुवदति—**विषयाविति** । (372-373) तर्हि सूत्रत्वाविशेषात् अविद्याकार्यमन्यत्र प्रतिपादनीयम्, अत आह—**तत्रेति** । 'अथ योऽन्याम्' (बृ. 3-4-10) इति अज्ञानं सकार्यं सूत्रितम् । तच्च सूत्रमातृतीयसमाप्तेः विवृतमित्यर्थः । (374) [2]विद्यासूत्रस्य परिशिष्टस्य व्याख्येयत्वात्, तदर्थं प्रश्नद्वयप्रवृत्तिः, इत्याह—**अविद्येति** । (375) कथमविद्याप्रतिपक्षा विद्या,

---

1. **तृतीयार्थं**— तृतीयाध्यायार्थम् ।

2. **विद्यासूत्रस्य**—'आत्मेत्येवोपासीत' इति वाक्यस्य ।

* हेतुस्वरूपकार्याणि विरोधीनि परस्परम् ।
अविद्याविद्ययोर्यस्मात्तद्योग्यप्रश्नगीरतः ॥ (376)

कारकव्यवहारोऽयमविद्याविषयः सदा ।
आधाराधेययोर्भित्तौ तयोः कारकतेष्यते ॥ (377)

तद्वद्गच्छति यो यस्माद्भिदे सत्येव याति सः ।
इत्यविद्याव्यवस्थेयं विद्यायास्तद्विपर्ययः ॥ (378)

क्रियाकारकभेदाद्या लोकतः शेमुषी त्वभूत् ।
यथास्थितात्मयाथात्म्यसम्यग्ज्ञानेन बाध्यते ॥ (379)

नान्योऽयमात्माऽन्यत्राभून्नान्योऽन्यस्मात्तथैति च ।
इति निःशेषतन्मोहकार्यध्वंसो विवक्षितः ॥ (380)

अभेदव्यतिरेकाभ्यां वस्त्वन्तरमिहात्मनः ।
श्रुत्या निषिध्यते साक्षात् भेदहेतोर्निषेधतः ॥ (381)

अत्राह--**हेतिवति** । [376] विरोधं दर्शयितुमविद्याकार्यमाह—**कारकेति** । आधाराधेयव्यवहारस्य अविद्याकार्यत्वे हेतुमाह—**आधारेति** । [377] [1]अपादानकर्तृभावस्य [2]तथात्वे [3]युक्तिमाह— **तद्वदिति** । क्रियाकारकादिभेद-रहितं वस्तु विद्याविषयः, इत्याह—**विद्याया इति** । (378) इत्थं [4]व्यवस्थायां फलमाह—**क्रियेति** । (379) प्रतिवचनतात्पर्यमाह—**नान्य इति** । आधाराधेयभावापादानकर्तृभावादिनिरासो विवक्षित इत्यर्थः । (380) हेतुमाह—**अभेदेति** । इ(ति)[ह]—प्रतिवचनोक्ता(द्वि)[वि]ति यावत् । भेदहेतोः—

---

* **हेतुस्वरूपकार्याणि विरोधीनि परस्परमिति** अविद्याया ज्ञापकः अविवेकः रागादिः । विद्यायास्तूत्पादकः ज्ञापकश्च विवेकवैराग्यादिः । तयोः स्वरूपं प्रकाशः अप्रकाशश्च । कार्यं, बन्धः तद्ध्वंसश्च । एतानि मिथो विरुद्धानीत्यर्थः ।

1. **अपादानकर्तृभावस्य**—अपादानत्वकर्तृत्वयोः ।
2. **तथात्वे**—अविद्याकार्यत्वे ।
3. **युक्तिं**—भेदसापेक्षत्वरूपां युक्तिम् ।
4. **व्यवस्थायां**—विद्याऽविद्याविषयव्यवस्थायाम्

नन्वु प्राणादिभिः सद्भिः कथं निर्भेदतात्मनः ।
नात्मन्येव तदध्यासात् शुक्तिकारजतादिवत् ॥ (382)

कथं तदिति दृष्टान्त ऊर्णनाभ्यादिरुच्यते ।
वास्तवं वृत्तमापेक्ष्य न त्वियं सृष्टिरात्मनः ॥ (383)

नासतो जन्मना योगः सतः सत्त्वान्न चेष्यते ।
कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनिः ॥ (384)

* स्वप्रबोधप्रसिद्ध्यर्थं सृष्टिव्याजोऽयमुच्यते ।
कौटस्थ्यात्त्वात्मनः सृष्टिर्न कथञ्चन युज्यते ॥ (385)

निःशेषवेदसिद्धान्तविद्द्भिरपि भाषितम् ।
गौडाचार्यैरिदं वस्तु यथास्माभिः प्रपञ्चितम् ॥ (386)

'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥' (387)

अज्ञानस्येत्यर्थः । (381)

वस्त्वन्तरनिषेधमाक्षिपति—**नन्विति** । प्राणादेर्मिथ्यात्वात् [1]तदुपपत्तिः, इत्याह—**नेति** । (382) तत्र [2]प्रमाणं पृच्छति—**कथमिति** । [3]उत्तरं वाक्यं मानमित्याह—**दृष्टान्त इति** । अत्रोच्यमानस्र(ष्टो)[ष्टे]रवास्तवत्वं प्रतिजानीते—**वास्तवमिति** । (383) [4]तदुपपादयति—**नासत इति** । (384) आत्मधीशेषत्वाच्च सृष्टिर्न वास्तवी, इत्याह—**स्वप्रबोधेति** । (385) सृष्टेरात्मज्ञानार्थत्वे वृद्ध(न)संवादमाह—**निःशेषेति** । (386) [5]तद्वाक्यमाह—**मृल्लोहेति** । (387)

---

1. **तदुपपत्तिः**—वस्त्वन्तरनिषेधोपपत्तिः ।
2. **तत्र प्रमाणं**—प्राणादेर्मिथ्यात्वे प्रमाणम् ।
3. **उत्तरं वाक्यं**—"यथोर्णनाभिः तन्तुनोच्चरेत्, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति । एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति ।" इति वाक्यम् ।
4. **तदुपपादयति**—अवास्तवत्वमुपपादयति ।

* 'पुंस्प्रबोधप्रसिद्ध्यर्थम्' इति मु. पु. पाठः ।

5. **तद्वाक्यं**—गौडाचार्यवाक्यम् ।

सृष्टावन्यपरायां तु न चोद्यस्यास्ति संभवः ।
* कौटस्थ्यात् कथमुत्पत्तिरचित्कं चेतनात्कथम् ॥ (388)

निःसाधनं च कार्याणि कथं कुर्यादनेकधा ।
विश्वरूपसमुत्पत्तिरेकरूपात्कथं भवेत् ॥ (389)

इत्येवमादिचोद्यानां पुंस्वभावानुरोधतः ।
परिहारवचः श्रौतं न च वस्त्वनुरोधतः ॥ (390)

ऊर्णनाभिः स्वयं कर्ता प्रयुङ्क्ते कर्म चात्मना ।
तन्तूंस्वतः प्रसिद्धेन करणेन च तन्तुना ।
गमिक्रियां साधयति तथैकत्रापि चात्मनि ॥ (391)

अचेतनो यथा जालः ऊर्णनाभेः सचेतनात् ।
आकाशादि जगत्कार्यमात्मनश्चेतनात्तथा ॥ (392)

सृष्टेरन्यार्थत्वे फलमाह—**सृष्टाविति** । चोद्यान्याह—**कौटस्थ्यादिति** । (388-389) सृष्टेरनिर्वाच्यत्वात् चोद्यानवतारे, 'स यथा' इत्यादिपरिहारवाक्यानर्थक्यम्, अत्राह—**इत्येवमादीति** । सापेक्षत्वे अनीश्वरत्वं, अनपेक्षत्वे नैर्घृण्यादिकमित्यादिपदार्थः । पुंबुद्ध्यनुसारेण प्रादुर्भवतः चोद्यस्य परिहारायेति भावः । (390)

विंशकण्डिकार्थनिरूपणम्

तात्पर्यमुक्त्वा [1]वाक्यं व्याचष्टे—**ऊर्णेति** । किं तत् प्रयुज्यमानं कर्म, तदाह—**तन्तूनिति** । स्वयमेव कर्त्रा करणं च त्यक्त्वा अनेकधा सृष्टत्वमाह—**स्वत इति** । [2]दार्ष्टान्तिके योजयति—**तथेति** । (391) 'चेतनात्कथम्' (वा. 388) इत्येतत् परिहरति—**अचेतन इति** । (392) ('अ)[य]थाग्नेः' इत्यादि व्याकरोति

---

* 'कूटस्थात्' इति मु. पु. पाठः ।

1. **वाक्यं**—'स यथोर्णनाभिः' इत्यादिवाक्यम् ।

2. **दार्ष्टान्तिके**—आत्मनि । 'ऊर्णनाभिः' इति वार्त्तिके 'निःसाधनं च कार्याणि कथं कुर्यादनेकधा' (वा. 389) इति चोद्यं परिहृतं भवति ।

विस्फुलिङ्गा यथा चाग्नेर्जायन्तेऽग्निस्वभावकाः ।
सुषुप्तादात्मनस्तद्वत् प्राणादीनां समुद्भवः ॥ (393)

सुषुप्तोदाहृतिर्येयं तया समुपलक्ष्यते ।
विश्वाभिव्यक्तितः पूर्वं ब्रह्मैवानामरूपकम् ॥ (394)

सर्वास्वपनिषत्स्वेवं कारणं नान्यदात्मनः ।
श्रूयतेऽतः परात्मैव जगतः कारणं परम् ॥ (395)

ब्रह्मण्यस्तमितेऽत्यर्थं जगत्यस्मिन्नशेषतः ।
* जगत्प्रसूतौ को हेतुस्तदन्याव्यतिरेकतः ॥ (396)

अस्तीशो व्यतिरिक्तश्चेत् सोऽपि केन प्रवर्तितः ।
जगन्निर्मिनुयादेतत् स्वतश्चेत्सर्वदा न किम् ॥ (397)

—**विस्फुलिङ्ग** इति । (393) 'सुषुप्तादात्मनः' इत्युक्तत्वात् [1]सुप्तिस्थानस्यापि हेतुता स्यात्, अत्राह—**सुषुप्तेति** । 'अस्मादात्मनः' इत्य[न]भिव्यक्तनामरूपं ब्रह्म लक्ष्यते इत्यर्थः । (394) प्रधानादिकं जगत्कारणं, न ब्रह्म, तत्राह—**सर्वास्विति** । (395)

स्वयूथ्यमतनिरासः

एवं स्वमतमुदीर्य, स्वयूथ्यमतं निरस्यति — **ब्रह्मणीति** । ब्रह्मणि लीनस्य पुनरु(च्यते)[त्पत्तेः] न ब्रह्म हेतुः, अविकारित्वात् । नाप्यन्यत्, अभावादित्यर्थः । (396) **तार्किकैः** उपादानातिरिक्ततदधिष्ठात्रीश्वरस्वीकारात् तदधीनेयं सृष्टिः, [2]इत्याह—**अस्तीति** । दूषयति—**सोऽपीति** । स्वतः प्रवृ(त्तं)[त्तः], कर्मप्रयु(क्त)-[क्तो वा] इति विकल्पः । तत्राद्यं दूषयति—**स्वतश्चेदिति** । (397) द्वितीयं

---

1. **सुप्तिस्थानस्यापि हेतुता स्यादिति** सुषुप्तिविशिष्टात्मनः हेतुत्वे विशेषणीभूतसुप्तेरपि हेतुत्वादिति भावः ।

* **तदन्याव्यतिरेकतः**—ब्रह्मान्यस्य ब्रह्मव्यतिरेकेणाभावादिति यावत् ।

2. **इत्याहेति** तटस्थेश्वरवादी इत्यादिः ।

*ऐश्वर्यं पारतन्त्र्यं च नापि संभाव्यते मितेः ।
नापि कार्यं विलीनत्वात् स्वात्मोत्पत्तौ प्रवर्तते ॥ (398)

भिन्नं चेत्कारणात्कार्यं कार्यकारणता तयोः ।
पृथक् प्रसिद्धयोः केयं हिमवद्विन्ध्ययोरिव ॥ (399)

*अथाभिन्नं तदैकत्वात् कार्यकारणता कुतः ।
नापि निष्क्रियरूपं सत्कारणत्वं समश्नुते ॥ (400)

तथाचाक्रियमाणं सत्कथं कार्यमिहोच्यते ।
क्रियाशून्यं च यद्वस्तु तच्चाकारकमिष्यते ॥ (401)

प्रत्याह—**ऐश्वर्यमिति** । स्वभाववादसंभवात् किं कारणेन, अत्राह—**नापीति** । सदोत्पत्तिप्रसक्तेरित्यर्थः । (398) [1]किञ्च, कार्यकारणयोर्भेदः, अभेदो वा । आद्यं दूषयति—**भिन्नमिति** । (399) द्वितीयं प्रत्याह—**अथेति** । कुर्वत् कारणम्, अकुर्वत्कारणं वा । आद्ये, अन[2]वस्था कार्यकारणभेदासिद्धिश्च । द्वितीयं प्रत्याह—**नापीति** । सदा कार्यप्रसङ्गादित्यर्थः । (400) कार्यमपि क्रियमाणमक्रियमाणं वा । आद्ये अनवस्था । क्रियाया अपि क्रियमाणत्वापातात् । अन्त्यं दूषयति—**तथेति** । आत्मादेरपि कार्यत्वापत्तेरित्यर्थः । अकुर्वतः कारणत्वे तवापसि[3]द्धान्तोऽपि, इत्याह—**क्रियेति** । (401) कालादिवशात् कार्योत्पत्तिव्यवस्था-

---

* **नापि संभाव्यते मितेरिति** न प्रामाणिकमित्यर्थः ।
अनपेक्ष्यैव कारणं, कार्यमेव स्वोत्पत्तौ व्याप्रियते इति स्वभाववादः ।

1. कार्यकारणभावमेव दूषयति—**किञ्च, कार्यकारणयोर्भेदः अभेदो वेति** ।

* **एकत्वात् कार्यकारणता कुत इति** न हि स्वस्यैव स्वपूर्ववर्तित्वरूपं कारणत्वं घटते इति भावः ।

2. **अनवस्था कार्यकारणभेदासिद्धिश्चेति** कुर्वत्त्वस्य, कादाचित्कत्वे, तत्सिद्धये कुर्वत्त्वान्तरापत्त्या अनवस्था । कुर्वत्त्वस्य अकादाचित्कत्वे, सदा, कुर्वत्त्वेन कार्यस्य भावात् कार्यकारणभेदासिद्धिरित्यर्थः ।

3, **अपसिद्धान्त इति** क्रियां कुर्वत् कारकमिति तवाङ्गीकारादिति भावः ।

* लयेनैव समाप्तत्वात् कालकर्मादिकारणम् ।
स्वात्मोत्पत्तावशक्तं तद् व्यक्तं सामर्थ्यभाग्यतः ॥ (402)

* नित्यशक्तित्वपक्षेऽपि युगपत्प्रभवादिकम् ।
प्राप्नोति सर्वकार्यस्य न च तद्वर्तते तथा ॥ (403)

शक्त्युत्पत्त्यभ्युपेतौ च कारणं स्यादशक्तिमत् ।
अथ शक्त्यन्तराच्छक्तिरनवस्था प्रसज्यते ॥ (404)

किमपेक्ष्य व्यपेतत्वं कालोऽयं वार्तमानिकः ।
यायादनागतत्वं च तस्यैक्याभागवत्त्वतः ॥ (405)

माशङ्क्याह—**लयेनेति** । (402) कुर्वतोऽकुर्वतो वा न कारणत्वम्, किन्तु शक्तिमत् कारणमिति चेत् । सा शक्तिः नित्या, अनित्या वा । आद्यं प्रत्याह—**नित्येति** । (403) विमतं न शक्तिजन्यं कार्यत्वात् शक्तिवदिति द्वितीयं दूषयति—**शक्तीति** । [1]शक्तेरपि तत्पूर्वत्वात् सा[2]ध्यवैकल्यम्, इत्यत्राह—**अथेति** । (404) नियतप्राक्सत् कारणम्, नियतोत्तरसत् कार्यमिति व्यवस्थामाशङ्क्य, तन्निरासार्थं कालभेदं दूषयति—**किमिति** । किम(न्यया)[न्या]पे(क्षा)[क्षया],

---

* **लयेनैवेति** कालः न नित्यः 'स संवत्सरोऽभवत्' इति श्रुत्या तस्य कार्यत्वावगमात् । एवं कर्मापि कार्यम् । तदुभयमपि प्रलये स्वकारणे अज्ञाते ब्रह्मणि लीनम् । सृष्टिकाले कालस्यैवोत्पत्तिः केनेति विचारे, स्वोत्पत्तावेवाशक्तस्य कालस्य इतरकार्यव्यवस्थापकत्वं दूरापेतम् । अज्ञातब्रह्मात्मना कालस्य सत्त्वेऽपि स्वरूपेणाभिव्यक्तेरभावात् कार्यजननसामर्थ्यासंभवादित्यर्थः । **लयेनैव**—लीयते अस्मिन्निति व्युत्पत्त्या लयाधिकरणाज्ञातब्रह्मात्मनैवेत्यर्थः ।

* "कार्यत्वे कालादेः तत्कारणमेव सर्वस्य कारणम्, इतरत् कार्यमिति व्यवस्थामाशङ्क्य, तदपि शक्तिमत्, न वा । न चेत्, सर्वस्य सर्वत्र कारणत्वापत्तिः । शक्तिमच्चेत्, तदा सा नित्या, अनित्या वा । नित्या चेत्, तदुपेतं कारणं निरपेक्षं, न वा, इति विकल्प्य, आद्यं दूषयति—**नित्येति** । कल्पान्तरं प्रत्याह—**न चेति** । न हि शक्तिमत्कारणं सापेक्षं, शक्तिमत्त्वस्याकिञ्चित्करत्वापत्तेरित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

1. **शक्तेरपि तत्पूर्वत्वात्**—शक्तेरपि शक्तिजन्यत्वात् ।
2. **साध्यवैकल्यं** — निरुक्तानुमाने दृष्टान्ते शक्तौ शक्तिजन्यत्वाभावरूपसाध्यस्य वैकल्यम् ।

नित्यमेकं विभु द्रव्यं यदि कालोऽभ्युपेयते ।
अतीतानागतत्वादिभेदः स्यात् किंनिबन्धनः ॥ (406)

आदित्यादिगतिश्चेत्स्यात्कालोऽव्यक्तसमुत्थितौ ।
आदित्यादेर्विलीनत्वात् न तदा तत्क्रियेष्यते ॥ (407)

न चावयविनो वृत्तिर्निरंशैकत्वहेतुतः ।
भागेषु निष्कलत्वैक्यनिःसामान्यत्वकारणात् ॥ (408)

---

[1]तद्भेदस्य स्वाभाविकत्वात्, अत्राह— **तस्येति** । (405) एकत्वं निरवयवत्वं[च] [2]तदुपगमेन साधयति— **नित्यमिति** । (406) आदित्यादिक्रिया कालभेदोपाधिः, इत्याह— **आदित्येति** । कालः-कालोपाधिरिति यावत् । दूषयति— **अव्यक्तेति** । अज्ञानादात्मनः आदित्यादेरुत्पत्तौ सत्यां तद्गतिः तदुपाधिः स्यादित्यर्थः । किमतः, अत्राह— **आदित्यादेरिति** । तस्मात् जगदुत्पत्तेः प्राक् इति व्यपदेशो न स्यादित्यर्थः । य(था)[द्वा]आदित्यादिक्रियैव कालः इत्याशङ्क्य अनेन वार्तिकेन निरस्यते । (407) कार्य[3]समवायि कारणम्, कारणसमवेतं कार्यमिति व्यवस्थां निराकरोति— **न चेति** । अनेकेषु अवयवेषु एकस्यावयविनः कार्त्स्न्येन युगपत् [4]वृत्तिर्व्याहता । [5]अवयवान्तरेण वृत्तावनवस्थेत्यर्थः । निर[6]वयवत्वैकत्वोक्तहेत्व-

---

1. **तद्भेदस्य**—कालभेदस्य ।
2. **तदुपगमेन**—तार्किकोपगमेन ।
3. **कार्यसमवायि**—समवायेन कार्याश्रयः ।
4. **वृत्तिर्व्याहता**—स्थितिः विरुद्धा ।
5. **अवयवान्तरेणेति** पटारम्भकावयवेषु तन्तुषु पटस्यावयविनः आरम्भकावयवातिरिक्तावयवेन वृत्तिस्वीकारे, तस्मिन्नवयवान्तरे पटस्य कार्त्स्न्येन वृत्तेरसंभवेन अवयवान्तरेण वृत्तेर्वाच्यतया, तत्रापि वृत्तावयवान्तरस्वीकारापत्त्या अनवस्था इत्यर्थः ।
6. **अवयविनः** अनेकावयवसमवेतत्वाभावे साध्ये, 'निरंशैकत्वहेतुतः' इति पूर्वार्धेन निरवयत्व एकत्वं चेति हेतुद्वयमुक्तम् । 'निष्कलत्वैक्यनिःसामान्यत्वकारणात्' इति उत्तरार्धेन निरुक्तहेतुद्वयाभिधाने पौनरुक्त्यं दोषः स्यादित्याशङ्क्य, उत्तरार्धस्य उक्तहेतुद्वयानुवादेन निःसामान्यत्वहेतूक्तौ तात्पर्यमाह— **निरवयत्वैकत्वहेत्वनुवादेनेति** ।

आधारेषु निरंशेषु यद्वाधेयस्तथाविधः ।
भिन्नदेशेषु तेष्वेकः तथा चावयवी कथम् ॥ (409)

तस्मान्न देशकालादिभेदो वस्त्वाश्रयो मितेः ।
दिग्भेदक्लृप्तिवद् व्योम्नि भेदोऽयं तद्वदात्मनि ॥ (410)

जगदुत्पत्तिसंहारास्तद्वदात्मनि कल्पिताः ।
वस्तुवृत्तं समालोक्य कुतः सृष्ट्यादिसंभवः ॥ (411)

कारकादिर्यथा भ्रान्तिस्तथा पूर्वमवादिषम् ।
सर्वमात्मेति नेतीति तथा सत्युपपद्यते ॥ (412)

उद्भूतिस्थितिनाशाः स्युर्जगतोऽतः प्रतिक्षणम् ।
अविद्यामात्रहेतुत्वान्नामीषां विद्यते क्रमः ॥ (413)

नुवादेन निःसामान्यत्वं हेत्वन्तरमाह—**निष्कलेति** । अवयवी नानेकत्र समवेतः, निष्क[1]लत्वात्, निःसा[2]मान्यत्वात्, एकत्वाच्च गगनवत् । न(व)[च]संयोगसामान्यादौ व्यभिचारः । तस्य पक्षतुल्यत्वादित्यर्थः । (408) विपक्षे बाधकमाह—**आधारेष्विति** । गुणेषु वर्तमानगुणत्ववदंशित्वं न स्यादित्यर्थः । (409) कार्यकारणादिभेदधीविरोधमाशङ्क्याह—**तस्मादिति** । (410) जगन्मिथ्यात्वमुक्त्वा, तत्सृष्टिमिथ्यात्वं [3]तद्दृष्टान्तेनाह—**जगदिति** । (411) [कार्य] कारणयोः कल्पितत्वं निर्युक्तिकं निष्प्रमाणं च, अत्राह—**कारकादिरिति** । (412) का तर्हि जन्मादिप्रतीतेर्गतिः, तामाह—**उद्भूतीति** । दृश्यमानाः

---

1. **निष्कलत्वादिति** निरवयवत्वादित्यर्थः ।

2. **निःसामान्यत्वादिति** निःसामान्यत्वं यदि सामान्यशून्यत्वं, तदा दृष्टान्ते गगने साधनवैकल्यम् । गगनत्वस्य जातित्वाभावेऽपि द्रव्यत्वसत्तादिजातेः गगने सत्त्वात् । अतः सामान्यभिन्नत्वं विवक्षितम् । न चैवं साधनवैकल्यविरहेऽपि 'न च संयोगसामान्यादौ व्यभिचारः' इति समनन्तरग्रन्थासंगतिः, साध्याभाववति सामान्ये सामान्यभिन्नत्वस्यासत्त्वेन व्यभिचाराप्रसङ्गादिति वाच्यम् । सामान्ये व्यभिचारोद्भावनस्य, निरवयत्वैकत्वरूपहेतुद्वयाभिप्रायकत्वादिति बोध्यम् ।

3. **तद्दृष्टान्तेन**—जगद्दृष्टान्तेन ।

प्राणाः श्रोत्रादयोऽत्र स्युर्दश सप्त च ये मताः ।
लोकावच्छेदतोऽमीषां भेदोऽध्यात्मादिलक्षणः ॥ (414)

जरायुजादिसंभेदभिन्ना लोकाः पृथग्विधाः ।
तथाऽधिदेवतात्मानो देवाः स्युर्बहुभेदकाः ॥ (415)

तेऽपि साधारणाः प्राणा देहेऽसाधारणास्तु ते ।
भूतानां परिणामोऽयं यथाकर्म यथाश्रुतम् ॥ (416)

प्राणादिजन्मना जज्ञे विस्फुलिङ्गैर्यथा शिखी ।
परमात्मापि जज्ञे खं यथा कुम्भादिजन्मभिः ॥ (417)

स्युरिति शेषः । अत एव प्रतिवेदं [1]विगीतक्रमा सृष्टिः, इत्याह—**नेति** । (413)

'सर्वे प्राणाः' इत्यादिश्रुत्यर्थवर्णनम्

प्रासङ्गिकं परिसमाप्य, 'सर्वे प्राणाः' इत्यत्र प्राणशब्दार्थमाह—**प्राणा इति** । 'इह तावदक्षदशकं मनसा सह बुद्धितत्त्वमथ वायुगणः' (सं.शा. 3·20) इत्येवंरूपं लिङ्गं प्राणशब्दमित्यर्थः । कथं सप्तदशत्वम्, अध्यात्मादिभेदेन तेषां बहुत्वात्, [इत्यत आह]—**लोकावच्छेद[त]इति**। शरीरावच्छेदादित्यर्थः। (414)

'सर्वे लोकाः' इत्यस्यार्थमाह—**जरायुजेति** । जरायुजाण्डजस्वेदजोद्भिज्जभेदादित्यर्थः । 'देवाः' इत्यस्यार्थमाह—**तथेति** । (415) बहुभेदत्वं स्पष्टयति—**तेऽपीति** । आदित्यादयः अध्यात्मं चक्षुरादिरूपेणासाधारणाः, साधारणास्त्वाधिदैविकात्मनेत्यर्थः । भूतानि सृष्ट्वा तदात्मना स्थितात्मकार्यत्वात् भौतिकत्वं च प्राणादीनाम्, इत्याह—**भूतानामिति**। (416)

'सर्वे एते आत्मानः' इति **माध्यन्दिनपाठस्यार्थमाह—प्राणेति** । अग्निविस्फुलिङ्गयोः [2]अंशांशिभेदादात्मनो(ना)नायं दृष्टान्तः, अत्राह—**खं यथेति** ।

---

1. **विगीतक्रमा सृष्टिरिति** विरुद्धक्रमवती सृष्टिः । क्वचित् आकाशादिका, अन्यत्र तेज आदिका, अपरत्र क्रमरहिता सृष्टिः श्रूयते इत्यर्थः ।

2. **अंशांशिभेदादिति** निरंशस्येति शेषः ।

प्राणाद्युद्भूतितो नान्या क्षेत्रज्ञोद्भूतिरिष्यते ।
श्रुतेरेतेभ्य इति हि तथा स्पष्टं वचः श्रुतम् ॥ (418)

यस्मादविद्ययैवात्मा प्राणक्षेत्रज्ञरूपभाक् ।
स्वतोऽतः स परं ब्रह्म तस्योपनिषदुच्यते ॥ (419)

उपासनार्थं यद् गुह्यं नामोपनिषदुच्यते ।
तदस्य परमं गुह्यं तेनोपासीत तत्त्वतः ॥ (420)

ब्रह्मविद्याधिकारेऽस्मिन् यावत्किञ्चिदुपासनम् ।
ब्रह्मविद्योत्थितिफलं तत्सर्वमिति निर्दिशेत् ॥ (421)

गोदोहनादिवद्विद्यादेवं सर्वमुपासनम् ।
विद्याधिकारजीवित्वान्न स्वतन्त्रफलं भवेत् ॥ (422)

---

[417] स्वत एवात्मनो घटादिवज्जन्म किं न स्यात्, अत्राह—**प्राणादीति** । 'एतेभ्यो भूतेभ्यः समुत्थाय' (बृ. 4-4-12) इत्यौपाधिकजन्मश्रुतेरित्यर्थः । [418] परस्य प्राणाद्युपहितस्य क्षेत्रज्ञभावे फलितमाह—**यस्मादिति** । [1]'**तस्य**' इत्यादेरर्थमाह—**तस्येति** । वाक्यार्थरूपस्येति यावत् । [419] वस्तुतत्त्वप्रतिपत्त्यर्थयमुपनिषत् सिद्धेति, [2]तस्याः फलान्तरमाह—**उपासनेति** । [420] उपनिषदः विद्योत्पत्तिफलत्वमुदाहरणेनाह—**ब्रह्मेति** । यथा ब्रह्मविद्याप्रकरणे श्रुतं सर्वमुपासनं [3]तदुत्पत्तिफलं, तथा इदमपीति (वेदा)[वदे]दित्यर्थः । [421] उक्तार्थं दृष्टान्तेन साधयति—**गोदोहनेति** । आदिपदेन '**अनतिदृश्नं स्तृणाति, प्रजयैवैनं पशुभिरनतिदृश्नं करोति**' इत्यादिसंग्रहः । **दर्शपूर्णमासाङ्गत्वेन** [4]स्थितप्रणयनोपजीवि गोदोहनं, प्रणयनद्वारेण दर्शपूर्णमासनियोगं प्रसाध्य [5]तद्-

---

1. **तस्येत्यादेरिति** "तस्योपनिषत् सत्यस्य सत्यमिति । प्राणा वै सत्यं तेषामेष सत्यम् ।" इत्यस्य वाक्यस्येत्यर्थः ।
2. **तस्याः** — रहस्यनामात्मकोपनिषदः ।
3. **तदुत्पत्तिफलं**—ब्रह्मविद्योत्पत्तिफलकम् ।
4. **प्रणयनोपजीवीति** अपः प्रणयति इति विहितमप्प्रणयनमुपजीव्य प्रवृत्तं गोदोहनमित्यर्थः ।
5. **तद्द्वारेण**—दर्शपूर्णमासविनियोगद्वारेण ।

सत्यस्य सत्यमिति या ब्रह्मोपनिषदुच्यते ।
प्राणा वै सत्यमित्यस्या व्याख्योपनिषदः कृता ॥ (423)

नामरूपात्मकाः प्राणाः परसत्याभिसंगतेः ।
सत्यमित्यभिधीयन्ते तेषां सत्यं परं पदम् ॥ (424)

उक्तोपनिषदर्थस्य सम्यगाविष्कृदुत्तरम् ।
यो ह वै शिशुमित्यादि भविता ब्राह्मणद्वयम् ॥ (425)

कामं ह्युपनिषद्व्याख्या भवतु ब्राह्मणद्वयम् ।
* संसारिब्रह्मणोः कस्य नामैतदिति भण्यताम् ॥ (426)

पाणिपेषप्रबुद्धस्य नाम संसारिणो यदि ।
तदा स एव विज्ञेयः तज्ज्ञानादेव मुक्तता ॥ (427)

ब्रह्मशब्दाभिधेयश्च संसार्येव तदा भवेत् ।
तद्विद्या ब्रह्मविद्येति प्रतिपद्यामहे तदा ॥ (428)

द्वारेण स्वर्गं साधयदेव पशु [साधयति, तथा] ज्ञानार्थत्वेन सृष्टप्रपञ्चोपजीवित्वात् प्रपञ्चद्वारेण ज्ञानं प्रसाध्यैव [1]फलान्तरहेतुत्वात् उपासनं शुद्धिद्वारा धीसा[ध]न-मित्यर्थः । [422] 'प्राणा वै सत्यम्' इत्यादेरर्थमाह—**सत्यस्येति** । [423] तस्यार्थसंक्षेपमाह—**नामेति** । [424] अजातशत्रुब्राह्मणेन [2]उत्तरब्राह्मणद्वयं संगमयति—**उक्तेति** । [425]

उक्तोपनिषत् संसारिणः, ब्रह्मणो वेति विचारस्य कर्तव्यतानिरूपणम्

उक्तसंगतिमूरीकृत्य, कस्येयमुपनिषत्, इत्याह—**काममिति** । [426] विचारप्रयोजकसन्देहमुक्त्वा [3]फलमाह—**पाणीति** । [427] ब्रह्मैव ज्ञेयं तद्विद्यो

---

1. फलान्तरहेतुत्वात्—उपासनफलान्तरहेतुत्वात् ।
2. उत्तरब्राह्मणद्वयं—शिशुब्राह्मणं मूर्तामूर्तब्राह्मणं चेति द्वयम् ।
* संसारिब्रह्मणोः इति निर्धारणे षष्ठी ।
3. फलं—विचारफलम् ।

अथासंसारिणो नाम न्यायतोऽध्यवसीयते ।
* संसारिणि यदुक्तं तत्तदा तत्र भविष्यति ॥ (429)

भिन्नात्मनोस्तयोर्दोषो ब्रह्मत्वप्रतिपादिकाः ।
कुप्येरन् श्रुतयः सर्वाः नान्यदन्यद्भवेद्यतः ॥ (430)

ब्रह्मणोऽव्यतिरेके च तद्वचासति दुःखिनि ।
ब्रह्मविद्योपदेशस्य कैमर्थक्यं प्रसज्यते ॥ (431)

इति सन्देहहेतुश्च विचारस्य प्रयोजकः ।
तस्माद्विचारः कर्तव्यः उक्तसन्देहहानिकृत् ॥ (432)

नासंसारी परोऽन्योऽस्ति पाणिपेषप्रबोधितात् ।
प्राज्ञावस्थात्मकाद्यस्मादुत्पत्तिः श्रूयते श्रुतौ ॥ (433)

मुक्तिहेतुत्वात्, अत्राह—**ब्रह्मेति** । (428) [1]द्वितीयपक्षे फलमाह—**अथेति** । सर्वकल्पनाधिष्ठानत्वं न्यायः । (429) युक्तिबलात् ब्रह्मोपनिषदेवास्तु, अत्राह—**भिन्नेति** । (अथै)[[2]आद्ये] केनापि साधनेना[3]भेदायोगादेक[4]त्वश्रुतिविरोध इत्यर्थः । (430) [5]कल्पान्तरमनूद्य प्रतिक्षिपति—**ब्रह्मण इति** । (431) ब्र(ह्मणा)[ह्मो]पनिषत्पक्षस्यापि विना विचारमयोगात् उक्तो विशेषानुपलम्भः सन्देहहेतु[ः] विचारप्रयोजकः इति फलितमाह–**इति सन्देहेति** । (432)

संसारिणः इयमुपनिषदिति पूर्वपक्षः

विचारयन् पूर्वपक्षयति—**नेति** । [6]हेतुमाह—**पाणीति** । [433] ब्रह्मणः प्रकृत-

---

1. **द्वितीयपक्षे**—ब्रह्मणः उपनिषदिति पक्षे ।
* संसारिणि **यदुक्तं**—ज्ञेयत्वं, तज्ज्ञानादेव मुक्तिरित्यादिकम् **तत्**—ज्ञेयत्वादि **तत्र**—ब्रह्मणि भविष्यति इति वार्त्तिकार्थः ।
2. **आद्ये**—जीवब्रह्मणोर्भेदे ।
3. **अभेदायोगात्**—जीवब्रह्माभेदासंभवात् ।
4. **एकत्वश्रुतीति** जीवब्रह्मणोरित्यादिः ।
5. **कल्पान्तरं**—जीवब्रह्मणोरभेदकल्पम् ।
6. **हेतुमाह**—जीवातिरिक्तस्य असंसारिणः परस्याभावे इत्यादिः ।

ब्रह्म तेऽहं ब्रवाणीति प्रतिज्ञाय ततो नृपः ।
सुप्तं पुरुषमभ्येत्य पाणिना बोधयन् स्वयम् ।। (434)

तमवस्थान्तरं नीत्वा स्वप्नदर्शनवर्त्मना ।
सुषुप्ताख्यं ततस्तस्मात्प्राणाद्युत्पत्तिमब्रवीत् ।। (435)

संसारी प्रक्रमाच्चेह नान्यः संभाव्यते ततः ।
अनूद्य च प्रियात्मानं स द्रष्टव्य इतीर्यते ।। (436)

वेदान्तेषु च सर्वेषु प्रत्यगात्मैव चोद्यते ।
वेद्यत्वेन न तद्भिन्नं पश्येदित्यभिधीयते ।। (437)

अवस्थान्तरसंबन्धादसंसारी भविष्यति ।
संसार्यपि स्वतोऽयं चेन्नेदृग्दृष्टेरसंभवात् ।। (438)

त्वात् तस्यैव कारणत्वं श्रुत्योक्तं, न जीवस्य, इत्यत्राह—ब्रह्मेति । [434] [1]तस्मात् [2]जीवस्यैवैतत् प्रकरणम्, इत्याह—तमिति । [425] जगत्कारणत्वात् ब्रह्मलिङ्गात् [3]तदेव ग्राह्यम्, अत्राह—संसारीति । 'आत्मैवेदम्' इत्यारभ्येत्यर्थः । [4]उत्तरत्र [5]जीवानुवादेन द्रष्टव्यत्वोक्तेः स एव, इत्याह—अनूद्येति । [436] हेत्वन्तरमाह —वेदान्तेष्विति । [437] अवस्थाद्वयकालुष्यं हित्वा संप्रसादं प्राप्तस्य परत्वात् ब्रह्मणो जगद्धेतुत्वम्, इति शङ्कते—अवस्थान्तरेति । दूषयति—नेति । [438]

---

1. **तस्मात्**—सुप्तपुरुषगमनादेः ।
2. **जीवस्यैवैतत् प्रकरणमिति** 'ब्रह्म ते ब्रवाणि' इत्युपक्रमे ब्रह्मशब्देन जीव एव विवक्षित इति भावः ।
3. **तदेव**—ब्रह्मैव ।
4. **उत्तरत्र**—मैत्रेयीब्राह्मणे ।
5. **जीवानुवादेनेत्यादि**—प्रियसंसूचितं भोक्तारमात्मानमनूद्य 'आत्मा वा अरे द्रष्टव्यः' इति द्रष्टव्यत्वोक्तेः, **स एव**—जीव एवेत्यर्थः ।

नान्यजातिविशिष्टोऽर्थः स्वतो जात्यन्तरं ततः ।
* कश्चिदेति जगत्यस्मिन्नन्यत्रेश्वरहेतुतः ॥ (439)

स्वभावमपि जह्याच्चेदग्निः शीतो भवेद् ध्रुवम् ।
सर्वप्रमाणकोपश्च सर्वं स्यादधरोत्तरम् ॥ (440)

* सांख्यादयस्तथेशस्य ह्यभावे बहुयुक्तिभिः ।
आपादयन्ति यत्नेन तेभ्योऽन्यः कोऽधिको धिया ॥ (441)

संसारिणोऽप्यसामर्थ्याज्जगज्जन्मादिकर्मसु ।
जगद्धेतुत्वमन्याय्यमिति चेन्न श्रुतेर्बलात् ॥ (442)

अक्षाद्यगोचरो यद्वत् शास्त्रादध्यवसीयते ।
तद्वत् संसारिकारित्वं जगतो गम्यतां श्रुतेः ॥ (443)

कुतोऽसंभवः, अत्राह— नान्येति । ईश्वरहेतुतः अन्यत्र—ईश्वराज्ञारूपनिमित्ताद‍न्यत्र, नैवमित्युपहासः । [439] विशिष्टसाधनशक्त्या अन्यस्यान्यत्वं किं न स्यात्, अत्राह—स्वभावमिति । [440] जगत्कर्तुरीशस्याभावे वा(द)[दि]-संवादमाह—सांख्यादय इति । ईश्वरेच्छाप्रयत्नादेः नित्यत्वे सदोत्पत्त्यापत्तिः । अनित्यत्वे अस्मदादिसाम्यम्, इत्यादियुक्तिभिरित्यर्थः । [441] जीवस्य जग-(द्द्रष्ट्र)[त्स्रष्टृ]तानुपपत्त्या परोऽङ्गीकार्यः, इति शङ्कते—संसारिणोऽपीति । श्रुतिविरोधेन दूषयति—नेति । [442] अशक्तस्य कार्यहेतुत्वं वन्ध्यादौ न दृष्टम्, इत्यत्राह—अक्षादीति । धर्मादिरित्यर्थः । [443] ईश्वरनिरासं निगमयति —एवमिति ।

---

* "सेश्वरवादे तद्वशात् गवादेः गोत्वादिविशिष्टस्य ततो जात्यन्तरं वस्तुतः संभवति । न हि किञ्चिदीशस्याशक्यम्, तत्राह—अन्यत्रेति तं हेतुं हित्वा नान्यदन्यद्भवति । स यदि वस्तुस्वभावमन्यथयेत् न किञ्चित् व्यवस्थितं स्यादित्यर्थः ।" इति शास्त्रप्रकाशिका ।

* ईश्वरस्य देहित्वे अस्मदादितुल्यत्वम्, तदभावे मुक्तवत् जगत्कर्तृत्वाभावः, जीवानामेवादृष्टद्वारा जगत्कर्तृत्वसंभवात्तस्याकिञ्चित्करत्वम्, इत्यादियुक्तयः 'बहुयुक्तिभिः' इत्यनेन विवक्षिताः इति शास्त्रप्रकाशिकाकाराः ।

एवं तावदयं पक्षो न्यायतः प्रतिपादितः ।
शास्त्रन्यायादितोऽन्योऽपि पक्षोऽत्र प्रतिपाद्यते ॥ (444)

यः सर्वज्ञः सर्वविद्योऽशनायादिवर्जितः ।
यः पृथिव्यामिति तथा नेति नेतीति चागमः ॥ (445)

अस्थूलाद्यक्षरोक्तेश्च तथाऽपूर्वादिवाक्यतः ।
असंसारी परोऽस्तीशो यस्य सर्वमिदं वशे ॥ (446)

स एव च जगत्कारी सत्यज्ञानादिलक्षणः ।
तस्मादित्यात्मनश्चेति सामानाधिकरण्यतः ॥ (447)

संसारिणो ननूत्पत्तिरेवमेवेति कीर्तिता ।
* नैवं, महेश्वरस्यैव तत्राकाशत्वसंश्रयात् ॥ (448)

ब्रह्म तेऽहं ब्रवाणीति प्रकृत्य ब्रह्मबोधनम् ।
अब्रह्माप्रकृतं ब्रूयात्कथं राजाऽतिपण्डितः ॥ (449)

सेश्वरवादः

[1]तत्सत्तां प्रतिजानीते—**शास्त्रेति** । [444] शास्त्रं तावदुदाहरति—**यः सर्वज्ञ इति** । [445–446] 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै. 2·1) इति श्रुत्यवष्टम्भेन तस्य जगत्कर्तृतामाह—**स एवेति** । [447] 'एवमेवास्मादात्मनः' इति प्रकृतश्रुतिविरोधं चोदयति—**संसारिण इति** । 'य एषोऽन्तर्हृदय आकाशः' इति आकाशशब्देन [2]प्रकृतपरस्यैवात्र 'अस्मात्' इति परामर्शात् नैवम्, इत्याह—**नैवमिति** । [448] आकाशशब्दस्य भूतविशेषे रूढत्वात् [3]स एवात्र गृह्यताम्, अत्राह—**ब्रह्मेति** । [449] दुर्बलप्रकरणेन कथं बलवच्छ्रुतेरर्थ-

---

1. **तत्सत्तां**—ईश्वरसत्ताम् ।
2. **प्रकृतपरस्यैव**—प्रकृतस्य परस्यात्मन एव ।
* **आकाशत्वसंश्रयात्**—आकाशपदबोध्यत्वाङ्गीकारात् ।
3. **स एव**—भूताकाश एव ।

श्रुत्यन्तरविरोधश्च संसारी चेदिहोच्यते ।
सता सोम्येति सन्नाम्ना ब्रह्म तत्र विवक्षितम् ॥ (450)

आकाशो ह वै नामेति ब्रह्मैवानामरूपकम् ।
श्रुत्यन्तरे श्रुतं साक्षादाकाशाख्यानवत्परम् ॥ (451)

तथाचाहरहःशास्त्रं पर आत्मनि चेति यत् ।
सुषुप्ते ब्रह्मणोऽन्यस्य नावकाशोऽस्ति दुःखिनः ॥ (452)

अतद्विकारतो जन्म प्रलयश्च तथात्मनः ।
भौतिकाकाशविषयो न कथंचन युज्यते ॥ (453)

जगज्जन्मादिसामर्थ्यं सामग्र्यादि च दुःखिनः ।
संसारिणो न संभाव्यमस्मदादेर्यथा तथा ॥ (454)

न शक्त्याधानकृच्छास्त्रं तस्याभिव्यञ्जकत्वतः ।
मानान्तरविरोधेन न हि मानं प्रवर्तते ॥ (455)

---

[1]चालनम् , अत्राह—**श्रुत्यन्तरेति** । [450] विभुत्वादिसाम्येन आकाशशब्दस्य ब्रह्मणि प्रयोगो न क्वापि दृष्टचरः, अत्राह—**आकाश इति** । [451] श्रुत्यन्तरमाह—**तथा चेति** । 'अहरह(ब्रह्म)र्गच्छन्त्य एतं ब्रह्मलोकं न (वेदं)[विन्द]न्ति ।' (छा. 8-3-2) 'स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठन्ते, एवं हैतत्सर्वं परे आत्मनि संप्रतिष्ठते ।' (प्र. 4-7) इति वस्तुतो जीवस्य ब्रह्मात्मतामाह यस्मादित्यर्थः । [452] आ[2]काशशब्दस्य भूताकाशत्वाभावे हेत्वन्तरमाह—**अतद्विकारत इति** । [453] तर्हि संसारी स्यादाकाशशब्दः, अत्राह—**जगदिति** । परिज्ञानमादिपदार्थः । [454] अस्तु शास्त्रसामर्थ्यात् संसारिणो जगत्कर्तृत्व(मे)[मि]ति, तत्राह—**न शक्तीति** । जीवस्य जगदुत्पत्त्यादिसामर्थ्या(द्वि)धायकं न शास्त्रं, लोकसिद्धार्थानुवादेन [3]संगतिमात्रगमकत्वादित्यर्थः । [455]

---

1. **अर्थचालनम्**—वाच्यार्थव्यतिरिक्तबोधकत्वकल्पनम् ।
2. **आकाशशब्दस्य**—आकाशशब्दबोध्यस्येति यावत् । एवमुत्तरत्रापि आकाशशब्दः इत्यस्यार्थोऽवसेयः ।
3. **संगतिमात्रगमकत्वादिति** साध्यसाधनभावादिसंबन्धमात्रबोधकत्वादित्यर्थः ।

परस्परानपेक्षौ चेत् संसारीशौ स्वतः स्थितौ ।
ऐकात्म्यं न तयोर्युक्तं प्रकाशतमसोरिव ॥ (456)

अहं ब्रह्मेत्यतोऽयुक्तं ब्रह्म प्रत्यक्तयाऽञ्जसा ।
* ग्रहीतुं दुःखिनोऽन्यत्वात् दोषभाक् स्यादतोऽन्यथा ॥ (457)

सत्कर्मभिस्तु देवं तं जगतः कारणं परम् ।
आराध्य परमोत्कर्षं तत्प्रसादात्समश्नुते ॥ (458)

ब्रह्मात्मैकत्वशंसीनि वाक्यान्यपि तथा सति ।
* अर्थवादीभविष्यन्ति विरोधः स्यादितोऽन्यथा ॥ (459)

तर्कशास्त्रैस्तथा लोकन्यायैरप्यविरुद्धता ।
तथा सतीति संप्राप्तावत्र प्रतिविधीयते ॥ (460)

नैतदेवं यतोऽस्यैव मन्त्रब्राह्मणमानतः ।
प्रवेशः श्रूयते साक्षात् परमेशस्य सर्वतः ॥ (461)

प्रत्यग्ब्रह्मणोरभेददूषणम्

एवं श्रुतियुक्तिसिद्धेशस्य प्रत्यग्भूतस्येयमुपनिषदिति [1]सिद्धान्तः । तन्निरासाय तयोरभेदं [2]दूषयति—**परस्परेति** । (456) फलितमाह—**अहमिति** । (457) तर्हि मोक्षः कथम्, अत्राह—**सत्कर्मभिरिति** । (458) ब्रह्मात्मनोरैक्याभावे तत्त्वमादिवाक्यानां का गतिः, अत्राह—**ब्रह्मात्मेति** । विपक्षे दोषमाह—[**विरोध इति** ।] (459-460)

प्रत्यगभिन्नब्रह्मणः इयमुपनिषदिति सिद्धान्तनिरूपणम्

सिद्धान्तमाह—**नैतदिति** । (461) परस्य जीवात्मना प्रवेशवाक्यानि

---

1. **सिद्धान्तः**—औपनिषदानां सिद्धान्तः ।
2. **दूषयतीति** तटस्थेश्वरवादीति शेषः ।
* **दोषभाक्स्यादतोऽन्यथेति** अमात्यः स्वात्मानं राजानं भावयन् यथा प्रत्यवैति तथा आत्मानमीशं पश्यन् जीवः प्रत्यवेयादित्यर्थः ।
* **विरोधः**—लोकविरोधः, वादिनां विरोधश्च ।

पुरश्चक्रे द्विपदः पुरः पुरुष आविशत् ।
रूपं रूपं च सर्वाणि त्वं स्त्री त्वं च पुमानसि ॥ (462)

इति मन्त्रसमाम्नायः, तथाच ब्राह्मणान्यपि ।
इह प्रविष्ट इत्युक्तिः पुरस्तात् ब्राह्मणोदिता ॥ (463)

तत्सृष्ट्वेति तथा वाक्यं तैत्तिरीयश्रुतौ श्रुतम् ।
सेयमित्यादिकं वाक्यं छान्दोग्योपनिषद्यपि ॥ (464)

ब्रह्मात्मशब्दयोस्तद्वदेकाधिकरणश्रुतेः ।
अहं ब्रह्मेत्यवसितुं युक्तमेव भवेदतः ॥ (465)

यदा चैवं स्थितः पक्षः तदा दोषोऽयमागमत् ।
संसारित्वं परस्येति तदनन्यत्वकारणात् ॥ (466)

अथासंसारितैतस्य कथं चिदुपपद्यते ।
तदोपदेशानर्थक्यं तमृतेऽप्यस्य मुक्ततः ॥ (467)

उदाहरति—पुर इति । (462-463-464) 'अयमात्मा ब्रह्म' (बृ. 4-5-19) इति सामानाधिकरण्याच्च तयोरेकत्वं (पक्षे दोषान्तरमुद्भावयति-यदेति) युक्तम्, इत्याह—ब्रह्मात्मेति । (465)

एकत्वपक्षे दोषोद्भावनम्

[1]एकत्वपक्षे दोषमाह-(अन्येति)[यदेति](466)[दोषान्तरमुद्भावयति—अथेति ।] संसारिणोऽनन्यब्रह्मणः असंसारित्वे संसारित्वाभिमतस्यापि स्वत एव मुक्तत्वादुपदेशानर्थक्यमित्यर्थः । (467)

---

1. एकत्वपक्षे इति जीवपरयोरित्यादिः ।

एवं प्रचोदिते केचित् परिहारं प्रचक्षते ।
सृष्टेषु न परः साक्षात् प्राविशत् परमेश्वरः ॥ (468)
विकाररूपापन्नः सन् विज्ञानात्मत्वलक्षणः ।
ब्रह्मादिस्थावरान्तेषु भूतेषु प्राविशत्परः ॥ (469)
विज्ञानात्मापि महतः परमात्मस्वभावकात् ।
अन्योऽनन्यश्च विज्ञेयः स्वाभाव्यात्सर्ववस्तुनः ॥ (470)
येनान्यस्तेन संसारी कर्माधिकृत इष्यते ।
अनन्यपक्षेऽहं ब्रह्मेत्युक्तेर्ब्रह्म प्रपत्स्यते ॥ (471)
यथोक्तदोषसंबन्धो नैवं सति भविष्यति ।
इतोऽन्यथा कल्पनायां यतो दोषेण संगतिः ॥ (472)
देहाद्युपाधिसंबद्धं सिद्धं मान्तरसंश्रयात् ।
अनूद्य ब्रह्मता वाक्यान्न प्रविष्टाद्यतः श्रुतेः ॥ (473)

उक्तदोषस्य एकदेशीयः परिहारः

अत्र [1]एकदेशीयपरिहारमाह—**एवमिति** । तमेवाह—**सृष्टेष्विति** । (468) कथं [2]तर्हि तस्य कार्ये प्रवेशः, अत्राह—**विकारेति** । (469) जीवस्य ब्रह्मविका(रि)[र]त्वे विकारब्रह्मणोरभेदात् [3]उक्तदोषापत्तिः, अत्राह—**विज्ञानात्मेति** । (470) वस्तुत्वात् जीवस्य भिन्नाभिन्नत्वोपगमे ला[4]भमाह—**येनेति** । भिन्नाभिन्नत्वमेकस्य व्याहतम्, अत्राह—**इतोऽन्यथेति** । अत्यन्ताभेदे भेदे च दोषस्योक्तत्वादित्यर्थः । (471-472)

एकदेशिमतदूषणम्

एकदेशिमतं दूषयति—**देहादीति** । प्रवेशादे(व)[र][5]फलत्वेनाप्रतिपाद्य-

---

1. **एकदेशीयपरिहारमिति** भर्तृप्रपञ्चाः एकदेशिनः । तदीयं परिहारमित्यर्थः ।
2. **तर्हि**—साक्षात्प्रवेशाभावे ।
3. **उक्तदोषापत्तिः** — परस्य संसारित्वापत्तिः ।
4. **लाभं**—कर्मण्यधिकारस्य ब्रह्मभावरूपमोक्षस्य च लाभम् ।
5. **अफलत्वेन**—प्रयोजनरहितत्वेन अपुमर्थत्वेनेति यावत् ।

विज्ञानात्मन एताः स्युर्गतयो विक्रियां प्रति ।
नानाद्रव्यसमाहारः पृथिवीवत्परो भवेत् ॥ (474)

तस्य सावयवस्य स्यादेकदेशस्य विक्रिया ।
विज्ञानात्मेति यं प्राहुः परिणामः स आत्मनः ॥ (475)

घटादिवत् क्षितेरस्य ह्येकदेशस्य विक्रिया ।
संस्थानानुपमर्देन यद्वा केशोषरादिवत् ॥ (476)

कार्त्स्न्येन वा परिणमेत् क्षीरद्रव्यादिवत्परः ।
इयन्त एव पक्षाः स्युः विकारे परमात्मनः ॥ (477)

भिन्नद्रव्यसमूहस्य मुख्यैकत्वं न युज्यते ।
* एकजात्यभिसंबन्धादेकत्वं गुणतो यतः ॥ (478)

त्वात् देहादिविशिष्टं जीवं लोकसिद्धमनूद्य, तस्य ब्रह्मत्वमभयप्राप्तिफलं प्रतिपाद्यम् । अतो जीवब्रह्मणोः न विरुद्धत्वमित्यर्थः । (473) जीवस्य ब्रह्मविकारत्वनिरासाय, विकल्पयति—**विज्ञानात्मन इति** । विकल्पं स्पष्टयति—**नानेति** । अनेकद्रव्यसमाहारः तिलराशिवत् परः अनेकद्रव्याण्येव वा परस्परापेक्षाणि परः । तदेकदेशः विज्ञानात्मत्वेन परिणमते इति भावः । दृष्टान्तेनैतत् स्पष्टयति—**विज्ञानात्मेति** । कल्पान्तरमाह—**संस्थानेति** । यथा पुरुषस्य पूर्वावस्थानुपमर्देन केशनखादिपरिणामः, यथा वा क्षितेरू(प)[ष]रादिविकारः, तथा पुरुषस्य पूर्वावस्थस्यैकदेशस्थो जीवाख्यो विकारः, उत कार्त्स्न्येन परः परिणमते इत्यर्थः । (अत एव) [1]कल्पान्तरस्या[नुप]न्यासात् न्यूनत्वम्, अत्राह—**इयन्त इति** । (474-475-476-477) [2]आद्यं दूषयति—**भिन्नेति** । समूहस्यावस्तुत्वात् समूहि(तां)[नां]भिन्नत्वादेकं ब्रह्म न स्यादित्यर्थः । एकजातीयत्वादेकत्वं स्यात्, अत्राह—**एकजातीति** । (478)

---

1. **कल्पान्तरस्य**—उक्तकल्पत्रयातिरिक्तस्य तुरीयकल्पस्य ।
2. **आद्यं**—नानाद्रव्याणां समाहारः, परस्परापेक्षाणि नानाद्रव्याणि वा परः । तदेकदेशपरिणामः विज्ञानात्मा इति कल्पम् ।

* **एकजातीति** तथा च ब्रह्मणः एकत्वं न मुख्यं भवेदिति भावः ।

नित्यश्चायुतसिद्धांशानुगतोऽवयवी यदि ॥ (479)

तदवस्थस्य तस्यैकदेशः संसारितामगात् ।
प्रत्यंशावसितेस्तस्य तदापि परमात्मनः ॥ (480)

स्वभागानुगतो दोषो गुणो वास्य प्रसज्यते ।
संसारिता परस्यैवं दोषः स्याद् दुर्निवारणः ॥ (481)

निःशेषपरिणामेऽपि पयोवत्परमात्मनः ।
श्रुतिस्मृत्युक्तिकोपः स्यात् स चानिष्टः प्रसज्यते ॥ (482)

न जायते म्रियते वा इति षड्भावविक्रिया—
निषेधकृद्वेदवाक्यं प्रत्यग्विकृतिवारणम् ॥ (483)

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
निष्कलं निष्क्रियं शान्तं विमलं व्योमवत् स्थितम् ॥ (484)

इत्यादिशतशो वाक्यैः श्रुतिस्मृत्युदितैरमी ।
सर्वे पक्षा विरुध्यन्ते त्याज्यास्तेऽतः प्रयत्नतः ॥ (485)

द्वितीयपक्षं निराकर्तुमनुवदति—नित्य(श्चेति)[श्चेति] । न नानाद्रव्यसमाहारः, नापि द्रव्याणि मिथोऽपेक्षाणि । किन्तु द्रव्येषु संसृष्टेषु एकोऽवयवी समवेतः परः, तदेकदेशविकारो जीव इत्यर्थः । अत्र दूषणमाह—प्रत्यंशस्येति । दोषेणांशिनो दुष्टत्वे फलितमाह—संसारितेति । (479-480-481) [1]तृतीयं प्रत्याह—निःशेषेति । (482) श्रुतिमुदाहरति—नेति । 'न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित्' (का. 1-2-18) इत्यादिश्रुतिविरुद्धमित्यर्थः । (483) न केवलं चरम[2] एवागमविरुद्धः, अन्योऽपीत्याह—दिव्यो हीति । (484)

'अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे प्रभविष्णवे ॥ वि. स.)

---

1. तृतीयं प्रत्याह—'कार्त्स्न्येन वा परिणमेत् क्षीरद्रव्यादिवत्परः' (वा. 477) इत्युक्तं कल्पं प्रत्याह ।

2. चरम एवेति कल्प इति शेषः । एवमेव अन्योऽपि इत्यत्र बोध्यम् ।

संसारानुपपत्तिश्च कूटस्थात्मैकदेशतः ।
स्वकर्मफलदेशेषु क्षेत्रज्ञस्य प्रसज्यते ॥ (486)

वियुक्तस्यात्मनश्चेत् स्याद्विस्फुलिङ्गादिवद्गतिः ।
तथापि क्षतसंप्राप्तिरव्रणस्य प्रसज्यते ॥ (487)

वारिणो मत्स्यसंचारे छिद्रसंग्रथने यथा ।
भ्रमत्सु तद्वज्जीवेषु प्राप्नुतः परमात्मनः ॥ (488)

* तथा चाव्रणवाक्येन विरोधोऽपि प्रसज्यते ।
स्वकारणातिरेकेण वृत्तिः कार्यस्य नान्यतः ॥ (489)

परमात्मैकवृत्तित्वात्कुतो जीवस्य संसृतिः ।
स्वप्नसंचारवत्तस्माज्जीवसंसार इष्यते ॥ (490)

* स्थास्नुष्वपि महत् दुःखं कण्टकादिषु देहिनः ।
परात्मनो महत् दुःखं जीवासंचरणेऽप्यतः ॥ (491)

'अजो नित्यः शाश्वतः' (भ. गी. 2-20) 'अविकार्योऽयमुच्यते' (भ. गी. 2-25) इत्यादीन्युदाहार्याणि, इत्याह—**इत्यादीति** । (485) कूटस्थब्रह्मविकार(त्व)[त्वे] जीवस्य स्वर्गादिगमनं न स्यात्, अंशिनो निश्च[ल]त्वे अंशानां चलनायोगात्, इत्याह—**संसारेति** । (486) दृष्टान्तेन गतिं शङ्कते—**वियुक्तस्येति** । दूषयति—**तथापीति** । (487) दृष्टान्तेनैतत् स्पष्टयति—**वारिण इति** । (488) संसारित्वं स्वीकृत्योक्तम् । तदेव न युक्तम्, इत्याह—**स्वकारणेति** । का तर्हि संसारप्रतीतेर्गतिरिति, भ्रान्तिरित्याह—**स्वप्नेति** । (489-490) तर्हि जीवानां ब्रह्मवदविक्रियत्वं किं न स्यात्, अत्राह—**स्थास्नुष्विति** । देहिनः कण्टकादि-विद्धस्येति शेषः । (491) श्रुत्या परस्य परिणामित्वादेः जीवस्यां[श]त्वा-

---

* **तथा चेति** परस्य छिद्रग्रथनयोः स्वीकारे इत्यर्थः ।

* 'देहिनाम्' इति मु. पु. पाठः ।

अदोषो विस्फुलिङ्गादिदृष्टान्तादिति चेन्मतम् ।
मैवं यथास्थितार्थानां शास्त्रस्य ज्ञापकत्वतः ॥ (492)

अज्ञातज्ञापकं शास्त्रमेवं स्वाभाव्यतो मितेः ।
पदार्थान्नान्यथा कर्तुं प्रवृत्तं माननिश्चितान् ॥ (493)

मूर्तामूर्तादयो यद्वत्पदार्था माननिश्चिताः ।
यथादृष्टानुरोध्येव दृष्टान्तैर्वस्तु बोध्यते ॥ (494)

एवं प्रवृत्तं सर्वत्र शास्त्रं दृष्टान्तपूर्वकम् ।
न प्रमान्तरसंसिद्धविपरीतात्मबोधनम् ॥ (495)

अतिशीतोऽग्निरित्यत्र दृष्टान्तानां शतैरपि ।
प्रमान्तरविरुद्धत्वान्नेन्द्रेणाप्यधिगम्यते ॥ (496)

मानान्तरविरुद्धं च न च मानं सदिष्यते ।
मानान्तरेणासंव्याप्ते मेये स्यान्मानता यतः ॥ (497)

तथा पदतदर्थांश्च लिङ्गप्रत्यक्षगोचरान् ।
नानादृत्यागमेनार्थमज्ञातं वेत्ति कश्चन ॥ (498)

देश्योक्तत्वात् शास्त्रादेव [1]नित्यस्य परत्वोपपत्तेर्न दोषः, इत्याह—**अदोष इति**। बोधकं शास्त्रं न कारकम्, इति परिहरति—**नैवमिति**। (492) किं तत् ज्ञाप्यम्, अत्राह—**अज्ञातेति**। (493) किमर्थं तर्हि प्रवृत्तम्, अत्राह—**मूर्तेति**। लोकसिद्धदृष्टान्तानुवादेन तदनुगुणानवगलबोधनार्थं प्रवृत्तमित्यर्थः। (494) उक्तं न्यायमन्यत्रातिदिशति—**एवमिति**। (495) वाक्यात् मानान्तर-विरुद्धानवगतौ दृष्टान्तमाह—**अतिशीत इति**। (496) वेदस्यानपेक्षमानत्वात् मानान्तरविरुद्धबोधकत्वम्, अत्राह—**मानान्तरेति**। (497) वेदस्य मानान्त-रानपेक्षत्वमुपेत्यो[2]क्त्वा, [3]तदपि नास्ति, इत्याह—**तथेति**। (498) शास्त्रस्य माना-

---

1. **नित्यस्येति** परिणामिनोऽपीत्यादिः।
2. **उक्त्वेति** मानान्तरविरुद्धार्थबोधकत्वाभावमुक्त्वेत्यर्थः।
3. **तदपि**—मानान्तरानपेक्षत्वमपि।

लोकप्रसिद्धन्यायार्थैरंशांशित्वादिकल्पना ।
परात्मनः कल्पयितुं नातो युक्ता कथंचन ॥ (499)

विस्फुलिङ्गाद्युपन्यासः क्षेत्रज्ञपरमात्मनोः ।
ऐकात्म्यप्रतिपत्त्यर्थस्तस्मादत्र विवक्षितः ॥ (500)

उपक्रमोपसंहाराद्यथोक्तोऽर्थो विवक्षितः ।
ब्रह्मादि सर्वमात्मेति प्रतिज्ञाय श्रुतिर्यथा ॥ (501)

दुन्दुभ्याद्यैश्च दृष्टान्तैर्हेतुभिश्च समर्थ्यते ।
अपूर्वाद्यादिभिर्वाक्यैः प्रतिज्ञार्थोपसंहृतिः ॥ (502)

सर्ववेदान्तवाक्येषु ब्रह्मैकत्वं विधीयते ।
इत्यविप्रतिपत्तिर्हि व्याख्यातॄणामशेषतः ॥ (503)

* तद्विध्येकोक्तियोगस्य ह्यक्लेशात्संभवे सति ।
सृष्ट्यादिवचसां नैव युक्ताऽर्थान्तरकल्पना ॥ (504)

न्तराविरुद्धबोधकत्वे फलितमाह—लोकेति । लोकसिद्धन्यायाः—विस्फुलिङ्गादिदृष्टान्ताः । तैरग्न्यादिवत् परस्य अंशित्वादि न कल्पनीयम्, निष्कलत्वादिश्रुतिविरोधादित्यर्थः । (499) विस्फुलिङ्गादिदृष्टान्तैरंशित्वादेरविवक्षितत्वे, किं विवक्षितम्, अत्राह—विस्फुलिङ्गेति । (500) सृष्ट्यादिवाक्यानामैक्यपरत्वे हेतुमाह—उपक्रमेति । तद्दर्शयति—ब्रह्मेति । यथा—प्रतिज्ञानुसारेणेति यावत् । तज्जत्वादिभिः हेतुभिश्चेत्यर्थः । (501-502) ऐक्यपरत्वं वेदानां तद्व्याख्यातॄणामेव विप्रतिपन्नम्, अत्राह—सर्वेति । (503) किं ततः स्यात्, अत्राह—

---

* तद्विध्येकोक्तियोगस्येति तस्य-ब्रह्मात्मैक्यस्य विधिः विधायकं तत्त्वमस्यादिवाक्यम् । अज्ञातज्ञापनं विधिरत्र बोध्यम् । तेन एकोक्तियोगः—एकवाक्यत्वसंबन्धः अङ्गाङ्गित्वमिति यावत् । तस्य, सृष्ट्यादिवचसां अक्लेशात् संभवे, सृष्ट्याद्यर्थकल्पना न युक्ता, 'संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते' इति न्यायादिति समुदायार्थः ।

न च प्रमाणं तत्रास्ति कल्प्यं च स्यात्फलान्तरम् ।
ऐकात्म्यपरतैवातः सृष्ट्यादिवचसां भवेत् ॥ (505)

आचक्षते तथा चात्र केचिदाख्यायिकां शुभाम् ।
यथाभिलषितार्थोऽयं यथा संभाव्यते स्फुटः ॥ (506)

यथा हि कश्चित्प्रागासीच्चक्रवर्तिसुतो युवा ।
व्याधियोगोपघातादेरुन्मत्तः समपद्यत ॥ (507)

ध्वस्तराजाभिमानः सन् मुग्धो वनमुपेयिवान् ।
व्याधैः परिगृहीतश्च व्याधोऽस्मीत्यभिमन्यते ॥ (508)

* तत्कर्मा तदहङ्कारः कालेन महताऽभवत् ।
ध्वस्तराजत्वसंस्कारो वसन् शबरसद्मनि ॥ (509)

शुभौषध्युपयोगाच्च स्वस्थधीः समजायत ।
स्वस्वभावानुरोधाच्च व्याधेभ्यो व्युत्थितात्मधीः ॥ (510)

तद्धियीति । (504) [1]अर्थान्तरपरत्वं प्रमाणप्रयोजनहीनत्वाच्च न कल्प्यम्, इत्याह—**न चेति** । (505)

द्रविडाचार्योक्ताख्यायिकानिरूपणम्

वेदान्तानामैक्यपरत्वं, तच्छेषत्वं सृष्ट्यादिवाक्यानाम्, इत्यत्र **द्रविडाचार्य**-प्रणीतामाख्यायिकां प्र[मा]णयति—**आचक्षत इति** । (506) तामवतारयति—**यथा हीति** । राजसुतोऽसौ पितृभ्यां प्रकृत्या च कुतो वियुक्तः, अत्राह—**व्याधीति** । दैवोपघातादित्यर्थः । पूर्वसंस्कारात् राजाहमिति कुतो न स्मृतवान्, अत्राह—**ध्वस्तराजत्वेति** । (507-508-509) विपरीतभावनयाभिभूतस्य पूर्व-संस्काराभिभवे, मिथ्याधीध्वस्तिरेव न स्यात्, अत्राह—**शुभेति** । तर्हि [2]तदैव

---

1. अर्थान्तरपरत्वं—सृष्ट्यादिपरत्वम् ।

* तत्कर्मा तदहङ्कारः—व्याधकर्मा व्याधोऽहमित्यभिमानवान् ।

2. तर्हि तदैवेति राजजात्यनुसारेण व्याधाद्यभिमानादेः व्युत्थितत्वे, तस्मिन् समये एव व्याधाभिमानं जह्यादित्यर्थः ।

तच्छीलरूपकर्मभ्यो व्यावृत्तधिषणः स्वतः ।
केवलस्मृत्यभावाच्च न व्याधत्वं जहात्यसौ ॥ (511)

कुतश्चिदागमात् ज्ञात्वा तमुपेत्याप्रतारकः ।
तज्जातिकर्मसंबन्धतत्त्वविच्चपितुः सखा ॥ (512)

प्रवृत्त्या कर्मणा जात्या चक्रवर्त्युचितैस्तथा ।
लक्षणै राजपुत्रत्वं यथा कश्चित्प्रबोधयेत् ॥ (513)

* लब्धमात्रस्मृतिः सोऽथ राजास्मीत्यवबोधतः ।
बाधित्वा स्वमसंबोधं हित्वा व्याधत्वमात्मनः ॥ (514)

राज्याभिषेकमाप्नोति प्राप्य सिंहासनं पितुः ।
अवाप्तराजसूनुत्वात् तत्प्राप्तौ नापि चेष्टते ॥ (515)

मोहाध्यस्तात्मव्याधत्वान्मोहध्वंसातिरेकतः ।
राजपुत्रत्वसंप्राप्तौ नान्यत् किञ्चिदपेक्षते ॥ (516)

यथा, तथायं ब्रह्मैव ब्रह्मासंबोधमात्रतः ।
बुद्धीन्द्रियशरीरादावात्मत्वं प्रतिपेदिवान् ॥ (517)

सोऽयं सांसारिकैरर्थैः प्रत्यक्तत्त्वाप्रबोधतः ।
विशिनष्टि स्वमात्मानं प्रतीचीनमनात्मभिः ॥ (518)

व्याधत्वं जह्यात्, अत्राह—**केवलेति** । (510-511) हेत्वभावादेव तर्हि राजत्वस्मृत्यभावात् न तस्य कदाचिदपि व्याधत्वपरित्यागः, अत्राह—**कुतश्चिदिति** । आगमात्—उपदेशादित्यर्थः । (512) [1]राजत्वगतौ हेत्वन्तरमाह—**प्रवृत्त्येति** । ना(स्ति)[सि]त्वं व्याधः राजसूनुस्त्वमसि इति बोधयेदित्यर्थः । (513) उपदेशफलमाह—**लब्धेति** । (514–515) राजत्व(व्या)[प्रा]प्तौ व्यापारानपेक्षत्वे हेतुमाह—**मोहेति** । (516) दार्ष्टान्तिकमाह—**तथेति** । (517) अनात्मनि आत्मधीफलमाह—**सोऽयमिति** । (518) संसारित्वं प्रदर्श्य आचार्यकृत्य-

---

1. राजत्वगतौ—राजत्वावगतौ ।

* लब्धमात्रस्मृतिः—उपदेशे लब्धमात्रे तत्प्रभावात् प्राप्तराजस्मृतिरिति यावत् ।

संसारभूमावासीनं संसार्यस्मीत्यवस्थितम् ।
मुमुक्षुं तत्त्ववित्साक्षात् संसारव्युत्थितैषणम् ॥ (519)

य आत्मेत्यादिभिर्वाक्यैरन्वयव्यतिरेकतः ।
तत्त्वमस्यादिवाक्येन गुरुः संबोधयेन्नरम् ॥ (520)

सम्यग्ज्ञानाग्निसंप्लुष्टप्रत्यक्तत्त्वमहातमाः ।
हित्वा मोहोत्थमखिलं ब्रह्मैव ब्रह्म यात्यथ ॥ (521)

प्रत्यक्तत्त्वतमोध्वंसव्यतिरेकेण मुक्तये ।
अपेक्षते यतो नान्यत्किञ्चित्साधनमण्वपि ॥ (522)

जन्माद्यसंभवात्तस्माद् ब्रह्मबोधातिरेकतः ।
कार्यान्तरं न संभाव्यं व्यर्थं चापि भवेद्वचः ॥ (523)

* अंशांशित्वादि चेत्साक्षात् ब्रह्मज्ञाने विवक्षितम् ।
समुद्रादेरिव तदा नावक्ष्यच्छ्रुतिरादरात् ॥ (524)

माह—**संसारेति** । अन्वयव्यतिरेकाभ्यां पदार्थ[1]द्वयशोधनद्वारा [2]वाक्यार्थं बोधयेदित्यर्थः । (519-520) गुरूपदेशफलमाह—**सम्यग्ज्ञानेति** । (521) 'ब्रह्मैव' इत्येवकारेण ब्रह्मप्राप्तौ न कर्माद्यपेक्षेत्युक्तम् । अत्र हेतुमाह—**प्रत्यगिति** । (522) 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' (भ. गी. 3-20) इति स्मृतेरस्ति मुक्तौ कर्मणामुपयोगः, अत्राह—**जन्मेति** । उत्पत्त्यादि [3]चतुर्विधक्रियाफलासंभवात् ज्ञानात् मुक्तिश्रुतिवैयर्थ्यं चेत्यर्थः । (523)

---

1. **पदार्थद्वयेति** त्वंपदार्थस्य तत्पदार्थस्य च शोधनद्वारेणेत्यर्थः ।
2. **वाक्यार्थं**—ऐक्यम् ।
3. **चतुर्विधक्रियाफलेति** उत्पत्तिः आप्तिः विकारः संस्कारः इति चतुर्विधं क्रियाफलं बोध्यम् ।

* अंशांशित्वादेः वस्तुतो विवक्षितत्वे, परस्य सैन्धवघनवत् प्रज्ञानैकरसत्वं, वाङ्मनसागोचरत्वं भेददर्शननिन्दा च नोपपद्यते इति संपिण्डितार्थः ।

यदनभ्युदितं वाचा मनुते मनसा न यत् ।
अपूर्वादि तथा वाक्यमपि सैन्धवखिल्यवत् ॥ (525)

नानात्वदृष्टिनिन्दा च मृत्योरिति तथा वचः ।
अंशांशित्वविवक्षायां न प्रायोक्ष्यत्तदेदृशम् ॥ (526)

एकैकरूपैकात्म्यार्थधियो दार्ढ्यप्रसिद्धये ।
सृष्ट्यादिश्रुतयस्तस्मान्न तु तत्प्रत्ययाय ताः ॥ (527)

न चात्मनो निरंशस्य तथाऽसंसारिणः स्वतः ।
अंशिसंसारिभावत्वं न्यायेनाप्युपपद्यते ॥ (528)

कल्पितोपाधिहेतुश्चेदंशिसंसारिकल्पना ।
काममस्तु न तादृक्षु धीराणां सत्यधीर्भवेत् ॥ (529)

विवक्षितं चेदैकात्म्यं सर्वोपनिषदां भवेत् ।
विज्ञानात्मादिसंभेदस्तद्विरुद्धः किमुच्यते ॥ (530)

कर्मकाण्डप्रमाणत्वविरोधध्वस्तये किल ।
विज्ञानात्मादिसंभेदः इति केचित् प्रचक्षते ॥ (531)

सृष्ट्यादिश्रुतेः नांशांशित्वविवक्षा इति निरूपणम्

सृष्ट्यादिश्रुतेः ज्ञानार्थत्वात् नांशत्वादि विवक्षितमित्युक्त्वा, अस्थूलादिवाक्यविरोधाच्च नांशित्वादिविवक्षा, इत्याह—**अंशेति ।** (524) किं नावक्ष्यदिति, तदाह—**यदनभ्युदितमिति ।** (525-526) तस्मात् सृष्ट्यादयो ज्ञानार्था एव, इत्याह—**एकैकेति ।** अंशांशित्वादिनिरासार्थमेकरूपेत्युक्तम् । (527)

ब्रह्म सावयवं उपादानत्वात् मृदादिवत् इत्याशङ्क्य, तदंशित्वादिकं स्वाभाविकं, औपाधिकं वा । आद्यं प्रत्याह—**नचेति ।** (528) द्वितीयमङ्गीकरोति—**कल्पितेति ।** औपाधिकस्य मिथ्यात्वादित्यर्थः । तस्माच्छास्त्रमेकत्वपरमिति । (529-530)

पूर्वकाण्डप्रामाण्याय क्षेत्रज्ञादिभेदकल्पनमित्यस्य निरासः

क्षेत्रज्ञादिभेदकल्पनफलं द्वैतिमतानुसारेणाह—**कर्मेति ।** (531) व्यति-

ऐकात्म्यमात्रे जगति समाप्तपुरुषार्थके ।
चोदनाप्रतिषेधौ वः स्यातां निर्विषयौ तदा ॥ (532)

* स्वत एव विमुक्तत्वात् बन्धाभावात् स्वतस्तथा ।
वेदान्तानां तथाऽऽरम्भो निष्फलः संप्रसज्यते ॥ (533)

इत्येवमादिचोद्यानि परिहाराश्च वर्णिताः ।
संबन्ध एव बहुशो विचारेषु च कीर्तिताः ॥ (534)

परस्परविरोधाच्च प्रकाशतमसोरिव ।
कर्मकाण्डोपनिषदोर्निष्प्रामाण्यं द्वयोरपि ॥ (535)

* सति यस्य प्रमाणत्वे प्रामाण्यं स्याद् द्वयोरपि ।
तस्यैव कर्मकाण्डस्य प्रामाण्यमवसीयताम् ॥ (536)

कर्मकाण्डप्रमाणत्वे प्रामाण्यं चेद् द्वयोरपि ।
सर्वग्रासि तदैकात्म्यमागादिह पुनर्बलात् ॥ (537)

रेकद्वारा [1]एतत्प्रतिपादयति—**ऐकात्म्येति** । (532) अद्वैतमते **कर्मकाण्डविरोध**मुक्त्वा ज्ञानकाण्डेऽपि तमाह—**स्वत इति** । (533) पुनरुक्तिमाशङ्क्य परिहारभेदेन परिहरति—**इत्येवमिति** । आदिपदेन नियोगपरत्वसंग्रहः । (534) किञ्च द्वयोरपि काण्डयोः प्रामाण्यमिष्टं, ज्ञानकाण्डस्यैव वा । नाद्यः, इत्याह—**परस्परेति** । (535) द्वितीयं दूषयति—स[तीति] । (536) ज्ञानकाण्डप्रामाण्यं त्वयैवानिराकृतं स्यात्, इत्याह—**कर्मेति** । (537)

---

1. **एतत्प्रतिपादयति**—पूर्वकाण्डप्रामाण्यविरोधाभावरूपं क्षेत्रज्ञादिभेदकल्पनफलं प्रतिपादयति ।

* **स्वत एवेति** तथा च अधिकार्यभावादुपनिषदनारम्भ इत्यर्थः ।

* **सति यस्य प्रमाणत्वे इति** कर्मकाण्डप्रामाण्ये शिष्याचार्यादिभेदस्याबाधितत्वात्, तदपेक्षज्ञानकाण्डस्यापि प्रामाण्यं सिद्ध्यतीति भावः ।

यद्येवमप्रमाणत्वमस्तूपनिषदां तदा ।
मानान्तरविरोधाच्च नैतासां मानतेष्यते ॥ (538)

अपि स्वार्थविघातं च करोत्युपनिषद्यतः ।
अप्रामाण्यमतस्तस्याः कर्मकाण्डस्य मानता ॥ (539)

नोक्तोत्तरत्वात् साध्वेतद्भवता परिचोद्यते ।
व्यर्थतान्यार्थते नेह यथा तत्प्राक् प्रपञ्चितम् ॥ (540)

ब्रह्मास्मीति धियो जन्मसमकाला विमुक्तता ।
यतोऽनुभूयते साक्षात् नानर्थक्यं भवेत्ततः ॥ (541)

वस्तुमात्रावसायित्वं संबन्धे प्राक् प्रपञ्चितम् ।
यतोऽतो नोपनिषदामन्यार्थत्वं कथं चन ॥ (542)

स्वप्रमेयप्रमोत्पत्त्यनुत्पत्त्येकहेतुके ।
प्रमाणत्वाप्रमाणत्वे नान्यथा ते प्रसिद्ध्यतः ॥ (543)

उपनिषदामप्रामाण्यमिति पूर्वपक्षः

[1]पर आह—यदीति । हेत्वन्तरमाह—मानान्तरेति । प्रत्यक्षादि-विरोधादित्यर्थः । (538) स्वोपजीव्यशिष्याचार्यादिभेदविरोधाच्च अद्वैतवचसाम-मात्वम्, इत्याह—अपीति । (539)

सिद्धान्तनिरूपणम्

सिद्धान्तयति—नेति । ज्ञानकाण्डं[न]फल(हने)हीनं, नाप्यन्यशेषमि-त्युक्तं स्मरेत्यर्थः । (540) फलवत्त्वं विवृणोति—ब्रह्मेति । (541) अनन्यशेषत्वं कुत्रोक्तम्, अत्राह—वस्त्विति । संबन्धग्रन्थे इत्यर्थः । (542) वेदान्ते मात्वं वक्तुं [2]मानामानलक्षणमाह—स्वप्रमेयेति । (543) मानलक्षणस्य

---

1. परः—क्षेत्रज्ञादिभेदवादी ।

2. मानामानलक्षणं—प्रमाणस्य अप्रमाणस्य च लक्षणम् ।

किञ्चातो यदि नामैवं प्रकृतार्थोपयोगि यत् ।
शृण्वेकाग्रमनाः सर्वं यदेवं सति वस्तु तत् ॥ (544)

स्वप्रमेये प्रमां साक्षात् करोत्युपनिषद्यदि ।
अप्रामाण्यं कथं तस्याः कुतोऽतो मानताऽन्यथा ॥ (545)

न चेत्करोत्युपनिषत् प्रमामित्यभिधीयते ।
प्रत्यक्षेण विरुद्धार्थं त्वदीयं वचनं भवेत् ॥ (546)

नाग्निर्दहति काष्ठानि न तापयति भास्करः ।
इति यद्वत्तथोक्तिस्ते प्रत्यक्षेण विरुध्यते ॥ (547)

अग्निदाहादिवत् साक्षाद्वेदान्तज्ञानजं फलम् ।
संसारानर्थहानाख्यं प्रत्यक्षमनुभूयते ॥ (548)

विघ्नन्ति स्वार्थमित्युक्तं यच्च तच्चापि पेलवम् ।
यथा तदुच्यमानं त्वं यथावच्छ्रोतुमर्हसि ॥ (549)

स्वप्रमेयावबोधो हि मानानां स्वार्थ उच्यते ।
तं चेत्कुर्वन्ति वेदान्ताः कुतस्तेषाममानता ॥ (550)

न च वेदान्तवाक्योत्थज्ञानस्येहास्ति बाधकम् ।
बाधकानामपि सतां प्रत्यग्याथात्म्यरूपतः ॥ (551)

प्रकृतोपयोगं प्रश्नपूर्वकमाह—**किञ्चेति** । (544) उपनिषत् प्रमां करोति, न वा । आद्यं प्रत्याह—**स्वप्रमेय इति** । अतः—प्रमाजनकत्वात्, अन्यथा मानता कुतः इत्यन्वयः । (545) द्वितीयं दूषयति—**न चेदिति** । (546) उदाहरणेनैतत् स्पष्टयति—(अग्निदाहादिवदिति) **नाग्निरिति** । (547) अबोधकत्वेनामानत्वाभावेऽपि [1]अपुमर्थत्वेनामात्वम्, इत्यत्राह—[**अग्निदाहादिवदिति**] । (548)

---

1. अपुमर्थत्वेनामात्वमिति अनधिगताबाधितफलवदर्थावबोधकत्वं प्रमाणत्वमिति भावः ।
त्रयाणां (549–550–551) वार्त्तिकानां व्याख्या त्रुटिता भाति ।

प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ।
कुर्वन्त्येव प्रमां यत्र तदसंभावना कुतः ॥ (552)

किमेकविषयत्वेन किं वा विषयभेदतः ।
विरोधः स्यात् प्रमाणानामित्येतदभिधीयताम् ॥ (553)

मानान्तरेण संवादो यदि चेदनुवादिता ।
विरोधो न तु मानानां सदैकार्थसमागमे ॥ (554)

भिन्नप्रमेयतायां च श्रोत्रादीनां यथा तथा ।
परस्परानपेक्षत्वान्नितरामविरुद्धता ॥ (555)

न चैकमेव सद्वाक्यं करोति न करोति च ।
प्रमां तत्प्रतिषेधं च कुर्वत् क्वचिदिहेक्ष्यते ॥ (556)

अग्निः शीतः तथोष्णश्चेत्येवमाद्युक्तितो ननु ।
विरुद्धार्थावभासोऽयं जायमानः समीक्ष्यते ॥ (557)

नैकस्मान्नापि च द्वाभ्यां विरुद्धार्थोऽवसीयते ।
अनूद्योक्त्येकदेशेन शीतोऽग्निरिति बोध्यते ॥ (558)

(549-550-551) **प्रमाणमिति** । आत्माधीनसत्तास्फुरणत्वात् प्रमाणादीनामित्यर्थः । (552) प्रत्यक्षादिविरोधनिराकरणाय विकल्पयति—**किमिति** । [553] [1]आद्यमनूद्य दूषयति—**मानान्तरेणेति** । संवादः—एकविषयत्वम् । अस्मिन् कल्पे अनुवादता दोषः न विरोध इत्यर्थः । [554] [2]द्वितीयं दूषयति—**भिन्नेति** । [555] तत्त्वमादिवाक्यस्य स्वार्थविरुद्धबोधकत्वादमात्वम्, अत्राह—**न चेति** । लौकिकं वैदिकं च वाक्यं प्रमां करोति, न करोति इति प्रमां तत्प्रतिषेधञ्च कुर्वत् व्यवहार(भौ)[भू]मौ न दृश्यते इत्यर्थः । [556] **एकवाक्यस्य** विरुद्धार्थबोधकत्वमनुभूयते, इति शङ्कते—**अग्निरिति** । [557] इदं वाक्यमेकं, द्वयं वा । उभयत्रापि न विरुद्धबोधकता, इत्याह—**नेति** । यदा एकं वाक्यं, तदौ(स्था)[ष्ण्या]नुवादेन शीतोऽग्निर्बोध्यते, इत्याह—**अनूद्येति** ।

---

1. **आद्यमनूद्य**—एकविषयत्वेन मानान्तरविरोधः इति कल्पमनूद्य ।
2. **द्वितीयं**—विषयभेदे मानान्तरविरोधकल्पम् ।

* संभवत्येव शीतोऽग्निः [प्र]माणान्तरगोचरः ।
मानान्तरविरोधोऽपि तथा च सति नेष्यते ॥ (559)

शीतवद्वा भवेच्छीतः शैत्यस्यानपहारतः ।
एवमप्यविरोधः स्यादस्य मानान्तरैरपि ॥ (560)

शैशिरोऽग्निर्भवेच्छीतः तथोष्णः पार्थिवो भवेत् ।
भिन्नाग्नयर्थावबोधित्वाद्वाक्ययोर्न विरुद्धता ॥ (561)

* ऐकार्थ्ये न विरोधोऽस्ति द्व्यर्थत्वेऽपि न माश्रयात् ।
मानान्तराच्च नैवास्ति मान्तराविषयत्वतः ॥ (562)

---

[558] शीताग्नेरसंभवात् कथमनूद्य विधिः, अत्राह—**संभवतीति** । [559] अग्नेरु(से)[ष्ण]त्व(मिव)[निय]मेऽप्यविरोधमाह—**शीतवद्वेति** । [560] 'शीतोऽग्निः संभवति' (वा. 559) इत्युक्तम्, कोऽसाविति, तमाह—**शैशिर इति** । विद्युच्चन्द्रादिदिव्याग्निः शैशिर उच्यते । एकवाक्ये विरोधाभावमुक्त्वा, [1]वाक्यभेदे तमाह—**भिन्नेति** । [561] वाक्यस्यैकत्वे विरोधाभावमुक्तमनूद्य, एकवाक्यस्यानेकार्थत्वेऽपि तमाह—**ऐकार्थ्य इति** । अग्निरुष्णः शीतश्च [2]इत्येकं अग्नेरुष्णत्वं शीतत्वं च बोध(इ)[य]ति यदा, तदापि न विरोधो मानसिद्धत्वादित्यर्थः । मान्तरेण विरोधः स्यात्, अत्राह—**मानान्तराच्चेति** । भिन्नार्थे[3]नाभिन्नार्थेन वा

---

* **संभवत्येव शीतोऽग्निरिति** चन्द्रादिः शैशिरोऽग्निः शीतः संभवत्येवेत्यर्थः ।

1. **वाक्यभेदे तमाह**—वाक्यभेदपक्षे मानविरोधाभावमाह ।
2. **इत्येकमिति** वाक्यमिति शेषः ।
3. **अभिन्नार्थेन वा न विरोध इति** अभिन्नार्थके मानान्तरे, अनुवाद एव दोषो न विरोध इत्यर्थः ।

* "वाक्यैक्ये तन्नानात्वे च अविरुद्धता इत्युक्त्वा, दृष्टान्तस्थमर्थं दार्ष्टान्तिके अर्पयति—**ऐकार्थ्य इति** । अस्यार्थः । तत्त्वमसिवाक्यस्य ऐक्यं, अनैक्यं वा । आद्येऽपि, ऐकार्थ्यं, अनैकार्थ्यं वा । नोभयथापि विरोधः मानमाश्रित्य एकस्यानेकस्य वाऽर्थस्य दृष्टेः, मानसिद्धस्य चाविरुद्धत्वादिति । वाक्यानेकत्वपक्षं दूषयति—**मानान्तरादिति** । न वाक्यात् वाक्यान्तरस्य विरोधः, अन्यविषयत्वात् । अन्यथा संवादेनाविरोधादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

अभ्युपेत्यैतदुदितं न तु वाक्यविदां नयः ।
यदनेकार्थबोधित्वमेकस्य वचसः सतः ॥ (563)

अर्थैकत्वादिति तथा वाक्यलक्षणमुच्यते ।
अनेकार्थावबोधित्वे न स्याल्लक्षणवद्वचः ॥ (564)

एकमेव यदा वाक्यं कृत्स्नो वेदोऽभ्युपेयते ।
वाक्यान्तरासंभवतः तदा केन विरुद्धता ॥ (565)

* वाक्यद्वयं चेदथवा सिद्धसाध्यार्थभेदतः ।
तदापि न विरोधोऽत्र विभिन्नार्थावबोधिनोः ॥ (566)

नापि स्वार्थं परार्थं वा विहन्त्युपनिषत् क्वचित् ।
कथं चेदुच्यमानं तत् शृण्वेकाग्रमना यथा ॥ (567)

सर्वमात्मेति चेत्कुर्यात्प्रमेयविषयां प्रमाम् ।
* विहन्त्युपनिषत्स्वार्थमिति निर्लज्जगीरियम् ॥ (568)

न विरोध इत्यर्थः । (562) एकवाक्यस्यानेकार्थत्वमयुक्तम्, इत्याह—**अभ्युपेत्येति**। (563) वाक्यविदां न्यायमाह—**अर्थेति** । 'अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्' [पू. मी. 2-1-46] इति सूत्रादित्यर्थः । [564] उक्त[1]न्यायस्य प्रकृ[2]तोपयोगं वदन्, कृत्स्नो वेदः एकं वाक्यं, अनेकं वा इति विकल्प्य, आद्यं प्रत्याह—**एकमिति** । (565) द्वितीयं दूषयति—**वाक्येति** । (566)

स्वपरार्थविघातकत्वात् अमात्वमुपनिषदाम्, अत्राह—**नापीति** । (567) [3]स्वार्थः स्वविषयः, स्वफलं वा । आद्यं प्रत्याह—**सर्वमिति** । (568) [4]द्वितीयं

---

1. **उक्तन्यायस्य**—अर्थैकत्वादेकं वाक्यमिति न्यायस्य ।
2. **प्रकृतोपयोगं**—उपनिषदां मानान्तराविरोधरूपप्रकृतार्थे उपयोगम् ।
* **सिद्धसाध्यार्थभेदत इति** ज्ञानकाण्डं सिद्धब्रह्मार्थकम् कर्मकाण्डं साध्यार्थकम् ।
3. **स्वार्थः स्वविषयः स्वफलं वेति** स्वार्थविघातकत्वमित्यत्र स्वार्थपदार्थस्यायं विकल्पः ।
* **निर्लज्जगीरिति** आत्मघातकत्वस्यासंभावितत्वादिति भावः ।
4. **द्वितीयं**—स्वफलविघातकत्वम् ।

निःशेषपुरुषार्थाप्तिः सर्वानर्थात्ययः सदा ।
वेदान्तज्ञानतश्चेत्स्यात् स्वार्थोऽतोऽन्यः क इष्यते ॥ (569)

निषेधति विधत्ते वा न चाप्युपनिषत् क्रियाम् ।
प्रत्यक्तत्त्वैकसंबोधे तद्वाक्योपक्षयत्वतः ॥ (570)

न चापि कर्मकाण्डोक्तिः स्वार्थे न कुरुते प्रमाम् ।
स्वार्थे च सा प्रमां कुर्वत्यमानं कथमुच्यते ॥ (571)

* प्रत्यक्षाच्च प्रमोत्पत्तेर्ज्योतिष्टोमादिवाक्यतः ।
प्रमैवोत्पद्यते नेति वक्तुमेतन्न शक्यते ॥ (572)

विषयापहृतेर्नो चेत् वेदान्तोक्त्यप्रमोत्थितिः ।
न प्रत्यक्षबलीयस्त्वात् अनुमानप्रबोधतः ॥ (573)

यथासिद्धान्युपादाय कामद्वेषवशानुगः ।
इष्टमेव सदा मे स्यान्मा भूच्चानिष्टमण्वपि ॥ (574)

दूषयति—**निःशेषेति** । (569) परार्थवि(घा)[धा]तं परिहरति—**निषेधतीति** । (570) ब्रह्मवाक्यस्य स्वार्थपरत्वे कर्मवाक्यस्यामानत्वादबोधकत्वं, अन्यथाबोधकत्वं वा । नाद्यः इत्याह—**न चेति** । (571) कर्मवाक्येभ्यः स्वार्थे प्र(थ)मैव नोत्पद्यते, मानाभावात्, अत्राह—**प्रत्यक्षाच्चेति** । (572) कर्मवाक्यं न प्रमाहेतुः [1]मानान्तरापहृतविषयत्वात् अग्निः शीत इति वाक्यवत् । न च हेत्वसिद्धिः, अद्वैतविषयवेदान्तैरप[2]हारात्, इति शङ्कते—**विपर्येति** । प्रत्यक्षविरोधेन प्रत्याह—**नेति** । (573) कर्मशास्त्रस्य मानत्वे कर्मभेदस्य सत्यत्वात् अद्वैतहानिः, अत्राह—**यथेति** । [3]सुखदुःखनिवृत्तिफलार्थिनो लोकसिद्धसाधनान्यादाय संबन्ध-

---

* 'प्रात्यक्ष्याच्च' इति मु. पु. पाठः ।

1. मानान्तरापहृतविषयत्वात्—मानान्तरबाधितविषयत्वात् ।
2. अपहारादिति कर्मवाक्यविषयस्य द्वैतस्येत्यादिः ।
3. सुखदुःखनिवृत्तिफलार्थिनः—सुखं दुःखनिवृत्तिश्चेति यत्फलं, तत्कामस्य ।

साधनानीष्टलाभार्थमनिष्टार्थापनुत्तये ।
आचक्षाणा श्रुतिः पुंसो नान्यार्थं वक्ति कश्चन ॥ (575)

यथा काम्याग्निहोत्रादौ साध्यसाधनसंगतिम् ।
विदधन्नानृतत्वादि कामानां वक्ति कुत्रचित् ॥ (576)

न चापि न प्रवर्तन्ते पुरुषाः काम्यकर्मसु ।
यतोऽतत्त्वविदां कामो न कदाचिन्निवर्तते ॥ (577)

अकामतः क्रिया काचित् दृश्यते नेह कुत्रचित् ।
यद्यद्धि कुरुते किञ्चित् तत्तत्कामस्य चेष्टितम् ॥ (578)

स यथाकाम इत्यादिरेषोऽर्थश्च सविस्तरः ।
वक्ष्यतेऽकामयमानश्च तथाऽकुर्वन्विमुच्यते ॥ (579)

---

[1]मात्रं कर्मशास्त्रं व्यनक्ति । न तु कर्मभेदसत्यत्वादौ व्याप्रियते इत्यर्थः । (574-575) अत्र दृष्टान्तमाह—**यथेति** । काम्यकर्मसु प्रवृत्तं शास्त्रमज्ञातसंबन्धगमकं कामतत्फलतदुपायानां मध्ये क्वचिदपि सत्यत्वादि न ब्रूते, तथा नित्याग्निहोत्रादावपीत्यर्थः । (576) [2]तेषां सत्यत्वानुक्तौ पुंप्रवृत्तिर्न स्यात्, अत्राह—**न चेति** । (577) काम्यकर्मसु फलरागात्प्रवृत्तावपि न नित्ये (शाशु)[षु] प्रवृत्तिः फल[3]रागाभावात्, इत्याशङ्क्य, तत्रापि रागमूला प्रवृत्तिः इत्यत्र[मानमा]ह—**अकामत इति** । (578) श्रुतिरपि मानमिह, इत्याह—**स यथेति** । कामाभावे कर्माभावात् मुक्तिप्रतिपादकं 'अथाकामयमानः' (बृ. 6-4-6) [इत्या]दिवाक्यमप्युदाहरति—**अकामयमानश्चेति** । अकुर्वन् इति पदम् । (579) ज्ञानिनोऽका[4]मस्यापि प्रवृत्तेः कथमकामोऽकुर्वन्

---

1. **संबन्धमात्रं**—साध्यसाधनभावसंबन्धमात्रम् ।
2. **तेषां**—कामफलोपायानाम् ।
3. **फलरागाभावादिति** नित्यानामफलत्वादिति भावः ।
4. **अकामस्यापि प्रवृत्तेरिति** दर्शनादिति शेषः ।

सर्वाधिकारप्रध्वंसाच्च कृत्स्नात्मावबोधिनः ।
प्रवृत्तौ वा निवृत्तौ वा गुणभावः सदेष्यते ॥ (580)

अतो निर्विषयत्वादि ब्रह्मैकत्वाद्यदीरितम् ।
* तत्सर्वं परिहृतं ज्ञेयं यथोक्तेनैव वर्त्मना ॥ (581)

न निवर्तयितुं शक्तं रागाद्याकृष्टचेतसः ।
शास्त्रं विरक्तचित्तान्वा न प्रवर्तयितुं क्षमम् ॥ (582)

इष्टानिष्टफलानीति साधनानि प्रकाशयेत् ।
न निवृत्तिं प्रवृत्तिं वा पुंसः शास्त्रं करोति तत् ॥ (583)

अपि शास्त्रं समुल्लङ्घ्य रागादिबलवत्तया ।
प्रवर्तमानाः पुरुषाः दृश्यन्तेऽद्यापि कामिनः ॥ (584)

साध्यसाधनसंबन्धानिष्टानिष्टफलोदयान् ।
शास्त्रं त्वादित्यवत्साक्षात् प्रकाशयति तान्सदा ॥ (585)

तेषु शास्त्रैकदीपेषु साध्यसाधनवर्त्मसु ।
यथारुचि प्रवर्तन्ते पुरुषा न तु शास्त्रतः ॥ (586)

मुच्यते, अत्राह—सर्वेति । अधिकारः—विधिपुरुषसंबन्धादिः । गुणभावः-कर्तृत्वम् । (580) कामिनोऽज्ञस्य प्रवृ(त्ति)[त्त्य]वश्यंभावात् कर्मशास्त्रस्य अन्यथाबोधकत्वमिति कल्पान्तरमपि निरस्तम्, इत्याह—अत इति । (581) यदुक्तं रागादेव प्रवृत्तिरिति, तदयुक्तम्, शास्त्रस्य प्रवर्तकत्वादि[ति], तत्राह—**नेति ।** (582) किं तर्हि शास्त्रं कुर्यात्, अत्राह—**इष्टेति ।** (583) शास्त्रस्याप्रवर्तकत्वे हेत्वन्तरमाह—**अपीति ।** (584) शास्त्रस्य प्रकाशकत्वं दृष्टान्तेन स्फुटयति—**साध्येति ।** (585) बोधकमेव शास्त्रं, रागादेव प्रवृत्तिः इत्युक्तं निगमयति—

---

* यथोक्तेनैव वर्त्मनेति अज्ञस्याविरक्तस्य कर्मणि प्रवृत्तिः । साध्यसाधनसंबन्धबोधकत्वेन कर्मकाण्डप्रामाण्यम् । कर्मतत्फलादीनां सत्यत्वे उदासीनं कर्मकाण्डम् । तेन न विरोधः उपनिषदाम्, इत्युक्तमार्गेणेत्यर्थः ।

विधिशास्त्रस्य नैवातो वेदान्ता बाधकाः सदा ।
न च निर्विषयं तत्स्यात् मेयभेदात् त्वगादिवत् ॥ (587)

केचित्तु पण्डितंमन्या विरोधीनि परस्परम् ।
संभावयन्ति मानानि सर्वाण्यैकात्म्यवस्तुनि ॥ (588)

श्रोत्रादिभिर्यतो भिन्ना मिथः शब्दादयस्त्वमी ।
मीयन्ते सर्वमात्मेति प्रत्यक्षेण विरुध्यते ॥ (589)

* शब्दाद्यर्थोपलब्धारः कर्तारश्च पृथक् पृथक् ।
यस्मादिहानुमीयन्ते तस्माल्लिङ्गविरोधिता ॥ (590)

तथाऽऽगमविरोधं च ग्रामकामादिभेदतः ।
उद्भावयन्ति संहृष्टा ब्रह्मैकत्वप्रदूषकाः ॥ (591)

तेष्विति । (586) प्रकृतमुपसंहरति—**विधीति** । [1]तत्त्वातत्त्वविषयत्वेन व्यवस्थितत्वादित्यर्थः । (587)

तार्किकमतनिरूपणम्

स्वमते सर्वविरोधनिरासेन उपनिषदां स्वार्थपरत्वमुक्तं स्थूणानिखननन्यायेन द्रढयितुं, **तार्किकमत** (मा)[मा]ह—**केचित्त्विति** । ऐक्ये शास्त्रार्थे सति, शास्त्राणि प्रत्यक्षादीनि च मिथो विरुद्धानीत्यर्थः । (588) ब्रह्मशास्त्रस्य प्रत्यक्षेण विरोधमाह—**श्रोत्रेति** । (589) अनुमानविरोधमाह—**शब्दादीति** । इह—देहे इति यावत् । सुखदुःखादयो भिन्नाधिकरणाः विरुद्धधर्मत्वात् शीतोष्णवदित्यर्थः । (590) आगमविरोधमाह—**तथेति** । (591)

---

1. **तत्त्वातत्त्वविषयतयेत्यादि** वेदान्ताः तत्त्वविषयाः, कल्पितातत्त्वविषयं कर्मशास्त्रमित्येवंरूपेणेति यावत् ।

* "**शब्दादीति** स्वदेहसमवेतचेष्टातुल्यचेष्टा देहान्तरेषु दृष्टा । सा प्रयत्नपूर्वा विशिष्टचेष्टात्वात् संमतवत् इत्यनुमानविरुद्धमैक्यशास्त्रमिति भावः ।" इति **शास्त्रप्रकाशिका** ।

ब्रह्मैकत्वविरोधो वः कथं भिन्नार्थबुद्धिभिः ।
इति ब्रह्मविदोपेत्य प्रष्टव्या भेदवादिनः ॥ (592)

किं भोः शब्दादिभेदेन खस्यैकत्वं विरुध्यते ।
न चेद्विरुध्यतेऽथोच्चैर्विरोधः किमितीर्यते ॥ (593)

सत्परिच्छेदकेनापि प्रत्यक्षाद्यैर्ग्रहो भवेत् ।
व्यावृत्तेरन्यतोऽभावमात्रायाः केनचित् क्वचित् ॥ (594)

द्वैतग्राहि यथा मानं न किञ्चिदपि विद्यते ।
तथोदर्के प्रवक्ष्यामि नातो मानविरोधिता ॥ (595)

यच्चोक्तमनुमीयन्ते प्रतिदेहं पृथग्विधाः ।
शब्दाद्यर्थोपलब्धारः कर्तारश्चापि कर्मणाम् ॥ (596)

* भिन्नाः कैरनुमीयन्ते इति पृष्टो वदेद्यदि ।
अस्माभिर्लिङ्गकुशलैरित्येतच्च न युक्तिमत् ॥ (597)

तन्मतनिराकरणम्

एवं मानान्तरविरोधादेकत्वासिद्धिः इति प्राप्ते, परिहरति—**ब्रह्मेति** । (592) ब्रह्मैक्यं विरुध्यते, [1]तदद्वितीयत्वं वा । तत्र आद्यं दृष्टान्तेन(व्या)[निरा]चष्टे—**किमिति** । (593) द्वितीयं प्रत्याह—**सदिति** । अन्यतो व्यावृत्तेः—अर्थान्तरप्रातियोगिक[याः]अभावमात्रायाः—अन्योन्याभावरूपाया इत्यर्थः । (594) **पूर्ण**[2]**काण्डिकायां** निराकरिष्यते च भेदः, इत्याह—**द्वैतेति** । (595) अनुमा(नात्) नविरोधमनुवदति—**यच्चेति** । (596) आक्षिपति—**भिन्ना इति** । आश्रयभेदसिद्धेः प्राक् सुखादीनां विरुद्धत्वमेवासिद्धमिति भावः । क्षिप्तमपि पृष्टं मत्वा,

---

1. **तदद्वितीयत्वं**—ब्रह्मणः अद्वितीयत्वम् ।
2. **पूर्णकाण्डिकायां**—सप्तमाध्यायप्रथमब्राह्मणे 'पूर्णमदः' इति मन्त्रव्याख्यावसरे इति यावत् ।

* "या चेष्टा सा यत्नपूर्वा इत्येतावता नात्मभेदः, स्वप्रयत्नपूर्वत्वस्यापि संभवात्, स्वदेहचेष्टायाः स्वयत्नपूर्वत्ववत् परदेहचेष्टायाः तद्यत्नपूर्वत्वे च आदावेव स्वपरभेदः सिद्ध्येत् । स च नाध्यक्षात्, परस्यानध्यक्षत्वात् । नानुमानात्, अन्योन्याश्रयात्, इति मत्वा, आह—भिन्ना इति । दोषान्तराभिधित्सया शङ्कयति—**इति पृष्ट इति** । तत्र दूषणमाह—**एतच्चेति** ।" इति **शास्त्रप्रकाशिका** ।

अनन्यमानमेयेऽर्थे न भेदः प्रत्यगात्मनि ।
पराङ्मानप्रमेयाश्च नात्मानः स्तम्भकुम्भवत् ॥ (598)

अनुमाकुशला यूयं क इत्येतद्विभाव्यताम् ॥ (599)

देहेन्द्रियमनोबुद्धिक्षेत्रज्ञेषु पृथक् पृथक् ।
नानुमाकौशलं तावत्प्रत्येकं तेषु विद्यते ॥ (600)

देहादिसाधनास्तस्माद्वयमात्मान एव हि ।
भूरिसाधनसाध्यत्वात् क्रियाणां नो विभिन्नता ॥ (601)

भूरिसाधनसाध्यत्वात्क्रियाणामिति चेद्भवेत् ।
हेतुः, तत्राप्यनेकत्वमेकस्यापि प्रसज्यते ॥ (602)

आत्मादीनां क्रियास्तित्वात् प्रत्येकं कारकत्वतः ।
अग्न्यादीनामिव ततः आत्मानेकत्वमापतेत् ॥ (603)

पर आह—**पृष्ट इति** । दूषयति—**एतच्चेति** । (597) अयुक्तिं प्रकटयति—**अनन्येति** । आत्मनः स्वप्रकाशस्य अनुमानागम्यत्वात् न तद्भेदोऽनुमेयः । पराङ्मानगम्यत्वे अनात्मतापत्तेरित्यर्थः । (598) 'अस्माभिर्लिङ्गकुशलैः' इत्यत्र [1]अस्मदर्थं पृच्छति—**अनुमेति** । (599) पर आह—**देहेति** । देहादिबुद्धिपर्यन्त-स्याचेतनत्वात् आत्मनश्च कैवल्यस्याविकारित्वात् प्रत्येकं कर्तृत्वायोगात् देहादि-विशिष्टोऽनुमातात्मेत्यर्थः । बहूनां कारकत्वकल्पनागौरवात् एकस्यैव कस्य चिदनु-[मा]क्रियाकर्तृत्वं स्यात्, अत्राह—**भू(रि)[री]ति** । आत्मकर्तृकानुमानादात्मभेद-सिद्धिरित्यर्थः । (600-601) दूषयति—**भूरिसाधनेति** । [2]अनेनैव हेतुना आत्मनो देहादेश्च एकैकस्यानेकता स्यादित्यर्थः । (602) (बहूनां) तत् स्पष्टयति —**आत्मादीनामिति** । अग्न्यादीनामवान्त[3]रव्यापारवतामे(क)[व]कारकत्वात्

---

1. **अस्मदर्थं**—अस्मत्पदार्थम् ।
2. **अनेनैव हेतुना**—क्रियाणां भूरिसाधनसाध्यत्वेनैव हेतुना ।
3. **अवान्तरव्यापारवतामेवेति** प्रज्वलनादिरूपावान्तरव्यापारवतामेव अग्न्यादीनां पाकादिक्रियाकारकत्वं दृष्टमित्यर्थः ।

*अनुमापि क्रिया साक्षात् भवतैवाभ्युपेयते ।
शरीरेन्द्रियबुद्ध्यादेः प्रत्येकं स्यादनेकता ॥ (604)

बहुसाधनसाध्यत्वात्क्रियाणामिति हेतुतः ।
एवंलक्षणहेतूक्तिर्मौर्ख्यलिङ्गं भवेदतः ॥ (605)

गुणक्रियाणां सर्वासां कर्तृमात्रव्यपाश्रयात् ।
अनैकान्तिकता हेतोस्तथा वः संप्रसज्यते ॥ (606)

अनुमाक्रियाकर्तॄणां प्रत्येकमवान्तरव्यापारोऽस्ति । तत्र आत्म[1]व्यापारस्य अनेककारकसाध्यत्वाभावे [2]त्वदुक्तहेतोः तत्रा[3]नैकान्तिकता । आत्मातिरिक्तानेककारकसाध्यत्वे [4]अनवस्था । [5]तत्तत्कारकव्यापारस्य कारकान्तरापातात् । [6]तस्मादात्मन एवानेकता स्यात् । एवं देहादेरपीत्यर्थः । (603) अनुमानस्याक्रियात्वात् न तत्कर्तुरवान्तरव्यापारः, अत्राह—अनुमेति । आत्मवत् देहादेरनेकत्वं स्पष्टयति—शरीरेति । परकीयहेतुं निरस्योपहसति—एवमिति । (604-605) यदि एतत्परिजिहीर्षया अवान्तरव्यापारस्य अनेककारकसाध्यत्वं नेष्यते, तदा क्रिया(त्वाद्धे) [त्वहे]तोः [7]तत्रानैकान्तिकता, इत्याह—गुणेति । कारकाणामवान्तरव्यापारः—गुणक्रिया । (606)

---

1. **आत्मव्यापारस्य**—अनुमाक्रियाकर्तृत्वनिर्वाहकतया स्वीकृतस्य आत्मगतव्यापारस्य ।
2. **त्वदुक्तहेतोः**—अनेककारकसाध्यत्वसाधकतयोक्तस्य क्रियात्वस्य ।
3. **तत्रानैकान्तिकता**—आत्मगतावान्तरव्यापारे व्यभिचारः ।
4. **अनवस्थेति** अवान्तरव्यापारकारकाणामपि अन्यादृशावान्तरव्यापारावश्यकतया तस्यापि आत्मातिरिक्तानेककारकसाध्यत्वे तादृशकारकव्यापारायापि कारकान्तरापेक्षया अनवस्थेत्यर्थः ।
5. इममर्थं संक्षिप्याह—**तत्तत्कारकव्यापारस्य कारकान्तरापातादिति** ।
6. **तस्मात्**—आत्मातिरिक्तानेककारकसाध्यत्वस्य आत्मगतावान्तरव्यापारे अभ्युपगमासंभवात् ।

* **अनुमापि क्रिया**—धात्वर्थत्वात् अनुमापि क्रिया ।

7. **तत्रानैकान्तिकता**—अवान्तरव्यापारे व्यभिचारः ।

* अपक्षधर्मता हेतोर्नामरूपाश्रयत्वतः ।
धर्माभावात्प्रतीचश्च तद्भेदे हेतुता कुतः ॥ (607)

ऐकात्म्यवन्तो देहाः स्युर्विवादो येषु वर्तते ।
शरीरत्वाविशेषत्वात् प्रतिवादिशरीरवत् ॥ (608)

इदानीं 'जननमरणकरणानां प्रतिनियमात्' (सा. का. 18) इत्यादि-[1]सांख्यहेतोरपक्षधर्मतामाह—**अपक्षेति** । जननादीनां देहधर्मत्वात् तैरात्मभेदानुमाने [2]व्यधिकरणासिद्धिरित्यर्थः । सांख्यस्य आत्मनो धर्मित्वोपगमे सिद्धा[3]न्तविरोधोऽपि, इत्याह—**धर्मेति** । (607) परपक्षं प्रतिक्षिप्य, स्वपक्षसाधनमाह—**ऐकात्म्येति** । विवादपदानि शरीराणि प्रतिवाद्यात्मनो भोगायतनानि जीवच्छरीरत्वात् प्रतिवादिशरीरवदित्यर्थः । (608) उक्तन्यायमन्यत्र योजयति—**तथेति** ।

---

1. **सांख्यहेतोरिति** आत्मभेदसाधकतया सांख्याभिमतस्य हेतोरित्यर्थः ।

2. **व्यधिकरणासिद्धिरिति** । अत्रेदं बोध्यम् । प्राचीननैयायिकाः असिद्धप्रभेदान् बहून् प्रतिपादयन्ति । तत्र अनित्यः शब्दः चाक्षुषत्वादिति स्वरूपासिद्धः । अनित्यः शब्दः पटस्य कृतकत्वादिति व्यधिकरणासिद्धः इति च प्रतिपादयन्ति । आत्मानः नाना देहादीनां जननादिप्रतिनियमात् इत्यभिहितः, पटस्य कृतकत्वादितिवत् व्यधिकरणासिद्धः । विभिन्नमधिकरणं यस्य सः व्यधिकरणः । स चासौ असिद्धश्च व्यधिकरणासिद्धः इति पदार्थो बोध्यः ।
परन्तु नव्यनैयायिकाः हेतोः पक्षधर्मताविरहे स्वरूपासिद्धः इत्येव वदन्ति, न तु तत्र अवान्तरविशेषमिति ।

* "आत्मा द्रव्यत्वातिरिक्तापरजातीयः अश्रावणविशेषगुणवत्त्वात् घटवत् इति तार्किकानुमानमाशङ्क्याह—**धर्मेति** । न हि प्रतीचो गुणवत्ता, 'केवलो निर्गुणश्च' इति श्रुतेः । सुखादीनां च मनोधर्मत्वात्, 'एतत्सर्वं मन एव' इति श्रुतेः । तस्मादात्मभेदे नोक्तगुणवत्त्वस्य हेतुता अन्यतरासिद्धेरिति भावः ।" इति **शास्त्रप्रकाशिका** । वादिप्रतिवादिनोरन्यतरमतेनासिद्धः अन्यतरासिद्धः इति व्यपदिश्यते प्राचीनैः नैयायिकैरिति बोध्यम् ।

3. **सिद्धान्तविरोधोऽपीति** सांख्यैः आत्मनः असङ्गत्वस्वीकारादिति भावः ।

तथेन्द्रियमनोबुद्धिविषयेष्वपि योजयेत् ।
* ऐकात्म्यं सर्वभूतेषु, प्रत्यक्षाच्चात्मनस्तथा ॥ (609)

* आत्मप्रत्यय एकात्मा सर्वदेहेषु सर्वदा ।
नानात्मवदनेकत्वं कश्चिदात्मनि वीक्षते ॥ (610)

अनुमानादनेकत्वमात्मनो ये प्रचक्षते ।
तेषां प्रत्यक्षमानेन बाधो लिङ्गधियो भवेत् ॥ (611)

इति चतुर्थाध्यायस्य प्रथमं ब्राह्मणं
समाप्तम्

—: * :—

विवादपदेन्द्रियाणि प्रतिवादिभोगसाधनानि इन्द्रियत्वात् प्रतिवादीन्द्रियवत् । एवं मन आदावप्यनुमेयम् । पुनरपि आत्मभेदानुमाने प्रत्यक्षविरोधमाह—**प्रत्यक्षाच्चेति** । (609) प्रत्यक्षं स्पष्टयति—**आत्मेति** । सर्वदेहेषु अहमेकः अहमेकः इत्यात्मैक्यमनुभूयते इत्यर्थः । (610) फलितमाह—**अनुमानादिति** । एवं प्रत्यगभिन्नब्रह्मणः, 'सत्यस्य सत्यम्' इत्युपनिषदिति सिद्धम् । (611)

इति चतुर्थाध्यायस्य प्रथमं ब्राह्मणं समाप्तम्

—: * :—

---

* 'प्रात्यक्ष्याच्चात्मनस्तथा' इति मु. पु. पाठः ।

* "**आत्मेति** सर्वेषु चराचरशरीरेषु आत्मा स्वप्रकाशः चिदेकरसः सदा विदुषा अनुभूयते । तत् विद्वदध्यक्षविरुद्धानुमेत्यर्थः । अविद्वद्दृष्टेः अनुमानुगुणत्वात् तयैव बलवत्त्वादध्यक्षं बाध्यमित्याशङ्क्याह—**नेत्यादिना** । आत्मनः स्वप्रकाशत्वे दृश्यत्वे च तद्भेदो मानतो न सिद्ध्यतीत्युक्तमिति भावः ।" इति **शास्त्रप्रकाशिका** ।

इति प्रथमं ब्राह्मणम्

—: * :—

अथ चतुर्थाध्यायस्य द्वितीयं ब्राह्मणम्

जगज्जनिस्थितिध्वंसा यस्मात्सिध्यन्ति तत्परम् ।
ब्रह्मेति प्राक् प्रतिज्ञाय यथावदुपदर्शितम् ॥ (1)

तस्योपनिषदित्युक्तं तद्व्याख्यात्राधुनोच्यते ।
आ मैत्रेय्याः, परब्रह्मसत्यस्य प्रतिपत्तये ॥ (2)

सृष्टिप्रस्ताव एतस्मिन् प्राणादेर्जन्म सूत्रितम् ।
यतोऽतः प्राणसंबन्धात् पूर्वं व्याख्या प्रपञ्च्यते ॥ (3)

* ततः परेण लोकादेरपि याथात्म्यमुच्यते ।
अध्यात्ममधिदैवं च देवताकरणाश्रयम् ॥ (4)

प्राणादि सर्वमेवेदं पञ्चभूतसतत्त्वकम् ।
न हि भूतातिरेकेण प्रतीचः किञ्चिद्दृष्यते ॥ (5)

अथ चतुर्थाध्यायस्य द्वितीयं ब्राह्मणम्

संगतिनिरूपणम्

ब्रह्मविचारेण व्यवधानात्, [1]उक्तापि संगतिरनुक्तसमेत्यभिसन्धाय, तां वक्तु वृत्तमाह—**जगदिति** । 'ब्रह्म ते(इं)[ब्र]वाणि' इति प्रतिज्ञाय जगज्जन्मादि-हेतुत्वेन प्रतिपादितमित्यर्थः । (1) ब्रह्मणः प्रतिपादितत्वे, **किमुत्तरब्राह्मणेन,** अत्राह—**तस्येति** । (2) समु[2]दायसंगतिमुक्त्वा, अनन्तरब्राह्मणसंगतिमाह—**सृष्टीति** । 'सर्वे प्राणाः' इति प्रथमोक्तप्राणचिन्ता आदावित्यर्थः । (3) क्व तर्हि लोकादिचिन्ता क्रियते, तत्राह—**तत इति** । प्राणादेः किं याथात्म्यमिति,[तदाह—]**अध्यात्ममिति** । कुतः, इत्यत आह—**न हीति** । **प्रतीचो**(न्य)ऽज्ञा-

---

अथ द्वितीयं ब्राह्मणम्

प्राणस्य शिशोरुपासनमत्र ब्राह्मणे प्रतिपाद्यते इति इदं **शिशुब्राह्मणमिति** व्यवह्रियते ।

1. **उक्तापि संगतिरिति**
'उक्तोपनिषदर्थस्य सम्यगाविष्कृदुत्तरम् ।
यो ह वै शिशुमित्यादि भविता ब्राह्मणद्वयम् ॥'
(वा. 425) इति अतीतब्राह्मणवार्तिकेनोक्तेत्यर्थः ।

2. **समुदायसंगतिमिति** मैत्रेयीब्राह्मणपर्यन्तग्रन्थसमुदायस्य पूर्वेण संगतिमित्यर्थः ।

प्राणा वै सत्यमित्युक्तं के प्राणा इति यत्नतः ।
व्याख्यायन्तेऽथ ते प्राणास्तथोपनिषदश्च याः ॥ (6)

*प्राणेन मध्यमेनान्नं जग्धं वागादितर्पणम् ।
यथा करोति तद्वाच्यं प्राणोपनिषदश्च याः ॥ (7)

यो ह वा इति प्रश्नोक्तिः तस्यायमिति निर्णयः ।
शरीरेऽभ्याहितः प्राणो मूर्ध्नि प्रत्याहितस्तथा ॥ (8)

विषयेष्वनभिष्वङ्गात् शिशुः प्राणोऽभिधीयते ।
वागादेरिव नासङ्गो यतः प्राणस्य विद्यते ॥ (9)

शीर्षण्यप्राणसंस्था ये शब्दाद्यासङ्गलक्षणाः ।
भ्रातृव्यास्ते सहोत्पत्तेः प्रत्यग्दृष्ट्यपहारतः ॥ (10)

नातिरिक्तमिति शेषः । (4-5) का नाम प्रस्तूयमानप्राणव्याख्या, तामाह—**प्राणा इति** । (6) व्याख्यानं स्फुटयति—**प्राणेनेति** । (7)

प्रथमकण्डिकार्थनिरूपणम्

ब्राह्मणमवतार्य, [1]तम् इत्यतः प्राक्तनं विभजते—**यो हेति** । 'यो ह वा' इत्यारभ्य 'स (दमुंचेदि)[दामं वेद' इत्यन्तं किंपदाध्याहारेण प्रश्न[2]वाक्यम् । '**अयं वाव**' इत्यारभ्य प्रतिवचनमित्यर्थः । 'तस्येदमेवाधानम्' इत्यादेरर्थमाह—**शरीर इति** । (8) प्राणस्य शिशुत्वं कथम्, अत्राह—**विषयेष्विति** । (9) 'द्विष(य)तो[भ्रातृव्यान् इत्यत्र]भ्रातृव्यशब्दार्थमाह—**शीर्षण्येति** । (10)

---

* **ततः परेण** प्राणयाथात्म्योक्त्यनन्तरमिति यावत् । मूर्तामूर्तब्राह्मणे लोकादेः याथात्म्यं निरूप्यते इत्यर्थः ।

* **प्राणेन मध्यमेनेति** मुखनासिकासंचारिणा मुख्येन प्राणेनेत्यर्थः ।

1. **तमित्यतः प्राक्तनमिति** प्रथमकण्डिकाग्रन्थमिति यावत् ।

2. **प्रश्नवाक्यमिति** 'यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद' इति वाक्यं किंपदाध्याहारेण प्रश्नवाक्यं भवति । 'सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि ।' इति फलवचनम् । 'अयं वा शिशुः योऽयं मध्यमः प्राणः तस्येदमेवाधानं इदं प्रत्याधानं प्राणः स्थूणान्नं दाम ।' इति निर्णयवाक्यमिति विभागः बोध्यः ।

शरीरमस्याधानं स्याच्छरीरेऽवस्थितो यतः ।
सामान्यवृत्त्या प्राणोऽयं तस्मादाधानमुच्यते ॥ (11)

शरीराश्रयिणं प्राणं यतो वागादयः श्रिताः ।
अलं स्वकार्यनिष्पत्तौ न तु प्राणैकसंश्रिताः ॥ (12)

प्रति प्रत्याहितत्वाच्च प्रत्याधानं शिरो विदुः ।
शिरोदेशविशेषेषु प्रति प्रति स आहितः ॥ (13)

अन्नपानसमुत्था हि शक्तिः प्राणो बलं तथा ।
बलावष्टम्भ एतस्मिन् प्राणो देहेऽवतिष्ठते ॥ (14)

अबल्यं नीत्वेति तथा प्राणोत्क्रान्तिः प्रवक्ष्यते ।
उच्छ्वासादिक्रियं केचित् वायुं स्थूणां प्रचक्षते ॥ (15)

जाठराग्न्यभिसंबन्धात् जग्धमन्नं त्रिधा क्रमात् ।
परिणामं व्रजत्येतत् स्थूलमध्यमसूक्ष्मतः ॥ (16)

'इदमेवाधानम्' इति कथम् देहस्याधानत्वमुक्तम्, अत्राह—**शरीरमिति** । (11) देहस्याधानत्वे हेत्वन्तरमाह—**शरीरेति** । स्वापादौ प्राणग्रस्तकरणानां कार्यासामर्थ्यात् देहनिष्ठप्राणाश्रितानां [1]तत्सामर्थ्यात् प्राणस्याधानं शरीरमित्यर्थः । (12) देहस्याधानत्वे शिरसः प्रत्याधानत्वं कुतः, अत्राह—**प्रतीति** । (13) [2]प्राणपदार्थमाह—अ(त्रे)[न्ने]ति । कथं तस्य स्थूणत्वम्, अत्राह—**बलेति** । (14) [3]**अत्र मानमाह—अबल्येति** । यदा देहमबलभावं नीत्वा संमोहमिवात्माऽऽप्नोति तदा प्राण उत्क्रामतीति बलाभावे प्राणोत्क्रान्तिः (वि)[4] वक्ष्यते **इत्यर्थः** । प्राणशब्दस्यार्थान्तरमाह—**उच्छ्वासेति** । केचित्—**भर्तृप्रपञ्चा इत्यर्थः** । (15)

---

1. **तत्सामर्थ्यात्**—तत्तत्कार्यजननसामर्थ्याद् ।
2. **प्राणपदार्थं**—'प्राणः स्थूणा' इत्यत्र प्राणपदस्यार्थम् ।
3. **अत्र मानमाह**—बलावष्टम्भस्य प्राणस्य देहे स्थितौ प्रमाणमाह ।
4. **वक्ष्यते इति** षष्ठे इति शेषः ।

स्थूलांशः पृथिवीमेति पुरीषं मूत्रमेव च ।
स्थूलदेहोपचित्यर्थः मध्यमोंऽशः प्रकीर्तितः ॥ (17)

यस्तु सूक्ष्मो रसोऽन्नस्य भागोऽमृतमितीर्यते ।
स हृद्देशं समागम्य नाडीमध्यसमाश्रयः ॥ (18)

हृदयाद्विप्रकीर्णाभिः नाडीभिर्लिङ्गदेवताः ।
प्रीणयन्नुपचिन्वंश्च दामान्नमिति भण्यते ॥ (19)

देहं रसादिना बध्वा सूक्ष्मांशेन शिशुं तथा ।
पाशद्वयाभिसंबन्धात् अन्नं दामेति शब्द्यते ॥ (20)

दाम प्रतनुतां याति यदा कर्मक्षयात्तदा ।
यथास्वं यान्त्यथ प्राणा देहादुच्छिन्नबन्धनाः ॥ (21)

प्रत्याधानसमूढस्य शिशोस्तस्यैव काश्चन ।
अक्ष्ण्युपनिषदो वाच्यास्तमेता इत्यतः श्रुतिः ॥ (22)

'अन्नं दाम' इत्यस्यार्थं वक्तुं अन्नस्य परिणाममाह—जा[ठरे]ति । (16 17-18-19) कथमन्नस्य दामत्वमिति, तदाह—देहमिति । रसादी(विट्)[ति] त्व(ट्) ङ्]मांसादि गृह्यते । (20) अन्नस्य दामत्वमन्वयव्यतिरेकाभ्यामाह—दामेति । व्यतिरेकोक्त्या अन्वयः सिद्धः । (21)

द्वितीयकण्डिकार्थनिरूपणम्

'[1]तमे(त्या)[ताः]' इत्यादेः तात्पर्यमाह—प्रत्याधानेति । (22) कथं

---

1. तमेता इत्यादेरिति "तमेताः सदाऽक्षितय उपतिष्ठन्ते । तद्यां इमा अक्षन् लोहिन्यो राजयः ताभिरेनं रुद्रोऽन्वायत्तः । अथ या अक्षन्नापः ताभिः पर्जन्यः, या कनीनका तयाऽऽदित्यः, यत्कृष्णं तेनाग्निः, यच्छुक्लं तेनेन्द्रः, अधरयैनं वर्तन्या पृथिव्यन्वायत्ता, द्यौरुत्तरया । नास्यान्नं क्षीयते य एवं वेद । " इति श्रुतिवाक्यमनुसन्धेयम् ।

उपासतेऽक्षणि प्राणं रुद्राद्याः सप्त देवताः ।
अक्षीणा इति ता ज्ञात्वा नान्नक्षयमुपाश्नुते ॥ (23)

मूर्ध्नि प्रत्याहितं प्राणमृषयः प्राणसंज्ञकाः ।
रुद्राद्या मध्यमं यस्मात् सप्त तं पर्युपासते ॥ (24)

अक्षण्येव यतः पूर्वं व्याख्यातो देवतागणः ।
श्रोत्रादिकरणार्थोऽयं श्लोकस्तस्मादुदाहृतः ॥ (25)

विश्वरूपं यशो ज्ञेयं शब्दाद्यर्थावभासकम् ।
तेजस्तच्चाप्यनेकात्म विभिन्नार्थावभासनात् ॥ (26)

तदुपासनं, किं तत्फलम्, अत्राह—उपासत इति । (23) रुद्रादिशब्दैः [1]प्रसिद्धदेवताग्रहमुक्त्वा, [2]प्राणाः रुद्रादिशब्दाः, इत्याह—मूर्ध्नीति । (24)

तृतीयकण्डिकार्थनिरूपणम्

[3]श्लोकस्य देवताविषयत्वात् [4]तद्विषयत्व(म)[मे]व रुद्रादिशब्दानाम्, इ(त्य)[त्यत्रा]ह—अक्षणीति । चक्षुषि रुद्रादिगणस्योक्तत्वात् इन्द्रियसंबन्धात् तस्य(का)[क]रणग्रामत्वप्रतीतेः तद्विषयः श्लोकः न प्रसिद्धदेवताविषय इत्यर्थः । (25) विश्वरूपयशःशब्दयोरर्थमाह—विश्वरूपमिति । तेजः-श्रोत्रादिकरण-जातम् । यशः-तदेव विश्वरूपं, शब्दादिविविधार्थबोधकत्वादित्यर्थः । (26)

---

1. देवताग्रहं—देवताग्रहणम् ।
2. प्राणाः रुद्रादिशब्दाः—रुद्रपर्जन्यादिशब्दबोध्याः प्राणाः ।
3. श्लोकस्येति "अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः तस्मिन्यशो निहितं विश्वरूपम् ।
तस्यासते ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति ॥"
इति श्लोकस्येत्यर्थः ।
4. तद्विषयत्वमेव—देवताविषयत्वमेव । 'तदेष श्लोको भवति' इत्येवं पूर्वोक्तार्थे एव श्लोकस्य—मन्त्रस्यावतारितत्वादिति भावः ।

तीरे तस्याऽऽसते सप्त वायवः करणाश्रयाः ।
ऋषयश्च यशश्चेति प्राणा उक्तेन हेतुना ॥ (27)

वक्तृत्वात्तृत्वभेदेन वाग् द्विधैकैव भिद्यते ।
सप्तमी चाष्टमी चेति सैवैका प्रोच्यते ततः ॥ (28)

वर्णनिष्पादनं वाचा तथाऽद्यरसवेदनम् ।
भवेत् द्विकर्मसंयोगात् सप्तमी चाष्टमी च वाक् ॥ (29)

* विशिष्टाह्वानसिद्ध्यर्थमृषीणामुत्तरा श्रुतिः ।
इमावेवेति च तथा फलवत् स्यादुपासनम् ॥ (30)

'तस्य' इत्यादेरर्थमाह—तीर इति । विश्वरूपशब्दितानां करणानामृषिशब्द-वाच्यत्वमित्यर्थः । तेषां स्पन्दात्मकत्वादृषित्वं, [1]शब्दादिख्यानहेतुत्वाच्च यशस्त्व-मिति भाष्योक्तहेतुमाह—उक्तेनेति । (27) 'वागष्टमी' इत्ययुक्तम्, [2]अष्टम-त्वविरुद्धमनष्ट[3]मत्वेन[त]स्या उक्तेः, अत्राह—वक्तृत्वेति । अत्तृत्वेन सप्तमी, वक्तृत्वेन चाष्टमीत्यर्थः । (28) द्वैधं साधयति—वर्णेति । रसवेदनमत्र [4]रस-क्रिया । न तु रसज्ञानं, तस्य जिह्वाकार्यत्वात् । (29)

---

1. शब्दादिख्यानहेतुत्वाच्च—शब्दादिज्ञानहेतुत्वाच्च ।
2. अष्टमत्वविरुद्धमिति उक्तेः इत्युक्तिक्रियाविशेषणं बोध्यम् ।
3. अनष्टमत्वेन—सप्तमत्वेन ।
4. रसक्रिया—रसचर्वणरूपा क्रिया ।

'अर्वाग्बिलश्चमसः ऊर्ध्वबुध्नः' इति शिर उच्यते । तस्मिन्यशो निहितं विश्वरूपमिति शिरसि विश्वरूपयशःशब्दितप्राणानां निधानमुक्तम् । तस्यासते ऋषयः सप्त इति प्राणा एव ऋषयः उक्ताः वागिन्द्रियञ्च अष्टमम् इति ब्राह्मणेनैव व्याख्यातं बोध्यम् ।

* आह्वानं—अभिधानम् ।

सर्वस्येति फलोक्तिः स्यादुक्तोपासनकर्मणः ।
अन्नात्तृत्वनिषेधार्थं सर्वमस्येति भण्यते ॥ (31)

इति चतुर्थाध्यायस्य द्वितीयं शिशुब्राह्मणं

समाप्तम्

—:०:—

चतुर्थकण्डिकार्थनिरूपणम्

'[1]इमौ' इत्यादेस्तात्पर्यमाह—**विशिष्टेति** । (30) '[2]**सर्वस्य**' इत्यादेरर्थमाह—**सर्वस्येति** । सर्वात्तृत्वेनैव सर्वमस्यान्नमिति सिद्धे[किम]र्थमुत्तरं वाक्यम्, अत्राह—**अन्नेति** । यदुपासकस्य भोग्यं न [3]तदस्य भोक्तृ, भोग्यमेवेत्यर्थः । (31)

इति चतुर्थाध्यायस्य द्वितीयं शिशुब्राह्मणं

समाप्तम्

—:०:—

---

1. **इमौ इत्यादेरिति** 'इमावेव गौतमभरद्वाजौ अयमेव गौतमोऽयं भरद्वाजः' इति कर्णयोः नाम, 'इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निः' इति चक्षुषोर्नाम, 'इमावेव वसिष्ठकश्यपौ अयमेव वसिष्ठोऽयं कश्यपः' इति नासिकयोः नाम, 'वागेवात्रिः वाचा ह्यन्नमद्यते अत्ति ह वै नामैतदत्रिरिति' इति वाचः नाम श्रुतौ प्रतिपादितम् ।
2. **सर्वस्येत्यादेरिति** 'सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद' इति श्रुतिः ।
3. **अस्य**—उपासकस्य ।

इति द्वितीयं ब्राह्मणम्

—:०:—

अथ चतुर्थाध्यायस्य तृतीयं ब्राह्मणम्

* प्राणोपनिषदश्चोक्ताः प्राणाश्चापि समासतः ।
यत्तु तेषां परं सत्यं तदिदानीं निरूप्यते ॥ (1)

प्राणाः किमात्मकाः तेषां कथं सत्यत्वमिष्यते ।
इत्येवमादि वक्तव्यमित्यर्थः पर आगमः ॥ (2)

पञ्चभूतसतत्त्वानां शरीरकरणात्मनाम् ।
स्वरूपनिश्चयार्थाय प्रारब्धं ब्राह्मणं परम् ॥ (3)

यदुपाधिनिषेधोक्त्या नेतीति ब्रह्मणः स्फुटम् ।
आविश्चिकीर्षितं तत्त्वं तदेतदधुनोच्यते ॥ (4)

अथ चतुर्थाध्यायस्य तृतीयं ब्राह्मणम्

ब्राह्मणावतरणम्

संगतिं वक्तुं वृत्तमाह—**प्राणेति** । (1) सत्यस्य सत्यं ब्रह्म निरूपयितुं ब्राह्मणारम्भश्चेत् 'अथात आदेशः' इत्याद्येव आरभ्यताम्, 'किं द्वे वाव' इत्यादिना, इत्यत्राह—**प्राणा इति** । चेतनत्वमचेतनत्वं वा तेषां स्वरूपं वक्तुं तत्सत्यत्वं च निरूपयितुमनन्तरवाक्यमित्यर्थः । (2) तेषामत्र स्वरूपं सत्यत्वं च कथं निर्धार्यते, ब्रह्मणो रूपद्वयप्रतिपादकत्वात्, अत्राह—**पञ्चेति** । प्राणानामिति शेषः । (3) प्रकृतब्रह्मनिरूपणे प्राणनिरूपणस्य कथमुपयोगः, अत्राह—**यदुपाधीति** । [1]हेयाहेयरूपाभ्यां ब्रह्म निरूप्यमित्यर्थः । (4) विधान्तरेण रूपमाह

अथ तृतीयं ब्राह्मणम्

ब्रह्मणो मूर्तामूर्तात्मकरूपद्वयमारोपितं निरूप्य, तन्निषेधेन ब्रह्मनिरूपणात् इदं मूर्तामूर्तब्राह्मणमिति व्यवह्रियते ।

* **समासतः**—संक्षेपतः ।

1. **हेयाहेयरूपाभ्यां ब्रह्म निरूप्यमिति** मूर्तामूर्तात्मकं रूपमारोपितं हेयम्, नेति नेतीत्यादिरूपमहेयं रूपमिति बोध्यम् ।

स्वतोऽरूपं परं ब्रह्म तदविद्यादिहेतुतः ।
द्विरूपमिति निर्दिष्टं वियद्वत् कुम्भसंश्रयात् ॥ (5)

रूपे वा ब्रह्मणो विद्यात् मूर्तामूर्ते सवासने ।
ब्रह्मैव रूप्यते ताभ्यां ब्रह्मत्वं न हि रूपवत् ॥ (6)

* अविद्यामात्रोपाध्येतद्ब्रह्म कारणमुच्यते ।
तदेव ज्ञातृतामेति बुद्ध्युपाधिसमाश्रयात् ॥ (7)

* तद्वृत्त्युपाधिसंस्थं सत्तज्ज्ञानमिति भण्यते ।
देवतेन्द्रियसंबन्धं तत्तत्तदभिधीयते ॥ (8)

—स्वतोऽरूपमिति । द्वेयमेव वा ब्रह्मणो [1]रूपद्वयमित्यर्थः । [2]कथमनयोः रूपत्वम्, अत्राह—ब्रह्मेति । रूप्यत इति । विशेषतो ज्ञायते इत्यर्थः । शुक्त्यादिवत् रूपं किं न स्यात्, अत्राह—ब्रह्मत्वमिति । [3]प्रकृत्यर्थे भावप्रत्ययः । (5-6) अध्यस्तमेकं रूपं, स्वरूपञ्चै[4]कमित्युक्तम् । तत्राध्यस्तं किम्, इत्यत्राह—अविद्येति । कारणत्वोपाधिः अज्ञानं, जीवत्वोपाधिः अन्तःकरणं च चैतन्यमात्रोपाधित्वादेकमेव रूपमित्यर्थः । (7) तथापि ज्ञानतत्साधनेन्द्रिययोः रूपान्तरत्वात् रूपद्वित्वविरोधः, अत्राह—तद्वृत्तीति । (8) यथा स्थूलसूक्ष्म-

---

1. रूपद्वयं—मूर्तामूर्तात्मकम् ।
2. अनयोः—मूर्तामूर्तयोः ।
3. प्रकृत्यर्थे इति ब्रह्मत्वमित्यनेन ब्रह्म विवक्षितमित्यर्थः ।
4. स्वरूपञ्चैकमिति अत्र एकशब्दः अन्यार्थकः ।

* "कारणत्वं नाम रूपान्तरं ब्रह्मणोऽस्ति । तत् कुतो रूपद्वयमेव, इत्याशङ्क्याह—अविद्येति कार्यभूतमूर्ताद्यपेक्षत्वात् कारणत्वं न स्वतन्त्रं रूपमित्यर्थः । ज्ञातृत्वं रूपान्तरमिति चेत्, नेत्याह—तदेवेति । बुद्धेरमूर्तान्तर्भावात् तन्निमित्तं ज्ञातृत्वं न रूपान्तरमित्यर्थः ।" इति शास्त्रप्रकाशिका ।

* तद्वृत्त्युपाधिसंस्थं—बुद्धिवृत्त्यात्मकोपाधिस्थितम् ।

* तथा देहादिसंबन्धं दुःखजात्यादिमद्भवेत् ।
गोधनाद्यभिमान्येवं धनी गोमानितीर्यते ॥ (9)

अन्तर्यामी तथा साक्षी सर्वज्ञश्चेत्यविद्यया ।
मिथ्याध्यासैश्च तत्कार्यैरप्रमेयं प्रमीयते ॥ (10)

एकं तावदिदं रूपं ब्रह्मणो मोहहेतुजम् ।
प्रत्यङ्मात्रैकधीगम्यं रूपं वास्तवमात्मनः ॥ (11)

अव्यावृत्ताननुगतं द्वितीयासंभवादजम् ।
न वाक्यपदयोरर्थः भेदसामान्यवर्जनात् ॥ (12)

* न प्रमाणान्तरैर्गम्यं पराग्घेत्वसमन्वयात् ।
अनपेक्षितमात्रादि तदविद्यासमन्वयात् ॥ (13)

देहयोः रूपान्तरत्वं, तथा ज्ञानादेरपि किं न स्यात्, अत्राह—**तथेति** । (9) अन्तर्यामित्वादेः सत्स्वरूपात् रूपान्तरत्वमुत्कृष्टत्वात्, अत्राह—**अन्तर्यामीति** । (10) अध्यस्तरूपमुपसंहरति—**एकमिति** । अधुना वास्तवरूपमाह—**प्रत्यगिति** । (11) तस्य वास्तवत्वे हेतुमाह—**अव्यावृत्तेति** । अजत्वेऽपि अज्ञानवत् मिथ्यात्वं किं न स्यात्, अत्राह—**न वाक्येति** । वाच्यत्वं मिथ्यात्वप्रयोजकमित्यर्थः । (12) मेयत्वात् वाच्यत्वमपि, इत्यत आह—**न (प्रा)[प्रमा]णेति** । इन्द्रियाद्यसंबन्धादित्यर्थः । तर्हि तदवगमोपायाभावात् अनवगन्तव्यस्य अपुमर्थत्वम्, अत्राह—**अनपेक्षितमात्रादीति** । स्वतोऽपरोक्षमित्यर्थः । (13) विमतं

---

* **देहादिसंबन्धमिति** बहुव्रीहिसमासः, देहादिसंबद्धमिति यावत् ।

* "**नेति** प्रत्यक्षाद्यगम्यत्वे शब्दादिराहित्यं हेतुमाह—**परागिति** , । किञ्च यत् मात्राद्यपेक्षं तदेव मिथ्या यथा सर्पादि । इदन्तु तदनपेक्षत्वात् वास्तवम्, इत्याह—**अनपेक्षितेति** । तत्र हेतुमाह—**अविद्येति** न चैवं तस्याः स्वातन्त्र्यमसत्वं वा, संबन्धग्रन्थे समाधानादिति भावः ।" इति **शास्त्रप्रकाशिका** ।

आत्मप्रत्ययमैकात्म्यं द्वितीयस्त्वात्मनो भवेत् ।
अनात्मप्रत्ययोऽतोऽहं स्वत एकोऽस्मि केवलः ॥ (14)

यन्निषेधमुखेनेदं नेति नेतीति भण्यते ।
* अविद्यामवधिं कृत्वा द्वे रूपे ब्रह्मणस्त्विमे ॥ (15)

* अवधारणाय वा वेति द्वे एवेति विनिश्चितौ ।
समुच्चिते सजातीयैरुत्तरैस्ते विशेषणैः ॥ (16)

दृश्यं वस्तुत्वात् घटवत्, इत्यत्राह—**आत्मेति** । अनात्मत्वं दृश्यत्वप्रयोजकं, अतः साविद्यं जगदेव शुक्तिरजतवत् कल्पितमित्यर्थः । फलितमाह—**अत इति** । (14)

प्रथमकण्डिकार्थनिरूपणम्

एवं तात्पर्यमुक्त्वा, द्वे ब्रह्मणो रूपे इति पदानामर्थमाह—**यदिति** । (15) वा वशब्दार्थमाह—**अवधारणायेति** । 'द्वे एव' इति कथमवधारणम्, [1]वक्ष्यमाणसत्त्वादिविशेषणविरोधात्, अत्राह—**समुच्चिते इति** । [2]विशिष्टे इति यावत् । (16)

---

* **अविद्यामवधिं कृत्वेति** अविद्यादशायां तामेवावधिं कृत्वा ते मूर्तामूर्ते रूपे भवत इत्यर्थः ।

"द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च ।" इति श्रुतिरनुसन्धेया ।

* **अवधारणायेति** तद्द्योतकः वा वेति निपातसमुदाय इत्यर्थः ।

1. **सत्त्वादिविशेषणेति** आदिपदेन मर्त्यत्वस्थितत्वादिपरिग्रहः ।

2. **विशिष्टे इति** मर्त्यत्वस्थितत्वसत्त्वविशिष्टं मूर्तमेकं रूपम् । अमृतत्वयत्त्वत्यत्व-विशिष्टामूर्तमपरं रूपमिति फलितोऽर्थः।

वा वशब्दं चशब्देन प्रत्याहृत्याभिधीयते ।
मूर्तमेव च तद्रूपं ब्रह्मणोऽमूर्तमेव च ॥ (17)

अविद्यावत्परं ब्रह्म मूर्तामूर्तादिलक्षणैः ।
* विशिष्यते न धर्माणां मिथः संगतिरिष्यते ॥ (18)

विशेष्यार्थैकतन्त्रत्वाद्धर्माणां न परस्परम् ।
तथाऽनपेक्षतस्तेषां संगतिः स्यात् कदा चन ॥ (19)

विज्ञानपुरुषान्तस्य ब्रह्मणः परमात्मनः ।
तमस्विनोऽथ द्वे रूपे तदन्याव्यतिरेकतः ॥ (20)

'अमूर्तं, अमूर्तमेव(वे) च' इति भाष्यमयुक्तम्, 'अमूर्तं च' इत्यत्रैव[1]-कारामावात्, अत्राह—वा(चे)[वे]ति । 'अमूर्तं च' इत्यत्र चशब्देन अमूर्तं प्रति वा(च)[व]शब्दमव[2]धारणार्थमाकृष्य, 'अमूर्तमेव च' इति भाष्ये अभिहितमित्यर्थः । (17) 'मूर्तं च' इत्युपदिश्य, 'मर्त्यं चामृतं च' इत्युपदेशात् मर्त्यत्वादीनि मूर्तामूर्तयोरेव विशेषणानि, इत्याशङ्क्याह—अविद्यावदिति । (18) हेतुमाह—विशेष्येति । (19) मूर्तादिविशेषणैर्विशेष्यं ब्रह्मस्वरूपादन्यदेव, इत्याशङ्क्याह—विज्ञानेति । प्रत्यग्भूतस्येति यावत् । अथेति । सृष्टयनन्तरं प्रविष्टस्येत्यर्थः । हेतुमाह—तदन्येति । तस्मादात्मनोऽ[3]न्यत्वेनाभिमतस्य ब्रह्मणः प्रत्यगभेदादित्यर्थः । (20) रू(पि)[प]ब्रह्मणोरन्यत्वादद्वैतहानिः, अत्राह—

---

1. एवकाराभावादिति 'मूर्तं चैवामूर्तं च' इति श्रुतौ मूर्तपदोत्तरमिव अमूर्तपदोत्तरं एवकारस्याभावात्, 'अमूर्तमेव च' इति भाष्यमयुक्तमित्यर्थः ।

2. अवधारणार्थं—अवधारणार्थकम् ।

* संगतिः — संबन्धः ।

3. तदन्याव्यतिरेकतः इत्यस्य, तस्मादन्यस्य ब्रह्मणः ततो व्यतिरेकस्य भेदस्याभावादित्यर्थः व्याहतत्वान्न संभवति । अतो व्याचष्टे—तस्मादात्मनोऽन्यत्वेनाभिमतस्येति ।

क्लृप्तसर्पादिभिर्यद्वदज्ञातायाः स्रजः सदा ।
वास्तवोऽवास्तवो वा न व्यतिरेको न चान्वयः ॥ (21)

तद्वन्न व्यतिरेकेण ब्रह्मणो द्वे स्वतः सदा ।
नापि चाव्यतिरेकेण ते तु ब्रह्मैव निर्द्वयम् ॥ (22)

अण्वाद्यवयवं मूर्तं पीनं संस्थानवद् दृढम् ।
तद्विरुद्धममूर्तं स्यान्निरंशं देशवन्न च ॥ (23)

मर्त्यं मरणधर्मि स्यात् यद्विनश्वरलक्षणम् ।
अमृतं तद्विरुद्धं च ध्रुवं यन्न विपद्यते ॥ (24)

आश्रितं स्थितमत्र स्यात् गत्वाऽव्याप्य च तिष्ठति ।
तद्विरुद्धं तथा यत्स्यात् एत्येव न तु तिष्ठति ॥ (25)

सदिति व्यक्तरूपं यद् गृह्यमाणविशेषणम् ।
प्रत्यक्षं तद्विरुद्धं त्यदप्रत्यक्षं तथोच्यते ॥ (26)

क्षितिर्जलं तथा वह्निरित्येतन्मूर्तमुच्यते ।
भूतद्वयममूर्तं च वायुश्चाकाशमेव च ॥ (27)

मूर्तं मर्त्यं स्थितं सच्च क्षित्यबग्नित्रयं विदुः ।
अमूर्तामृतयत्त्यत्तु वाय्वाकाशद्वयं स्मृतम् ॥ (28)

क्लृप्तेति । **अन्वय इति** । अभेद इत्यर्थः । (21–22) मूर्तादिशब्दानामर्थमाह—**अण्वादीति** । (23–24–25–26)

पूर्वमज्ञातं ब्रह्म मूर्तामूर्तादिधर्मैर्विशेष्यमुक्तम् । इदानीं [1]भूतत्रयं [2]भूतद्वयं साक्षाद्विशेष्यम्, इत्याह—**क्षितिरिति** । (27) मर्त्यत्वादीनां च तद्विशेषणत्वं ब्रुवन् उक्तं स्पष्टयति—**मूर्तमिति** । (28) इदानीं [3]मूर्तविशेषणानां क्रमेण

---

1. **भूतत्रयं**—क्षितिजलतेजोरूपम् ।
2. **भूतद्वयं**—वायुश्चान्तरिक्षं चेति द्वयम् ।
3. **मूर्तविशेषणानां**—मर्त्य, स्थितं, सत् , इत्येतेषाम् ।

मूर्तत्वादेव मर्त्यं तत् मर्त्यत्वादेव तत् स्थितम् ।
स्थितत्वादिन्द्रियग्राह्यं निर्धार्येदंतया पृथक् ॥ (29)

सोपाख्यत्वान्न तद् व्यापि क्वचिदेकांशवृत्तिस्थितेः ।
स्थितत्वाच्चापि तन्मर्त्यं मर्त्यत्वान्मूर्तमेव च ॥ (30)

* अमूर्तत्वादमर्त्यं तद्यद् व्यापि त्यदतीन्द्रियम् ।
अतीन्द्रियत्वात्तद् व्यापि व्यापित्वाच्चामूर्तं ततः ॥ (31)

अस्थितत्वादमूर्तं तदाकारव्यक्तिवर्जितम् ।
हेतुतत्फलरूपेण मूर्तादेः संगतिर्मिथः ॥ (32)

अक्षसूत्रवदन्योन्यं सामर्थ्यस्याप्रहाणतः ।
हेतुतद्वत्तया ज्ञेयाऽमूर्तादेरपि संगतिः ॥ (33)

संभवेऽन्यतमस्यापि सर्वेषां संभवो यतः ।
अतोऽवधारणार्थाय तत्रैवग्रहणं कृतम् ॥ (34)

हेतुहेतुमद्भावमाह—**मूर्तत्वादिति** । (29) संप्रति [1]विपरीतक्रमेण [2]तेषां हेतुहेतुमद्भावमाह—**सोपाख्यत्वादिति** । सत्त्वादिति यावत् । (30) [3]**उक्तनयं** [अ]मूर्तत्वादिषु योजयति—**अमूर्तत्वादिति** । [4]तत्रापि [5]व्युत्क्रमं दर्शयति—**अतीन्द्रियत्वादिति** । मूर्तत्वादीनां मिथो[हेतु]हेतुमद्भावमुपसंहरति—**हेत्विति** । (31–32) अमूर्तत्वादीनां मिथः संगतिं निगमयति—**हेतुतद्वत्तयेति** । मूर्तादिषु चा(न्ये)[न्य]तमस्य सत्त्वे, परिशिष्टानामपि सत्त्वम् , इत्यत्र गमकमाह—**अत इति** । (33–34)

---

1. **विपरीतक्रमेण**—सत्त्वादिक्रमेण ।
2. **तेषां**—मूर्तत्वादीनाम् ।
3. **उक्तनयं**—हेतुहेतुमद्भावम् ।
4. **तत्रापि**—अमूर्तत्वादिष्वपि ।
5. **व्युत्क्रमं**—विपरीतक्रमेण हेतुहेतुमद्भावमिति यावत्

* **यद् व्यापीति** यत् इत्यस्य विवरणं व्यापीति ।

तयोरुद्दिष्टयोर्मूर्तं प्रथमं तावदुच्यते ।
अन्यद्वाय्वन्तरिक्षाभ्यां भूतत्रयमिहोच्यते ॥ (35)

मूर्तं संस्थानवद्ध्येतत् तथा मर्त्यं विनाशवत् ।
एतत् स्थितं परिच्छिन्नं एतत्सत्सविशेषणम् ॥ (36)

चतुर्विशेषणस्यास्य क्षित्यबग्न्यात्मकस्य हि ।
चतुष्टयरसत्वार्थं पुनरुच्चारणं कृतम् ॥ (37)

सर्वव्यापी रसो ह्येषः शश्वत्तपति यो रविः ।
चतुष्टयान्वयादेषः भूतत्रयरसः स्मृतः ॥ (38)

य एष तपतीत्यत्र मण्डलं परिगृह्यते ।
चतुष्टयं हि मूर्तादि मण्डले गृह्यते यतः ॥ (39)

द्वितीयकण्डिकार्थनिरूपणम्

'[1]तदेतन्मूर्तम्' इत्यादेरर्थमाह—**तयोरिति** । (35) [2]भूतत्रये [3]धर्मचतुष्टयस्य कथं संभवः, अत्राह—**मूर्तमिति** । (36) 'तस्यैतस्य' इत्यादेरर्थमाह—**चतुर्विशेषणस्येति** । चतुष्टयविशिष्टभूतत्रयस्य मण्डलं कार्यं, नैकैकस्य, नाप्येकैकविशेषणवतः इति सूचयितुं [4]पुनरुच्चारणम् । [अधि]कवचनमन्यार्थं द्योतयतीति न्यायादित्यर्थः । (37) 'य एष तपति' इत्यस्यार्थमाह—**स(र्वस्ये)वेति** । कृत्स्नभूतत्रयकार्यत्वे हेतुमाह—**चतुष्टयेति** । मूर्तं मर्त्यं स्थितं स(द)[दि]ति विशेषणयोगादित्यर्थः । (38) एषशब्दार्थमाह—**य इति** । (39) **'सतो हि'**

---

1. **तदेतन्मूर्तमित्यादेरिति** "तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चैतन्मर्त्यमेतत् स्थितमेतत् सत् । तस्यैतस्य मूर्तस्य एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सत एष रसः, य एष तपति सतो ह्येष रसः ।" इति श्रुतिरनुसन्धेया ।
2. **भूतत्रये**—पृथिवीजलतेजोरूपे ।
3. **धर्मचतुष्टयस्य**—मूर्तत्वं मर्त्यत्वं स्थितत्वं सत्त्वं चेति धर्मचतुष्टयस्य ।
4. **पुनरुच्चारणं**—मूर्तत्वादीनां पुनः कथनम् ।

चतुर्णामन्वयो हीति हेतुनात्र विभाव्यते ।
सतश्च ग्रहणं विद्याच्चतुर्णामुपलक्षणम् ॥ (40)

कृष्णसारं यथा स्थानं चक्षुषः करणात्मनः ।
तथा हिरण्यगर्भस्य मण्डलं करणात्मनः ॥ (41)

उत्सर्गाद्रूपनिर्माणे प्राधान्यं तेजसो यतः ।
तस्माद्रसत्वनिर्देशः क्रियते मण्डलात्मनि ॥ (42)

* अप्क्लिन्नः पार्थिवो धातुस्तेजसा परिपच्यते ।
अङ्कुराद्यभिनिष्पत्तौ मुख्यतैवं हि तेजसः ॥ (43)

सारस्त्रयाणां भूतानां रसो मण्डलमुच्यते ।
एतत्साराणि हि त्रीणि भूतान्याहुर्विपश्चितः ॥ (44)

इत्यत्र हिशब्दार्थमाह—**चतुर्णामिति** । **सतश्चेति** । [1]एतत् चतुर्णां मध्ये अनुक्तानां मूर्तादीनामुपलक्षणमित्यर्थः । (40) एषशब्दगृहीतं [2]मण्डलं चेतनमेव, इत्यत्राह—**कृष्णेति** । करणस्थानत्वादचैतन्यमित्यर्थः । (41) भूतत्रयकार्यतया रसश्चेन्मण्डलं, तर्हि 'तेजोरसो निरवर्तत' (बृ. 3-2-2) इति श्रुतेः तेजःशब्द-पर्यायरसशब्दस्यैव च कुतो मण्डले प्रयोगः, अबादि[3]पदस्यापि किं न स्यात्, अत्राह—**उत्सर्गादिति** । (42) [4]प्राधान्यं प्रतिपादयति—**अ[प्] क्लिन्न इति** । (43) मण्डलस्य [5]सारत्वे विद्वत्प्रसिद्धिमाह—**सार इति** । (44)

---

1. **एतत्**—'सतो हि' इति सतो ग्रहणम् ।
2. **मण्डलं**—आदित्यमण्डलम् ।
3. **अबादिपदस्यापीति** प्रयोग इति शेषः ।
4. **प्राधान्यं**—रूपसर्गे तेजसः प्राधान्यम् ।

* **अप्क्लिन्नः** — अद्भिः मृदुत्वमापादितः ।

5. **सारत्वे**—भूतत्रयसारत्वे । "अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यत् एतत् त्यत् । तस्यैतस्य अमूर्तस्यैतस्यामृतस्य एतस्य यतः एतस्य त्यस्य एष रसः य एष एतस्मिन्मण्डले पुरुषः, त्यस्य ह्येष रसः इत्यधिदैवतम् ।" इति श्रुतिरनुसन्धेया । तत्र अथेत्यादि 'त्यस्य एष रसः' इत्यन्तं व्याख्यातप्रायमिति, '**य एष एतस्मिन् मण्डले पुरुषः**' इत्यस्य विवरणं कृतं बोध्यम् ।

मण्डलायतने यत्तु करणं संश्रितं विभोः ।
विराजो देवदेवस्य तदिदानीमिहोच्यते ॥ (45)

आदित्यान्तर्गतः साक्षात् करणात्माऽभिधीयते ।
* वाय्वाकाशरसत्वेन तत्रामूर्तान्वयो यतः ॥ (46)

* कलिङ्गारम्भसिद्ध्यर्थं वाय्वाकाशसमुद्भवः ।
ईश्वरात्कारणाद्यस्माल्लिङ्गं तेन रसस्तयोः ॥ (47)

वाय्वाकाशरसो ह्येष इति हेतुः प्रदर्श्यते ।
* त्यस्य ह्येष रस इति यथोक्तो मण्डलात्मनि ॥ (48)

हिरण्यगर्भक्षेत्रज्ञं रसं केचित्प्रचक्षते ।
कारणं रसशब्देन यस्मादत्राभिधीयते ॥ (49)

तृतीयकण्डिकार्थनिरूपणम्

'य एव एतस्मिन्मण्डले' इत्यादेस्तात्पर्यमाह—मण्डलेति । (45) हिरण्यगर्भस्य भूत[1]द्वयसा(रि)[र]त्वे हेतुमाह–आदित्येति । (46) इतश्च वाय्वाकाशरसः, इत्याह–कलिङ्गेति । कशब्दो हिरण्यगर्भवचनः । तयोः—वाय्वाकाशयोः [2]भूतत्रयोपसर्जनयोः समप्रधानयोरित्यर्थः । (47) '(अ)[त्य]स्य हि' इत्यादेरर्थमाह—वाय्वाकाशेति । (48)

'त्यस्य ह्येष रसः' इत्यस्य भर्तृप्रपञ्चव्याख्यानम्

भाष्यकारमतमुक्त्वा, भर्तृप्रपञ्चमतमाह—[हिरण्य]गर्भेति । हेतुमाह–कारणमिति । 'त्यस्य ह्येष[रसः' इत्यत्र] रसशब्देन वाय्वाकाशकारणमुच्यते ।

---

1. भूतद्वयसारत्वे—वाय्वाकाशसारत्वे ।
* 'अमूर्तान्वयो यतः' इत्यत्र अमूर्तग्रहणं अमूर्तयत्त्यतामुपलक्षणं बोध्यम् ।
* कलिङ्गारम्भसिद्ध्यर्थमिति कः – हिरण्यगर्भः, स एव लिङ्गं तदारम्भायेत्यर्थः ।
2. भूतत्रयोपसर्जनयोरिति भूतत्रयं उपसर्जनं ययोः वाय्वाकाशयोरित्यर्थः ।
* यथोक्तो मण्डलात्मनीति मण्डलात्मनि त्रयसारत्वे 'सतो हि' इत्यादिना चतुर्णामन्वयो हेतुः यथोक्तः, तथा अत्रापि द्वयसारत्वे 'त्यस्य हि' इत्यादिना चतुष्टयान्वयः हेतुरुक्त इत्यर्थः ।

यस्माद्धिरण्यगर्भस्य कर्म वाय्वन्तरिक्षयोः ।
* प्रयोक्त्रव्यक्तयोस्तस्माद्रसः क्षेत्रज्ञ उच्यते ॥ (50)

भूतद्वयरसो ज्ञेयो मण्डले चेतनः पुमान् ।
त्यस्य ह्येष रस इति तत्सिद्धौ कारणाभिधा ॥ (51)

न्यायोक्तेरेव संसिद्धेः प्रतिज्ञातस्य वस्तुनः ।
क्षेत्रज्ञः कारणं कस्मादित्यत्र न्याय उच्यते ॥ (52)

एतस्मिन्मण्डले योऽन्तर्विज्ञानात्मत्वमागतः ।
अविद्याभावनाकर्महेतुतो नान्यकारणात् ॥ (53)

तस्य यत्कर्मरूपं तद्वियद्वायुप्रयोजकम् ।
खस्थस्य कर्मणस्तस्य मरुत्प्रस्पन्दरूपिणः ॥ (54)

तच्च कारणत्वं हिरण्यगर्भक्षेत्रज्ञस्यैव नान्यस्येत्यर्थः । (49) तस्य कारणत्वं कुतः, अत्राह—**यस्मादिति** । (50) स्वकर्मद्वारा तस्य कारणत्वं 'त्यस्य हि' इत्युच्यते, इत्याह—**भूतेति** । (51) श्रुत्या कारणोक्तौ किं हेतूक्त्या, अत्राह—**न्यायेति** । (52) तमेव न्यायं दर्शयति—**एतस्मिन्निति** । अविद्याकर्मपूर्वप्रज्ञापरिष्कृतो विज्ञानात्मत्वमागत इत्यर्थः । (53) क्षेत्रज्ञत्वकारणमुक्त्वा, [1]तस्य भूतद्वयकारणत्वमाह—**तस्येति** । भूत[2]द्वयहेतुत्वेऽपि [3]भूतान्तरोत्पत्तौ [4]तत्कर्मणः अप्रयोजकत्वात् [5]न तैरस्य भोगः, अत्राह—**खस्थस्येति** । आकाशमुत्पाद्य तत्कर्म आका-

---

* **प्रयोक्त्रव्यक्तयोरिति** अव्यक्तयोः वाय्वाकाशयोः हिरण्यगर्भस्य कर्म प्रयोजकम् । कर्मद्वारा हिरण्यगर्भः वाय्वाकाशकारणमिति यावत् ।

1. **तस्य**—क्षेत्रज्ञस्य ।
2. **भूतद्वयहेतुत्वेऽपि**—वाय्वाकाशकारणत्वेऽपि ।
3. **भूतान्तरोत्पत्तौ**—तेजोजलपृथिव्युत्पत्तौ ।
4. **तत्कर्मणः** — हिरण्यगर्भक्षेत्रज्ञकर्मणः ।
5. **न तैरस्य भोगः** — न तेजःप्रभृतिभूतान्तरैः हिरण्यगर्भक्षेत्रज्ञस्य भोगः ।

वाय्वाकाशप्रणाडचैवं तेजसः संभवस्ततः ।
जज्ञाते तेजसो भूते जलं च पृथिवी तथा ॥ (55)

कर्मणा पौरुषेणैवं रसभूतेन संभवः ।
वाय्वन्तरिक्षयोर्यस्माद्रसस्तेन पुमांस्तयोः ॥ (56)

मेघया तपसेत्यादि तथाच प्रागुदाहृतम् ।
न्यायेनानेन पुरुषो रसशब्देन भण्यते ॥ (57)

त्यस्य ह्येष इति ह्युक्त्या न्यायः श्रुत्याऽयमुच्यते ।
नैतदेवं भवेत्, मूर्तरसेनास्यासमत्वतः ॥ (58)

भूतत्रयस्य मूर्तस्य रसो मण्डलमभ्यधाः ।
धर्मैश्चतुर्भिर्भूताद्यैर्भूतत्रयवदन्वितम् ॥ (59)

अमूर्तयोरपि रसो लिङ्गात्मा गृह्यतां तथा ॥ (60)

शस्थं भवति । तदवस्थस्य कर्मणः मरुत् कार्यम् । वा[1]य्वात्मना स्थितस्य तेजः कार्यमिति क्रमेण भूतपञ्चकनिष्पत्तिरित्यर्थः । (54-55) प्रकृतमुपसंहरति—**कर्मणेति** । (56) [2]किमत्र मानम्, तदाह—**मेघयेति** । 'मेघया तपसाऽजनयत्' (बृ. 3-5-1) इत्य(त्रेत्यु)[त्रो]क्तमशेषजगत्कारणत्वमित्यर्थः । अस्तु, प्रस्तुते किं स्यात्, अत्राह—**न्यायेनेति** । (57) श्रौतोऽयं न्यायो, न निर्मूलः, इत्याह—**(त)[त्य]स्येति** ।

भर्तृप्रपञ्चव्याख्यानदूषणम्

दूषयति—**नैतदिति** । (58) [3]असाम्यं वक्तुं, मूर्तरसं दर्शयति—**भूतेति** । (59) वैषम्यमुक्तं कथं परिहर्तुं शक्यम्, अत्राह—**अमूर्तयोरिति** । मूर्तरसत्वे-नाचेतनं मण्डलं गृहीतम् । अमूर्तरसत्वेनापि अचेतनमन्तःकरणं गृह्यतां

---

1. **वाय्वात्मना स्थितस्येति** तत्कर्मण इति शेषः ।
2. **किमत्र मानम्** —हिरण्यगर्भक्षेत्रज्ञस्य भूतकारणत्वे किं प्रमाणम् ।
3. **असाम्यं**—अमूर्तरसेन साम्याभावम् ।

वाक्यप्रवृत्तेस्तुल्यत्वान्न युक्तोऽत्रान्यथाग्रहः ।
वैरूप्यलक्षणो दोषः सत्येवं वः प्रसज्यते ॥ (61)

अथ मूर्तरसोक्त्यापि चेतनस्यैव चेद् ग्रहः ।
अत्यल्पं भवताऽभाणि सर्वमात्मैव नो यतः ॥ (62)

* न ह्यात्मव्यतिरेकेण किंचित्कारणमिष्यते ।
तेन तेन स्वरूपेण प्रत्यगात्मैव कारणम् ॥ (63)

मण्डलात्मनि चाधारे लिङ्गात्मैवावसीयताम् ।
करणस्यैव तत्स्थत्वात् विज्ञानात्मा हि लिङ्गगः ॥ (64)

* अज्ञातः पुरुषो यस्मात्कार्यकारणशब्दभाक् ।
अज्ञातमिथ्याविज्ञानरूपत्वान्न तु तत्त्वतः ॥ (65)

सा(मर्थ्य,[म्यार्थ]मित्यर्थः । चेतनग्रहे दोषमाह—**वैरूप्येति** । (60-61) **मूर्तरस**-शब्देनापि चेतनरसस्यैव ब्रह्मणः मण्डलापन्नस्य ग्रहणात् न वैषम्यम्, इति **शङ्कते**—**अथेति** । मण्डलस्य चेतनकार्यत्वाच्चेतनत्वे, विश्वस्य कार्यस्य चेतनत्वात् **रसयोः** चेतनतेति विशेषणानर्थक्यम्, इति दूषयति—**अत्यल्पमिति** । (62) क्षेत्रज्ञस्य कारणत्वं दूषयति—**न हीति** । (63) यत्तु पुरुषो **मण्डलाधारो** विज्ञानात्मेति, तत्राह—**मण्डलेति** । अक्षिगोलकस्थत्वे चक्षुरा**दिकरणवत् मण्ड**-लेऽपि [1]तस्यैव स्थितिरित्यर्थः । (64) ब्रह्मैव कारणमित्ययुक्तमुक्तम्, तस्य **कूटस्थ**-त्वात्, अत्राह— **अज्ञात इति** । (65) मण्डलाधारस्याचेतनत्वेन [2]**पुरुषशब्द**-

---

* **न हीति** परस्यैवाज्ञातस्य कारणत्वं वेदसिद्धमिति भावः ।

1. **तस्यैव स्थितिरिति** करणात्मन एव लिङ्गस्य स्थितिरित्यर्थः ।

* **अज्ञात इति** अज्ञातरूपत्वं कारणशब्दभाक्त्वे, मिथ्याविज्ञानरूपत्वं च **कार्यशब्द**-भाक्त्वे हेतुः । परस्मिन् कार्यादिभावस्य आरोपात् न वास्तवकौटस्थ्य**विरोधः** इति भावः ।

2. पुरुषशब्दप्रयोग इति मण्डलाधारे लिङ्गे इति शेषः ।

अचेतनेषु लोकेऽस्मिन्न दृष्टा पुरुषाभिधा ।
इति चेन्नैतदेवं स्यात् अचित्केष्वपि दर्शनात् ॥ (66)

त एतान्सप्त पुरुषानित्यादिश्रुतिवाक्यतः ।
असंवित्केऽपि पक्षादौ दृश्यते पुरुषाभिधा ॥ (67)

अध्यात्मोक्त्यवधिज्ञप्त्या अधिदैवतकीर्तनम् ।
मूर्तामूर्तविभागोऽयमध्यात्ममधुनोच्यते ॥ (68)

भूतत्रयं पृथिव्यादि देहेऽपि परिगृह्यते ।
मूर्तशब्देन यत्प्राणाद्यद् व्योम्नश्चापरं च यत् ॥ (69)

प्रयोगो न स्यात्, इति शङ्कते—**अचेतनेष्विति** । विरोधाभावं प्रतिजानीते—**नैतदिति** । (66) [1]दर्शनमेवाह—[त]एतानिति । "ते प्राणा न शक्ता व्यवहारं दर्शयितुमिति कृतालोचनाः त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाङ्मनोरूपानेतान् पुरुषानेकं लिङ्गात्मकं पुरुषमकुर्वन्" इत्यादिवाक्यादचेतनेष्वपि तच्छ[2]ब्दो दृष्ट **इत्यर्थः** । 'स [वा एष]पुरुषोऽन्नरसमयः' (तै. 2-1) इत्यादिश्रुतिरप्यत्र मानम्, **इत्याह-असंवित्केऽपीति** । पक्षादौ—पक्षपुच्छादेः समूहे कोशे इत्यर्थः । (67) परपक्षं प्रतिक्षिप्य 'इत्य(पि)[धि]दैवतम्' इत्यस्य तात्पर्यमाह—**अध्यात्मेति** । (68)

चतुर्थपञ्चमकण्डिकार्थनिरूपणम्

'अथाध्यात्मम्' इत्यादेरर्थमाह—**भूतेति** । हृदयाकाशात् प्राणाच्च [3]**यदन्यत्** तदत्र मूर्तमित्यर्थः । (69) '[ए]तस्य सतः' इत्यादेरर्थमाह—**चक्षुरिति** ।

---

1. **दर्शनमेवाह**—अचित्केषु पुरुषशब्ददर्शनमेवाह ।
2. **तच्छब्दः**—पुरुषशब्दः ।
"अथाध्यात्मम्, इदमेव मूर्तं यदन्यत् प्राणाच्च यश्चायमन्तरात्मन्नाकाशः, एतन्मर्त्यमेतत् स्थितमेतत् सत्, तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसः, यच्चक्षुः, सतो ह्येष रसः ।" इति श्रुतिः ।
3. **यदन्यदिति** देहारम्भकं पृथिव्यादिभूतत्रयमित्यर्थः ।

चक्षूरसस्त्रयाणां स्याद्विशेषेणात्र निष्ठितम् ।
तेजः सर्वशरीरस्य निर्मातृ स्यादसंशयः ॥ (70)

प्रथमा संस्कृतिरिति मन्त्रवर्णोऽपि दृश्यते ।
शश्वद्ध रेतस इति तथाच श्रुतिशासनम् ॥ (71)

मूर्तामूर्तविभागोऽयं यदि नामेह भण्यते ।
अधिदैवं तथाध्यात्मं तथापीयान्न गृह्यते ॥ (72)

कृत्स्नस्य ब्रह्मणो रूपे मूर्तामूर्ते विवक्षिते ।
यतोऽतो नेयता कात्स्न्यं देवताध्यात्मयोर्भवेत् ॥ (73)

हेतुमाह—**विशेषेणेति** । (आदित्यश्चक्षुविषणेति) 'आदित्यश्चक्षुर्भूत्वा (सा) अक्षिणी प्राविशत्' (ऐ. 1-2-4) इति श्रुतेः देहव्यापकं तेजः चक्षुषि विशेषतः स्थितमित्यर्थः । (70) अत्र मानमाह—**प्रथमेति** । 'सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रोऽग्निः' (वा. सं. 7-14) इति मन्त्रः देहावयवभूतां प्रथमसृष्टां दृष्टिं सारशब्दयोग्यामाहेत्यर्थः । '(अ) [श] श्वद्ध रेतसः सिक्तस्य चक्षुषी एव प्रथमे संभवतः' इति ब्राह्मणमपि तदनुगुणं दृश्यते, इत्याह—**शश्वदिति** । (71)

मूर्तामूर्तविभागे आदेयस्य भर्तृप्रपञ्चमतस्य निरूपणम्

श्रौतं विभा[1]गमुक्त्वा भर्तृप्रपञ्चमतमदुष्टमाह—**मूर्तेति** । इयान्—उक्तमात्ररूप इत्यर्थः । (72) हेतु[2]माह—**कृत्स्नस्येति** । ब्रह्मणः अद्वयत्वार्थं मूर्तादिरूपमुच्यते । तदद्वयत्वमध्यात्माधिदैवतयोरुक्तमूर्तादिलक्षणेन न सिद्ध्यति, मूलकारणस्यागृहीतत्वादित्यर्थः । (73) यथोक्तलक्षणस्य आकाशादावसंभवाच्च अव्याकृतमत्र ग्राह्यम्,

---

1. **विभागं**—मूर्तामूर्तविभागम् ।
2. **हेतुमाह**—उक्तमात्ररूपस्याग्रहणे हेतुमाह ।

आरब्धकार्यभूतानां गृहीतौ न च संभवः ।
यथोक्तलक्षणस्येह मुख्यवृत्त्योक्तभूमिषु ॥ (74)

* व्याप्त्येव लक्षणं युक्तमन्यथा तदलक्षणम् ।
निर्देशस्तु परिच्छिन्नविषयोऽत्राभिधीयते ॥ (75)

तत्रैवं सति यत्र स्यान्मूर्ताद्युक्तं चतुष्टयम् ।
लक्षणं तत्र संपूर्णमन्त्यकारणकार्ययोः ॥ (76)

आकाशशब्दवाच्यो यः सर्वकारणकारणः ।
मुख्यवृत्त्या समर्थं स्यात् तत्रैवामूर्तलक्षणम् ॥ (77)

पृथिव्यां चापि तन्मुख्यं यदुक्तं मूर्तलक्षणम् ।
उभयोरन्तरालस्था मिथः संकीर्णलक्षणाः ॥ (78)

लक्षणं गौणमेव स्यादन्त्ययोर्मध्यभूमिषु ।
मूर्तामूर्तव्यवहृतिस्तथा तत्रापि दृश्यते ॥ (79)

इत्याह—**आरब्धेति** । (74) मूर्तामूर्तलक्षणस्य भूतपञ्चके(मुख)[मुख्य]स्यासंभवेऽपि [1]**तदेव ग्राह्यं** श्रुतत्यागायोगात्, अत्राह—**व्याप्तीति** । **परिच्छिन्नविषय इति** । [2]**अव्यापकलक्षणविषय** इति यावत् । (75) क तर्हि लक्षणं स्यात्, अत्राह—**तत्रेति** । **श्रौतविभागे अस्थिते** इति यावत् । (76) एतत् स्पष्टयति—**आकाशेति** । **अमूर्तलक्षणमव्याकृतमात्रविषयं** मूर्तलक्षणं पृथिवीमात्रविषयमित्यर्थः । **सलिलान-लयोः** मूर्तलक्षणं पवनगगनयोरमूर्तलक्षणं च मुख्यमेवेति, नेत्याह—**उभयोरिति** । [3]**मध्यवर्तिषु** मूर्तामूर्तव्यवहाराभावात् कथं गौणमपि लक्षणम्, अत्राह—**मूर्तेति** ।

---

1. **तदेव ग्राह्यं**—भूतपञ्चकमेव मूर्तामूर्तपदाभ्यां ग्राह्यम् ।

* **व्याप्त्येव लक्षणमिति** यावल्लक्ष्यवृत्त्येव लक्षणं साधु इत्यर्थः ।

2. **अव्यापकलक्षणविषय इति** यावल्लक्ष्यावृत्तिलक्षणविषयः निर्देशः, **मूर्तलक्षण-स्योक्तस्य** पृथिवीमात्रवृत्तित्वादित्यर्थः ।

3. **मध्यवर्तिषु**—अन्त्यकार्यकारणयोः पृथिव्यव्याकृताकाशयोः अन्तरालवर्तिषु **जलते-जोपवनगगनेषु** चतुर्षु ।

मुख्यवृत्तिग्रहायातो व्यापिलक्षणसिद्धये ।
क्षित्यादि वियदन्तं स्यान्मूर्तामूर्तस्य लक्षणम् ॥ (80)

योऽयं दक्षिणेऽक्षन्निति शास्त्रदृष्टत्वकारणात् ।
दक्षिणेऽक्षणि लिङ्गस्य विशेषः कश्चिदिष्यते ॥ (81)

वीर्यवद्दक्षिणं लोकेऽप्यङ्गं दृष्टं यतस्ततः ।
दक्षिणेऽक्षन्निति वचः श्रुतेर्यत्नादिहेष्यते ॥ (82)

पिण्डप्राणविभागेन ह्यध्यात्मे चाधिदैवते ।
मूर्तामूर्तात्मनोरुक्तो विभागो ब्रह्मरूपयोः ॥ (83)

अथाधुना यथोक्तस्य तस्यैव करणात्मनः ।
लिङ्गस्य रूपं वक्ष्यामो वासनामयमात्मनः ॥ (84)

मूर्तामूर्तादिसंबन्धाद्वासना लिङ्गमाश्रिताः ।
स्वाभासभ्रमदोषेण तन्मयः पुरुषो मतः ॥ (85)

(77-78-79) उपसंहरति—**मुख्येति** । (80) एवमादेयं **भर्तृप्रपञ्चमतमुक्त्वा**, श्रुतिव्याख्यामनुसंधत्ते—**योऽयमिति** । (81) अनुमानादप्यति[1]शयो गम्यते, इत्याह—**वीर्य(वि)[व]दिति** । विमतं विशेषवत् दक्षिणाङ्गत्वात् दक्षिणपाणिवदित्यर्थः । (82)

षष्ठकण्डिकार्थनिरूपणम्

'तस्य ह' इत्यादेः [2]संगत्यर्थं वृत्तमाह—**पिण्डेति** । (83) **संगतिमाह**—**अथेति** । अमूर्तरसान्तःकरणस्यैव रागादिवासनाः इति वदितुमुत्तरं **वाक्य**मित्यर्थः । (84) [3]तत्र हेतुमाह—**मूर्तेति** । मूर्तादिविषयजातस्य **अन्तःकरणेनैव संबन्धात्** तद्वासना तन्निष्ठेत्यर्थः । रागादेरात्मनि दृष्टत्वं कथम्, **अत्राह**—

---

1. **अतिशय इति** दक्षिणस्याक्ष्णः इत्यादिः ।
2. **संगत्यर्थं**—संगतिकथनार्थम् ।
3. **तत्र हेतुं**—रागादिवासनानामन्तःकरणनिष्ठत्वे हेतुम् ।

* अनेकवासनाचित्रं तल्लिङ्गं पटभित्तिवत् ।
मायेन्द्रजालसदृशं व्यामोहास्पदमात्मनः ॥ (86)

* एतावन्मात्रमेवेति यत्र भ्रान्ता निरागमाः ।
विज्ञानवादिनो बौद्धाः तथा नैयायिकादयः ॥ (87)

आत्मनो द्रव्यभूतस्य यदेतद्वासनात्मकम् ।
रूपं गुणोऽस्य संसारः इति वैशेषिकादयः ॥ (88)

* त्रिगुणं सत्प्रधानस्थं पुरुषार्थेन हेतुना ।
प्रवर्तते स्वतन्त्रं सदिदमित्यपि कापिलाः ॥ (89)

स्वाभासेति । आत्मव्याप्तान्तःकरणाविवेककृतः अहं रागी इत्यादिभ्रमः, तेनेत्यर्थः । (85) [1]बाधाभावे कथं तर्हि भ्रान्तिः, अत्राह—**अनेकेति** । रागादयो नात्मनिष्ठाः नानात्वात् श्वेतपीतादिवदित्यर्थः । (86)

बुद्धेरात्मभ्रान्त्यास्पदत्वे, [2]परभ्रान्तिं लिङ्गमाह— **एतावदिति** । अन्तः-करणमहं[3]वृत्तिविशिष्टं स्वरसभङ्गुरं रागा(श्रा)[द्या]स्पदमात्मा नान्यः इति यत्र **विज्ञानवादिनो** भ्रान्ता इत्यर्थः । (87) तार्किकभ्रान्तिं स्पष्टयति—**आत्मन इति** । **वैशेषिकादयोऽपि** यत्र भ्रान्ताः इति संबन्धः । (88) सांख्यभ्रान्तिमाह—**त्रिगुणमिति** । नान्तःकरणमेवात्मा, किन्तु तदतिरिक्तः कूटस्थः सर्वगतः प्रकाशः आत्मा । तद्भोगार्थमिदमन्तःकरणं प्रवर्तते इत्यर्थः । (89)

---

1. **बाधाभावे**—नाहं रागी इति बाधज्ञानाभावे ।

* "ननु चेतसो वासनामयत्वमारोपितं, अनारोपितं वा । नाद्यः, पुंसोऽपि तद्भावात् तच्छब्देन परामर्शप्रसङ्गात् । नेतरः, धर्मिणोऽपि तस्यानारोपितरूपत्वापत्तेः, अत आह—**अनेकेति** । स्वाभासेत्यादौ वासनासंबन्धमुक्तमात्मनो व्यक्तीकर्तुं विशिनष्टि—**व्यामोहेति** ।" इति **शास्त्रप्रकाशिका** ।

2. **परभ्रान्तिं**—परेषां वादिनां आत्मनि विषये भ्रान्तिम् ।

3. **अहंवृवित्तिविशिष्टं**—अहमाकारवृत्तिविशिष्टम् ।

* **निरागमाः**— वेदबाह्याः ।

* **त्रिगुणं**—सत्वरज ।

अप्यौपनिषदंमन्याः केचिदत्यन्तनैपुणात् ।
प्रक्रियां रचयित्वाऽऽहुः वेदान्तार्थाविपश्चितः ॥ (90)

यावान् बाह्यो विकारः स्यात् क्षेत्रज्ञपरिवेष्टनः ।
अध्यात्मं चाधिदैवं वा नामरूपविभागतः ॥ (91)

अव्याकृताद्व्याकृतः स्यादेतावानेव सोऽत्र तु ।
मूर्तो वा यदि वाऽमूर्तः सच्च त्यच्चेति भण्यते ॥ (92)

प्राणानामपि सत्यत्वं भूतसत्याभिसंगतेः ।
कथं, यतस्त्वमी सर्वे प्राणाः क्षेत्रज्ञलक्षणाः ॥ (93)

अनामरूपकाः सन्तः सत्यसंयोगहेतुतः ।
देहिनः प्राणवत्साक्षात् संवृत्ता नामरूपिणः ॥ (94)

भर्तृप्रपञ्चप्रक्रियानिरूपणम्

संप्रति **भर्तृप्रपञ्च**[प्र]क्रियां वक्तुमाह—**अपीति** । (90) 'तस्य ह' इत्यादेः संगत्यर्थं यथा [1]तैः वृत्तं संकीर्तितं, तद्दर्शयति—**यावानिति** । आत्मोपाधित्वेनाभिमतं कार्यजातम(त्या)[व्याकृता]दुत्पन्नं सत्त्यशब्दवाच्यमेतावदेव, यत् मूर्तामूर्तविभागेन व्याख्यातमित्यर्थः । (91–92) 'प्राणा वै सत्यम्' इत्युक्तत्वात् कथं भूतानां सत्यत्वमुच्यते, अत्राह—**प्राणानामिति** । सत्यशब्दवाच्यभूतकार्यत्वादित्यर्थः । [2]तत्र हेतुं पृच्छति—**कथमिति** । तमाह—**यत इति** । [3]एकादश प्राणाः मुख्यप्राणवत् क्षेत्रज्ञलक्षणाः–(धी)[जी]वोपाधयः स्वतो नामरूपहीनाः सत्यशब्दभूतकार्यत्वात् नामरूपवन्तो—प्राणा वै सत्यमिति व्यपदेशार्हाः संवृत्ता इत्यर्थः । वृत्तानुवादमुपसंहरति—**तदत्रेति** । 'सत्यस्य सत्यम्' इत्यत्र

---

1. **तैः**—भर्तृप्रपञ्चैः ।

2. **तत्र हेतुं**—भूतकार्यत्वे हेतुम् ।

3. **एकादश प्राणाः**—पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनश्चेति एकादश प्राणाः ।

निर्देशाय च कल्पन्ते प्राणा वा इति नान्यथा ।
तदत्र निखिलं सत्यं श्रुत्या संशोधितं स्फुटम् ॥ (95)

व्याविद्धसत्यराशेः स्याद्विज्ञानात्मन एव तु ।
स्वरूपं यत्तदधुना वक्तव्यमवशिष्यते ॥ (96)

तत्रैतस्यामवस्थायां विभागो विनिवर्तते ।
अयं भोक्ता विज्ञानात्मा तथा दैवतिकास्त्वमी ॥ (97)

विज्ञानात्मान इत्येषः, भेदहेतुनिवर्तनात् ।
यत आधारगो ह्येष नामरूपादिलक्षणः ॥ (98)

विशेषो न स्वतस्तच्च नामरूपादि शोधितम् ।
संशोध्य तदिदं सर्वं विज्ञानात्मा प्रदर्श्यते ॥ (99)

षष्ठ्यन्तसत्यशब्दितं सर्वं, ('न्य)[त]स्य ह' इत्यस्मात् प्राक्तनश्रुत्या स्फुटीकृतमित्यर्थः । (93–94–95) [1]अन्यतरनिर्णयादार्थिकोऽन्यत[2]रस्य निर्णयः इति न पृथक् वाच्यत्वम् । अन्यथा तस्याप्यनिश्चयप्रसङ्गात्, अत्राह— **व्याविद्धेति** । सत्यराशेर्व्यावृत्तस्यात्मनो यद्रूपं तत् विशेषतोऽनवगतत्वात् प्रतिपादनीयमित्यर्थः । (96) सत्यराशेः नि(ष्क्र)[ष्कर्षक]लमाह—**तत्रेति** । **दैवतिकास्त्वमी विज्ञानात्मान इति** । जीवोपाधिभूता अमी वागादयो देवताधिष्ठिता इत्यर्थः । भेदहेतुं निवृत्तिं च स्पष्टयति—**यत इति** । नामरूपादिविभागस्य भूतपञ्चकोपाधित्वात्, [3]तस्य [4]चात्मनः पृथक् कृतत्वात् [5]अयं विभागो (न वृत्तय)[निवर्त]ते इत्यर्थः । (97–98) भूमिकां कृत्वा, 'तस्य' इत्यादि अवतारयति—**संशोध्येति** । उत्तरवाक्येन सत्यराशेर्व्यावृत्तस्यात्मनो रूपमुच्यते इत्यर्थः । (99) जीवानन्त्यात्

---

1. **अन्यतरनिर्णयात्**—षष्ठ्यन्तसत्यशब्दार्थस्य निर्णयात् ।
2. **अन्यतरस्य निर्णयः**—प्रथमान्तसत्यशब्दार्थस्य निर्णयः ।
3. **तस्य च**—भूतपञ्चकस्य च ।
4. **आत्मन इति** पञ्चम्यन्तम् ।
5. **अयं विभागः**—नामरूपादिविभागः ।

सर्वेषामपि तेनेदं समानं लक्षणं भवेत् ।
क्षेत्रज्ञानां विशेषोऽत्र यतो नैवोपपद्यते ॥ (100)

एतस्य पुरुषस्येति रूपं निर्दिश्यतेऽधुना ।
पुंसो रूपमुपक्षीणं मूर्तामूर्तसमाश्रयम् ॥ (101)

* येन त्वस्य विशेषेण विज्ञानात्मत्वमिष्यते ।
विभज्यमानस्य सतः परस्मादात्मनोऽद्वयात् ॥ (102)

अपाञ्चभौतिकं रूपमिह तन्निर्दिदिक्ष्यते ।
यथेति माहारजनं वासनोपचयात्मकम् ॥ (103)

---

[1]कस्येदं रूपमित्यनिश्चयः स्यात् विशेषाभावात्, अत्राह—**सर्वेषामिति** । (100) यत् [2]समानं रूपं तत् 'तस्य ह' इत्युच्यते इति संगतिमाह—**एतस्येति** । परमात्मरूपे वक्तव्ये, विज्ञानात्मरूपोपन्यासोऽसंगतः, अत्राह—**पुंस इति** । 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनोक्तमित्यर्थः । (101) कीदृशमत्र जीवानां रूपमुच्यते, इत्याशङ्क्य, अभौतिकम्, इत्याह—**येनेति** । (102) किं तत् इत्याशङ्क्य, दृष्टान्तश्रुतिमुपादत्ते—**यथेति** । अनेन हि वाक्येन हरिद्राद्युपरक्तवस्त्रादिवत् नानाविधरागादि[स]मुदायात्मकं सर्वजीवसाधारणं रूपं निर्दिश्यते इत्यर्थः । (103) उपसंहरति—**तस्येति** ।

---

1. **कस्येति** जीवस्येति शेषः ।
2. **समानं रूपमिति** सर्वेषां क्षेत्रज्ञानामित्यादिः ।

* "जीवस्यापि पराभेदात् उक्तमेव तदित्याशङ्क्य, इह तु परमात्मनः परिच्छिद्यमानस्य येन विशेषेण विज्ञानात्मत्वलाभः, तद्रूपं निर्दिदिक्षितमपाञ्चभौतिकम्, इत्यस्यार्थमाह—**येनेति** ।" इति **शास्त्रप्रकाशिका** ।
'तस्य हैतस्य' इत्यादिश्रुतिवाक्ये, वासनामयं करणस्य लिङ्गस्य स्वरूपमुच्यते इति स्वमतम् । विज्ञानात्मन एव वासनामयमभौतिकं रूपमुच्यते इति भर्तृप्रपञ्चमतमिति ज्ञेयम् ।

तस्य हैतस्य संबन्धमेवं केचित्प्रचक्षते ।
तदयुक्तं यथाऽन्यायः तथाऽयमभिधीयते ॥ (104)

* पुष्पादिवासनानां हि वस्त्रादिष्वेव संगतिः ।
सजातीयेषु नियता दृश्यते नान्यजातिषु ॥ (105)

* द्रव्येऽपि न खलु व्योम्नि वासना काचिदीक्ष्यते ।
अद्रव्ये चासजातीये चैतन्ये वासना कुतः ॥ (106)

वासनाकारतां गच्छेच्चैतन्यं चेत्कपालवत् ।
वासनानिष्फलत्वं स्याच्चैतन्यादपृथक्स्थितेः ॥ (107)

न हि श्रोत्रोत्थविज्ञानं रूपवासनयाञ्च्यते ।
विषयत्वाविशेषेऽपि कुतोऽसङ्गत्वतश्चितेः ॥ (108)

भर्तृप्रपञ्चोक्तस्य 'तस्य ह' इत्यादिवाक्यसंबन्धस्य दूषणम्

दूषयति—त(द)[दयु]क्तमिति । अयं संबन्धः अन्यायः—अपगतन्यायः यथा अभिधीयते इत्यर्थः । (104) यत्तु वासनोपचयात्मकं तद्रूपमित्यु[1]क्तम् , तत्राह—पुष्पादीति । आत्मा न वासनाश्रयः । (105) किंपुनर्न्यायेनापि वासनासंबन्धाभावमाह—द्रव्येऽपीति । अद्रव्यत्वात् रूपादिवदित्यर्थः । (106) प्रतीचो वासनाख्य रूपं अभिन्नं, भिन्नं वा । नाद्यः, इत्याह—वासनेति । कपालवत्—यथा मृत् घटकपालाद्याकारा भवतीति यावत् । आत्मान्तरात् ब्रह्मणश्च आत्मनो [2]न भेदक तदिति व्यर्थं स्यादित्यर्थः । (107) न द्वितीयः, वासनासंबन्धाभावात् , इत्याह—न हीति । विषयत्वाविशेषेऽपि श्रोत्र(विध)[चक्षुः]करणज्ञानरूपवासनयोः

---

1. उक्तमिति परमात्मरूपमिति शेषः ।

* " किं जीवो वासनानिमित्तवस्त्रादिविजातीयः, तत्सजातीयो वेति विकल्प्य, आद्ये तत्संबन्धो न तस्य सिद्ध्यति, इत्याह—पुष्पादीति । दर्शनस्य व्यावहारिकप्रमाणत्वद्योतको हिशब्दः ।

* न द्वितीयः, सत्यपि साजात्ये व्योमवदसङ्गस्य तत्संबन्धासिद्धेः, इत्याह—द्रव्येऽपीति । किञ्च आत्मनि चिन्मात्रे परा अपरा वा न जातिः । तत् साजात्यस्यैवासिद्धेः न तत्र वासना, इत्याह—अद्रव्ये चेति ।" इति शास्त्रप्रकाशिका ।

2. न भेदकं तत्—वासनाख्यं रूपं न व्यावर्तकम् ।

षड्भावविक्रियाणां च निषेधश्चैतनात्मनः ।
असङ्ग इति चाप्युक्तिरसकृच्छ्रूयते श्रुतौ ॥ (109)

भूतसंयोगतः प्राप्तं न च तत्पाञ्चभौतिकम् ।
इति ब्रुवाणो लोकेऽस्मिन् हस्यते बालकैरपि ॥ (110)

मूर्तामूर्तविभागेऽस्य विभागो विनिवर्तते ।
इति स्वोक्तमविस्मृत्य वासनाभेदगीः कथम् ॥ (111)

रचयन्ति तथाऽसाध्वीं प्रक्रियां न्यायवर्जिताम् ।
मूर्तामूर्तात्मको राशिरेको बाह्यः किलेष्यते ॥ (112)

स्वरूपेण विषयत्वेऽपि मिथो विषयविषयित्वाभावात् शब्दज्ञानं रूपवासनया नाश्चयते । चितस्तु अविषयत्वादसङ्गत्वाच्च कुतो वासनासंगतिरित्यर्थः । (108) कूटस्थत्वाच्च न [1]तत्संबन्धः, इत्याह—षडिति । (109) आत्मनो वासनां निरस्य [2]तद्रूप(त्व) स्यापाञ्चभौतिकत्वं दूषयति–भूतेति । (110) प्रमाणविरुद्ध[त्व]मुक्त्वा, [3]पूर्वापर-विरोधमाह—भूतेति । 'तत्रैतस्यामवस्थायाम्' (वा. 97) इत्यत्र जीवो भोक्ता वागादयो(वा)विज्ञानात्मानो(वा)दैवतिकाः इति विभागो निवर्तते इत्युक्तम् । [4]तन्निवृत्तौ वासनाविभागो न स्यात् आ[5]श्रयाभावात् । अतः स्वोक्तिविरोध इत्यर्थः । (111)

भर्तृप्रपञ्चप्रक्रियाकल्पना

तदीय[6]संबन्धं निरस्य, 'प्रक्रियां रचयित्वा' (वा. 90) इत्यत्र सूचितां तदीयकल्पनामाह–रचयन्तीति । तामेवाह–मूर्तेति । मूर्तामूर्तात्मको राशि-

---

1. तत्संबन्धः—वासनासंबन्धः ।
2. तद्रूपस्य—वासनामयस्य ।
3. पूर्वापरविरोधं—पूर्वापरस्ववचनविरोधम् ।
4. तन्निवृत्तौ—भोक्त्रादिविभागनिवृत्तौ सत्याम् ।
5. आश्रयाभावादिति भोक्तुरेव वासनाश्रयत्वादिति भावः ।
6. तदीयसंबन्धं—भर्तृप्रपञ्चोक्तां 'तस्य हैतस्य' इति श्रुतिवाक्यस्य पूर्वेण संगतिम् ।

उत्तमः परमात्माख्यः राशिरत्राभिधीयते ।
मध्यमोऽयं तृतीयस्तु ताभ्यां राशिः प्रयोजकः ॥ (113)

पाणिपेषोत्थितेनायं कर्त्रा भोक्त्रा सहात्मना ।
भावनाज्ञानकर्मादिसमुदायः प्रयोजकः ॥ (114)

मूर्तामूर्तादिराशिस्तु प्रयोज्यः साधनं तथा ।
तार्किकैः सह सन्धिश्च चिकीर्षन्ति यथाबलम् ॥ (115)

अयं प्रयोजको राशिर्लिङ्गमेव किलाश्रितः ।
इत्युक्त्वा सांख्यत्वभयात् कल्पयन्ति ततोऽन्यथा ॥ (116)

गन्धः पुष्पाश्रयो यद्वत्पुटमाश्रित्य तिष्ठति ।
कुसुमापगमेऽप्येवं लिङ्गस्था वासनाऽऽत्मनि ॥ (117)

वासनाकामकर्माणि लिङ्गस्थान्येव नात्मनि ।
लिङ्गादात्मानमायान्ति गन्धो गन्धपुटं यथा ॥ (118)

त्थमः, परमात्मराशिः उत्तम इत्यर्थः । राश्यन्तरमाह—**मध्यम इति** । क्षेत्रज्ञेन सह वासनाज्ञानकर्मसमुदायराशिर्मध्यमः । प्रयोजकः - उत्पादकः मूर्तामूर्तराशेः । स च मूर्तामूर्तराशिः साधनम् । अतो ज्ञानकर्मणां प्रयोजकः इत्यर्थः । तदीय-कल्पनान्तरमाह—[1]**तार्किकैरिति** । (112-113-114-115) कथमिति, तदाह—**अयमिति** । (116) अन्यथा कल्पनामेवाह—**गन्ध इति** । (117) वासना-दीनां लिङ्गगतत्वेऽपि आत्मधर्मत्वमविरुद्धं संयोगादिवदुभयधर्मत्वात्, अत्राह—**वासनेति** । (118)

---

1. **तार्किकैरिति** कर्मराशिः लिङ्गाश्रितः इत्युक्ते सांख्यमतप्रवेशापत्तिरिति लिङ्गाश्रिता वासना आत्मानमाश्रयते, पुष्पाश्रितो गन्धः पुष्पवियोगेऽपि पुटतैल-मिव । लिङ्गादागतेन सगुणो भवति परमात्मैकदेशः स्वतो निर्गुणोऽपि । स विज्ञानात्मा बध्यते मुच्यते च इति कल्पनया तार्किकसंवादमपि कुर्वन्ति इति समुदायभावः ।

निर्गुणोऽपि परैकांशः बहिरभ्यागतेन सः ।
कर्मणा सगुणः साक्षाद्भवतीति प्रचक्षते ॥ (119)

ततश्च कर्ता भोक्ता च बध्यते मुच्यते तथा ।
विज्ञानात्मेति कणभुक्चित्तमेवं समाश्रिताः ॥ (120)

भूतराशेरगाल्लिङ्गं कर्मराशिः सकाशतः ।
लिङ्गादात्मानमगात्स लिङ्गसंबन्धकारणात् ॥ (121)

* कृष्णशक्तिरविद्यापि परस्मादेव सोत्थिता ।
विकृत्य परमात्मांशं विज्ञानात्मनि तिष्ठति ॥ (122)

यथोषरात्मको दोषः पृथिव्या एव जज्ञिवान् ।
क्ष्मैकदेशं विकृत्यास्तेऽविद्या तद्वत्परात्मनः ॥ (123)

ेर्गुणस्य वासनादिगुणायोगः, (तोप्याह) अत्राह—[1]निर्गुणोऽपीति । (119) ांशेन तर्हि तार्किकमतानुसारित्वम्, अत्राह—ततश्चेति । (120) ङ्गतः सन् प्रयोजकराशिः आत्मनि केन क्रमेण स्यात्, अत्राह—[भूतराशेरिति] भूतरा(से:)[शे:]सकाशतः लिङ्गं गत्वा, तत्संबन्धादात्मानमगादित्यर्थः । (121) तार्किकचित्तानुसरणार्थमेव तदीयप्रक्रियान्तरमाह— कृष्णेति । अविद्याशक्तिः तामसी परस्मादुत्थिता विज्ञानात्मनि स्थिता इति (त्व)[व]दन्तः(गीथ)-[जीव]स्याज्ञानाश्रयत्वोपगमेन तार्किकचित्तमाराधयन्तीत्यर्थः । (122) परस्मादुत्थिता अविद्या तमे(व)वा(श्रि)[श्र]ये[त्]नान्यं, कारणादन्यत्र कार्यस्थित्ययोगात्, अत्राह—यथेति । (123) प्रयोजकराशेरन्तःकरणध(र्मो)[र्मत्वो]क्त्या सांख्य-

---

1. निर्गुणोऽपीति स्वतः निर्गुणत्वं लिङ्गसंबन्धकृतागन्तुकगुणेन गुणवत्त्वमित्यविरोध इति भावः ।

* 'कृष्णशक्तिः—भगवतः शक्तिः अविद्या ।' इति शास्त्रप्रकाशिका । जीवस्याज्ञानाश्रयत्वोपगमेन तार्किकचित्तमाराधयन्ति इत्युक्त्या, वाचस्पतिमिश्राभिमतः अज्ञानस्य जीवाश्रितत्वपक्षोऽपि तार्किकचित्ताराधनार्थः इति ग्रन्थकाराशयः प्रतिभाति ।

अनात्मधर्मोऽविद्येति वदन्तश्चोषरादिवत् ।
* इत्येवं सांख्यसिद्धान्तमनुवर्तन्ति संभ्रमात् ॥ (124)

नैवं कल्पयितुं युक्तं वेदसिद्धान्तबाधनात् ।
पुरापि चैतदुदितं यथा वेदान्तबाधनम् ॥ (125)

* सकलत्वे परस्योक्ताः संसारित्वादिलक्षणाः ।
दोषाः सर्वेऽपि चायान्ति प्रत्यगात्मानमेकलम् ॥ (126)

* क्षेत्रज्ञस्य च संभित्तौ परस्मादात्मनः स्वतः ।
एकत्वासंभवोऽत्यन्तं क्षेत्रज्ञपरमात्मनोः ॥ (127)

सिद्धान्तानुसारित्वमुक्तम् । इदानीं अविद्याया अनात्मधर्मत्वोक्त्यापि तदा॰ अनात्मेति । अनुवर्तन्तीति परस्मैपदमपि । ऊषरादि यथा भूम्येकदे न कृत्स्नधर्मः, तथा अविद्या न परस्य धर्मः इति वदन्तः अविद्याया अना॰ त्वोक्त्या कापिलमर्चयन्तीत्यर्थः । (124)

भर्तृप्रपञ्चप्रक्रियाकल्पनादूषणम्

दूषयति–नैवमिति । परस्य विकारित्वे अंशित्वे, जीवस्यांशत्वे विकार (ना)[वा]स्थूलादिश्रुतिविरोध इत्यर्थः । [1]वृद्धविचारेऽप्येतदुक्तम्, इत्याह— पुरेति । (125) तदेव स्पष्टयति—सकलत्व इति । (126) तर्हि परस्मादन्य एव जीवो श्रुतः, तत्राह–क्षेत्रज्ञस्येति । तत्त्वमादिश्रुतिविरोध इत्यर्थः । (127)

---

* 'अनुवर्तन्ति' इति छान्दसम् ।' इति शास्त्रप्रकाशिका ।
अत्रायं निष्कर्षः । कर्मराशेः अन्तःकरणधर्मत्वोक्त्या, अविद्याया अनात्मधर्मत्वोक्त्या च भर्तृप्रपञ्चानां सांख्यानुवर्तनम् । लिङ्गसंबन्धात् कर्मराशेः आत्मनि स्वीकारेण कर्तृत्वभोक्तृत्वबन्धमोक्षादीनां विज्ञानात्मधर्मत्वोक्त्या, अज्ञानस्य जीवाश्रितत्वोक्त्या च तार्किकचित्तानुसरणं तेषामिति ॥

1. वृद्धविचारे—बृहद्विचारे—संबन्धग्रन्थे इति यावत् ।

* सकलत्वे—सावयवत्वे ।

* 'क्षेत्रज्ञस्य' इति वार्तिके अत्यन्तं संभित्तौ—भेदे इति योजना ।

अथोपचारतो देशो लिङ्गमेवात्मनो मतः ।
न तदा लिङ्गविध्वस्तौ वासनाऽऽत्मनि युज्यते ॥ (128)

न्यायः पुरोदितो योऽत्र वासनासंश्रयं प्रति ।
स सर्वोऽत्रानुसन्धेयः पूर्वपक्षापनुत्तये ॥ (129)

उत्थानञ्चाप्यविद्यायाः परस्मादात्मनः स्वतः ।
ऊषरादिवदित्यादिकल्पना नोपपद्यते ॥ (130)

अनिर्मोक्षप्रसक्तिः स्याद्यद्यविद्या परात्मनः ।
निरात्मवादसक्तिश्च मोहोच्छेदे भवेदिह ॥ (131)

वास्यदेशातिरेकेण वासनाया न चेष्यते ।
* देशान्तरोपगमनं गुणवत् द्रव्यवर्जनात् ॥ (132)

परांशों लिङ्गोपाधिरात्मा, इति शङ्कते—**अथेति** । लिङ्गोपाधिः [1]लिङ्गाभावे अभावात् । स्वप्रक्रियाविरोधेन दूषयति—**नेति** । लिङ्गाभावेऽपि लिङ्गस्था वासना जीवे तिष्ठति इति [2]दर्शनासिद्धिरित्यर्थः । (128) 'अद्रव्ये वासजातीये चैतन्ये वासना कुतः' (वा. 106) इत्यादावुक्तमत्रानुसन्धेयम्, इत्याह—**न्याय इति** । (129) वासना[3]श्रयत्वं निराकृत्य, परस्मादविद्योत्थानं(चेति)प्रत्याह—**उत्थानं चेति** । (130) अनुपपत्तिं स्फोरयति—**अनिर्मोक्षेति** । अविद्याया परविका(रि)[र]त्वे परः संसारी स्यात् अविद्यावतः संसारित्वात् । अतोऽविद्यायाः स्थितौ न मोक्षः । न चाविद्या नश्यति । [4]तदभावे पराभावप्रसङ्गात् कारणे स्थिते कार्यस्यात्यन्तनाशायोगादित्यर्थः । (131) लिङ्गवियोगेऽपि तद्वासना जीवे तिष्ठति, इत्युक्तं दूषयति—**वास्येति** । (132)

---

1. आत्मनः लिङ्गोपाधिकत्वे हेतुपरं 'लिङ्गाभावे अभावात्' इति वाक्यम् ।
2. **दर्शनासिद्धिरिति** स्वशास्त्रासिद्धिः स्वीयसिद्धान्तासिद्धिरिति यावत् ।
3. **वासनाश्रयत्वमिति** आत्मनः इत्यादिः ।
4. **तदभावे**—अविद्याया आत्यन्तिकनाशे ।

* **गुणवदिति** यथा गुणः स्वाश्रयद्रव्यं विहाय अन्यत्र न गच्छति, पुष्पपुटेऽपि न स्वतन्त्रस्य गन्धस्य गमनं, परन्तु पुष्पावयवत्रसरेणूनां पुटेऽनुवृत्तिरस्त्येव । तथा वासना स्वाश्रयं लिङ्गं विहाय नात्मानं गच्छेदित्यर्थः ।

सामञ्जस्येन गच्छन्ति न च श्रुत्यक्षराण्यपि ।
यथोक्तकल्पनायां हि न युक्ता तेन कल्पना ।। (133)

कामः संकल्प इत्याद्या मनसो धर्मिणः श्रुताः ।
धर्माः, न त्वात्मनः शास्त्रे ह्यसङ्गो हीति वारणात् ।। (1

हृदये ह्यत्र रूपाणि ध्यायतीवेति चापरम् ।
कामा येऽस्य हृदीत्यादि तीर्णो हीति तथा वचः ।। (135)

श्रुतादर्थान्न चान्योऽर्थो यथोक्तवचसां यतः ।
सम्यक् कल्पयितुं शक्यः कल्पनाऽतो न युज्यते ।। (136)

प्रत्यग्ब्रह्मत्वसिद्ध्यर्था सर्वैवोपनिषत्त्रियम् ।
तावन्मात्रपरत्वेन वेदान्तानामुपक्षयात् ।। (137)

* राशित्रितयपक्षे च नाप्यर्थोऽत्र समञ्जसः ।
क्रियते कल्पना येन सर्वन्यायविरोधिनी ।। (138)

इतश्चात्मनो न वासनाश्रयत्वम्, इत्याह—सामञ्जस्येनेति । (
रुदाहरति—काम इति । (134-135) उक्तश्रुतिगतमनोहृदयादि
त्मवचनत्वात्[2] आत्मनि मनोयोगात् कामादिजन्म [3]विवक्षितम्, इ
श्रुतादिति । कल्पना आत्मनः कामाद्याश्रयत्वविषयेति शेषः । (136,
नामर्थान्तरपरत्वाभावे हेत्वन्तरमाह—प्रत्यगिति । (137)

राशित्रयकल्पनानिरासः

[4]वासनाश्रयत्वं निरस्य, राशित्रयकल्पनां निराचष्टे—राशीति ।

---

1. श्रुतीः—आत्मनः वासनाश्रयत्वाभावबोधिकाः श्रुतीः ।
2. आत्मवचनत्वादिति आत्मा उच्यते अनेनेति व्युत्पत्त्या आत्मबोधकत्वादित्यर्थः ।
3. विवक्षितमिति उक्तश्रुतिषु इत्यादिः ।
4. वासनाश्रयत्वमिति आत्मनः इत्यादिः ।
* 'नाप्यर्थोऽत्र समञ्जसः' इत्यत्र 'अर्थशब्दो वाच्यशब्दवाची ।' इति शास्त्रप्रकाशिका ।

द्वे एव तु यदा रूपे मूर्तामूर्ते सवासने ।
ब्रह्म रूपि तृतीयश्च तदा वा वेति युज्यते ॥ (139)

ब्रह्मैकदेशभूतस्य विज्ञानात्मन एव ते ।
रूपे इति तदा युक्तं कल्पनानुगुणं वचः ॥ (140)

विज्ञानात्ममुखेनाथ यदि वा परमात्मनः ।
रूपे इति तदाऽवक्ष्यच्छ्रौती चेत्कल्पना भवेत् ॥ (141)

द्विवचश्च तथाऽयुक्तं त्रैरूप्यस्येह संभवात् ।
मूर्तामूर्ते च द्वे रूपे तृतीयं वासना यतः ॥ (142)

* मतं मूर्तेतरे रूपे ब्रह्मणोऽभिमते सदा ।
क्षेत्रज्ञस्य तु नैवैते वासनामात्ररूपितः ॥ (143)

---

[1]रूपोपन्यासवाक्ये इति यावत् । 'द्वे वाव' इति द्वित्वाव[2]धारणविरोध इत्यर्थः । 38) [3]त्वत्पक्षेऽप्येतत् समम्, इत्यत्राह—द्वे इति । (139) राशित्रय_कल्पनायां जीवस्य रूपिमध्येऽन्तर्भावः, रूपमध्ये वा, इति विकल्प्य, आद्यं प्रत्याह—ब्रह्मेति । रूपिमध्ये जीवान्तर्भावकल्पनायां ब्रह्मैकदेशभूतस्य जीवस्य द्वे रूपे इति श्रुत्या भवितव्यमित्यर्थः । (140) अंशगते रूपे तद्द्वारा अंशिन एवेति, ब्रह्मणो रूपे इति न विरोधः, इत्यत्राह—विज्ञानात्मेति । अथवा, यदि राशित्रयकल्पना श्रौती, तदा विज्ञानात्मरूपं अंशिनः परस्य रूपम् इति श्रुतिरवक्ष्यत् इति संबन्धः । (141) भव(त्ये)[त्वे]वं श्रु(ता)[तौ]तात्पर्यवृत्तिः,[4] को दोषः, अत्राह—द्विवचश्चेति । [द्वे] रूपे इति वचनं 'वाव' इत्यवधारणञ्च न युक्तमित्यर्थः । (142) वासनाया जीवरूपत्वात् मूर्तामूर्ते द्वे एव ब्रह्मणो रूपे,

---

1. रूपोपन्यासवाक्ये—'द्वे वा व ब्रह्मणो रूपे' इति श्रुतिवाक्ये ।
2. अवधारणविरोध इति 'वाव' इत्यस्य एवार्थताया उक्तेरिति भावः ।
3. त्वत्पक्षेऽप्येतत् सममिति सिद्धान्तिमतेऽपि वा व शब्दार्थासामञ्जस्यं तुल्यमित्यर्थः ।
4. तात्पर्यवृत्तिः—तात्पर्यरूपा वृत्तिः—व्यापारः ।

* मूर्तेतरे—मूर्तामूर्ते ।

तदापि जीवद्वारेण विक्रियां व्रजतो विभोः ।
वासनाद्यभिसंबन्ध इतीयं गीरनर्थिका ॥ (144)

* वासनानामपि यतो न विशेषो मनागपि ।
क्षेत्रज्ञद्वारतायाः स्यादसत्तस्माद्विकल्पितम् ॥ (145)

वस्तु वस्त्वन्तरत्वेन न च विक्रियतेऽञ्जसा ।
वृत्त्येह मुख्ययेत्येवं शक्यो वक्तुं जगत्यपि ॥ (146)

* वस्त्वन्तरं न च मतः क्षेत्रज्ञः परमात्मनः ।
सिद्धान्तहानिरेवं च कल्पनायां ध्रुवं भवेत् ॥ (147)

आविश्चिकीर्षुभिस्तस्माद्वेदान्तार्थं महात्मभिः ।
ईदृशी कल्पनाऽयुक्ता कर्तुं परहितार्थिभिः ॥ (148)

इति शङ्कते—मतमिति । (143) दूषयति—तदेति । इत्थं व्यवस्थायां जीवद्वारा विक्रियमाणस्य परस्य मूर्तामूर्ते रूपे इत्युक्तिरयुक्ता, वासनानामपि जीवद्वारा ब्रह्मणि संबन्धप्रसङ्गादित्यर्थः । (144) [1]तत्र हेतुमाह—वासनानामिति । 'विज्ञानात्मद्वारा विक्रियमाणस्य' इति कल्पितमसदित्यर्थः । (145) जीवः परस्मात् वस्त्वन्तरं, पर एव वा । आद्ये जीवद्वारेण परस्य परिणामो न युक्तः, इत्याह—वस्त्विति । (146) द्वितीये, तवापसिद्धान्तः, इत्याह—वस्त्वन्तरमिति । चशब्दः चेदित्यर्थः । (147) तस्मात् जीवस्य कामाद्याश्रयत्वं राशित्रयं च न कल्प्यम्, इत्युपसंहरति—आविश्चिकीर्षुभिरिति । (148)

---

1. तत्र हेतुं—जीवद्वारा वासनानां ब्रह्मणि संबन्धप्रसङ्गे हेतुम् ।

* न विशेष इति मूर्तामूर्तरूपाभ्यामिति शेषः ।

* "किञ्च, जीवस्य ब्रह्मणो वस्त्वन्तरत्वं आत्यन्तिकं, अनात्यन्तिकं वा । नाद्यः, अपसिद्धान्तात्, इत्याह—वस्त्वन्तरमिति द्वितीयो भेदाभेदनिरासात् निरस्त इति चार्थः ।" इति शास्त्रप्रकाशिका ।

दक्षिणेऽक्षन् पुमानिति लिङ्गात्मा परिगृह्यते ।
अध्यात्मेऽथाधिदैवे च तस्यैव प्रकृतत्वतः ॥ (149)

जीवग्रहोऽत्र नन्वस्तु प्रकृतत्वाविशेषतः ।
तस्यैवैतानि रूपाणि कस्मान्नेत्यभिधीयताम् ॥ (150)

नैवंरूपितया यस्मादिह श्रुत्या विवक्षितः ।
क्षेत्रज्ञः, करण स्यैव तस्मादिह विवक्षितः ॥ (151)

वासनानुगतं लिङ्गं मृद्नन्मृद्विक्रियात्मसु ।
चेत्यते साक्षिणा यस्मान्नातः क्षेत्रज्ञरूपिता ॥ (152)

माहारजनमित्यादि रूपं चेत्साक्षिणो भवेत् ।
नेति नेतीत्यथादेशं नाकरिष्यत्तदाऽऽत्मनः ॥ (153)

स्वमतेन 'तस्य हैतस्य' इत्यत्र तत्पदार्थवर्णनम्

परमतं निरस्य, स्वमते 'तस्य ह' इत्यत्र तच्छब्दार्थमाह—**दक्षिण इति** । 'तस्य ह' इत्यत्र तत्पदेन लिङ्गं गृह्यते, 'दक्षिणे(ऽ)[क्ष]न्' इत्यध्यात्मे, 'य एषः' इत्यधिदैवे च तस्यैव प्रकृतत्वादित्यर्थः । (149) प्रकृतत्वात् लिङ्गग्रहे, जीवस्यापि पाणिपेषवाक्ये प्रकृतत्वात् स एव तत्पदेन गृह्यताम्, इति शङ्कते—**जीवेति** । (150) [1]मूर्तामूर्तरूपब्रह्मात्मना विवक्षितत्वात् जीवस्य न वासनारूपित्वम्, इति परिहरति—**नैवमिति** । तस्मात् अन्तःकरणमेव वासनारूपि, इत्याह—**करणेति** । (151) कर्तृत्वाद्यशेषवासनाश्रयसाक्षित्वादात्मनो न तद्रूपित्वम्, इत्याह—**वासनेति** । (152) [2]अत्रैव हेत्वन्तरमाह—**माहारजनमिति** । (153) [3]नायं जीवस्यादेशः, किन्तु तटस्थब्रह्मणः इत्य-

---

1 **मूर्तामूर्तरूपब्रह्मात्मना**—मूर्तामूर्ते यस्य रूपे उक्ते, तादृशब्रह्मात्मनेति यावत् ।

2 आत्मनः वासनारूपित्वाभावे एव ।

3 स्यादेशः इति 'नेति नेति' इत्यादेशः न जीवस्य, किन्तु तटस्थस्य-कस्य ब्रह्मणः इति भावः ।

अन्यस्यासौ न चादेशः शक्यो वक्तुं प्रमाणतः ।
नेति नेतीति तस्यैव षष्ठान्त उपसंहृतेः ॥ (154)

न्येव त्वेति प्रतिज्ञाया अर्थवत्त्वं तथा भवेत् ।
पाणिपेषोत्थितस्यैव यद्यादेशो भवेदयम् ॥ (155)

पाणिपेषोत्थितोऽन्यश्चेन्नेतीति च ततोऽपरः ।
अन्योऽसाविति मिथ्याधीः तदा स्यान्मोहकारणात् ॥ (156)

न स्यादात्मानमेवावेदहं ब्रह्मेति मानजा ।
सम्यग्धीर्निखिलध्वान्तघातिनी मुक्तिदायिनी ॥ (157)

* करणात्मन एवातः तस्य हेति ग्रहो भवेत् ।
न तु तत्साक्षिणो युक्तस्तस्य रूपनिषेधतः ॥ (158)

वासना भूरिरूपास्ता लिङ्गस्था लिङ्गसाक्षिणः ।
कुर्वन्ति बहुरूपत्वं मणेरास्तरणं यथा ॥ (159)

त्राह—**अन्यस्येति** । 'स एष नेति नेत्यात्मा' (बृ. 6 - 4 - 22) इति [1]षष्ठान्ते आत्मपदश्रुतेः [2]तस्यैवायमादेशो न तटस्थस्येत्यर्थः । (154) [3]अस्यादेशस्यात्मविषयत्वे हेत्वन्तरमाह—(न्योल)[न्येव]त्वेति । (155) जीवस्य ब्रह्मत्वेन प्रतिपादनमयुक्तं, प्रत्यग्ब्रह्मणोर्भेदात् , अत्राह—**पाणीति** । (156) जीवपरभेदे वाक्यान्तरविरोधमाह—**न स्यादिति** । (157) फलितमाह—**करणेति** । (158) कर्तृत्वादिवासनानां लिङ्गस्थत्वे कथं तत्साक्षिणि कर्तृत्वादिधीः, अत्राह—**वासना इति** । आस्तरणं—रक्तपटादिकम् । (159)

---

1. **षष्ठान्ते**—षष्ठाध्यायावसाने ।

2, **तस्यैव**—प्रत्यगात्मन एव ।

* **करणात्मन एवेति** जीवस्य ब्रह्माभिन्नत्वात् वासनारूपित्वायोगात् अन्तःकरणमेव (लिङ्गमेव) वासनारूपि 'तस्य' इति तत्पदेन गृह्यते इति भावः ।

3. **अस्यादेशस्य**—'तस्य हैतस्य' इत्यादिकण्डिकास्थस्य 'नेति नेति' इत्यादेशस्य ।

माहारजनमित्यत्र हारिद्रं रूपमुच्यते ।
इन्द्रगोपोपमानेन कौसुम्भस्य गतत्वतः ॥ (160)

पीतं वस्त्रं यथा तद्वल्लिङ्गमाभाति साक्षिणः ।
आ स्त्र्यादिविषयोद्भूतवासनावासितं दृशेः ॥ (161)

ईषत्पाण्डु यथोर्णादि तद्वल्लिङ्गं प्रकाशते ।
इन्द्रगोपोऽतिरक्तश्च भृशं रक्तं मनस्तथा ॥ (162)

रजसः क्वचिदुद्रेकः तमसः क्वचिदिष्यते ।
सत्वस्यापि तथोत्कर्षः कुतश्चिदुपजायते ॥ (163)

क्वचिदेकप्रधानत्वं कस्मिंश्चिद्विषये द्वयोः ।
त्रयाणामपि चान्यत्र ज्ञानकर्मादिचित्रतः ॥ (164)

अग्नेरर्चिर्यथा भास्वत् सत्वोत्कर्षात्तथा मनः ।
पुण्डरीकं यथा शुक्लं सौम्यमाह्लादकृत् तथा ॥ (165)

सकृद्विद्युद्यथात्यन्तं घनध्वान्तापनोदकृत् ।
* अतीव भास्वराऽस्माकं चक्षुर्मुट् सकृदुद्गता ॥ (166)

' माहारजनं वासः ' इत्यादिवाक्यार्थवर्णनम्

[1]श्रुतिस्थमाहारजनपदार्थमाह—माहारजनमिति । ' स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ' इति नामशासनात् कौसुम्भं माहारजनं किं न स्यात्, अत्राह—इन्द्रगोपेति । (160) वाक्ये विवक्षितमाह—पीतमिति । (161) ' यथा पाण्ड्वा(व)विकम् ' इत्यस्यार्थमाह—ईषदिति । आदिपदेन कम्बलादिसंग्रहः । ' यथेन्द्रगोपः ' इत्यस्यार्थमाह—इन्द्रेति । (162) वासनावैचित्र्ये को हेतुरिति चेत्, सत्वादिगुणवैचित्र्यम्, इत्याह—रजस इति । क्वचित्-गुणोद्रेकनिमित्ते सतीति । (163-164) ' यथाग्न्यर्चिः ' इत्यादेरर्थमाह—अग्नेरिति । (165-166)

---

1. श्रुतिस्थेति "तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासो, यथा पाण्ड्वाविकं, यथेन्द्रगोपो, यथाग्न्यर्चिः, यथा पुण्डरीकं, यथा सकृद्विद्युत् । सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति, य एवं वेद ।" इति श्रुतिरनुसन्धेया ।

* चक्षुर्मुडिति चक्षुषः अस्मदीयस्य तद्विषये प्रवृत्तिं मुष्णाति, प्रतिबध्नातीत्यर्थः ।

हिरण्यगर्भतत्त्वस्य जायमानस्य केशवात् ।
विद्युत्वत्प्रथते रूपं किल तस्य महात्मनः ॥ (167)

अतोऽनेनैव रूपेण य उपास्ते दिवानिशम् ।
सर्वान्धकारहन्त्रीव विद्युत्तं श्रीः सदाश्रयेत् ॥ (168)

नादिर्न मध्यं नैवान्तः नेयत्ता विद्यते यतः ।
अनन्तकल्पोपचयाद्वासनानामुदाहृतिः ॥ (169)

माहारजनमित्यादिः न त्वियत्ता विवक्षिता ।
प्रकारदर्शनायैव तेनोदाहृतिरिष्यते ॥ (170)

निःशेषमेवं सत्यस्य रूपं व्याख्याय सांप्रतम् ।
परमार्थसत्ययाथात्म्यनिर्देशाय प्रयत्यते ॥ (171)

अन्त्यवासनाविशिष्ट(स्या)[सू]त्रोपास्तिविध्यर्थं त(त्सप्त)[त्स्तुत]ये अन्त्यवासना हिरण्यगर्भ[स्य]परमेश्वरादुत्पद्यमानस्य भवति, इत्याह—**हिरण्यगर्भेति** । (167) 'सकृत्' इत्या[1]दिफलवाक्यार्थमाह—**अत इति** । (168) 'यथा माहारजनम्' इत्यादौ [2]दृष्टान्तषट्कोक्तेः वासना अपि [3]तावत्यः, इत्याशङ्क्याह—**नादिरिति** । उपलक्षणमात्रमुदाहरणम्, इत्याह—**उदाहृतिरिति** । तदेव स्पष्टयति—**प्रकारेति** । (169-170)

'अथात आदेशः नेति नेति' इत्यादेरर्थनिरूपणम्

'यो ह वै शिशुम्' इत्यारभ्य 'सत्यस्य' इति षष्ठ्यन्तं सत्यं व्याख्यातम् ।

---

1. **सकृदित्यादिफलवाक्येति** 'सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति, य एवं वेद ।' इति वाक्येत्यर्थः ।
2. **दृष्टान्तषट्कोक्तेरिति** (१) माहारजनं वासः, (२) पाण्ड्वाविकं, (३) इन्द्रगोपः, (४) अग्न्यर्चिः, (५) पुण्डरीकं, (६) सकृद्विद्युत् इति दृष्टान्तषट्कमुक्तं बोध्यम् ।
3. **तावत्यः—षडेव** ।

यतो व्याख्यातमखिलं मूर्तामूर्तादिवस्तवतः ।
* आदेशोऽनन्तरं तस्य क्रियतेऽनन्यमानिनः ॥ (172)

मूर्तामूर्तस्वभावस्य सत्यस्याविष्कृतेरथ ।
ब्रह्मातिरेकतो नान्यद्यतो वस्त्ववशिष्यते ॥ (173)

* आदेशो ब्रह्मणोऽतोऽयं निरादेशस्य भण्यते ।
अतिमानाभिधानस्य प्रत्यङ्मात्राद्वयात्मनः ॥ (174)

कर्मण्यादेशशब्दोऽयं यदि वा करणे भवेत् ।
आदिष्टिरथवाऽऽदेशः नेति नेत्यद्वयात्मनः ॥ (175)

नेति नेतीति शब्दाभ्यां सत्यस्य ब्रह्मणः कथम् ।
प्रमाणगोचरातीतं तत्त्वं स्यान्निर्दिदिक्षितम् ॥ (176)

---

[1]प्रथमान्तसत्यव्याख्यानाय, '[2]अथातः' इत्यादिवाक्यम्, इत्याह—**निःशेषेति** । (171) अथातःशब्दार्थमाह—**यत इति** । (172) मूर्ता(ति)[दि]व्याख्यानन्तरं वस्त्वन्तरं किञ्चित् कस्मात् न व्याक्रियते, तत्राह—**मूर्तेति** । (173—174) आदेशशब्दस्य त्रिधा व्युत्पत्तिमाह—**कर्मणीति** । आदिश्यते इत्यादेशो ब्रह्म । आदिश्य(तने)[तेऽनेने]त्यादेशोऽत्र नेतीति पदद्वयम् । आदिष्टिरादेशः–ज्ञानमित्यर्थः । (175) (मच्छ)[नञ्श]ब्दस्य कथं [3]तद्धीसाधनत्वमत[4]द्वाचकत्वात्, इति शङ्कते—**नेतीति** । (176) अध्यस्ताविद्यातत्कार्यनिषेधद्वारा लक्षणया

---

1. **प्रथमान्तसत्यव्याख्यानाय**—तादृशसत्यपदव्याख्यानाय ।
2. **अथातः इत्यादिवाक्यमिति** "अथात आदेशः नेति नेति, नह्येतस्मादिति नेत्यन्यत्परमस्ति ।" इति वाक्यमित्यर्थः ।
* **अनन्यमानिन इति** आदेशान्यमानरहितस्येत्यर्थः ।
* **निरादेशस्य**—आदेशान्तररहितस्य ।
3. **तद्धीसाधनत्वं**—ब्रह्मधीसाधनत्वम् ।
4. **अतद्वाचकत्वात्**—ब्रह्मवाचकत्वाभावात् ।

शृणु सर्वं तदज्ञानसमुत्थस्य निषेधतः ।
प्रत्यङ्मात्रैकरूपेण तद्बोधनिराकृतेः ॥ (177)

अमूर्तस्य परा निष्ठा कारणात्मा पुरोदितः ।
मूर्तस्य च तथा पृथ्वी मध्ये संकीर्णता तयोः ॥ (178)

* मानाभिधानयोर्यावान् कश्चिद्विषय इष्यते ।
उक्तयोर्मध्यवर्त्यत्र कार्यकारणयोरसौ ॥ (179)

नामरूपे तथा कर्म प्राणा लोकादयस्तथा ।
कारकं वा क्रियाऽन्यद्वा कारणं कार्यमेव च ॥ (180)

जातिर्गुणः क्रिया द्रव्यं संबन्धो भाव एव च ।
सदसत्सदसच्चेति समस्तव्यस्तमेव च ॥ (181)

अधिष्ठानधीहेतुत्वात्, इति परिहरति—(ष)[शृ]णित्रति । तर्हि निषेधेन सद्वितीयता स्यात्, अत्राह—प्रत्यगिति । तत्कार्यस्यापीति शेषः । (177) किं तदज्ञानं तत्कार्यं चेति, तदाह—अमूर्तस्येति । [1]मूलकारणमन्त्यकार्यं तन्मध्यवर्ति च सर्वं निषे(धा)[ध्य]मित्यर्थः । (178) तत्र हेतुमाह—मानेति । (179)

[2]उक्तत्रयातिरेकेण वस्तुनोऽनवशेषं दर्शयितुं, मध्यवर्ति सर्वं विशेषतो निर्दिशति—नामेति । ब्रह्म ज्ञापयितुमुपक्रान्तम् । तन्निषेधमात्रं क्रियते । अतः प्रतिज्ञाहानिः, अत्राह—इत्यादेरिति । सर्वस्यास्य [3]निषेधो नकारः(ण)तेन

---

1. **मूलकारणं**—अव्याकृतम् । अन्त्यकार्यं—पृथिवी । **तयोर्मध्यवर्ति**—जलादिकम् । एतत्सर्वं मर्तृप्रपञ्चोक्तमनुसृत्योच्यते । तद्विषये तदुक्तेरादेयताया: प्रागभिधानादिति बोध्यम् ।

* "तथापि कार्यकारणातिरिक्तेनानिषेध्येन केन चिदात्मनः सद्वितीयत्वमाशङ्क्य, तत् किं वाङ्मनसातीतं न वा इति विकल्प्य, आद्ये तस्य आत्मानतिरेकं मन्वानः, द्वितीयं दूषयति—**मानेति** ।" इति **शास्त्रप्रकाशिका** ।

2. **उक्तत्रयातिरेकेण**—मूलकारणं, अन्त्यकार्यं, मध्यवर्ति, इत्येतत्त्रयातिरेकेण । निषेधमात्रमित्यत्र मात्रपदेन ब्रह्मबोधनस्य व्यवच्छेदः ।

3. **निषेधो नकारः**—निषेधबोधको नकारः ।

प्रमाता च प्रमाणं च प्रमेयोऽथ क्रियाफले ।
इत्यादेः प्रतिषेधेन प्रत्यङ्मात्रावलम्बिना ॥ (182)

* उपप्रदर्शकोऽशेषनामादेरितिरिष्यते ।
तस्योपदर्शितस्याथ निषेधः क्रियते नञा ॥ (183)

आकृष्टं रूपिणो रूपं न पृथग्व्यवतिष्ठते ।
जगत्यकल्पितमपि किमु मोहादिकल्पितम् ॥ (184)

घटे पटो निषिद्धोऽपि घटादन्यत्र तिष्ठति ।
तदन्यत्रापि सद्भावादनिषिद्धस्य धर्मिणः ॥ (185)

परमार्थान्निषिद्धस्य तन्मोहोत्थस्य वस्तुनः ।
हिरुक् स्थितिः कथं तस्य परमार्थात्मनाऽथवा ॥ (186)

निषेध्यानामशेषाणामन्योन्यव्यभिचारतः ।
प्रतीचोऽव्यभिचारोऽतः तत्राध्यस्तं निषिध्यते ॥ (187)

प्रत्यङ्मात्रविषयेण ब्रह्मतत्त्वं गम्यते इत्यर्थः । (180-181-182) निषेध्यप्रापका-भावात् अप्राप्तनिषेधो न युक्तः, अत्राह—उपप्रदर्शक इति । (183) ब्रह्मणि नामादेः प्रतिषेधात् अन्यत्र [1]तदवस्थितेः अद्वैतविरोधः, अत्राह—आकृ(ष्य) [ष्टं]मिति । (184) घटे प्रतिषिद्धस्य पटस्य [2]घटधर्मिणोऽन्यत्रावस्थानं दृष्टम् । एवमिहापीति, तत्राह—घट इति । स्वरूपेणानिषेधादित्यर्थः । (185) प्रकृते वैपरीत्यमाह—परमार्थादिति । (186) [3]मोहोत्थत्वं नामादीनामसिद्धम्, अत्राह —निषेध्यानामिति । (187) प्रतीच्यध्यस्तनिषेधेऽपि न ब्रह्मसिद्धिः [4]तदर्पक-

---

* उपप्रदर्शक इति इतिः—इतिशब्दः अशेषनामादेः निषेध्यजातस्य समर्पकः इत्यर्थः ।

1. तदवस्थितेः—नामाद्यवस्थितेः ।
2. घटधर्मिणोऽन्यत्र—तन्तौ ।
3. मोहोत्थत्वं—अज्ञानकार्यत्वम् ।
4. तदर्पकपदाभावात्—ब्रह्मबोधकपदाभावात् ।

इतिशब्दोपदिष्टानां निषेधोऽनुभवात्मनि ।
अनन्तेऽन्तवतां यत्र तद्ब्रह्मेत्यवसीयताम् ॥ (188)

सद्भावश्चोपलब्धिश्च स्वार्थप्रत्यक्चिदाश्रयात् ।
* मूर्तादीनामनिर्देश्यादितिर्मत्तो निवर्तते ॥ (189)

निषेधति निषेध्यार्थं यद्बलान्नञ् चिदात्मनः ।
विज्ञानेनैव हत्वान्यत्पूर्णत्वेनैति चित् स्वतः ॥ (190)

प्रत्यञ्चात्तद्दृशि ह्यस्मिन् जाग्रत्स्वप्नसुषुप्तिषु ।
तदन्यद्यत्तदाभासं तन्नञा प्रतिषिध्यते ॥ (191)

अविचारितसंसिद्धिप्रत्यञ्चोऽहहतौ सदा ।
* विस्फारिताक्षः प्रत्यग्धीर्मानान्निर्वात्यथात्मनि ॥ (192)

पदाभावात्, अतो निषेधवैयर्थ्यम्, अत्राह—**इतिशब्देति** । (188) इतिशब्द-समर्पितनिषे(ध्ये)[धे] शून्यता स्यात्, ब्रह्मणोऽपि प्रसिद्धत्वेन इतिशब्दसमर्प्य-त्वात्, अत्राह—**सदिति** । मूर्तादेः सत्ताप्रतीतिप्रदं स्वप्रकाशं प्रत्यञ्चं, इतिशब्दो [न वदतीति] न तस्य निषेधः इत्यर्थः । (189) नञः यस्य चिदात्मनः सामर्थ्यात् सर्वनिषेधकर्तृत्वं, तस्य कथं प्रतिषेधः, इत्याह—**निषेधतीति** । आत्मबलात् न(त्रो)[ञो] द्वैतनिषेधित्वे, नञात्मनोः सदा भावात् न कदाचिदपि द्वैतं भायात्, इत्याशङ्क्य, चिदात्मा स्वाकारविज्ञानेन वाक्योत्थेन सर्वमुप-मृ(ज्य)[द्य] स्वयमेवावशिष्यते, इत्याह—**विज्ञानेनेति** । (190) चिदात्मनो (न)ऽन्य[त्] प्रतिषेध्यमित्युक्तम् । किं तदिति, तदाह—**प्रत्यगिति** । (191) निषेधफलमाह—**अविचारितेति** । निर्वाति–ली[1]यते इत्यर्थः । (192)

---

* **इतिर्मत्तो निवर्तते इति** 'नेति' इत्यत्र इतिशब्दः मत्तः—मत्स्वरूपात् प्रतीचः (वार्तिककारस्यानुभवोक्तिरियम्) सकाशात् निवर्तते—प्रत्यक्स्वरूपं न बोधयतीति यावत् ।

* **विस्फारिताक्षः**—विकसितचेताः **प्रत्यग्धीः**—प्रतीचि धीः यस्येति व्युत्पत्त्या, वाक्यात् प्रतीचि लब्धबुद्धिरित्यर्थः ।

1. **लीयते इति** स्वमहिम्नि तिष्ठतीत्यर्थः ।

अपेक्षाज्ञानहेतूत्थं कार्यकारणवस्त्वतः ।
विचार्यमाणं तन्नास्ति व्योम्नि कार्ष्ण्यमिवात्मनि ॥ (193)

* शब्दप्रवृत्तिहेतूनां प्रत्यगात्मन्यसंभवात् ।
प्रमाणगोचराणां च स्वतःसिद्धेः न निह्नुतिः ॥ (194)

* मानाभिधानविषयो यावन्नात्मानमात्मना ।
लभते प्रत्यगात्मार्थं न नञ् तावन्निवर्तते ॥ (195)

कार्यकारणप्रपञ्चस्य परमार्थत्वान्निषेधासिद्धिः, अत्राह—अपेक्षेति । कारणापेक्षया कार्यापेक्षया च ज्ञानम् । [1]तेन हेतुनोत्थमिति यावत् । (193) विधिमुखं हित्वा निषेधमुखेन कुतः तदुपदेशः, अत्राह—शब्देति । प्रमेयत्वात् शब्दप्रवृत्ति-निमित्तवत्त्वम्, अत्राह—प्रमाणे(ने)ति । नास्त्येव तत्त्वात्मा, तत्राह—स्वत इति । (194) नेति नेतीति निषेधद्वयं वीप्सा । तदपेक्षाहेतुमाह—मानेति । अयमात्मा मानाभिधानविषयः—अविद्यावस्थायां शब्देतरविषयः, सर्वविशेषापोहेन यावत् स्वरूपावस्थानं न लभते, तावत् प्रतिषेधो न निवर्तते । तदर्थं वीप्सेत्यर्थः ।

---

1. तेन हेतुनोत्थमिति अन्योन्याश्रयदोषात् कार्यकारणभावः कल्पितः न परमार्थ इति भावः ।

* "जगतो व्योमकार्ष्ण्यवत् मोहोत्थत्वात् निषेध्यत्वेऽपि न तन्निषेधेनात्मा प्रतिपाद-यितुं पार्यते । न हि कार्ष्ण्यनिषेधेन प्रतिपाद्यते व्योम, इत्याशङ्क्याह—शब्देति । असङ्गे प्रतीचि कूटस्थे अद्वये षष्ठ्याद्ययोगात् न विधिमुखप्रतिपादनम्, तन्निषेध-द्वारं तदित्यर्थः । यत्तु व्योमवदस्य निषेधद्वारा न प्रतिपादनमिति, तत्राह—प्रमाणेति । तत् खलु अनुमानादिगोचरत्वात् न निषेधद्वारा प्रतिपाद्यते । प्रत्यगात्मा तु शब्दादिहीनः मानान्तराविषयः । न चागमोऽपि तस्मिन् विधिद्वारा क्रमते । तन्निषेधद्वारं तत्प्रतिपादनमित्यर्थः ।" इति शास्त्रप्रकाशिका ।

* 'मानाभिधानविषयो यावन्नात्मानमात्मनि ।
लभते प्रत्यगात्मानं न नञ् तावन्निवर्तते ॥' इति. मु. पु. पाठः ।
"अन्यानपेक्षसत्तास्फूर्तित्वात् प्रतीचः न नास्तिता, इत्येतदेव स्फुटयति—मानेति । अयं हि व्यवहारे सोपाधिः शब्देतरमानविषयः । स पुनः सर्वविशेषा-पोहेन परमार्थस्वरूपेण यावदवस्थानं न लभते तावदुपाधिविषयो निषेधो न निर्वर्तेतीत्यर्थः ।" इति शास्त्रप्रकाशिका ।

निरस्ताज्ञानतत्कार्ये लब्ध आत्मन्यथात्मना ।
निषेध्यहेतौ प्रध्वस्ते निषेधोऽपि निवर्तते ॥ (196)

प्रमातृत्वादिना यावत्किञ्चिदत्र विवक्षितम् ।
तदभावश्च तत्सर्वं नेतीति प्रतिषिध्यते ॥ (197)

* निषेध्यं सर्वमेवैतदनिषेध्यात्मवस्तुगम् ।
अतो नाभावनिष्ठः स्यादभावस्यापि निह्नवात् ॥ (198)

नेति नेतीत्यतो वीप्सा जिघृक्षितनिषेधतः ।
बुभुत्सितस्य कृत्स्नस्य वीप्सयातो निषेधनी ॥ (199)

ज्ञानक्रियाभ्यां व्याप्योऽयमित्याकांक्षा निवर्तते ।
अप्रमित्सित एकस्मिन्निष्ठां यात्यचिकीर्षिते ॥ (200)

रज्जुयाथात्म्यविज्ञानात् सर्पवत्कारणात्मनः ।
निषेधो नान्यतः शक्यः कर्तुं वर्षशतैरपि ॥ (201)

---

(195) निषेधस्य निषेधान्तराभावादवस्थितेरद्वैतविरोधः, अत्राह—**निरस्तेति** । (196) निषेधप्रमाश्रयस्य प्रमातुरनिषेधा(त)[द]द्वैत[1]विरोधतादवस्थ्यम्, अत्राह—**प्रमातृत्वेति** । (197) निषेधस्याभावपर्यवसानादभावस्थितेरद्वैतहानिः, अत्राह—**निषेध्यमिति** । (198) अतो भावाभावनिषेधार्थं वीप्सा, इत्याह—**नेतीति** । आकाङ्क्षानिवृत्तेश्चैवम्, इत्याह—**जिघृ(क्षे)[क्षिते]ति** । तत् व्यनक्ति—**बुभित्सितस्येति** । (199) वीप्सामात्रेण कथमाकाङ्क्षानिवृत्तिः, अत्राह—**ज्ञानेति** । (य)ज्ञानेनायमाप्यः अयं क्रियया इत्याकाङ्क्षोपरमे वीप्साश्रयक्रिया-ज्ञानयोरविषये ब्रह्मणि विद्वान् निष्ठां—ऐक्यं गच्छतीत्यर्थः । (200) स्थूलाद्यभावज्ञानात् सहेतुद्वैतध्वंसात् ब्रह्मनिष्ठानर्थक्यम्, इत्याशङ्क्य, अधिष्ठानतत्त्वधीरेव बाधिका इत्यत्र दृष्टान्तमाह—**रज्ज्वेति** । (201) वीप्सायाः

---

1. **अद्वैतविरोधतादवस्थ्यमिति** प्रमात्रा द्वितीयेनेत्यादिः ।

* "निषेधस्यापि निषेधे कथं नानवस्था, इत्याशङ्क्याह—**निषेध्यमिति** । एतेन अभावनिष्ठतापि निषेधस्यापास्ता, इत्याह—अत इति । **स्यात्** निषेध इति शेषः ।" **इति शास्त्रप्रकाशिका** ।

यद्यत्प्राप्तं जगत्यस्मिन् तत्तत्सर्वं निषिध्यते ।
एवं च सत्यनिर्दिष्टाशङ्कापि विनिवर्तते ॥ (202)

न चेद्वीप्सा तदा वाक्यद्वयमेतद्विवक्षितम् ।
उक्तद्वयनिषेधेन तस्य चोपक्षयाद्भवेत् ॥ (203)

अनुक्तविषयाशङ्का सर्वस्याप्रतिषेधतः ।
यदि वाऽभावविषया न ह्यभावो निषिध्यते ॥ (204)

साक्षान्मानप्रसिद्धेषु प्रतिषिद्धेतरग्रहः ।
अप्रसिद्धे प्रसिद्धानां निषेधाच्छून्यताग्रहः ॥ (205)

आदेश इत्युपक्रम्य प्रतिषेधोऽयमुच्यते ।
साक्षादादिश्यते येन तादृगादेश उच्यते ॥ (206)

निषेधवर्त्मना तस्मादनिषेध्यात्मसाक्षिणा ।
ज्ञाताज्ञातं निषिध्याथ सदा द्रष्टौ प्रतिष्ठति ॥ (207)

फलान्तरमाह—**यद्यदिति** । (202) वीप्सानङ्गीकारे दोषमाह—**न चेदिति** । मूर्तामूर्तनिषेधेन वाक्योपक्षयात् निखिलव्यपदेश्यस्यानिषेधात् किञ्चिदनुक्तं व्यपदेश्यमेव ब्रह्म इति शङ्का स्यादित्यर्थः । शून्यनिष्ठं वाक्यं स्यात्, इत्याह—**यदीति** । (203-204) [1]तत् साधयति—**साक्षादिति** । प्रमिते भूतलादौ प्रमितघटादिप्रतिषेधे, प्रतिषिद्धेतरयोः धर्मिप्रतियोगिनोः स्वरूपेण ग्रहः । अप्रमिते ब्रह्मणि तादृक्जगत्प्रतिषेधे शून्यनिष्ठत्वं, ब्रह्मणि मानाभावात् [2]अन्यस्य माविषयस्य निषेधादित्यर्थः । (205) अस्तु शून्यनिष्ठत्वम्, अत्राह—**आदेश इति** । ब्रह्मण आदेशः इत्युक्त्वा उच्यमाननिषेधोऽयं त(च)त्प्रतिपादकादेश एवेत्यर्थः । (206) वाक्यस्य ब्रह्मपरत्वे फलितमाह—**निषेधेति** । साक्षिणा रूपेणेति शेषः । (207)

---

1. **तत् साधयति**—वाक्यस्य शून्यनिष्ठत्वं साधयति ।
2. **अन्यस्येति** आत्मनोऽन्यस्येत्यर्थः ।

यथा श्रोत्रधिया रूपं रूपहेत्वसमन्वयात् ।
नाग्रहीन्न च गृह्णाति न ग्रहीष्यति शब्दवत् ॥ (208)

प्रत्यक्तत्त्वे विनिर्ज्ञाते नेति नेतीति वाक्यतः ।
तद्वत्सकारणोऽनात्मा नाभूदस्ति भविष्यति ॥ (209)

नान्यदज्ञानतोऽस्तित्वं द्वितीयस्यात्मनो यथा ।
निवृत्तिस्तद्वदेवास्य नावगत्यात्मनोऽपरा ॥ (210)

अनन्यायत्तमैकात्म्यं यदा साक्षाद्व्यवस्थितम् ।
व्येव त्वेति प्रतिज्ञेयं तदा स्यात्सफलोदिता ॥ (211)

नेति नेतीत्यतो वीप्सासंभवादुक्तवस्तुनः ।
कृतार्थता तथा च स्यादन्यथा नोपपद्यते ॥ (212)

परागर्थेषु सक्ता धीः प्रत्यगर्थानुरञ्जनात् ।
निषिद्धाऽतः परागर्थात्प्रतीचि लभते स्थितिम् ॥ (213)

* व्यतिरेकस्य संसिद्धेरादेशोक्तेः पुरैव हि ।
साक्षाद् ब्रह्मत्वसिद्ध्यर्थमादेशोऽयमथोच्यते ॥ (214)

सकृन्निषिद्धमपि पुनरुद्भवेत् रज्जु(द्रवीकर)[सर्प]वत्, अत्राह—**यथेति**। रूपेण च हेतोः—श्रोत्रस्यासमन्वयादित्यर्थः। (208-209) सकारणस्य जगतो निवृत्तिरन्येति, प्रसङ्गादाशङ्क्य, आह—**नान्यदिति**। (210) वीप्साश्रयणे हेत्वन्तरमाह—**अनन्येति**। (211) उपसंहरति—**नेतीति**। प्रतिज्ञा(ता)[र्थे]वत्त्वादेरुक्तवस्तुनः सिद्धिरेव मा भूत्, अत्राह—**कृतार्थतेति**। (212) निषेधे फलमुपसंहरति—**परागिति**। (213)

वार्त्तिकमतेन नेतीत्यस्य विधिमुखेन बोधकत्वनिरूपणम्

एवं भा(व्य)[ष्य]कारमतमुपपाद्य, 'नेति' इत्यस्य वि(श्व)[1][धि]मुखेन

---

1. **विधिमुखेन बोधकत्वं**—प्रतीचः ब्रह्मताबोधकत्वमिति यावत्।

* 'व्यतिरेकस्य सिद्धत्वात्' इति मु. पु. पाठः।

न निषेधो निषेध्यार्थो लक्षणार्थपरत्वतः ।
ब्रह्मणो मान्तरासिद्धेः शून्यतैव प्रसज्यते ॥ (215)

षष्ठ्युक्तेरेव संसिद्धा मूर्तादेर्ब्रह्मणोऽन्यता ।
ततश्च जामितासक्तिर्नातः स्यात्पारिशेष्यगीः ॥ (216)

शक्यते न निषेद्धुं च प्रत्यक्षाद्याश्रितत्वतः ।
निषेधान्न पुमर्थोऽपि कश्चित्सिध्येत्समीहितः ॥ (217)

निषेधमात्रनिष्ठत्वे न चादेशो भवेत्प्रभोः ।
ब्रह्म मूर्तादि नेत्युक्तौ मूर्तादेर्न निषेधगीः ॥ (218)

बोधकत्वमर्थान्तरमाह—**व्यतिरेकस्येति** । [1]आदेशोक्तेः पुरैव ब्रह्मणो मूर्तादिव्यतिरेकसिद्धेरित्यर्थः । किमर्थोऽयमादेशः, अत्राह—**साक्षादिति** । आत्मनो ब्रह्मत्वबोधायेत्यर्थः । (214) मूर्तादिप्रपञ्चनिषेधमात्रार्थोऽयमादेशः किं न स्यात्, अत आह—**न निषेध इति** । लक्षणया त्वमर्थप्रतिपादकत्वादित्यर्थः । निषेधपरत्वे दोषमाह—**ब्रह्मण इति** । (215) 'व्यतिरेकस्य संसिद्धेः' (वा. 214) इत्युक्तम् । [2]न सिद्धिः, अत्राह—**षष्ठीति** । 'द्वे वा[व]ब्रह्मणः' इति [3]षष्ठ्युक्तेरित्यर्थः । यत्तु पारिशेष्यात् तद्व्यतिरेकार्थतेति, तत्राह—**नेति** । (पूर्वा)[मूर्ता]देः ब्रह्मतादात्म्यविशेषनिषेधात् मूर्तादिव्यतिरिक्तब्रह्मसिद्धिः इत्युक्तम् । षष्ठ्यैव तु सिद्धौ पारिशेष्यानवकाशादित्यर्थः । (216) निषेधपरत्वे दोषान्तरमाह—**शक्यत इति** । मान्तरसिद्धस्य निषेधायोगात् व्यतिरेकपरत्वस्य निरस्तत्वात् ब्रह्मत्वसिद्ध्यर्थमादेश इत्यर्थः । (217) परिगणितमूर्तादिनिषेधनिष्ठत्वे ब्रह्मोपदेशो न स्यात्, इत्याह—**निषेधेति** । व्यतिरेकपक्षेऽपि न तन्मात्रपरं वाक्यं, विवक्षितब्रह्मासिद्धेः,

---

1. **आदेशोक्तेः पुरैवेति** 'नेति नेति' इत्यादेशात् पूर्वं 'द्वे वाव ब्रह्मणो रूपे' इत्यत एवेत्यर्थः ।

2. **न सिद्धिः, अत्राहेति** नेतीत्यादेशात् पूर्वं मूर्तामूर्तव्यतिरेकस्य सिद्धिः न जाता इत्याशङ्कायामाहेत्यर्थः ।

3. **षष्ठ्युक्तेरिति** षष्ठ्यर्थस्य संबन्धस्य भेदव्याप्तत्वादिति भावः ।

ततश्च ब्रह्मताऽसिद्धिर्द्वितीये सति वस्तुनि ।
न्ये व त्वेति प्रतिज्ञार्थो नापि चाविष्कृतो भवेत् ॥ (219)

पारिशेष्यादतोऽसिद्धिः स्याद्विवक्षितवस्तुनः ।
यथा सिद्धिस्तथा व्याख्या कार्येहोक्तेरतोऽञ्जसा ॥ (220)

सिद्धो निषेधः प्रागेव सर्वस्यानात्मवस्तुनः ।
प्रत्यग्याथात्म्यविज्ञानादन्योन्यव्यभिचारतः ॥ (221)

अन्योन्यव्यभिचारोऽस्य वीक्ष्यतेऽनात्मवस्तुनः ।
स्वरूपव्यभिचारोऽपि सुषुप्तादौ स्वसाक्षिगः ॥ (222)

यथा मात्रादिसत्त्वेयं प्रत्यक्संवित्तिसिद्धिका ।
प्रमात्रादेरभावोऽपि प्रत्यग्बोधाश्रयात्तथा ॥ (223)

इत्याह—**ब्रह्मेति** (218) [1]पक्षद्वयसाधारणं दोषमाह—**ततश्चेति** । पारिशेष्यं [2]प्रागेव निराकृतम् । इदानीं यथा इष्टब्रह्मसिद्धिः, तथा '**नेति**' इति वाक्यं व्याख्येयम्, इत्याह—**यथेति** । (219-220) व्याख्याप्रकारं वक्तुं 'अ(र्थांतर) [थातः ']' इत्यादेः प्रागेव निषेधव्यतिरेकयोः [सिद्धिमाह]—**सिद्ध इति** । याथात्म्यविज्ञानात्—तदुपदेशादिति यावत् । (221) [3]व्यतिरेकहेतुमाह—**अन्योन्येति** । निषेधहेतुमाह—**स्वरूपेति** । (222) [4]वाक्यार्थं वक्तुं नञर्थेन[5] प्रतीचो लक्षणार्थं तयोः साक्षिसाक्ष्यत्वसंबन्धं दृष्टान्तेनाह—**यथेति** । (223)

---

1. **पक्षद्वयसाधारणमिति** मूर्तादिप्रपञ्चनिषेधमात्रपरत्वमादेशस्येति, पारिशेष्यात् मूर्तादिव्यतिरिक्तब्रह्मसिद्धिः इति च पक्षद्वयसाधारणमित्यर्थः ।
2. **प्रागेव निराकृतमिति** 'षष्ठ्यैव तु सिद्धौ पारिशेष्यानवकाशात्' इति ग्रन्थेनेत्यादिः ।
3. **व्यतिरेकहेतु**—अनात्मव्यतिरेकहेतुम् । एवमुत्तरत्रापि ।
4. **वाक्यार्थं**—नेतीति वाक्यस्यार्थम् ।
5. **नञर्थेन प्रतीचो लक्षणार्थमिति** नञः प्रतीचि लक्षणा स्वीक्रियते । तत्र पदार्थेन(शक्येन)तीरादिः लक्ष्यते इति पदार्थवृत्तिः लक्षणा । सा च पदे आरोप्यते इति मताभिप्रायेण अत्र नञर्थेन प्रतीचो लक्षणार्थमित्यभिधानं बोध्यम् । नञ्शक्यार्थः अभावः । तेन साक्षित्वसंबन्धवान् त्वमर्थो लक्ष्यते इति भावः ।

* अविचारितसंसिद्धिरात्माविद्यैकरूपतः ।
सिद्ध्यतेऽखिलोऽनात्मा स्वतःसिद्धात्मसंश्रयात् ॥ (224)

अतिरोहितसंवित्को व्यपास्ताशेषविक्रियः ।
अनन्यमातृमानादिः दृष्टिमात्रात्मकत्वतः ॥ (225)

भावाभावात्मिका सिद्धिर्येयं सर्वाप्यनात्मनः ।
तद्विरुद्धात्मकान्मत्तो मय्येवासौ प्रसिद्ध्यति ॥ (226)

अनन्यानुभवेनैव भावाभावात्मभूमिषु ।
प्रत्यक्कूटस्थ आत्मानं पश्यन्नास्ते फलात्मना ॥ (227)

अतो मात्रादिसंभेदो यत्र यत्र निवर्तते ।
तत्र तत्रैकलः प्रत्यक् स्वमहिम्नैव सिद्ध्यति ॥ (228)

प्रमात्रादेरभावोऽतः यः सिद्धः स्वात्मबोधतः ।
* नञ्वृत्तिस्तं सदाबुद्धं लक्षयत्यपृथक्प्रभम् ॥ (229)

अनात्मसाधकत्वे स्यादात्मनो विकारिता, अत्राह—**अविचारितेति** । (224) आत्मनः स्वतः सिद्धत्वं साधयति—**अतिरोहितेति** । (225) आत्मनोऽपि वस्तुत्वात् भावाभावात्मकस्य कथं [1]तत्साधकता, अत्राह—**भावेति** । (226) [2]सः साधकान्तराधीनसिद्धिः साधकत्वात् दीपवत् इत्यनवस्था, इत्यत्राह—**अनन्येति** । (227) आत्मसिद्धौ मात्राद्यपेक्षा नास्तीति फलितमाह—**अत इति** । (228) इदानीं नञर्थस्य [3]त्वमर्थस्य लक्षणत्वमाह—**प्रमात्रादेरिति**। नञः वृत्तिः यस्मिन्निति [4]नञ्वृत्तिरभावः । स्वसाधकमनुभवं **लक्षयति** इत्यतो

---

* "भावाभावरूपः अनात्मा अनुभवसिद्धश्चेत्, तद्वत् तस्य सत्यता इत्याशङ्क्याह—**अविचारितेति**।" इति **शास्त्रप्रकाशिका** ।

1. **तत्साधकता**—भावाभावसाधकता ।
2. **सः**—आत्मा ।
3. त्वमर्थस्य लक्षणत्वं—त्वंपदार्थलक्षकत्वम् ।
4. **नञ्वृत्तिरिति** नञर्थ इत्यर्थः ।

* **अपृथक्प्रभम्**—अनन्यप्रकाशं—स्वप्रकाशमिति यावत्

वैविक्त्यान्न च मानादेरनन्यानुभवात्मनि ।
सहेतुकस्य वृत्तिः स्यान्नित्यबोधावबोधिनि ॥ (230)

अविद्याव्यतिरेकेण कारणादिविधर्मकम् ।
लब्धमात्मात्मकं वस्तु प्रतीचोऽनन्यमानतः ॥ (231)

एतद्वस्तु स्वतः सिद्धं प्रमात्राद्यनपेक्षतः ।
सर्वस्यैव ततः सिद्धेः कथं सिध्येत्तदन्यतः ॥ (232)

उक्ता प्रमेयसंसिद्धिः स्वमहिम्नैव नञ्श्रुतेः ।
तस्य ब्रह्मत्वबोधाय नेति ब्रह्मेतिनोच्यते ॥ (233)

आत्मप्रत्ययमामेयो लक्षितो यो नञाऽञ्जसा ।
अविद्यादेस्तदात्मत्वादिति ब्रह्मेति बोध्यते ॥ (234)

'(ते)[ने]ति' इत्यत्र नञ्पदं त्वमर्थबोधकमित्यर्थः । (229) [1]साक्षादेव श(ब्द)[ब्द]बोध्यत्वं किं न स्यात्, अत्राह--**वैविक्त्यादिति** । जडाजडयोरत्यन्तविविक्तत्वात् न मानादेरात्मनि बोधकत्वेनानुवृत्तिरित्यर्थः । (230) वैविक्त्यादिति हेत्वसिद्धिं परिहरति—**अविद्येति** । (231) अनन्यमानत्वं कुतः, अत्राह—**एतदिति** । (232) उक्तमनुवदति—**उक्तेति** । नञ्पदस्य प्रमेयसिद्धिः स्वमहिम्नैव स्वतः प्रत्यगात्मा नञर्थ इत्युक्तमित्यर्थः । इतिशब्दस्य 'नेति' इति सामानाधिकरण्यस्य च तात्पर्यमाह—**तस्येति** । [2]इतिशब्दः तदर्थपरः । तेन तस्य नञर्थस्य साक्षिणो ब्रह्मत्वज्ञानाय 'नेति' त्वं ब्रह्मेति [3]समानाधिकृतं वाक्यं (नोच्यते) मा(नु)[न]मुच्यते इत्यर्थः । (233) जीवस्य परिच्छिन्नत्वात् कथं ब्रह्मत्वबोधः, अत्राह—**आत्मेति** । (234) अविद्यादेः

---

1. **साक्षादेव शब्दबोध्यत्वमिति** अनुभवस्येत्यादिः ।
2. **इतिशब्दः तदर्थपर इति** 'नेति' इत्यत्र इतिशब्दः महावाक्यघटकतत्पदार्थतात्पर्यक इत्यर्थः । तथा च मूर्तत्वादिविशिष्टे विशेषणं परित्यज्य विशेष्यांशमात्रं इतिना बोध्यते । नञर्थः-त्वंपदार्थः । न-त्वं, इति—ब्रह्म इति आत्मनो ब्रह्मत्वबोधकं नेतीति वाक्यमिति फलितार्थः ।
3. **समानाधिकृतं वाक्यम्**—पदार्थयोरभेदावगाहिबोधजनकं वाक्यम् ।

प्रत्यङ्मोहतदुत्थस्य प्रत्यग्याथात्म्यबोधतः ।
बाधितत्वादतोऽवोचदिति ब्रह्मेति मोहनुत् ॥ (235)

आदेशं प्रत्यतिमहानथात इति संभ्रमः ।
तेनासदृश आदेशो नन्वयुक्तोऽयमीर्यते ॥ (236)

युक्त एवायमादेशः न यतो विद्यते परः ।
आदेशोऽतोऽयमेवात्र ब्रह्मण्यादेश इष्यते ॥ (237)

आदिदिक्षितमेतस्य तत्त्वं यद्ब्रह्मणः परम् ।
यावन्तस्तत्र निर्देश्याः तेऽर्थाः सर्वे निवर्तिताः ॥ (238)

निवृत्तिश्च यथोक्तैव तेषामैकात्म्यलक्षणा ।
भिन्नदेशस्थितिस्त्वत्र वास्तवी नोपपद्यते ॥ (239)

अव्यावृत्ताननुगतो ब्रह्मशब्दार्थ इष्यते ।
मुख्योऽन्यस्मिन् सति यतो ब्रह्मार्थो नावसीयते ॥ (240)

शब्दप्रवृत्तिहेतूनामैकात्म्येन समाप्तितः ।
तथा तदभिधेयानामादेशोऽयं मतः परः ॥ (241)

तदात्मत्वमयुक्तं, वैविक्त्यात्, अत्राह—**प्रत्यगिति** । (235)

'न ह्येतस्मात्' इत्यादिवाक्यार्थनिरूपणम्

'[1]न ह्येतस्मात्' इति वाक्यमवतारयितुं चोदयति—**आदेशमिति** । (236) [2]सदृश एव, इत्याह—**युक्त इति** । (237) 'न यतो विद्यते परः' इत्ययुक्तम्, विधिमुखेनाप्यादेशभावात्, अत्राह—**आदिदिक्षितमिति** । 'नेति' इत्यशेषविशेषनिषेधान्न वि(ति)[धि]मुखेन बोधनमित्यर्थः । (238) निषेधद्वारापि नाद्वयबोधनं, मूर्तादिनिवृत्त्या सद्वितीयत्वात्, अत्राह—**निवृ(श्चि)[त्ति]श्चेति** । (239) भिन्नदेशस्थित्य(योः)[भावे] हेतुमाह—**अव्यावृत्तेति** । (240) जात्या-

---

1. न ह्येतस्मादिति वाक्ये—'न ह्येतस्मादिति नेत्यन्यत्परमस्ति ।' इति वाक्यम्
2. सदृश एवेति अयमादेशः इति शेषः ।

अभिधाभिधेयसंबन्धमङ्गीकृत्य यतोऽक्षरे ।
न कश्चिदपि शब्दोऽत्र साक्षाद् ब्रह्मणि वर्तते ॥ (242)

आदेशो नेति नेत्येव तेनेह घटतेऽञ्जसा ।
तद्बोधप्रसृतानामाकाङ्क्षाणां निषेधतः ॥ (243)

मूर्तामूर्तं हि सत्याह्वं प्राणाः सत्यास्तदात्मतः ।
क्षेत्रज्ञस्तदुपाधित्वात् सत्य इत्यभिधीयते ॥ (244)

* अनिर्देश्यस्य निर्देश्याः ये भेदाः कार्यलक्षणाः ।
तेषु लब्धास्पदं नाम परस्मिन्नुपचर्यते ॥ (245)

मूर्तामूर्तात्मकं सत्यं प्राणादेः कार्यरूपिणः ।
तस्याप्येतत्परं सत्यं यन्नेतीत्यवधारितम् ॥ (246)

देरात्ममात्रत्वाच्चाय[1]मेवादेशः, इत्याह—शब्देति । (241) अयमेवादेशो युक्तः, इत्युपसंहरति—अभिधेति । (242-243)

'अथ नामधेयम्' इत्यादिवाक्यार्थवर्णनम्

[2]'अथ' इत्यादौ षष्ठ्यन्तसत्यशब्दार्थमाह—मूर्तेति । (244) जगतः सत्यशब्दार्थत्वे सत्यश(ब्दार्थ)[ब्द]स्यानेकार्थता स्यात्, ब्रह्मणोऽपि प्रथमान्तसत्यशब्दवाच्यत्वात्, अत्राह—अनिर्देश्यस्येति । लक्षणया [3]तत्र सत्यशब्दप्रयोग इत्यर्थः । (245) षष्ठ्यन्तसत्यपदार्थानुवादेन प्रथमान्त(र)सत्यपदार्थमाह—मूर्तेति । (246) जगतोऽ(विश्व)[पि स्व] रूपेण सत्यत्वमविशेषात्, अत्राह—

---

1. अयमेवादेशः—नेतीत्यादेशः । एवकारेण विधिमुखादेशव्यवच्छेदः ।

2. अथ इत्यादाविति "अथ नामधेयं सत्यस्य सत्यमिति, प्राणा वै सत्यं तेषामेष सत्यम् ।" इत्यत्र वाक्ये इत्यर्थः ।

3. तत्र—ब्रह्मणि ।

* "सेश्वरं सजीवं सर्वं जगदस्तु षष्ठ्यर्थः । तथापि न प्रथमार्थो निरुपाधिकं ब्रह्म तत्र शब्दप्रवृत्तेर्निरस्तत्वात्, इत्याशङ्क्य, लक्षणया तत्र सत्यशब्दोपपत्तिं प्रतिजानीते—अनिर्देश्यस्येति ।" इति शास्त्रप्रकाशिका ।

उक्तवस्त्वतिरेकेण नामीषां सत्यता यतः ।
न चाप्यसत्यता तस्मात्तेषां सत्यं परं पदम् ॥ (247)

आत्मवन्तो यथा रज्ज्वा रज्जुसर्पादयस्तथा ।
आत्मवन्तो निरात्मानः प्राणाद्याः प्रत्यगात्मना ॥ (248)

यत एवमतोऽन्वीक्ष्य मूर्तामूर्तादिवर्त्मना ।
सत्यशब्दाभिधेयार्थं तया द्वारा परं पदम् ॥ (249)

* उच्यमानमैकात्म्यं सत्यस्यात्मानमद्वयम् ।
द्रष्टव्यमात्मनैवैनं सत्यं पश्येद्यथोदितम् ॥ (250)

अतोऽव्याकृतयाथात्म्यं व्याकृतेनोपदिश्यते ।
सत्यस्य सत्यमिति तन्नान्यथा व्यपदेशभाक् ॥ (251)

व्यपदेशाय नामैतन्न स्वं नामास्य विद्यते ।
ननु ब्रह्माक्षरमिति व्यपदेशोऽत्र नामभिः ॥ (252)

उक्तेति । (247) अधिष्ठानसत्तया अध्यस्तस्य सत्त्वे दृष्टान्तमाह—**आत्मवन्त इति** । (248) [1]तेनैव सर्वस्यात्मवत्त्वे फलितमाह—**यत इति** । मूर्तामूर्तादिवर्त्मना—मूर्तादिरूपेण षष्ठ्यन्तसत्यशब्दार्थमालोच्य, तया द्वारा [2]प्रथमार्थमुच्यमानमित्यन्वयः । (249-250) व्याकृ(त)[ताऽव्याकृत]योः ब्रह्मसत्तया सत्त्वे गमकमाह—**अत इति** । सर्वस्य ब्रह्ममात्रत्वात् नाम्नः तत्र वृत्तिः, नान्यदित्यर्थः । (251) [3]तन्नाम्नः तत्र प्रयोगः किमर्थः, अत्राह—**व्यपदेशायेति** । कार्यविषयनाम्ना ब्रह्मव्यपदेशोऽनर्थकः, [4]तन्नाम्ना [5]तन्निर्देशदर्शनात्, इति शङ्कते—**नन्विति** ।

---

1. **तेनैव**—अधिष्ठानभूतात्मनैव ।
2. **प्रथमार्थं**—प्रथमान्तसत्यशब्दार्थम् ।
* 'व्यपदिश्यमानमैकात्म्यम्' इति मु. पु. पाठः ।
3. **तन्नाम्नः तत्र प्रयोगः**—सत्यमिति नाम्नः ब्रह्मणि प्रयोगः ।
4. **तन्नाम्ना**—ब्रह्मनाम्ना ब्रह्म अक्षरमित्यादिना ।
5. **तन्निर्देशेति** ब्रह्मनिर्देशेत्यर्थः ।

कार्यकारणगे तत्त्वे नाम लब्धास्पदं यतः ।
रूपाभिधेयसंबन्धमरूपाशब्दमक्षरम् ॥ (253)

लक्षयेन्नाञ्जसा वक्ति परं ब्रह्म कथंचन ।
शब्दप्रवृत्तिहेतूनां साक्षाद्ब्रह्मण्यसंभवात् ॥ (254)

इति चतुर्थोध्यायस्य तृतीयं ब्राह्मणं

समाप्तम्

—: * :—

---

(252) कार्यकारणोपाधिविषयं [1]तदपि, इति परिहरति—कार्येति। कार्य-कारणविलक्षणेऽपि ज्ञाना(ना)नन्तानन्दादिशब्दप्रयोगोऽस्ति, इत्यत्राह–रूपेति। सोपाधिके ब्रह्मणि गृहीतसंबन्धं पदं निरुपाधिकं लक्षयतीत्यर्थः। (253–254)

इति चतुर्थोध्यायस्य तृतीयं ब्राह्मणं

समाप्तम्

—: * :—

---

1. **तदपीति** नामेति शेषः।

इति चतुर्थोध्यायस्य तृतीयं ब्राह्मणं समाप्तम्।

—: • :—

अथ चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम्

आत्मेत्येवेति सूत्रस्य व्याख्येयं प्रस्तुता स्फुटा ।
ब्रह्म तेऽहं ब्रवाणीति प्रारम्भापूर्णवाक्यतः ॥ (1)

नित्यकर्माद्यनुष्ठानसंशुद्धधिषणः पुमान् ।
निःशेषकर्महेतूत्थफलसावद्यधीस्ततः ॥ (2)

* विरक्त आग्रजात्सोऽयं तत्सावद्यसमीक्षणात् ।
संसारदुःखसंस्कारस्मृतिभिः प्रेर्यमाणधीः ॥ (3)

अथ चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम्

विद्याङ्गत्वेन संन्यासविधानायोत्तरं ब्राह्मणमिति निरूपणम्

संगतिं वक्तुं वृत्तं कीर्तयति—**आत्मेति** । 'ब्रह्म ते(हंब्रह्म)[ब्रवाणि]' (बृ. 4-1-1) इत्युपक्रम्य [1]पूर्णवाक्यपर्यन्तो ग्रन्थः मुक्तिफल[2]विद्यासूत्रव्याख्यानायेत्युक्तं [3]चतुर्थस्यादावित्यर्थः । (1) विद्याङ्गत्वेन संन्यासविधानायेदं ब्राह्मणमिति संगतिं वक्तुं, ज्ञानात् मुक्तिसिद्धौ [4]परिपाटीमाह—**नित्येति** । शुद्धबुद्धेः संसारे दोषधीः स्यादित्यर्थः । (2) [5]ततो वा (कथं)[किं] स्यात्, अत्राह—**विरक्त इति** । वैराग्यफलं संसारजिहासा, तत्फलं तत्साधनानुष्ठानार्थिता,

---

अथ चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम्

मैत्रेयीं स्वभार्यां प्रति याज्ञवल्क्येनोपदेशकरणादिदं मैत्रेयीब्राह्मणमिति व्यवह्रियते ।

1. **पूर्णवाक्यं**—'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥'
इति वाक्यं सप्तमाध्यायोपक्रमस्थम् ।
2. **विद्यासूत्रं**—'आत्मेत्येवोपासीत' इति वाक्यम् ।
3. **चतुर्थस्येति** अध्यायस्येति शेषः ।
4. **परिपाटीं**—क्रमम् ।
5. **ततो वा**—संसारे दोषदर्शनात् वा ।

* **आग्रजादिति** अग्रजः—प्रथमजः हिरण्यगर्भः । तत्पदपर्यन्तमित्यर्थः ।

उद्भूततज्जिहासः संस्तद्धाने साधनस्पृहः ।
* त्यक्ताशेषैषणः सोऽथ प्रत्यग्याथात्म्यनिश्चयः ॥ (4)

वस्तुवृत्तात्मसंबोधध्वस्तसंसारकारणः ।
* व्याविद्धाशेषसंसारो विमुक्तो ना विमुच्यते ॥ (5)

यावत्किञ्चिदविद्यायाः कार्यं वैराग्यकारणम् ।
तत्संन्यासो विरक्तत्वात् स्वत एव न शास्त्रतः ॥ (6)

ब्रह्मयाथात्म्यविज्ञानसाधनत्वं विनाऽऽगमात् ।
संन्यासस्य न विज्ञातं तच्छास्त्रेणेह बोध्यते ॥ (7)

ब्रह्माविद्यासमुत्थानात् कार्यकारणलक्षणात् ।
व्युत्थाप्य नेति नेतीति परं ब्रह्म प्रदर्शितम् ॥ (8)

इत्याह—**संसारेति** । ततः किं स्यात्, अत्राह—**त्यक्तेति** । उक्तविशेषणवतः सर्वैषणानिवृत्तिः स्यादित्यर्थः । विविदिषासंन्यासिनः असकृदनुष्ठितश्रवणादेः किं स्यात्, अत्राह—**अथेति** । (3-4) तत्त्वधीफलमाह—**वस्त्विति** । मुक्तेरभूत्वा भावित्वादनित्यत्वम्, इत्यत्राह—**विमुक्त इति** । प्रतिबन्धनिवृत्तौ मुक्त्युपचार इत्यर्थः (5) यो यज्जिहासति तस्य तत्त्यागः स्वत एवेति न संन्यासविधानार्थमिदं ब्राह्मणमारभ्यमिति चेत्, संन्यासस्वरूपे विधिवैयर्थ्यं, तस्य ज्ञानाङ्गत्वे(चे)[वे]ति विकल्प्य, आद्यमङ्गीकरोति—**यावदिति** । (6) द्वितीयं प्रत्याह—**ब्रह्मेति** । (7)

शङ्कोत्तरत्वेन उत्तरब्राह्मणावतरणम्

ब्राह्मणस्यार्थान्तरं वक्तुं पूर्वब्राह्मणार्थमनुवदति—**ब्रह्माविद्येति** । (8)

---

* **प्रत्यग्याथात्म्यनिश्चय** इति प्रतीचो याथात्म्ये निश्चयवानित्यर्थः ।
* **विमुक्त इति** मुक्तिः नित्यसिद्धा, ब्रह्मविद्यया मुक्तिं प्राप्तः इति वचनन्तु औपचारिकमिति भावः । **ना**—पुरुषः ।

"आत्मनः स्वतो मुक्तस्य कुतः सा हेत्वधीना इत्याशङ्क्य, सकार्याज्ञानध्वस्तौ सोपचर्यते इत्याह—विमुक्त इति ।" इति शास्त्रप्रकाशिका ।

तत्रैतच्छङ्कयते चोद्यं ब्रह्मत्वासिद्धिदोषकृत् ।
निषिद्धं नेति नेतीति मूर्तामूर्तादिवस्तु यत् ॥ (9)

* किं तद्ब्रह्मानुगं सर्वं किं वा तस्माद्विविच्यते ।
यदि ब्रह्मानुगं, ब्रह्म स्यादनर्थात्मकं तदा ॥ (10)

अभावनिष्ठं तच्चेत्स्यान्मुख्यं ब्रह्म न सिध्यति ।
अभावस्य ततोऽन्यत्वादन्वयव्यतिरेकतः ॥ (11)

नेतीत्यपि निषेधोक्तिस्तथा सति विरुध्यते ।
वैदिकश्च प्रयासोऽयं सर्वः स्यात्तुषकण्डनम् ॥ (12)

विविच्यते ब्रह्मणश्चेन्मैवं दोषस्तथापि हि ।
ब्रह्मत्वं ब्रह्मणो न स्यात् द्वितीये सति वस्तुनि ॥ (13)

अव्यावृत्तानुगतं वस्तु ब्रह्मत्वमश्नुते ।
एतच्च दुर्लभं तस्य द्वितीये सति लक्षणम् ॥ (14)

मैत्रेयीब्राह्मणनिरस्यशङ्कामाह—तत्रेति । [1]अभिन्नं, भिन्नं, अभावनिष्ठं(चे) वेत्यर्थः । अभेदे दोषमाह—यदीति । (9–10) अभावनिष्ठत्वं दूषयति—अभावेति । मूर्तादेरभावनिष्ठत्वे तस्य ब्रह्मणोऽन्यत्वात् तेन संयोगवियोगसंभवाद-द्वैतहानिरित्यर्थः । (11) मा तर्हि(तू)[भू]न्मुख्यं ब्रह्म, इत्यत आह—नेतीति । (12) भेदपक्षं प्रतिक्षिपति—विविच्यत इति । (13) [2]तदुपपादनाय ब्रह्मलक्षणमाह—अव्यावृ(त्तमि)[त्ते]ति । (14) द्वितीयं भक्षयित्वा [3]ब्रह्मानन्तं

---

1. अभिन्नमिति निषिद्धं मूर्तामूर्तादि, ब्रह्मणः इत्यादिः ।

* यदि ब्रह्मानुगं—यदि ब्रह्माभिन्नम् ।

2. तदुपपादनाय—द्वितीये वस्तुनि सति ब्रह्मणः ब्रह्मत्वासिद्धेरुपपादनाय ।

3. अनन्तं स्यात्—अपरिच्छिन्नं स्यात् ।

अथाब्रह्मात्मकं वस्तु जगच्चा चेद् ब्रह्म तद्भवेत् ।
प्रतीचो ब्रह्मणात्तत्वात् न मोक्षो नापि संसृतिः ॥ (15)

संसारिणो न चेदस्ति संसार्येव प्रसज्यते ।
नाप्नोति ब्रह्मतां साक्षात् सत्सु संसारिवस्तुषु ॥ (16)

संसारे चापि जग्धेऽस्मिन् ब्रह्मणा निखिले सति ।
ऋतेऽपि ब्रह्मविज्ञानात् सर्वे स्युर्मुक्तबन्धनाः ॥ (17)

अन्वयादिनिषेधाय सर्वमात्मेति वाक्यतः ।
मैत्रेयीत्यादिको ग्रन्थस्तस्मादारभ्यते परः ॥ [18]

सर्वाब्रह्मनिषेधेन तदर्थो वेह निश्चितः ।
* तस्य संसिद्धिविषये ऐकात्म्यमधुनोच्यते ॥ (19)

स्यात्, अतो न लक्षणासिद्धिः, इति शङ्कते—अथेति । जीवं ब्रह्म अस्ति, न वा । आद्ये अवद्यमाह—प्रतीच इति । (15) द्वितीयमालम्बते—संसारिण इति । जीवाः ब्रह्मणोऽभिन्नाः, (अ)भिन्ना (स्तमत्रा) [वा । तत्राद्येऽवद्यमा]ह—संसारीति । ब्रह्मेति शेषः । द्वितीयं दूषयति—नाप्नोतीति । (16) प्रत्यग्ब्रह्मणारभेदेऽपि न ब्रह्मणः संसारः, [1]तस्य [2]तेन निरस्तत्वात्, इत्यत्राह—संसारे चेति । (17) [3]एतदुत्तरत्वेन ब्राह्मणमवतारयति—अन्वयेति । अन्वयव्यतिरेकाभावपरिहारेण 'सर्वमात्मा' इति वाक्यात् प्रत्यङ्मात्रं जगदिति वक्तुं उत्तरो ग्रन्थ आरभ्यते यस्मात्, तस्मान्नोक्तदोष इत्यर्थः । (18)

ब्राह्मणस्यार्थान्तरम्

[4]ब्राह्मणस्यार्थान्तरमाह—सर्वेति । अनात्मनिरासेन [5]तदर्थः शोधितः ।

---

1. तस्य—संसारस्य
2. तेन—ब्रह्मणा ।
3. एतदुत्तरत्वेन—एतच्चोद्योत्तरत्वेन ।
4. ब्राह्मणस्य—मैत्रेयीब्राह्मणस्य । एवमुत्तरत्रापि ।
5. तदर्थः—महावाक्यघटकस्य तत्पदस्यार्थः ।

* 'तस्य संसिद्धिविषयमैकात्म्यम्' इति मु. पु. पाठः ।

नेतीति ब्रह्मणोऽन्यत्र मूर्तामूर्तव्यवस्थितौ ।
प्रसक्ते सांख्यसिद्धान्ते, सर्वमात्मेति चोच्यते ॥ (20)

सत्यपि ब्रह्मवेदित्वे नासंत्यक्तैषणो यतिः ।
मुक्तिभागिति चेहोक्तः संन्यासेन समुच्चयः ॥ (21)

निरस्तातिशयज्ञानो याज्ञवल्क्यो यतो गृही ।
कैवल्याश्रममास्थाय प्राप तद्वैष्णवं पदम् ॥ (22)

'त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ।
* त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक् परं पदम् ॥' (23)

मुक्तेश्च बिभ्यतो देवाः मोहेनापिदधुर्नरान् ।
ततस्ते कर्मसूद्युक्ताः प्रावर्तन्ताविपश्चितः ॥ (24)

तस्य संसिद्धिविषये—मोक्षयोग्ये शुद्धत्वंपदार्थे विधिमुखेनैश्यमनेनोच्यते इत्यर्थः । (19) विधान्तरेण ब्राह्मणमवतारयति—नेतीति । (20)

ज्ञानस्य संन्यासेन समुच्चयविधानायोत्तरं ब्राह्मणमिति निरूपणम्

पूर्वं संन्यासस्य ज्ञानाङ्गत्वं विधातुं ब्राह्मणारम्भः इत्युक्तम् । इदानीं ज्ञानस्य संन्यासेन समुच्चयविधानायारम्भः, इत्याह—सत्यपीति । (21) अत्र[1] लिङ्गमाह—निरस्तेति । अतो ज्ञानसंन्याससमुच्चयात् मुक्तिरित्यर्थः । (22) अत्र स्मृतिमुदाहरति—त्याग इति । (23) [2]तत्प्रामाण्यार्थं तन्मूलश्रुतिमाह—

---

1. अत्र लिङ्गं—मुक्तौ ज्ञानसंन्याससमुच्चये गमकम् ।

* 'त्याग एव' इत्युक्तेः त्यागस्यैव मुक्तिहेतुता, न समुच्चयस्य, इत्याशङ्क्याह—त्यजतैवेति ।

2. तत्प्रामाण्यार्थमिति उक्तस्मृतिप्रामाण्यार्थमित्यर्थः । वेदमूलकत्वेनैव स्मृतेः प्रामाण्यादिति भावः ।

मोहमात्रैकहेतूनि तस्मात्कर्माण्यशेषतः ।
संन्यस्यैकात्म्यसंबोधात् भित्वा मोहं विशुद्धधीः ।
ज्ञानमेवात्मनात्मानमुपासीनोऽमृतो भवेत् ॥ (25)

इति प्रमाणमत्रार्थे वचनं भाल्लविश्रुतौ ।
सर्वः संन्यस्तकर्मैव ज्ञानात्कैवल्यमश्नुते ॥ (26)

ब्रह्मचर्यात् गृहाच्चैव वनाच्चापि विधीयते ।
निःशेषकर्मसंन्यासो यतोऽतो नर्णबद्धता ॥ (27)

श्रुत्या जाबालशाखायां तथा चानधिकारिणाम् ।
संन्यासस्य विधानाच्च कार्योऽतोऽसौ मुमुक्षुभिः ॥ (28)

नरलोकादिकामानां सुतोत्पत्त्यादि साधनम् ।
तेभ्यो व्युत्थितचित्तानां संन्यासस्त्वात्मकामिनाम् ॥ (29)

मुक्तश्चेति । **प्रमाणमिति** । प्रमेयमुपसंहरति—**संन्यस्तेति** । (24-25-26) (गु)[ऋ]णश्रुतिस्मृतिविरोधात् संन्यासानुपपत्तौ, [1]कुतः समुच्चयः, अत्राह—**ब्रह्मचर्यादिति** । विधिविरोधे अर्थवादस्मृत्योः न स्वार्थमात्वमित्यर्थः । [2]**कर्मा(नि)-[न]धिकृतानां** [3]तत्र संन्यासविधानम् । यदाहुः—

'तत्रैवं शक्यते वक्तुमन्धपङ्ग्वादयो नराः ।
गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः ॥' मी. वा.

इति, तत्राह—**तथा चेति** । '**अथ पुनरेव व्रती वा अव्रती वा स्नातको वा**' (जा. 4-1) इत्यादिना पृथगेवानधिकारिणां संन्यासविधानात्, न '**ब्रह्मचर्यादेव**' (जा. 4-1) इति वाक्यमनधिकृतविषयमित्यर्थः । (27–28) **पुत्रोत्पादनादि-विधिविरोधात्** न संन्यासोपपत्तिः, अत्राह—(त)[न]**रेति** । (29) **सर्वत्याग-**

---

1. **कुतः समुच्चय इति** ज्ञानसंन्याससमुच्चयः न संभवतीत्यर्थः ।
2. **कर्मानधिकृतानां**—अन्धपङ्ग्वादीनाम् ।
3. **तत्र**—जाबालशाखायाम् ।

इममर्थं श्रुतिर्वक्ति सर्वकर्मानपेक्षिणी ।
प्रजादिना करिष्यामः किं तत्फलवितृष्णतः ॥ (30)

* उत्पत्त्यादिविरुद्धोऽयं लोको येषामकर्मजः ।
मोहमात्रान्तरायत्वात् ज्ञानमात्रमपेक्षते ॥ (31)

'प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम् ।
तस्मात् ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ॥'(32)

'भावितैः करणैश्चायं बहुसंसारयोनिषु ।
* आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे ॥' (33)

'तमासाद्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः ।
त्रिष्वाश्रमेषु कोऽन्वर्थो भवेत्परमभीप्सितः ॥' (34)

श्रुतयः स्मृतयश्चैवमस्मिन्नर्थे सहस्रशः ।
प्रत्यक्षा एव विद्यन्ते संन्यासप्रतिपादकाः ॥ (35)

पुरःसरज्ञानस्य मुक्तिहेतुत्वे श्रुतिमुदाहरति—इममिति । (30) 'किं प्रजया करिष्यामः येषां नोऽयमात्माऽयं लोकः' (बृ. 6-4-22) इति वाक्ये 'अयं लोकः' इत्यस्यार्थमाह—उत्पत्त्यादीति । तर्हि केन मुक्तिः, अत्राह—मोहेति । (31) 'ज्ञानमात्रम्' इति कर्मानपेक्षं तत्त्यागपुरःसरमित्युक्तम् । [1]एतर्हि [2]तत्त्यागस्य ज्ञानहेतुत्वे स्मृतिमाह—प्रवृत्तीति । (32) क्रमसंन्यासविषयमिदं वाक्यम्, इत्याशङ्क्याह (मो. ध. 164-26)—भावितैरिति । (33) ब्रह्मचर्यादेव प्र(वृत्त)[व्रजित]स्यापि रागादाश्रमान्तरे प्रवृत्तिः स्यात्, अत्राह—(मो. ध. 164-27) तमिति । (34) 'ब्रह्मचर्यादेव' (जा. 4-1) इत्यादिश्रुतयोऽपि स्मृतिमूल-भूता विद्यन्ते, इत्याह—श्रुतय इति । (35)

---

* उत्पत्त्यादिविरुद्ध इति उत्पत्त्याप्तिविकृतिसंस्कृतिरूपकर्मफलविलक्षण इति यावत् ।

1. एतर्हि—इदानीम् ।

2. तत्त्यागस्य—कर्मत्यागस्य ।

* प्रथमाश्रमे—ब्रह्मचर्याश्रमे ।

मुख्यार्थता वा प्रागुक्ता ब्रह्मेत्यस्य सदा दृशि ।
प्रतीच्यथात्मशब्दस्य मुख्यार्थो ब्रह्मणीर्यते ॥ (36)

ततस्तदेतदिति च ब्रह्मात्मपदवाच्ययोः ।
मधुकाण्डार्थसर्वस्वं वाक्येन प्रतिपाद्यते ॥ (37)

प्रत्यग्याथात्म्यविज्ञानजन्मनेऽतः श्रुतिः स्वयम् ।
विधित्सन्तीह संन्यासं मैत्रेयीति प्रवर्तते ॥ (38)

भार्याद्यनुज्ञापूर्वो हि संन्यासो विहितः श्रुतौ ।
अतोऽनुज्ञार्थमेवाह मैत्रेयीमृषिरात्मनः ॥ (39)

उत्तरब्राह्मणस्यार्थान्तरकथनम्

ज्ञानसं(ज्ञा)[न्या]ससमुच्चयविधानाय ब्राह्मणमित्युक्त्वा, [1]अर्थान्तरमाह—**मुख्येति** । तदर्थस्य त्वमर्थनिष्ठता [2]गतब्राह्मणेनोक्ता । [3]अनेन त्वमर्थस्य(तदर्थस्य) तदर्थनिष्ठतो(मु)च्यते इत्यर्थः । (36) ब्राह्मणद्वयस्य [4]पदार्थद्वयप्रतिपादकत्वे [5]वाक्यार्थः केनोच्यते, इत्यत आह—**तत इति** । 'तदेतद्ब्रह्मापूर्वम्' (बृ. 4-5-19) इत्यादिवाक्येनेत्यर्थः । (37)

एवमनेकधा संगतिमुक्त्वा, संन्यासस्य ज्ञानाङ्गत्वे ब्राह्मणमवतारयति—**प्रत्यगिति** । (38)

'मैत्रेयीति होवाच' [6]इत्यसंगतं, विरक्तस्य निरपेक्षत्वप्राप्तेः, अत्राह—**भार्यादीति** । 'मातरं पितरं भार्यां पुत्रान् सुहृदो बन्धूनेतान् सर्वाननुमोदयित्वा, ये चास्यार्त्विजः तान् सर्वान् पूर्ववत् वृणीत्वा वैश्वानरीमिष्टिं कृत्वा सर्वस्वं दद्यात्' इति कौषीतकिश्रुतावित्यर्थः । [39]

---

1. **अर्थान्तरमिति** मैत्रेयीब्राह्मणस्येत्यादिः ।
2. **गतब्राह्मणेन**—अतीतेन मूर्तामूर्तब्राह्मणेन ।
3. **अनेन**—मैत्रेयीब्राह्मणेन ।
4. **पदार्थद्वयेति** तत्त्वंपदयोरर्थेत्यर्थः ।
5. **वाक्यार्थः**—ऐक्यम् ।
6. **इत्यसंगतमिति** मुनेः भार्यासंबोधनमयुक्तमित्यर्थः ।

उद्यास्यन्वा अरे स्थानादस्माद्गार्हस्थ्यलक्षणात् ।
चिकीर्षवे मे संन्याससमनुज्ञां दातुमर्हसि ॥ (40)

युक्तमाह भवानस्मानुरूपं चिकीर्षति ।
यदेवं सति कर्तव्यं तत् क्षिप्रमनुशाधि माम् ॥ (41)

अनुज्ञातोऽथ तामाह हन्तेत्यादि परं वचः ।
कात्यायन्या सपत्न्या ते विभागं करवाण्यहम् ॥ (42)

निःस्वा स्त्री स्ववता पुंसा नियुक्ता कर्मसंपदि ।
मयि प्रव्रजिते तस्माद्युवयोर्नार्थसंगतिः ॥ (43)

स्ववानेव पुरा न्यासाद्युवयोः स्वेन सांप्रतम् ।
विभागं करवाणीति भार्या तेनाभ्यचोदयत् ॥ (44)

'उद्यास्यन्' इत्यादिप्रथमकण्डिकावाक्यार्थनिरूपणम्

[1]'उद्यास्यन्' इत्यादेरर्थमाह—उद्यास्यन्निति । (40) (हिंत ते) '[हन्त' इ] त्यादेरर्थं वक्तुं [2]उपस्करोति—युक्तमिति । कर्तव्यं, मयेति शेषः । (41) 'हन्त' इत्यादेरर्थमाह—अनुज्ञात इति । (42) पारिव्राज्यादूर्ध्वं तयोर्द्रव्यविभागं [3]ते एव करिष्यतः, [4]किमेवमुक्तमृषिणा, अत्राह—निः (श्रे)[स्वे]ति ।

'भार्या पुत्रश्च दासश्च त्रयस्ते निर्धनाः स्मृताः ।
यं ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥'

इति भारतवाक्यादित्यर्थः । [43] संन्यासचिकीर्षोस्तवापि[5] (लिखित)[निःस्वत्व]मेव, इत्यत्राह—स्ववानिति । [44] विभागं कृत्वैव संन्यासः कार्यः इति न

---

1. उद्यास्यान्नित्यदेरिति "मैत्रेयीति होवाच याज्ञवल्क्यः, उद्यास्यन्वा अरे अहमस्मात् स्थानादस्मि, हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति" इति श्रुतिरनुसन्धेया ।
2. उपस्करोति—भूमिकां करोति ।
3. ते एव—भार्ये एव ।
4. एवमुक्तं—'कात्यायन्या अन्तं करवाणि' इति द्रव्यसंविभागवचनमुक्तम् ।
5. तवापि—याज्ञवल्क्यस्यापि ।

वृत्तिभिः संविभज्य स्वान्संन्यसेदिति चोद्यते ।
यतः शास्त्रेण तेनायं विभागः क्रियते मया ॥ (45)

युक्तमेतद् व्यवसितं यद्वित्तं न प्रदित्सति ।
भवत्संन्यासवन्नूनमस्मद्धितकरं धनम् ॥ (46)

महानुभावसंपर्कः कस्य नोन्नतिकारणम् ।
अशुच्यपि पयः प्राप्य गङ्गां याति पवित्रताम् ॥ (47)

भगवत्संगतेर्नान्यः पुरुषार्थोऽमृतत्वतः ।
पृच्छाम्यतोऽमृतत्वस्य साधनं स्यात्कथं धनम् ॥ (48)

सारेण यदि नामेयं पूर्णा स्याद्वसुना मही ।
तावताऽप्यमृताहं स्यां किं वा नेत्युच्यतां यथा ॥ (49)

सत्तामात्रोपकारीणि धनानि धनिनां न हि ।
क्रियाद्वारोपकारीणि यतोऽतः पृच्छ्यते क्रिया ॥ (50)

नियमोऽस्ति, इत्यत्राह—वृत्तिभिरिति ।ताननुरूपाभिः वृत्तिभिः संविभज्य संन्यसेत् इति शास्त्रं नियामकमित्यर्थः । [45]

द्वितीयतृतीयकण्डिकार्थनिरूपणम्

'सा होवाच' इत्येतदवतारयति—युक्तमिति । [46] हितकरं—मुक्तिसाधनं धनं स्त्रियो नार्हन्ति तत्साधनश्रवणादाव[1]नधिकारात्, अत्राह—महानुभावेति । [47] '[2]यन्नु' इत्यस्यार्थमाह—भगवदिति । [48] 'सर्वा पृथिवी' इत्यादि व्याचष्टे—सारेणेति । [49] वित्तं मुक्तिसाधनं न वेति प्रश्नप्रवृत्तेः,

---

1. अनधिकारादिति स्त्रीणामिति शेषः ।

2. यन्नु इत्यस्येति 'सा होवाच मैत्रेयी, यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्, कथं तेनामृता स्यामिति । नेति होवाच याज्ञवल्क्यः । यथैवोपकरणवतां जीवितं, तथैव ते जीवितं स्यात्, अमृतत्वस्य तु नाशास्ति वित्तेनेति ।' इति श्रुतिरनुसन्धेया।

प्रत्याह पृष्टः स्वां जायां नामृतत्वं धनादिति ॥ (51)

वित्तं चेन्नामृतत्वाय कस्माद्दित्सति तद्भवान् ।
इति पृष्टोऽब्रवीद्वित्तसाधनस्य प्रयोजनम् ॥ (52)

क्षयिष्णु साधनाधीनं जीवितं स्याद्यथा नृणाम् ।
तथैव तव वित्तेन जीवितं नामृतात्मता ॥ (53)

अविद्यामात्रविध्वंसात् ज्ञानादेवामृतं यतः ।
अमृतत्वस्य नाशापि वित्तसाध्येन कर्मणा ॥ (54)

कुतोऽमृतत्वसंप्राप्तिः ज्ञानमात्रैकहेतुना ।
न कर्म कारणं मुक्तेः नाग्निस्तापस्य भेषजम् ।
कर्मभ्यो जन्म नियतं जन्म चेन्निर्वृतिः कुतः ॥ (55)

स्वभावादेव साधूनां प्रवृत्तिरुपकारिणी ।
अपकारिण्यपि जने किमु भक्तजनं प्रति ॥ (56)

'पृथिवीपूर्णवित्तसाध्येन कर्मणा' इत्यादि भाष्यमसंगतम्, इत्यत आह—सत्येति । [50] 'नेति' इत्यादेरर्थमाह—प्रत्याहेति । [51] धनस्य फलान्तरमपृष्टं कस्मादुच्यते 'यथैव' इत्यादिना, इत्यत्राह—वित्तं चेदिति । [52] [1]तस्यार्थमाह—क्षयिष्ण्विति । [53] 'अमृतत्वस्य तु न' इत्यादेरर्थमाह—अविद्येति । [54] मुक्तेः कर्मफलत्वे विरोधाभावात् धीमात्रसाध्यत्वमयुक्तमिति शङ्कते—कुत इति । विरोधं दर्शयन् परिहरति—न कर्मेति । [55] '[2]किमहं तेन' इत्युपालम्भबीजमाविष्कर्तुं सामान्यन्यायमाह—स्वभावादिति । [56] [3]उत्सर्गस्यापवादं [4]स्वविषये

---

1. तस्यार्थं—'यथैवोपकरणवतां जीवितं, तथैव ते जीवितं स्यात्' इति वाक्यस्यार्थम् ।
2. किमहं तेनेति 'साहोवाच मैत्रेयी येनाहं नामृता स्याम्, किमहं तेन कुर्यां, यदेव भगवान्वेद, तदेव मे ब्रूहीति' इति श्रुतिः ।
3. उत्सर्गस्य—साधूनां प्रवृत्तिरुपकारिणी इति सामान्यस्य ।
4. स्वविषये—मैत्रेयीविषये ।

नूनं ममापराधोऽयं यद्भवन्तोऽपि मां प्रति ।
प्रतिलोमं चिकीर्षन्ति कोऽन्यः स्यात् हितकृन्मम ॥ (57)

अनुरक्तां प्रियां साध्वीं बद्ध्वा वित्तेन मां कथम् ।
कामोच्छित्तिमकृत्वा च संन्यसन्ति भवद्विधाः ॥(58)

वित्ताच्चेदमृतत्वं स्यात् तत्त्यक्षा न युज्यते ।
वित्ताच्चेन्नामृतत्वं स्यात् वद तेन ममापि किम् ॥(59)

यद्यस्त्यनुजिघृक्षैवं करुणा वा मयीष्यते ।
यदेव भगवान्वेद तेन संविभजस्व माम् ॥ (60)

यद्विज्ञानात्परित्यज्य निःशेषं वित्तसाधनम् ।
स्वाराज्यमीप्सति भवान् तदेव वसु देहि मे ॥ (61)

* नादिर्नान्तो न मध्यं वा यस्य वित्तस्य विद्यते ।
भोगे न च क्षयं याति तदेव वसु दीयताम् ॥ (62)

अनन्तवित्तो हि भवान् अन्तवद्दीयते कुतः ।
असतः कीदृशं दानं सदेवातः प्रदीयताम् ॥ (63)

संभावयति—**नूनमिति** । [57] 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' (जा. 4-1) इति न्यायात् (त्वम)[उप] युक्त(दि)[हि]तमकृत्वैव [1]न्यसनं, तत्राह—**अनुरक्तामिति** । [58] दीयमानवित्तमेवेष्टसाधनमिति तद्दानात् कामोच्छित्तिः कृता, इत्यत्राह—**वित्ताच्चेदिति** । [59] एवं [2]उपालम्भेन [3]तर्केण च पतिं वशीकृत्य अनुनयेनाह—**यदीति** । (60) तथाविधं वित्तं ममापि नास्ति, इत्यत्राह—**यदिति** । [61] तस्माद्वित्तादस्य वित्तस्य कोऽतिशयः, येनेदमेव प्रार्थ्यते, अत्राह—**नादिरिति** । [62] फलितमाह—**अनन्तेति** । [63]

---

1. **न्यसनं**—संन्यासः ।
2. **उपालम्भेन**—'अनुरक्तां प्रियाम्' (वा. 58) इत्युक्तेन ।
3. **तर्केण**—वित्ताच्चेदमृतत्वं स्यात् (वा. 59) इत्युक्तेन ।

* "मदीयज्ञानसाधनं तुभ्यं दातुमशक्यं, अपचयप्रसङ्गात्, इत्याशङ्क्याह—**नादिरिति**" इति शास्त्रप्रकाशिका ।

संसारपुरुषार्थेभ्यो यतो नाभ्युत्थितात्मने ।
मुक्त्यैकसाधनं ज्ञानं दातुं शक्यमिदं मया ॥ (64)

अमुमुक्षुत्वमाशङ्क्य भवत्यै तत्प्रदित्सितम् ।
संसाराच्चेद्विरक्तासि गृहाणानुत्तमामृतम् ॥ (65)

स्त्रीणां यदुचितं वाक्यं प्रतिलोमं न भाषसे ।
पूर्ववत्त्वनुकूलं त्वमिदानीमपि भाषसे ॥ (66)

मोक्षं यान्तं नरं सर्वे मुञ्चन्ति सहजा अपि ।
अतिभक्तितया मां त्वं मोक्षेऽपि न जिहाससि ॥ (67)

* विभागमसहन्तीव मदतिस्नेहकारणात् ।
मुक्तावनुयियासि त्वं मदैकात्म्यपरीप्सया ॥ (68)

चतुर्थकण्डिकार्थनिरूपणम्

'स होवाच' इत्यस्य तात्पर्यमाह—**संसारेति** । [64-65] 'प्रिया[1] बत' इत्यादेः तात्पर्यमाह—**स्त्रीणामिति** । इदं हि स्त्रीणामुचितं वाक्यं, यत् भर्तारं प्रति अनुकूलवचनम् ।

'पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा ।
पतिलोकमभीप्सन्ती नाचरेत्किञ्चिदप्रियम् ॥' (मनु. 5-156)

इति स्मृतेरित्यर्थः । [66] 'अर्धो वा ए(क)[ष] आ[त्म]नो यत्प(त्ि)[त्नी]' (तै. सं. 6-1-8-5) इति श्रुतेः मम सहजत्वात् त्वयि न प्रतिकूलकरणप्रसक्तिः, अत्राह—**मोक्षमिति** । [67] हातुमनिष्टत्वे निमित्तमाह—**विभागमिति** । [68]

---

1. प्रिया बत इत्यादेरिति "स होवाच याज्ञवल्क्यः, प्रिया बतारे नः सती प्रियं भाषसे, एह्यास्स्व, व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यासस्वेति" इति श्रुतिः ।

* "न केवलं मां हातुं नेच्छसि, किन्तु मदासीन्च्छया मुक्तावपि मामनुगन्छसि, इत्याह—विभागमिति ।" इति **शास्त्रप्रकाशिका** ।

अतिस्नेहापकृष्टोमा देहार्धं शूलिनः श्रिता ।
त्वं तु सर्वात्मनात्मानं कृत्स्नं मामाप्तुमिच्छसि ॥ (69)

यत एवमतस्तुभ्यं वक्ष्याम्यमृतसाधनम् ।
निदिध्यासस्व चेतोऽतो व्याचक्षाणस्य तन्मम ॥ (70)

आ ब्रह्मणोऽस्मात्संसारात् शुद्धधीर्न विरज्यते ।
यावत्तावन्न विद्याया अधिकारी भवेन्नरः ॥ (71)

वैराग्यहेतावप्यस्मिन् रक्तो धर्मादिहेतुतः ।
यतोऽतः कर्मशुद्धात्मा भवादस्माद्विरज्यते ॥ (72)

वैराग्यहेतून् संसारे तस्माद्यत्नादियं श्रुतिः ।
न वा अरे इति ह्युक्त्या वक्तुं समुपचक्रमे ॥ (73)

वनिताकुलतिलकत्वेनाभिमता पार्वत्यपि न ते सदृशी इति स्तुतिं कुर्वन्नाह—**अतिस्नेहेति** । [69] 'व्याख्यास्यामि' इत्यादेरर्थमाह—**यत इति** । यतः सूक्ष्मार्थं तद्वाक्यं अतः एकाग्रचित्ता (श्रुतिः)[शृणु], इत्याह—**निदिध्यास(श्वे)[स्वे]ति** । [70]

पञ्चमकण्डिकार्थविवरणम्

'न वा अरे पत्युः' इत्यादिकमवतारयितुं अविरक्तस्य(नि)[1][अन]धिकार-माह—**आ ब्रह्मण इति** । [71] दृष्टनष्टस्वभावात् संसारात् स्वतो वैराग्यसिद्धेः किमुत्तरश्रुत्या, अत्राह—**वैराग्येति** । धर्मभोगवासनाबलात् अस्मिन् रक्तस्य, कर्मभिः [2]शुद्धसत्वस्यैव वैराग्यसिद्धिरित्यर्थः । [72] किमतः, अत्राह—**वैराग्य-हेतूनिति** । क्षयिष्णुत्वादीनिति शेषः । [73]

---

1. **अनधिकारमिति** विद्यायामित्यादिः ।
2. **शुद्धसत्वस्यैव**—शुद्धबुद्धेरेव ।

यस्मिन्नेव परा सक्तिः तस्मिन्नेव निरादरम् ।
कर्म कृत्वा परं यत्नादन्यस्यार्थयते फलम् ॥ (74)

किमिक्षो रसमाप्नोति यत्नान्निष्पीडयन्न ना ॥ (75)

तीव्रदुःखोद्भवो बुद्धौ संस्कारो यावदेव तु ।
तद्विपक्षः सुखं तावत् अल्पं तत्संक्षये क्षयः ॥ (76)

शीतमल्पं सुखं ग्रीष्मे तापोऽल्पः शिशिरे सुखम् ।
तदेव दुःखकृद् भूरि तद्धेत्वोरनवस्थितेः ॥ (77)

शब्दोऽस्ति न प्रियः कश्चिदप्रियो वा स्वतस्तथा ।
* रक्तद्विष्टमनो हेतुः शब्दाद्यर्थे प्रियाप्रिये ॥ (78)

कर्मणां शुद्धिसाधनत्वं केन प्रकारेण, इत्यत्राह—**यस्मिन्निति**। यत्र स्वर्गादौ फले अभिष्वङ्गः तस्मिन् निरादरः—निस्पृहः सन् ईश्वरार्पणधिया अग्निहोत्रादिकमनुष्ठाय(सि)[शु]द्धधिषणः [1]अन्यस्य [2]फलमर्थ[3]यते—[4]मुमुक्षुर्भवतीत्यर्थः । [74] अनुष्ठितकर्मणोऽपि मुमुक्षा न भवति, कर्मठानां मोक्षे द्वेषदर्शनात्, अत्राह—**किमिति**। अत्यु(च्छा)[त्सा]हेन ईश्वरार्थं कर्म कुर्वन् इह जन्मनि जन्मान्तरे वा [5]तदाप्नोतीत्यर्थः । [75] शुद्धबुद्धेरपि न संसारे वैराग्यसंभवः विबुधाद्यानन्दभोगात्, अत्राह—**तीव्रेति**। बुद्धौ—अन्तःकरणे, सुखसाधनानुष्ठानायासदुःखानुवृत्तिः [यावत्] तावदेव वा[स]नादिहेतुकं दुःखविरुद्धं सुखमल्पमनुवर्तते। दुःखतद्वासनयोः क्षये क्षीयते। अतः सुखस्य तुच्छत्वात् दुःखानुविद्धत्वाच्चानित्यत्वाच्च (अनित्यत्वाच्च) असारः संसारः इति वैराग्योपपत्तिरित्यर्थः । [76] सुखदुःखहेत्वोरनवस्थितेश्च वैराग्यसिद्धिः, इत्याह—**शीतमिति**। [सुख]दुःखहेतुधर्माधर्मयोः अदृष्टस्यानियतकालत्वादित्यर्थः । [77] शब्दादिविषय-

1. अन्यस्य—ज्ञानस्य ।
2. फलं—मोक्षम् ।
3. अर्थयते—वाञ्छति ।
4. पर्यवसितार्थमाह—**मुमुक्षुर्भवतीत्यर्थ इति**।
5. तदाप्नोति—मुमुक्षुत्वमाप्नोति ।

* रक्तद्विष्टमन इति शब्दादौ शोभनाशोभनाध्यासपूर्वकं रागादिकलुषितं मनः तत्र प्रियादिदृष्टिहेतुरित्यर्थः ।

स्वतोऽखिलोऽप्रियोऽनात्मा प्रत्यङ्मोहैकहेतुतः ।
प्रत्यगाह्लादकारित्वादप्रियोऽपि प्रियो मतः ॥ (79)

जायादिरप्रियः सर्वः स्वत आद्यन्तदुःखकृत् ।
तद्धेतोरात्मनः प्रीतेर्जायादिः प्रिय उच्यते ॥ (80)

न कस्यां चिदवस्थायामात्मा लोकेऽप्रियो मतः ।
प्रियोऽप्रियश्च जायादिर्यथाऽनात्मा मुहुर्मुहुः ॥ (81)

स्वत एवाप्रियोऽनात्मा ह्यात्मप्रीत्यर्थसाधनात् ।
* जायादिः स्यात्प्रियो भक्त्या बन्धक्याः कामुको यथा ॥ (82)

निर्हेतुकी स्वतः प्रीतिरात्मन्येव यतस्ततः ।
भाक्तं प्रियं परित्यज्य मुख्यं प्रियमुपाश्रयेत् ॥ (83)

'क्षयान्ता निचयाः सर्वे पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ताः मरणान्तं च जीवितम् ॥ (84)

प्रियत्वस्य अनवस्थितेश्चैवम्, इत्याह—**शब्दोऽस्तीति** । [78] अनात्मनः अप्रियत्वे हेत्वन्तरमाह—**स्वत इति** । कथं तर्हि प्रियत्वम्, अत्राह—**प्रत्यगिति** । [79] किं (तादात्म्योप) [[1]तदाह्लाद]कारित्वमिति, त(त्प्रती)[त्प्री]तिहेतुत्वम्, इत्याह—**जा(द्या)[या]दिरिति** । [80] आत्मनोऽपि प्रियत्वमनवस्थितं वस्तुत्वाविशेषात्, अत्राह—**न कस्यांचिदिति** । [2]तत्र व्यतिरेकदृष्टान्तमाह—**प्रिय इति** । (81) अप्रियस्यानात्मनः [3]अन्यशेषत्वेनापि प्रियत्व(मु)[मयु]क्तं, अन्यस्यान्यत्वविरोधात्, अत्राह—**स्वत इति** । बन्ध(जी)[की]-वेश्या । (82) आत्मनः स्वतः प्रियत्वसाधनफलमाह—**निर्हेतुकीति** । (83) विषयसुखतत्साधनयोरनवस्थितत्वे—व्यासवाक्यं प्रमाणम्, इत्याह—(मो. ध. 168-20) **क्षयेति** ।

---

1. तदाह्लादकारित्वं—प्रत्यगाह्लादकारित्वम् ।
2. तत्र व्यतिरेकदृष्टान्तं—आत्मा अप्रियो न भवतीत्यत्र व्यतिरेकदृष्टान्तं अनात्मानम् ।
3. अन्यशेषत्वेन—आत्मशेषत्वेन ।
* भक्त्या—गौण्या वृत्त्या ।

न तदस्ति सुखं लोके यन्न दुःखकरं भवेत् ।
तदसंप्राप्तिविच्छेदक्षयेष्वसुखकृद्यतः ॥ (85)

एवं चेत्साधनोद्भूतं यावत्किञ्चित्सुखं मतम् ।
तन्निःशेषं परित्यज्य सुखमात्यन्तिकं श्रयेत् ॥ (86)

सांसारिकसुखस्यास्य दुःखत्वादुक्तहेतुतः ।
निष्कृष्यातस्ततः प्रीतिं प्रतीच्येव निवेशयेत् ॥ (87)

स्रजि दण्डादयो यद्वत् स्रगज्ञानैकहेतुकाः ।
पतिजायासुताद्येवं प्रत्यगज्ञानहेतुजम् ॥ (88)

सर्वानर्थनिवृत्तिश्च सर्वाह्लादाप्तिरेव च ।
प्रतीचि ज्ञानमात्राच्चेत् तदन्यत् प्रार्थ्यते कथम् ॥ (89)

यस्य संबन्धमाश्रित्य ह्यप्रियोऽपि प्रियायते ।
प्रियोऽप्यप्रियतां याति यस्य संगतिकारणात् ॥ (90)

दृष्ट्वाऽनुभवतस्तत्त्वमात्मानात्मपदार्थयोः ।
उपादित्सा जिहासा च तत्कृतैवानुपाल्यताम् ॥ (91)

---

(84) 'शीत(ल)मरपम्' (वा. 77) इत्यत्र सुखहेतोः दुःखहेतुत्वमुक्तम् । इदानीं सुखस्यापि दुःखहेतुत्वं वैराग्यार्थमाह—न तदिति । (85) विषयसुखस्य दुःखहेतुत्वे किं फलम्, अत्राह—एवं चेदिति । (86) सुखानुशयी रागः न विषयसुखादपनेतुं शक्यः, अत्राह—सांसारिकेति । (87) अनात्मनः अविद्योत्थत्वं यत् प्रागुक्तम्, तत् दृष्टान्तेनाह—स्रजीति । (88) आत्मज्ञानादेव [1]फलद्वयलाभात् अनात्मानं हित्वा आत्मन्येव प्रीतिं कुर्यात्, इत्याह—सर्वेति । (89) अनन्यशेषत्वे सति प्रियत्वेन पुमर्थत्वादात्मन्येव प्रीतिरुचिता, इत्याह—यस्येति । अनात्मनः अप्रियहेतोरपुमर्थत्वात् न प्रीतिरुचिता, इत्याह–(त्रि) [प्रि]योऽपीति । (90) उक्तेऽर्थे अनुभवं मानयति—दृष्ट्वेति । आत्मनि उपादित्सा पुमर्थत्वकृता [अनात्मनि अपुमर्थत्वकृता] जिहासा[च]कार्येत्यर्थः । (91) अनात्मसु

---

1. फलद्वयलाभादिति अनर्थनिवृत्तिः आनन्दावाप्तिः इति फलद्वयस्य लाभादित्यर्थः ।

नानाप्रकार आसङ्गो विषक्तो योऽस्य बाह्यतः ।
यथोक्तकारणात्सर्वं प्रतीच्येव निवेशयेत् ॥ (92)

नरकादिव निर्विण्णो यावन्ना ब्रह्मणो नरः ।
न तावदधिकारोऽस्ति कैवल्यज्ञानवर्त्मनि ॥ (93)

सर्वासङ्गविनिर्मुक्तो मोक्षमात्रप्रयोजनः ।
अतोऽधिक्रियते प्रत्यग्ज्ञानोत्पत्तौ न रागवान् ॥ (94)

आत्मा प्रत्यक् प्रसिद्धः स्यात् तत्रैवात्मानुभूतितः ।
इति प्रमेयनिर्देशः द्रष्टव्य इति तत्प्रमा ॥ (95)

वैराग्यं कुर्यादिति [1]प्रकरणार्थमुपसंहरति—नानेति । (92) वैराग्य[स्य]धीहेतुत्वं व्यतिरेकमुखेनाह—(का)[न]रकादिति । (93) अन्वयेनापि तत् साधयति—सर्वेति । (94) 'न वा अरे पत्युः' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यः' (अतः)[इत्यतः] प्राक्तनो ग्रन्थो व्याख्यातः । इदानीं [2]द्रष्टव्यवाक्यगतात्मपदार्थमाह—आत्मेति । आत्मनि प्रमेये वैदिकं दर्शनं मानमिति द्रष्टव्यपदे विवक्षितमित्यर्थः । (95)

'आत्मा द्रष्टव्यः' इत्यत्र दर्शनविधिरित्याक्षेपः, तत्परिहारश्च

तच्च मानं विहितमात्मनो ब्रह्मत्वबोधकमिति विधिवादिना मतं कश्चिदाक्षिपति—आत्मेति । स्वतःसिद्धेः न विधेयेति भावः । **विधिवादी** आह—

---

1. प्रकरणार्थमिति 'स होवाच, न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै, न वा अरे पुत्राणां, न वा अरे वित्तस्य, न वा अरे ब्रह्मणः, न वा अरे क्षत्रस्य, न वा अरे लोकानां, न वा अरे देवानां, न वा अरे भूतानां, न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति ।' इति श्रुतिवाक्यैः 'तदेतत्प्रेयः पुत्रात् प्रेयोऽन्यस्मात् सर्वस्मात्' इति वाक्यस्य वृत्तिस्थानीयैः आत्मन एव प्रियत्वोक्त्या' अनात्मसु वैराग्यं विद्याधिकारायोपदिष्टमिति एतत्प्रकरणार्थोऽवसेयः ।

2. द्रष्टव्यवाक्यं—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।' इति वाक्यम् ।

* आत्मबुद्धिरियं तावत्सर्वेषां जायते स्वतः ।
अप्राप्ता सर्वमात्मेति सैवातो धीर्विधीयते ॥ (96)

द्रष्टृद्रष्टव्ययोर्भेदे सत्येवं धीर्विधीयते ।
नियोज्यविषयाभेदे घटते न विधिर्यतः ॥ (97)

उत्तरोत्तरभूयांसि नामादीनि यथाक्रमम् ।
उपन्यस्यात्मयाथात्म्यं तत्तत्त्वं प्राब्रवीच्छ्रुतिः ॥ (98)

भूम्नश्च लक्षणं चक्रे यत्र नान्यदिति स्वयम् ।
अथ यत्रेति चाल्पस्य प्राणान्तस्य च लक्षणम् ॥ (99)

अप्राप्तेति । ब्रह्मधीरप्राप्ता विधेयेत्यर्थः । (96) ब्रह्मात्मनि ज्ञाते [धीर्विधेया] (आत्मनो) [अज्ञाते] वा । नाद्यः, इत्याह सिद्धान्ती—द्रष्टृेति । आ(द्या)[ज्या] वेक्षणादौ ज्ञातेऽपि विधिः [1]भेदात् स्यात् । [2]प्रकृते न तथा, भेदा[3]भावादित्यर्थः । (97) [4]तदभावं साधयति—उत्तरेति । [5]नामादीनि प्राणान्तानि तत्त्वानि उपन्यस्य पाठक्रममनतिलङ्घ्य पूर्वपूर्वापेक्षया उत्तरोत्तरमहत्वमुक्त्वा, तेषां स्वरूपं भूमाख्यात्ममात्रमुक्तवती 'भूमा त्वेव विजिज्ञासितव्यः' (छा. 7-23-1) इत्याद्या श्रुतिरित्यर्थः । (98) कोऽसौ भूमा, तमाह—भूम्नश्चेति । 'यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा' (छा. 7-24-1) इति भूमलक्षणस्य

---

* "तव्यप्रत्ययः विधायकोऽधिगतः । स च लोकप्रसिद्धात्मदर्शनं विधत्ते, ब्रह्मात्मेति ज्ञानं वा, इति विकल्प्य, आद्यं विधिवादी दूषयति—आत्मेति । द्वितीयमङ्गीकरोति —अप्राप्तेति ।" इति शास्त्रप्रकाशिका ।

1. भेदात्—द्रष्टृद्रष्टव्ययोः पत्न्याज्यद्रव्ययोः भेदात् ।
2. प्रकृते—आत्मा द्रष्टव्यः इत्यत्र ।
3. भेदाभावात्—द्रष्टृद्रष्टव्यभेदाभावात् ।
4. तदभावं—नियोज्यविषययोः द्रष्टृद्रष्टव्ययोः भेदाभावम् ।
5. नामादीनि प्राणान्तानीति नाम, वाक्, मनः, संकल्पः, चित्तं, ध्यानं, विज्ञानं, बलं, अन्नं, आपः, तेजः, आकाशः, स्मरः, आशा, प्राणः इत्येतानि तत्त्वानि भूमविद्यायामुपदिष्टानि ।

* अथात इति वाक्येन ह्यहमेवेति निश्चितेः ।
निषिध्यानात्मरूपं यत्ततोऽहंकारनिह्नुतिः ॥ (100)

आत्मैवेत्यादिवाक्येन पूर्णब्रह्मावबोधिना ।
नाविध्वस्तं तमोऽतोऽस्ति न च ज्ञानमनुत्थितम् ॥ (101)

नानिवृत्तस्तथाऽनर्थो नानवाप्तं सुखं तथा ।
कार्यज्ञेयसमाप्तिः स्यात् प्रत्यग्याथात्म्यबोधतः ॥ (102)

सर्वासूपनिषत्स्वेवं प्रमात्रादेरनात्मनः ।
प्रत्यङ्मात्रैकयाथात्म्यं श्रूयते सोपपत्तिकम् ॥ (103)

इहापि नेतिवाक्येन प्रतीचोऽतत्स्वभावकम् ।
व्युत्थापितमनूद्याह सर्वमात्मेति नः श्रुतिः ॥ (104)

भावाभावात्मना स्थानं न निषेध्यस्य वस्तुनः ।
यतोऽतः सर्वमात्मैव प्राब्रवीच्छ्रुतिरञ्जसा ॥ (105)

प्राणादावतिव्याप्तिः, अत आह—अथेति । 'अथ यत्रान्यत्पश्यत्यन्यच्छृणोति अन्यद्विजानाति तदल्पम्' (छा. 7-24-1) इति लक्षणमित्यर्थः । (99) ब्रह्मधिया अहमभिमानबाधाच्च न ज्ञाततत्त्वो विधियोग्यः, इत्याह—अथात इति । 'अथातोऽहंकारादेशः' (छा. 7-25-1) इति अहमात्मत्वं परस्योक्त्वा, अहंकारस्यापि बाधः दर्शितः 'अथात आत्मादेशः' (छा. 7-25-2) इत्यनेनेत्यर्थः । निषिध्यानात्मरूपं—देहाद्यात्मत्वं निरस्येत्यर्थः । आत्मज्ञानादखिलफलावाप्तेश्च न विध्यवकाशः, इत्याह—नाविध्वस्तमिति । (100-101-102) छान्दोग्योपनिषदर्थे सर्वोपनिषत्संवादमाह—सर्वास्विति । 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. 1-1-1) इत्याद्यास्वित्यर्थः । (103) बृहदारण्यकसंवादं दर्शयति—इहापीति । (104) [1]उदाहृतश्रुतेः तात्पर्यमाह—भावेति । (105)

---

* अथात इति पूर्वं नियोज्यविषयभेदाभावात् न दर्शने विधिः इत्युक्तम् । अत्र ज्ञानिनः अहमभिमानहीनस्य न नियोज्यत्वम् इत्युच्यते इति बोध्यम् ।

1. उदाहृतश्रुतेः—'सर्वमात्मा' इति श्रुतेः ।

* नाव्युत्थितमनाः कश्चित्प्रतीचोऽन्यत्प्रपश्यति ।
व्युत्थितात्मापि चात्मानं पश्यन्नेवान्यदीक्षते ॥ (106)

स्वातन्त्र्यं यत्र कर्तुः स्यात् तत्र कर्ता नियुज्यते ।
अन्वयव्यतिरेकाभ्यामात्मानात्मविवेचने ॥ (107)

वचोऽर्थप्रतिबोधस्य पदार्थाज्ञानमेव तु ।
यतोऽन्तरायस्तद्धानौ तेन तत्र नियुज्यते ॥ (108)

एवं ज्ञातपदार्थः सन् यथा पूर्वमवादिषम् ।
ब्रह्म वा इदमित्यत्र न्यायेनैकात्म्ययायिना ॥ (109)

ब्रह्मणि ज्ञाते विधिवैयर्थ्यात्, अज्ञाते [1]तदुद्देश्यायोगात् विध्यसंभवात्, पारिशेष्यात् लौकिकात्मज्ञानं विधेयं वाच्यम् । अत्र दूषणमाह—**नेति** । अव्युत्थितमनाः—स्वापादौ प्रतीचोऽनुत्पन्नमनाः, प्रत्यगात्मनोऽन्यमात्मानं वा न पश्य(ती)ति, येन विधिः स्यात् । व्युत्थितात्मा—अभिव्यक्तमनाः, स्वात्मानं पश्यन्नेव अन्यत्पश्यति । अतो लौकिकात्मधि(या)[योऽ]विधिसिद्धत्वात् न विधिरित्यर्थः । (106) ज्ञानस्याविधेयत्वे कस्य विधेयत्वमिति चेत्, आत्मानात्मविवेचनस्य, इत्याह—**स्वातन्त्र्यमिति** । (107) [2]हेतुमाह—**वचोऽर्थेति** । **तद्धानौ**—[3]वाक्यार्थप्रतिबन्धपदार्थाज्ञानध्वंसे इत्यर्थः । (108) [4]पदार्थधीश्चेत्, वाक्यार्थधियोऽप्यन्वयादिनैव सिद्धेः वाक्यवैयर्थ्यम्, अत्राह—**एवमिति** । ऐकात्म्यानुयायी न्यायः [5]ब्रह्मकण्डिकाया-

---

1. **तदुद्देश्यायोगादिति** ज्ञातमुद्दिश्याज्ञातस्य विधेयत्वात् इति भावः ।

* **अव्युत्थितमनाः**—स्वविषयत्वेनाप्रवृत्ताहंप्रत्ययः, सुप्त इति यावत् । **व्युत्थितात्मा**—अवस्थाद्वयसंबन्धी स्वविषयाहंप्रत्ययवानिति यावत् ।" इति **शास्त्रप्रकाशिका** ।

2. **हेतुमाह**—आत्मानात्मविवेचनस्य-पदार्थशोधनस्य विधेयत्वे हेतुमाह ।

3. **वाक्यार्थप्रतिबन्धपदार्थाज्ञानध्वंसे** इति वाक्यार्थबुद्धिप्रतिबन्धकं यत् पदार्थाज्ञानं, तद्ध्वंसे इत्यर्थः ।

4. **पदार्थधीश्चेत्**—पदार्थधीः जाता चेत् ।

5. **ब्रह्मकण्डिकायां**—तृतीये 'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेत्' इत्यादिकण्डिकाव्याख्यानावसरे इति यावत् ।

निरन्तरायो वाक्यार्थं वाक्यादेवावगच्छति ।
अव्यावृत्ताननुगतप्रत्यक्तत्त्वसमीक्षणात् ॥ (110)

नित्यमुक्तत्वविज्ञानं वाक्यादेवाञ्जसा भवेत् ।
वाक्यार्थस्य च विज्ञानं पदार्थस्मृतिपूर्वकम् ॥ (111)

अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥ (112)

प्रत्यङ्मोहोद्भवानात्मप्राधान्येन तमोऽन्वयात् ।
आत्माऽऽत्मानं पुराऽज्ञासीत् वाक्यार्थज्ञानजन्मनः ॥ (113)

* अनात्मतोऽत आत्मानमन्वयव्यतिरेकतः ।
निष्कृष्यात्मन्यथात्मानं सर्वमात्मेति पश्यति ॥ (114)

अज्ञातज्ञापनं चातो विधिरत्राभिधीयते ।
अप्रवृत्तप्रवृत्तिश्च न्यायाभावान्न युज्यते ॥ (115)

मुक्तः । तेन ज्ञातपदार्थः अधिकारीत्यर्थः । (109-110) [1]पदार्थधियो वाक्यार्थधीहेतुत्वे भाष्यकारसंमतिमाह—नित्येति । (111-112) वाक्यार्थधीहेतुपदार्थधियः स्वतःसिद्धत्वात् नान्वयाद्यपेक्षा, इत्याशङ्क्याह—प्रत्यगिति । आत्मा, पुरा, प्रत्यङ्मोहोद्भवानात्मप्राधान्येन—अविद्याकार्यदेहाद्यात्मत्वेन आत्मानमज्ञासीदित्यर्थः । (113) फलितमाह—अनात्मत इति । अथ—त्वंपदार्थज्ञानानन्तरमित्यर्थः । (114) आत्मानात्मविवेचने विधिरित्युक्तम् । इदानीं वाक्यार्थज्ञाने अज्ञातज्ञापनं विधिः स्वीक्रियताम्, इत्याह—अज्ञातेति । त्वदभिमतो नेष्यते इति विधिरयमेवान्वयादिव्यापारेऽपीति चकारार्थः । (115) वाक्यार्थधियो विधेयत्वा-

---

1. पदार्थधियः—अहमित्याकारिकाया धियः ।

* 'अनात्मनोऽतः' इति मु. पु. पाठः ।

नित्यं न भवनं यस्य यस्य वा नित्यभूतता ।
न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव ॥ (116)

* उत्पत्त्यादि स्वतो यस्य यस्य चात्यन्तमेव न ।
क्रियानपेक्षसिद्धित्वात् स्वतःसिद्धं तदुच्यते ॥ (117)

उत्पत्त्यादौ तु यच्छक्तं हेतुमात्रमपेक्षते ।
साफल्यं कर्मणस्तत्र तदभिव्यक्तिकृद्धि तत् ॥ (118)

कार्यं कारणतन्त्रं स्यात्ततस्तस्यात्मलाभतः ।
अन्यकार्यमकार्यं च नान्यत्कारणमीक्षते ॥ (119)

सर्वमात्मेति या बुद्धिः सा प्रमेयबलाद्भवेत् ।
प्रमातृतन्त्रा सा चेत्स्यात् प्राप्ता लोकाग्निबुद्धिवत् ॥ (120)

भावेऽपि स्वरू[1]पज्ञानस्य विधेयत्वं स्यात्, इत्याशङ्क्य, तन्निरासाय सामान्यन्यायं सदृष्टान्तमाह- नित्यमिति । (116) दार्ष्टान्तिके योजयति-(इ)[उत्प]त्त्यादीति । यस्य घटादिवत् उत्पत्त्यादि स्वतो नास्ति, यस्य चाकाशादिवदुपावितोऽपि न विद्यते, तत् आत्मवस्तु स्वतः- सिद्धमिति न विधेयमित्यर्थः । (117) क तर्हि विधिरिति, क्रियायाम्, इत्यभिसन्धायाह—उत्पत्त्यादाविति । (118) आत्म-तज्ज्ञानयोरविधेयत्वे हेत्वन्तरमाह—कार्यमिति । घटादि कार्यं स्वकारणतन्त्रम् । अकार्यं आकाशम् । अन्यकार्यं घटादि । पटकारणं नापेक्षते । तस्मादात्मस्व-रूपमकार्यत्वात्, तज्ज्ञानमन्यकार्य(त्व)[त्वात्] विधिं नापेक्षते इत्यर्थः । (119) आत्मधियः [2]प्रमाणवस्तुपारतन्त्र्यादन्यकार्यत्वं साधयति—सर्वमिति । (120)

---

1. स्वरूपज्ञानस्य—प्रत्यक्स्वरूपभूतस्य चैतन्यात्मकस्य ज्ञानस्य ।

* 'उत्पत्त्यादि स्वतो यस्य' इति वार्तिकस्य, "यद्वा, उत्पत्तिः आदिः यस्य सत्वस्य तत् यस्य स्वतोऽस्ति, यस्य च सर्वथैव न सत्वं, तत् आकाशं तत्पुष्पञ्च स्वतो विद्यमानमविद्यमानं चेति क्रियानपेक्षत्वात् विध्ययोग्यमिति पूर्वस्यैव प्रपञ्चः ।" इति व्याख्यान्तरं वर्णयति शास्त्रप्रकाशिका ।

2. प्रमाणवस्तुपारतन्त्र्यादिति प्रमाणपरतन्त्रत्वात् वस्तुतन्त्रत्वाच्चेत्यर्थः ।

अतोऽपुरुषतन्त्रत्वान्नात्मज्ञाने विधिर्भवेत् ।
अन्वयादिक्रियात्वस्य तत्तन्त्रत्वाद्विधीयते ॥ (121)

श्रवणं मननं तद्वत् तथा शमदमादि यत् ।
पुमान् शक्नोति तत्कर्तुं तस्मादेतद्विधीयते ॥ (122)

विशिष्टेहानुभूतिश्च सर्वमानफलं यतः ।
फलं च न विधेयं स्यादतो नेदं विधीयते ॥ (123)

प्रमाणमप्रमाणं च प्रमाभासं च यद्भवेत् ।
चैतन्याकारमेवैतत् प्रथते सर्वमेव तत् ॥ (124)

* नानाकारानुपादत्ते चैतन्याकारमेव सत् ।
प्रतीच्यव्यभिचार्येकं तदन्ये व्यभिचारिणः ॥ (125)

उपसंहरति—**अत इति** । (121) 'अन्वयादि'[इ]त्यत्र आदिपदार्थं विशदयति—**श्रवणमिति** । (122) सत्यादिलक्षणस्वरूपज्ञानस्याविधेयत्वे हेत्वन्तरमाह—**विशिष्टेति** । (123) प्रमाणादेश्चैतन्ये कल्पितत्वात् तत्राधिष्ठानत्वे(चा)[ना]त्मस्फुरणाच्च[1] न विधेयम्, इत्याह—**प्रमाणमिति** । (124) प्रमाणादेः कल्पितत्वं व्यभिचारित्वेन साधयति—**नानेति** । व्यभि[2]चारित्वस्य चैतन्ये व्यभिचारमाशङ्क्याह—**अव्यभिचारीति** । प्रतीचि एकं स्वरूपज्ञानमव्यभिचारीत्यर्थः । (125) (स्वरू)[स्वा]पादौ स्वरूपधियोऽपि व्यभिचारोऽस्ति, इत्य-

---

1. **न विधेयमिति** चैतन्यमिति शेषः ।

2. **व्यभिचारित्वस्य चैतन्ये व्यभिचारमाशङ्क्येति** कल्पितत्वसाधकतयोपन्यस्तस्य व्यभिचारित्वस्य हेतोः, कल्पितत्वरूपसाध्यशून्ये चैतन्ये सत्त्वेन व्यभिचारं हेतुदोषमाशङ्क्येत्यर्थः ।

* "तत्रैव (स्वरूपज्ञानस्याविधेयत्वे) हेत्वन्तरमाह—**नानेति** । **सद्वस्तु अखण्डं चिद्रूप**मेकमनेकविशेषालम्बनम् । अतः तस्य स्वतो निर्विशेषस्य न विध्यर्हतेत्यर्थः । तत्रैवोपपत्त्यन्तरमाह—**प्रतीचीति** । आत्मनि स्वरूपचैतन्यमेकरसं न व्यभिचारि । स्वरूपतो मिथश्चानात्मानो व्यभिचारिणः । अतः सदेकरूपे न विधिरित्यर्थः ।"
इति शास्त्रप्रकाशिका ।

मात्रादिव्यभिचारेऽपि संविद्व्यभिचारिणी ।
मिथः कृत्स्नेऽपि जगति तदन्यद्व्यभिचारि तु ॥ (126)

उत्पन्नमपि सद् ज्ञानं प्रमातृत्वाद्युपग्रहात् ।
तदनुत्पन्नवद्भाति तद्व्युत्पत्तेः पुरा नृणाम् ॥ (127)

व्युत्पाद्यते यदा साक्षाद्यथोक्तन्यायवर्त्मना ।
उत्पन्नमेव विज्ञान तदा प्रागपि मन्यते ॥ (128)

स्वसाक्षिकैव सर्वस्य न वेद्मीत्यपि या मतिः ।
किमु वेद्मीति बुद्धिः स्याच्चिदतोऽव्यभिचारिणी ॥ (129)

आत्मेति मेयनिर्देशः वैशब्दस्तत्स्मृताविह ।
प्रमातृक्रियया व्याप्तिर्द्रष्टव्य इति भण्यते ॥ (130)

शब्दानुरोधतस्तावदीदृगत्रोपजायते ।
श्रुतेरनुभवः साक्षात् यथावस्तु न वेति वा ॥ (131)

त्राह—मात्रादीति । तत्साधकत्वादित्यर्थः । (126) [1]विद्रूपश्चेदात्मा, तत् ज्ञानं सदास्तीति श्रवणादिविध्यानर्थक्यम्, अत्राह—उत्पन्नमिति । प्रमातृत्वाद्युपग्रहात्–मातृत्वादिपरिच्छेदाभिमानात् । तद्व्युत्पत्तेः—तेन श्रवणादिना ज्ञानोत्पत्तेः, पूर्वमित्यर्थः । (127) आत्मज्ञानस्य सदा सिद्धत्वधीः कदा स्यात्, अत्राह–व्युत्पाद्यत इति । प्रमातृत्वादिसंबन्धकृतपरिच्छेदाभिमाननिरासवर्त्मनेत्यर्थः । (128) स्वरूपज्ञानं व्यभिचारि ज्ञानत्वात् प्रमाणज्ञानवत्, अत्राह–स्वसाक्षिकेति । ज्ञाताज्ञातसाधकत्वादव्यभिचारित्वमित्यर्थः । (129)

'आत्मा द्रष्टव्यः' इत्यस्य यथाश्रुतार्थकथनं, तद्दूषणं च

'आत्मा द्रष्टव्यः' इत्यस्य विधिपरत्वं निरस्तम् । शब्दशक्त्या [2]प्रतीयमानार्थं निराकर्तुं दर्शयति—आत्मेति । दूषयति—यथेति । शब्दशक्तेरात्मनि

---

1. **विद्रूपः**—चिद्रूपः ।

2. **प्रतीयमानार्थमिति** 'आत्मा द्रष्टव्यः' इति वाक्यादित्यादिः ।

विचार्यमाणोऽनुभवो रूप्यशुक्त्यनुभूतिवत् ।
प्रमाणमप्रमाणं वा मेयसंगत्यसंगतेः ॥ (132)

प्रमातृमेयभेदोऽत्र न तावद्गम्यते मितेः ।
प्रत्यग्धीमात्रगम्योऽर्थः यस्मादात्मेति निश्चितः ॥ (133)

प्रत्यग्धीगोचरो नो चेदनात्मासौ घटादिवत् ।
ब्रह्मादिमध्यपातित्वं ततश्चास्य प्रसज्यते ॥ (134)

विभिन्नद्रष्टृदृष्ट्याप्तिर्घटादेरिव नात्मनः ।
न चाभेदेऽस्ति संव्याप्तिरैकात्म्यादेव कारणात् ॥ (135)

* न वा द्रष्टात्मनोऽन्योऽस्ति द्रष्ट्रन्तरनिषेधनात् ।
न च द्रष्ट्रोर्द्वयोर्लोके द्रष्टृदृश्यत्वसंगतिः ॥ (136)

मात्रादिविभागज्ञानं(ज्ञा)[ज्ञा]तं [1]मिथ्येत्यर्थः । तन्मिथ्यात्वोपपादनाय [2]वादिमतमाह—प्रमाणमिति । यथार्थबोधकं प्रमाणं अन्यथा बोधकं न मानमित्यर्थः । (130-131-132) किमतः प्रकृते स्यात्, अत्राह—प्रमात्रिति । अद्वयात्मनि द्वैतधीर्मिथ्येत्यर्थः । [3]अत्रैव हेत्वन्तरमाह—प्रत्यगिति । प्रत्यगेव धीः प्रत्यग्धीः, चैत(न्यैक)[न्यैक] गम्यत्वादात्मनो भेदो न मेय इत्यर्थः । घटस्यानात्मत्वमध्यस्तत्वात् न दृश्यत्वात्, अत्राह—ब्रह्मादीति । (133-134) अतो न [4]मातृज्ञानगम्यत्वम्, इत्याह—विभिन्नेति । यदि(त)[च]गम्यत्वं तदा प्रत्यक्षविषयत्वं, विधेयशाब्दधीगम्यत्वं वा । आद्ये, [5]स्वाश्रितक्रियाविषयत्वं [अन्याश्रितक्रियाविषयत्वं]वा । नाद्यः, इत्याह—न चेति । (135) द्वितीयं दूषयति—न वेति । [6]नान्योऽतोऽस्ति श्रुत्येति यावत् । द्रष्टृभेदमङ्गीकृत्याप्याह—न चेति । समत्वात् दीपयोरिवेत्यर्थः ।

---

1. मिथ्येति मिथ्याविषयकं - भ्रान्तिरिति यावत् ।
2. वादिमतमिति वादिनां संमतं प्रमाणाप्रमाणलक्षणमित्यर्थः ।
3. अत्रैव—द्वैतधियः मिथ्याविषयकत्वे एव ।
4. मातृज्ञानगम्यत्वमिति प्रमातुः यत् ज्ञानं तद्गोचरत्वमित्यर्थः ।
5. स्वाश्रितक्रियाविषयत्वं—स्वाश्रितदृष्टिक्रियाविषयकत्वम् । एवमुत्तरत्रापि ।
6. नान्योऽतोऽस्तिश्रुत्या—'नान्योऽतोऽस्ति द्रष्टा' इति श्रुत्या ।

* न च द्रष्टा इति मु. पु. पाठः ।

* क्रियाविरोधः प्राप्नोति द्रष्टुः स्वात्मसमीक्षणे ।
तद्दृष्टेर्नित्यसंप्राप्तेर्विध्यानर्थक्यसंगतिः ॥ (137)

संसार्यात्मनि दृष्टेऽपि न च किंचित्प्रयोजनम् ।
अयमेव च नोऽनर्थो यत्संसार्यात्मदर्शनम् ॥ (138)

तदन्यस्याप्रसिद्धेश्च कथं स्यात्तत्समीक्षणम् ।
अथ प्रसिद्धोऽसावात्मा तद्दृष्टिः किं विधीयते ॥ (139)

द्रष्टृदर्शनदृश्यानां प्रात्यक्ष्यान्नागमेक्षणम् ।
द्रष्टुरात्मा पृथक् चेत्स्यात् पृथगात्मेति दुर्वचः ॥ (140)

न चात्मन्यप्रसिद्धे स्यात्संसारस्य प्रसिद्धता ।
न ह्यप्रसिद्धसंबन्धी संबन्धः क्वचिदिष्यते ॥ (141)

* न चेदात्माभिसंबन्धः संसारोऽयं समीक्ष्यते ।
तन्मुमुक्षुत्वमायातं कुतो हेतोरितीर्यताम् ॥ (142)

---

(136) (अ)[आत्म]गम्यत्वे दोषान्तरमाह—**क्रियेति** । विधेयज्ञानमपि स्वाश्रित चेत्, विध्यानर्थक्यम्, इत्याह—**तद्दृष्टेरिति** । स्वकर्म[क]स्वदृष्टेः स्वाधीनतया सदा सिद्धेरित्यर्थः । (137) न सदा सिद्धत्वं, स्वोत्पत्तौ विधायकशब्दापेक्षत्वादिति चेत्, किं संसारिणो धीर्विधेया, असंसारिणो वा । नाद्यः, इत्याह—**संसारीति** । (138)द्वितीयमपवदति—**तदन्यस्येति** । (139) संसार्यात्मनो लोकसिद्धत्वाच्च न तद्धीर्विधेया, इत्याह—**द्र(ष्टे)[ष्टृ]ति** । द्रष्टुरन्योऽसावात्मेति, न लौकिकसिद्धः, अत्राह—**द्रष्टुरिति** । भिन्नस्यानात्मत्वादित्यर्थः । (140) आत्मनो लोकसिद्धत्वे युक्त्यन्तरमाह—**न चेति** । संसारस्य प्रसि[1]द्धपरतन्त्रत्वात् तदाश्रयत्वेनात्मा प्रसिद्धः इत्यर्थः । (141) संसारस्य बुद्धिधर्मत्वात् न तदाश्रयत्वेन आत्मसिद्धिः,

---

* क्रियाविरोध इति एकस्यामेव दृष्टिक्रियायां कर्तृत्वेन गुणत्वं, कर्मत्वेन प्राधान्यमिति विरोधः इत्यर्थः ।

1. प्रसिद्धपरतन्त्रत्वात्—परतन्त्रत्वेन प्रसिद्धत्वादिति यावत् ।

* न चेदिति आत्मनः असंसारित्वे मुमुक्षुत्वासिद्धिः, संसारमोक्षयोरेकाधिकरणत्वात् । न बुद्धिद्वारा आत्मन्यपि तत्संभवः, असङ्गस्य तदयोगात्, कल्पिते तु संबन्धे औपनिषदसिद्धान्तप्रवेश इति भावः ।

अनृतन्त्रे विधिर्नेष्टो वन्ध्यापुत्रोद्भवे यथा ।
मातृतन्त्रे तथैवायं न विधिः प्रत्यगीक्षणे ॥ (143)

नानाद्रव्यसमायोगे वियोगे च घटात्मनः ।
वियत्संपूर्णता नित्या वियत्सक्तेरवर्जनात् ॥ (144)

शब्दादिबाह्यसंबन्धे विभागे च तथा धियः ।
प्रत्यक्चैतन्यसंबन्धो नित्यो नित्यात्मसाक्षिकः ॥ (145)

यतोऽतः पाक्षिकी प्राप्तिर्नेहास्त्यैकात्म्यदर्शने ।
नियमः परिसंख्या वा न तेनेहोपपद्यते ॥ (146)

कर्मकाण्डे यथा मानं तथैवोपनिषत्स्वपि ।
विधिरेवानपेक्षत्वात् सापेक्ष्यात्राभिधाश्रुतिः ॥ (147)

मैवं, मानान्तराप्राप्तसम्यगैकात्म्यबोधतः ।
अभिधाश्रुतेः प्रमाणत्वं सुप्तोत्थापकवाक्यवत् ॥ (148)

इति कापिलमतं प्रत्याह—न चेदिति । (142) किञ्च आत्मज्ञाने अपूर्वविधिः, नियमः, परिसंख्या वा । नाद्यः, इति सदृष्टान्तमाह—अनृतन्त्र इति । नित्यप्राप्तेरित्यर्थः । (143) दृष्टान्तेनैव तदुपपादयति—नानेति । (144-145) नित्यप्राप्तेरेव, [1]परिशिष्टकल्पद्वयं [2]निरस्तम्, इत्याह—यत इति । (146)

सापेक्षत्वपरिहाराय विधिरङ्गीकार्यः इति शङ्का तत्परिहारश्च

सिद्धस्य मान्तरयोग्यत्वात् तन्निष्ठत्वे वाक्यस्य [3]सापेक्षतापातात् विधिरङ्गीकार्यः, इति शङ्कते—कर्मेति । (147) ब्रह्मात्मत्वस्य रूपादिहीनस्य प्रत्यक्षाद्यविषयत्वात्, तन्निष्ठं वाक्यमनपे(क्ष्य)[क्ष]म्, इति परिहरति—मैवमिति । (148)

---

1. परिशिष्टकल्पद्वयं—नियमविधिः, परिसंख्याविधिरिति पक्षद्वयम् ।

2. निरस्तमिति पाक्षिकप्राप्तेरभावेन नियमविधेः, अन्यत्र प्रसङ्गाभावेन तन्निवृत्तिफलकपरिसंख्याविधेश्चासंभवादिति भावः ।

3. सापेक्षतापातादिति अनपेक्षत्वलक्षणप्रामाण्योपपादनायेति शेषः ।

अकारकैकात्म्यमात्रं मेयं वस्त्विष्यते यतः ।
तदन्यस्य यतो मानात् व्यतिरेको न लभ्यते ॥ (149)

मुक्त्वैकात्म्यस्य चाज्ञानं नान्तरायान्तरं यतः ।
विधितन्त्रस्य कार्यत्वात् नाज्ञाने प्रभविष्णुता ॥ (150)

यथास्थितात्मवस्तूत्थज्ञानं मुक्त्वा तमोहृतौ ।
नान्यो हेतुर्यतस्तस्मान्न त्रय्यन्ते विधिः प्रमा ॥ (151)

नियोज्यस्य च नैश्वर्यं धीसम्यक्त्वं प्रतीष्यते ।
तस्य मेयैकहेतुत्वात् नैव स्यान्मातृतन्त्रता ॥ (152)

विधेरिवानपेक्षत्वं वेदान्तेष्वभिधाश्रुतेः ।
अनृतन्त्रत्वसामान्यात्तथातीन्द्रियबोधतः ॥ (153)

ऐका(त्म्य)[त्म्य]स्य नाभिधाश्रुतिमेयत्वं मात्राद्यभावात्, अत्राह—अकारकेति । व्यतिरेकः-भेदः न मानाल्लभ्यते यतः, अ(न)[त]स्तदन्यस्य न मेयत्वमित्यर्थः । (146) । वस्तुपरवेदान्तप्रामाण्योपपत्तावपि ब्रह्मात्मनो व्यवधायकप्रतिबन्धध्वंसार्थो विधिरेष्टव्यः, अत्राह—मुक्त्वेति । [1]अतो न तद्ध्वंसाय विधिरित्यर्थः । अज्ञाननिवृत्तिः वि(ह)[धि]तज्ञानफलम्, अत्राह—विधीति । कार्यत्वं-अमात्वम् । अतो नाज्ञाननिवृत्तौ सामर्थ्यमित्यर्थः । (150) कस्य तर्हि [2]तत्र सामर्थ्यम्, अत्राह—यथेति । (151) विधेयज्ञानस्य यागादिवत् प्राप्तमप्रामाण्यं परिहृत्य, पुमानेव प्रामाण्यं करिष्यति, इत्यत्राह—नियोज्यस्येति । (152) यत्तु वस्तुपरत्वे वाक्यस्य सापेक्षत्वादमात्वमिति, तत्राह—विधेरिति । [3]अपौरुषेयत्वसाम्यादतीन्द्रियबोधकत्वाच्चेत्यर्थः । (153) ब्रह्म मान्तरयोग्यं सिद्धत्वात् घटवत्, अत्राह—

---

1. अत इति विधितन्त्रस्य प्रमात्वाभावात् प्रमाया एवाज्ञाननिवर्तकत्वादित्यर्थः ।

2. तत्र—अज्ञाननिवृत्तौ ।

3. अपौरुषेयत्वसाम्यादिति विधिवाक्येनेत्यादिः ।

अक्षाद्यविषयं प्रत्यक् स्वतः सिद्धेरसाधनम् ।
* अभिधा बोधयन्तीयं नान्यत्किञ्चिदपेक्षते ॥ (154)

तस्माद्विधेः प्रमाणत्वं साध्यसाधनबोधने ।
अतीन्द्रिये तदन्येन ज्ञातुं शक्यं न यद्यतः ॥ (155)

* साध्यसाधनसंबन्धो न शक्योऽभिधया यथा ।
प्रतिपत्तुं स्वतः सिद्धोऽशक्यो विधिगिरा तथा ॥ (156)

ऐकात्म्यस्य स्वतः सिद्धेः न क्रियाऽपेक्ष्यते यतः ।
ततश्च भावनाभावः भावनायाः क्रियाश्रयात् ॥ (157)

विरहे भावनायाश्च न विधेस्तत्र मानता ।
स्वतःसिद्धार्थबोधित्वादभिधायास्तु मानता ॥ (158)

अक्षादीति । असाधनं—स्वविषयमानान्तरहीनं, रूपादिहीनत्वादिति यावत् । अन्यदिति—विधिमिति भावः । (154) सिद्धेऽर्थे विधिमात्रस्यानङ्गीकारात्, नियोगे [1]तन्मात्वस्य संबन्धग्रन्थे निरस्तत्वात्, इष्टसाधन एव(व)[त]न्मात्वमिति प्रसङ्गादाह—तस्मादिति । (155) विधिवाक्यं सिद्धे मानं मानत्वात् अक्षवत् इत्याशङ्क्य, अनुपलम्भविरोधमाह—साध्येति । (156) सिद्धे वस्तुनि विधेरमात्वे हेत्वन्तरमाह—ऐकात्म्यस्येति । यत्र क्रिया तत्र भावना—अनुष्ठानम् । [यत्र[2]सा] तत्र विधिः । अतो न सिद्धे विधिमात्वमित्यर्थः । फलितमाह—विर(ष्ट)[ह]इति । (157-158) तत्त्वमादिवचः सापेक्षं अभिधात्वात् [3]सरित्तीरादिवाक्यवत् इत्यनु-

---

* अविधायिका सिद्धार्थब्रह्मादिबोधिका श्रुतिः अभिधाश्रुतिः ।

1. तन्मात्वस्य—विधिवाक्यप्रामाण्यस्य ।

* 'विमतं विधिमानकं शास्त्रार्थत्वात् अग्निहोत्रवत् इत्याशङ्क्याह—साध्येति । अभिधाश्रुतेः ब्रह्मणि अबाध्याबुद्धासंदिग्धबोधधीविरुद्धा अनुमेति भावः ।' इति शास्त्रप्रकाशिका ।

2. यत्र सा—यत्र भावना ।

3. सरित्तीरादिवाक्यवत्—सरित्तीरे फलानि इति वाक्यवत् ।

सापेक्षत्वादमानं चेदभिधा लोकवर्त्मना ।
अभिधा तत्त्वमस्यादि सरित्तीरफलोक्तिवत् ॥ (159)

संहत्यनुपपत्तिश्च पदानामभिधाश्रुतौ ।
आख्यातपदहेतुत्वात्सर्वत्र पदसंहतेः ॥ (160)

न, आख्यातपदसद्भावात् स्यादेव पदसंहतिः ।
* अस्यस्म्याद्याख्यातपदमस्त्येवेहाभिधाश्रुतौ ॥ (161)

सरित्तीरे फलानीति युक्ताऽपेक्षाऽभिधाश्रुतेः ।
* प्रत्यक्षमानग्राह्यत्वात् फलतीरार्थसंगतेः ॥ (162)

प्रत्यक्षग्राह्य एषोऽर्थो न तदन्यप्रमाणकः ।
यतोऽतो नागमादेव तादृशेऽर्थे विनिश्चितिः ॥ (163)

* अपूर्वादिवचोऽर्थे तु न प्रत्यक्षाद्यपेक्षणे ।
प्रत्यक्षाद्यप्रमेयत्वादेकात्म्याख्यस्य वस्तुनः ॥ (164)

मानबलेन शङ्कते—सापेक्षत्वादिति । (159) विपक्षे पदानां मिथः संहत्यनुपपत्तिः, इत्याह—संहतीति । (160) समाधत्ते—नेति । (161) विपक्ष[1]बाधं परिहृत्य, [2]प्रकृतप्रयोगे मानान्तरगम्यार्थत्वमुपाधिः, इत्याह—सरिदिति । न तदन्यप्रमाणकः—तस्मात् प्रत्यक्षादेः अन्यत्—वाक्यम्, न केवलं वाक्यगम्यः [3]फलतीरसंसर्गार्थः इत्यर्थः । (162-163) तत्त्वमाद्यर्थः मान्त(रा)[र]गम्यः अभि[4]धानत्वात्

---

* अस्यस्म्याद्याख्यातपदमिति 'तत्त्वमसि' इत्यत्र असिपदं, 'अहं ब्रह्मास्मि' इत्यत्र अस्मिपदं, 'ब्रह्म वेद ब्रह्म भवति' इत्यत्र वेद, भवति इत्यादिकं आख्यातपदमस्तीत्यर्थः ।

1. विपक्षबाधं—पदसंहत्यनुपपत्तिरूपं बाधकम् ।

2. प्रकृतप्रयोगे—तत्त्वमादिवचः सापेक्षं, अभिधात्वादिति प्रयोगे ।

3. फलतीरसंसर्गार्थः—फलतीरयोः संसर्गरूपः अर्थः ।

* फलतीरार्थसंगतेरिति फलतीरयोः पदार्थयोः संबन्धस्येत्यर्थः ।

4. अभिधानत्वात्—अभिधाबोध्यत्वात् ।

* पूर्वोक्तस्य मानान्तरगम्यार्थत्वस्योपाधेः साधनाव्यापकत्वं 'अपूर्वादिवचोऽर्थे तु' इति वार्तिके प्रतिपाद्यते इति शास्त्रप्रकाशिकाकाराः ।

अपौरुषेयवाक्यत्वं समानमभिधाश्रुतेः ।
अतीन्द्रियार्थबोधित्वं समानं चोदनोक्तिभिः ॥ (165)

सिद्धसाध्यप्रमेयत्वभेदो यदि परं तयोः ।
प्रामाण्ये त्वतिशीतिस्तु न क्वाचिदपि दृश्यते ॥ (166)

प्रमोपजायते तावदहं ब्रह्मेत्यलौकिकी ।
तत्त्वमस्यादिवाक्येभ्यः श्रवणात्समनन्तरम् ॥ (167)

एवं चेदप्रमाणत्वं किमिवेहाभिधाश्रुतेः ।
विधेरपीह मानत्वं नोक्तन्यायातिरेकतः ॥ (168)

स्वशक्तिः सर्वमानानां यथा वस्त्ववबोधने ।
अभिधायाश्च साऽस्त्येव किमिति स्यादमानता ॥ (169)

सरित्तीराद्यर्थवत् इत्याशङ्क्य, अनात्मत्वमुपाधिः, इत्याह—अपूर्वेति । (164) किञ्च वेदान्ताः स्वार्थे मानं अपौरुषेयवाक्यत्वात् विधिवाक्यवत् इति [1]सत्प्रति-पक्षतामाह—अपौरुषेयेति । न च 'अग्निर्हिमस्य भेषजम्' इत्यादौ व्यभिचारः । अकर्मप्रकरणपठितत्वेन हेतोर्विशेषणात् अबाधितानवगतनिश्चितिकरणत्वाच्च, इत्याह—अतीन्द्रियेति । (165) निगमयति—सिद्धेति । परं—केवलमिति यावत् । (166) अबाधितानवगतनिश्चयहेतुत्व[2]मसिद्धम्, अत्राह—प्रमेति । (117) विपक्षे विधिवाक्यस्याप्यमानत्वप्रसक्तिर्बाधः, इत्याह—एवं चेदिति । 168) वेदान्ताः स्वार्थे मानं तद्धीसमर्थत्वात् अध्यक्षवत्, इत्याह—स्वशक्ति-रिति । (169) [3]प्रत्यक्षाविषयेऽपि ब्रह्मणि अनुमादिसंभवात्, [4]तत्सापेक्षत्वं

---

1. सत्प्रतिपक्षतामिति वेदान्तानां विधिपरत्वानुमानस्येति शेषः ।
2. असिद्धमिति अभिधाश्रुतेरिति शेषः ।
3. प्रत्यक्षाविषयेऽपीति रूपादिहीनत्वेनेत्यादिः ।
4. तत्सापेक्षत्वं—अनुमानसापेक्षत्वम् ।

नाप्यर्थेऽतीन्द्रिये सिद्धे मानं लिङ्गाद्यपेक्षते ।
योगिप्रत्यक्षमानं वा तयोरविषयत्वतः ॥ (170)

नेतीत्यस्थूलमित्यादिवाक्याद्यो योऽर्थोऽवगम्यते ।
योगिप्रत्यक्षगम्योऽयं न तत्प्रत्यकूत्वहेतुतः ॥ (171)

प्रत्यक्षानवताराच्च नानुमानेन मीयते ।
धर्मधर्म्यभिसंबन्धे नागृहीतेऽनुमा यतः ॥ (172)

यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
भवेदिदानीं लोकस्य तथा कालान्तरेऽप्यभूत् ॥ (173)

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
* दूरसूक्ष्मादिदृष्टौ स्यात् न रूपे श्रोत्रवृत्तिता ॥ (174)

योगिप्रत्यक्षमानादेर्न चेदैकात्म्यमेयता ।
तत्प्राप्तमपि किं कुर्यात् स्वात्मायोग्यासु भूमिषु ॥ (175)

---

[1]तन्निष्ठवचसाम्, अत्राह—**नापीति**। अस्मदाद्यप्रत्यक्षमपि योगिप्रत्यक्षगम्यमिति, तत्राह—**योगीति** । (170)[2]अविषयत्वं कुतः, अत्राह—**नेतीति** । [3]प्रत्यक्षानुमानयोरात्ममात्रत्वात् आत्मा न तद्विषयः इत्यर्थः । (171) अनुमानाविषयत्वे हेत्वन्तरमाह—प्रत्यक्षेति (172) । इदानींतनानामप्रत्यक्षमपि ब्रह्म युगान्तरवर्तिनां प्रत्यक्षं, [4]तदीयप्रत्यक्ष(स्य)स्यातिशयवत्त्वात्, अत्राह—**यदिति** । विमत न ब्रह्मविषय इन्द्रियत्वात् अस्मदादीन्द्रियवत् इत्यर्थः। (173) यत्तु त(दी)[दि]न्द्रियस्यातिशय[व]त्त्वात् इत्युक्तम्, तत्राह—**यत्रेति** । अतिशयवत्त्वादयोग्यविषयत्वे, (त)[श्रोत्र]स्य रूपग्राहकत्वप्रसक्तिरित्यर्थः । (174) एवं ब्रह्मणो

---

1. **तन्निष्ठवचसां**—ब्रह्मबोधकवाक्यानाम् ।
2. **अविषयत्वमिति** आत्मन इत्यादिः ।
3. **प्रत्यक्षानुमानयोरिति** सत्तास्फूर्तिप्रदत्वेनेति शेषः ।
4. **तदीयप्रत्यक्षस्य**—युगान्तरवर्तिनां प्रत्यक्षस्य ।

* **श्रोत्रवृत्तिता**—श्रोत्रप्रवृत्तिः—श्रोत्रग्राह्यत्वमिति यावत् ।

अक्षादिमेयासारूप्यादैकात्म्यं स्यान्न तत्प्रमम् ।
यथा विधेयासारूप्यान्नैकात्म्यं स्याद्विधेस्तथा ॥ (176)

संभाव्यते चेदक्षादि ह्यैकात्म्यार्थे फलादिवत् ।
न तद्वारयितुं शक्यं लोके विधिशतैरपि ॥ (177)

नासमीक्ष्य स्वसामर्थ्यं पुमान्विधिशतैरपि ।
प्रवर्ततेऽनपेक्षत्वं कुतो विधिवचः स्वतः ॥ (178)

अपाक्येषु नियुक्तोऽपि कृष्णलान् श्रपयेदिति ।
न तच्छक्तिं विना कश्चित्पुमांस्तत्र चिकीर्षति ॥ (179)

एवं चेदनपेक्षत्वं विधेः किमिति भण्यते ।
न भावनानपेक्षोऽसौ विधिर्यस्मात्प्रवर्तते ॥ (180)

योगिप्रत्यक्षाद्यविषयत्वमुपपाद्य, फलितमाह—**योगीति** । **प्राप्तमपि** ब्रह्मणीति शेषः । (175) प्रत्यक्षाद्यविषयत्वेऽपि वि(धे)[ध्येक]प्रमाणकत्वं धर्मवत् किं न स्यात्, अत्राह—**अक्षादीति** । (176) किञ्च ब्रह्मणः सिद्धत्वात् मान्तरविषयत्वप्रसक्तिपरिहाराय ज्ञाने(पि)[वि]धिस्त्वयेष्यते, [1]तत् विध्युपगमेऽपि दुर्वारम्, इत्याह—**संभाव्यत इति** । (177) एवं तत्त्वमा(दि)[दे]रनपेक्षत्वमुक्त्वा, विधेरेव सापेक्षतामाह—**नासमीक्ष्येति** । (178) विधेरधिकारिगतानुष्ठानशक्तिसापेक्षत्वे दृष्टान्तमाह—**अपाक्य इति** । यथा 'कृष्णलान् श्रपयेत्' इति [2]विक्लित्त्ययोग्येषु कृष्णलेषु नियुक्तः स्वशक्तिमनपेक्ष्य न पक्तुमिच्छति । किन्तु स्वशक्त्यपेक्षया तेषां पाके-संतापमात्रे घृते (स्र)[श्र]पयतीत्युक्तिसामर्थ्यात् अदृष्टार्थी प्रवर्तते । तथा सर्वत्र विधिविषये अधिकारिशक्तिः सहकारिणीत्यर्थः । (179) फलितमाह—**एवं चेदिति** । शक्तिसापेक्षत्वादनपेक्षत्वहानिरित्यर्थः । तत्त्वमादावपि अधिकारिशक्त्यपेक्षत्वम्, 'अधिकारिणः प्रमितिजनको वेदः' इति न्यायात्,

---

1. **तत्**—मान्तरविषयत्वम् ।

2. **विक्लित्तिः** — अवयवविश्लेषः ।

न भावनान्तरमियं न च मानान्तरं तथा ।
अपेक्ष्याभिधयैकात्म्यमवबोधयति श्रुतिः ॥ (181)

अतोऽनपेक्षता युक्ता सर्वदैवाभिधाश्रुतेः ।
अभिधानाभिधेयार्थज्ञानमेव व्यपेक्षते ॥ (182)

ज्ञानक्रिया प्रमातृस्था न यथावस्तुबोधकृत् ।
प्रमेयकर्तृकैवासौ यथावस्त्ववबोधिनी ॥ (183)

* न ह्यन्यदीयव्यापारे ह्यन्योऽशक्तेर्नियुज्यते ।
न ह्यग्निसाध्ये शोषादौ नियोगो घटतेऽम्भसः ॥ (184)

अत्राह—**नेति** । भावनापेक्षत्वं विधेरधिकमित्यर्थः । (180) तदेव स्पष्टयति—**न भावनान्तरमिति** । करणशक्तिसापेक्षत्वं मान्तरापेक्षत्वं च तत्राधिकम्, (जनि) [विधि]योगे शक्तिग्रहाय मान्तरस्यावश्यंभावादित्यर्थः । (181) उपसंहरति—**अत इति** । [1]तर्हि संगति[2]ज्ञाना(ना)पेक्षापि न स्यात्, अत्राह—**अभिधानेति** । (182) विधेयज्ञानस्याप्र(मेय)[माण]त्वेन प्रमेयासाधकत्वाच्च न ब्रह्मज्ञानं विधेयम्, इत्याह—**ज्ञानेति** । प्रमातृस्था—कर्तृतन्त्रा । यो[3]षिदग्निज्ञानवदित्यर्थः । **प्रमेयकर्तृका**—प्रमाणवस्तुपरतन्त्रेति यावत् । (183) मेयसिद्धिः प्रमाकार्यत्वात् नाप्रमासाध्या, इत्यत्र दृष्टान्तमाह—**न चेति** । (184) प्रत्यग्ब्रह्मभेदनिवृत्तिः विधेयधीफलमिति

---

1. **तर्हि**—सदा अनपेक्षत्वे ।
2. **संगतिज्ञानापेक्षा**—पदतदर्थयोः शक्तिरूपसंबन्धज्ञानापेक्षा ।
3. **योषिदग्निज्ञानवदिति** योषिति अग्निध्यानं मानसक्रियात्मकं ज्ञानं योषितः अग्नित्वे प्रमाणं न भवतीति बोध्यम् ।

* "तादृश्यपि ज्ञाने पुंसो नियोगः किं न स्यात्, इत्याशङ्क्याह—**न चेति** । पितृव्यापारे पुत्रस्य नियोगेऽपि पुंसो यत्र न स्वातन्त्र्यं तत्र नियोगो नेति हिशब्दार्थः । मानादिव्यापारे पुंसो न नियोगः अशक्तेः, इत्यत्र **दृष्टान्तमाह—न हीति** ।" इति **शास्त्रप्रकाशिका** ।
'न चान्यदीयव्यापारे' इति मु. पु. पाठः ।

ब्रह्मणोऽविद्यया योऽपि स्यादवच्छेद आत्मनः ।
* तदवच्छेदविध्वस्तौ न साधनमपेक्षते ॥ (185)

अनवच्छिन्नयाथात्म्यब्रह्मैकात्म्यादविद्यया ।
अवच्छिन्नवदाभाति क्षेत्रज्ञो रज्जुसर्पवत् ॥ (186)

न चाविद्यानिरास्यत्र प्रत्यग्याथात्म्यबोधतः ।
साधनं किंचिदापेक्ष्यं स्वर्गे यागादिवत् क्वचित् ॥ (187)

* न चापि मुख्यया वृत्त्या साध्येऽसति जगत्यपि ।
किंचित्साधनमित्येवं भण्यते लोकवेदयोः ॥ (188)

साध्यं च लोकतः सिद्धमुत्पत्त्यादि चतुष्टयम् ।
प्रमाणस्य न तन्न्याय्यं सिद्धार्थव्यञ्जकत्वतः ॥ (189)

चेत्, भेदः कल्पितः, अकल्पितो वा । आद्यं प्रत्याह—**ब्रह्मण इति** । साधनं-नियोग इत्यर्थः । (185) द्वितीयं दूषयति—**अनवच्छिन्नेति** । (186) भेदोपादानाविद्यानिवृत्तिः तर्हि विधेयधीफलम्, अत्राह—**न चेति** । (187) विधेयधी-साध्याभावेऽपि [1]तया भवितव्यम्, प्रतिबन्धकाभावात्, अत्राह—**न चापीति** । (188) तर्हि अन्यदेव किमपि साध्यं स्यात्, इति शङ्कानिरासाय साध्यस्वरूपमाह—**साध्यं चेति** । विधीयमानज्ञानस्यापि तेषा[2]मन्यतमत् साध्यं स्यात्, अत्राह—**प्रमाणस्येति** । (189)

---

* **न साधनमपेक्षते इति** ज्ञानादेव आविद्यावच्छेदध्वस्तिसिद्धेरित्यर्थः ।

1. **तया भवितव्यं**—विधेयधिया भवितव्यम् ।

* "जीवस्य ब्रह्मत्वसिद्धिः विहितज्ञानादिति ज्ञाने विधिरिति (तृतीयं) आशङ्क्याह—**न चेति** । ब्रह्मत्वं विद्यया साध्यमपि न मुख्यया वृत्त्या साध्यम् । न चासति मुख्ये साध्ये सर्वत्रापि व्यवहारे साधनमिति किंचिदुच्यते । तस्मात् साध्याभावात् न विधिरित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

2. **तेषामन्यतमत्**—उत्पत्त्यादीनां चतुर्णामन्यतमत् ।

* नात्मलाभातिरेकेण व्यञ्जकस्य मनागपि ।
संभाव्यतेऽपरं रूपमज्ञातत्वापनोदकृत् ॥ (190)

आत्माऽसामान्यरूपोत्थं न चाभूत्वोपजायते ।
* घटादिज्ञानवज्ज्ञानं भिन्नहेत्वनपेक्षतः ॥ (191)

स्थास्न्वनुभवमात्रत्वात् कार्यकारणवस्तुनः ।
अभूतभूतिर्नैवातो युज्यतेऽनुभवात्मनि ॥ (192)

प्रत्यगज्ञानहेतूत्था भावनेयं न तु स्वतः ।
प्रत्यग्याथात्म्यजिज्ञासोः कथं सा विषयो भवेत् ॥ (193)

क्रियाकारकभेदोऽयमज्ञातैकात्म्यवस्तुनः ।
तज्ज्ञानेऽसावसंभाव्यस्तद्धेतूच्छित्तिकारणात् ॥ (194)

---

[1]अभ्यस्यमानस्याविद्यानिवर्तकत्वात् अभ्यासे विधिः, अत्राह—**नात्मेति** । (190) तर्हि स्वरूपज्ञानं विधीयताम्, अत्राह—[आत्माऽ]**सामान्येति** । आत्मनोऽसाधारणं रूपं ज्ञानम् । उत्थं—वृत्तिव्यक्तमित्यर्थः । (191) हेत्वनपेक्षत्वं साधयति—**स्थास्न्विति** । (192) किञ्च ब्रह्म(ण)जिज्ञासोः विधिः, ज्ञानिनो वा । आद्ये श्रवणादौ, यागादौ वा । आद्यमङ्गीकृत्य चरमं प्रत्याह—**प्रत्यगिति** । भावना—वि(ह)[हि]तयागाद्यनुष्ठानम् । ब्रह्मजिज्ञासोः तत्फलरागाभावात् [2]शुद्धेश्च सिद्धत्वात् न संभवतीत्यर्थः । (193) [3]द्वितीयं दूषयति—**क्रियेति** । (194)

---

1. **अभ्यस्यमानस्येति** शाब्दज्ञानस्येति शेषः ।

* **नात्मलाभातिरेकेणेति** उत्पन्नमात्रादेव ज्ञानादज्ञानध्वंसः संभवतीति भावः ।

* **भिन्नहेत्वनपेक्षत इति** हेत्वनपेक्षत्वादकार्यं स्वरूपज्ञानं न विधेयमित्यर्थः ।

2. **शुद्धेश्च सिद्धत्वादिति** चित्तशुद्धेः ब्रह्मजिज्ञासायाः पूर्वमेव सिद्धत्वात्, तदभावे ब्रह्मजिज्ञासाया एवानुदयादिति भावः ।

3. **द्वितीयं दूषयति**—ज्ञानिनो विधिरिति कल्पं दूषयति ।

न चाविद्यासमुच्छित्तिर्ज्ञानोत्पत्त्यतिरेकतः ।
संसारनाशोऽविद्याया नाशान्न व्यतिरिच्यते ॥ (195)

न चाप्यविद्यानाशोऽत्र संसर्गः कारणात्मनि ।
तद्ध्वस्तेर्वस्तुवृत्तत्वात् मृदि लोष्टादिनाशवत् ॥ (196)

आदाय वास्तवं वृत्तं ज्ञानमज्ञाननाशकृत् ।
वस्तुयाथात्म्यवृत्तेन तमोऽपह्नूयते सदा ॥ (197)

अज्ञातज्ञापनं तस्माद्विधिरत्रोपपद्यते ।
अकृतस्य क्रिया त्वत्र विधिनैवोपपद्यते ॥ (198)

* द्वैविध्यं चाप्यविद्याया न च युक्त्यावसीयते ।
ऐकात्म्यमात्रवस्तुत्वादविद्यैकैव युज्यते ॥ (199)

---

[1]तद्धेतूच्छित्तिरसिद्धा, तदविरोधेन विद्योदयात्, अत्राह—न चेति । ज्ञानादेवाज्ञानहानेऽपि, [2]तत्कार्यनिवृत्तिः ज्ञानाभ्यासात्, अत्राह—संसारेति । (195) लोष्टादेर्मृदि संसर्ग इव अविद्यायाः स्वकारणसंसर्गो नाशः इति तन्निवृत्त्यर्थमभ्यासापेक्षा, अत्राह—न चेति । अज्ञाननिवृत्तेरात्ममात्रत्वादित्यर्थः । (196) तत्र हेतुमाह—आदायेति । वृत्तिरूपज्ञानस्य स्वरूपबोधबलेन अज्ञाननिवर्तकत्वात् स्वरूपबोधापेक्षया नित्यमज्ञाननिवृत्तिः विद्वदनुभवसिद्धेत्यर्थः । (197) प्रवर्तनात्मकं विधिं निरस्य, [3]अज्ञातज्ञापनं सः इत्युक्तमुपसंहरति—अज्ञातेति । (198)

अविद्याया न द्वैविध्यम्

द्विविधा अविद्या, आच्छादिका विक्षेपका च । तत्र आच्छादिकायाः ज्ञानमात्रात् ध्वस्तावपि, [4]इतरस्या निवृत्तिः विहितज्ञानात्, इत्यत्राह—द्वैविध्यं

---

1. तद्धेतूच्छित्तिः—क्रियाकारकभेदहेतूच्छेदः ।
2. तत्कार्यनिवृत्तिः—अज्ञानकार्यनिवृत्तिः ।
3. अज्ञातज्ञापनं सः—अज्ञातज्ञापनं विधिः ।
4. इतरस्याः—विक्षेपकाविद्यायाः ।
"अग्रहान्यथाग्रहाभ्यां द्विविधा अविद्या । तत्र आद्यायाः जन्ममात्रान्निवृत्तिः ।

प्रमेयभेदभिन्नत्वं ज्ञानानामिव भेदकम् ।
नाविद्याया यतोऽस्तीह द्वैविध्यं तेन दुर्घटम् ॥ (200)

प्रत्यगज्ञानमेवेह तदन्यद्वस्तुकारणम् ।
तदन्यकारणासत्त्वात् द्वैविध्यं तमसः कुतः ॥ (201)

न चाभ्यासाद्यपेक्षापि स्वतो मुक्तत्वकारणात् ।
न घटादेर्घटत्वादि घटाद्यभ्याससंश्रयम् ॥ (202)

न चाविषयविज्ञानमनाकारं च भाव्यते ।
भावकप्रत्यगात्मत्वादाकृतेश्च निषेधतः ॥ (203)

चेति । आश्रयविषयैक्यात् भेदकाभावादेकैवाविद्येत्यर्थः । (199) दृष्टान्तेनैतत् स्पष्टयति—**प्रमेयेति** । इह—आत्मनीति यावत् । (200) आत्माच्छादकाज्ञानादन्यत् जगत्कारणमज्ञानम्, एकस्य [1]द्विकरत्वायोगात्, अत्राह—**प्रत्यगिति** । 'इन्द्रो मायाभिः' (बृ. 4-5-19) 'मायां तु प्रकृतिं विद्यात्' (श्वे. 4-10) इति प्रत्यगविद्यैव जगत्कारणं गम्यते इत्यर्थः । (201)

ज्ञानाभ्यासे विधिशङ्का, तत्परिहारश्च

आत्मनो मु(क्ति)[क्त]त्वं ज्ञानाभ्यासात् इत्यभ्यासे विधिः, अत्राह—**न चेति** । यथा घटादेः घटादित्वं स्वाभाविकत्वात् न तत् ज्ञानाभ्यासापेक्षं, [2]एवमित्यर्थः । (202) किं च, सविषयं साकारं च तार्क्ष्यादिज्ञानमभ्यस्यते । तद्विपरीतत्वादात्मज्ञानेऽभ्यासासंभवात् न विधिः, इत्याह—**न चेति** । भावकः—अभ्यासकर्ता । तत्स्वरूपत्वादविषयत्वम्, अरूपमिति निषेधादनाकारत्वमित्यर्थः ।

द्वितीयस्या विहितज्ञानात्, इत्येके । तान्प्रत्याह—**द्वैविध्यं चेति** ।" इति **शास्त्रप्रकाशिका** ।

1. **द्विकरत्वायोगात्**—आत्माच्छादनं वियदादिविक्षेपश्चेति कार्यद्वयकारित्वायोगात् । एवञ्च जगत्कारणाज्ञानध्वंसो विहितज्ञानादित्याभासभावः ।

2. **एवमिति** आत्मनो मुक्तत्वं स्वाभाविकत्वात् न ज्ञानाभ्यासापेक्षमित्यर्थः ।

* नेन्द्रियेण ग्रहोऽस्यास्ति शब्दाद्यर्थानुपातिना ।
दुःखादिवच्च नैवात्मा चितेः स्वार्थैकरूपतः ॥ (204)

भावनोपचितं चेतो न च कैवल्यकारणम् ।
तस्येहैव समुच्छेदात्तद्धेत्वज्ञानहानतः ॥ (205)

स्वकार्यानुगामित्वं भावनाज्ञानकर्मणाम् ।
अकार्यकारणात्मत्वात् कैवल्येऽनुगतिः कुतः ॥ (206)

साक्षादात्मप्रसिद्धौ च नाभ्यासस्तत्फलस्थितेः ।
ज्ञानाभावादसिद्धौ च क्वन्वभ्यासव्यपेक्षणम् ॥ (207)

आत्मासामान्यरूपोत्थं ज्ञानमज्ञानमात्मनि ।
सकृज्जातं न चेद्धन्ति ज्ञानमेव न तद्भवेत् ॥ (208)

---

(203) किञ्च विषयरूपादिगुणविशेषनिषेधात् आत्मनः प्रत्यक्षत्वं परेष्टं निरस्तमिति प्रसङ्गादाह—नेन्द्रियेणेति । दुःखादे रूपादिरहितस्यापि मानसप्रत्यक्षत्ववत् आत्मनोऽपि, इत्यत्राह—दुःखादिवच्चेति । स्वप्रकाशत्वात्, अन्यथा अनात्मता स्यादित्यर्थः । (204) विहितज्ञानाभ्याससहितं मनः मुक्तिसाधनम् । अतो विधिः, इत्यत आह—भावनेति । तद्धि तत्रोपादानं, निमित्तं वा । नाद्यः, इत्याह—तस्येति । (205) द्वितीयं प्रत्याह—स्वकार्येति । अनुगतिः—निमित्तत्वेन संबन्धः । (206) [आत्मन्यवगते अभ्यासविधिः, अनवगते वा । आद्यं निरस्यति—साक्षादिति ।] द्वितीयमपवदति—ज्ञानेति । (207) उत्पत्तिमात्रेण ज्ञानस्याज्ञाननिवृत्त्यसामर्थ्यादभ्यासापेक्षा, इत्यत्राह—आत्मेति । (208)

---

* "किञ्च अध्यक्षस्यैव गरुडादेः ज्ञानमभ्यस्यते । आत्मज्ञानमप्यभ्यस्यते चेत्, आत्मनोऽध्यक्षत्वे वाच्ये, तस्य बाह्येन्द्रियेण मनसा वा ग्राह्यता, इति विकल्प्य, आद्यं प्रत्याह—नेति । द्वितीयं निराह—दुःखेति । ग्राह्यो मनसेति शेषः । तत्र हेतुः चितेरिति । स्वप्रकाशत्वात् स्वातन्त्र्याच्चेत्यर्थः ।" इति शास्त्रप्रकाशिका ।

सम्यग्ज्ञानं यदाश्रित्य तन्मोहोऽपि तदाश्रयः ।
अबाधितं तमोऽत्रास्ते इत्युक्तिर्जडवक्तृका ॥ (209)

इत्येवमादि यच्चोक्तं पूर्वमेवातिविस्तरात् ।
तत्कृत्स्नमनुसन्धेयं सर्वावकरहानिकृत् ॥ (210)

सर्वमात्मेत्यतः पश्येदात्मानात्मविभागवित् ।
आत्मा द्रष्टव्य इत्युक्त्या ह्येषोऽर्थोऽत्राभिधीयते ॥ (211)

सर्वमानप्रसक्तौ च सर्वमानफलाश्रयात् ।
श्रोतव्य इत्यतः प्राह वेदान्तावरुरुत्सया ॥ (212)

धीजन्ममात्रेणाविद्याध्वंसे, [1]तयोरेका[2]श्रयत्वेन विरोधं हेतुमाह—**सम्यगिति** । (209) कार्यान्वयविषयत्वात् पदशक्तेः, वेदान्ते विधिरभ्युपेयः इत्याशङ्क्य, [3]**संबन्धादावुक्तं** तन्निराकरणमनुसन्धेयम्, इत्याह—**इत्येवमिति** । अवकरः—दोषः, शङ्क्यमानविधिप्रकार इति यावत् । (210) सर्वप्रकारविधेरभावे [4]द्रष्टव्य-श्रुतेः [5]का गतिः, तामाह—**सर्वमिति** । [6]यतो न विधिसंभवः, अतः सर्वस्य आत्ममात्रत्वबोधकमित्यर्थः । (211)

'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्यर्थनिरूपणम्

'[7]श्रोतव्यः' इत्यस्य तात्पर्यमाह—**सर्वेति** । 'द्रष्टव्यः' इति मानफल-दर्शनप्रतीतौ, तत्साधनत्वेन सर्वमानप्रसक्तौ, वेदान्तानामेवात्र हेतुत्वप्रतिपादनाय

---

1. **तयोः** — ज्ञानाज्ञानयोः ।
2. **एकाश्रयत्वेन विरोधमिति** एकस्मिन्नाश्रये सहानवस्थानेन विरोधमिति यावत् ।
3. **संबन्धादौ**—संबन्धग्रन्थादौ ।
4. **द्रष्टव्यश्रुतेः** — द्रष्टव्यः इति श्रुतिवाक्यस्य ।
5. **का गतिः** — को विषयः ।
6. **यतो न विधिसंभव इति** तथा च द्रष्टव्यः इत्यस्य दर्शनार्ह इत्यर्थः । अर्हार्थे तव्यप्रत्ययः इति भावः ।
7. **श्रोतव्य इत्यस्येति** "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ।" इति श्रुतिवाक्यमनुसन्धेयम् ।

दर्शनस्याविधेयत्वात्तदुपायो विधीयते ।
वेदान्तश्रवणं यत्नादुपायस्तर्क एव च ॥ (213)

* श्रुतिलिङ्गादिको न्यायः शब्दशक्तिविवेककृत् ।
आगमार्थविनिश्चित्यै मन्तव्य इति भण्यते ॥ (214)

वस्तुतत्त्वविवक्षेह मन्तव्य इति शासनात् ।
योषिदग्न्यादिदृष्टौ हि नैव मन्तव्यताविधिः ॥ (215)

वेदशब्दानुरोध्यत्र तर्कोऽपि विनियुज्यते ।
वाच्यवाचकसंबन्धनियमे तस्य हेतुता ॥ (216)

अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते ।
पूर्वयोरवधित्वेन तदुपन्यास इष्यते ॥ (217)

श्रोतव्यवाक्यमित्यर्थः । (212) [1]अस्यैवार्थान्तरमाह—**दर्शनस्येति** । (213) किं तत् श्रवणमिति, तत्राह—**श्रुतीति** । श्रुत्यादिभिः वेदान्तानां ब्रह्मात्मनि तात्पर्यनिरूपणं श्रवणमित्यर्थः । मन्तव्य[वाक्य]स्य तात्पर्यमाह—**आगमेति** । आद्यन्तवत्त्वादिहेतुभिः द्वैतस्य मिथ्यात्वोपपादनं मननं विधीयते इत्यर्थः । (214) वेदान्तानां ब्रह्मात्मनि तात्पर्यनिरूपणमयुक्तम्, उपासनादिनियोगपरत्वात्, अत्राह—**वस्त्विति** । (215) मननं-तर्कः । न [2]तस्य धीहेतुत्वम्, 'नैषा तर्केण मतिरापनेया' (का. 1-2-9) इति निषेधात्, अत्राह—**वेदेति** । तस्य कुत्रोपयोगः, तमाह—**वाच्येति** । तत्पदसहपठितत्वंपदवाच्यं देहाद्यहंकारान्तव्यतिरिक्तकूटस्थप्रत्यक् चैतन्यम् । तथा तत्पदवाच्यमपि प्रधानाद्यतिरिक्तमपरोक्षनिरतिशयानन्दप्रत्यग्भूतम् । इत्येवंविधवाच्यवाचकनियमे [3]तर्कस्य व्यापारः इत्यर्थः । (216) निदिध्यासनपदार्थमाह—**अपरायत्तेति** । मनो(रथादि)व्या-

---

1. **अस्यैव**—श्रोतव्यः इति वाक्यस्यैव ।

* **शब्दशक्तिविवेककृदिति** शब्दस्य तात्पर्यशक्तेः विनिर्णायक इत्यर्थः ।

2. **तस्य**—तर्कस्य ।

3. **तर्कस्य व्यापार इति** तथा च करणस्य वेदशब्दस्य मननाख्यस्तर्कः इतिकर्तव्यतेत्यर्थः ।

श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नतः ।
यावद्यथोक्तं विज्ञानमाविर्भवति भास्वरम् ॥ (218)

*** आगमाद्दर्शनं पूर्वमागमाचार्यतो मतिः ।**
त्रयाणामपि संगानाच्छास्त्राचार्यात्मनां स्थिरम् ॥ (219)

*** प्रतिपत्तिः पुरा शाब्दी यावन्न मनुते श्रुतम् ।**
श्रुत्वा मत्वाऽथ तं साक्षादात्मानं प्रतिपद्यते ॥ (220)

पारनिरोधात् विशिष्टाधिकारि(णो)[णा] अयत्नं साध्यते इति सजातीयप्रत्ययप्रवाहः अपरायत्तबोधः इत्यर्थः । निदिध्यासनोपन्यासः किमर्थः, अत्राह—**पूर्वयोरिति** । (217) [1]तमेवावधिमाह—**श्रवणेति** । अहं ब्रह्मास्मीति ज्ञानं विजातीयप्रत्ययानन्तरितं यावदुत्पद्यते, तावत् श्रवणमननयोरनुष्ठेयत्वमित्यर्थः । अपरोक्षब्रह्मधीरेव निदिध्यासनमिति मते निश्चयफलज्ञानोत्पत्तिपर्यन्तमित्यर्थः । (218)

निदिध्यासनपदार्थे पक्षभेदेन दर्शनादीनां क्रमोपन्यासः

[2]दर्शनादेः क्रममाह —**आगमादिति** । साङ्गादधीतवेदात् विचारप्रयोजकं ज्ञानमादौ जायते । तदनन्तरं आगमाचार्याभ्यां श्रवणमनुतिष्ठति । ततो मतिं—मननमनुतिष्ठति । मतेरनन्तरं शास्त्राचार्यात्मनां—शास्त्राचार्यौ—श्रवणम्, आत्मा—मननम् । तेषां(प)[त्र]याणां सङ्गात्—श्रवणमननयोः परिपूर्णानुष्ठानात् दर्शनं स्थिरं भवति । विचारप्रयोजकमापातदर्शनं असंभावनाविपरीतभावनाभिभवादस्थिरमिव स्थितं, तयोः श्रवणमननाभ्यां निरस्तत्वात् स्थिरं निदिध्यासनाभिधं भवतीत्यर्थः । (219) अपरोक्षधीः निदिध्यासनमिति पक्षे क्रममुक्त्वा, ध्यान

---

1. **तमेवावधिं**—श्रवणमननयोरनुष्ठानावधिम् ।
2. **दर्शनादेः क्रममिति** अपरोक्षब्रह्मधीः निदिध्यासनपदार्थः इति पक्षे इत्यादिः ।

* **आगमादिति** विचारप्रयोजकमापातदर्शनं 'द्रष्टव्यः' इत्यत्रोच्यते इति भावः । आत्मधीहेतुत्वात् आत्मशब्देनात्र वार्त्तिके मननं विवक्षितम् ।

* "न श्रौतोऽयं क्रमः, किन्तु आर्थोऽपीत्याह—**प्रतिपत्तिरिति** यावत् न श्रुतं मनुते तावत् शृणोतीति शेषः । विशिष्टस्य श्रवणादेः साक्षादात्मप्रतिपत्तौ सामग्रीत्वं द्योतयितुमथशब्दः ।" इति **शास्त्रप्रकाशिका** ।

अनन्यायत्तविज्ञाने श्रवणादेरुपायतः ।
जाते नापेक्षते किञ्चित् प्रतीचोऽनुभवात्परम् ॥ (221)

साध्यसाधनसंबन्धे शास्त्रापेक्षैव नापरा ।
लिङ्गापेक्षाऽनुमेयेऽर्थे नरापेक्षा नरोचिते ॥ (222)

भिन्नमात्रादिविज्ञाने सापेक्षैव विनिश्चितिः ।
एकमात्रादिके त्वस्मिन् कः किं कस्मादपेक्षते ॥ (223)

प्रमाणरूपावष्टम्भात्प्रमा पूर्वं प्रजायते ।
पश्चात्प्रमेयनिष्ठैव प्रमेयार्थानुरोधिनी ॥ (224)

आत्मात्मानं विजानाति यत्र वाक्यादिमानतः ।
तत्र मात्रादिसंभेदो न मनागपि लभ्यते ॥ (225)

निदिध्यासनमि[1]त्यत्रापि [2]तमाह—**प्रतिपत्तिरिति** । [3]अथशब्दात् तस्य मतस्य ध्यानानन्तरम्, साक्षात् जानातीत्यर्थः । (220) वाक्यादुत्पन्नज्ञानस्य श्रवणाद्यपेक्षा चेत्, श्रवणादितो ज्ञानोत्पत्तावपि एतदनुष्ठेयमपेक्ष्यं स्यात्, अत्राह—**अनन्येति** । ब्रह्मात्मानुभवातिरिक्तं न वाञ्छतीत्यर्थः । (221) यत् यत्रोचितं तदेव तत्र अपेक्ष्यमिति नियमात् मोक्षे ज्ञानमेवापेक्ष्यमिति मत्वा, आह—**साध्येति** । (222) ब्रह्मधीः सापेक्षा वैदिकार्थधीत्वात् (त) [4]धर्मधीवत् इत्याशङ्क्य मात्राद्यनुपमर्देन जायमानधीत्वमुपाधिः, इत्याह—**भिन्नेति** । एकः—न भिन्नः, मात्रादिः यस्मात् ज्ञानात् तदेकमात्रादिकम् । (223) [5]अनात्मधियः मात्राद्यनुपमर्देनोत्पत्तिं दर्शयति—**प्रमाणेति** । (224) [6]उपाधेः

---

1 **इत्यत्रापीति** पक्षे इति शेषः ।

2. **तं**—क्रमम् ।

3. **अथशब्दादिति** 'श्रुत्वा मत्वा' इति क्त्वान्तेनैव श्रवणमननानन्तर्यस्य लाभात्, पुनः अथशब्दोपादानात् मतस्य ध्यानानन्तर्यं अथशब्दार्थ इति भावः ।

4. **धर्मधीवदिति** तस्या धियः अनुष्ठानसापेक्षत्वं दृष्टम् ।

5. **अनात्मधिय इति** मात्राद्यनुपमर्देन जायमानधीत्वस्योक्तोपाधेः साध्यव्यापकतोपपादनायेत्यादिः ।

6. **उपाधेः**—मात्राद्यनुपमर्देन जायमानधीत्वस्य ।

पदार्थविषयस्तर्कस्तथैवानुमितिर्भवेत् ।
वाक्यार्थप्रतिपत्तिस्तु वाक्यादेवाभिजायते ॥ (226)

आत्मानात्मत्वमात्रं हि लिङ्गाद्वस्तुषु गम्यते ।
सर्वमानातिवर्त्यात्मा वाक्यादेवावगम्यते ॥ (227)

नन्वकृत्स्नं भवेत् ज्ञानं यद्यात्मैव समीक्ष्यते ।
केवलोऽनात्मनोऽदृष्टेः प्रतीचोऽन्यस्य वस्तुनः ॥ (228)

नायमन्योऽथवाऽनन्यः प्रत्यगज्ञानजत्वतः ।
दण्डसर्पादिवद्रज्ज्वां स्वतोऽपूर्वादिमान्यतः ॥ (229)

यतोऽतो दृष्ट एतस्मिन् प्रत्यगात्मनि केवले ।
नास्ति ज्ञानमनुत्पन्नं नाप्यध्वस्तं तथा तमः ॥ (230)

प्रत्यङ्मात्रैक्ययाथात्म्यात् कार्यकारणवस्तुनः ।
तज्ज्ञानात्किं तमोऽध्वस्तं किं वाऽज्ञानं वदात्मनः ॥ (231)

साधनव्याप्तिं परिहरन्, आत्मधियः मात्र द्युपमर्दकत्वमाह—**आत्मेति** । (225) '[1]वाक्यादिमान[तः]' इत्युक्तत्वात् [2]औपनिषदत्वमात्मनो न स्यात्, अत्राह—**पदार्थेति** । (226) प्राणनादि लैङ्ग दात्मा गम्यते, इत्यत्राह—**आत्मेति** । (227) वाक्यजज्ञानस्यात्ममात्रविषयत्वे, 'तं न पश्यन्ति अकृत्स्नो हि सः' (बृ. 3-4-7) [3]निषिद्धदर्शनं स्यात्, इति शङ्कते—**नन्विति** । (228) द्वैतस्य [4]अविद्याध्यस्तत्वात् नैवम्, इत्याह—**नायमिति** । (229) सर्वस्यात्ममात्रत्वे फलितमाह—**यत इति** । (230) उक्तहेतुं स्पष्टयति—**प्रत्यगिति** । (231)

---

1. **वाक्यादिमानतः इत्युक्तत्वादिति** तत्र आदिपदोपादानात् वाक्यातिरिक्तस्य मानान्तरस्योक्तत्वादिति भावः ।
2. **औपनिषदत्वमिति** उपनिषदेकसमधिगम्यत्वमित्यर्थः ।
3. **निषिद्धदर्शनमिति** आत्ममात्रज्ञानस्य अनात्माविषयत्वेन अकृत्स्नदर्शनत्वादिति भावः ।
4. **अविद्याध्यस्तत्वात्**—अविद्याकार्यत्वात्, अथवा अविद्यया आत्मनि अध्यस्तत्वात् ।

अनुवादे यथोक्तानां प्रक्रान्ते दर्शनादिषु ।
विज्ञानेनेत्यथ कथं निदिध्यासनमुच्यते ॥ (232)

ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते ।
निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः ॥ (233)

विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम् ।
स्वार्थमेव तु विज्ञानं मुक्तिमात्रफलं स्मृतम् ॥ (234)

'आत्मनो वा अरे दर्शनेन' इत्यादिवाक्यार्थनिरूपणम्

'[1]आत्मनः' इत्याद्यनुवादवा(क्य)[क्ये] दर्शनादीन् स्वशब्देनानूद्य, [2]निदिध्यासनस्य विज्ञानशब्देनानुवादे अभिप्रायं पृच्छ[ति—अ]**नुवाद इति**। **दर्शनादि[षु]** मध्ये इति शेषः । (232) अभिप्रायमाह—**ध्यानेति** । चित्तनिरोधो निदिध्यासनमिति शङ्कावारणार्थमित्यर्थः । (233) 'निदिध्यासितव्यः' इति [3]ज्ञान-ग्रहे निदि[4]ध्या(सित)[सन]स्य ज्ञानसाधनत्वं निरस्तं स्यात्, अत्राह—**विज्ञानेति** । चित्तनिरोधस्य धीसाधनत्वेन विधेयत्वं संबन्धग्रन्थादारभ्य तत्र तत्रोक्तम् । [5]इहापि 'श्रुत्वा मत्वाऽथ तं साक्षात्' (वा. 220) इत्यत्र धीसाधनत्वमुक्तमित्यर्थः । एतौ चोद्यपरिहारौ निदिध्यासनशब्दस्य धीविषयत्वे द्रष्टव्यौ । अतो वाक्यशेष-बलात् विज्ञानमेव निदिध्यासनं स्मृतम्, इत्याह—**स्वार्थमिति** । (234)

---

1. **आत्मन इत्याद्यनुवादवाक्ये**—'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' इति दर्शनश्रवणादीनामनुवादके वाक्ये ।

2. **निदिध्यासनस्येति** 'विज्ञानेन' इति विज्ञानक्रमप्राप्तनिदिध्यासनमेवोच्यते इत्यर्थः ।

3. **ज्ञानग्रहे**—स्थिरापरोक्षब्रह्मधीपरिग्रहे ।

4. **निदिध्यासनस्य**—चित्तनिरोधस्य ।

5. **इहापीति** 'समाहितो भूत्वा' इति श्रुतेः ध्यानस्य (निदिध्यासनस्य) विधेयत्वं विदधतीति शास्त्रप्रकाशिकाकाराः । 'श्रुत्वा मत्वाऽथ' इति वार्तिके ध्यानस्य वाक्यार्थज्ञानहेतुतायाः प्रतिपाद्यतया तैरनभिधानात् इति बोध्यम् ।

ऐकात्म्याज्ञानविध्वंसव्यतिरेकेण नेष्यते ।
ऐकात्म्यविज्ञानफल प्राप्तमेव हि तत् स्वतः ॥ (235)

यतोऽनवयवेनैव रज्जुसर्पादिवत्तथा ।
* आत्माऽयं संगतिं याति तन्मोहाध्यस्तरूपिणा ॥ (236)

आत्मा तत्त्वं विभक्तस्य प्रमात्रादेरनात्मनः ।
स्वतः सिद्धस्तदज्ञानसमुत्थस्य मृषात्मनः ॥ (237)

आत्मज्ञानप्रमेयाच्च नान्यस्तज्ज्ञानकृद्यतः ।
अनन्यमातृमानोऽतः प्रत्यगात्मा तमोऽपनुत् ॥ (238)

अज्ञानोत्थमनूद्यातो मिथ्याक्लृप्तमशेषतः ।
इदं ब्रह्मेति वचसा सर्वमात्मेति नोऽवदत् ॥ (239)

धीफलत्वे मुक्तिरनित्या स्यात्, अत्राह—**ऐकात्म्येति** । (235) सकार्यस्याज्ञानस्य धीबाध्यस्य आत्मनोऽन्यत्वादद्वैतहानिः, अत्राह—**यत इति** । अतो न भेदः इत्यर्थः । (236) तथापि कल्पितस्य कथमात्मा तत्त्वम्, अत्राह—**आत्मेति** । भिन्न[1]त्वात् जडत्वाच्च स्वतःसि(द्धेः)[द्धः] कल्पितस्याधिष्ठानं तत्त्वमित्यर्थः । (237) [2]ब्रह्मज्ञानस्य घटज्ञानवत् भिन्नाश्रयत्वादद्वैतहानिः, अत्राह—**आत्मज्ञानेति** । अविद्यादशायां ज्ञातृत्वादित्यर्थः । ज्ञानस्य ज्ञेयब्रह्मणोऽन्यत्वादद्वैतव्याघातः, अत्राह—**अनन्येति** । प्रत्यगात्मैव वृत्तिव्याप्तः अविद्यानिवर्तक इत्यर्थः । (238) सर्वस्य आत्मा तत्त्वमित्येतत् तर्कितम्, न प्रमितमिति चेन्न, वक्ष्यमाणवाक्यमितत्वात्, इत्याह—**अज्ञानेति** । अतः—सर्वस्यात्ममात्रत्वादिति यावत् । (239)

---

* **संगतिं**—तादात्म्यम् ।

1. **भिन्नत्वात् जडत्वाच्चेति** कल्पितस्येत्यनेनान्वेति । भिन्नत्वात् जडत्वाच्च कल्पितस्य स्वतःसिद्धः (आत्मा) अधिष्ठानं तत्त्वम् इति योजना ।

2. **ब्रह्मज्ञानस्येत्यादि** घटज्ञानं घटभिन्ने मातरि तिष्ठति । एवमेव ब्रह्मज्ञानमपि प्रमेयब्रह्मभिन्नमातरि वर्तते इति वक्तव्यम् । तथाच मातुः (ज्ञानकर्तुः) ब्रह्मभिन्नस्य स्वीकारात् अद्वैतहानिः इति समुदायभावः ।

आत्मधीमात्रगम्यार्थाद्यस्तदन्योऽत्रभासते ।
तद्दर्शननिषेधार्थं ब्रह्मेत्याह परा श्रुतिः ॥ (240)

समस्तव्यस्तता तस्मान्नैवेह श्रुतिमानतः ।
अनात्मबुद्धिविषयं यतो यत्नान्निषेधति ॥ (241)

कार्यात्मा कारणात्मा च द्वावात्मानौ परात्मनः ।
प्रत्यग्याथात्म्यमोहोत्थौ तन्नाशे नश्यतस्ततः ॥ (242)

* अपूर्वानपरोक्ते हि कार्यकारणतात्मनः ।
कुतः प्रमाणात्संभाव्या कार्यकारणघस्मरे ॥ (243)

नैतस्माज्जायते किञ्चित् नायं जातः कुतश्चन ।
आत्मेत्येवं श्रुतिर्वक्ति कारणादिनिषेधकृत् ॥ (244)

षष्ठकण्डिकार्थनिरूपणम्

'ब्रह्म तं परादात्' इत्यादेस्तात्पर्यमाह—**आत्मेति** । स्वयंप्रकाशादित्यर्थः । (240) निषे[1]धस्य [2]अवान्तरफलमाह—**समस्तेति** । (241) ब्रह्मणः कार्यकारणरूपत्वात् न भेदाभेदनिषेधः, इत्यत्राह—**कार्येति** । कार्यादिरूपमाविद्यकत्वात् विद्यया बाध्यमित्यर्थः । (242) अत्र[3] मानमाह—**अपूर्वेति** । अपूर्वादिवाक्योक्ते ब्रह्मणीत्यर्थः । (243) उक्तार्थे वाक्यान्तरमाह—**नेति** । 'न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित्' (का. 1-2-18) इति श्रुतिरित्यर्थः । (244) श्रुत्य[4]र्थस्थेम्ने तन्मूल[5]स्मृतिमुदाहरति—(भ. गी. 13-12) **ज्ञेयमिति** ।

---

1. **निषेधस्य**—अनात्मदर्शननिषेधस्य ।
2. **अवान्तरफलं**—आत्मनि समस्तव्यस्ततानिरासरूपं फलम् ।
3. **अत्र मानं**—कार्यकारणयोराविद्यकत्वे प्रमाणम् ।
* 'अपूर्वानपरोक्तेर्हि' इति मु. पु. पाठः ।
4. **श्रुत्यर्थस्थेम्ने**—श्रुत्यर्थदृढीकाराय ।
5. **तन्मूलस्मृतिं**—श्रुतिमूलकस्मृतिम् ।

'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥' (245)

'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ (246)

'यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥' (247)

इति वेदात्मनः साक्षाद्वचनं श्रुतिसंमतम् ।
सर्वान्तर्यामिणः शौरेर्नोपेक्ष्यं तद्भवादृशैः ॥ (248)

तत्रैवं सति यो मूढः कार्यकारणदर्शनः ।
पराङ्मुखं निदध्यात्तमात्माकृत्स्नत्वदर्शिनम् ॥ (249)

ब्रह्मेति जातिनिर्देशः क्षत्रसंनिधिकारणात् ।
ब्रह्मजातिः परादध्यादसम्यग्दर्शिनं नरम् ॥ (250)

न सत्तन्नासदिति—मूर्तामूर्तविलक्षणमित्यर्थः । (245–246) तात्पर्यलिङ्गं फलमाह—(भ. गी. 15-19) **यो मामिति** । (247) देवकीनन्दनस्य गोपालत्वात् तदीयवचो नादरणीयम्, इत्यत्राह—**इति वेदेति** । (248)

'ब्रह्म तं परादात्' इति वाक्यार्थनिरूपणम्

[1]'ब्रह्म' इत्यादेस्तात्पर्यमुक्त्वा, अक्षरार्थमाह—**तत्रेति** । (249) '[2]ब्रह्मेति जातिः' इति भाष्यमयुक्तम्, मुख्यत्यागे कारणाभावात्, अत्राह–**ब्रह्मेति** । (250)

---

1. '**ब्रह्म' इत्यादेरिति** "ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद । क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद । लोकास्तं परादुः योऽन्यत्रात्मनो लोकान् वेद । देवास्तं परादुः योऽन्यत्रात्मनो देवान् वेद । भूतानि तं परादुः, योऽन्यत्रात्मनः सर्वं वेद ।" इति श्रुतिः ।

2. 'ब्रह्म ब्राह्मणजातिः' इति भाष्यं अर्थतः अनुवदति—**'ब्रह्मेति जातिः' इति भाष्यमिति** ।

यदस्ति तन्न जानाति यन्नेहास्ति तदीक्षते ।
इत्येवमपराधोत्थकोपाविष्टेव बालिशम् ॥ (251)

कैवल्यात्तं पराकुर्याद्विप्रजातिः पराङ्मुखम् ।
अजातिब्रह्मतत्त्वं मां योऽयं जात्यात्मनेक्षते ॥ (252)

'किं तेन न कृतं पापं चोरेणात्मापहारिणा ।
योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ॥' (253)

यो न वेदात्मयाथात्म्यं वेद जात्यादिमत्तया ।
स यद्यतोऽतो जातिस्तं पराद्ध्याज्जडं नरम् ॥ (254)

सर्वदाऽव्यभिचार्येकं व्यभिचार्यर्थबुद्धिषु ।
यत्तत्त्वं गम्यते प्रत्यक् तदेवानात्मवस्तुनः ॥ (255)

अन्तर्मेयबलाज्ज्ञानं प्रत्यञ्चोहजसंश्रयम् ।
बाधतेऽव्यभिचारित्वात् व्यभिचारितमोऽन्वयम् ॥ (256)

---

[1]पराकरणे निमित्तमाह—**यदस्तीति** । (251) [2]कुतः [3]तं पराकरोति, इत्यत्राह—**कैवल्यादिति** । (225) मिथ्यादृष्टेः निराकरणयोग्यत्वे **व्यासवाक्यमुदाहरति**—(मो. ध. 51-28) **किं तेनेति** । (253) [**यो न वेदेति**]यः आत्मतत्त्वं न जानाति, सः यदि जात्यादि(स)[म]त्तया—ब्रह्मक्षत्राद्यात्मना जानाति, अतः—अपराधात्, अतः[4]—ब्रह्मणः, ब्रह्मक्षत्रादिजातिः जडं—मिथ्यादृष्टिं, पराकुर्यादित्यर्थः । (254) तर्हि जात्यादेरन्यत्वादद्वैतभङ्गः, अत्राह—**सर्वदेति** । प्रत्यक्तत्त्वमित्यर्थः । (255) सकारणस्य विश्वस्य आत्ममात्रत्वे, तत्त्वधिया बाधो न स्यात्,

---

1. **पराकरणे इति** आत्मस्वरूपव्यतिरेकेण ब्राह्मणजातिद्रष्टुः इत्यादिः ।
2. **कुतः** — कस्मादर्थात् ।
3. **तं**—आत्मव्यतिरेकेण ब्राह्मणजातिवेदिनम् । पराकरणप्रतियोगिविषयकः प्रश्नोऽयम्, न तु पराकरणनिमित्तप्रश्नः । निमित्तस्य पूर्ववार्त्तिके उक्तत्वादिति बोध्यम् ।
4. 'स यद्यतोऽतः' इति वार्त्तिकस्थस्य द्वितीयस्य अतःशब्दस्य प्रथमेनासंकीर्णमर्थमाह—**अतः—ब्रह्मण इति** । कैवल्यादिति यावत् । अस्य, पराकुर्यादित्यनेन संबन्धः ।

प्रत्यक्मोजयाथात्म्यमात्राभिजनहेतुतः ।
कालादौ तदभावोऽतो न ज्ञानस्यापवादकृत् ॥ (257)

* न बाध्यजन्यपेक्षं हि ज्ञानं बाधकमिष्यते ।
तयोर्मिथो विरोधित्वात् सम्यग्ज्ञानं तमोऽपनुत् ॥ (258)

आत्मानं यो यथा वेत्ति सम्यग्वा यदि वान्यथा ।
यथादर्शनमेवासौ फलमाप्नोति मानवः ॥ (259)

इति, ब्रह्म तमित्यादेः संक्षेपार्थः समीरितः ।
संसरत्यन्यथाज्ञानात् सम्यग्ज्ञानाद्विमुच्यते ॥ (260)

अपोदितत्वात् ब्रह्मादिदर्शनस्येति किं पुनः ।
द्रष्टव्यमित्यतो वक्ति त्विदं ब्रह्मेति नः श्रुतिः ॥ (261)

इत्यत्राह–**अन्तरिति** । प्रत्यगद्वयानन्दब्रह्माकारग्रहणात् ज्ञानं, सकारणं जगत् आत्माज्ञानजसाभासान्तःकरणाश्रयं वस्तुबलात् ही(न)[नं]बाधते इत्यर्थः । (256) कालादेरनात्मनोऽप्यात्मरूपत्वात् अन्तर्मेयबलवत्त्वात् ज्ञानबाधकता किं न स्यात् । अत्राह—**प्रत्यगिति** । प्रत्यगविद्योत्थत्वरूपाभिजात्यात् हेतोः तदभावः—अन्तर्मेयबलाभावः इत्यर्थः । (257) [1]ज्ञानस्य बाधकत्वे प्रयोजकमज्ञानजत्वं, तदनात्मनोऽपि तुल्यम्, अत्राह—**न बाध्येति** । अतः अन्तर्मेयबलमेव प्रयोजकमित्यर्थः । ज्ञानस्याज्ञानबाधकत्वे हेत्वन्तरमाह—**तयोरिति** । (258) प्रासङ्गिकं परिसमाप्य, 'ब्रह्म तम्' इत्यादेस्तात्पर्यार्थमुपसंहरति—**आत्मानमिति** । 'यथादर्शनम्' इत्येतत् स्फुटयति—**संसरतीति** । (259–260) '[2]इदं ब्रह्म' इत्यादेः शङ्कामाह—**अपोदितत्वादिति** । इतिशब्देनोक्तप्रकार-

---

1. **ज्ञानस्य बाधकत्वे प्रयोजकमज्ञानजत्वमिति** अखण्डाकारवृत्तेः अज्ञानपरिणामत्वादिति भावः ।

* **न बाध्येति** अज्ञानजत्वेऽपि शुक्तिरूप्यधियः बाधकत्वाभावात् नाज्ञानजत्वं बाधकत्वे प्रयोजकमिति भावः ।

2. **इदं ब्रह्मेत्यादेरिति** व्यावर्तनीयामिति शेषः ।
" इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा । " इति श्रुतिरनुसन्धेया ।

प्रत्यक्त्वेन य आभाति प्रत्यग्बुद्धिप्रमाणकः ।
तावन्मात्रैक्ययाथात्म्यं ब्रह्मेत्युक्तं प्रतीयताम् ॥ (262)

एवं श्रोतव्य आत्माऽयं समाप्तः श्रवणे विधिः ।
अथ मन्तव्य इत्यस्य प्रपञ्चः पर उच्यते ॥ (263)

नामरूपादिसंभिन्नं जगदेतत् कथं पुनः ।
आत्मैव सर्वमित्येवं द्रष्टुं शक्यमिहाञ्जसा ॥ (264)

अव्यावृत्ताविसंवादिप्रत्यग्धीव्याप्तिकारणात् ।
एतद्विरुद्धबुद्धीनामेवमेव हि शक्यते ॥ (265)

व्यभिचारिषु बोधेषु यो बोधोऽव्यभिचारवान् ।
तत्प्रमाणार्पितो मेयो ग्रहीतुं शक्यतेऽञ्जसा ॥ (266)

परामर्शः । उत्तरत्वेन [1]वाक्यमवतारयति—इत्यत इति । (261) तदर्थमाह—**प्रत्यक्त्वेनेति** । (262)

सप्तमाष्टमनवमकण्डिकार्थनिरूपणम्

मननप्रपञ्चः

'[2]स यथा दुन्दुभेः' इत्यादेस्तात्पर्यमाह—**एवमिति** । (263) 'इदं सर्वं यदयमात्मा' इत्यत्र प्रत्यक्षादिविरोधमाशङ्कते—**नामेति** । (264) [265] [वार्त्तिकस्य अव्यावृत्तेत्यादिकस्य विवरणं त्रुटितं वर्तते] नित्या[3]नुभवत्वे हेत्वन्तरमाह—**व्यभिचारिष्विति** । तत्प्रमाणार्पितः, व्यभिचारी [4]विधिसाधकबोधे अध्यस्त इत्यर्थः ।

---

1. **वाक्यं**—इदं ब्रह्मेत्यादिवाक्यम् ।
2. **स यथा दुन्दुभेः इत्यादेरिति** "स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय । दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ।" इति श्रुतिः ।
3. **नित्यानुभवत्वे**—नित्यानुभवमात्रत्वे । सर्वस्येत्यादिः ।
4. **विधिसाधकबोधे**—भावसाधकबोधे ।

यथा दुन्दुभिशब्दत्वसामान्यादुत्थितान् पृथक् ।
नादातुं शक्नुयात्कश्चित् विशेषानसिकोशवत् ॥ (267)

तद्वदात्मातिरेकेण नात्मीयार्थो मनागपि ।
यतः समीक्षितुं शक्यः तेनासौ रज्जुसर्पवत् ॥ (268)

* विशेषैरन्वयो नापि सामान्यान्वयवत् क्वचित् ।
सामान्यस्याविशेषत्वात् नातः सामान्यधीग्रहः ॥ (269)

विशेषैरन्वयो नो चेद्विभाखुव्यक्तिवन्मिथः ।
* खण्डवत्स्याद्विशेषादौ यत्सामान्यमितीरितम् ॥ (270)

---

(266) उक्तार्थे वाक्यं योजयति—**यथेति** । (267-268) दृष्टान्तस्य सामान्यविशेषकत्वात् दार्ष्टान्तिकेऽपि [1]तत्प्रसक्तौ तन्निरासार्थं सामान्यविशेषभावं निराचष्टे—**विशेषैरिति** । [2]सामान्यान्वयवत्—यथा विशेषाणां सामान्येन तादात्म्यसंबन्धः, नैवं सामान्यस्य विशेषैस्त[3]दस्ति । अविशेषत्वात्—विशेषादन्यत्वात् । अतः सामान्यधिया न सामान्यग्रहः, सामान्यस्य(षं)[सर्प]वद्विभक्तत्वेन विशेषत्वात्–असामान्यत्वादित्यर्थः । (269) विशेषाणां सामान्ये अध्यस्तत्वात् अधिष्ठानसामान्यस्य विशेषैरभेदो न युक्तश्चेत्, भेद[4] एव स्यात्, इत्याशङ्क्याह—**विशेषैरिति** । भिन्नस्य न सामान्यत्वमित्यर्थः । (270) नित्यमेकमनेकेषु समवेतं

---

1. **तत्प्रसक्तौ**—सामान्यविशेषात्मकत्वप्रसक्तौ । सामान्यविशेषभावस्य निरसनेन तस्य कल्पितत्वं पर्यवस्यति ।
2. **सामान्यान्वयवत्**—सामान्यतादात्म्यवत् ।
3. **तदस्ति**—तादात्म्यमस्ति । विशेषाध्यासाधिष्ठानस्य सामान्यस्य विशेषमात्रत्वायोगादिति भावः ।
4. **भेद एव**—सामान्यस्य विशेषेभ्यो भेद एव ।

* **अन्वयः**—तादात्म्यम् ।

* **खण्डवत् स्यादिति** खण्डमुण्डादिवत् विशेषरूपं स्यादित्यर्थः ।

* द्विष्ठत्वादन्वयस्यापि व्याप्यव्यापकयोर्मिथः ।
व्यतिरेकमतो मुक्त्वा मिथो व्याप्तिर्न सिद्धयति ॥ (271)

प्रत्यग्बोधानिरस्तोऽर्थः प्रत्यग्वन्न हि सिद्धयति ।
न चाभावमुखोऽनात्मा नान्वयेनाप्यतो दृशि ॥ (272)

* प्रत्यञ्चात्मैकरूपत्वादात्मा नानात्मतां स्वतः ।
सहते नापि चानात्मा स्वार्थादन्यत्र सिद्धयति ॥ (273)

सामान्यमिति लक्षणात् भिन्नस्यापि सामान्यत्वम्, अत आह—**द्विष्ठत्वादिति**। व्याप्यव्यापकयोः—व्यक्तिसामान्ययोः व्यतिरेकं—भेदं विना व्याप्तिः—समवायसंबन्धो न स्यात्। अतो भिन्नयोरश्वमहिषवत् सामान्यविशेषभावासंभवात् कल्पितोऽसावित्यर्थः। (271) अर्थक्रियाकारित्वात् न कल्पितः इति चेत्, तर्हि[1]प्रतीचोऽन्यः शून्यः, अनन्यो वेति विकल्प्य, आद्यं दूषयति—**प्रत्यगिति**। आत्मवत् स्वतो जडो न सिद्धयति। परतः[2] सिद्धिः दुर्निरूपेत्यर्थः। द्वितीयं प्रत्याह—**न चेति**। अभावात्मना च न सिद्धयति [3]अपरोक्षत्वादित्यर्थः। तृतीयं दूषयति—**नान्वयेनेति**। प्रत्यगभेदेनापि न सिद्धयति पराक्त्वात्। अतो दृशि(रा)[अना]त्मा—दृगात्मन्यध्यस्त इत्यर्थः। (272) तर्हि आत्मा नासङ्गः अधिष्ठानत्वात् रज्जुवत्; अत्राह—**प्रत्यगिति**। जडत्वमुपाधिरित्यर्थः। तर्हि अनात्मा न कल्पितः

---

* "सामान्यविशेषयोः भेदाभेदौ निरस्य, व्याप्तिं परेष्टां निराचष्टे—**द्विष्ठत्वादिति** व्याप्तः विशेषः। व्यापकं सामान्यम्। तयोर्भेदं विना नान्योन्यं व्याप्तिः। तद्रूपसंबन्धस्य द्विष्ठत्वेन भेदापेक्षत्वात्। अतो भेदनिरासात् न व्याप्तिः, नापि संबन्धान्तरं तयोरिति कल्पितस्तद्भाव इत्यर्थः।" इति **शास्त्रप्रकाशिका**।

1. **प्रतीच इति** अनात्मेत्यादिः।
2. **परतः सिद्धिदुर्निरूपेति** कल्पनां विना परस्य अनात्मसंबन्धाभावादिति भावः।
3. **अपरोक्षत्वादिति** असतः अपरोक्षप्रतीत्यविषयत्वादिति भावः।

* "आत्मनः अनात्मनोऽन्वयाद्ययोगेऽपि अनात्मनः सकाशात् आत्मनः अन्वयादिः स्यात् इत्याशङ्क्य, अन्वयं निरस्यति—**प्रत्यगिति**। आविद्यं देहाद्यात्मत्वं तस्यानुमोदते—**स्वत इति**। व्यतिरेकं निराह—**नापीति**। स्वतः परतो वा तदसिद्धेरुक्तेरित्यर्थः।" इति **शास्त्रप्रकाशिका**।

* अनात्मवस्तुनः प्रत्यक् प्रत्यक्त्वान्नातिरिच्यते ।
पराङ् नान्वेति चात्मानं व्यतिरेकात्मकत्वतः ॥ (274)

दुन्दुभ्यन्वितशब्दस्य सर्वत्राव्यभिचारतः ।
पुंस्प्रयत्नादिलब्धात्मव्यभिचारिरवात्मसु ॥ (275)

उच्चनीचादिभेदेषु मिथः स व्यभिचारिषु ।
दुन्दुभिध्वनिरेवैकः सर्वत्राव्यभिचारवान् ॥ (276)

दुन्दुभिध्वनिसामान्यव्यतिरेकेण तेन ते ।
निरात्मका न शक्यन्ते तद्विशेषाः समीक्षितुम् ॥ (277)

दुन्दुभिध्वनिरित्येतत्कुतो लब्धं विशेषणम् ।
दुन्दुभेर्ग्रहणेनेति लब्धमेतद्विशेषणम् ॥ (278)

स्वतन्त्रत्वात् आत्मवत्, अत्राह—**नापीति**। (273) तर्हि आत्मनः अनात्मव्यतिरेकादकृत्स्नत्वम्, अत्राह—**अनात्मेति** । असङ्गत्वमुपसंहरति—**परागिति** । कल्पितत्वादित्यर्थः । (274) [1]प्रासङ्गिकं हित्वा, प्रकृतं दुन्दुभिशब्दत्वग्रहे हेतुमाह—**दुन्दुभीति** । (275) विशेष[2]व्यभिचारं साधयति—उ(त्थे)[च्चे]**ति** । (276) (व्यभिचारीति) विशेषेषु सामा[3]न्याव्यभिचारफलमाह—**दुन्दुभिध्वनीति** । (277) '**दुन्दुभेर्हन्यमानस्य**' इति श्रुतौ ध्वनिविशेषणमयुक्तं मानाभावात्, इति शङ्कते

---

* "अनात्मस्वभावालोचनया व्यतिरेकमात्मनस्ततो निरस्य, स्वस्वभावालोचनयापि तस्य ततः तदयोगमाह—**अनात्मेति** । आत्मनः अनात्मनः सकाशादन्वयव्यतिरेकौ निराकृत्य, अन्वयायोगे हेत्वन्तरमाह—**पराङिति** । आत्मा चेदनात्मानमन्वेति, सोऽपि तमन्वियात् । अन्यथा आत्मनस्तदन्वयायोगात् । न चात्मन्यनात्मनोऽन्वयः पराक्प्रतीचोः वस्तुतः तदयोगादिति भावः । आत्मनि अनात्मनः वस्तुतोऽनन्वये हेत्वन्तरमाह—**व्यतिरेकेति** । प्रतीचि पराचोऽध्यस्तत्वादित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

1. **प्रासङ्गिकं**—दृष्टान्तप्रसङ्गागतं आत्मनः सामान्यविशेषात्मकत्वनिरासम् ।
2. **विशेषव्यभिचारं**—दुन्दुभिध्वनिविशेषाणां व्यभिचारम् ।
3. **सामान्याव्यभिचारेति** दुन्दुभिशब्दसामान्याव्यभिचारेत्यर्थः ।

दुन्दुभेस्तु स्वा एते इत्येवं ग्रहणे सति ।
गृहीतास्तद्विशेषाः स्युस्तेषां तादात्म्यकारणात् ॥ (279)

भेर्याघातग्रहाद्वापि तद्विशेषग्रहो भवेत् ।
वीरादिरससंयुक्तः दुन्दुभ्याघात उच्यते ॥ (280)

उपलब्धोऽस्ति सन्कुम्भो लम्बोष्ठो देशकालवान् ।
पूर्वपूर्वातिरेकेण नोत्तरार्थोऽनुभूयते ॥ (281)

एवं चिदन्वयात्सर्वः तदध्यस्तः समीक्ष्यते ।
सामान्यं वा विशेषो वा चिदसंबोधहेतुतः ॥ (282)

प्रत्यग्रूपस्य संसिद्धौ प्रतीचोऽन्यन्न कारणम् ।
अनात्मवत्तदप्यात्मविशेषणतया भवेत् ॥ (283)

—**दुन्दुभीति** । [1]वाक्यशेषाल्लब्धम्, इत्याह—**दुन्दुभेरिति** । न हि दुन्दुभिशब्दितकाष्ठग्रहात् शब्दविशेषग्रहः, [2]तयोर्भेदादित्यर्थः । (228) उदाहृतवाक्यशेषार्थमाह—**दुन्दु(भि)[भे]स्त्विति** । (279)
'दुन्दुभ्याघातस्य वा' इत्यस्यार्थमाह—**भेरीति** । कोऽसौ भेर्याघातः इति, तमाह—**वीरादीति** । वीरभयानकादिरससहितः संग्रामादिभूमिगतदुन्दुभिध्वनिविशेष इत्यर्थः । (280) दृष्टान्तं व्याख्याय, दार्ष्टान्तिकमाह—**उपलब्धोऽस्तीति** । (281) अनुभवस्य सर्वत्राव्यभिचारे किं फलम्, अत्राह—**एवमिति** । (282) अनात्मनः कल्पितत्वे साधकत्वायोगात् कथं(नङ्ना)[तद्बला] दात्मसिद्धिः, अत्राह—**प्रत्यगिति** । यथा अनात्मसिद्धौ हेत्वन्तरमस्ति, नै(वा) [वमा]त्मनः सिद्धावित्यर्थः । तर्हि [3]अनात्मसाधकमात्मातिरिक्तमेवेति, तत्राह—**तदपीति** ।

---

1. **वाक्यशेषात्**—'दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः' इति वाक्यात् ।
2. **तयोर्भेदात्**—दुन्दुभेः शब्दविशेषस्य भेदादिति यावत् ।
   तथाच वाक्यशेषे दुन्दुभिशब्दस्य दुन्दुभिध्वनौ लक्षणा आश्रयणीया । तद्वत् दुन्दुभेर्हन्यमानस्य इत्यत्रापि ध्वनौ लक्षणा । हन्यमानदुन्दुभिप्रभवशब्दसामान्यस्येति फलितार्थः इति बोध्यम् ।
3. **अनात्मसाधकमिति** प्रमातृचैतन्यमिति यावत् ।

कर्तृत्वकञ्चुको यद्वदात्माऽनात्मानमीक्षते ।
कूटस्थदृष्टिमात्रत्वान्न तथात्मानमीक्षते ॥ (284)

संहतो गम्यतेऽनात्मा प्रत्यक्षेण यथा सदा ।
गम्यतेऽसंहतस्तद्वदात्मा प्रत्यग्धियात्मना ॥ (285)

दार्ष्टान्तिकार्थसंभित्तेरेकेनैव कृतार्थतः ।
दृष्टान्तेन बहूनां तु किमर्थोक्तिरितीर्यते ॥ (286)

महासामान्य एकस्मिन् विशेषाणामशेषतः ।
विलयः स्यात् कथं नाम व्यावृत्तान्वयरूपिणाम् ॥ (287)

महासामान्यदृष्टान्तो दौन्दुभो रव उच्यते ।
सामान्येतररूपस्य दुन्दुभ्याघात इष्यते ॥ (288)

अनात्मसाधकं प्रमातृरूपमात्मन्यैक्येनाध्यस्तमित्यर्थः । (283) तर्हि आत्मा परिणाम्यन्तः[1]करणतापन्न एवात्मानं साधयेत् अविशेषात्, अत्राह—**कर्तृत्वेति** । (284) कूटस्थदृष्टिमात्रत्वं कथं कर्तृत्वाद्यन्वयिनः, अत्राह—**संहत इति** । (285) सर्वस्य [2]आत्ममात्रत्वदार्ष्टान्तिकस्यैकत्वात्, एकेन दृष्टान्तेन सिद्धः, दुन्दुभेः, दुन्दुभ्याघातस्य वा स्यादिति च [3]बहूनां दृष्टान्तानामुक्तौ किं फलम्, इत्याह—**दार्ष्टान्तिकेति** । फलमाह—**ईर्यत इति** । (286) [4]तत् व्यनक्ति—**महासामान्य इति** । महासामान्ये ब्रह्मणि सर्वस्य लयप्रदर्शनार्थमनेकदृष्टान्त इत्यर्थः । (287) लयक्रमं दर्शयितुं दृष्टान्तत्रयस्य दार्ष्टान्तिकत्रयेणान्वय-

---

1. **अन्तःकरणतापन्न इति** प्रमातृतामापन्न इति यावत् ।
2. **सर्वस्य आत्ममात्रत्वदार्ष्टान्तिकस्य**—सर्वस्य आत्ममात्रत्वमित्यस्य दार्ष्टान्तिकस्य ।
3. **बहूनामिति** बाह्यशब्दाः इत्येवं बहूनामित्यर्थः । अत्र "स यथा शङ्खस्य ध्मायमानस्य न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय । शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ।" "स यथा वीणायै वाद्यमानायै न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय, वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ।" इति च दृष्टान्तद्वयमप्युक्तं श्रुताविति बोध्यम् ।
4. **तत् व्यनक्ति**—अनेकदृष्टान्तोक्तिफलं विशदयति ।

नाद्यानिति तथा चोक्तिर्विशेषाणां तु केवलम् ।
इत्युक्तार्थप्रसिद्ध्यर्थमित्युदाहरणत्रयम् ॥ (289)

* अन्वयव्यतिरेकाभ्यामभाववपुषाऽथवा ।
सद्वीगम्याद्विरुग्वस्तु न मानेनावसीयते ॥ (290)

षष्ठ्यर्थासंभवोऽतः स्यात् द्वितीयासंभवात्सतः ।
यथा सति तथा विद्यात् प्रतीच्यनन्यमानके ॥ (291)

सामान्यभेदरूपाणां विशेषाणामशेषतः ।
महासामान्य एकत्र भूयसां स्याद्यथा तथा ॥ (292)

माह—महासामान्येति । भौतिकानां विशेषाणां भूतेषु सामान्यविशेषरूपेषु लयः । भूतानां च कारणे, [1]अस्यापि कार्यकारणविलक्षणे ब्रह्मणि लयप्रदर्शनार्थमनेकदृष्टान्तोक्तिरित्यर्थः । (288–289) सर्वस्य ब्रह्मणोऽभेदं दृष्टान्तोक्तं युक्त्या साधयति—अन्वयेति । जगतो न सदात्मत्वं, बाधात् । न सतोऽन्यत्वं, असत्त्वापातात् । नाप्यसदेव, अपरोक्षत्वादित्यर्थः । (290) सत्तासामान्याश्रयव्यक्तिरङ्गीकार्या, अत्राह—षष्ठीति । संबन्धाभावादसामान्यमित्यर्थः । तत्पदार्थस्याद्वयत्वमसङ्गत्वं चोक्त्वा, [2]त्वमर्थस्यापि [3]तदर्थैक्यसिद्धये [4]तदाह—यथेति । (291) उक्तं विशदयति—सामान्येति । स्थूलाद्य-

---

1. अस्यापि—कारणस्यापि—अव्याकृतस्यापि ।

* अन्वयव्यतिरेकाभ्यां—अभेदभेदाभ्याम् । अभाववपुषा—शून्यतया । एतद्वार्त्तिकार्थ एव संक्षेपेण 'अन्वयव्यतिरेकाभावपरिहारेण' कल्पितत्वमिति असकृदुच्यते इति बोध्यम् ।
'अन्वयेति । सद्विशेषाख्यं वस्तु तत्सामान्यात् पृथगुच्यमानं तेन भेदेनाभेदेन शून्यतया वा मानतो न सिद्ध्यति । अत्यन्तभेदे अभेदे वा सामान्यविशेषत्वासिद्धेः । शून्यत्वे च सदद्वैतापत्तिरित्यर्थः ।' इति शास्त्रप्रकाशिका ।

2. त्वमर्थस्य—त्वंपदार्थस्य ।

3. तदर्थैक्येति तत्पदार्थेनैक्येत्यर्थः ।

4. तदाह—अद्वयत्वमसङ्गत्वञ्चाह ।

मिथो भिन्नपदार्थानां नामरूपक्रियात्मभिः ।
स्थूलाद्यनभिसंबन्धे कार्यकारणरूपिणाम् ॥ (293)

सूक्ष्मताव्यापिते ज्ञेये भूम्यादेरुत्तरोत्तरम् ।
प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः ॥ (294)

नामादीनि च तत्त्वानि प्राणान्तानि तथाऽऽत्मनि ।
पूर्वपूर्वप्रहाणेन यान्त्यस्तं केवलाद्वये ॥ (295)

दृष्टान्तत्रितयं तावत् स्थितिकाले उदाहृतम् ।
महासामान्यवत्प्रत्यक् सर्वानात्माप्ययः स्वतः ॥ (296)

स्थितिकाले यथैकात्म्यं शक्यते ज्ञातुमञ्जसा ।
यथोक्तन्यायतस्तद्वदुत्पत्तावपि शक्यते ॥ (297)

धूमार्चिर्विस्फुलिङ्गादि यथापूर्वं विभागतः ।*
अग्निरेव न धूमादिभेदः कश्चन लक्ष्यते ॥ (298)

नभिसंबन्धे—मूर्तामूर्तविलक्षणे, प्रत्यगनुभवे लय इत्यर्थः । (292-293) पूर्वपूर्वस्य उत्तरोत्तरस्मिन् लये हेतुमाह—सूक्ष्मतेति । (294) एतन्मूलत्वेन छन्दोगश्रुत्यर्थमाह—नामादीनीति । (295)

दशमकण्डिकार्थनिरूपणम्

'[1]स यथा' इत्यादेः वृत्तानुवादेन संगतिमाह—दृष्टान्तेति । (296) स्थितिकाले सर्वस्यात्मत्वमुक्तम् । उत्पत्तिकालेऽपि [2]तदुच्यते, इत्याह—स्थितीति । (297) तात्पर्यमुक्त्वा अक्षरार्थमाह—धूमेति । (298) दार्ष्टान्तिकमाह—

---

1. स यथा इत्यादेरिति "स यथार्द्रैधाग्नेरभ्याहितात् पृथग्धूमा विनिश्चरन्ति । एवं वा अरे अस्य महतो भूतस्य निश्वसितमेतत् यदृग्वेदः यजुर्वेदः सामवेदः अथर्वाङ्गिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानानि अस्यैवैतानि निश्वसितानि ।" इति श्रुतिरनुसन्धेया ।
2. तदुच्यते—सर्वस्य आत्ममात्रत्वमुच्यते ।

* विभागतः—जन्मतः ।

प्राणलोकादिरप्येवमनात्मा शाग्निभागतः ।
अपूर्वानपरानन्तप्रत्यगात्मैव केवलः ॥ (299)

एकजातौ हि भिन्नानां शब्दानां शब्द एव तु ।
दृष्टमैक्यं न भिन्नानां भिन्नजातौ तथेति चेत् ॥ (300)

धूमादिभेदभिन्नानां यथैकत्वं विभावसौ ।
नामरूपादिभिन्नानामैकात्म्यं तद्वदात्मनि ॥ (301)

बोधाविशेषादथवा भेद एव न विद्यते ।
कार्यकारणयोस्तत्त्वमुभयोरविलक्षणम् ॥ (302)

स्वार्थसाधनयत्नादीननपेक्ष्योत्सृजेद्यथा ।
धूमादीन् हुतभुक् तद्वत्प्राणादीन्प्रत्यगीश्वरः ॥ (303)

प्राणेति । (299)

बहुधा 'स यथा' इत्यादेस्तात्पर्यनिरूपणम्

वाक्यस्य तात्पर्यान्तरं वक्तुं चोदयति—**एकेति** । एकस्यां शब्दजातौ तद्व्यक्तीनामैक्यं दृष्टम् । न भिन्नजातीयघटादीनां अश्वत्वमहिषत्वादौ । अतो [1]**नामादिभिन्नस्य** जगतः नात्मनैक्यमित्यर्थः । (300) तदुत्तरत्वेन दृष्टान्तवाक्यं व्याचष्टे—**धूमादीति** । (301) नामादीनां मिथो भेदमुपेत्यैव[व]मुक्त्वा[भेद] एव नास्ति, इत्याह—**बोधेति** । नामादेरात्मैव तत्त्वमित्यत्र हेतुमाह—**कार्येति** । **अविलक्षणं**—अव्यावृत्तानुगतमिति यावत् । (302) जगद्रचनायां [2]**फलमस्ति** चेत्, अना[प्त]कामत्वम् । नास्ति चेत्, [3]**प्रेक्षापूर्वप्रवृत्तिविरोधः** । देहप्रयत्नेच्छादिमत्त्वे संसारित्वम् । [4]अन्यथा मुक्तात्मवदकर्तृत्वम्, इत्येत-

---

1. **नामादिभिन्नस्य**—नामरूपकर्मभेदेन भिन्नस्य ।
2. **फलमस्तीति** परस्येत्यादिः । परस्येत्येतदुत्तरत्राप्यन्वेति ।
3. **प्रेक्षापूर्वप्रवृत्तिविरोध इति** विफले प्रेक्षावतामप्रवृत्तेरिति भावः ।
4. **अन्यथा**—देहादिरहितत्वे ।

श्रोतव्यः श्रुतिवाक्येभ्यः इत्यत्राशङ्क्यते यतः ।
प्रयत्नानन्तरः शब्दोऽनित्यः कुम्भादिवद्भवेत् ॥ (304)

इत्यस्य परिहारार्थं निःश्वासोदाहृतिस्त्वियम् ।
अप्रयत्नोत्थितो वेदो नित्यः स्यात् व्योमवत् स्वतः ॥ (305)

अबुद्धिपूर्वकत्वाच्च यथावस्त्वनुरोध्यपि ।
बुद्धिवन्नाप्रमाणत्वं वेदस्येहोपपद्यते ॥ (306)

* सर्वथा यदनेनोक्तं तच्छ्रद्धेयं बुभूषता ।
भानुप्रकाशवच्छब्दो नित्योऽयं न तु कृत्रिमः ॥ (307)

दुत्तरत्वेनापि [1]तदेव वाक्यं योजयति–स्वार्थेति । (303) निश्वसितपद-व्या(वृ)[व] र्त्यशङ्कामाह—श्रोतव्य(त) इति । वेदवाक्यानां कार्यत्वेन बुद्धादि-वाक्यवदमात्वात् न तैरात्मनः श्रोतव्यत्वमित्यर्थः । (304) वाक्यमवतारयति—इत्यस्येति । परिहारं विशदयति—अप्रयत्नेति । न तावदनित्यत्वं, [2]विद्यमानस्यैव कूपाका(र)[श]वदीश्वरादभिव्यक्तेः । न चानित्यत्वममात्वे प्रयोजकं, चक्षुरादौ तज्जन्यज्ञाने [3]चातिव्याप्तेः । नापि पुंवचोवत् सापेक्षत्वं, [4]स्वार्थप्रवृत्तधीपूर्वकत्वा-भावात् । अतो [5]नैसर्गिकार्थः । शब्दार्थसंबन्धस्य स्वाभाविकत्वात् बुद्धादिवाक्यो-त्थबुद्धिवत् [6]नाप्रामाण्यम्, इत्याह—बुद्धिवदिति । (305–306) तत्प्रामाण्य-फलमाह—सर्वथेति । वेदनित्यत्वं सोदाहरणमाह—भान्विति । ईश्वरवि(क)[व] र्तत्वादीश्वरात्मको वेदः नित्यः रविरश्मिवदित्यर्थः । (307) कारणरूपेण नित्यत्वं

---

1. तदेव वाक्यं– 'स यथार्द्रैधाग्नेः' इत्यादिवाक्यम् ।
2. विद्यमानस्यैवेति वेदस्येति शेषः ।
3. अतिव्याप्तेरिति अमात्वशून्ये प्रमाणे चक्षुरादौ तज्जन्यज्ञाने चानित्यत्वस्य सत्त्वादित्यर्थः ।
4. स्वार्थप्रवृत्तेति स्वार्थं—स्वप्रयोजनाय प्रवृत्तोः यः पुरुषः, तदीयधीपूर्वकत्वा-भावादित्यर्थः ।
5. नैसर्गिकार्थः—स्वाभाविकार्थसंबद्धः । वेद इति शेषः ।
6. नाप्रामाण्यमिति वेदस्येति शेषः ।
* सर्वथेति अनुष्ठेयत्वेन ज्ञेयत्वेन वेत्यर्थः ।

पर एवात्मनाऽऽत्मानं प्रतिपाद्य नरं श्रुतिः ।
कार्यकारणवत् पीत्वा स्वात्मनैवावतिष्ठते ॥ (308)

वेदामात्वप्रसक्तौ वा सर्वमात्मेति वाक्यतः ।
वेदामात्वापनुत्त्यर्थं स यथेत्यागमः परः ॥ (309)

* तदयुक्तं पुमर्थस्य तदुक्त्यैव समाप्ततः ।
सर्वोपायोऽनुपायः स्यात् उपेयावसितौ यतः ॥ (310)

घटादेरपि तुल्यम्, इत्याशङ्क्य, प्रकृते अतिशयमाह—पर इति । परमात्मैव(स्तु) [श्रु]तिः आत्मानं नरं—संसारिणं आत्मना—अद्वयब्रह्मरूपेण प्रतिपाद्य, [कार्य] कारणात्मकं जगत् बाधित्वा अद्वयब्रह्मात्मना अवतिष्ठते इत्यर्थः । (308) 'स यथा' इत्यादिवाक्यस्यार्थान्तरमाह—वेदेति । जगन्मिथ्यात्वे तदन्तर्गत-वेदस्यापि मिथ्यात्वात् मिथ्याधूमवदमात्वाशङ्कानिरासार्थमित्यर्थः । (309) [1]तदमात्वं, अबोधकत्वं, मिथ्याबोधकत्वं वा, पुमर्थराहित्यं वा । न तावदाद्यद्वयम्, इत्याह—तदयुक्तमिति । [2]अबाधितानवगतनिश्चयज्ञानोत्पत्तेरनुभवसिद्धत्वादि-त्यर्थः । न चरमः, इत्याह—पुमर्थस्येति । सर्वस्य ब्रह्मत्वे [3]वेदाभावादमात्वमिति चेत्, किं विद्योदयात्प्रागसत्त्वं, ऊर्ध्वं वा । नाद्यः, अनुभवविरोधात् । द्वितीयं प्रत्याह—सर्वेति । यथा मृदाद्युपायः स्वोपेयघटादिनिर्वृत्तौ सत्यामनुपायो भवति । एवं प्रमाणमपि [4]स्वोपेयार्थनिश्चितौ सत्यां भवत्वप्रमाणमित्यर्थः । सर्वस्यात्मत्वं श्रुतौ [5]नैसर्गिकमुक्तम् । तस्य 'स यथा' इत्यादिना वेदविषये पृथगुत्पत्तिवचनेन

---

1. **तदमात्वं**—वेदस्य अप्रमाणत्वम् ।

* **तदयुक्तमिति** मिथ्यात्वं न अमानत्वे प्रयोजकं, मिथ्याभूतस्यापि प्रतिबिम्बस्य बिम्बानुमापकत्वेन मानत्वदर्शनादिति भावः ।

2. **अबाधितानवगतनिश्चयेति** अबाधितः अज्ञातश्च योऽर्थः तद्विषयकनिश्चये-त्यर्थः ।

3. **वेदाभावादिति** ब्रह्मातिरिक्तेत्यादिः ।

4. **स्वोपेयार्थनिश्चितौ**—स्वस्योपेया या अर्थनिश्चितिः – अर्थनिश्चयः, तस्मिन् ।

5. **नैसर्गिकमिति** औत्सर्गिकमिति यावत् ।

स्वोपेयार्थप्रसिद्धौ च नोपायानामुपायता ।
न चोत्सर्गापवादोऽपि साक्षाद्वेदग्रहश्रवात् ॥ (311)

बालोन्मत्तोक्तिवच्चाहं वक्तुं दूषणमादरात् ।
जिह्रेमि बहुशोऽत्रोक्तौ तस्मादेवोपरम्यते ॥ (312)

* ऋग्वेदादिगिरोच्यन्ते ऋग्यजुःसामलक्षणाः ।
अथर्वाङ्गिरसस्तद्वन्मन्त्राः स्युर्ब्राह्मणोद्भृताः ॥ (313)

इतिहासादिसंभेदभिन्नं ब्राह्मणमेव तु ।
ग्राह्यमत्र प्रसिद्धस्तु नेतिहासादिरिष्यते ॥ (314)

अपवादा(मृदाभाव)[त्र] [1]तन्मिथ्यात्वशङ्का, इत्यत्राह—**न चेति** । 'इमे वेदाः' इति साक्षात् वेदं गृहीत्वा, 'इदं सर्वं यदयमात्मा' (बृ. 6-5-7) इति [2]**षष्ठे** श्रवणान्नोक्तापवाद इत्यर्थः । (310–311) वेदस्याबुद्धिपूर्वकत्वे बालादिवाक्यवदमात्वम्, अत्राह—**बालेति** । बालोन्मत्तोक्तिसमो वेदः इत्यस्यामुक्तौ दूषणं वक्तुमपत्रपामहे । 'नित्यस्तु स्यात् दर्शनस्य परार्थत्वात्' (पू. मी. 1-1-18) इत्यादिना [3]तन्त्रान्तरे परिहृतत्वात्, अस्माभिरपि संबन्धग्रन्थादारभ्य तन्मा(त्र)[त्व]स्य साधितत्वादित्यर्थः । (312) 'यदृग्वेदः' इत्यादेरर्थमाह—**ऋग्वेदादीति** । अबुद्धिपूर्वत्वश्रुतेनैव प्रसिद्धेतिहासादिः न गृह्यते, इत्याह—**प्रसिद्धस्त्विति** ।

---

1. **तन्मिथ्यात्वशङ्का**—वेदस्य मिथ्यात्वशङ्का ।

2. **षष्ठे इति** बृहदारण्यके चतुर्थे इव षष्ठेऽप्यध्याये निगमनस्थानापन्नं मैत्रेयीब्राह्मणं श्रूयते । द्वयोः ब्राह्मणयोः किञ्चिदिव वाक्यसन्दर्भवैलक्षण्यमुपलभ्यते । 'इदं ब्रह्मेदं क्षत्रम्' इत्यादिकं वाक्यमुभयत्राप्यस्ति । चतुर्थे, 'इमे वेदाः' इति नास्ति । तथापि षष्ठाध्याये "इदं ब्रह्मेदं क्षत्रमिमे लोकाः इमे देवाः **इमे वेदाः** इमानि भूतानि इदं सर्वं यदयमात्मा ।" इति श्रूयते इति बोध्यम् ।

3. **तन्त्रान्तरे** — जैमिनीये पूर्वतन्त्रे ।

* **ऋग्वेदादीति** अत्र ऋग्वेदादिपदैः चतुर्विधं मन्त्रजातं, इतिहासः पुराणमित्यादिना व्याख्यानानि इत्यन्तेन वाक्येन अष्टविधं ब्राह्मणं च विवक्षितम् । एवञ्च मन्त्रब्राह्मणात्मकवेदस्यैव जन्मोक्तमिति भावः ।

अभिधेयार्थजन्मापि ह्यभिधासंभवोक्तितः ।
द्रष्टव्यं, नाभिधानं स्यादभिधेयमृते क्वचित् ॥ (315)

मन्त्रब्राह्मणयोर्वेदनामधेयत्वकारणात् ।
ऋग्वेदादिगिरा तस्मान्मन्त्रब्राह्मणयोर्ग्रहः ॥ (316)

यथासिद्धमितिहासपुराणाद्यपि गृह्यते ।
लोकप्रसिद्धिमुल्लङ्घ्य यतोऽन्यार्थ्योऽन्यथाग्रहः ॥ (317)

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।'
इत्यादि मनुनाप्युक्तं कथं तत्त्यागमर्हति ॥ (318)

(313-314) अभिधेयसृष्टिर्नोच्यते । अभिधानस्यैव जन्मोक्तौ को हेतुरिति चेत्, अर्थसिद्धत्वात्, इत्याह—अभिधेयेति । (315)

'यदृग्वेदः' इत्यादेः भाष्योक्तार्थाक्षेपेण स्वयमर्थान्तरकथनम्

एवं भाष्यकारोक्तमर्थं प्रदर्श्य वार्त्तिक[1]लक्षणसिद्ध्यर्थमाक्षि[2]पति—मन्त्रेति । यस्मात् मन्त्रवत् ब्राह्मणस्यापि वेद[3]त्वव्युत्पत्तिरविशिष्टा, तस्मात् चतुर्विधं मन्त्रजातमेव न ग्राह्यमित्यर्थः । (316) इतिहासादिशब्दस्य [4]अर्थान्तरमाह—यथेति । अबाधितलोकप्रसिद्धित्यागे लोकवेदाधिकरणभङ्गादित्यर्थः । (317) ऋगादिशब्दसंनिधानात् इतिहासादिशब्दानामपि वेद[5]वचनत्वमाशङ्क्य, संनिधेः बलवत् लिङ्गमाह—इतिहासेति । 'बिभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति' इति तदी[6]या-

---

1. वार्त्तिकलक्षणसिद्ध्यर्थमिति उक्तानुक्तदुरुक्तचिन्तनस्य वार्त्तिकलक्षणस्य स्वग्रन्थे सिद्ध्यर्थमित्यर्थः ।
2. आक्षिपति—दूषयति ।
3. वेदत्वव्युत्पत्तिः — वेदपदशक्यतेति यावत् ।
4. अर्थान्तरं — भाष्योक्तार्थव्यतिरिक्तमर्थम् ।
5. वेदवचनत्वं—वेदबोधकत्वम् ।
6. तदीयार्थ—मनुवाक्यस्यार्थान्तरम् ।

इतिहासपुराणादेः वेदमूलत्वकारणात् ।
प्रामाण्यं नान्यथा तस्य प्रामाण्यमुपपद्यते ॥ (319)

प्रत्यक्षवेदवचनविरुद्धं तेषु यद्वचः ।
बुद्धवाक्यादिवत्तादृक् त्याज्यं श्रुतिविरोधतः ॥ (320)

न चेश्वरातिरेकेण कश्चित्स्रष्टाभ्युपेयते ।
इतिहासपुराणादेस्तदन्यस्येह कार्यतः ॥ (321)

कारणत्वं प्रमाणेन यस्य साक्षाद्विनिश्चितम् ।
अपि तत्कार्यकर्तृत्वे तदेवाभ्युपगम्यते ॥ (322)

बीजमेवाङ्कुरादीनां यथा कारणमिष्यते ।
अङ्कुराद्यात्मना तद्वद्बीजमेव तु कारणम् ॥ (323)

आद्यन्तयोर्यतो बीजं प्रत्यक्षेणावसीयते ।
तस्मात्तन्मध्यकार्येषु बीजमेवास्तु कारणम् ॥ (324)

र्थम् । [318] इतिहासादिना वेदार्थनिश्चये वेद(त्व)[स्य]सापेक्षत्वमिति विप[1]रीतमापन्नम्, अत्राह—इतिहासेति । व्याख्यातृवाक्यतुल्यत्वादितिहासादेः नातीन्द्रियार्थे स्वातन्त्र्यमित्यर्थः । [319] वेदमूलत्वेनैव तत्प्रामाण्ये स्मृत्यधिकरणन्यायं लिङ्गमाह—प्रत्यक्षेति । [320] प्रसिद्धेतिहासादिग्रहे कथं तस्य[2] व्यासादि[3]कर्तृस्मृतिः, अत्राह—न चेति । ईश्वरान्निःश्वसितन्यायेनोत्पन्नं व्यासादिबुद्धावाविर्भूतमित्यर्थः । [321] पर एव वा व्यासादिरूपेण पुराणादिकर्तेति तस्यैव कारणत्वं साधयति—कारणत्वमिति । [322] ब्रह्मैव व्यासादिरूपेण तत्कारणमित्यत्र दृष्टान्तमाह—बीजमिति । अङ्कुराद्यात्मना पत्रकाण्डप्रसूनानामिति शेषः । [323] हेतुमाह—आद्यन्त(र)योरिति । एवं ब्रह्मैव कारणमित्यर्थः । (324)

---

1. विपरीतमापन्नम्—अप्रामाण्यमापन्नम् ।
2. तस्य—प्रसिद्धेतिहासादेः ।
3. व्यासादिकर्तृस्मृतिः — व्यासादिकर्तृकत्वेन स्मरणमिति यावत् ।

न च वेदोक्तितो वेदः श्रद्धेयार्थ इहेष्यते ।
* किन्त्वमानत्वहेतूनां वेदवाक्येष्वसंभवात् ॥ (325)

प्रामाण्यं वेदवाक्यानां न च मानान्तराश्रयात् ।
अक्षादेरपि मानत्वं यथोक्तादेव कारणात् ॥ (326)

प्रज्ञानव्यतिरेकेण यथैव स्थितिसर्गयोः ।
वस्त्वन्तरं न संभाव्यं प्रलयेऽपि तथोच्यते ॥ (327)

यथा वेदो वेदत्वादेव मानम्, तथा पुरा[1]णादि(पु)रप्यस्तु, किं वेदमूलत्वेन, अत्राह—**न चेति** । [2]अमात्वहेतूनां मिथ्यात्वा(त)ज्ञा(त)[न]संशयादीनामभावादित्यर्थः । (325) वाक्यमानत्वात् वेदस्य मान्तरसापेक्षत्वम्, अत्राह—**प्रामाण्यमिति** । अबाधिताज्ञातधीहेतुत्वेन वेदमात्वे दृष्टान्तमाह—**अक्षादेरिति** । (326)

एकादशकण्डिकार्थनिरूपणम्

'[3]स यथा' इत्यादेः वृत्तानुवादेन संगतिमाह—**प्रज्ञानेति** । [327]

---

1. **पुराणादिरप्यस्तु**—पुराणादित्वेन पुराणादिर्मानमस्तु ।
2. **अमात्वहेतूनामिति** विषयगतानामिति शेषः ।

* "कर्त्रन्तरस्मृत्यविरोधेऽपि नेतिहासादेः सापेक्षं प्रामाण्यं, निश्वसितश्रुतेः वेदवद्-बुद्धिपूर्वकत्वात्, इत्याशङ्कयाह—**न चेति** अस्यार्थः—निश्वसितमिति वेदवचनेनाधीपूर्वीकृत्या वेदोऽनपेक्षप्रमाणं नेष्यते। किन्तु मानान्तरदृष्टार्थत्वादीनामप्रामाण्यहेतूनां तत्राभावात् । इतिहासादेस्तु वेदोपबृंहकत्वात् तद्दृष्टार्थस्य नानपेक्षता । न चेतिहासादिविषये निश्वसितश्रुतिविरोधः, परस्मात् व्यासादिरूपादनायासेन तद्व्यक्तिविषयत्वादिति ।" इति **शास्त्रप्रकाशिका** ।

3. **स यथा इत्यादेरिति** "स यथा सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायनम्, एवं सर्वेषां गन्धानां नासिके एकायनम्, एवं सर्वेषां रसानां जिह्वैकायनम्, एवं सर्वेषां रूपाणां चक्षुरेकायनम्, एवं सर्वेषां शब्दानां श्रोत्रमेकायनम्, एवं सर्वेषां संकल्पानां मन एकायनम्, एवं सर्वासां विद्यानां हृदयमेकायनम्, एवं सर्वेषां कर्मणां हस्तावेकायनम, एवं सर्वेषामानन्दानामुपस्थ एकायनम्, एवं सर्वेषां विसर्गाणां पायुरेकायनम्, एवं सर्वेषामध्वनां पादावेकायनम्, एवं सर्वेषां वेदानां वागेकायनम् ।" इति श्रुतिः ॥

विभिन्ननामरूपाणां सरितां सागरो यथा ।
अभिन्ननामरूपैकः प्रलयोऽयनमेकता ॥ (328)

स्पर्शादिज्ञानभेदानां त्वगाद्येकायनं तथा ।
स्वान्ते त्वगादयस्तद्वत् बुद्धौ च मनसस्तथा ॥ (329)

कर्मक्षयात्तथा बुद्धिः कारणत्वेन तिष्ठति ।
एष साधारणस्तावत् प्रलयोऽबुद्धिपूर्वकः ॥ (330)

प्रत्यग्याथात्म्यविज्ञानाद्वस्तुवृत्तानुरोधतः ।
प्रलयोऽज्ञानविध्वंसाद्यस्त्वसौ बुद्धिपूर्वकः ॥ (331)

अब्धिरेकायनं यद्वत् सर्वासां सरितां तथा ।
त्वग्गोचराणां स्पर्शानां त्वगेवैकायनं परम् ॥ (332)

तद्वा(किं)[क्यं]व्याकरोति—**विभिन्नेति** । [328]

भर्तृप्रपञ्चमतेन वाक्यार्थनिरूपणम्

'एवम्' इत्यादि दार्ष्टान्ति[1]कवाक्यार्थमाह—**स्पर्शादीति** । विषयज्ञा[ना]नामिन्द्रियेषु लयः, तेषां मनसि, (भव्य)[तस्य]बुद्धौ, तस्याः स्व(प्रमाण)[परिणाम]हेत्वदृष्टक्षयात् कारणात्मनि लय इत्यर्थः । [2]असाधारणलयं वक्तुं सुषुप्त्यादौ सर्वप्राणिनां साधारणो लय उक्तः, इत्याह—**एष इति** । [**प्रलय इति**] असाधारणः इति शेषः । (329-330-331) स्वाभाविकसौषुप्तलयं दृष्टान्तमुखेन स्पष्टयति—**अब्धिरिति** । (332) पूर्वं [3]स्पर्शादिशब्देन तद्विषयज्ञानमुक्तं । इदानीं विषया

---

1. **दार्ष्टान्तिकवाक्यार्थमाहेति** एकदेशिमतेनेत्यादिः । स्पष्टीभविष्यति चेदमुपरिष्टात् ।
2. **असाधारणलयम्**—प्रत्यग्याथात्म्यबुद्धिपूर्वकं लयम् ।
3. **स्पर्शादिशब्देन**—'सर्वेषां स्पर्शानां, सर्वेषां गन्धानाम्' इत्यादिश्रुतिस्थस्पर्शादिशब्देन ।

स्पर्शशब्देन विषयः त्वग्ग्राह्योऽत्राभिधीयते ।
तथा गन्धादिशब्देन घ्राणादिविषयो यतः ॥ (333)

गन्धादिसंहतिः पृथ्वी रसान्तानां तथा जलम् ।
तेजस्त्रयाणां वायुस्तु द्वयोरेकात्मकं नभः ॥ (334)

एवं लक्षणतः पञ्च भूतान्येतानि निर्दिशेत् ।
मूर्तामूर्ताविष्करणं गुणाविष्कृतिरिष्यते ॥ (335)

संहतोक्तविशेषाणां भूतानां कारणात्मता ।
तत्र स्पर्शग्रहेणैव वायोरंशोऽत्र गृह्यते ॥ (336)

एव गृह्यन्ते, इत्याह—स्पर्शेति । विषयाणां स्वग्राहकेन्द्रियेषु लयः, इन्द्रियाणां मनसि, मनसो बुद्धौ, बुद्धेः कारणे इत्यर्थः । (333) भूतानां लयप्रदर्शनार्थं लयात् प्रागवस्थामाह—गन्धादीति । गन्धस्पर्शरूपरसशब्दानां संहतिरित्यर्थः । रसान्तानां-चतुर्णां संहतिः जलम् । द्वयोः—स्पर्शशब्दयोः । एकात्मकं—शब्दात्मकमित्यर्थः । (334) गुणसंहतित्वं भूतानां किमर्थमुच्यते इति चेत्, अत्राह—मूर्तेति । कारणात् गुणानां या अ(ति)[भि]व्यक्तिः आविष्कृतिः, सैव मूर्तामू(र्त)[र्तात्म]कभूतानामभिव्यक्तिः, [1]तल्लय एव [2]तेषां लयः इति वक्तुमित्यर्थः । (335) कीदृशो लयः, इत्यत्राह—संहतेति । कारणात्म(ना)[ता] लयः इति शेषः । अनभिव्यक्तकार्यस्य कारणसंसर्गो लयः, न तु[3] तार्किकप्रस्थानवदित्यर्थः । गुणलय एव श्रुतः न भूतलयः इत्याशङ्क्य, गुणाः [4]तदुपलक्षणार्थाः, अन्यथा सर्वलयासिद्धेः, इत्याह-तत्रेति । श्रुतौ । अत्र—भूतानां मध्ये । तृतीयः रूपांशः । चतुर्थः रसोपलक्षितः । पञ्चमः [5]शब्दादिक्रमापेक्षया

---

1. तल्लय एव—गुणानां लय एव ।
2. तेषां लयः — पञ्चभूतानां लयः ।
3. न तु तार्किकप्रस्थानवदिति तार्किकाणां प्रस्थाने यथा भूतस्य लयः भावातिरिक्तः ध्वंसात्मकः अभावः स्वीक्रियते, तथा नेत्यर्थः ।
4. तदुपलक्षणार्थाः — भूतोपलक्षणार्थाः ।
5. शब्दादिक्रमापेक्षयेति शब्दः, स्पर्शः, रूपं, रसः, गन्धः इति गुणानां सृष्ट्यनुसारी क्रमो बोध्यः ।

तेजसस्तु तृतीयांशः चतुर्थोऽपां तथा श्रुतः ।
पञ्चमस्तद्गुणैर्भेदः तथा स्पर्शे समीक्ष्यताम् ॥ (337)

गन्धादिषु तथा योज्यः भेदोऽयं गुणभेदतः ।
पृथिव्यंशस्य बाहुल्यात् कर्कशः स्पर्श उच्यते ॥ (338)

शीतश्च पिच्छिलश्चापां बाहुल्यात् स्पर्श इष्यते ।
भूयस्त्वात्तेजसश्चोष्णः सुकुमारस्तथा मरुत् ॥ (339)

बाहुल्यादिति विज्ञेयो यथोक्तगुणसंश्रयात् ।
ध्वस्ताशेषविकारस्य ब्रह्मणोऽविद्याऽत्मनः ॥ (340)

स एष परिणामः स्यात् तेजोऽबन्नाद्यपक्रमः ।
स्पर्शनाद्यात्मनात्यन्तं परं काठिन्यमागतः ॥ (341)

उद्भूतस्पर्शविज्ञानस्त्वचा तस्य समागमात् ।
स्पर्शभेदपरिज्ञानं ततोऽभिव्यज्यते दृशेः ॥ (342)

स्पर्शादिभेदविज्ञानं स्यादचेतनमेव तु ।
स्पर्शादिवत्पराथत्वात् स्वार्थं तन्न तु साक्षिवत् ॥ (343)

गन्धः, तदुपलक्षित इत्यर्थः । भूम्यादीनां गुणसंहतिरूपत्वे कथमवान्तरभेदः, अत्राह—**तद्गुणैरिति** । गुणभेदात् भूतभेद इत्यर्थः । उक्तमन्यत्रातिदिशति—**तथेति** । स्पर्शादीनामेकैकगुणस्यानेकत्वं भूम्यादिभूताल्पत्वबहुत्वकृतमित्यर्थः । (336–337) तत्र स्पर्शस्य ना(न)[ना]त्वं दर्शयति—**पृथिवीति** । पिच्छिलः—द्रवः । स्पर्शाद्यात्मविश्वस्य[1] अनेकात्मकत्वात् कथमेकरसब्रह्मणः तत्कारणता, अत्राह—**ध्वस्तेति** । (338–339–340–341) कथमस्य परिणामस्य सिद्धिः, अत्राह—**उद्भूतेति** । त्वगादीन्द्रियसंयोगात् परिणाम उद्भूतस्पर्शादिज्ञानो भवति । इन्द्रियजज्ञानात् सिद्ध्यतीत्यर्थः । तत् ज्ञानं(शु)[कु]तः सिद्धमिति, नित्यानुभवात्, इत्याह—**स्पर्शेति** । (342) तत् ज्ञानं स्वप्रकाशं, न साक्षिवेद्यम्, अत्राह—**स्पर्शादीति** । (343)

---

1. **विश्वस्य**—प्रपञ्चस्य ।

अतीव कठिनं ज्ञानं त्वचा चास्य समागमात् ।
मनसा तस्य संयोगे ततः स्वच्छैव धीर्भवेत् ॥ (344)

ततोऽपि सूक्ष्मं विज्ञानं बुद्धिसंयोगजं भवेत् ।
यावद्रुधिरसंव्याप्तिः शरीरे तावदेव तु ॥ (345)

बुद्धेः सामान्यवृत्त्येह व्याप्तिरादेहसंक्षयात् ।
चैतन्याभासवत्प्राणः तां वृत्तिं व्याप्य तिष्ठति ॥ (346)

अकार्यकारणत्वात्मा तमपह्नुत्य तिष्ठति ।
* कण्टकादिसमायोगे शरीरे विक्रिया यदा ॥ (347)

तदाऽधर्मादितो दुःखं विक्रियातोऽभिजायते ।
देहैकदेशगं दुःखं विशिनष्टि स्वदेशगाम् ॥ (348)

एवं प्रलयात्प्रागवस्थामुक्त्वा, ज्ञानस्य तया सह प्रतीचि उपसंहारक्रममाह—**अतीवेति** । त्वगादीन्द्रियजं ज्ञानमत्यन्तस्थूलीभूतं यदा सविषयं मनसा युज्यते—मनोमात्रमिति निरूप्यते, तदा स्थूलतात्यागात् स्वच्छं सूक्ष्मं भवतीत्यर्थः । (344) तत् पुनः कोपसंह्रियते, अत्राह—**ततोऽपीति** । **बुद्धिसंयोगजं**—बुद्धिमात्रमिति निरूप्यमाणम् सूक्ष्मतरम् । मनसोऽपि बुद्धेः सूक्ष्मत्वादित्यर्थः । सा च बुद्धिः सर्वदेहव्यापिनी, इत्याह—**यावदिति** । तां बुद्धिं साभास कार(णमा)-[णा]त्मा प्राणशब्दितः आदत्ते, इत्याह—**चैतन्येति** । कारणं च प्रत्यगात्मनि लीयते इत्यर्थः । (345–346)

[1]स्वाभाविकलये कार्यकारणप्रपञ्चस्य प्रतीचि लयेऽपि, न तस्य संसारिणः असंसारिब्रह्मात्मत्वम्, अत्राह—**कण्टकेति** । देहव्यापित्व(वा)[चा] कण्टकचन्दनादियोगे देहे विक्रियातो धर्माधर्मनिमित्तं सुखदुःखं स्यादित्यर्थः । देह-

---

1. **स्वाभाविकलये** – सौषुप्तलये ।

* 'स्पर्शादीनां क्रमेण प्रत्यगन्तं लयमुक्त्वा, स्वाभाविके तस्मिन् न बन्धः, बुद्धिपूर्वके तु स नेति किं वाच्यमिति वक्तुं, लयात् प्राक् प्रतीचः संसारप्रकारमाह—**कण्टकेति**' इति **शास्त्रप्रकाशिका** ।

धियं, तद्देशदुःखित्वाद् दुःखित्वं जायते धियः ।
* तस्यावच्छित्तये वृत्तिर्दुःखभूत्यैव जायते ॥ (349)

भोक्तृभोग्याभिसंबन्धस्तन्निमित्तोऽयमात्मनः ।
बुद्धेः सेयमहंवृत्तिः दुःखावच्छेदिनी सती ॥ (350)

परिच्छिनत्ति बोद्धारं बोद्धाप्याभासमात्मनः ।
न बहिर्विक्रियां मुक्त्वा देहेऽहंवृत्तिसंभवः ॥ (351)

स्वस्थेन्द्रियमनोबुद्धिर्नैवाहमिति वीक्ष्यते ।
पुत्राभिमानजे त्वस्मिन् न देहांशविशिष्टता ॥ (352)

---

[1]समवायित्वे कथ(मत्व)[मात्म]धर्मत्वधीः, अत्राह—**देहेति** । अन्तःकरणैक्याध्यासवति देहतादात्म्याध्यासात् देहगं बुद्धावध्यस्यते इत्यर्थः । तदेव स्पष्टयति—**तद्देशेति** । [2]अप्रतीतस्य विशेषणत्वायोगात् तदा तद्गोचरप्रमाणाभावात् कथं बुद्धि विशिंष्यात्, अत्राह—**तस्येति** । [दुःखभूत्या] दुःखजन्मना समकालं, तस्यावच्छित्तये—**विशेषणाय**, अन्या बुद्धिवृत्तिर्जायते इत्यर्थः । (347–348–349) काऽसौ वृत्तिरिति, तामाह–[**बुद्धेः सेयमिति** ।] दुःखविशिष्टा वृत्तिः अहमित्येवंरूपा, वृत्तिमदन्तःकरणं बो(घ)[द्धृ]रूपं विशिनष्टि । तच्च दुःखविशिष्टं स्वोप(मा)हितमाभासं जीवाख्यं स्वगत(दुःखगत)दुःखेन विशिनष्टि । स चाभासः स्वगतदुःखसाक्षिणि समर्पयति, इत्येवमध्यस्तं संसारित्वमित्यर्थः । दुःखादेरन्तःकरणपरिणामत्वेऽपि देहयोग एवोत्पत्तेः, पादे मे वेदना इत्यनुभवाच्च 'देहैकदेशगं दुःखम्' (वा. 348) इत्युक्तमिति द्रष्टव्यम् । सुखदुःखादिपरिणामसमय एव अहंवृत्त्युद्भवः इत्ययुक्तम् कालान्तरेऽपि भावात्, अत्राह—**न बहिरिति** । समाहितबुद्धेरहंवृत्त्यदर्शनादित्यर्थः । (350-351) कण्टकादिजनितदुःखस्य देहावयवद्वारा बुद्धिसंबन्धे पुत्राद्यभिमान(ज)निमित्तजदुःखस्यापि तथा स्यात्,

---

1. देहसमवायित्वे इति सुखदुःखादेरित्यादिः ।
2. अप्रतीतस्येति दुःखादेरिति शेषः ।

* 'केचित् दुःखस्य स्वसत्तायां प्रकाशाव्यभिचारात् स्वप्रकाशत्वमाहुः । तान्प्रत्याह—तस्येति ।'' इति शास्त्रप्रकाशिका ।

तत्तद्वस्तु समुद्दिश्य दुःखित्वं तत्र मानिनः ।
* अज्ञानादभिमानोऽयं बुद्ध्यादौ विषयावधौ ॥ (353)

न तु निःसङ्गकूटस्थप्रतीचः स्यादहंमतिः ।
न कार्यप्रलयो दृष्टो यस्मादन्यत्र कारणात् ॥ (354)

त्वगारम्भकसामान्यं त्वगिगराऽतोऽत्र गृह्यते ।
कार्यत्वान्नेन्द्रियेष्वेव विषयप्रलयो भवेत् ॥ (355)

न मृदोऽन्यत्र कुम्भादेः शरावे प्रलयो यतः ।
तस्मात्त्वगादयः शब्दाः त्वगाद्यारम्भकाभिधाः ॥ (356)

सर्वत्र प्रतिपत्तव्या नान्यत्र प्रलयो यतः ।
गन्धशब्देन कृत्स्नापि पृथिवी परिगृह्यते ॥ (357)

अत्राह—[पुत्रे]ति । (अभिमानाभावात्) तत्र तत्र विषये ममाभिमानवतोऽन्तःकरणस्यैव दुःखमित्यर्थः । तर्हि दुःखहेतुत्वादभिमानः परमार्थः, अत्राह—अ(भिमा)[ज्ञा]नादिति । (352-353)

परमसिद्धान्तेन 'सर्वेषां स्पर्शानां त्वगेकायनम्' इत्यादिवाक्यार्थनिरूपणम्

पूर्वं विषयत(द्विष)[द्धि]यामिन्द्रियेषु लयमेकदेशिमतेनोक्त्वा, परमराद्धान्तं वक्तुं सामान्यन्यायमाह—न कार्येति । (354) प्रकृते योजयति—त्वगिति । अतःशब्दोक्तहेतुं विशदयति—कार्यत्वादिति । इन्द्रियाणां विषयकार्यत्वात् [1]तान् प्रत्यनुपादानत्वादित्यर्थः । (355) फलितमाह—तस्मादिति । (356) 'सर्वेषां गन्धानाम्' इत्यत्र गन्धशब्दार्थमाह—गन्धेति । शब्दादिगुणसंहति-

---

* "ममाभिमानस्य वस्तुत्वात् तज्जं दुःखमपि तथा (वस्तु) इत्याशङ्क्याह—अज्ञानादिति ।" इति शास्त्रप्रकाशिका ।

1. तान् प्रत्यनुपादानत्वात्—विषयान् प्रति इन्द्रियाणामुपादानत्वाभावात् । तस्मात् न तत्तदिन्द्रियेषु विषयाणां लयः इत्यर्थः ।

यदि वा परभागोऽस्या गन्धस्यानेकभेदतः ।
गन्धो गुरुः क्षितिप्रायः ह्लादी शीतोऽप्प्रधानतः ॥ (358)

तेजोभूयस्तथा तीक्ष्णो लघुर्वायुप्रधानतः ।
शान्तोऽथ विशदो व्यापी स्याद् व्योम्नोऽथ प्रधानतः ॥ (359)

पार्थिवाप्यांशयोस्तेजः परिक्लेदात्तथाऽधमः ।
दुर्गन्धो जायते गन्धः पापकर्मप्रबोधतः ॥ (360)

समांशपरिणामे तु सुरभिर्जायते शुभः ।
पुण्यकर्मप्रयुक्तः सन् जन्तोरासङ्गकृत्तथा ॥ (361)

* रसरूपरवेष्वेवं यथोक्तं प्रतिपादयेत् ।
प्रधानगुणभावेन गुणानां भूरिरूपता ॥ (362)

असाधारणगन्धादिग्राहकत्वानुमानतः ।
ग्राह्यभूतप्रधानत्वं घ्राणादिष्वपि निर्दिशेत् ॥ (363)

रूपस्थूलपृथिवीत्यर्थः । (357) गन्धस्यानेकविधस्य [1]सहजांशो गन्धो वा गृह्यते, इत्याह—(प)[य]दीति गन्धस्याने[2]कत्वं प्रकटयति—**गन्ध इति** । (358–359–360–361) गुणानां—भूतानाम्, उपचयापचयवशात् उक्तमनेकत्वं रसादिषु अतिदिशति—**रसेति** । (362) 'त्वगारम्भकसामान्यम्' (वा. 355) इत्यत्र इन्द्रियाणां विषयकार्यत्वमुक्तम् । [3]तत् साधयति—**असाधारणेति** । **ग्राह्यभूतप्र**(माण)[धान]त्वं—[4]ग्राह्यसजातीयारब्धत्वम् । इन्द्रियं ग्राह्यसमानजाती-

---

1. **सहजांश इति** परभागः (वा. 358) इत्यस्य विवरणम् ।
2. **अनेकत्वं**—अनेकविधत्वम् । एवमुत्तरत्रापि ।

* **रसरूपरवेषु**—रसरूपशब्देषु ।

3. **तत् साधयति**—इन्द्रियाणां विषयकार्यत्वं साधयति ।
4. **ग्राह्यभूतप्रधानत्वम्** (वा. 363) इत्यत्र प्रधानत्वं सारत्वं कारणत्वमिति यावत् । बहुव्रीहिसमासाश्रयणात् ग्राह्यभूतकार्यत्वं लभ्यते । इन्द्रियगृह्यमाणविषयेण इन्द्रियजननायोगात् ग्राह्यपदेन ग्राह्यसजातीयं विवक्षितमिति अभिसन्धाय फलितार्थमाह—**ग्राह्यसजातीयारब्धत्वमिति** ।

स्वग्राह्यार्थसजातीयमिन्द्रियं स्यात्प्रदीपवत् ।
रूपस्यैवावभासित्वान्न चेत्स्याच्छ्रोत्ररूपवत् ॥ (364)

न चेदर्थसजातीयं सर्वार्थग्रहणं भवेत् ।
एकैकस्येन्द्रियस्येह मनोबुद्ध्योर्यथा तथा ॥ (365)

सर्वभूतात्मकत्वात्तु सर्वार्थग्रहणं तयोः ।
मनोबुद्ध्योरिति ज्ञेयमन्यथा तदसंभवात् ॥ (366)

* त्वगादिज्ञानशक्तीनां बुद्धिः सामान्यमुच्यते ।
प्राण एव क्रियाशक्तिसामान्यं तद्वदुच्यते ॥ (367)

यारब्धं प्रकाशकत्वात् दीपवदित्यर्थः। (363) [1]साधारणानुमानमुक्त्वा, [2]विशेषानुमानमाह—**स्वग्राह्येति** । चक्षुः तैजसं रूपादिषु [3]रूपस्यैव ग्राहकत्वात् दीपवत् । रसनमाप्यं, रसादिषु रसस्यैव ग्राहकत्वात् आस्योदकवत् । घ्राणं पार्थिवं गन्धादिषु गन्धस्यैव व्यञ्जकत्वात् घृतादिवत् । त्वगिन्द्रियं वायवीयं स्पर्शादिषु स्पर्शस्यैव व्यञ्जकत्वात् व्यजनवायुवदित्यर्थः । विपक्षे बाधकाभावादप्रयोजको हेतुः, इत्यत्राह—**न चेदिति** । चक्षुरादीनां तैजसादित्वाभावे नियमेन रूपादिव्यञ्जकत्वं न स्यात्, श्रोत्रेणेव रूपाग्रहणमित्यर्थः । (364) प्रकारान्तरेणापि विपक्षे बाधकमाह—**न चेदर्थेति** । (365) मनोबुद्ध्योः सर्वार्थग्राहकत्वे हेतुमाह—**सर्वेति** । (366)

[4]सर्वेन्द्रियाणां भौतिकत्वमुक्त्वा, तेषां सामान्यं रूपमाह—**त्वगादीति** । कर्मेन्द्रियाणां साधारणं रूपमाह—**प्राण इति** । [5]तेजोमयी वाक् । हस्तौ

---

1. **साधारणानुमानं**—इन्द्रियसामान्ये ग्राह्यसजातीयारब्धत्वानुमानम् ।
2. **विशेषानुमानं**—चक्षुरादितत्तदिन्द्रिये तत्तद्ग्राह्यसजातीयारब्धत्वानुमानम् ।
3. **रूपादिषु** इति निर्धारणे सप्तमी । एवमुत्तरत्रापि ।
4. **सर्वेन्द्रियाणां**—त्वगादीनां ज्ञानेन्द्रियाणाम् ।
* **ज्ञानशक्तीनामिति** शक्तिशक्तिमतोः तादात्म्यात् ज्ञानशक्तिमतामित्यर्थः । एवं क्रियाशक्तीत्यत्रापि बोध्यम् ।
5. कर्मेन्द्रियाणां भौतिकत्वं निरूपयति—**तेजोमयीति**।

शब्दादिभोगसिद्ध्यर्थं श्रोत्राद्या ज्ञानशक्तयः ।
तद्वत्कर्मोपभोगार्थं वागाद्याः कर्मशक्तयः ॥ (368)

यथोक्तशक्तिविक्षेपो मनोबुद्धिपुरःसरः ।
संकल्पाध्यवसायाभ्यां तयोर्भेदोऽपि च द्विधा ॥ (369)

* योग्येन्द्रियस्य या यस्य ततोऽन्यत्रापि लक्षिता ।
वृत्तिस्तस्यैव सा ज्ञेया न स्वभावविपर्ययः ॥ (370)

एवं ज्ञानक्रियाशक्तिविक्षेपाज्जगदात्मनः ।
करणायतनत्वाय देहाविर्भूतिरात्मनः ॥ (371)

---

[1]बलकर्मेन्द्रियाधिष्ठितौ वायवीयौ । पायुर्गन्धवान् पार्थिवः । प्रजननं, आप्यं स्निग्धत्वात् । पादौ परिशेषान्नाभसौ । तेषां क्रियाशक्तिमतां साधारणं रूपं प्राण इत्यर्थः । (367) किमर्थानीन्द्रियाणीति, तत्राह—**शब्दादीति** । (368) केन प्रयुक्तानि [2]तानि व्याप्रियन्ते, तत्राह—**यथोक्तेति** । अन्तःकरणत्वाविशेषे [3]मनोबुद्धिविभागः कथम्, अत्राह—**संकल्पेति** । (369) चक्षुरा(दि)[दे]र्नियमेन रूपादिविषयत्वमसिद्धं, उरगनेत्रस्य शब्दव्यञ्जकत्वात्, पादेन हस्तेन्द्रियव्यापारस्य करणात्, हस्तेन च पादव्यापारनिष्पत्तेः, अत्राह—**योग्येति** । (370) करणानां नियतविषयत्वे तैरेवात्मनो भोगसिद्धेः देहसृष्टिः किमर्था, अत्राह—**एवमिति** । जगदात्मनः—संसारिणः, करणाश्रयत्वेन देहसृष्टिरित्यर्थः । (371) करणानां

---

1. **बलकर्मेति** 'प्राणो वै बलम्' इति श्रुतेः, वायुरूपबलस्य हस्तयोर्दृष्टेः **हस्तौ** वायवीयावित्यर्थः ।
"वाक् नभोविकारः विवरप्राधान्ये सति शब्दव्यञ्जकत्वात् श्रोत्रवत्, पादौ तैजसौ प्रायेणोष्णस्पर्शवत्त्वात् दीपवत्" इत्यपि व्याचक्षते **शास्त्रप्रकाशिकाकाराः** ।
2. **तानि**—इन्द्रियाणि ।
3. **मनोबुद्धिविभागः**—मनः बुद्धिरिति द्वैविध्यम् ।

* **योग्येति** यस्य-श्रोत्रादेः या योग्या श्रवणाद्या वृत्तिः सा चक्षुरादौ दृष्टापि तस्यैव श्रोत्रादेः ज्ञेया । स्वभाववैपरीत्यायोगात् । उरगस्य एकस्मिन्नेव स्थाने इन्द्रियद्वयं वर्तते । अतः नेन्द्रियाणां नियतविषयत्वानुपपत्तिरिति भावः ।

एवं च सति यद्यस्मात् कार्यमाविरभूत् पुरा ।
तत्तु तत्रैव विलयं कार्यमेति स्वकारणे ॥ (372)

मूलकारण एवैषां सर्वेषां विलयो भवेत् ।
तत्कारणत्वात्कार्याणां न तु कार्यान्तरे लयः ॥ (373)

* मृदादिष्वेव प्रात्यक्ष्याद्घटादीनां लयादियम् ।
भ्रान्तिः पूर्वेषु कार्येषु लयोऽयमिति मोहतः ॥ (374)

* एवं त्वगादिवाच्यासु स्पर्शादीनां यथायथम् ।
स्पर्शादिमात्रासु लयस्तासामपि लयस्तथा ॥ (375)

मनोविषयसामान्ये तस्यापि प्रलयो धियः ।
स्वगोचरैकसामान्ये सरितां सागरे यथा ॥ (376)

बुद्धेर्विषयविज्ञानसामान्यमपि चात्मनि ।
परस्मिन् लयविक्षेपरहितेऽपरिणामिनि ॥ (377)

भौतिकत्वसाधनफलमाह—एवं चेति । (372) तर्हि अपसिद्धान्तः, [1]ब्रह्मातिरिक्तकारणोपगमात्, अत्राह—मूलेति । (373) सर्वस्य ब्रह्मण्येव लये कथं मृदादौ कुम्भादिलयसिद्धिः, अत्राह—मृदादिष्विति । मृदाद्यापन्नमूलकारणे घटादिलयकाले मृदादीनां प्रत्यक्षे(णानु)[णो]पलम्भात् तेष्वेव घटादिलयः इति लोकस्याविवेकात् भ्रम इत्यर्थः । (374) सर्वस्य कार्यस्य मूलकारणे लयः इत्युक्तार्थे श्रुतिं 'एवं सर्वेषां स्पर्शानाम्' इत्यादिकां योजयति—एवमिति । (375-376-377) इदानीं कर्मेन्द्रियतद्विषयाणां कथं परस्मिन् लयः,

---

1. ब्रह्मातिरिक्तकारणोपगमात्—भूतात्मककारणस्वीकारात् ।

* 'पिण्डादिष्वेव' इति मु. पु. पाठः ।

* त्वगादिवाच्यास्विति श्रुतौ त्वक्शब्दः स्पर्शमात्रार्थकः । एवं चक्षुःशब्दः रूपमात्रार्थकः इति बोध्यम् । स्पर्शविशेषाणां स्पर्शमात्रायां रूपविशेषाणां रूपमात्रायामित्येवं रीत्या लयो बोध्यः ।

वदनादेः स्वसामान्यविषयेषु तथा लयः ।
कर्मेन्द्रियाणां सर्वेषां तत्सामान्येषु पञ्चसु ॥ (378)

परिस्पन्दः प्रकाशश्च ज्ञानशक्तिषु विद्यते ।
* केवलस्तु परिस्पन्दः कर्मशक्तिषु निष्प्रभः ॥ (379)

सर्वोऽप्येष परिस्पन्दः बुद्धीन्द्रियसमाश्रयः ।
प्राणात्मक इति ज्ञेयो हन्तास्यैवेति च श्रुतिः ॥ (380)

पड्वीशशङ्कुदृष्टान्तात् प्राणस्यैव तु शक्तयः ।
कर्मेन्द्रियाणि सर्वाणि तथा बुद्धीन्द्रियाण्यपि ॥ (381)

आपीतकरणग्रामे पुंसि स्वात्मन्यवस्थिते ।
तथा प्राणाग्नयः शुद्धा जाग्रतीति श्रुतेर्वचः ॥ (382)

इत्यत्राह—वदनादेरिति । वदनादीनां कर्मेन्द्रियाणां च वदनत्वादिसामान्येषु लयः ; तेषां च सामान्यानां प्राणे, प्राणस्य परस्मिन्नित्यर्थः ।(378) इन्द्रियतदर्थानां च प्राणद्वारा परस्मिन् लयं वक्तुं प्राणात्मत्वं धीन्द्रियाणामाह—परि(स्य)[स्प]न्द इति । (379) प्राणात्मकपरिस्पन्दस्य बुद्धीन्द्रियेषु सत्त्वे किं फलति, इत्यत्राह—सर्वोऽपीति । परि(य)[स्प]न्दात्मकत्वात् धीन्द्रियाणां प्राणात्मत्वे प्रमाणमाह—हन्तेति । 'हन्तास्यैव सर्वे रूपमसाम' इति श्रुतेरित्यर्थः । (380) ज्ञानेन्द्रियाणां प्राणात्मत्वे वाक्यान्तरमाह—पड्वीशेति । 'स यथा[सुहयः]पड्वीशशङ्कून् सं(वृहे)[खिदे]त् एवमितरान् प्राणान् सम(ष्वि)[खि]दत्' (छा. 5-1-12) इति । पादबन्धनकीलभूतशङ्कून् युगपत् [1]चतुरः [2]जात्याश्वः समुत्पाटयति । एवं प्राणो वागादीन् इति श्रूयते इत्यर्थः । (381) प्राणानां मुख्यप्राण(प्र)वृत्तित्वे श्रुत्यन्तरमाह—आपीतेति । 'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' (प्र. 4-3) इति श्रुतेः प्राणवृत्तित्वमिन्द्रियाणामित्यर्थः । (382)

---

* निष्प्रभः — प्रकाशरहितः ।

1. चतुरः इति शङ्कून् इत्यस्य विशेषणम् ।

2. जात्याश्वः — प्रशस्तजातीयोऽश्वः ।

सहैव कर्मशक्त्याऽतो ज्ञानशक्तिर्विलीयते ।
प्राणात्मनि श्रुतिश्चाह कस्मिन्निति च सादरा ॥ (383)

साधारणोऽयं विलयः समानान्तोऽभिधीयते ।
स्वहेतुमात्रसंसर्गान्नायमात्यन्तिको लयः ॥ (384)

ज्ञानशक्तिक्रियाशक्तिविभुत्वात्परमक्षरम् ।
व्युह्यात्मानं जगत्त्वेन स्वात्मन्येव समूहति ॥ (385)

निरुह्येति तथा श्रुत्या कारणात्माभिधीयते ।
अत्यक्रामदिति त्वस्य निर्बीजावस्थतोच्यते ॥ (386)

तस्मात् धीन्द्रियाणां प्राणे लयः, प्राणस्य पर[1]स्मिन्निति फलितमाह—सहैवे 'कस्मिन्नु अहमुत्क्रान्ते उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठा मीति' (प्र. 6-3) 'स प्राणमसृजत' (प्र. 6-4) इति श्रुतिश्चात्र मानमित्यर्थ (383) अस्यात्यन्तिकलयत्वात् नायं सर्वप्राणिसाधारणः प्राकृतो लयः, इ शङ्क्याह—साधारण इति । समानशब्दितकारणान्तस्य [2]पञ्चमान्ते अभिधा वाक्य(वि)शेषात् साधारणलय इत्यर्थः । (384) कथं पञ्चमान्ते कारणान लयोक्तिः, अत्राह—ज्ञानेति । व्युह्य-अवस्थाप्य, स्वात्मनि समूहति-तदात्मन्युप संहृत्य स्वयं शिष्यते इत्यर्थः । (385) नात्र[3] कारणवाचकः शब्दोऽस्ति, इत्य-त्राह—निरुह्येति । प्राणादीन् प्रसार्य आत्मानं च तत्र प्रवेश्य स्थितः इत्युक्तार्थानुसारेणैव[4]मुक्तमित्यर्थः । तर्हि, [5]तदेवास्तु वास्तवं तत्त्वम्, नेत्याह—अत्यक्रामदिति । निरुह्येति कारणमुक्तं, प्रत्युह्येति कार्यावस्थं, अत्यक्रामदिति शुद्ध

---

1. **परस्मिन्निति** लयः इत्यनुवर्तते ।
2. **पञ्चमान्ते**—पञ्चमाध्यायावसाने शाकल्यब्राह्मणे ।
3. **अत्र**—पञ्चमाध्यायावसानवाक्ये ।
4. **एवमुक्तम्**—कारणान्तलय इत्युक्तम् ।
5. **तदेव**—कारणरूपमेव ।

* यत एवमतोऽशेषज्ञानशक्तिलयात्परम् ।
सर्वकार्योपसंहारी प्राण एकोऽवतिष्ठते ॥ (387)

प्राणोऽपाने तथापानो व्यानात्मनि विलीयते ।
व्यानोऽप्युदानमप्येति ह्युदानोऽपि समानगः ॥ (388)

कारणात्मैत्र जगतः समानोक्त्याभिधीयते ।
सर्वसाधारणः सोऽयं प्राकृतः प्रलयो मतः ॥ (389)

प्रज्ञानघनताप्यस्य न बुद्धिप्रज्ञयोच्यते ।
प्रत्यक्प्रज्ञोत्थिताभाससंबन्धात्प्राज्ञ उच्यते ॥ (390)

* यन्निमित्तं प्रमाणानि प्रामाण्यमिह बिभ्रति ।
तदविज्ञातयाथात्म्यमेतत्कारणमुच्यते ॥ (391)

चैतन्यमित्यर्थः । (386) तत्र कारणोक्तावपि कुतः तद(न)[न्त]लयोक्तिः, इत्यत्राह—**यत इति** । (387) पञ्चमोक्तवाक्यप्रमे[1]यशिक्षां कृत्वा, प्रसङ्गात् तद्वाक्यव्याख्यानमनुवदति—**प्राण इति** । (388) समानशब्दस्यापि प्राणादिशब्दवत् वृत्तिविशेषार्थत्वम्, इत्यत्राह—**कारणात्मेति** । अस्त्वेवं प्रदेशा[2]न्त-[र]वाक्यार्थः, तथापि प्रस्तुते किं स्यात्, अत्राह—**सर्वेति** । (389) प्राकृतलये सर्वकार्यलयोक्तिरयुक्ता, 'प्राज्ञः कारणबद्धस्तु' (मा. का. 11-1) इति मूलकारणस्य [3]बुद्धि(प्र)वृत्तिप्रज्ञाघनत्वाभिधानात्, अत्राह—**प्रज्ञानेति** । (390) आत्मचैतन्याभासयोगात् कारणस्य प्राज्ञत्वे, कारणात्मनो भेदात् अद्वैत-

---

* **यत इति** 'कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ' इत्यादिश्रुत्या संहारक्रमः कथ्यते इति भावः ।

1. **प्रमेयशिक्षां कृत्वा**—प्रमेयनिष्कर्षमुक्त्वा ।
2. **प्रदेशान्तरवाक्यार्थः** — पञ्चमाध्यायशेषवाक्यार्थः ।
3. **बुद्धिवृत्तिप्रज्ञेति** तथाच बुद्धिवृत्त्यावश्यकतया सर्वलयासंभव इति भावः ।

* "**यन्निमित्तमिति** यदज्ञातमात्मतत्त्वं विषयीकृत्य व्यवहारभूमौ प्रत्यक्षादीनि प्रामाण्यं लभन्ते, तत् जगत्कारणमिति श्रुतिस्मृतिवादेषूच्यते । तत् कुतो द्वैतमित्यर्थः ।" इति **शास्त्रप्रकाशिका** ।

यस्मिन् ज्ञाते भवेत् ज्ञातं जगदेतच्चराचरम् ।
अज्ञाते च तथाऽज्ञातमेतदेव तदुच्यते ॥ (392)

नन्विह प्रलयः श्रुत्या विषयस्यैव भण्यते ।
करणस्य तु नैवोक्तः तत् कस्मादिति भण्यते ॥ (393)

* स्वगोचरसजातीयं करणं मन्यते श्रुतिः ।
विषयस्य लयोक्त्यान्तःकरणप्रलयोक्तता ॥ (394)

एवं मन्तव्य आत्माऽयं तर्कतः प्राग्यथोदितः ।
दुन्दुभ्याद्युक्तदृष्टान्तन्यायमार्गेण यत्नतः ॥ (395)

आत्मसामान्यसंभूतिलयहेतुसमाश्रयात् ।
आत्मैव सर्वमित्येष प्रतिज्ञार्थः समर्थितः ॥ (396)

स्वाभाविकोऽयं प्रलय इति पौराणिका जगुः ।
बुद्धिपूर्वस्तु विलयः सम्यग्ज्ञानैकपूर्वकः ॥ (397)

हानिः, अत्राह—यन्निमित्तमिति । इन्द्रियादिजन्यजडवृत्तीनामजडबोधसंबन्धात् प्रामाण्यमित्यर्थः । (391) प्रत्यगज्ञानजत्वे जगतः, एकविज्ञानात् सर्वविज्ञानप्रतिज्ञावचनं मानम्, इत्याह—यस्मिन्निति । (392) प्राकृतलये बुद्ध्यादिलयमुक्तमाक्षिपति[1]—नन्विति । (393) करणलयस्येष्टस्यापि श्रुत्या मुखतोऽनुक्तौ हेतुं दर्शयन् परिहरति—स्वगोचरेति । (394) मननविधिविस्तरमुपसंहरति—एवमिति । यथा मन्तव्यः एवं प्रागुक्तः इति संबन्धः । (395) तत् कथम्, इत्यत्राह—आत्मेति । (396) [2]प्रलयोऽत्र कोऽभिमतः, [3]श्रुतेरुभयत्र साधारण्यात्, अत्राह—स्वाभाविक इति । (397) धीपूर्वलयात् स्वाभाविकलयस्य को विशेषः,

---

1. आक्षिपति—श्रुत्यक्षरानारूढत्वेनाक्षिपति ।
* स्वगोचरेति स्वशब्दः करणपरः ।
2. अत्र—एकायनप्रक्रियायाम् ।
3. उभयत्र—आत्यन्तिकानात्यन्तिकप्रलययोः ।

शक्तिमात्रात्मना स्थानं कार्याणां यत्स्वकारणे ।
इत्यनात्यन्तिकलयः भूयोजन्मकृतक्षणः ॥ (398)

अतीतानागतेहत्यजन्मनाशादिहेतुजुत् ।
यस्तु धीपूर्वको ध्वंसस्तदर्थेयं परा श्रुतिः ॥ (399)

यथोक्तवस्तुसिद्ध्यर्थं दृष्टान्तोऽयमिहोच्यते ।
*यथा सैन्धवखिल्योऽस्तः स्वयोनावुदधाविह ॥ (400)

कठिनोदकविलयमनु खिल्यो विलीयते ।
विलीनस्याङ्ग्य उद्धृत्य ग्रहणाय न कश्चन ॥ (401)

निपुणोऽपि नरः शक्तः खिल्यरूपेण पूर्ववत् ।
* सामुद्ररूपान्नान्येन ग्रहीतुं कश्चन क्षमः ॥ (402)

अत्राह—शक्तीति । य(तः)[त्] स्थानं तत् स्वाभाविको लयः इत्यसावनात्यन्तिकः इति योज्यम् । कृतक्षणः—कृतावसर इत्यर्थः । (398)

द्वादशकण्डिकार्थनिरूपणम्

सैन्धवखिल्यदृष्टान्तपुरःसरं कार्यकारणप्रपञ्चस्य तद्विलक्षणे प्रतीचि आत्यन्तिकलयनिरूपणम्

[1]आत्यन्तिकलयं दर्शयन्, उत्तरश्रुतिमवतारयति—अतीतेति । (399) 'स [2]यथा' इत्यादिदृष्टान्ततात्पर्यमाह—यथोक्तेति । कार्यकारणप्रपञ्चस्य तद्विलक्षणे प्रतीचि सम्यग्ज्ञानात् विलयः यथोक्तवस्तु । तत्प्रतिपादनायेत्यर्थः । तदक्षरार्थमाह—यथेति । 'न ह्यस्य' इत्यादेरर्थमाह—विलीनस्येति । 'पूर्ववत्'

---

1. आत्यन्तिकलयं—भूयो जन्मावसररहितं ज्ञानपूर्वकं लयम् ।
2. 'स यथा' इत्यादीति "स यथा सैन्धवखिल्य उदके प्रास्तः उदकमेवानुविलीयेत । न ह्यस्योद्ग्रहणायेव स्यात् । यतो यतस्त्वाददीत लवणमेव ।" इति दृष्टान्तश्रुतिः ।

* अस्तः — प्रक्षिप्तः ।
* सामुद्ररूपं—सलिलमात्रम् ।

आददीत समुद्राम्भः तं जिघृक्षुर्यतो यतः ।
ततस्ततस्तल्लवणं वेत्ति खिल्यं न कुत्र चित् ॥ (403)

सामुद्रमम्भः खिल्यत्वं याति भानुविपाकतः ।
सिन्धोरायातः स यतस्तस्मात्सैन्धव उच्यते ॥ (404)

असंभिन्नस्वावयवः खिल्यः सोऽथ निगद्यते ।
सोऽयं सैन्धवखिल्योऽस्तो यथैवेह महोदधौ ॥ (405)

तेजोविरोधिनीं प्राप्य प्रकृतिं विजहात्यथ ।
तेजोवियोगात्काठिन्यं ध्वस्तीभवति तद्धनम् ॥ (406)

काठिन्यकारणध्वस्तौ खिल्यस्येह महोदधौ ।
कठिनोदकविध्वंसमनु खिल्यो विलीयते ॥ (407)

यदेवाकृत्रिमं रूपं तदेवास्यावशिष्यते ।
तेजोऽवयवसंबन्धसमुत्थं विनिवर्तते ॥ (408)

तेज आद्यभिसंबन्धः कारणं खिल्यरूपिणः ।
तद्भावभावतस्तस्य तद्ध्वस्तौ ध्वंसतस्तथा ॥ (409)

इत्येतत् विवृणोति—**सामुद्रेति** । (400-401-402) 'यतो यतः' इत्यादेरर्थमाह—**आददीतेति** । (403) दृष्टान्तवाक्यार्थं विशदयन्, खिल्यत्वनिमित्तमाह—**सामुद्रमिति** । (404) किमिदं खिल्यत्वम्, तदाह—**असंभिन्नेति** । मिथः स्वावयवानां संसृष्टतया दार्ढ्यं खिल्यत्वमित्यर्थः । खिल्यस्योत्पत्तिहेतुमुक्त्वा नाशहेतुमाह—**सोऽयमिति** । तेजःसंपर्कात् यदुदकं खिल्यरूपेण परिणतं, ततः उदकान्तरं तेजोविरोधिनी प्रकृतिः । तां प्राप्येत्यर्थः । किं विजहातीति, तत्राह—**तेज इति** । काठिन्यं, निवर्तते इति शेषः । (405-406) एतत् विशदयति—**काठिन्येति** । काठिन्यहेतुतेजःसंपर्कध्वस्तौ कठिनोदकध्वंसद्वारा खिल्यस्यापि ध्वंस इत्यर्थः । (407) किं तर्हि तिष्ठतीति, क्षारजलमेव, इत्याह—**यदेवेति** । (408) तैजसावयवानां पार्थिवाप्यावयवसहितानां खिल्यहेतुत्वं अन्वयव्यतिरेकाभ्यां

एवं वा अर इत्यस्य कार्यकारणरूपतः ।
प्रतीचो वास्तवं वृत्तं विरुद्धमभिधीयते ॥ (410)

अव्यावृत्tाननुगतब्रह्मत्वप्रतिपत्तये ।
महदित्यभिधानं स्यात् कौटस्थ्यार्थं च भूतगीः ॥ (411)

* वास्तवं वृत्तमाश्रित्य प्रतीचः प्राक् प्रबोधतः ।
स्वतः सिद्धस्य विज्ञप्त्यै महदित्यादि भण्यते ॥ (412)

कारणस्य निषेधोक्तिरनन्तमिति यद्वचः ।
अपारमिति कार्यस्य पारः कार्यस्य कारणम् ॥ (413)

कारणस्य तथा कार्यमन्तोऽनादेः प्रसिद्धितः ।
* जात्यन्तरनिषेधाय विज्ञानघनगीरपि ॥ (414)

साधयति—**तेज आदीति** । (409) [1]दार्ष्टान्तिकवाक्यार्थमाह—**एवमिति** । एतद्वाक्य(च्छे)[स्थे][2]दमा अस्य प्रतीचः कारणादिविरुद्धं वास्तवं रूपमुच्यते इत्यर्थः । (410) महद्भूतपदयोरर्थमाह—**अव्यावृत्तेति** । (411) ‘महत्’ इत्यादिवाक्यविवक्षितमाह—**वास्तवमिति** । महदित्यादिरूपस्येति शेषः । (412) अनन्तापारपदार्थमाह—**कारणस्येति** । (413) तथापि कथमनन्तपदेन कारणत्वनिषेधः, अत्राह—**कारणस्य तथेति** । विज्ञान[3]-घनार्थमाह—**जात्यन्तरेति** । (414) महदित्यादिपदार्थं व्याख्याय, वाक्यार्थ-

---

1. दार्ष्टान्तिकवाक्यार्थमिति “एवं वा अरे इदं महद् भूतमनन्तमपारं विज्ञानघन एव ।” इति दार्ष्टान्तिकश्रुतिः बोध्या ।

2. इदमा—इदंशब्देन ।

* प्राक् प्रबोधत इति प्रबोधात् प्रागपीत्यर्थः ।

3. विज्ञानघनार्थं—विज्ञानघनपदार्थम् ।

* विज्ञानादर्थान्तरं जात्यन्तरम् ।

क्षेत्रज्ञाकाशयोरेवं कार्यकारणसंगतिः ।
* अब्धिस्थानीयमैकात्म्यं प्राप्योक्तेर्विनिवर्तते ॥ (415)

कार्यकारणविध्वस्तौ ब्रह्मैकात्म्यप्रबोधतः ।
न विशेषात्मलाभोऽस्ति खिल्यस्येव महोदधौ ॥ (416)

तेजःसंबन्धमासाद्य यथाम्भः खिल्यतामगात् ।
तथैवाज्ञानभूतेभ्यः परः क्षेत्रज्ञतां ययौ ॥ (417)

कार्यात्माऽपचयं गच्छन् यत्र निष्ठां निगच्छति ।
तानि भूतान्यविद्येति प्राहुस्त्रय्यन्तनिष्ठिताः ॥ (418)

* परः कारणकार्येभ्यः आत्मा पूर्णत्वकारणात् ।
एतेभ्योऽविद्याभूतेभ्यः कार्यकारणतामगात् ॥ (419)

धीफलमाह—क्षेत्रज्ञेति । महदित्यादिवाक्यादैकात्म्यं ज्ञात्वा तद्रूपावस्थितस्य संगतिः विनिवर्तते-कार्यकारणाख्यं जगत् विनिवर्तते इत्यर्थः । (415) तन्निवृत्तिफलमाह—कार्येति । (416) '[1]एतेभ्यो भूतेभ्यः' इत्यादेस्तात्पर्यमाह—तेज इति । सम्यग्ज्ञानात्प्रागवस्था अनेनोच्यते इत्यर्थः । (417) भूतशब्दस्य महा[2]भूतेषु प्रसिद्धेः न परस्य क्षेत्रज्ञत्वमविद्याकृतम्, इत्यत्राह—कार्यात्मेति । मूलकारणमविद्या [3]भूतशब्देनोच्यते इत्यर्थः । (418) क्षेत्रज्ञत्ववत् समस्तकार्यकारणत्वमविद्याकृतमिति रहस्यं तत्त्वमाह—पर इति । (419)

---

* उक्तेः — तत्त्वमादिवाक्यात् ।

1. एतेभ्यो भूतेभ्य इत्यादीति "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति । न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ।" इति श्रुतिः ।

2. महाभूतेषु प्रसिद्धेरिति 'भूतेभ्यः समुत्थाय' इति श्रुत्या इति शेषः ।

3. भूतशब्देनोच्यत इति प्रसिद्धभूतानां क्षेत्रज्ञोत्थापकत्वानुपपत्तेरित्यर्थः ।

* "तर्हि तदुत्थापकानि कार्यकरणान्येवात्र भूतानि, इत्याशङ्क्याह—पर इति । आत्मा पूर्णत्वात् परिच्छिन्नकारणादिविलक्षणः । सोऽविद्यात्मकभूतवशात् तद्भावं गतः । मूलाविद्या अत्र कार्यादिभूता भूतशब्देत्यर्थः ।" इति शास्त्रप्रकाशिका ।

यतोऽविद्यैव तद्धेतुस्तदुच्छित्तावतो न सन् ।
कार्यकारणभेदोऽयं ब्रह्मास्मीति प्रबोधतः ॥ (420)

तस्मिन् ध्वस्तेऽथ संबोधात् केवलैकात्म्यशेषतः ।
* विशेषसंज्ञा नास्त्यस्य पूर्णप्रज्ञप्तिमात्रतः ॥ (421)

अविचारितसिद्धीनि यान्यविद्येत्यवादिषम् ।
एतेभ्यो हेतुभूतेभ्यो भूतेभ्योऽकार्यकारणः ॥ (422)

कार्यकारणवद्रूपं समुत्थायेति शब्द्यते ।
अविद्यासंगतेरस्य जायतेऽनेकरूपवान् ॥ (423)

चेतनाचेतनाभास आत्मानात्मत्वलक्षणः ।
कार्यकारणरूपेण मिथोऽपेक्षाश्रयं तमः ॥ (424)

कार्यकारणतां यात आत्माप्येवं तमोवशात् ।
स्वाभासैर्बहुतामेति मनोबुद्ध्याद्युपाधिभिः ॥ (425)

तमोहेतु समुत्थानं न वेद्मीत्यग्रहात्मकम् ।
मिथ्याज्ञानं तमः कुर्वदीदृगेव करोति तत् ॥ (426)

कारणादेरविद्याकृतत्वे किं फलम्, अत्राह—**यत इति** । (420) संसारानर्थनिवृत्तिः अवेद्यत्वात् विद्यमानापि न फलम्, इत्याशङ्क्याह—**तस्मिन्निति** । (421) भूतशब्दार्थानुवादेन 'समुत्थाय' इत्यस्यार्थमाह—**अविचारितेति** । **कार्यकारण**-**वद्रूपं** समुत्थाय इत्युच्यते इत्यर्थः । तद्रूपं विशदयति—**अविद्येति** । (422-423) कार्यकारणत्वमात्मनः आ(त्यन्ति)[विद्य]कं चेत्, कस्य तत् स्वाभाविकम्, अत्राह—**कार्येति** । न केवलमविद्यैव बहुत्वापत्तौ कारणम्, आत्माभासविशिष्टाविद्याकार्यबुद्ध्यादीनामपि [1]तदुपाधित्वात्, इत्याह—**स्वाभासैरिति** । (424-425) तत्समुत्थानं केन क्रमेण स्यादिति, तत्राह—**तम इति** । तमः—अज्ञानं

---

* **विशेषसंज्ञा**—विशेषविज्ञानम् ।

1. **तदुपाधित्वात्**—आत्मोपाधित्वात् ।

* अविद्याकार्यबुद्धिस्थप्रत्यगाभासरूपवत् ।
बोद्धृत्यादिसमुत्थानं भण्यते परमात्मनः ॥ (427)

श्रोता स्प्रष्टेति रूपः स्यात् तथैवेन्द्रियवृत्तिभिः ।
दुःखी गौरो द्विजश्चेति शरीरोत्थानतः परः ॥ (428)

* धनी गोमान् दरिद्रो वा धनाद्यर्थात्मसंगतेः ।
अतद्वानपि संमोहाद्यथोक्तात्मकृतामगात् ॥ (429)

प्रत्यग्याथात्म्यमोहोत्था विरिञ्चोपक्रमा मृषा ।
क्षेत्रक्षेत्रज्ञभेदेन ह्या स्थाणोरुत्थितिर्दृशेः ॥ (430)

* यथावस्तु यदा बोधो वेदान्तोक्तिश्रुतेर्भवेत् ।
तदा नश्यन्ति भूतानि येभ्यः क्षेत्रज्ञतां गतः ॥ (431)

स्वरूपलाभमात्रेण सम्यग्बोधोऽखिलं तमः ।
यतो हन्ति ततो नासावभ्यासं प्रति वीक्षते ॥ (432)

न वेद्मीत्येवंविधं मिथ्याज्ञानं कृत्वैव [1]तमोहेतुकमुत्थानं करोतीत्यर्थः । (426) बोद्धृत्वादिसमुत्थाने को हेतुः, अत्राह—**अविद्येति** । आदिपदेन मन्तृत्वादिसंग्रहः । (427) यथा बुद्धिवृत्तिसंबन्धात् ज्ञातृत्वादिकम्, एवमिन्द्रियवृत्तियोगात् श्रोतृत्वादिकमात्मनः कल्पितम्, इत्याह—**श्रोतेति** । बोद्धृत्वादिपूर्वकं दुःखित्वादिकं, तत्पूर्वकं वा बोद्धृत्वादीति न विद्मः विशेषानवगमात्, अत्राह—**दुःखीति** । अन्यसंगत्याप्यन्यस्यान्यथात्वमयुक्तं स्वभावविरोधात्, अत्राह—**अतद्वानिति** । (428-429) सहेतुकमुत्थानक्रममुक्त्वा, तत्फलमुपसंहरति—**प्रत्यगिति** । (430) ज्ञानात् प्रागवस्थामुक्त्वा 'तान्येव' इत्यादेरर्थमाह—**यथावस्त्विति** । (431) न विद्योदयमात्रादविद्याध्वस्तिः अभ्यासापेक्षत्वात्, अत्राह—**स्वरूपेति** । (432)

---

1. **तमोहेतुकमुत्थानं**—मिथ्याज्ञानान्तरमिति यावत् ।
* **अविद्येति** बुद्ध्युपाधिकं बोद्धृत्वादिकमित्यर्थः ।
* **धनाद्यर्थात्मसंगतेरिति** धनाद्यर्थस्य आत्मना—देहेन संबन्धादित्यर्थः ।
* **यथावस्त्विति** वस्त्वनुसारीत्यर्थः । बोधान्वयि चेदम् ।

व्यङ्ग्येष्वर्थेषु नावृत्त्या व्यञ्जको हन्ति तत्तमः ।
व्यञ्जकस्य स्वभावोऽयं न प्रयोगमपेक्षते ॥ (433)

मोहतत्कार्यनीडो यस्तस्याज्ञानसमन्वयात् ।
प्रत्यगात्मापि तद् ब्रह्म परोक्षमभवन्मृषा ॥ (434)

तद्वदद्वयतत्त्वोऽपि तदसंबोधहेतुतः ।
आत्मा संसारितां यातः यथा कार्ष्ण्यं वियत्तथा ॥ (435)

आत्मनो ब्रह्मता यस्मात् ब्रह्मणोऽप्यात्मता स्वतः ।
तमोमात्रान्तरायत्वात् तद्ध्वस्तावेव साऽऽप्यते ॥ (436)

सर्वमात्मेति सम्यग्धीजन्मनैवाखिलं तमः ।
ध्वंसमेति ततः संज्ञा नाविद्योत्थाऽवशिष्यते ॥ (437)

(प्रयोगमभ्यासक्रियामिति यावत्) विद्या [1]प्रयोगानपेक्षा तमो[2]हन्त्री(य)[अर्थ]प्रकाशकत्वात् दीपवत्, इत्याह—व्य(ङ्ग)[ङ्ग्ये]ष्विति । [प्रयोगं—अभ्यासक्रियामिति यावत्] (433) ब्रह्मात्मैक्यज्ञानादज्ञाननिवृत्तौ तदैक्यं वास्तवमिति ब्रह्मणः पारोक्ष्यमात्मनः संसारित्वं च न स्यात्, अत्राह—मोहेति । अज्ञानतत्कार्ययोर्य आश्रयः स प्रत्यगात्मापि अज्ञानसमन्वयात् तद् ब्रह्मेति परोक्षमभवदित्यर्थः । (434-435) ब्रह्मा[3]त्मनोरन्योन्यभावस्य स्वाभाविकत्वे किं फलमिति चेत्, ज्ञानमात्रात् ब्रह्मताप्राप्तिः, इत्याह—आत्मन इति । (436)

'न प्रेत्य संज्ञास्ति' इति श्रुत्यर्थवर्णनम्

'न प्रेत्य संज्ञास्ति' इत्यस्यार्थमाह—सर्वमिति । (437) आत्मज्ञानं नित्यमनित्य

---

1. प्रयोगानपेक्षा—अभ्यासक्रियानपेक्षा ।
2. तमोहन्त्री—अविद्यानिवर्तिका ।
3. ब्रह्मात्मनोरन्योन्यभावस्येति ब्रह्मणः आत्मतायाः, आत्मनो ब्रह्मतायाश्चेत्यर्थः ।

* सदोत्पन्नात्मनि मितिरुत्पाद्या कारणादिधीः ।
कारणादिधियः पूर्वं प्रतीचि ब्रह्मधीस्ततः ॥ (438)

* अपास्ताशेषभेदस्य यद्रूपं भेदवद् गतम् ।
तज्ज्ञानेनैव तज्ज्ञातं तदन्यानवशेषतः ॥ (439)

* अहेतुफलरूपेण प्रतीचा तद्विलक्षणम् ।
कार्यकारणवज्जगद्ध्वा दृष्टैवैकोऽवशिष्यते ॥ (440)

प्रत्यग्ब्रह्मेक्षणादात्ममोहतज्जनिराकृतेः ।
असंभवात् द्वितीयस्य स्यामपूर्वादिमानहम् ॥ (441)

वा । आद्ये न कदाचित् संसारः । द्वितीये, ज(न्म)[न्य]ज्ञानविषयत्वादात्मनो जडत्वम्, अत्राह—सदेति । कारणादिज्ञानात् प्राक् ऊर्ध्वं च स्वरूपज्ञानभावात् न जाड्यापत्तिरित्यर्थः । (438) आत्मज्ञानस्य नित्यत्वेऽपि कारणादिज्ञानं जन्यं चेत्, आत्मज्ञानात् न सर्वस्य ज्ञेयत्वसिद्धिः, अत्राह—अपास्तेति । निर्गताशेषभेदस्य प्रतीचः यदाकाशादिभेदवद्रूपं, तज्ज्ञानेनैव निर्गताशेषविशेषज्ञानेनैव, तत् ज्ञातम्, तावन्मात्रत्वादित्यर्थः । (439) तर्हि जगतोऽपि सत्यत्वात् न बाध्यत्वम्, अत्राह—अहेतुफलेति । (440) एकत्वं साधयति—प्रत्यगिति । (441) सर्वस्यात्ममात्रत्वे घटादिज्ञानेनेव निर्गताशे(नापि)[षभेद]ब्रह्मज्ञानसिद्धेः किं

---

* सदेति आत्मनि मितिः सदोत्पन्ना । आत्मस्वरूपं ज्ञानं सदा अस्ति । कारणादिधीरेव उत्पाद्या । कारणादिधियः पूर्वं ततः—कारणादिज्ञानोत्तरं च प्रतीचि ब्रह्मधीः—ब्रह्मस्वरूपज्ञानं वर्तते इत्यक्षरार्थोऽवसेयः ।

"कथं सा (अविद्योत्था संज्ञा) नावशिष्यते, प्रतीचि ब्रह्मधियः तदुत्थायाः शेषात्, इत्याशङ्क्याह—सदेति । अकारणादिधीरिति च्छेदः । आत्मनि कर्तृत्वादिधीराधेया । तथा च वाक्यीयदैक्यज्ञानात् कर्तृत्वादिधियः पूर्वं ध्वंसः । ततो निरिन्धनाग्निवत् प्रतीचि ब्रह्मधीरपि ध्वंसमेतीत्यर्थः । तथाप्याकाशादिभेददृष्टौ सत्यां कथमविद्योत्थसंज्ञानवशेषः, तत्राह—अपास्तेति एकरसस्य प्रतीचः यदाकाशादिभेदवद्रूपमधिगतं तत् प्रत्यग्ज्ञानेनैव ज्ञातं तदविद्याविलसितस्य तन्मात्रत्वात् । अतः प्रत्यग्ज्ञानात् कर्तृत्वादिध्वस्तिकाले भेदधीरपि ध्वस्तेत्यर्थः । विशेषसंज्ञाध्वस्तौ शिष्टमर्थमाह—अहेत्विति ।" इति शास्त्रप्रकाशिकामार्गः ।

व्यपेततमसस्तत्त्वमागमापायसाक्षिणः ।
ज्ञानेन गम्यते साक्षात् तावन्मात्रानुरोधिना ॥ (442)

* दृष्टिमात्रात्मयाथात्म्यात्कार्यकारणवस्तुनः ।
नाज्ञातं किंचिदप्यस्ति नानपास्तं तमोऽप्यतः ॥ (443)

क्षेत्रज्ञेश्वरभेदेन संज्ञा नैवेह विद्यते ।
तद्धेतौ तमसि ध्वस्ते कुतः संज्ञाऽनिमित्ततः ॥ (444)

संज्ञा प्रेत्यात्मनो नास्तीत्येतच्छ्रुत्वा त्वचूचुदत् ।
शङ्कमानाऽऽत्मनो नाशं मैत्रेयी पतिमादरात् ॥ (445)

विज्ञानैकघनोक्त्या च निःसंज्ञवचसा तथा ।
उक्त्योर्मिथो विरुद्धत्वादात्मा मोमुह्यते मम ॥ (446)

वाक्यजज्ञानेन, इत्यत्राह—व्य(ये)[पे]तेति । (442) ज्ञानान्तरस्य आकारान्तरग्राहित्वात् आत्मज्ञानस्य तद्[1]ग्राहित्वात् आत्मनि [ज्ञा]ते न सर्वज्ञानम्, अत्राह—दृष्टिमात्रेति । (443) 'न प्रेत्य संज्ञा' [इत्यस्यार्थमुपसंहरति—क्षेत्रज्ञेति । (444)]

त्रयोदशकण्डिकार्थनिरूपणम्

विज्ञानघनोक्तेः निःसंज्ञोक्तेश्च विरोधचोद्यं, तत्परिहारश्च

'सा[2] होवाच' इत्यादेस्तात्पर्यमाह—संज्ञेति । (445) किं तच्चोद्यमिति,

---

1. तद्ग्राहित्वात्—आकारान्तरविषयकत्वाभावात् ।

* दृष्टिमात्रेति आत्मज्ञानेन सर्वं याथात्म्यतो ज्ञातमिति भावः ।

2. सा होवाच इत्यादेरिति "सा होवाच मैत्रेयी अत्रैव मा भगवान् अमूमुहत् न प्रेत्य संज्ञास्तीति ।" इति चोद्यश्रुतिः, "स होवाच न वा अरे अहं मोहं ब्रवीमि, अलं वा अरे इदं विज्ञानाय ।" इत्यादिका परिहारश्रुतिश्च अनुसन्धेया ।

अविरुद्धं सुविस्पष्टं मया तुभ्यं प्रभाषितम् ।
स्वापराधात्तु मद्वाक्यं विरुद्धार्थं त्वमीक्षसे ॥ (447)

विज्ञानैकघनोक्त्याहं कृत्स्नैकात्म्यं तवाब्रुवम् ।
संज्ञानाशेन चाविद्याहेतूत्थापह्नुतिं तथा ॥ (448)

विशेषसंज्ञा याऽस्याभूत् विज्ञानात्मादिलक्षणा ।
सम्यग्धीध्वस्तमोहस्य सा कृत्स्ना विनिवर्तते ॥ (449)

यत्त्वपारमनन्तं च वास्तवं ज्ञानमात्मनः ।
कूटस्थं तत् स्वतःसिद्धेस्तत्कस्माद्विनिवर्तते ॥ (450)

इतीममर्थं भार्यायै याज्ञवल्क्योऽभ्यभाषत ॥ (451)

कार्यकारणनाशेऽपि स्वतःसिद्धमनन्यमम् ।
यद्वस्तु तदलं स्वात्मसंवित्त्यै निरपेक्षतः ॥ (452)

तत्राह—**विज्ञानेति** । (446) चोद्यं परिहरति–**अविरुद्धमिति** । (447) कथमविरुद्धमुक्तमिति, तत्राह–**विज्ञानेति** । 'न प्रेत्य संज्ञास्ति' इति अविद्यातत्कार्यनाशः तत्त्वज्ञानेनोक्तः । तेनान्यत्र सद्भावप्रसक्तौ तन्निवृत्त्यर्थं विज्ञानत्वमुक्तम् । अतः आत्ममात्रतया परिशिष्टं जगत् न स्वातन्त्र्येण स्वरूपवदिति विषयभेदान्न [1]विरुद्धार्थमित्यर्थः । (448) विशेषज्ञानं न तत्त्वज्ञानबाध्यं ज्ञानत्वात् स्वरूपज्ञानवत् इत्याशङ्क्य, अजडत्वमुपाधिरिति भावेनाह—**विशेषेति** । (449) सर्वस्य निवृत्त्युपगमे ब्रह्मणो[2]ऽपि सा स्यात् अविशेषात्, इत्यत्राह—**यत्त्विति** । (स)[स्व]यंप्रभ(व)त्वेन सर्वनिवृत्तिसाक्षित्वात् न तस्य निवृत्तिरित्यर्थः । (450) वर्णितार्थं श्रुत्यारूढं करोति–**इ(ति)[ती]ममिति** । (451) 'अलम्' इत्यस्यार्थमाह—**कार्येति** । (452)

---

1. **न विरुद्धार्थमिति** संज्ञाऽभाववचनं विशेषविज्ञानाभावाभिप्रायकं, विज्ञानघनोक्तिः स्वरूपभूतज्ञानाभिप्रायिकेति द्वयोर्न विरोध इति भावः ।
2. **ब्रह्मणोऽपि सा**—ब्रह्मणोऽपि निवृत्तिः ।

* यत्राज्ञातात्मतत्त्वात्माऽविद्यासंवीतशेमुषिः ।
तत्र मिथ्याग्रहग्रस्तः द्रष्टृदृश्यादिभेदधीः ॥ (453)

यत्राज्ञातात्मयाथात्म्यस्तत्तमोपिहितेक्षणः ।
तत्राविद्योत्थबुद्ध्यादिगुणभूतात्मविन्नरः ॥ (454)

अविद्यामात्रशेषत्वं जगतः प्रागवादिषम् ।
नर्तेऽविद्यां कार्यमिदं हीति हेतावतः पदम् ॥ (455)

सतोऽभिव्यञ्जकं मानं स्वभावोऽयं मितेर्भवेत् ।
अविद्यायाः स्वभावोऽयं यदसत्करणं मृषा ॥ (456)

चतुर्दशकण्डिकार्थनिरूपणम्

अविद्यावस्थायामेव द्वैतधीः न विद्यावस्थायामिति प्रतिपादनम्

'[1]यत्र हि' इत्यादेरर्थमाह—यत्रेति । स्वरूपाज्ञानात् द्वैतदर्शीत्यर्थः । (453) आत्मधीपूर्वकत्वादनात्मधियां द्वैतदर्शिना(मना)[मा]त्मज्ञानं युक्तम्, अत्राह—यत्राज्ञातेति । अविद्याकार्य[2]देहद्वयविशिष्टात्मविदित्यर्थः । (454) हिशब्दार्थमाह—अविद्येति । यस्मात् अज्ञानकार्यत्वं 'तद्धेदम्' (बृ. 3-4-7) इत्यादिनोक्तं(त)द्वैतस्य, तस्मात् अज्ञानं विना द्वैतधीर्न स्यादिति [3]हेतौ हीतिपदमित्यर्थः । (455) इममर्थं दृष्टान्तेनाह—सत इति । यथार्थबोधकं मानम्, अयथार्थबोधक[म]विद्येति (अ)[व्य]वस्थायां, अविद्यास्वभावो द्वैतमिति प्रतिपादनाय हिशब्द इत्यर्थः । (456) कथं हिशब्दस्यैवंविधार्थ(:)द्योतकत्वम्, अत्राह—

---

1. यत्र हि इत्यादेरिति "यत्र हि द्वैतमिव भवति, तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं विजानाति ।" इति श्रुतिः ।

* अज्ञातात्मतत्त्वात्मा—अज्ञातात्मरूपं तत्त्वमेवात्मा यस्य सः तथा ।

2. देहद्वयेति स्थूलसूक्ष्मदेहद्वयेत्यर्थः ।

3. हेतौ हीतिपदमिति हेत्वर्थकं हीति पदमित्यर्थः ।

* उक्तहेत्वर्थदीप्येतत् हीति तस्य निपाततः ।
द्वीतं द्विधेतमेकं सत्तद्भावो द्वैतमुच्यते ॥ (457)

उपमार्थ इवेत्येतत् भवतीति क्रियापदम् ।
तत्रैवाविद्यावस्थायां संज्ञेयं युज्यते मृषा ॥ (458)

ननु द्वैतमिवेत्येतदुपमानं कथं भवेत् ।
द्वैतं वस्तु न चेदस्ति सर्वस्यैकात्म्यमात्रतः ॥ (459)

नैष दोषो यतो दृष्ट एकस्मिन्नपि वस्तुनि ।
उपमेयोपमाभावो दिग्धीरिव विहायसि ॥ (460)

रामरावणयोर्युद्धं रामरावणयोरिव ।
यथा प्रसिद्धो जगति तथैवेहापि गम्यताम् ॥ (461)

अद्वैतात्परमार्थाद्वा मायाद्वैतमपीष्यते ।
तेनोपमार्थसंसिद्धिः यथा स्वप्नेन्द्रजालयोः ॥ (462)

उक्तेति । द्वैतादिपदार्थमाह—[द्वी]तमिति । स्वप्नद्वैतवत् जाग्रद्द्वैतमित्यर्थः । विदुषोऽपि द्वैतदर्शनान्न [1]तत्तुल्यत्वम्, अत्राह—तत्रेति । (457–458)

आत्मव्यतिरेकेण द्वैताभावादुपमार्थत्वं इवशब्दस्यायुक्तम्, इति चोदयति—नन्विति । (459) आकाशादिव्यतिरेकेण दिशो न सन्ति मानाभावात् । तथापि आकाशं दिगि(भवा)[व भा]तीति प्रयोगदर्शनात् अविरोधः, इति परिहरति—नेति । (460) पूर्वस्यां दिशि आकाशं विशदमिति प्रत्ययात् तयोर्भेदः, इत्याशङ्क्य, एकस्योपमानोपमेयभावे दृष्टान्तान्तरमाह—रामेति । 'गगनं गगनाकारं सागरः सागरोपमः ।' इति पूर्वार्धम् । (461) मायासिद्धं वा द्वैतमुपमानम्; इत्याह—अद्वैतादिति । मायाविना प्रदर्शितद्वैतमिव स्वाविद्यया निर्मितद्वैतमात्मा भवतीत्यर्थः । मायासिद्धमेव कथं दृष्टान्तः, अत्राह—यथेति ।

---

* उक्तहेत्वर्थदीपि—उक्तहेत्वर्थद्योतकम् ।

1. न तत्तुल्यत्वं—न स्वप्नद्वैततुल्यत्वम् ।

मिथ्येव भाति सत्योऽपीत्यपि लोकेऽभिधीयते ।
* मिथ्याभावो न नास्तीति वक्तुं कश्चिदपि क्षमः ॥ (463)

समस्तव्यस्ततारूपं यो वक्तीहात्मनः श्रुतेः ।
तत्पक्षस्य निषेधोऽयं यत्र हीत्यादिनोच्यते ॥ (464)

तस्यामविद्यावस्थायां स्वप्नावस्थां गतो यथा ।
घ्रातेतरः सन्नितरं गन्धं घ्राणेन जिघ्रति ॥ (465)

घ्रातृप्रेयाभिसंबन्धात् घ्राणाद्याहृतिरिष्यते ।
जिघ्रतीत्यपि निर्देशः क्रियातत्फलयोर्भवेत् ॥ (466)

इन्द्रजालवत् (स्वप्नः) [1]स्वप्नवदिति यथा, तथा [त्रा]पीत्यर्थः । (462) उक्तमेवार्थं लोकव्यवहारतः साधयति—मिथ्येति । [2]मिथ्यार्थस्य देशान्तरादौ सत्त्वात् सत्यस्यैव दृष्टान्तत्वम्, अत्राह—मिथ्याभाव इति । (463) 'यत्र हि' इत्यादिवाक्यस्य [3]परमतनिरासपरत्वम्, इति तात्पर्यान्तरमाह—समस्तेति । (464) तात्पर्यमुक्त्वा अक्षराणि व्याचष्टे—तस्यामिति । (465) वाक्यमेवासंगतार्थं करणानुक्तेः, अत्राह—घ्रात्रिति । घ्राणेन्द्रियं तस्य विषयसंबन्धप्रेरकं दृष्टानर्थकारणमर्थोपपत्तेरित्यर्थः । घ्राणेन जिघ्रति इत्युक्तेऽपि न फलसिद्धिः त(दावि) [4][द्वा चि]पदाभावात्, अत्राह—जिघ्रतीति । (466) 'तदितर इतरं प(रस्था)

---

1. स्वप्नवदिति यथा तथा अत्रापीति स्वप्नवत् इत्यत्र मायासिद्धस्य स्वप्नस्येव 'द्वैतमिव भवति' इत्यत्र मायासिद्धस्यैव द्वैतस्य दृष्टान्ततेत्यर्थः ।
2. आपणादावन्यत्र स्थितं सत्यमेव रजतं दोषवशात् पुरोवर्तिनि भासते इति अन्यथाख्यातिमतावलम्बनेन दृष्टान्तासिद्धिं शङ्कते—मिथ्यार्थस्येति । मिथ्यात्वेनाभिमतार्थस्येत्यर्थः ।

* मिथ्याभाव इति भ्रान्तिबाधप्रसिद्धिविरोधात् मिथ्याभावानभ्युपगमो न युक्त इत्यर्थः ।

3. परमतनिरासेति भर्तृप्रपञ्चमतनिरासेत्यर्थः । आत्मनः समस्तव्यस्तरूपत्वे अविद्यावस्थायामेव द्वैतदर्शनवादिनी श्रुतिर्विरुद्धयेतेति भावः ।
4. तद्वाचिपदाभावात्—फलवाचिपदाभावात् ।

उत्तरेष्वपि वाक्येषु योजनेयं यथोदिता ।
प्रत्यगज्ञानमात्रोत्थं ग्राहकाद्यत्र भण्यते ॥ (467)

क्रियाकारकसंज्ञाया विषयोऽयं समीरितः ।
अतोऽविद्यासमुच्छित्ताविय संज्ञा निवर्तते ॥ (468)

विज्ञानघन इत्युक्तेर्विषयोऽयमथोच्यते ।
यत्र वा इतिवाक्येन ध्वस्ताविद्ये विपश्चिति ॥ (469)

यत्र त्वस्यात्मनोऽज्ञस्य शास्त्राचार्यप्रसादतः ॥ (470)

प्रत्यग्याथात्म्यविज्ञानभास्वद्भास्करदीधिति-
संप्लुष्टनिखिलाविद्ये तत्र कः केन किं वद ।
जिघ्रेदैकात्म्यमात्रेण सर्वस्यास्यात्ममात्रतः ॥ (471)

[श्य]ति' इत्यादिषु पूर्वोक्तन्यायमतिदिशति—उत्तरेष्विति । 'यत्र हि' इत्यादि-वाक्यार्थमुपसंहरति—प्रत्यगिति । (467) अविद्याकार्यत्वे फलं दर्शयन् उक्तं विशदयति—क्रियेति । (468)

'एतेभ्यो भूतेभ्यः समुत्थाय' इत्येतत् 'यत्र हि' इत्यादिना(वा)[व्या]ख्यातम् । इदानीं 'महद्भूतम्' इत्यादि(वा)[व्या]ख्यानार्थं '[1]यत्र वा अस्य' इत्यादि वाक्यम्, इत्याह—ज्ञानेति । (469) अक्षरार्थमाह—यत्र त्विति । आत्मनः अज्ञस्येति षष्ठी सप्तम्यर्थे । आत्मनि अज्ञे यत्र सर्वमात्मैवाभूत् तत्र शास्त्राचार्यप्रसादात् तदुत्पन्नप्रत्यग्याथात्म्यविज्ञानभास्वद्भास्करदी[धि]तिसंप्लुष्ट-निखिलाविद्ये, कः कर्ता, केन करणेन, किं कर्म जिघ्रेत् तत् व(ये)[दे]त्यन्वयः । (470–471)

---

1. यत्र वा अस्येत्यादि वाक्यं—"यत्र वा अस्य सर्वमात्मैवाभूत्, तत्केन कं जिघ्रेत्, तत्केन कं पश्येत्, तत्केन कं शृणुयात्, तत्केनकमभिवदेत्, तत्केन कं मन्वीत, तत्केन कं विजानीयात् ।" इति वाक्यम् ।

* षष्ठगोचरवत्सर्वं कार्यकारणवज्जगत् ।
ध्वस्तात्मान्ध्यस्य विदुषः सम्यग्ज्ञानोदये भवेत् ॥ (472)

अव्यावृत्താननुगतं मतिहेतु सदेकलम् ।
विज्ञानघनमानन्दमैकात्म्यं व्यवतिष्ठते ॥ (473)

ग्राहकादिविभागोऽत्र नास्ति तद्धेत्वसंभवात् ।
चिन्मात्रस्य स्वतः सिद्धेर्विज्ञानघनगौरतः ॥ (474)

आत्मविद्यामनाश्रित्य कारकत्वं न लभ्यते ।
कारकं चानपाश्रित्य न क्रियेह प्रसिद्ध्यति ॥ (475)

अन्तरेण क्रियां तद्वत् फलं नैव प्रसिद्ध्यति ।
कारकाद्यात्मना सेयमविद्यैव प्रकाशते ॥ (476)

यत एवमतोऽविद्यामपुच्छित्त्वाविदं जगत् ।
व्याकृताव्याकृतं कृत्स्नमात्मतामेति बोधतः ॥ (477)

विद्योदयेऽपि भासमानं द्वैतं परमार्थसदिति, अत्राह—षष्ठेति । (472) तर्हि किमवशिष्यते, तत्राह—अव्यावृत्तेति । निःसामान्यविशेषं (मि)[म]तिहेतु—स्वव्यवहारहेतु प्रकाशरूपं स्वप्रभमद्वैतमित्यर्थः । (473) नास्य विज्ञानघनत्वं, [1]ग्राहकादिविभागेनैव सिद्धेः, अत्राह—ग्राहकेति । (474) 'तद्धेत्वसंभवात्' इत्युक्तम् । कोऽसौ [2]तद्धेतुः, इत्यत्राह—आत्मेति । (475) मा भूत् क्रिया, तदभावेऽपि फलसिद्धेः, अत्राह—अन्तरेणेति । (476) फलितं निगमयति—यत इति । (477) मुसिनक्रययोरच्छिन्नसंसारस्य पुनरुद्भवः स्वन्मतेऽपि इति,

---

* षष्ठगोचरवदिति षष्ठेन्द्रियार्थवदित्यर्थः । अपरमार्थमिति यावत् ।

1. ग्राहकादिविभागेनैवेति यत् सिद्ध्यति तत् ग्राहकादिविभागादेव इति नियमादिति भावः ।

2. तद्धेतुः — ग्राहकादिविभागहेतुः ।

भूयोऽपि लभते संज्ञां लीनं सत् कारणात्मनि ।
जगदेतद्यथा तद्वत् नाविद्याविलये भवेत् ॥ (478)

ज्ञानोत्पत्तौ न संज्ञास्तीत्यास्तां तावदिहात्मनः ।
अपि सत्यामविद्यायां न संज्ञास्त्यात्मनीदृशी ॥ (479)

ग्राहकादि जगत्सर्वं येन कूटस्थसाक्षिणा ।
लोकः सर्वो विजानाति जानीयात् केन तं वद ॥ (480)

अचेतने जगत्यस्मिन् साक्ष्यैवैकोऽत्र चेतनः ।
ग्राहकादिर्न तत्रापि साक्षिसिद्धावपेक्ष्यते ॥ (481)

संज्ञेयं किमु विध्वस्तसंसारानर्थकारणे ।
उदितैकात्म्ययाथात्म्यसम्यग्ज्ञानदिवाकरे ॥ (482)

बोद्धारमपि चापेक्ष्य न संज्ञा प्रत्यगात्मनि ।
बोद्धृतज्ज्ञानविषयैर्न बोद्धा गृह्यते यतः ॥ (483)

मोक्षेऽपि [1]तथात्वान्नाभिमतसिद्धिः, इत्यत्राह—भूयोऽपीति । कारणाभावादित्यर्थः । (478) '[2]येन' इत्यादेरर्थमाह—ज्ञानेति । ईदृशी—ग्राहकादिविभा[ग]वती-त्यर्थः । (479) अस्मिन्नर्थे वाक्यं योजयति—ग्राहकादीति । (480) आत्मवद-नात्मनोऽपि स्वतः सिद्धेः नात्माधीना [3]तत्सिद्धिः, अत्राह—अचेतन इति । किंपुनर्न्यायमुपसंहरति—ग्राहकादीति । साक्षिणो(त)[ऽप्य]स्य चेतनस्याभावात् अविद्यावस्थायामपि आत्मनि ग्राहकादिभेदधीर्नास्ति, किमुत विद्यावस्थायामित्यर्थः । (481–482) 'विज्ञातारम्' इत्यादेरर्थमाह—बोद्धारमिति । (483) 'केन

---

1. **तथात्वात्**—पुनरुद्भवात् ।
2. **येनेत्यादेरिति** "येनेदं सर्वं विजानाति तं केन विजानीयात् । विज्ञातारमरे केन विजानीयादिति ।" इति श्रुतिः ।
3. **तत्सिद्धिः** — अनात्मसिद्धिः ।

अविचारितसंसिद्धिः प्रमात्रादिस्वलक्षणा ।
संज्ञेयं प्रथते मोहात् न त्वसौ वस्तुनिश्चितौ ॥ (484)

* यत एवमतः सिद्धं दर्शनं प्रत्यगात्मनः ।
श्रुत्यादिसाधनं साक्षात् सर्वमात्मेत्युदीरितम् ॥ (485)

इति चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम्

—: * :—

विजानीयात्' इत्युक्ताक्षेपबीजं स्पष्टयति—अविचारितेति । (484) ब्राह्मणार्थमुपसंहरति—यत इति । (485)

इति चतुर्थाध्यायस्य चतुर्थं ब्राह्मणम्

—: * :—

---

* **यत एवमिति** अविद्यावस्थायामेव भेदव्यवहारः नान्यत्र इत्येवं यतो निश्चितमिति यावत् ।

इति चतुर्थाध्यायस्य चतुर्थं ब्राह्मणं समाप्तम्

—: * :—

अथ चतुर्थोऽध्यायस्य पञ्चमं ब्राह्मणम्

नमोऽसाधारणज्ञातृज्ञानज्ञेयात्मबोधिने ।
जग्धाशेषमहाविद्यातज्ज्ञानर्थाय विष्णवे ॥ (1)

प्रत्यग्ध्वान्तसमुच्छेदि ज्ञानमैकात्म्यनिष्ठितम् ।
* संन्याससाधनं प्रोक्तममृतत्वैकसाधनम् ॥ (2)

हेतवोऽपि च तत्सिद्धौ श्रवणादिपुरःसराः ।
उक्ता यथावत्तत्रैव श्रोतव्यः श्रुतिवाक्यतः ॥ (3)

अथ चतुर्थोऽध्यायस्य पञ्चमं ब्राह्मणम्

मङ्गलम्

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि आयुष्मत्पुरुषाणि च भवन्ति' इति न्यायात् [1]मध्येऽपि मङ्गलमाचरति—**नम इति**। साधारणाः ज्ञातृज्ञानज्ञेयाः न विद्यन्ते यस्य सः असाधारणज्ञातृज्ञानज्ञेयः। स च आत्मनि चात्मानं बोधयितुं शीलश्च। तस्मै नमः इति यावत्। (1)

वृत्तानुवादपुरःसरमुत्तरब्राह्मणावतरणम्

कृतमङ्गलो वृत्तमनुद्रवति—**प्रत्यगिति**। (2) कुतः [2]तत् ज्ञानं भवेत्, अत्राह—**हेतवोऽपीति**। श्रवणादेः स्वरूपमाह—**श्रोतव्य इति**। [3]**हेतून्**

अथ पञ्चमं ब्राह्मणम्

मधुपदोपादानेन सर्वस्य परस्परोपकार्योपकारकत्वप्रतिपादनमुखेन चिदात्मकत्वोपपादनादिदं मधुब्राह्मणमिति व्यवह्रियते।

1. **मध्येऽपि**—शास्त्रमध्येऽपि।

* **संन्याससाधनं**—संन्याससाधनकम्।

2. **कुतः तत् ज्ञानमिति** संन्यासमात्रस्याहेतुत्वादिति भावः।

3. **हेतून्**—मननायोक्तहेतून्।

मन्तव्यो हेतुभिः सूक्ष्मैरुक्तदृष्टान्तबोधितैः ।
चित्सामान्यचिदुत्पत्तिचिदेकप्रलयात्मभिः ॥ (4)

आशङ्क्य हेत्वसिद्धत्वं मधुब्राह्मणमुच्यते ।
कुतोऽसिद्धत्वमिति चेत्, शृणु तद्वदतो मम ॥ (5)

निःसामान्यविशेषत्वाच्चित्सामान्यं कथं भवेत् ।
चिदुत्पत्तिलयासिद्धिः सांख्यादीन् प्रतिवादिनः ॥ (6)

ऐकात्म्यवस्तुतात्पर्यं हेत्वादिच्छद्मनोच्यते ।
वेदे यतो न हेत्वादि लोकवत्स्याद्विवक्षितम् ॥ (7)

चित्तत्त्वं सदविद्यावत् कारणत्वं निगच्छति ।
चित्सामान्याद्यतः सिद्धं प्रागप्येतत्प्रसाधितम् ॥ (8)

विशदयति—**चित्सामान्येति** । (3–4) इदानीं वृत्तवर्तिष्यमाणसंगतिमाह—**आशङ्क्येति** । निर्बीजाशङ्का न युक्ता, इत्याक्षिपति—**कुत इति** । समाधत्ते—**शृणुवति** । मम वाक्यादिति शेषः । (5) हेत्वसिद्ध[त्व]शङ्कां साधयति—**निःसामान्येति** । स्थितिकाले जगतः चित्सामान्यत्वमयुक्तम् । चितो निःसामान्यविशेषत्वात् । कथं चात्मनो जगदुत्पत्तिः प्रलयश्च, आत्मनः कूटस्थत्वादित्यर्थः । (6) अस्यार्थस्य [1]केवलहेतुसाध्यत्वाभावात् हेत्वाद्यारोपेण श्रुत्या स्वार्थस्य विवक्षितत्वात् [2]तदसिद्धिर्न दोषाय, इति परिहरति—**ऐकात्म्येति** । **लोकवत्**—तर्कशास्त्रवदिति यावत् । (7) हेतूनां विवक्षितत्वेऽपि ब्रह्मणि अज्ञाते चित्सामान्यादिसंभवात् न दोषः, 'तद्धेदम्' (बृ. 3-4-7) इत्यादौ साधितत्वात्, इत्याह—चि(त्क)[त्त]त्त्वमिति । (8)

---

1. **केवलहेतुसाध्यत्वाभावादिति** उपनिषदेकसमधिगम्यत्वादिति भावः ।
2. **तदसिद्धिः** — हेत्वसिद्धिः ।

अभ्युपेत्याप्यसिद्धत्वं तत्सिद्धत्वाभिधित्सया ।
मधुब्राह्मणमारब्धमियमित्याद्यथोत्तरम् ॥ (9)

प्रतिदेहं लयोत्पत्तिश्रुतेर्ह्यात्मनि शङ्क्यते ।
भेदोऽतस्तन्निवृत्त्यर्थं मधुत्वेनैकतोच्यते ॥ (10)

उपकार्योपकारित्वभिन्नं यज्जगदीक्ष्यते ।
उपकार्योपकारित्वात्तत्स्यादेकात्मतत्त्वकम् ॥ (11)

प्रतिज्ञायाथवैकात्म्यं हेतूनुक्त्वोक्तसिद्धये ।
* निगमायोत्तरो ग्रन्थः प्रतिज्ञाया विवक्षितः ॥ (12)

प्रतिज्ञातार्थसिद्ध्यर्थं हेतूनुक्त्वा पृथग्विधान् ।
हेतोर्निगमनं पश्चात् क्रियतेऽथोत्तरोक्तिभिः ॥ (13)

चित्सामान्यादेः साधितत्वे असिद्धिशङ्काभावात् किमनेन, ब्राह्मणेन अत्राह—**अभ्युपेत्येति** । 'अयं पुरुषो जायमानः' इत्यादौ प्रतिदेहमात्मोत्पत्तिलयश्रुतेः आत्मभेदप्रसक्तौ, तन्निवृत्त्यर्थमिदं ब्राह्मणम्, इति प्रकारान्तरेण संगतिमाह—**प्रतिदेहमिति** । (10) कथम् [1]एकत्वोक्तिः, अत्राह—**उपकार्येति** । [2]भेदे [3]तदनुपपत्तिरूपार्थापत्तिसिद्धमेकात्मकमित्यर्थः । (11) इदं सर्वमात्मा इति प्रतिज्ञातम् । तत्र चित्सामान्यचिदुत्पत्तिचित्प्रलयाख्यो हेतुरुक्तः । मधुब्राह्मणेन प्रतिज्ञा(नगम्य)[निगमन]म्, इत्याह—**प्रतिज्ञायेति** । (12) हेतूनां निगमनार्थोऽयमार(म्य)[म्भः], इत्याह—**प्रतिज्ञातार्थेति** । (13)

---

1. **कथमेकत्वोक्तिरिति** सर्वस्य मधुत्वमात्रकथनादिति भावः ।
2. **भेदे**—आत्मभेदे ।
3. **तदनुपपत्तीति** उपकार्योपकारित्वानुपपत्तीत्यर्थः ।
* **निगमाय**—निगमनाय ।

निदिध्यासनसिद्ध्यर्थं केचिद् व्याचक्षते परम् ।
मधुब्राह्मणमेतत्तु न युक्तं प्रतिभाति नः ॥ (14)

श्रुत आगमतो योऽर्थस्तर्केणापि समर्थितः ।
* स एवार्थः सुनिष्णातः निदिध्यासनमुच्यते ॥ (15)

शास्त्राचार्यानुभवनैर्हेतुभिश्च समर्थितः ।
ईदृगैकात्म्यसंबोधो निदिध्यासनमुच्यते ॥ (16)

निदिध्यासनसिद्ध्यर्थो यत्नोऽतोऽयमनर्थकः ।
प्रत्यग्याथात्म्यसंबोधमात्रत्वादेव हेतुतः ॥ (17)

क्रियाफलोपभोगार्थं सर्वैरेव स्वकर्मभिः ।
जन्तुभिः पृथिवी सृष्टा मधु तेषां ततो मही ॥ (18)

भर्तृप्रपञ्चमतेनोत्तरब्राह्मणावतरणं तन्निरासश्च

श्रवणादित्रयं प्रकृत्य श्रवणमनने व्याख्याते । निदिध्यासनं व्याख्यातुमिदं ब्राह्मणम्, इति भर्तृप्रपञ्चमतमनूद्य, दूषयति—**निदिध्यासनेति** । (14) [1]अयुक्तं स्पष्टयति—**श्रुत इति** । श्रवणमननफलं वाक्यार्थज्ञानं निदिध्यासनं, न ध्यानमित्यर्थः । (15) सुनिष्णातत्वं स्पष्टयति—**शास्त्रेति** । (16) अतो [2]ग्रन्थविभागकरणमयुक्तम्, इति निगमयति—**निदिध्यासनेति** । (17)

'इयं पृथिवी' इत्यादिप्रथमकण्डिकार्थनिरूपणम्

भोग्यादिचतुष्टयस्य आत्ममात्रत्वनिरूपणम्

परमतं निरस्य '[3]इयम्' इत्यादि व्याचष्टे—**क्रियेति** । (18) **'अस्यै'**

---

1. **अयुक्तं**—अयुक्तत्वम् ।

* 'स एवार्थस्तु निष्णातः' इति मु. पु. पाठः ।

2. **ग्रन्थविभागकरणमिति** निदिध्यासनव्याख्यानाय मधुब्राह्मणमिति परकीयविभागकरणमित्यर्थः ।

3. **इयमित्यादीति** "इयं पृथिवी सर्वेषां भूतानां मधु, अस्यै पृथिव्यै सर्वाणि भूतानि मधु ।" इति श्रुतिः । मध्विव मधु कार्यं भोग्यमिति यावत् ।

पृथिव्याप्यात्मभोगार्थं सृष्टाः सर्वेऽपि जन्तवः ।
पृथिव्या अपि कार्यत्वात् मधु तेऽपि भवन्त्यतः ॥ (19)

पार्थिवानि शरीराणि सर्वेषां देहिनां यतः ।
पृथिव्या तानि सृष्टानि पृथिव्यन्वयदर्शनात् ॥ (20)

भूतानां च पृथिव्याश्च मिथः कार्यत्वहेतुतः ।
भोग्यभोक्तृत्वसंबन्धस्तस्मात्सिद्धः परस्परम् ॥ (21)

* भोग्यता प्रथमान्तेन पृथिव्यादेरिहोच्यते ।
कर्तृता भोक्तृता चैषां षष्ठ्यन्तेनाभिधीयते ॥ (22)

अचेतनांशप्राधान्यात्कार्यकारणतोच्यते ।
भोक्तृभोग्याभिसंबन्धश्चेतनाचेतनात्मनोः ॥ (23)

इत्यादेरर्थमाह—**पृथिव्येति** । (19) भूतानां पृथिवीसृष्टत्वे हेतुमाह—**पार्थिवानीति** । (20) भूतानां पृथिव्याश्च कार्यकारणत्वे फलितमाह—**भूतानां चेति** । (21) सर्वस्य भोक्तृत्वं भोग्यत्वं कर्तृत्वं कार्यत्वं वाऽविशिष्टमिति, [1]केन किमुक्तमित्यनिश्चयात् अबोधकत्वं वाक्यस्य, अत्राह—**भोग्यतेति** । कार्यता चेति शेषः । (22) कथमेकत्र [2]विरुद्धरूपा(त्व)[न्व]यः, अत्राह—**अचेतनेति** । पृथिव्यादेरचेतनांशप्राधान्यात् [3]कार्यत्वादि त्रयं, चेतनांशप्राधान्यात् भोक्तृत्वमित्यर्थः । (23) मिथो हेतुहेतुमद्भावफलं निगम-

---

1. **केन किमुक्तमिति** 'इयं पृथिवी' इत्यादिवाक्यघटकेन पदेन भोक्तृत्वादि-चतुष्टयमध्ये किं अभिहितमित्यर्थः ।

* **प्रथमान्तेनेति** 'इयं पृथिवी सर्वेषां भूतानां मधु' इत्यत्र प्रथमान्तेन पृथिवी-पदेन भोग्यता कार्यता च द्योत्यते । भूतानामिति षष्ठ्यन्तेन कर्तृता भोक्तृता च द्योत्यते । एवमुत्तरपर्यायेष्वपीत्यर्थः ।

2. **विरुद्धरूपान्वयः** — विरुद्धधर्माणां संबन्धः । कार्यत्वकर्तृत्वयोः भोग्यत्वभोक्तृत्वयोश्च परस्परं विरुद्धत्वादिति भावः ।

3. **कार्यत्वादि त्रयं**—कार्यत्वं कर्तृत्वं भोग्यत्वमिति त्रयम् ।

सर्वेषामपि भूतानां कार्यकारणसंगतेः ।
सर्वभूतात्मकत्वं स्याद्यथा सर्वात्मनस्तथा ॥ (24)

संहृत्य स्थूलमाधारं भूतानां च क्षितेस्तथा ।
तदाधेयोपसंहृत्यै यश्चायमिति शब्द्यते ॥ (25)

अस्यां पृथिव्यां यश्चासौ भास्वद्विज्ञानविग्रहः ।
* अमृतो नित्य एवातो न नाशी स्थूलदेहवत् ॥ (26)

स चापि मधु सर्वेषां भूतानां तानि तस्य च ।
मधु सर्वाणि भूतानि यथा पूर्वमवादिषम् ॥ (27)

सहाध्यात्माधिदैवं हि साधिभूतमिदं जगत् ।
एकैकस्यात्मनः कृत्स्नं भोग्यत्वेनावतिष्ठते ॥ (28)

सर्वः सर्वस्य कार्यं स्यात् सर्वः सर्वस्य भोजकः ।
एवं सति भवेत्सिद्धं यथा पूर्वं प्रपञ्चितम् ॥ (29)

यति —**सर्वेषामिति** । यथा मूलकारणं सर्वात्मकं, एवं सर्वं सर्वात्मकम् । अतो भेदो नास्ति । तेन सर्वं सर्वात्मकमिति निगमनं युक्तमित्यर्थः । (24) स्थूलांशस्य कार्यत्वादि चतुष्टयमुक्त्वा, लिङ्गस्य [1]तद्वक्तुमुत्तरवाक्यम्, इत्याह—**संहृत्येति** । चतुर्धा संक्षिप्ये(ति)[त्यर्थः] । (25) तात्पर्यमुक्त्वा अक्षरार्थमाह—**अस्यामिति** । (26–27) मधुशब्देनात्र किमुक्तमिति चेत्, भोग्यत्वादि चतुष्टयम्, इत्याह—**सहेति** । तर्हि नोक्तं निगमनम्, अर्थान्तरत्वादस्य, इत्यत्राह—**एवमिति** । 'इदं सर्वं यदयमात्मा' इति यत् सर्वस्यात्मत्वमुक्तं तत्सिद्धं, सर्वस्य कारणत्वेन सर्वात्मत्वादित्यर्थः । (28–29) '[2]यश्चायम-

---

1. **तद्वक्तुमुत्तरवाक्यमिति** कार्यत्वादिचतुष्टयं वक्तुं 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषः ।' इति वाक्यमित्यर्थः ।

* लिङ्गस्यात्मवत् नित्यत्वं नेत्याशयेनाह —**न नाशी स्थूलदेहवदिति** ।

2. **यश्चायमध्यात्ममिति** 'यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषः ।' इति वाक्यम् ।

अध्यात्मं यश्च शारीरः पार्थिवांशसमाश्रयः ।
स चापि मधु सर्वेषां सर्वभूतानि तस्य च ॥ (30)

कार्यकारणरूपेण भोज्यभोक्तृतयोदितम् ।
चतुष्टयं पृथिव्यादि तस्य तत्त्वमथोच्यते ॥ (31)

चतुष्टयविभागेन स्वार्थोऽप्यात्मा विभज्यते ।
अविभागोऽपि तादर्थ्यात् भोक्ताऽतः सोऽत्र गृह्यते ॥ (32)

प्रत्यक्तया यः प्रथते चतुष्टयविलक्षणः ।
प्रात्यक्ष्यात्सोऽयमित्येवं प्रत्यक्साक्ष्यमिधीयते ॥ (33)

अयमेव स इत्युक्त्वा सामानाधिकरण्यतः ।
प्रत्यङ्मात्रैकयाथात्म्यं चतुर्धोक्तस्य बोध्यते ॥ (34)

* पृथिव्यादिषु यः पूर्वं व्याख्यातोऽन्तरबाह्यतः ।
आत्मैव स इति ज्ञेयः तद्बोधप्रसृतितः ॥ (35)

अयमित्यस्य शेषः स्यात् योऽयमित्यादिकः परः ।
एवेत्यवधृतावेतत्संसर्गप्रतिषेधकृत् ॥ (36)

ध्यात्मम्' इत्यस्यार्थमाह—अध्यात्ममिति । (30) '[1]अयमेव' इत्यादेरर्थमाह—**कार्येति** । (31) आत्मा चतुष्टयस्य [2]रूपमिति कथमुच्यते, [3]स्वार्थस्याविभागस्य तद्वैलक्षण्यात्, अत्राह—**चतुष्टयेति** । आत्मविवर्तत्वेन तदर्थत्वात् चतुष्टयस्यात्माभोक्ता तत्त्वमित्यर्थः । (32) अयंशब्दार्थमाह—**प्रत्यक्तयेति** । (33) सामानाधिकरण्येन विवक्षितमाह—**अयमेवेति** । (34) सशब्दार्थं दर्शयति—(स)**पृथिव्यादिष्विति** । (35) 'योऽयम्' इत्येतत् 'अयम्'इत्यनेन

---

1. **अयमेवेत्यादेरिति** 'अयमेव सः योऽयमात्मा इदममृतमिदं ब्रह्मेदं सर्वम् ।' इति श्रुतिवाक्यस्येत्यर्थः ।

2. **रूपमिति** स्वरूपमित्यर्थः ।

3. **अविभागस्य**—विभागरहितस्य ।

तत्त्वं चतुष्टयस्यास्य प्रत्यगात्मैव केवलः ।
अव्यावृत्ताननुगतध्वस्ताविद्यातदुद्भवः ॥ (37)

प्रकृतात्माभिधानं वा स इत्येतत्पदं भवेत् ।
अयमित्युच्यते साक्षात् संनिकर्षाच्चतुष्टयम् ॥ (38)

स एवायमिति ज्ञेयो यो द्रष्टव्यतयोदितः ।
यच्चामृतं स्वभार्यायै याज्ञवल्क्येन भाषितम् ॥ (39)

ब्रह्मेति ध्वस्तसंभेदं यन्नेतीति पुरोदितम् ।
सर्वं समभवत्कृत्स्नं यद्याथात्म्यावबोधतः ॥ (40)

पुनरुक्तम्, इत्यत्राह—**अयमित्यस्येति** । अयमित्युक्ते कोऽयमित्याकांक्षा । तत्पूरकं 'योऽयम्' इति वाक्यमित्यर्थः । [1]सामानाधिकरण्यस्य नीलोत्पलवत् अखण्डार्थ(निरासार्थं)[त्वं] विना संसर्गमात्रविषयतयोपपत्तेः न [2]चतुष्टयस्य प्रत्यङ्मात्रता, अत्राह—**एवेति** । केवलशब्दार्थमाह—**अव्यावृत्तेति** । (36-37) [3]विधान्तरेण विभजते—**प्रकृतेति** । अयमिति संनिहितं चतुष्टयं, स इति **मैत्रेयीब्राह्म**(ण)[णे] द्रष्टव्यत्वेन प्रकृ(तत्या)[ता]त्मोच्यते इत्यर्थः । (38) ब्राह्मणभेदात् वाक्यार्थभेदः, इत्याशङ्क्याह—**स एवेति** । 'आत्मा वा अरे द्रष्टव्यः' (बृ. 4-4-5) इत्युक्तो यः, स एवायं चतु(यी)[ष्ट]यमित्यर्थः । 'इदम-मृतम्' इत्यस्यार्थमाह—**यच्चेति** । 'एतावदरे खल्वमृतत्वम्' (बृ. 6-5-15) इति यदात्मतत्त्वं अमृतत्वेनोक्तम् तदेवेदं चतुष्टयमिति शेषः । (39) 'इदं ब्रह्म' इत्यस्यार्थमाह—**ब्रह्मेतीति** । मूर्तामूर्तब्राह्मणे 'नेति' (बृ. 4-3-6) इति निर्विशेषं यद्ब्रह्मोक्तम्, तदेवेदं चतुष्टयमित्यर्थः । 'इदं सर्वम्' इत्यस्यार्थमाह—

---

* **अन्तरबाह्यत इति** अन्तरमाधेयं, बाह्यमाधारः । आधाराधेयभावेनेत्यर्थः ।

1. **सामानाधिकरण्यस्य**—'अयमेव सः' इति सामानाधिकरण्यस्य ।
2. **चतुष्टयस्य**—भोग्यादिचतुष्टयस्य । एवमुत्तरत्रापि ।
3. **विधान्तरेण विभजते इति** सः भोग्यादिभावेन चतुर्धोक्तः अयमेव-प्रत्यक्-साक्षी इत्येवंपरतया 'अयमेव सः' इति वाक्यमुदाहृत्य स्वयं व्याख्याय, प्रकारान्तरेण भाष्यदर्शितेन व्याख्याति इत्यर्थः ।

पृथिवीं पार्थिवं चांशं शरीरं साधिदैवतम् ।
जानीयात्सर्वमात्मेति नेति नेत्युपलक्षणम् ॥ (41)

उत्तरेष्वपि वाक्येषु यथोक्तेनैव वर्त्मना ।
इममेव तु वाक्यार्थं व्याचक्षीताविचारयन् ॥ (42)

पृथिव्यादीनि भूतानि तदंशाश्च समीरिताः ।
हिरण्यगर्भलिङ्गांशास्तथा पूर्वोक्तमूर्तयः ॥ (43)

यथोक्ता येन सर्वेऽपि प्रयुक्ताः स्वात्मकर्मभिः ।
उपकुर्वन्ति नः सर्वान् स धर्म इति संज्ञितः ॥ (44)

सर्वमिति । 'तस्मात्तत्सर्वमभवत्' (बृ. 3-4-10) इति धीफलत्वेनोक्तं ब्रह्ममात्रं चतुष्टयमित्यर्थः । (40) 'इदममृतम्' इत्यादेरर्थमुपसंहरति–**पृथिवीमिति** । (41)

प्रथमपर्यायोक्तार्थस्य द्वितीयादिपर्यायेषु अतिदेशः

प्रथमपर्यायोक्तमर्थं 'इमा [1]आपः सर्वेषाम्' इत्यादिपर्यायान्तरेषु अतिदिशति—**उत्तरेष्विति** । [42]

एकादशकण्डिकार्थनिरूपणम्

'अयं धर्मः' इत्याद्यर्थकथनाय वृत्तमनुद्रवति–**पृथिव्यादीनीति** । भूतानि पञ्चोक्तानि । तेषामंशाश्च शरीरादयः, सूत्रांशाश्च भूतशरीराधाराः, भूतानां शरीरादीनां च मूर्तयः स्वरूपभूताः [2]प्रागिव सूत्रांशा इत्यर्थः । [43] धर्मश(स)[ब्दा]र्थ-

---

1. **इमा आपः सर्वेषामित्यादिपर्यायान्तरेष्विति** इमा आपः, अयमग्निः, अयं वायुः, अयमादित्यः, इमा दिशः, अयं चन्द्रः, इयं विद्युत्, अयं स्तनयित्नुः, अयमाकाशः, अयं धर्मः इदं सत्यं, इदं मानुषं, अयमात्मा, इत्याद्याः समानाकाराः पर्यायाः दृश्यन्ते । तत्र आकाशपर्यायान्तस्य किमपि व्याख्यानं नास्ति । धर्मपर्यायमारभ्य क्वचित् क्वचित् व्याख्यानं लक्ष्यते इति विवेक्तव्यम् ।
2. **प्रागिवेति** तथा (वा. 43) इति भागस्य विवरणम् ।

तस्य कार्यं द्विधेहोक्तं सामान्यात्मविशेषतः ।
पृथिव्यादीह सामान्यं विशेषः पिण्डमात्रकम् ॥ (45)

तत्कार्यस्येह प्रात्यक्ष्यात् तदभेदोपचारतः ।
प्रत्यक्षवदयं धर्मः तस्मादेवाभिधीयते ॥ (46)

साधारणः पृथिव्यादिकारी धर्मोऽभिधीयते ।
यश्चायमिति वाक्येन तथाऽसाधारणाभिधा ॥ (47)

यश्चायमध्यात्ममिति योऽयं मदेहकृन्मतः ।
साधारणविशेषात्मा यदपूर्वं तदुच्यते ॥ (48)

प्राजापत्यमपूर्वं यत् सर्वभूतप्रयोजकम् ।
अध्यात्मं पिण्डकृच्च सोऽयं धर्माभिधोदितः ॥ (49)

माह—यथोक्ता इति । [44] धर्म[:]शास्त्रैकगम्यत्वात् परोक्षः, कथम् '[1]अयम्' इति निर्देशमर्हेत्, इति शङ्कामपाकर्तुं तस्य कार्यमाह—तस्येति । [45] अस्तु प्रस्तुते किं स्यात्, अत्राह—तत्कार्यस्येति । [46] [2]अत्र श्रुतानेकधर्मशब्दानामर्थभेदं वक्तुं, 'यश्चायमस्मिन् धर्मे' इत्यत्र धर्मः पृथिव्याद्यारम्भकः 'यश्चायमध्यात्मम्' इत्यत्र धर्मः शरीराद्यारम्भकः, इत्याह—साधारण इति । कस्तर्हि 'अयं धर्मः' इत्यत्र विव(क्ष)[क्षि]तः, अत्राह—साधारणेति । [3]उभयं समुदितं हिरण्यगर्भापूर्वं समस्तजगदारम्भकमित्यर्थः । तस्य साधारणाकारमाह—यदिति । असाधारणरूपमाह—अध्यात्ममिति । [47-48-49]

---

1. अयमिति निर्देशमिति इदमः प्रत्यक्षार्थकत्वादिति भावः ।
2. अत्र—धर्मपर्याये । 'यश्चायमध्यात्मं धार्मः' इत्यत्र धर्मः शरीराद्यारम्भकः विवक्षितः । तत्र भवः धार्मः इत्यर्थः ।
3. उभयं समुदितमिति पृथिव्याद्यारम्भकं शरीराद्यारम्भकं चेत्युभयं समुदितमित्यर्थः ।

तथैवाचाररूपेण प्रत्यक्षेण यदीक्ष्यते ।
स एव धर्मः सत्यं स्याद्यद् व्यवस्थाप्रयोजकम् ॥ (50)

साधारणविशेषाभ्यां धर्मवत्तदपि द्विधा ।
साधारणविशेषार्थव्यवस्थाकारणत्वतः ॥ (51)

धर्मसत्यप्रयुक्तोऽयं लिङ्गपिण्डस्वलक्षणः ।
विराट् हिरण्यगर्भश्च सर्वजातिसमन्वितः ॥ (52)

मनुष्यजातेर्ग्रहणं सर्वजात्युपलक्षणम् ।
इदं मानुषमित्येवं व्याख्या तस्यास्तु पूर्ववत् ॥ (53)

द्वादशकण्डिकार्थनिरूपणम्

'यो वै धर्मः सत्यं वैतत्' इति धर्मसत्ययोरभेदात् 'इदं [1]सत्यम्' इति पुनरुक्तम्, अत्राह—**यथेति**। तदेव धर्मरूपमाचाररूपेण वर्तमानं लोकसिद्धमर्यादाव्यवस्थापकं सत्यमित्यर्थः । [50] तर्हि तस्यापि द्वैविध्यं वाच्यम्, अन्यथा धर्मत्वासिद्धेः, अत्राह—**साधारणेति**। 'यश्चायमस्मिन् सत्ये' इत्यत्र सामान्यं रूपम्, 'यश्चायमध्यात्मं सत्यः' इत्यत्र विशेषरूपम्, 'इदं सत्यम्' इत्यत्र मिलितं ग्राह्यमित्यर्थः । [51]

त्रयोदशकण्डिकार्थनिरूपणम्

'इदं मानुषम्' इत्यस्यार्थमाह—**धर्मेति**। [2]शरीरद्वयं मनुष्यादिजातियुक्तं मानुषमित्यर्थः । [52] 'मानुषम्' इति विशेषणात् कथं सर्वजातिसमन्वितत्वम्, अत्राह—**मनुष्येति** । 'इदं मानुषम्' इत्येवं मनुष्यजातेर्ग्रहणमित्यन्वयः । **पूर्ववदिति**। साधारणादिभेदेन [3]धर्मवदित्यर्थः । [53]

---

1. **इदं सत्यमिति पुनरुक्तमिति** अयं धर्मः इत्यनेनेत्यादिः ।
2. **शरीरद्वयं**—स्थूलसूक्ष्मशरीरद्वयम् ।
3. **धर्मवदिति** मानुषादिजातिः बाह्याध्यात्मिकभेदेन द्विधा । 'यश्चायमस्मिन् मानुषे' इत्यत्र ब्राह्यजातेः, 'यश्चायमध्यात्मं मानुषः' इत्यत्र आध्यात्मिकजातेः, 'इदं मानुषम्' इत्यत्र मिलितसर्वजातेः ग्रहणमिति भावः ।

पृथिवी शारीर इत्येवं खण्डशो यः पुरोदितः ।
विराड्ढिरण्यगर्भश्चेत्ययमात्मेति तद्वचः ॥ (54)

हिरण्यगर्भभेदानां भूतानां च पृथक् पृथक् ।
उक्तं मधुत्वं येनातस्तत्साम्यस्त्यमथोच्यते ॥ (55)

अयमात्मेति निर्देशः विराजः प्रथमो मतः ।
* सप्तम्यन्तेन तत्प्रत्यङ्लिङ्गात्माऽतोऽभिधीयते ॥ (56)

कार्यात्मा कारणात्मा च यदर्थौ भवतः सदा ।
यश्चायमात्मेत्यत्रोक्तो विज्ञानात्मेति यं विदुः ॥ (57)

चतुर्दशकण्डिकार्थनिरूपणम्

'अयमात्मा' इत्यस्यार्थमाह—**पृथिवीति** । 'इयं पृथिवी' इत्यारभ्य [1]विराट्सूत्रावयवा निर्दिष्टाः । इदानीं अवयवी निर्दिश्यते इत्यर्थः । [54] अत्रापि तदवयवानामेव मधुत्वं किं नोच्यताम्, अत्राह—**हिरण्यगर्भेति** । [55] प्रथमान्तः आत्मशब्दो विराड्वाची । सप्त[2]म्यन्तः तदन्तर्गतलिङ्गवाची, इति विभजते—**अयमात्मेति** । [56] 'यश्चायमात्मा' इति कस्याभिधानमिति, चैतन्याभासरूपजीवस्य, (अत्र)[इत्या]ह—**कार्येति** । [57]

1. **विराट् सूत्रावयवा इति** विराजः सूत्रस्य चावयवाः इत्यर्थः । पृथिवी, आपः, अग्निः इत्यादिना विराजोऽवयवाः, शारीरः तैजसः, वाङ्मयः, इत्यादिना सूत्रस्यावयवाश्च पूर्वपर्यायेषु निर्दिष्टा इति यावत् ।

2. **सप्तम्यन्त इति** आत्मशब्द इति शेषः ।

* "अयमिति विराजः सूत्रस्य च यत् मिलितं रूपं तस्य 'अयमात्मा' इत्यत्र आत्मशब्दः प्रथमान्तो वाचक इत्यर्थः । 'यश्चायमस्मिन्नात्मनि' इत्यत्र सप्तम्यन्तात्मशब्देन विराज एवोक्तिः, इत्याह—**सप्तम्यन्तेनेति** । निर्देशो विराजः इति पूर्वेण संबन्धः । विराजोऽभ्यन्तरो लिङ्गात्मा तेजोमयादिशब्देनोच्यते, इत्याह—**तत्प्रत्यङ्ङिति** । अतः—तेजोमयादिशब्दादिति यावत् ।" इति **शास्त्रप्रकाशिका** ।

यस्मिन्नात्मनि विध्वस्तव्याकृताव्याकृतात्मके ।
* खिल्यदृष्टान्तवचसा विज्ञानात्मा प्रवेशितः ॥ (58)

ब्रह्मविद्याहतध्वान्ते तस्मिन् ब्रह्मणि निष्ठिते ।
तमस्तदुत्थकार्याणामत्यन्तासंभवादतः ॥ (59)

योऽसावविद्यया देही संसारीवाप्यभूत्पुरा ।
सोऽयं साक्षात्परं ब्रह्म विद्यया वर्ततेऽधुना ॥ (60)

ध्वस्ताज्ञानतदुत्थोऽयं संविन्मात्रैकतत्त्वकः ।
अनन्तापार आत्मैव स्वमहिम्नि व्यवस्थितः ॥ (61)

अपूर्वानपरामध्यप्रत्यग्याथात्म्यवित्तये ।
स वा इत्यादिको ग्रन्थः सदृष्टान्तोऽभिधीयते ॥ (62)

पञ्चदशकण्डिकार्थनिरूपणम्

'स वा अयम्' इत्यादेस्तात्पर्यमाह—**यस्मिन्निति**। सौत्रात्मेति शेषः । [58] विज्ञानात्मनः ब्रह्मणि तादात्म्येन प्रवे(शान्न)[शेन]युक्तः, विरुद्धरूपत्वात्; **अत्राह—ब्रह्मेति** । विज्ञानात्मनि ब्रह्मणि, [1]निश्चयेन स्थिते, अविद्यातत्कार्यासंस्पर्शात् **अविरुद्धमैक्यमित्यर्थः** । [59] [2]अयम् इत्यस्यार्थमाह—**योऽसाविति** । य एवंभूतः स [3]इदानीं विद्यया, ब्रह्मभूतो वर्तते इत्यर्थः । [60] [4]वार्तिकत्रयार्थं संक्षिप्याह—**ध्वस्तेति** । [61] उ[5]क्तार्थे वाक्यमवतारयति—**अपूर्वेति** । [62] तद्गतराज-

---

* **प्रवेशित इति** ऐक्येन बोधित इत्यर्थः ।
1. **निश्चयेन स्थिते इति** सतीति शेषः । निष्ठिते इत्यस्य विवरणमिदम् ।
2. **अयमित्यस्येति** "स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा । रथनाभौ च रथनेमौ च अराः सर्वे समर्पिताः । एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एते आत्मानः समर्पिताः ।" इति श्रुतिरनुसन्धेया ।
3. **इदानीं**—विद्यादशायाम् ।
4. **वार्त्तिकत्रयार्थं**—'यस्मिन्नात्मनि' (वा. 58) इत्यादिवार्त्तिकत्रयार्थम् ।
5. **उक्तार्थे**—विद्याफलभूतेऽर्थे ।

ब्रह्मास्मीति परिज्ञानध्वस्तध्वान्तत्वकारणात् ।
राजेति राजनात् भास्वदविप्लुतात्मदर्शनात् ॥ (63)

तथाधिपतिशब्देन स्वातन्त्र्यमभिधीयते ।
स्वार्थः प्रत्यक् तदर्थत्वात् सहेतोर्जगदात्मनः ॥ (64)

प्रत्यग्विज्ञप्तिमात्रेण समाप्तिं जगदात्मनः ।
आविश्चिकीर्षुः साक्षान्नः तद्यथेति परा श्रुतिः ॥ (65)

चक्रनाभौ यथा प्रोताः चक्रनेमौ च बाह्यतः ।
अराः, प्राणादयस्तद्वदोताः प्रोताः परात्मनि ॥ (66)

व्याचक्षतेऽन्यथैवेमं दृष्टान्तं केचिदात्मनः ।
समस्तादिप्रतिज्ञार्थसिद्धये ब्रह्मवादिनः ॥ (67)

* एकीकृत्य स्वमात्मानमक्षरे परमात्मनि ।
चक्रनाभिवदात्मानं कल्पयित्वा विचक्षणः ॥ (68)

शरीरं नेमिवच्चैतद्देवताद्यरवज्जगत् ।
कल्पयित्वा निदिध्यासेत् तद्भावाविष्टधीः सदा ॥ (69)

शब्दार्थमाह—**राजेति** । [63] अधिपतिशब्दस्य [1]तदपुनरुक्तार्थमाह—**तथेति** । [64] 'तद्यथा' इत्यादेस्तात्पर्यमाह—**प्रत्यगिति** । [65] तदक्षरार्थमाह—**चक्रेति** । [66]

'तद्यथा रथनाभौ' इत्यादेः भर्तृप्रपञ्चव्याख्यानम्

[2]दृष्टान्तवाक्यस्य भर्तृप्रपञ्चव्याख्यां दर्शयति—**व्याचक्षत इति** । [67] कथमन्यथा व्याख्यानम्, अत्राह—**एकीकृत्येति** । [68-69] एवं ध्यानात् किं

---

1. **तदपुनरुक्तार्थं**—राजपदेनापुनरुक्तार्थम् ।
2. **दृष्टान्तवाक्यस्य**—'तद्यथा रथनाभौ च' इत्यादिवाक्यस्य ।

* **एकीकृत्येति** परमात्माभिन्नः आत्मा चक्रनाभिस्थानीयः । पञ्चभूतात्मकं देहं चक्रनेमिस्थानीयं कल्पयित्वा, देवतादि जगत् अरवत् आत्मनि भूतेषु चार्पितमिति कल्पयित्वा, तत्र कल्पितेऽर्थे स्थिरबुद्धिः ध्यानं कुर्यात् इति समुदायार्थः ।

अनेन ध्यानमार्गेण ध्यायमानस्य सर्वदा ।
तप्तलोहवदेकत्वं भवत्यावृत्तिदुर्लभम् ॥ (70)

एतामवस्थामापन्नो ध्यातृत्वाद्विनिवर्तते ।
अविद्यातिमिरान्धानां ध्येयत्वमधिगच्छति ॥ (71)

निश्चित्याचिन्त्यमेतद्यो योगिनां निलयं परम् ।
यं प्राप्य न निवर्तन्ते निर्वाणं परमं गताः ॥ (72)

प्रत्येकं प्राणिनां ह्येतद् ब्रह्म चक्रमवस्थितम् ।
असंबोधात्तु तैः सर्वैः प्राणिभिर्नानुभूयते ॥ (73)

वैश्वानरवरात्केचिदेवं व्याचक्षते स्फुटम् ।
अक्षरानन्वयात् त्याज्या व्याख्येयं साप्यपीदृशी ॥ (74)

स्यात्, अत्राह—**अनेनेति** । [70] एकत्वमापन्नोऽपि ध्या(तो)[ता, न]वा स्यादिति, नेत्याह—**एतामिति** । [71] [1]क इति चेत्, अत्राह—**निश्चित्येति** । [72] तदीयप्रक्रियान्तरमाह—**प्रत्येकमिति** । एतत् ब्रह्माख्यं चक्रं इत्थं वलक्षं सर्वप्राणिनां हृदये स्थितं चेत्, किमिति सर्वैर्नानुभूयते, अत्राह—**असंबोधादिति** । [73] निगमयति—**वैश्वानरेति** ।

निरुक्तव्याख्यानप्रतिक्षेपः

[2]**आक्षिपति—अक्षरेति** । [74] दृष्टान्त[3]सामर्थ्यादात्मनो भिन्नाभिन्नत्वसिद्धेः अस्मत्कल्पना अक्षरा(द्दा)न्विता, इत्यत्राह—**सामर्थ्यादिति** । यद्यपि दृष्टान्तसामर्थ्यात्

---

1. **क इति चेत्**—कः अज्ञानां ध्येयत्वमधिगच्छति इति चेत् ।
2. **आक्षिपति**—भर्तृप्रपञ्चव्याख्यां दूषयति ।
3. **दृष्टान्तसामर्थ्यात्**—अस्माभिर्दृष्टान्तसामर्थ्यात् ।

सामर्थ्यादपि संप्राप्तः न चेदक्षरपूर्वकः ।
तादृङ् नोपास्य एवेति प्राहुरागमवेदिनः ॥ (75)

'प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि ।
अदृष्टशतभागोऽपि न कल्प्यो निष्प्रमाणकः ॥' (76)

यथोक्तचक्रविन्यासो न श्रुतोऽक्षरपूर्वकः ।
न चाप्युपासनपदं कृत्स्नेऽपि ब्राह्मणे श्रुतम् ॥ (77)

नाभिनेमिद्वयस्थाने दृष्टान्तत्वेन संमते ।
दार्ष्टान्तिकोक्तावात्मैव यतः साक्षादिह श्रुतः ॥ (78)

समर्पितत्वं प्राणादेः श्रूयते प्रत्यगात्मनि ।
भूतेषु देवतादेस्तदश्रुतं गृह्यते कथम् ॥ (79)

भवदिष्टोऽर्थो भाति, तथापि अत्र प्रकरणे तद्वाचिपदाभावात् [1]अपूर्वादिवाक्यविरोधाच्च न ब्रह्मणः समस्तव्यस्तत्वविवक्षायां दृष्टान्त इत्यर्थः । [75]

कल्पकाभावाच्च नेयं कल्पना युक्ता, इत्याह—**प्रमाणवन्तीति** । (76) [2]एवंविधार्थस्य श्रुतत्वात् न कल्पकापेक्षा, अत्राह—**यथोक्तेति** । यदुक्तं निदिध्यासेत् इति, तदयुक्तम्, [3]तद्वाचिपदाभावात्, इत्याह—**न चेति** । (77) [4]दृष्टान्तगतार्थव्रातस्य दार्ष्टान्तिकोक्तौ आत्ममा(त्व)[त्र]श्रुतेश्च न समस्तादिकल्पना, इत्याह—**नाभीति** । (78) यत्तु चक्रनाभिस्थानीयप्रतीचि चक्रनेमिस्थानीयदेहात्मकभूतेषु च देवतादि जगत् अरवद(पिने)[र्पित]मिति, तत्राह—

---

1. अपूर्वादिवाक्यं—'अपूर्वमनपरमनन्तरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूः इत्यनुशासनम् ।' इति वाक्यम् ।
2. एवंविधार्थस्य श्रुतत्वात्—समस्तव्यस्तात्मनः चक्रविन्यासश्रुत्या श्रुतत्वात् ।
3. तद्वाचिपदाभावात्—निदिध्यासनवाचिपदाभावात् ।
4. दृष्टान्तगतार्थव्रातस्येति दार्ष्टान्तिके अन्वये दृष्टान्तभावस्यानुपपत्तेः इति शेषः ।

बहिरन्तर्विभागोऽस्य कार्यकारणता तथा ।
तदेतदिति वाक्येन प्रतीचोऽत्रैव वार्यते ॥ (80)

अथ योऽन्यामिति तथा भेददृष्टिनिराकृतेः ।
उपास्योपासनविधिर्न सम्यगिति मे मतिः ॥ (81)

अज्ञानमात्रव्यवधेः ब्रह्मात्मैक्यफलस्य च ।
ब्रह्मविद्यातिरेकेण तत्प्राप्तौ नापरा क्रिया ॥ (82)

यद्वाचानभ्युदितं मनुते मनसा न यत् ।
तदेव ब्रह्म विद्धि त्वं न त्विदं यदुपासते ॥ (83)

उपासिक्रियया व्याप्तिरब्रह्मत्वस्य लक्षणम् ।
श्रुत्याऽकारि यतस्तादृक् कथं ब्रह्मेत्युपास्यते ॥ (84)

दृश्यते त्वग्र्यया बुद्ध्या मनसैवेति यद्वचः ।
तदात्मविद्याविध्यर्थं नोपासनविधायकम् ॥ (85)

समर्पितत्वमिति । (79) [1]"तदेतत्' इत्यादिप्रधानवाक्यविरोधाच्च न समस्तादिरूपता, इत्याह—**बहिरिति** । (80) इतश्च न समस्तादिरूपं ब्रह्म, इत्याह—**अथेति** । (81) ब्रह्मभावफलत्वादुपासनस्य अवश्योपेयत्वे, समस्तादिभावोऽभ्युपेयः, अन्यथोपासनायोगात्, अत्राह—**अज्ञानेति** (82) उपास्यस्य ब्रह्मत्वनिरासाच्च नोपास्यं तत्, इत्याह—**यद्वाचेति** । (83) दुरात्मभिरुपास्यत्वमविरुद्धम्, इत्याशङ्क्य, श्रुत्यर्थमाह—**उपासीतेति** । तादृक्—उपासिक्रियाव्याप्तमिति यावत् । (84) ब्रह्मोपासनमिति क्वचित् श्रूयते, इत्यत्राह—**दृश्यते त्विति** ।

---

1. **तदेतदित्यादिप्रधानवाक्येति** "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः इत्यनुशासनम् ।" इति वाक्येत्यर्थः । मधुकाण्डोपसंहारवाक्यत्वात् 'इत्यनुशासनम्' इति स्वयमनुशासनत्वोक्तेश्च इदं प्रधानवाक्यमिति बोध्यम् ।

रजस्तमोऽनुविद्धेन यतो न ब्रह्म गम्यते ।
शुद्धचेतस्तया तस्माद्विद्याद्ब्रह्मान्तरात्मनि ॥ (86)

यद्वानात्माभिसंबन्धात्पूर्वमैकात्म्यनिष्ठिता ।
सर्वप्राणभृतां बुद्धिरित्यर्थो वचसो भवेत् ॥ (87)

एषोऽर्थो वचसस्तस्य न तूपासाविधिर्भवेत् ।
प्रध्वस्तभेद ऐकात्म्ये नोपासनविधिर्यतः ॥ (88)

चक्रक्लृप्तिरतोऽसाध्वी श्रुत्यादिमितिबाह्यतः ।
तदेतदिति वाक्यार्थो ग्राह्योऽतः संभवान्मितेः ॥ (89)

तदाहुरिति वाक्येन ब्रह्मविद्याप्रयोजनम् ।
साक्षेपं प्रागुपन्यस्तं तस्यायं निर्णयः कृतः ॥ (90)

---

(85) ज्ञाननियोगस्य निरस्तत्वात् [1]कथं त(द्वि)[द्विधिः,] अत्राह—**रज इति**। विद्यासाधनशुद्धिविधानमेतदित्यर्थः । (86) शुद्धेरभावार्थकस्य कथं विधेयत्वम्, अत्राह—**यद्वेति** । ऐकात्म्यनिष्ठिता—चिदाकारतेत्यर्थः । (87)

[2]पूर्ववार्त्तिकार्थमुपसंहरति—**एष इति** । (88) [3]परमतनिरासं निगमयति —**चक्रेति** । किं तर्हि विवक्षितम्, तदाह—**तदिति** । 'तदेतद्ब्रह्मापूर्वम्' इत्यस्यार्थोऽनेन दृष्टान्तवाक्येन विवक्षित इत्यर्थः । (89) 'तस्मात्तत्सर्वमभवत्' (बृ. 3-4-10) इति विद्याफलमुक्तं [4]तृतीये । तदत्रोपसंह्रियते, इत्यर्थान्तरमाह—**तदाहुरिति** । (90)

---

1. **कथं तद्विधिः** — ज्ञाने विधिः न संभवतीति यावत् ।
2. **पूर्ववार्त्तिकार्थं**—' यद्वानात्माभिसंबन्धात् ' इति वार्त्तिकार्थम् ।
3. **परमतनिरासं**—दृष्टान्तश्रुतेः भर्तृप्रपञ्चव्याख्यादूषणम् ।
4. **तृतीये इति** अध्याये इति शेषः ।

आत्मेत्येवेति सूत्रस्य व्याख्येयं सम्यगात्मनः ।
पञ्चभिर्ब्राह्मणैः श्रुत्याऽकारि कृत्स्नात्मबुद्धये ॥ (91)

समाप्ता ब्रह्मविद्येयं कैवल्यावाप्तयेऽखिला ।
यामवोचत् स्वभार्यायै याज्ञवल्क्योऽतिविस्तरात् ॥ (92)

यथोक्तब्रह्मविद्याया इत आरभ्य भण्यते ।
आख्यायिकेयं स्तुत्यर्था प्रवृत्त्यङ्गतया परा ॥ (93)

आख्यायिकार्थं मन्त्राभ्यां व्याचष्टे श्रुतिरादरात् ।
श्रुतिमन्त्रस्तुतो ह्यर्थ आदेयत्वं निगच्छति ॥ (94)

अवाप्तपुरुषार्थोऽपि यामरक्षच्छचीपतिः ।
प्रत्यग्विद्यैव तेन स्यादुदारफलसाधनम् ॥ (95)

षोडशकण्डिकार्थनिरूपणम्

सप्रयोजनमश्विभ्यां आथर्वणकृतमधुविद्योपदेशाख्यायिकाकथनम्

[1]'इदं वै तत्' इत्यादि अवतारयितुं उक्तमनुवदति—**आत्मेति** । (91) व्याख्यातेऽपि [2]सूत्रे विद्या न परिपूर्णा, अत्राह—**समाप्तेति** । (62) तर्हि उत्तरग्रन्थवैयर्थ्यम्, अत्राह—**यथोक्तेति** । (93) आख्यायिकार्थः कः, इत्यत्राह—**आख्यायिकार्थमिति** । **मन्त्रौ** वक्ष्यमाणौ । मन्त्राभ्यां तदर्थकथने फलमाह—**श्रुतीति** । (94) कथं(श्रु)[स्तु]तिरिति, तामाह—**अवाप्तेति** । (95)

---

1. इदं वै तत् इत्यादीति

"इदं वै तन्मधु दध्यङ्ङाथर्वणः अश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् । दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्रयदीमुवाचेति ।" इति श्रुतिवाक्यम् ।

2. सूत्रे—'आत्मेत्येवोपासीत' इति विद्यासूत्रे ।

महता च यतोऽश्विभ्यामायासेनार्जिता पुरा ।
ब्रह्मविद्या ततो नास्या मुक्तौ स्यात्साधनं परम् ॥ (96)

निःशेषपुरुषार्थानां कैवल्योत्तमता यथा ।
साधनानामपि तथा तद्विद्योत्तमसाधनम् ॥ (97)

अश्व्याथर्वणयोर्वृत्तं ब्रह्मविद्याप्तिकारणात् ।
यत्प्रागाविष्कृतिस्तस्य मन्त्राभ्यां क्रियतेऽञ्जसा ॥ (98)

अश्विभ्यां प्रार्थितोऽथर्वा मधुविद्यामिमां किल ।
तावथर्वाब्रवीदिन्द्रः छिन्द्यान्मे ब्रुवतः शिरः ॥ (99)

अतो भयादिमां विद्यां युवाभ्यां न ब्रवीम्यहम् ।
तमूचतुः पुरैवाऽऽवामिन्द्रच्छेदनतः शिरः ॥ (100)

छित्वा तवाश्व्यं सन्धाय शिरः श्रोष्यावहे ततः ।
ब्रूह्यतोऽश्व्येन शिरसा मधुविद्यां विमुक्तये ॥ (101)

एवमस्त्वित्यनुज्ञाते छित्वा तस्याथ तच्छिरः ।
समधत्तां शिरोऽश्वस्य तेन विद्यामुवाच सः ॥ (102)

पुनश्छिन्नेऽथ शिरसि तेनेन्द्रेणाश्विनावपि ।
समधत्तां शिरस्तस्य विद्यां स्वशिरसाथ सः ॥ (103)

शेषामवोचदश्विभ्यामृतायन्नात्मनो वचः ।
यत एवमतस्तस्मात्सत्यं रक्ष्यं प्रयत्नतः ॥ (104)

विधान्तरेण(श्रु)[स्तु]तिमाह—महतेति । (96) (श्रु)[स्तु]त्यन्तरमाह—निःशेषेति । (श्र)[स्तु]तिप्रकारमुक्त्वा, 'आख्यायिकार्थे मन्त्राभ्याम्' (वा. 94) इत्येतत् स्पष्टयति—अश्व्याथर्वणयोरिति । (98) प्रवर्ग्यप्रथमाध्या[यस्थाख्या]यिकाश्रुतेरर्थं दर्शयन् आख्यायिकार्थं संक्षिप्याह—अश्विभ्यामित्यादिना । 'ऋतायन्' इत्यस्य तात्पर्यमाह—यत एवमिति । (99-104)

इदं वै तन्मधु प्रोक्तं यत्तत्प्रकरणान्तरे ।
दध्यङ् ह वा आभ्यामिति श्रूयते ब्राह्मणोक्तितः ॥ (105)

मधुब्राह्मणमेतत्तद्यत्प्रागुक्तमभूत्स्फुटम् ।
दध्यङ्ङाथर्वणोऽश्विभ्यां यदुवाचात्मबोधनम् ॥ (106)

अश्व्याथर्वणयोरेतत्कर्म पश्यन्नृचाब्रवीत् ।
ऋषिरार्षेयदृष्ट्यैव तदेतदभिधीयते ॥ (107)

आविष्करोमि तत्कर्म युवयोरद्य हे नरौ ।
लाभाय सनये क्रूरं चक्रथुर्यद्रहस्यगौ ॥ (108)

वृष्टेरागमनं यद्वत् स्तनयित्नुः प्रबोधयेत् ।
रहस्यं युवयोः कर्म तद्वदाविष्करोम्यहम् ॥ (109)

आख्यायिकार्थमाह—इदमिति । यत्तत् प्रवर्ग्यप्रकरणे मधु सूचितं न व्यक्तीकृतम्, तदिदमेव, यत् 'इ(दं)[यं]पृथिवी' इत्यादिनोक्तमित्यर्थः । क [1]प्रकरणान्तरे मधु सूचितम्, अत आह—दध्यङ्ङिति । 'आभ्याम्' इत्यादि ब्राह्मणोक्तितः श्रूयते [2]प्रथमे अध्याये (व) म[धु] ब्राह्मणमित्यर्थः । तर्हि [3]तेन गतार्थत्वात् किमनेन मधुब्राह्मणेन, अत आह—एतदिति । यदात्मज्ञानसाधनं मधुब्राह्मणं ब्राह्मणः अश्विभ्यां प्रवर्ग्यसंनिधौ अव्यक्तमुवाच, तदेतदेव यत् 'इयम्' इत्यादिना स्फुटमुक्तमित्यर्थः । (105-106) 'तदेतदृषिः' इत्यादेरर्थमाह—अश्व्याथर्वणयोरिति । आर्ष[दृष्ट्या]ऋषिरेतत्कर्म पश्यन्(न)[ऋ]चाब्रवीत् । तच्च कर्म अभिधीयते इत्यर्थः । (107)

'तद्वाम्' इत्यादेरर्थमाह—आविष्करोमीति । (108-109)

---

1. प्रकरणान्तरे—प्रवर्ग्यप्रकरणे ।
2. प्रथमेऽध्याये इति बृहदारण्यकस्य प्रथमद्वितीयाध्यायद्वयमपि कर्मनिरूपकमिति भाष्यकारैः न व्याख्यातमिति बोध्यम् ।
3. तेन—प्रवर्ग्याध्यायस्थेन ।

अश्वस्य शिरसा वां यत् अवोचन्मध्वसावृषिः ।
दधीचोऽस्त्यं शिरश्छित्वा निकृत्यास्य शिरोऽश्विनौ ॥ (110)

संधत्तां सोऽश्वशिरसा युवाभ्यां मध्वथाब्रवीत् ।
ऋतायन् सत्यमात्मानं कर्तुमिच्छन्नसावृषिः ॥ (111)

प्राणसंशयमापन्नस्तस्माच्चैवावसीयते ।
आत्मनो मरणेनापि सत्यं रक्ष्यं प्रयत्नतः ॥ (112)

आदित्यविषयं त्वाष्ट्रं मध्ववोचदथर्वणः ।
हे दस्रावपि कक्ष्यं यत्प्रत्यग्याथात्म्यदर्शनम् ॥ (113)

उपक्षयकरौ व्याधेर्दस्रौ स्यातामतोऽश्विनौ ।
न केवलं त्वाष्ट्रमेव कक्ष्यमप्यब्रवीन्मधु ॥ (114)

सप्तदशकण्डिकार्थनिरूपणम्

'[1]आथर्वणाय' इत्यादेरर्थमाह—दधीच इति । (110-111-112) 'त्वाष्ट्रम्' इत्यादेरर्थमाह—आदित्येति । (113) दस्रशब्दार्थमाह—उ(पे)[प]क्षयेति । [2]अपिशब्दार्थमाह— न केवलमिति । (114)

---

1. 'आथर्वणाय' इत्यादेरिति "आथर्वणायाश्विनौ दधीचे अश्व्यं शिरः प्रत्यैरयतम् । स वां मधु प्रवोचदृतायन् त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ।" इति श्रुतिः ।

2. अपिशब्दार्थमिति 'अपि कक्ष्यं वामिति' इति मन्त्रस्यापिशब्दस्यार्थम् । अत्रेदं बोध्यम् । त्वाष्ट्रं कक्ष्यमिति मधु द्विविधम् । यज्ञस्य शिरः छिन्नं त्वष्टा अभवत् । तत्प्रतिसन्धानार्थं प्रवर्ग्यं कर्म । त्वष्टा आदित्यः । प्रवर्ग्यकर्माङ्गभूतं यज्ञस्य शिरश्छेदप्रतिसन्धानादिविषयं दर्शनं त्वाष्ट्रं मधु । तत् कर्मसंबन्धि । कक्ष्यं गोप्यं-रहस्यं परमात्मसंबन्धि यद्विज्ञानं तत् कक्ष्यं मधु मधुब्राह्मणोक्तम् । चतुर्थाध्यायान्तो भागः मधुकाण्डमिति व्यपदिश्यते इति ।

प्रवर्ग्याध्याययोरेवं त्वाष्ट्रज्ञानोपसंहृतिम् ।
मन्त्रद्वयेन कृत्वाऽथ कक्ष्यज्ञानोपसंहृतिः ॥ (115)

क्रियतेऽध्याययोरेवं मधुकाण्डं समाप्यते ।
श्रुतिमन्त्रोपदिष्टोऽर्थो यस्मादाद्रियते ततः ॥ (116)

पुरश्चक्रे शरीराणि द्विपदः पक्षिमानुषान् ।
चतुष्पदोऽथ पशवः पुरश्चक्रे स्वमायया ॥ (117)

पुरो भुक्तशरीरात् स पक्षी लिङ्गमिहोच्यते ।
पुरो नवशरीराणि प्राविशज्जलचन्द्रवत् ॥ (118)

* कस्मात् पुरुष इति चेत् पुरुषार्थं श्रुतिः स्वयम् ।
स वा इत्यादिनाचष्टे सर्वैकात्म्यावबुद्धये ॥ (119)

पुरुषोऽयं भवेदात्मा यतः शेते स पूरुषु ।
सर्वासु तेन लोकेऽस्मिन् पुरुषोऽयमितीर्यते ॥ (120)

अष्टादशकण्डिकार्थनिरूपणम्

'[1]पुरः' इत्यादि मन्त्रद्वयमवतारयितुमुक्तमनुवदति—**मन्त्रेति** । (इत्याद्या) [प्रवर्ग्या] ध्यायार्थः किमिति मन्त्रद्वयेनोपसंह्रियते, अत्राह—**एवमिति** । फलान्तरमाह—**श्रुतीति** । (115-116) मन्त्रपदानि व्याचष्टे—**पुर इति** । (117-118) '[2]स वा' इत्यादिकमाकांक्षापुरःसरमवतारयति—**कस्मादिति** । (119) अक्षरार्थमाह—**पुरुषोऽयमिति** । (120) [3]आधाराधेयभावेन भेदशङ्कापरिहारत्वेन

---

1. **पुर इत्यादि मन्त्रद्वयमिति** ।
'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति ॥' इति प्रथमो मन्त्रः ।
2. **स वा इत्यादिकमिति** "स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः, नैनेन किञ्चनानावृतं, नैनेन किञ्चनासंवृतम् ।" इति वाक्यम् ।

* **पुरुषार्थं**—पुरुषपदस्यार्थम् ।

3. **आधाराधेयभावेनेति**—पुरि शेते इत्येवमित्यादिः ।

परिच्छेदप्रसङ्गश्चेत् मैवं यस्मादिदं जगत् ।
नैनेनानावृतं किंचिन्नाव्याप्तं ह्योततन्तुवत् ॥ (121)

नासंवृतं तथा किंचित् प्रोततन्तुवदात्मना ।
पूर्णत्वात्पुरुषः सोऽयं ब्रह्मैकं पुरुषस्ततः (122)

'यस्मात्परं नापरमस्ति किञ्चित्
यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः
तेनेदं पूर्णं पुरुषेण सर्वम् ॥' (123)

* आवृतं ज्ञप्तिमात्रेण सर्वमात्मीकृतं जगत् ।
संवृतं प्रतिषिद्धं तद्यदनात्मेव लक्ष्यते ॥ (124)

तन्नास्ति कारणं कार्यं यन्नानेनात्मसात्कृतम् ।
तन्नास्ति कारणं यन्नानेनात्मना हुतम् ॥ (125)

---

[1]उत्तरं वाक्यमवतारयति—**परिच्छेदेति** । (अतः उषा) [ओत]प्रोतभावेन आत्मना जगतो व्याप्तत्वफलमाह—**पूर्णत्वादिति** । पुंसः पूर्णत्वे हेतुमाह—**ब्रह्मेति** । (121-122) ब्रह्मात्मभावे मन्त्रान्तरमुदाहरति—**यस्मादिति** । (123) '(ऊ)[ओ]ततन्तुवत्' (वा. 121) इत्याद्युक्तेः कारणत्वेन पूर्णत्वप्रसक्तावव्यावृत्ता(म)[न]नुगतवस्त्वसिद्धिः, अत्राह—**आवृतमिति** । (124) व्यतिरेकद्वारा एतद् व्यनक्ति—**तन्नास्तीति** । (125)

---

1. उत्तरं वाक्यं—'नैनेन किञ्चनानावृतम्' इति वाक्यम् ।

* "'नैनेन' इत्यादिवाक्यस्यार्थान्तरमाह — **आवृतमिति** द्वितीयवाक्यस्य व्याख्यान्तरमाह—**संवृतमिति** ।" इति **शास्त्रप्रकाशिका** ।

रूपं रूपं प्रति ह्येष प्रतिरूपो बभूव ह ।
देहं देहं प्रविष्टः सन् तद्देहाकारतामगात् ॥ (126)

मायाभिः प्रत्यगज्ञानैः यदि वाऽनृतबुद्धिभिः ।
गम्यते पुरुरूपोऽज्ञैरेकोऽपि जलसूर्यवत् ॥ (127)

प्रत्यग्याथात्म्यबोधार्थं रूपं मायामयं विभोः ।
शास्त्राचार्यादिना नर्ते ज्ञातुं वस्त्विह शक्यते ॥ (128)

कुतोऽस्य बहुरूपत्वमिति हेतुरिहोच्यते ।
युक्ता ह्यस्येति वचसा मिथ्याज्ञानैकहेतुतः ॥ (129)

स्रजस्तत्त्वापरिज्ञानाद्युक्ता दण्डादयो यथा ।
प्रत्यक्तत्त्वापरिज्ञानादात्मनो हरयस्तथा ॥ (130)

एकोनविंशकण्डिकार्थनिरूपणम्

[1]द्वितीयमन्त्रं व्याचष्टे—**रूपमिति**। (126) 'इ(न्द्रिय)[न्द्रः]' इत्यादेरर्थमाह—**मायाभिरिति** । (127) [2]बहुवचनस्य किं फलम्, अत्राह—**प्रत्यगिति**। (128) '[3]यदि वा' (वा. 127) इत्युक्तं स्पष्टयितुमाकांक्षामाह—**कुतोऽस्येति**। 'युक्ता हि' इत्यादिना तदुच्यते, इत्याह—**हेतुरिति**। आत्मज्ञानात् प्राक् इन्द्रियसंबन्धो धीद्वारा बहुभवननिमित्तमित्यर्थः। (129) इन्द्रियसंबन्धस्य अज्ञानजत्वे दृष्टान्तमाह—**स्रज इति**। (130) 'हरयः शता' इत्या-

---

1. **द्वितीयमन्त्रमिति** 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति ॥'
इति मन्त्रमित्यर्थः ।

2. **बहुवचनस्य**—बहुरूपो बभूव इति बहुरूपत्ववचनस्य । 'बहुभवनस्य' इति पाठः समीचीनः स्यात् ।

3. **'यदि वा' इत्युक्तं**—मिथ्याज्ञानानां बहुभवननिमित्तत्वमिति यावत्

इन्द्रियाण्येव हरयो हरणाद्विषयान्प्रति ।
दश तानि सहस्राणि शतानि प्राणिभेदतः ॥ (131)

नान्यो हेतुरविज्ञानादिन्द्रियादेरिहात्मनि ।
यतोऽयमेव हरयो यावत्संख्या तदाश्रया ॥ (132)

अयमेवेन्द्रियत्वेन देहत्वेन च कल्पितः ।
तथा शतसहस्रादिसंख्याभेदेन चाप्ययम् ॥ (133)

नामरूपक्रियाभेदैर्यथा पूर्वमवादिषम् ।
अयमेव तथाऽरूपः कल्पितोऽविद्ययाऽद्वयः ॥ (134)

तदेतत्कल्पितं सर्वं सहेतु फलवज्जगत् ।
प्रत्यगात्मात्मकं भास्वत्प्रज्ञानघनतत्त्वकम् ॥ (135)

निःशेषोपनिषत्सारस्तदेतदिति सांप्रतम् ।
उक्त्याऽविष्क्रियते साक्षात् कथञ्चिन्यस्तबिल्ववत् ॥ (136)

देरर्थमाह—इन्द्रियाणीति । (131) '[1]अयं वै हरयः' (मि)[इ]त्येतदर्थमाह—नान्य इति । (132)अज्ञानकार्यत्वादिन्द्रियादेरज्ञानमात्रत्वं, कथमात्ममात्रत्वम्, अत्राह—अयमेवेति । (133) आत्मनः अविद्यया देहादिभावकल्पने दृष्टान्तमाह—नामेति । (सत्र) [अव्याकृतब्राह्मणे] यथा नामरूपादिजगदात्मना प्रत्यगात्मा कल्पितः इत्यवोचम् । एवं देहादिभावेनापि कल्पित इत्यर्थः । (134) तस्मात् [2]तन्मात्रत्वं सर्वस्य युक्तमुपसंहरति—तदेतदिति । (135)

निःशेषोपनिषत्सारकथनम्

'[3]तदेतद्ब्रह्म' इत्यादेस्तात्पर्यमाह—निःशेषेति । (136) कोऽसौ [4]सारः,

---

1. अयं वै हरय इतीति 'अयं वै हरयः अयं वै दश च सहस्राणि बहूनि चानन्तानि च ।' इति श्रुतिः ।
2. तन्मात्रत्वं—आत्ममात्रत्वम् ।
3. तदेतद्ब्रह्मेत्यादेः—"तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः इत्यनुशासनम् ।" इति वाक्यस्य ।
4. सारः — निःशेषोपनिषत्सारः ।

अज्ञातं संशयज्ञातं मिथ्याज्ञातमिदं जगत् ।
तदेतदित्यनूद्यैतत् तत्तत्त्वमवबोध्यते ॥ (137)

ब्रह्मेति वास्तवं वृत्तं तावदस्याववबोध्यते ।
ज्ञानात्पुरापि ब्रह्मैव नातो ज्ञानफलं भवेत् ॥ (138)

* अपूर्वमिति कार्यत्वनिषेधायाभिधीयते ।
कारणत्वनिषेधाय तथानपरगीरियम् ॥ (139)

अनन्तरमिति तयो रन्ध्रस्य प्रतिषेधनम् ।
कार्यकारणयोर्बाह्यमबाह्यमिति वार्यते ॥ (140)

* सत्ता वानन्तरगिरा ब्रह्मणः प्रतिषिध्यते ।
विशेषोऽबाह्यशब्देन ततो वाक्यार्थरूपकम् ॥ (141)

नात्मनोऽन्यत्र संभाव्यमपूर्वादि यदीरितम् ।
ब्रह्मात्मैवेत्यतो वक्ति श्रुतिरैकात्म्यसिद्धये ॥ (142)

तमाह—**अज्ञातमिति** । (137) [किमेतत्तत्त्वमिति], तदाह—**ब्रह्मेति** । सर्वस्य ब्रह्मत्वं ज्ञानफलमिति कथं तस्य ब्रह्मत्वम्, अत्राह—**ज्ञानादिति** । ज्ञानोत्पत्तेः प्रागपि सर्वं ब्रह्मैव, न सर्वस्य ब्रह्मत्वं ज्ञानसाध्यमित्यर्थः । (138) अपूर्वादिपदार्थमाह—**अपूर्वमिति** । रन्ध्रं–भेदः, बाह्यम्—अभावः इति विभा(गा)[गः] । (139-140-141) उक्तरूपं ब्रह्म प्रती(चि)[चो]भिन्नमिति शङ्कानिरासाय [1]उत्तरं वाक्यम्, इत्याह—**नात्मन इति** । (142) ब्रह्मात्मनोरन्योन्यैक्यबोधनफलमाह

---

* **अपूर्वमिति** न विद्यते पूर्वं—कारणं यस्येति व्युत्पत्त्या, अपूर्वपदेन सकारणत्वरूपकार्यत्वस्य निषेधः । एवं न विद्यते परं—कार्यं यस्येति व्युत्पत्त्या अनपरपदेन कार्यवत्त्वरूपकारणत्वस्य निषेधः । एवमुत्तरत्रापि ।

* **सत्ता वा इति** अन्तरशब्दितभेदनिषेधात् भेदसापेक्षसामान्यरूपं ब्रह्म न भवति । बाह्यशब्दितविशेषनिषेधात् निर्विशेषं भवति । अतः अनन्तराबाह्यशब्दाभ्यां अव्यावृत्ताननुगतं—निःसामान्यविशेषात्मकं ब्रह्मेत्युक्तं भवतीत्यर्थः ।

1. **उत्तरं वाक्यं**—‘अयमात्मा ब्रह्म’ इति वाक्यम् ।

पारोक्ष्यप्रतिषेधार्थं ब्रह्मात्मैवेति भण्यते ।
ब्रह्मैवात्मेति च तथा संसारित्वनिवृत्तये ॥ (143)

भिन्नं ब्रह्मापरिज्ञानात् संसारित्वं तथात्मनः ।
तत्त्वज्ञानात्तमोध्वस्तौ नेतीत्यात्मावशिष्यते ॥ (144)

सर्वोऽनुभव एवायमतः सर्वानुभूः परः ।
कात्स्न्यार्त्सर्वो भवेदेषः चिन्मात्रत्वात्तथानुभूः ॥ (145)

इतीत्युक्तपरामर्शो वेदाज्ञा चानुशासनम् ।
कर्तव्यमेतद्विज्ञानमिति वेदानुशासनम् ॥ (146)

अस्यातिलङ्घने दोषः संसारानर्थसंगतिः ।
कुर्वतश्च महांल्लाभः आत्मनः कृतकृत्यता ॥ (147)

इति चतुर्थाध्यायस्य पञ्चमं मधुब्राह्मणं समाप्तम्

—: * :—

—**पारोक्ष्येति** । (143) [1]तयोः परमार्थत्वात् कथं निवृत्तिः, अत्राह—**भिन्नमिति** । तस्मादज्ञाननिवृत्तौ निर्विशेषात्मप्रतिपत्तिः, इत्याह—**तत्त्वेति** । (144) 'सर्वानुभूः' इत्यादेरर्थमाह—**सर्व इति** । परस्य सर्वत्वमनुभवत्वं च कुतः, अत्राह—**कात्स्न्यार्दिति** । (145-146-147)

इति चतुर्थाध्यायस्य पञ्चमं मधुब्राह्मणं समाप्तम्

—: * :—

---

1. **तयोः**—पारोक्ष्यसंसारित्वयोः ।

इति चतुर्थाध्यायस्य पञ्चमं ब्राह्मणं समाप्तम् ।

—: * :—

अथ चतुर्थाध्यायस्य षष्ठं ब्राह्मणम्

स्तुत्यर्थं ब्रह्मविद्याया ब्रह्मविद्वंश उच्यते ।
जपोऽयं ब्रह्मविज्ञानजन्मने चोद्यते श्रुतौ ॥ (1)

पुंमत्यूहोत्थिताशङ्कानिवृत्त्यर्थं यथोदितम् ।
ब्रह्मज्ञानस्य वा वंशो यत्नाच्छ्रुत्यायमुच्यते ॥ (2)

यस्यानुशासनं तस्य स्वयंभोः प्रतिपत्तये ।
पौतिमाष्यादिको ग्रन्थः श्रुत्याथ प्रतिपाद्यते ॥ (3)

* अग्रात्प्रभृति वंशोऽयमावेदब्रह्ममूलतः ।
भिन्नहेतुनिषेधार्थं स्वयंभु ब्रह्म शब्द्यते ॥ (4)

अथ चतुर्थाध्यायस्य षष्ठं ब्राह्मणम्

आचार्यवंशकथनम्

वंशब्राह्मणतात्पर्यमाह—**स्तुत्यर्थमिति** । महद्भिः परमपुरुषार्थसाधनत्वेन स्वीकृतत्वात् महाभागेयं विद्या इति (श्रू)[स्तू]यते इत्यर्थः । फलान्तरमाह—**जप इति** । वंशब्राह्मणमन्त्रः ब्रह्मविद्यार्थिनः जपशेषतयोच्यते इत्यर्थः । (1) [1]अर्थान्तरमाह—**पुंमतीति** । (2) मधुब्राह्मणेन संबन्धं दर्शयन् अर्थान्तरमाह—**यस्येति** । (चे)[चि]दात्मनो यस्यैक्यज्ञानमनुशासनं, तस्य परस्य प्रतिपत्तये—**वंशब्राह्मण**मित्यर्थः । (3) ब्राह्मणस्य वंशप्रतिपादकत्वमयुक्तम्, [2]क्रमविरोधात्,

---

अथ षष्ठं ब्राह्मणम्

1. अर्थान्तरमिति वंशब्राह्मणस्येत्यादिः । एवमुत्तरत्रापि ।
2. क्रमविरोधादिति मूलभूताचार्यक्रमेणानभिधानादिति भावः ।

* अग्रादिति अग्रशब्देन शिष्यावसानभूमिः विवक्षिता ।

यस्मादपरतन्त्रोऽयं वेदात्मा ब्रह्म भण्यते ।
मनोवाक्कर्मभिस्तस्मात् भक्त्या तस्मै नमः सदा ॥ (5)

इति चतुर्थाध्यायस्य षष्ठं ब्राह्मणं समाप्तम्

चतुर्थोऽध्यायः समाप्तः

मधुकाण्डं समाप्तम्

अत्राह—**अग्रादिति**। पौतिमाष्यादारभ्य [1]तदादिवेदाख्यब्रह्ममूलपर्यन्तो वंशः ब्रह्मप्रतिपत्त्यर्थमुच्यते इत्यर्थः। स्वयंभुविशेषणकृत्यमाह—**भिन्नेति**। हिरण्यगर्भस्य ब्रह्मणः अस्मदादीनामिव नान्यकृतं[विज्ञानं] किं तु स्वाभाविकमिति प्रतिपत्तये विशेषणमित्यर्थः। (4) हेतूक्तिपूर्वकं नमःशब्दार्थमाह—**यस्मादिति**। (5)

इति चतुर्थाध्यायस्य षष्ठं ब्राह्मणं समाप्तम्

इति श्रीपरमहंसपरिव्राजकाचार्याभयानन्दपूज्यपादशिष्येण भगवदानन्दपूर्णन कृतायां श्रीमद्वार्त्तिकटीकायां न्यायकल्पलतिकायां चतुर्थोऽध्यायः ॥

मधुकाण्डं समाप्तम् ।

---

1. **तदादीति** पौतिमाष्यादीत्यर्थः। अत्र प्रथमान्तनिर्दिष्टः शिष्यः। पञ्चम्यन्तनिर्दिष्टो गुरुः इति बोध्यम्।

इति षष्ठं ब्राह्मणम्

चतुर्थाध्यायः समाप्तः

मधुकाण्डं समाप्तम्

Appendix I.

मधुकाण्डे उद्धृतानां बृहदारण्यकेतरश्रुतीनां सूची

—:*:—

श्रुतिः पुटसंख्या

Appendix II

मधुकाण्डोद्धृतानां स्मृतीनां सूची

स्मृति : **पुटसंख्या**

इति स्मृतीनां सूची समाप्ता

सूचना—न्यायकल्पलतिकायां गौतमधर्मसूत्रस्य स्मृतित्वेन व्यवहारात् तस्यात्रैव सूच्यां संकलनं कृतमिति बोध्यम् ।

Appendix III

मधुकाण्डोद्धृतानां सूत्राणां वार्त्तिकानां च सूची

सूत्रम्		पृष्टसंख्या
1.	अथ योगानुशासनम् (यो. सू. 1-1)	328
2.	अर्थैकत्वादेकं वाक्यम् (पू. मी. 2-1-46)	749
3.	आ केः तच्छीलतद्धर्म (पा. स. 3-2-134)	546
4.	गीतिषु सामाख्या (पू. मी. 2-1-36)	123
5.	तदा द्रष्टुः स्वरूपेऽवस्थानम् (यो. सू. 1-3)	328
6.	द्विवचनविभज्योपपदे (पा. सू. 5-3-57)	367
7.	निगृह्यानुयोगे च (पा. सू. 8-2-94)	658
8.	नित्यस्तु स्यात् दर्शनस्य (पू. मी. 1-1-18)	878
9.	यजजपदशां यङः (पा. सू. 3-3-166)	546
10.	यजतिचोदना द्रव्यदेवता (पू. मी. 4-[illegible]-27)	525
11.	योगश्चित्तवृत्तिनिरोधः (यो. सू. 1-2)	328
12.	वाक्यस्य टेः प्लुत उदात्तः (पा. सू. 8-2-82)	658
13.	विभाषा पृष्टप्रतिवचने हेः (पा. सू. 8-2-93)	658
14.	व्यत्ययो बहुलम् (पा. सू. 3-1-85)	367
15.	समानकर्तृकयोः पूर्वकाले (पा. सू. 3-4-21)	517

वार्त्तिकम्

1.	अप्रामाण्यं त्रिधा भिन्नम् (मी. वा.)	238
2.	अविज्ञाने तु दोषाणाम् (मी. वा.)	239
3.	तत्रैवं शक्यते वक्तुम् (मी. वा.)	821

सूत्राणां वार्त्तिकानां च सूची समाप्ता

—: * :—

Appendix IV

मधुकाण्डोद्धृतानां दार्शनिकानां निबन्धॄणां च सूची

दार्शनिकाः, निबन्धारश्च	पुटसंख्या

इति दार्शनिकानां निबन्धॄणां च सूची समाप्ता

—: ⁕ :—

APPENDIX V

बृहदारण्यकमधुकाण्डस्य

वार्त्तिकश्लोकानां सूची

—:*:—

— शुभं भूयात् —

* क्षकारवत् ज्ञकारः अक्षरद्वयरूप इति अन्ते निर्दिष्टः ।